श्रीसोमनाथसंस्कृतविश्वविद्यालयसंशोधनग्रन्थमाला-१

कृष्णपण्डितविरचिता

# कैवल्यदीपिका

## (प्रभाव्याख्यासहिता)

प्रधानसम्पादकः

**प्रो. अर्कनाथ चौधरी**

सम्पादकः

**डॉ. जानकीशरणः आचार्यः**

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

कैवल्यदीपिका

सम्पादकः
डॉ. जानकीशरणः आचार्यः

श्रीसोमनाथसंस्कृतविश्वविद्यालयसंशोधनग्रन्थमाला-१

कृष्णपण्डितविरचिता

# कैवल्यदीपिका

## (प्रभाव्याख्यासहिता)

प्रधानसम्पादकः

**प्रो. अर्कनाथ चौधरी**

कुलपतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

सम्पादकः

**डॉ. जानकीशरणः आचार्यः**

सहायकाचार्यः (वेदान्तः)

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

**श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरातम्)**

*प्रकाशकः*

**प्रो. महेन्द्रकुमारः अं. दवे**

कुलसचिवः (का.)

श्रीसोमनाथसंस्कृतविश्वविद्यालयः

राजेन्द्रभुवनमार्गः, वेरावलम्-362 226

गीरसोमनाथजनपदम्, गुजरातम्

दूरभाषः - 02876-244532, फेक्स - 244417

www.sssu.ac.in

© Shree Somnath Sanskrit University, Veraval- 2018

*सहसम्पादकः समन्वयकश्च*

**डॉ. कार्तिकपण्ड्या**

संशोधनाधिकारी

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

**प्रथमं संस्करणम्** - एप्रिल्-2018

**प्रतयः** - 350

**ISBN** - 978-93-83097-25-8

**मूल्यम्** - 425/-

**मुद्रकः** - जलाराम ग्राफिक्स एण्ड ऑफसेट,
परमहंस अपार्टमेंट के पास, एस.टी. मार्गः, वेरावलम्-362 226
गीरसोमनाथजनपदम्, गुजरातम्
दूरभाषः - 02876-221861

Shree Somnath Sanskrit University Research Grantha Series - 1

## Kṛṣṇa Paṇḍita's

# Kaivalyadīpikā

## (With Prabhā Commentary)

*Cheif Editor*
**Prof. Ark Nath Chaudhary**
Vice-Chancellor
Shree Somnath Sanskrit University, Veraval

*Editor*
**Dr. Janakisharan Acharya**
Assistant Professor (Vedanta)
Shree Somnath Sanskrit University, Veraval

**Shree Somnath Sanskrit University, Veraval (Gujarat)**

*Published by :*
**Prof. Mahendra Kumar A Dave**
The Registrar (I/c.)
Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval - 362 226.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
www.sssu.ac.in

© ***Shree Somnath Sanskrit University, Veraval- 2018***

*All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.*

*Assistant Editor & Co-ordinator :*
**Dr. Kartik Pandya**
Research Officer
Shree Somnath Sanskrit University, Veraval

| | | |
|---|---|---|
| **Edition** | : | First |
| **Year** | : | April - 2018 |
| **Copies** | : | 350 |
| **ISBN** | : | 978-93-83097-25-8 |
| **Price** | : | 425/- |

**Printed By** : JALARAM GRAPHICS & OFFSET
Nr. Paramhans Apartment, B/h. Hotel Kaveri,
S.T. Road, Veraval-362 266
Dist. Gir Somnath, Gujarat, India.
Tel. (02876) 221861

# शुभाशंसनम्

महत: प्रमोदस्यायं विषयो यत् श्रीमत्कृष्णप्रणीतं कैवल्यदीपिकाख्यं ग्रन्थरत्नं विश्वविद्यालयेन प्राकाश्यमानीयते स्वोपज्ञप्रभाव्याख्यासमन्वितम्। श्रीसोमनाथ-संस्कृतविश्वविद्यालयेन प्रतिवर्षं विशिष्टानां विद्यावारिधिशोधप्रबन्धानां ग्रन्थरूपेण प्रकाशनाय काचिद् ग्रन्थमाला समारब्धा। तत्रादौ श्रीमत्कृष्णविरचितं स्वोपज्ञप्रभा-व्याख्यासमन्वितं कैवल्यदीपिकेति अप्रकाशितमातृकाग्रन्थं एतद्ग्रन्थमाध्यमेन आलोकपथमानीयत इति महान्तमानन्दमनुभवामि।

परमार्थतत्त्वदर्शनाय प्रवृत्तेषु नैकविधदर्शनेषु साक्षाद् आत्मतत्त्वप्रतिपादनाद् वेदान्तदर्शनम् इतरदर्शनापेक्षया मूर्धन्यं स्थानं भजते। अप्रकाशितमातृकाग्रन्थोऽयम् अद्वैतवेदान्तस्य प्रकरणग्रन्थो वर्तते। यद्यपि अद्वैतवेदान्तसम्बद्धा बहवो ग्रन्था बहुत्र विद्वज्जनैः संशोधनपुरःसरं प्राकाश्यमानीताः तथाप्येदानीमपि ग्रन्थतमिलशारदा-देवनागरीप्रभृतिषु नैकासु लिपिसु अमुद्रिता ग्रन्थाः प्राच्यविद्याग्रन्थालयेषूपलभ्यन्ते। अतः तेषां ग्रन्थानां प्रकाशनस्य अनुष्ठानमवश्यमाचारणीयम्।

प्रायः अष्टादशशताब्दे विरचितममुं सटीकं ग्रन्थरत्नम् आधारीकृत्य भृशं परिश्रम्य प्रो. वेम्पटिकुटुम्बशास्त्रिणः साधुश्रुतिप्रकाशदासमहोदयस्य च मार्गदर्शने सम्पाद्य श्रीसोमानाथसंस्कृतविश्वविद्यालये प्राप्तशोधोपाधि: तत्रैव दर्शनविभागे वेदान्तशास्त्रस्य प्रवाचकत्वेन कार्यरतः डॉ. जानकीशरण-आचार्यः ग्रन्थरूपेण प्रकाशनाय समर्पितवान्। सम्पादकेन महता परिश्रमेण टीकारूपग्रन्थस्य ये प्रतिपाद्याः विषया: समीक्षिता: सन्ति ते अध्यायक्रमानुरोधेन अधोनिर्दिश्यन्ते।

प्रथमेऽध्याये ''कृष्णः - तद्देशकालकृतिवैदुष्यादीनां विचार:'' इति शीर्षकेण कैवल्यदीपिकाकारस्य देशकालादिपरिचितिः, भाषाच्छन्दोव्यवस्था, सविवरणम् उपलब्धमातृकयोर्गुणदोषविचारः, स्वीकृतमातृकाया: सम्पादनपद्धतिः इत्यादयो विषया विचारितास्सन्ति। द्वितीयोऽध्यायः ''कैवल्यदीपिकायाः पाठसमीक्षात्मकं सम्पादनम्'' पाण्डुलिपिसम्पादनपद्धतिमाश्रित्य कृतो वर्तते। वस्तुतः कैवल्यदीपिकाटीकायाः महत्त्वमितोऽपि वर्तते यदियं सर्वतन्त्रस्वतन्त्राणां वाचस्पतिमिश्राणां भामतीव्याख्यानमाश्रित्य तदुपरि विरचिता वर्तते।



वेदान्तसिद्धान्तनिगूढार्थप्रतिपादने टीकेयं महोपकारिका पाठकानां कृते भवेदित्यत्र नास्ति संशयलेशोऽपि। सुवर्णे सुगन्धिरयं विद्यते यत् स्वयं कैवल्यदीपिकाकारः पद्यमयात्मिकायाः कैवल्यदीपिकायाः स्पष्टार्थं बोधयितुकामः स्वोपज्ञां प्रभां व्याख्यामपि चकार।

''तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्'' इति तृतीयेऽध्याये मङ्गलाचरणम्, अनुबन्धचतुष्टयम्, ब्रह्मणः स्वरूपतटस्थलक्षणे, साधनचतुष्टयम्, अध्यासः, जीवात्मनोः स्वरूपम्, अविद्या, चिच्चातुर्विध्यम्, लक्षणा, समाधिः, जीवद्विदेहमुक्ती, अद्वैतसिद्धान्तानां भामतीविवरणप्रस्थानेन सह सिद्धान्तान्तरैः तौलनिकमध्ययनम् इत्यादिविषयान् सम्यक् विचार्य ''संशयच्छेदप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्'' इत्याख्ये चतुर्थेऽध्याये ब्रह्मणः अवाङ्मनसगोचरत्वम्, वेदानाम् अपौरुषेयत्वम्, अन्तःकरणवृत्तिविचारः, विद्वदविद्वत्कर्मफलवैषम्यम्, प्रतिबिम्बवादः, ज्ञानकर्मसमुच्चयनिराकरणम्, श्रुतिवाक्यानां विरोधपरिहारः, यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः, विधिविचारः, मायास्वरूपवर्णनम्, प्रतिबिम्ब-सत्यताविचारः, आत्मनः अखण्डार्थत्वम्, अज्ञानभूसप्तकम्, ज्ञानभूसप्तकम्, चतुर्विधस्संन्यासः, आनन्दमीमांसा इत्यादिविषया विवेचिता: सन्ति।

सम्पादकेन डॉ. जानकीशरण-आचार्येण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सहायकाचार्येण सम्पादितस्य ग्रन्थस्यास्य परिशिष्टभागे संयोजितया विस्तृत-विषयानुक्रमणिकया, पद्यानाम् आद्यपादानुक्रमणिकया, प्रयुक्तानां छन्दसां सूच्या, उदाहृतानां ग्रन्थानां सूच्या, प्रभाव्याख्यायाम् उदाहृतानां श्लोकानां श्रुतिस्मृति-वाक्यानाञ्च सूच्या, उल्लिखितानां न्यायानाञ्च सूच्या युतः एष ग्रन्थः अध्येतॄणाम् उपकाराय, जिज्ञासूनां ज्ञानाय, अनुसन्धातॄणाञ्चोपकाराय कल्पेत इत्याशासे।

अहं वेदान्तशास्त्रविशेषज्ञस्य श्रीमत: जानकीशरण-आचार्यस्य कृतिमिमां विश्वविद्यालयपक्षतः प्राकाश्य भृशं मोमुदीमि, बहुभिः शुभकामनाभिश्च डॉ. जानकीशरणाचार्यं सयोजयामि। ग्रन्थस्यास्य शीघ्रतया सौष्ठवपूर्णप्रकाशनार्थं प्रकाशनाधिकारिणं डॉ. कार्तिकपण्ड्यामहोदयं आशिषा संवर्द्धयामि।

दिनाङ्कः २३.०४.२०१८
वैशाख-शुक्ल-अष्टमी
वि.सं. २०७५

**प्रो. अर्कनाथ चौधरी**
कुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य

# मङ्गलाचरणम्

अपारकरुणासिन्धुं ज्ञानदं शिष्यवत्सलम् ।
ध्वस्ताज्ञानप्रपञ्चकं शान्तं विज्ञानरूपिणम् ।।

श्रीवैष्णवमताब्जं तं सच्छास्त्राणां प्रवर्तकम् ।
रामप्रकाशमाचार्यम् अच्युताद्यं वयं नुमः ।।

# उपोद्घातः

इह खलु विश्वस्मिन् विश्वे सत्स्वप्यनेकेषु सच्छास्त्रेषु ब्रह्मविद्यापराख्यम् अध्यात्मशास्त्रमेव निःश्रेयससाधनतया श्रेष्ठं परमुपादेयञ्चेति श्रुतिस्मृतिभिः चैकमत्येनोद्घुष्यते। ''**अध्यात्मविद्या विद्यानाम्**'' इति परम्परामनुसृत्य सर्वेऽपि ऋषयः ज्ञानिनश्च अध्यात्मज्ञानमेवाश्रयन्ते। ''**सा विद्या या विमुक्तये**'' इतीयम् उक्तिः मोक्षपरकं शास्त्रमेव प्रकृतविद्यात्वेन अभ्युपैति। सुभाषितेऽपि ''**विद्या तु वैदुष्यमुपार्जयन्ती जागर्ति लोकद्वयसाधनाय**'' इत्युक्तं भवति। अथ च वैशेषिकसूत्रं ''**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः**'' इत्यनेन शास्त्राणां द्वैविध्यं सङ्केतयति। एवञ्च सति धर्मार्थकामानां त्रिविधानामुद्देश्यानां तत्सम्बद्धानां शास्त्राणाञ्च साधनत्वं मोक्षशास्त्रस्य च साध्यत्वं सम्पद्यते। अत एव मुण्डकोपनिषदि ''**द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते**'' इति अध्यात्मशास्त्रस्यैव पराविद्यात्वेन निर्देशः कृतो वर्तते। यया विद्यया लौकिकं ज्ञानं जायते सा अपरा विद्या। यया च अक्षरब्रह्मविषयकं ज्ञानं जायते सा परा विद्या इत्युच्यते।

## अद्वैतसिद्धान्तविकासः –

अतिप्राचीनकाले सेयं परा ब्रह्मविद्या प्रथममुपनिषत्सु प्रतिष्ठिता। ततो महाभारतान्तर्गतश्रीभगवद्मुखारविन्दान्निःसृतायां बादरायणशाण्डिल्यादिभिः महर्षिभिर्मीमांसितार्थायां सर्वविषयावगाहित्वेन ज्ञानविज्ञानसमन्विताध्यात्मविद्या-चरमोत्कर्षेण निःश्रेयसपथप्रदर्शिकायां ब्रह्मविद्यारूपायां श्रीमद्भगवद्गीतायां तथा अन्येषु ग्रन्थेषु सङ्क्षेपतस्तत्सिद्धान्तरूपेण सङ्गृहीता। ततः करुणावरुणालयेन भगवता बादरायणेन शारीरकसूत्रापराभिधाने ब्रह्मसूत्रग्रन्थे मीमांसान्यायपद्धत्यो-



पनिषद्गतजीवब्रह्मविषयकानेकवाक्यार्थविचारेण जीवब्रह्मैक्यसिद्धान्तः प्रस्थापितः। वेदान्ते प्रस्थानत्रयमङ्गीक्रियते – (1) श्रुतिप्रस्थानम्, यथा उपनिषत्, (2) स्मृतिप्रस्थानम्, गीतादिकम्, (3) न्यायप्रस्थानम्, ब्रह्मसूत्रादिकम्। तत्र उपनिषत्सु ऋषीणां सत्यद्रष्टॄणां वा सत्योपलब्ध्यादिकं विधृतम्। गीतादौ ऋषिभिः विधृतम् उपलब्ध्यादिकं भाषान्तरेण श्रीभगवता उपस्थापितम्। ब्रह्मसूत्रादौ तु श्रुतिस्मृतिवचनादिकं युक्तिसहायेन दृढीकृतम्।

भगवच्छङ्करपादात् प्राक् श्रीगौडपादाचार्यैः माण्डूक्योपनिषत्कारिकाः प्रणीताः। तदनु अद्वैतसिद्धान्तस्य विकासाय श्रीशङ्करचार्यैरुपनिषद्भगवद्गीता-ब्रह्मसूत्राणाम् उपरि गभीराणि भाष्याणि प्रणीतानि, यस्योपरि श्रीमत्सुरेश्वराचार्यैः बृहदारण्यकादिभाष्योपरि बृहद्वार्तिकग्रन्थाः निर्मिताः। ततः श्रीपद्मपाद-वाचस्पतिमिश्र-आनन्दगिरि-विद्यारण्यादिभिः बहवो हि पञ्चपादिका-भामत्यादिग्रन्थाः प्रणीताः। अनन्तरमन्यैः शास्त्रविचक्षणैः वेदान्ताचार्यैः टीकानामुपरि टीका विरचिताः। अद्वैतसिद्धान्ते नैकैराचार्यैः परमतत्त्वबोधनाय नैके पाण्डित्यपूर्णग्रन्था उट्टङ्किताः। तेषूपनिषद्-गीता-सूत्र-भाष्य-वादप्रधान-अनुभवप्रधान-काव्यात्मकशैलीप्रधाना ग्रन्थास्सन्ति।

तदनु सूक्ष्मदर्शिनो वेदान्तशास्त्रविशारदा विरुद्धमतवादिनां शङ्कानिराकरणेन वेदान्तसिद्धान्तविशदीकरणाय वेदान्तग्रन्थेषु व्युत्पत्तिविकासाय तत्तत्काले स्वतन्त्रान् बहून् बृहतो ग्रन्थान् विरचयामासुः। तथा हि ब्रह्मसिद्धिः, नैष्कर्म्यसिद्धिः, सङ्क्षेपशारीरकम्, इष्टसिद्धिः, खण्डनखण्डखाद्यम्, न्यायमकरन्दः, पञ्चदशी, अद्वैतदीपिका, सिद्धान्तलेशसङ्ग्रहः, अद्वैतसिद्धिः इत्याद्याः। केचन अन्ये अत्रानुक्ता ग्रन्था अद्वैतसिद्धान्तविरोधिसाङ्ख्यन्यायमीमांसाबौद्धार्हतादिपूर्वपक्ष-खण्डनात्मकत्वात् दुरूहतर्कजालजटिलप्रौढवाक्सरणिनिबद्धा विविधविवरण-टीकोपटीकादिपरिष्कृता अद्य पण्डितमण्डलीलोचनगोचरा विद्योतन्ते।

अमीषाम् अद्वैतग्रन्थानां विषयदृष्ट्या त्रैविध्यं वक्तुं शक्यते। शारीरकभाष्य-पञ्चपादिकाभामत्याद्याकरग्रन्थाः; नैष्कर्म्यसिद्धिः, खण्डनखण्डखाद्यम्, अद्वैतसिद्धिः, सिद्धान्तलेशसङ्ग्रहादिवादप्रधाना ग्रन्थाः; पञ्चदशी, विवेकचूडामणिः, उपदेशसाहस्री इत्याद्या अनुभवप्रधाना ग्रन्था इति। एवमेव केचन लघुशरीरा अपि अतिगभीराशयाः प्रमाणमालाः, भेदधिक्कारः, तत्त्वविवेकः, तत्त्वानुसन्धानम्, अद्वैतरत्नरक्षणम्,

अद्वैतचिन्तामणिः, स्वाराज्यासिद्धिः इत्यादयः शतशो ग्रन्था विद्वद्भिः प्रणीता उपलभ्यन्ते। परमेतेषां ग्रन्थानाम् अर्थावगमनाय सुलभतया चावबोधायान्येऽपि प्रकरणग्रन्था विरचिताः सन्तः उपकुर्वन्ति। ते च प्रकरणग्रन्थाः सिद्धान्तमात्र-प्रदर्शनपराः, खण्डनमण्डनपराः अनुभवात्मकभावाविष्करणपराः, काव्यशैल्या सिद्धान्तप्रदर्शनपराश्चेति चतुर्धा विभक्तुं शक्यन्ते। एते सर्वेऽपि ग्रन्थाः ''शास्त्रैकदेश-सम्बद्धं शास्त्रकार्यान्तरे स्थितम्। आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः'' इति लक्षणलक्षितास्सन्तः शास्त्रस्यैव कार्यसाधका वर्तन्ते।

तथैव कालदृष्ट्याऽपि सर्वदर्शनोत्तमाद्वैतवेदान्तदर्शनस्य विकासकालः प्राचीन-मध्यम-आधुनिकभेदेन त्रिधा प्रविभक्तुं शक्यते। दशमशतकान्तः प्राचीनभागो यस्मिन् काले शाङ्करभाष्यं तद्व्याख्यानभूतानां ग्रन्थानामाविष्करणम्, भामतीप्रस्थानस्य विवरणप्रस्थानस्य च बीजावापः, सङ्ख्येयानां स्वतन्त्रग्रन्थानाञ्च आविर्भावोऽभवत्। मध्यमो भागः षोडशशतकान्तो यत्र न्यायशैल्या निबद्धा न्यायवैशेषिकादिमतसिद्धभेदवादखण्डनपराः स्वतन्त्रभूता अद्वैतग्रन्थाः प्रादुरभूवन्। आधुनिककालः अद्यावधिपर्यन्तः स्वीकर्तुं शक्यते।

## प्रकृतग्रन्थस्य बीजम् –

शृङ्गेरिस्थ-राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धिपरिसरे अद्वैतवेदान्ते 2012 तमे वर्षे सस्वर्णपदकमाचार्यपदवीमवाप्य वेदान्तशास्त्रे मातृकाग्रन्थे शोधकार्यस्य सम्पिपादयिषया गुरुणा प्रेरितस्सन् अहं विभिन्नहस्तप्रतिसङ्ग्रहालयान् अगमम्। आचार्यकक्षायाम् अध्ययनकाले एव विश्वविद्यालयानुदानायोगेन (UGC) कनिष्ठशोधाध्येतृवृत्त्यर्थं (Junior Research Fellowship) मम पात्रतोदघुष्यत। अत: वेदान्तदर्शनसम्बद्धे मातृकाग्रन्थे एव शोधकार्यं करणीयमिति मे मतिर्दृढतमा जाता। तत्र तावत् मद्रासनगरस्थ-अड्यारहस्त-प्रतिसङ्ग्रहालये अद्वैतवेदान्त-सम्बन्धा मातृकाः पर्यशीलम्। तत्राऽहं चिकीर्षितशोधकार्यार्थं द्वौ मातृकाग्रन्थौ अलभे। तत्र वाचस्पतिमिश्रकृतभामतीव्याख्यानस्य अच्युतकृष्णानन्दतीर्थकृता (1650-1750 A.D.) भावदीपिका इत्याख्या एका मातृका, अपरा च कृष्णविरचिता (1800 A.D.) सव्याख्या कैवल्यदीपिका। तत्र कल्पतरुपरिमल-सङ्ग्रहरूपा भावदीपिका अड्यारहस्तप्रतिसङ्ग्रहालये त्रिषु भागेषूपलभ्यते। तेषु (1) 39.E.9 इति ग्रन्थक्रमाङ्काङ्किता देवनागरीलिपौ अपूर्णा अक्षरभङ्गयुता



चतुस्सूत्रीपर्यन्ता। (2) 30.A.12 इति ग्रन्थक्रमाङ्कनिर्दिष्टा ग्रन्थलिपौ अतिप्राचीना, जीर्णा, अक्षरभग्ना च सती द्वितीयतृतीयतुरीयाध्यायपर्यन्ता उपलभ्यते। (3) 39.E.10 इति ग्रन्थक्रमाङ्कसूचिता देवनागरीलिपौ खण्डद्वये भामतीव्याख्यानस्य द्वितीयतृतीयाध्यायुता प्राप्यते। अत्र प्रथमतृतीय-क्रमाङ्के निर्दिष्टं मातृकाद्वयमपि द्वितीयक्रमाङ्के सूचिताया ग्रन्थलिपिमातृकायाः प्रतिकृतिः (Transcript Copy) वर्तते। अस्या मातृकायाः स्थिरचित्रं (Camera copy) स्वीकृत्य किञ्चिदध्ययनमहमकार्षम्। किन्तु शोधकार्यस्य अल्पावधित्वात् 1011 पुटात्मिकेयं मातृका सम्प्रति विद्यावारिधिकालावधौ कदाचित्सम्पादयितुं न शक्यते। भगवदनुग्रहेण अस्याः सम्पादनं प्रकाशनञ्च भविष्यति भविष्यति इति धियाऽहं कृष्णविरचितसव्याख्यायाः कैवल्यदीपिकायाः सम्पादने प्रावृत्ते। अस्या मातृकाया एकां प्रतिलिपिं (xerox) अहम् अड्यारहस्तप्रतिग्रन्थालयात् ऑगस्ट् 2012 तमे वर्षे लेभे। अथोऽथ तादृशे विषये शोधकार्यस्यावश्यकतामुपयोगिताम् अस्पृष्टतामनुद्भिन्नताञ्च विचिन्त्य तादृशे विशिष्टे अनुसन्धानविषये मार्गं निर्देष्टुं ससोमस्य सोमनाथस्य दिव्यसन्निधौ श्रीसोमनाथसंस्कृतविश्वविद्यालये तत्समये कुलपतिपदम् अलङ्कुर्वाणा: वेम्पटिकुटुम्बशास्त्रिण: सम्प्रार्थिता:। तैश्च मनीषिप्रवरै: मदीया प्रार्थना अङ्गीकृता। तदनु सम्पादनमिदम् आरब्धम्।

## अद्वैतवेदान्तसाहित्ये कैवल्यदीपिका –

अद्वैतवेदान्तनिबन्धेषु बहवो हि निबन्धाः काशी-पुण्यपत्तन-मद्रास-मुम्बापुर्यादिनगरेषु विद्वरेण्यैः संशोधनपुरस्सरं प्राकाश्यं नीत्वा महानुपकारः कृतः। तथापि नैकासु लिपिषु विरचिता एते ग्रन्थाः प्रकाशिता अप्रकाशिताश्च वर्तन्ते। तत्र ग्रन्थ-तमिल-तेलुगु-कन्नड-शारदा-देवनागरीप्रभृतिषु नैकासु बहवो हि ग्रन्था येऽमुद्रितास्सन्तो विभिन्नेषु प्राच्यविद्याग्रन्थालयेषूपलभ्यन्ते। अमीषु ग्रन्थेषु उपलभ्यन्ते नैके वेदान्तविषया ये मुमुक्षूणां कृते नितरामुपयोगिनस्सन्ति। अतीव सरलया रीत्या विविधदृष्टान्तपुरस्सरं, विभिन्नमतसिद्धान्तोपवर्णनपूर्वकमद्वैतमतस्य श्रेष्ठ्यमुपादेयत्वं च वर्णयन्त इमे न्यायप्रमाणोपबृंहिताः प्रकरणग्रन्थाः शास्त्रप्रमेयं स्फुटं प्रबोधयन्ति।

तादृशनिबन्धेष्वेकमिदं ग्रन्थरत्नं कैवल्यदीपिका नाम यदद्यावध्यप्रकाशितं निगूढमिवासीत्। इयं कैवल्यदीपिका वेदान्तसिद्धान्तार्थजिज्ञासून् नितरामुपकरोति।

इयं स्वोपज्ञप्रभाव्याख्यायुता कैवल्यदीपिका कृष्णविरचितेति ग्रन्थस्य पुष्पिकावाक्येन (Colophon) स्फुटीभवति। अन्येषां प्राचीनग्रन्थकर्तॄणामिवैतेषामपि देशकालजीवनवृत्तादिविषये सम्यक् परिचयो न प्राप्यते। अतो ग्रन्थान्तरावलोकनेन सङ्कलितं यत्किञ्चिद्वृत्तमत्रोपन्यस्यते।

अयं कृष्णपण्डितः ब्रह्मानन्दापराभिधानकृष्णानन्दयतेश्शिष्यो दक्षिणदेशीयः तमिलभाषासाहित्ये च निष्णातश्चोलदेशवासीति अद्वैतवेदान्तसाहित्येतिहासकोशकारः र.तङ्गस्वामिशर्ममहोदयः मनुते। मातृकाया द्वयोः प्रकरणयोः आरम्भे अन्ते च ''**श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः**'' इत्यनेन वाक्येन ज्ञायते यदस्य गुरोर्नाम ब्रह्मानन्दः। ग्रन्थस्यान्तेऽपि अयं ग्रन्थकारः स्वगुरुं नमस्कृत्य स्वकृतार्थतां प्रदर्शयति। तत्रायं स्पष्टं सङ्केतयति यदस्य गुरोर्नाम ब्रह्मानन्द इति वर्तते। यथा- ''**ब्रह्मानन्दाद्यतीन्द्रादपि विपुलकृपां प्राप्य मुक्तो धरण्याम्**'' इति। अस्यैव मातृकायाः स्वोपज्ञप्रभाव्याख्यायाम् अयं ब्रूते यदस्य गुरुः यतीन्द्रो ब्रह्मानन्दः अन्वर्थनामा वर्तते। ब्रह्मानन्दस्य अपरं नाम कृष्णानन्दयतिः इत्यस्ति। अस्य ग्रन्थकारस्य वंशविषये साक्षात् प्रमाणं विवरणञ्च नोपलभ्यते तथापि ग्रन्थकारेण प्रणीतासु कृतिषु एतद्विषये ईषन्निर्देशः प्राप्यते। तद्यथा अनेन कृष्णेन विरचितायाः ''मुनिभावप्रकाशिका'' इति भगवद्गीताव्याख्याया आद्येषु पद्येषु एष सङ्केतयति यत् स भारद्वाजगोत्रीयनृसिंहगुरोः पुत्रः, श्रीरामदेशिकस्य भागिनेयः च। स्वीयमातुलाद् व्याकरणमीमांसावेदान्ताद्यनेकशास्त्राणामध्ययनं चकार।

अस्या मातृकायाः कर्तुः कालविषयेऽपि स्पष्टं विवरणं नोपलभ्यते। मातृकाग्रन्थोऽयं तमिलभाषायां ताण्डवरायस्वामिना विरचितस्य कैवल्यनवनीतस्य संस्कृतीकरणरूपः पद्यबद्धोऽस्तीति केचन मन्वते। मतमेतत् प्रामाणिकमप्यस्ति। अयं ताण्डवरायस्वामी सप्तदश-अष्टादशशतकीयः चोलदेशीयो नन्निलग्रामवासिनारायणसरस्वतीशिष्यः आसीदिति केचन आचक्षते। केचित्तु ताण्डवरायस्वामिनं तिरुवानैक्कावलगोपालशास्त्रिणः प्राप्तविद्यम्, नारायणगुरोः प्राप्तदीक्षम्, परमशिवेन्द्रशिष्यं सदाशिवब्रह्मेन्द्रसतीर्थ्यश्चेति भणन्ति। ताण्डवरायस्वामिना तमिलभाषया निबद्धं ''**कैवल्यनवनीतम्**'' तमिलप्रदेशे अद्वैतिनां मध्ये अतीव प्रसिद्धं वर्तते। अस्य कैवल्यनवनीतस्य कासुचित् भाषासु अनुवादो विद्वद्भिः कृतः। तत्र Dr. Karl Graul (1814-1864 A.D.) इति नामकेन



जर्मनदेशस्थविदुषा कैवल्यनवनीतस्य जर्मनभाषायाम् Bibliotheca Tamulica seu Opera Praecipua Tamuliensium (1854-1865 A.D.) इति शीर्षाङ्कितेे ग्रन्थसङ्ग्रहे अनुवादः कृतः। मलयालमभाषायामस्यानुवादः Acharya Thunjathe Ezuththachchan नामकेन विदुषा ''**प्रबोधामृतम्**'' इति शीर्षाङ्कितग्रन्थे कृतः। कैवल्यनवनीतस्य समग्रोऽपि संस्कृतानुवादः कृष्णपण्डितेन ''**कैवल्यदीपिका**'' इति शीर्षकाङ्कितग्रन्थे पद्येषु निबद्धः। संस्कृतानुवादेन साकमनेन कृष्णेन कैवल्यदीपिकायाः उपरि ''**प्रभा**'' इत्याख्या स्वोपज्ञव्याख्यापि कृता। अतः सर्वथापि तमिलकविताण्डवरायस्वामिनः अर्वाचीनोऽयं कैवल्यदीपिकाकारः कृष्णपण्डितः अष्टादशशतकीयः (1800 A.D.) इति कल्पयितुं शक्यते। अनेन कल्पनेन ग्रन्थकारस्यास्य समयो विक्रमादित्यवर्षस्य अष्टादशशताब्द्या मध्यमभाग इति निर्धारितो भवति। ग्रन्थोऽयं गुरुशिष्ययोः संवादरूपेण निबद्धः सन् प्रस्थानत्रयम् आलोड्य वेदान्तस्य सारं प्रकटयति। प्रकरणग्रन्थरूपेण इयं कैवल्यदीपिका प्रायः सर्वानपि वेदान्तसिद्धान्तान् विवृणोति। अतः मया **स्वोपज्ञप्रभाव्याख्याहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च** श्रीसोमनाथसंस्कृतविश्वविद्यालये विद्यावारिधीत्युपाधये शोधकार्यत्वेन स्वीकृतम्। अद्वैतवेदान्ते ईदृशं ग्रन्थरत्नमद्यावधि अप्रकाशितम् आसीत्। अतस्तस्याविष्करणमेव ग्रन्थप्रबन्धस्य अस्य मुख्यमुद्देश्यम्।

अस्याः कैवल्यदीपिकायाः द्वे हस्तप्रती मद्रासनगरस्थ-अड्यारहस्तप्रतिसङ्ग्रहालये उपलभ्येते। तत्र हस्तलिखितपुस्तकमेकं ग्रन्थलिपौ निबद्धं वर्तते किन्तु तदतिजीर्णमपूर्णञ्चास्ति। अपरा एका सुवाच्या पूर्णा च हस्तप्रतिकृतिः देवनागर्यां वर्तते या अष्टात्रिंशदधिकपञ्चशतपृष्ठपरिमाणा (538) वर्तते। अस्याः विद्यमानमातृकायाः मूलमातृका तु मदुरानगरवास्तव्यस्य श्रीमतः एम्.आर्. सुन्दररमणशास्त्रिवर्यस्य सविधे आसीत्, यां मातृकामाधारीकृत्य अड्यारग्रन्थालस्य पण्डिताभ्यां श्रीरामनाथशास्त्री, टि.आर्. शेषाद्रिशर्मा च इत्येताभ्यां कर्गजमातृका परिलिखिता। अस्या मातृकायाः लेखनकार्यं 1915 ख्रीष्टाब्दे दिसम्बरमासे 29 दिनाङ्के सम्पूर्णतामुपगतम्। ततः 1916 ख्रीष्टाब्दे जनवरीमासे अष्टमे दिनाङ्के मातृकेयम् अड्यारहस्तप्रतिसङ्ग्रहालयाय समर्पिता। इदं विवरणं मातृकायाः अन्ते उपलभ्यते।

**पाठसम्पादनस्य सिद्धान्ताः –**

केचन इत्थं चिन्तयन्ति यत् पाठसमालोचनशास्त्रं पाश्चात्त्यैः विद्वद्भिः प्रवर्तितम्। पाठसमालोचनस्य इयं पद्धतिः साम्प्रतिके काल एव समुत्पन्नेति अथवा अस्माकमाचार्याः पाठसमालोचनविषये न जानन्ति स्म इति। वस्तुतः भारतीयार्षज्ञानपरम्परायां पाठसमालोचनं प्राक्कालादारभ्य वर्तते। व्याख्यातारः एव अस्माकं प्राचीनपरम्परायां सर्वप्रथमं पाठसमालोचका आसन्। प्राचीनेषु व्याख्यानेष्वपि व्याख्यातृभिः पाठभेदाः दर्शितास्सन्ति। यथा शारीरकभाष्य-महाभाष्यादिनैकेषां ग्रन्थानां व्याख्यानेषु पाठभेदाः सूचितास्सन्ति।

भारते लेखनस्य पद्धतिः कदाऽऽरभ्य वर्तते इत्यत्र विद्वांसो मतैक्यं न भजन्ते। किन्तु उपलब्धैः प्रमाणैः प्राप्तैश्च शिलालेखैः इत्थं ज्ञायते यत् भारते लेखनस्य पद्धतिः अतिप्राचीना वर्तते। अपि च वेदाङ्गसाहित्ये, रामायणे, कौटिल्यार्थशास्त्रे, वात्स्यायनकामसूत्रे ''लिपिः'', ''लिपिकारः'', ''यवनानी'', ''ग्रन्थः'', ''स्वरितचिह्नम्'', ''पत्रम्'', ''पुस्तकम्'' इत्यादिपदानां प्रयोगो दृश्यते। तस्मात् प्राक्कालेऽपि लेखनस्य प्रचलनमासीदिति अभ्यूहितुं शक्यते।

तर्ह्यत्र प्रश्नो जायते यत् भारते यदि अतिप्राचीनकालाद् ग्रन्थलेखनस्य परम्परा आसीत्तर्हि प्राक्कालीना लिखितग्रन्थाः किमर्थं नोपलभ्यन्ते। अत्र कारणद्वयं प्रामुख्यं भजते — (1) भारतदेशे प्रायः तालपत्राणां लेखनं भूर्जपत्रस्योपरि भवति स्म। अत्र औष्णस्य आधिक्येन भूर्जपत्रं शीघ्रं जीर्णं भूत्वा नष्टं जायते। (2) प्राचीनकाले भारतराष्ट्रे धार्मिकवाङ्मयं साहित्यवाङ्मयं वा कण्ठस्थीकरणपरम्परया संरक्ष्यते स्म। वैदिकशिक्षाप्रणाल्यां यः मौखिकरीत्या ग्रन्थानाम् अध्यापनपरम्परया नूतनग्रन्थानां लेखनं प्रायः न क्रियते स्म। यस्तु लिखितपाठं पठति स्म सः अधमपाठकत्वेन परिगण्यते स्म। यथोक्तं पाणिनीयशिक्षायाम् –

''**गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥**'' इति।

अतः इदं तु निश्चितमेव यत् वैदिककालेऽपि ग्रन्थानां श्रुतिपरम्परया सह लेखस्यापि पद्धतिः प्रचलिता आसीत्।



''**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**''

इत्यात्मदर्शनं विदधती नैगमश्रुतिः तत्त्वसाक्षात्कारपरम्परामपि सूचयति। सर्वमपि दर्शनं स्वीयया रीत्या आत्मदर्शनप्रक्रियां प्रतिपादयति। दर्शनग्रन्थेषु सैव रीतिः पाठसमालोचनावसरेऽपि दृग्गोचरी भवति। भारतीयदर्शनेषु पाठसमालोचनं द्रष्टुं शक्यते। तद्यथा न्यायदर्शने ''**त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः – उद्देशो लक्षणं परीक्षा च**'' इति। तत्र नामधेयेन पदार्थमात्रस्याभिधानम् उद्देशः। असाधारणधर्मवचनं लक्षणम्। लक्षितस्य यथालक्षणम् उपपद्यते न वेति प्रमाणैरवधारणं परीक्षा। अपि च तर्कसङ्ग्रहस्य अनुमानप्रकरणेऽपि प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनम् इति अवयवपञ्चकेन सदनुमानं विधीयते।

मीमांसाशास्त्रे वाक्यार्थनिर्णयाय षड्विधतात्पर्यलिङ्गाख्यः कश्चन सिद्धान्तः दर्शितः। तथा हि –

''**उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।**
**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥**''

इत्यभियुक्तवचनानुसारम् उपक्रमोपसंहारादीनि षट् तात्पर्यनिर्णयलिङ्गानि। तत्र उपक्रमोपसंहारौ आरम्भावसाने, अभ्यासः आवृत्तिः, अपूर्वता प्रमाणान्तरेण अनधिगतत्वं, फलं प्रयोजनं, अर्थवादः स्तुतिर्निन्दा वा, उपपत्तिस्तर्कः। एतेभ्यो हि प्राज्ञाः कस्यचिद् ग्रन्थस्य वाक्यस्य वा कुत्र तात्पर्यमिति निश्चिन्वन्ति।

अद्वैतवेदान्तदर्शनेऽपि ''व्यवहारे भाट्टनयः'' इति न्यायमभ्युपगम्य वाक्यार्थनिर्णये इमान्येव तात्पर्यलिङ्गानि स्वीक्रियन्ते। श्रीमदप्पयदीक्षितविरचिते सिद्धान्तलेशसङ्ग्रहेऽपि पाठसमालोचनस्य उत्तमं निदर्शनं कर्तुं शक्यते। संशोधनकर्मणि शोधकर्त्रा कथं भाव्यमिति अस्य ग्रन्थस्य मङ्गलाचरणेन ज्ञातुं शक्यते —

''**प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं**
**सन्नह्यद्भिरनादरात् सरणयो नानाविधा दर्शिताः।**
**तन्मूलादिह सङ्ग्रहेण कतिचित् सिद्धान्तभेदान् धियः**
**शुद्धौ सङ्कलयामि तातचरणव्याख्यावचःख्यापितान्॥**'' इति।

पाठसमालोचनावसरे सर्वेऽपि भेदाः प्रदर्शनीया इत्यस्मिन् ग्रन्थे

तत्तत्सिद्धान्तप्रदर्शने दृश्यते । यथा प्रकटार्थकृत:, तत्त्वशुद्धिकृत:, पञ्चदशीकृत:, विवरणकृत: वार्त्तिककृत: सङ्क्षेपशारीरककृत: भामतीकृतश्च सिद्धान्त: सङ्कलित: । एवमाचार्याणां प्रक्रियाभेदे सत्यपि पारमार्थिकतत्त्वे कश्चिद् भेदो नास्ति। सिद्धान्तावगमनाय सर्वा: प्रक्रिया: कल्पिता: । यथोक्तम् —

''**यया यया भवेत् पुंसां व्युत्पत्ति: प्रत्यगात्मनि।**
**सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता ।।**'' इति।

## पाठसमालोचनस्य मौलिकतत्त्वानि —

पाठो नाम य: पठ्यते श्रूयते वा स पाठ: । एतेषां पाठानां लेखनं भूर्जपत्र-तालपत्रादिषु क्रियते स्म । तेषां तालपत्रादीनां ''हस्तलिखितप्रति:'', ''पाण्डुलिपि:'', ''मातृका'' इत्याद्या: सञ्ज्ञा: भवन्ति । पाठसमालोचनविषये कथमस्माभि: जागरूकै: भाव्यमिति विषये आचार्यो मध्व: इत्थमस्मान् बोधयामास —

''**क्वचिद् ग्रन्थान् प्रक्षिपति क्वचिदन्तरितानपि।**
**कुर्यु: क्वचिच्च व्यत्यासं प्रमादात् क्वचिदन्यथा ।।**
**अनुत्सन्ना अपि ग्रन्था व्याकुला इति सर्वश: ।**
**उत्सन्ना प्रायश: सर्वे कोट्यांशोऽपि न वर्तते ।।**'' इति।

पाठसमालोचनावसरे अस्माकं पुरतो बहव: संशया: समुदिष्टन्ते। यत: तालपत्राणि नैकविधानि दृश्यन्ते। सर्वाण्यपि एकेन लिखितानि नोपलभ्यन्ते। क्वचित् समानाकारकाणि अपि उपलभ्यन्ते, तथापि विभिन्नै: लेखकै: लिखितानि तालपत्राणि विभिन्नेषु ग्रन्थालयेषु, देशे वा विदेशे वा उपलभ्यन्ते। एकस्यैव ग्रन्थस्य भिन्नभिन्नमातृकाग्रन्थेषु भिन्नभिन्नपाठा: समुपलभ्यन्ते। तस्मात् आदर्शपाठनिर्णयाय पाठसमालोचनस्य आवश्यकता वर्तते ।

डॉ. एस.एम. कत्रेमहोदय: समुपलब्धपाठानां त्रैविध्यं मनुते। तद्धि (1) मूलग्रन्थकारस्य स्वहस्तलिखितपाठ:। (2) ग्रन्थकर्तृहस्तलिखितपाठस्य तात्कालिकी प्रतिलिपि:। (3) प्रतिलिपे: प्रतिलिपि: अथवा प्रतिलिपिपरम्परा द्वारा प्राप्ता: प्रतिलिपय:। इत्थम्प्रकारेण प्राप्तासु प्रतिलिपिसु पाठभेदा: दृश्यन्ते। अभिज्ञानशाकुन्तलस्य भूमिकायां वसन्तकुमारो भट्टो लिखति यत् अमी तु



उपलब्धपाठानाम् अभिसाक्ष्यभेदा: सन्ति। अत: भारतीयसन्दर्भे पश्यामश्चेत् अत्र पञ्चविधा: पाठा: सञ्चरिता: दृश्यन्ते। तथा हि —

**(1) दृष्टसाहित्यिकपाठा:** – अपौरुषेयवेदानाम् ऋषयो मन्त्रदृष्टार:। अत: वेदानां न कोऽपि कर्ता। आधुनिकमुद्रणकालात् प्राक् वेदानां पाठा: अस्माभि: गुरुमुखश्रुतपरम्परया एव प्राप्यन्ते स्म।

**(2) उत्कीर्णसाहित्यिकपाठा:** – केचन पाठा: ब्राह्मीदेवनागर्यादिषु लिपिषु शैलशिलास्तम्भताम्रादिरूपेण उत्कीर्णा विद्यन्ते। तत्र य: पाठ: प्राप्यते तस्यापि समुचितं पाठसम्पादनम् आवश्यकमस्ति। यतो हि तत्रापि कालक्रमेण नैका: विकृतय: आगता:।

**(3) प्रोक्तसाहित्यिकपाठा:** – रामायणमहाभारतपुराणादिसाहित्यं प्रोक्तसाहित्यम् इति अभिहितं स्यात्। आदिकालात् कथाप्रवचनमाध्यमेन एतेषां पाठा: प्रोक्तरूपेण प्राप्यन्ते। अत: वक्तृभेदात् कालभेदाच्च अमीषु अवश्यं पाठभेदा: प्रक्षेपादयश्च भवेयु:। अत: रामायणमहाभारतपुराणादिसाहित्यस्य मूलपाठाभावात् अनेककर्तृकपाठत्वाच्च पाठसम्पादनस्य आवश्यकता विद्यते।

**(4) श्रुतसाहित्यिकपाठा:** – भगवता सौगतेन महावीरेण वा यद्धर्मोपदेश: कृत: आसीत् तत् सामान्यजनेषु ग्रामेषु वा मौखिकरीत्या कृत: आसीत्। न हि तै: स्वकीयधर्मोपदेश: स्वहस्तलिखितरूपेण शिष्येभ्य: प्रदत्त: आसीत्। धर्मोपदेशकाले तेषां शिष्यै: धर्मोपदेशं श्रुत्वा स्मृतिस्थश्च कृत्वा कालान्तरे सञ्चरित: आसीत्। मध्ये मध्ये स्मृतिस्थज्ञानस्य परीक्षणमपि क्रियते स्म। कालान्तरे श्रुतपरम्पराया: अक्षुण्णात्वाभावात् एतस्य लेखनम् आरब्धम्। परिणामस्वरूपं तादृशसाहित्ये पाठभेदा: दृश्यन्ते।

**(5) कृतसाहित्यिकपाठा:** – यद्धि साहित्यं केनचित् कविना कृतं इति ज्ञायते तत् कृतसाहित्यमिति वक्तुं शक्यते। यथा कालिदासबाणभट्टभवभूतिश्रीहर्ष-शङ्कराचार्यादिकृतानि काव्यनाटकशास्त्राणि। यत्र ग्रन्थान्ते ''इति श्रीमच्छारीरक-मीमांसाभाष्ये श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-श्रीमच्छङ्करभगवत्पादकृतं ब्रह्मसूत्रशाङ्करभाष्यं समाप्तम्'' इति पुष्पिकावाक्यं प्राप्यते तत्र निश्चितं कश्चित् कर्ताऽस्ति। एतादृशं साहित्यं प्रतिलिपिपरम्परया बहुश:

सञ्चरितो जातः। कालवशात् मूलहस्तलिखितग्रन्थस्य जीर्णत्वात् नष्टत्वाद्वा प्रतिलिपेः आवश्यकता जाता। ततः प्रतिलिपिकरणम् आरब्धम्। एवञ्च विभिन्नदेशकालस्थैः लिपिकारैः कृतानां पाठानां मध्ये पाठभेदाः अवश्यं दृश्यन्ते। अतः पाठसमालोचनस्य आवश्यकता अस्ति।

संस्कृतवाङ्मये समुपलब्धाः विपुलसाहित्यगतपाठाः अद्यावधि मातृकाग्रन्थरूपेण प्रसारिताः सन्ति। प्रतिलिपिकरणपरम्पराकारणात् तत्र विकृतयः दृश्यन्ते। अतः तेषां पाठानां समीक्षितं पाठसम्पादनं (critical text editing) करणीयम्। पाश्चात्यदेशेषु समीक्षितपाठसम्पादनाय त्रयः पन्थानः उद्भविताः सन्ति। तद्यथा —

(1) प्रतिलेखनपद्धतिद्वारा पाठसम्पादनम् (Copy text-editing)

(2) संदोहनपद्धतिद्वारा पाठसम्पादनम् (Eclectic text-editing)

(3) वंशवृक्षपद्धतिद्वारा पाठसम्पादनम् (Stemmatic text-editing)

अत्र वंशवृक्षपद्धत्या कृतं पाठसम्पादनमधिकं विश्वासार्हमस्ति। यतो हि अस्याः पद्धतेः चतुर्विधानि सोपानानि वर्तन्ते। तथा हि —

1. पाठानां व्यवस्थापनम् अनुसन्धानं वा। (Heuristics)

2. पाठपरिष्करणम्। (Recensio)

3. दोषसंशोधनम्। (Emendation)

4. उच्चतरसमालोचनम्। (Higher Criticism)

प्राचीनरचनानां पाठा अस्माभिः प्रतिलिपिद्वारेण प्राप्यन्ते । प्रायः सर्वेषु प्रतिलिपिकारेषु न तथा पूर्णा साभिनिवेशकर्तव्यनिष्ठा भवति न वा पूर्णा योग्यता, अतः प्रतिलिपिपरम्परायां मातृकायाः पाठ उत्तरोत्तरमधिकाधिकं वा विकृतो भवन् परिवीक्ष्यते । तेषां पाठभेदानां कारणं मुख्यतया त्रिधा भवितुमर्हति - (1) आकस्मिककारणम्, (2) अनैच्छिककारणम्, (3) ऐच्छिककारणञ्चेति । एतेषां पाठभेदानां पाठसमालोचनकाले निराकरणं कर्तव्यं भवति ।

**(1) आकस्मिककारणम्** — हस्तलिखितग्रन्थस्य लेखनं यदि त्रुटिपूर्णे भूर्जपत्रे तालपत्रे वा क्रियते तर्हि तस्य स्थायित्वं न भवति । औष्ण्यकारणात्



भूर्जपत्रं जीर्णशीर्णं भवत् नश्यतां गच्छति । कदाचित् तैलपतनात्, जलपतनादपि भूर्जपत्रस्य उपरि यल्लिखितं भवति, तन्नश्यति । भूर्जपत्राणां तालपत्राणां लेखनं विधाय एकस्मिन् बन्धे स्थापनं क्रियते । यदि सः बन्धः शिथिलो भवति तर्हि भूर्जपत्राणि नश्येरन् । अतः भूर्जपत्राणां तालपत्राणां वा संरक्षणार्थं कश्चित् श्लोकः सुप्रसिद्धः वर्तते —

**तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।**
**मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम् ॥** इति ।

**(2) अनैच्छिककारणम्** — कदाचित् लिपिकारस्य अनिच्छया अपि तालपत्रेषु पाठभेदा जायन्ते । पाठेषु या विकृतयः प्रतिलिपिकर्तणाम् अयोग्यतया अनवधानतया अथवा अन्यैः कारणैः आयान्ति ताः अनभीष्टाः विकृतयः इत्युच्यन्ते । मातृकाग्रन्थानां प्रतिलिपिकरणे लिपिकाराः श्रुतलेखनपरम्परया लेखनं कुर्वन्ति स्म । तेन यदि दोषपूर्णं श्रवणं कृतं चेत् पाठोऽपि सदोषं स्यात् । कदाचित् लिपिकारः एकैकस्य पदस्य पठनं कृत्वा न लिखति, परं दीर्घग्रन्थभागस्य सकृत् पठनं कृत्वा लिखति स्म, तेनापि कुत्रचित् लुप्तांशाः (Lacuna) पुनरुक्तिः (dittography) इत्यादिदोषाः जायन्ते स्म।

a. लेखनाभावः — वैदिकसाहित्ये प्रायः मौखिकरीत्या एव शास्त्राणि अक्षुण्णानि रक्षितानि । ग्रन्थानां लेखनं प्रायः न भवति स्म । स्मृतिकारा हि ''**वेदविक्रयिणश्चैव वेदानां चैव दूषकाः । वेदानां लेखकाश्चैव ते वै निरयगामिनः**'' इति रूपेण लेखकान् दूषयन्ति । परवर्तिकाले एव तालपत्रेषु लेखनमारब्धम् । मुद्रणन्तु अत्यन्तम् अर्वाचीनमस्ति । संहिताभागस्य मुद्रणं तु अष्टादश-ऊनविंशे शतके आरब्धम्, तर्हि शास्त्राणां का गतिरिति अस्माभिः चिन्तयितुं शक्यते । अत एव मौखिकरीत्या संरक्षितेषु ग्रन्थेषु पाठभेदाः दृश्यन्ते । यत्र पुंदोषशङ्कावलेशो नास्ति, तादृशे वेदे एव दाक्षिणात्यपाठः, औत्तरीयपाठ इति यदि सम्भवेत्, तर्हि किमाश्चर्यं यदि शास्त्राणां विषये पाठभेदाः उपलभ्येरन् । अतः शास्त्राणां यानि तालपत्राणि उपलभ्यन्ते, तेषां सम्पादनकर्मणि महान् क्लेशोऽनुभूयते ।

b. अनवधानकारणम् — कदाचिल्लिपिकारस्य कारणादपि पाठभेदाः दृश्येरन् । अतः प्रतिलिपिकरणसमये एको नियमोऽस्ति यत् यस्य केवलं लिपिज्ञानमस्ति स एव लिप्यन्तरणं कुर्यात् । यदि कश्चित् शास्त्रज्ञः लिप्यन्तरणं करोति तर्हि स कदाचित् स्वबुद्ध्या कमपि पाठं प्रक्षिपेत् । मातृकासु अविद्यमानान् पाठान् आनयेत्, विद्यमानेषु पाठेषु अन्तरं प्रापयेत् । यथा ''**समानी व आकूतिः समाना हृदयानि वः**'' इति मन्त्रस्य लिप्यन्तरणकरणसमये प्रतिलिपिकरणसमये वा ''आकूतिः'' इति पदस्य स्थाने अनवधानकारणात् ''आकृतिः'' इति पाठः स्यादिति विचिन्त्य प्रतिलिपिकारः पाठलेखनं कुर्यात् । अपि च लिपिकारस्य व्याकरणज्ञानाभावादपि पाठभेदाः जायेरन् । यथा ''नदीभ्याम्'' इत्यस्य ''नदिभ्याम्'', ''घनश्यामः'' इत्यस्य ''धनश्यामः'', ''स्थायी भावः'' इत्यस्य ''स्छायी भावः'' इतिरूपेण लेखनकारणादपि पाठभेदाः मातृकाग्रन्थेषु समुपलभ्यन्ते ।

c. लेखनपद्धतिः — पाठस्य तालपत्रलेखने काचित्पद्धतिः भवति । तालपत्रं प्रायः सूच्या लिख्यते स्म । अतः मातृकासु ग्रन्थपाठाः यथाऽक्षरं न लिख्यन्ते । यतो हि सूच्या सर्वाण्यपि अक्षराणि यथायोग्यं भ्रामयित्वा लेखने काठिन्यं वर्तते । तालपत्रेषु सूच्या अनुस्वारचिह्नदानं हलन्तचिह्नदानञ्च कष्टाय भवति । यथाऽक्षरं यदि तालपत्राणां लेखनं क्रियते तर्हि तालपत्राणि भज्येरन् । अतः तालपत्रलेखनावसरे तत्स्थाने कानिचन अक्षराणि ईषत् परिवर्त्य लिखन्ति लेखकाः । तेन यः तालपत्रलेखनपद्धतिं न जानीयात्, स सम्यक्तया पाठसमालोचनं कर्तुं न शक्नुयात् । अतः तालपत्रेषु लेखनपद्धतिरपि पाठभेदस्य कारणं भवति ।

d. भग्नांशाः — प्रायः तालपत्रेषु भग्नांशाः बहुत्र दृश्यन्ते । अतः भग्नांशानुमानं कथं करणीयमिति काचित् समस्या पाठसमालोचनकाले समायाति । किञ्च प्रतिप्रान्तं समानाक्षराणां लेखनप्रक्रिया भिद्यते, तस्मात् कारणादपि पाठभेदा जायेरन् । सर्वाण्यपि तालपत्राणि देवनागर्यां नोपलभ्यन्ते । ब्राह्मी-शारदा-नन्दनागरी-ग्रन्थ-तमिल-कन्नडादि-विविधासु लिपिषु तालपत्राणि उपलभ्यन्ते । पुनश्च यदि कश्चित् लिपिज्ञानानभिज्ञः तालपत्राणां लिप्यन्तरं कुर्यात् तदा लिपिकारस्य प्रमादादपि पाठाभेदाः दृश्येरन् ।



**(3) ऐच्छिककारणम्** — हस्तप्रतिग्रन्थेषु बहुत्र लिपिकारस्य इच्छयाऽपि पाठभेदाः दृश्यन्ते । यदि प्रतिलिपिकारः स्वबुद्ध्या मातृकाग्रन्थेषु इतरपाठान् योजयति अथवा कस्यचिद् ग्रन्थस्य सरलीकरणाय पर्यायवाचकानि पदानि प्रयुङ्क्ते तदानीमपि पाठभेदाः दृश्येरन् । कदाचित् प्रतिलिपिकारः ग्रन्थपाठेषु अधिकपूर्णान् सङ्गतान् काव्योचितान् अथवा शुद्धान् पाठान् सम्पादयितुं कानिचित् परिवर्तनानि करोति तानि सर्वाणि प्रक्षेपाः इति संज्ञया व्यवह्रियन्ते । एवञ्च ऐच्छिकपाठभेदस्य इमानि कारणानि भवितुमर्हन्ति —

a. इष्टानिष्टाकारणम् — पुरा काले स्वबुद्धिस्थं ग्रन्थं पुरस्कृत्य गुरुः शिष्यान् अध्यापयति स्म, न तु ग्रन्थं पुरस्कृत्य । अत एव ''कोशवान् आचार्यः'' इत्युक्तिः प्रचलिता आसीत् । यस्य बुद्धौ सम्पूर्णः ग्रन्थः उपस्थितो भवति स आचार्यः कोशवान् इति उच्यते । गुरुः बहुश्रुतः भवति स्म । यस्तु लिखितपाठं पाठयति स्म, तस्य पाठः अधमकोट्यां गण्यते स्म । अतः स आचार्यः यथा स्वगुरुमुखात् तं ग्रन्थं प्राप्तवान्, तथैव स स्वशिष्यान् अध्यापयति स्म । कदाचित् अध्यापनकाले गुरुः एतादृशपाठापेक्षया एवं यदि पाठः स्यात्तर्हि समीचीनं स्यात् इति विचिन्त्य ग्रन्थे परिष्कारं कृत्वा स्वशिष्यान् उपदिशति स्म । तथैव ते च शिष्याः तान् पाठान् पठन्ति लिखन्ति स्म । ते च पाठा देशान्तरपाठात् नूनं भिद्यन्ते ।

b. स्वसिद्धान्तरक्षणम् — कदाचित् स्वसिद्धान्तरक्षणार्थेनापि अभीष्टः पाठः प्रचारितो भवति । यथा कश्चिद् रामानुजसम्प्रदायानुयायी अद्वैतग्रन्थस्य लिप्यन्तरणं कुर्यात्, तदा स स्वसिद्धान्तरक्षणार्थमपि तत्र प्रक्षेपं कुर्यात् । क्वचित् अर्धरेफस्थाने पूर्णरेफस्य योजनेन अर्थान्तरं भवति । ''ननु'', ''न'', ''च'' इत्यादिपदानाम् ईषद् व्यत्यासेन योजनेन वा सिद्धान्तपक्षः पूर्वपक्षो भवति, पूर्वपक्षश्च सिद्धान्तपक्षः इति । यथा भगवद्गीतायां कश्चित् श्लोको विद्यते — ''**नासतो विद्यते भावो नाभावो विद्यते सतः**'' इति । असतः भावो नास्ति, सतः अभावो नास्तीति श्लोकार्थः । किन्तु येषां मते ब्रह्मणा सह जगदपि सत्यमस्तीति अभ्युपगम्यते,

तत्सिद्धान्तरक्षणार्थं नात्र अधिकं परिवर्तनं करणीयम्। ''ऽ'' एतादृशस्य अवग्रहचिह्नस्य योजनेन अभीष्टार्थस्य सिद्धिर्भवति। तद्यथा — ''**नासतो विद्यतेऽभावो नाभावो विद्यते सत:**'' इति।

c. सरलीकरणम् — क्वचित् प्रतिलिपिकार: कठिनपदानां सरलीकरणार्थं पर्यायपदानि प्रयुङ्क्ते। तत्कारणादपि पाठभेदा: दृश्येरन्। यथा ''नरर्षभ:'' इति स्थाने ''नरोत्तम:'' इति।

## भारतीयपाठसमालोचनपद्धति: —

तालपत्रपाठसमालोचनविषये पाश्चात्यै: बहव: सिद्धान्ता: प्रवर्तिता:। किन्तु भारतीयपाठसम्पादनकाले ते सिद्धान्ता: यथावत् ग्रहीतुं न शक्यन्ते। एतस्य कारणमस्ति यदस्माकं लिपि:, लेखनसामग्री, आधारसामग्री, लेखनस्वभाव:, लेखनविषयश्च भिन्नो भवति। अत: सर्वोऽपि पाश्चात्यसिद्धान्त: यथावत् कथमपि अस्माकं कृते न उपयोगार्ह:। अत: क: उत्तरो वा उत्तमो पाठ: इति विषये अस्माभि: स्वयमेव स्वबुद्ध्या कश्चन निष्कर्षो विधेयो भवति।

अत: भारतीयपाठसमालोचनकाले एते विषया: अवधेया: भवन्ति —

**(1) लिपि:** — तालपत्रेषु एका लिपिगतसमस्या वर्तते। सर्वाण्यपि तालपत्राणि एकस्यां लिपौ न लिखितानि उपलभ्यन्ते। अत: तस्या: समस्याया: समाधानं द्विधां भवितुमर्हति। प्रथम: उत्तम: उपायोऽस्ति यत् स्वयमेव लिपिज्ञानं सम्प्राप्य लिप्यन्तरणं कुर्यात्। अयमुपाय: कालसापेक्षो वर्तते। द्वितीयोपाय: वर्तते यत् ये तां लिपिं जानन्ति, तेषां सहाय्यं स्वीकृत्य लिप्यन्तरणं करणीयम्। किन्त्वत्र क्लेशो विद्यते यत् यो लिप्यन्तरणं करोति, स: यदि कदाचित् स्वबुद्ध्या पाठभेदं योजयति, यथावत् लिप्यन्तरं न करोति तर्हि समीचीन: पाठ: अस्माभि: निश्चेतुं न शक्यते। तुलनां विधातुमपि अस्माकं लिपिज्ञानं नास्ति। यथा कश्चित् शारदालिपित: देवनागरीलिप्यां लिप्यन्तरणं विधाय ददाति चेत् तत्रापि सम्पादकेन शारदादेवनागरीलिप्यो: तुलनां विधातुं न शक्यते। अस्या: समस्याया: समाधानाय य: मूललिपिं जानाति, तादृश: जन: अस्माभि: चेतव्य:। समाधानमिदं किञ्चिद्दूरम् उपकारकं भवति। यतो हि य: द्वितीय: जन: अस्माभि: चित:, सोऽपि कियद्दूरं विश्वासरूपेण मूललिपिं पठतीति निश्चप्रचं वक्तुं न शक्यते।



**(2) मूलमातृकानिर्धारणम्** (Autograph) — मूलमातृकाया: निर्धारणस्य का आवश्यकता ? का उपादेयता ? किमौचित्यम् ? इत्याद्या: प्रश्ना: अस्माकं पुरत: समुत्तिष्ठन्ति। वस्तुत: मूलमातृकाया: निर्धारणाभावे उत्तम: पाठ: अस्माभि: नैव निर्धारयितुं शक्यते। यथा कस्यचिद् ग्रन्थस्य पञ्च मातृका: उपलभ्यन्ते। पञ्चसु एका मातृका मूलमातृका इति अस्माभि: चीयते। तस्या: मातृकाया: लिप्यन्तरणं विधाय इतराभि: मातृकाभि: सह तुलनां कृत्वा पाठभेदा: अङ्गीक्रियन्ते। तत: पाठभेदान् स्वीकृत्य कतर: पाठ: अथवा कतम: पाठ: समीचीन: इति आलोचनीय:। तदर्थं केचन उपाया: सन्ति —

a. कालपरिमाणम् — मातृकाया: काल: क: इति सर्वप्रथमं निश्चेतव्य:। मातृकासु कालप्रामाण्येन या मातृका अत्यन्तं प्राचीना, सा मूलमातृका इति निश्चेतुं शक्यते।

b. मूलमातृका अथवा प्रतिलिपि: — मातृका कस्याश्चित् मातृकाया: लिप्यन्तरमस्ति उत स्वातन्त्र्येण रचिता इति निर्णय: करणीय:। यदि मातृका कस्याश्चिद् अन्यमातृकाया: प्रतिलिपि: (transcript copy) वर्तते तर्हि तस्या: मूलमातृकाया: अन्वेषणं करणीयम्।

c. तालपत्रविवरणपत्रिका — समीचीना मातृका निश्चेतुं तत्तद्ग्रन्थालयेषु विद्यामाना: तालपत्रिकाविवरणपत्रिका: (Descriptive Catalogue) द्रष्टव्या: भवन्ति। एतासु तालपत्रविवरणपत्रिकासु तालपत्रविशेषज्ञै: प्राय: द्विपञ्चाशत् विषया: वर्णिता: भवन्ति। यथा तालपत्रस्य नाम, कर्ता, लिपि:, स्वरूपम्, मानम्, काल:, स्थिति:, आदिमपङ्क्ति:, मध्यमपङ्क्ति:, अन्तिमपङ्क्ति:, पुष्पिकावाक्यम् इत्याद्या:। यदि एते विषया: नोपलभ्यन्ते तर्हि तालपत्रविवरणपत्रिकासु न्यूनातिन्यूनं द्वादशविषया: उपलभ्येरन्। तत्र ग्रन्थस्य काल:, ग्रन्थस्य परिचिति:, ग्रन्थकर्तु: काल:, तालपत्रस्य प्राप्ति: कस्मात् स्थानात् अभवत्, प्रतिलिपि: केन कृता इत्याद्या: विषया: तत्र लभ्येरन्। अत: तालपत्रविवरणपत्रिकामाध्यमेन सर्वप्राचीना मूलमातृका निश्चेतुं शक्यते।

d. उत्तरोत्तरप्रामाण्यम् — यदि सत्सु बहुप्रयत्नेषु मूलमातृकाया: निर्धारणं

न भवति तर्हि मातृकासु उत्तरोत्तरप्रामाण्यं स्वीकर्तुं शक्यते। यथा व्याकरणनये ''उत्तरोत्तरमुनीनां प्रामाण्यम्'' इति स्वीक्रियते तथैव अत्रापि ''पूर्वपूर्वमातृका प्रबला'' इति कश्चन सिद्धान्तः। अतः प्रथमम् एतत् निश्चेतव्यं यत् एतस्याः प्राचीना पूर्वतना वा मातृका का इति। या पूर्वतना मातृका अस्ति सा एव प्रबला अथवा मूलमातृका इति निर्णयः कर्तुं शक्यते।

e. लेखनशैली — यदि कस्याश्चिद् मातृकायाः क्वापि कालनिर्देशो न प्राप्यते तर्हि लेखनशैलीम् आश्रित्य कालनिर्धारणं कर्तुं शक्यम्। मातृकासु लेखनशैली प्रतिपर्व भिद्यते। कालविशेषे काचिद् विशेषलेखनशैली समाश्रियते। अतः प्राचीनलेखनशैलीं दृष्ट्वा मूलमातृकायाः निर्धारणं कर्तुं शक्यते।

f. लेखनदोषराहित्यम् — असावपि मातृकाग्रन्थनिर्धारणे कश्चन सिद्धान्तो विद्यते यत् मूलमातृकासु प्राक्तनमातृकासु वा लेखकहस्तक्षेपो न्यूनो दृश्यते इत्यपि मूलमातृकायाः निर्धारणे कश्चन सिद्धान्तो वर्तते। अतः यस्यां मातृकायां लेखनदोषाः न्यूनाः भवन्ति सा मातृका पाठानां निर्धारणार्थमत्यन्तमुपकरोति।

**(3) उच्चतरसमालोचनम्** — एवं मूलमातृकां निर्धार्य मूलमातृकायां यः पाठः प्राप्यते, स उपरि संस्थापनीयः। इतरासु मातृकासु ये पाठाः प्राप्यन्ते ते च पाठाः टिप्पणरूपेण सङ्कलनीयाः भवन्ति। तदनन्तरं सङ्कलितानां पाठानां व्यवस्थापनं करणीयम्। ततः सङ्कलितपाठस्य परिष्करणार्थं सम्पादनार्थं वा उच्चतरसमालोचनं (Higher Criticism) विधेयम्। पाठपरिष्करणार्थम् उच्चतरसमालोचनार्थं वा भारतीयसन्दर्भे कश्चन उत्तमः उपायो वर्तते — तत्तद् ग्रन्थस्य व्याख्यानानि। यदि कस्यचिद् मातृकाग्रन्थस्य व्याख्यानानि उपलभ्येरन् तर्हि तानि अवश्यं दृष्टानि भवेयुः। व्याख्यानानां परामर्शेन मूलग्रन्थस्य पाठः कः इति निश्चेतुं शक्यते। यथा कस्यचिद् ग्रन्थस्य त्रिचतुराणि व्याख्यानानि प्राप्यन्ते, तर्हि सर्वाणि व्याख्यानानि पाठसमालोचनकर्त्रा पठनीयानि। न केवलमेतत्, एतस्य ग्रन्थस्य गुरुपरम्परायां कथं व्यवहृतिः अस्ति, औदिच्यगुरुपरम्परायां कथं व्यवहृतिरस्ति, दाक्षिणात्यगुरुपरम्परायां कथं व्यवहृतिरस्तीत्येतत् आलोचनीयम्।



अपि च ग्रन्थशैलीम्, अक्षरशैलीं, मूललिपिं समालोच्य उच्चतरपाठसमालोचनं करणीयम्। मातृकाणाम् उच्चतरपाठसमालोचने काश्चन भ्रान्तयो दृश्यन्ते। ताः भ्रान्तीः निराकृत्य उच्चतरसमीक्षणं करणीयम्। एताः भ्रान्तयः सदृशाक्षररूपेण, अन्यथायोजनविभाजनरूपेण भवितुमर्हन्ति। यथा —

a. वर्णानां सादृश्यम् — मातृकाग्रन्थेषु क्वचित् ल-ळ, य-प, थ-भ, ध-घ, ट-ठ, व-ब, श्र-श्च इति रूपेण सदृशवर्णेषु सामान्याः भ्रान्तयः समवलोक्यन्ते। क्वचित्तु लेखकप्रमादात् जकार-ज्ञकारलेखनं, सकार-शकारलेखनं, टकार-ठकारलेखनं वा दृश्यते। तस्मात् उच्चतरपाठस्य समालोचने सदृशवर्णविषये जागरूकैः भाव्यम्। यथा ''भवन्तु'' इति एकं पदमस्ति। किन्तु लिपिकारः भकारं पकारः इति मत्वा ''पवन्तु'' इति लिखति चेदर्थान्तरः भवितुमर्हति। ''सुपर्णप्रतिमेनाथ रथेन वसुधाधिपः'' इत्यत्र ''सुवर्णप्रतिमेनाथ...'' इति लिखति तर्हि पाठभेदः अवश्यं भवेत्।

b. संहितारूपेण लेखनम् — तालपत्राणां लेखनं संहितारूपेण भवति स्म। मध्ये मध्ये विच्छिद्य लेखनेन तालपत्राणि नश्येरन् अधिकानि वा उपयुज्येरन्। तत्समये अधिकानि तालपत्राणि नोपलभ्यन्ते स्म, अतः ग्रन्थकाराः संहितारूपेण शास्त्राणि लिखन्ति स्म। तथा सति यः लिप्यन्तरणं मातृकाग्रन्थसम्पादनं वा करोति, सः यदि अमुं सम्पादनविधिं न जानाति तर्हि उत्तमतया पाठसमालोचनं कर्तुं न शक्नोति।

c. अन्यथायोजनं विभाजनञ्च — अन्यथायोजनेन विभाजनेन च अर्थस्य अनर्थो भवतीति प्रसिद्धमेव। यथा ''गृहमागत्य'' इति एकं पदमस्ति। यदि प्रतिलिपिकारः यथावत् लिप्यन्तरम् न कृत्वा ''गृह मा गत्य'' इति यदि लिखति तर्हि अर्थपरिवर्तनं भवति। अतः सामान्यप्रतिलिपिकर्त्रा स्ववैदुष्यं न तत्र योजनीयम्। तथा सति ग्रन्थः अपरिष्कृदेव तिष्ठेत्। उच्चतरपाठसमालोचनकाले पाठसमालोचका व्याख्यानानि इतरग्रन्थान् च अवलम्ब्य पाठसम्पादनं कुर्युः। यथा ''गृहमागत्य'' इत्यत्र किं ''गृहम् आगत्य'' इति पाठ अस्ति उत ''गृहम् आ आगत्य'' इति। एवमेव भगवद्गीतायाः कश्चन श्लोकांशो विद्यते — ''अहं वैश्वानरो

भूत्वा प्राणिनां देहमाश्रित:'' इति। अत्र यदि कश्चिद् ''अहं वै श्वा नरो भूत्वा'' इति पाठं कुर्याच्चेत् अनर्थो भवितुमर्हति। कदाचित् प्रतिलिपिकार: मातृकाग्रन्थेषु सदोषं योजनं विभाजनं वा करोति तर्हि अर्थावबोधो न भवति यथा ''दशरामशरा:'' इति संहितारूपेण लिखितपाठस्य कश्चित् प्रतिलिपिकार: ''दशरा मशरा'' इति रूपेण विभाजनं करोति चेत् अर्थावबोधो न भवति। अत: पाठसमालोचकेन तत्र ''दश रामशरा:'' इतिरूपेण पाठ: सम्पादनीय:।

d. करणापाटवम् — कदाचित् लिप्यन्तरणकरणसमये वर्णलेखने प्रमादो भवति। भ्रमप्रमादकरणापाटवकारणात् कश्चित् वर्ण: त्यक्तो वा अन्यथा योजितो भवति। यतो हि मन: वेगेन चिन्तयति किन्तु हस्त: तावत् वेगेन न प्रसरति। प्राय: एकस्यैव वर्णस्य द्वित्वे कृते एता: त्रुटय: दृश्यन्ते। यथा योगसूत्रे एकं सूत्रमस्ति - ''तत्र प्रत्ययैकतानता ध्यानम्'' इति। लेखनावसरे तथैव विचिन्त्य लिख्यते किन्तु कदाचित् लेखनं ''तत्र प्रत्यैकतानता ध्यानम्'' इति भवति। तत्र कारणमस्ति यत् द्वितीययकारोत्तरवर्ती देय: ऐकार: पूर्वमेव दीयते। यतो हि मन: वेगेन चिन्तयति किन्तु हस्त न तथा वेगेन प्रसरति तस्मात् परवर्ति-ऐकारं पूर्वमेव गृह्णाति। अत: करणापाटवकारणादपि वर्णपदवाक्यानां पाठभेदा: दृश्यन्ते।

e. वर्णविपर्यय: — क्वचिच्च मातृकाग्रन्थानां लेखने वर्णानां विपर्यय: (anagrammatism) भवति। यथा ''वनचर'' इति लेखनस्य स्थाने ''वचनर'', ''देवेषु'' इति स्थाने ''वेदेषु'', ''ज्ञानेन चान्य:'' इति स्थाने ''ज्ञाने च नान्य:'' इत्यादिरूपेण।

f. प्रान्तीयलेखनप्रभाव: — संस्कृतलेखनशैल्यां प्रान्तीयलेखनप्रभावोऽपि दृश्यते। यथा देवनागरीलिप्या: लेखनस्य काचित् शैली विद्यते। एवमेव ग्रन्थतमिलादिभाषाणामपि लेखनस्य काचित् भिन्ना शैली विद्यते। अत: उच्चतरसमालोचनकाले प्रतिलिपिकारस्य उपरि प्रान्तीयभाषाया: लेखनप्रभावोऽस्ति न वेति इति ज्ञातव्यं भवति। यथा यदि तेलुगुमातृका: अवलोक्येरन् तर्हि तत्र अनुस्वारस्य हलन्तमकारस्य च यच्चिह्नं वर्तते



तत् तेलुगुभाषामाश्रित्य लिखितं भवति। यथा देवनागर्यां मकारलेखने मकारं विलिख्य तस्य अध: हलन्तदानं क्रियते - ''म्'' इत्थम्। किन्तु तेलुगुमातृकायां ''म'' इति विलिख्य तस्य अध: हलन्तचिह्नं न दीयते, परं ''म'' इति विलिख्य तस्य अधोभागे शून्यं दीयते। एवमेव ग्रन्थलिपावपि हलन्तलेखनावसरे वर्णस्याधोभागे शून्यं लिख्यते। एवञ्च तेलुगुभाषायां पूर्णवर्ण: अध: भवति, अर्धवर्ण: उपरि भवति। तेन य: समालोचक: तेलुगुभाषाया: अक्षरविन्यासं सम्यग् रूपेण न जानाति, सोऽपि प्रान्तीयभाषाप्रभावेन उत्तमतया पाठसमालोचनं कर्तुं न शक्नुयात्।

g. सङ्ख्याविषयिणी भ्रान्ति: — पाठसमालोचनकाले सङ्ख्यालेखनेऽपि भेदा: दृश्यन्ते। सङ्ख्यालेखनावसरे ग्रन्थेषु क्वचित् प्रान्तीयभाषासङ्ख्यैव दीयते। यथा मातृकाग्रन्थस्य भाषा संस्कृतं वर्तते किन्तु लिपि: तेलुगु वर्तते, तर्हि सङ्ख्यालेखनं तेलुगुभाषया क्रियते। अपि च देवनागर्यामेव सङ्ख्यालेखनस्य दृश्यन्ते बहवो हि प्रकारा:। यथा नव इत्यस्य लेखनस्य नवप्रकारा: दृश्येरन्। अत: पाठसमालोचनावसरे पाठसम्पादकेन तासां सङ्ख्यानां लेखनविषयेऽपि विज्ञानं भवेत्।

किञ्च तालपत्रलेखनावसरे इयं शैली दृश्यते यत् यत्र सङ्ख्यावाचकं सङ्ख्येयवाचकं वा पदमागच्छति, तत्र सङ्ख्यावाचकस्य पदस्य लेखनं क्रियते। यतो हि तत्समये तालपत्राणि न्यूनानि उपलभ्यन्ते स्म। अल्पीयसे तालपत्रे लेखनं करणीयं भवति स्म। वाक्येन सङ्ख्यालेखनं क्रियेत् चेत्तदा स्थानमधिकमावश्यकं भवति स्म। यथा एकादश इति स्थाने 11 इति यदि लिख्यते तर्हि अल्पे स्थाने अभीष्टा सङ्ख्या लेखितुं शक्या। अत: मातृकाग्रन्थेषु सङ्ख्यालेखने स्थानरक्षणकारणादपि भ्रान्तयो जायन्ते।

एवंरूपेण उच्चतरपाठसमालोचनावसरे एतासां भ्रान्तीनां निराकरणं करणीयं भवति। तदर्थं मूलमातृकाया: निर्धारणं विधाय कस्याश्चित् मातृकाया: यल्लिप्यन्तरणं कृतम्, तस्य लिप्यन्तरणस्य मूलमातृकया साकं तौलनिकमध्ययनं कृत्वा पाठभेदा: व्यवस्थापनीया:।

## अस्य ग्रन्थस्यौचित्यम् उद्देश्यानि च –

ग्रन्थकर्त्राधिकृतस्य विषयस्य विशेषतेयमेवस्ति यदद्यावधि प्रभाव्याख्या-सहितायाः कैवल्यदीपिकायाः सम्पादनं प्रकाशनञ्च नाभूत्। ग्रन्थरत्नमिदमद्यावधि हस्तप्रतिपुस्तकालयेष्वासीत्। अतोऽत्र मामके ग्रन्थे कैवल्यदीपिकायाः प्रभाव्याख्यासहितायाः सम्पादनं विधाय समालोचनात्मकम् अध्ययनं प्रस्तूयते। अपि च कृष्णपण्डितवर्यैः अद्वैतवेदान्तस्य प्रकरणग्रन्थेऽस्मिन् येषां विषयाणां वर्णनमकारि, तेषामौचित्यमस्त्युत नेत्येवम्प्रकारेणात्र चिन्तनं वर्तिष्यते। अद्वैतवेदान्तस्थविभिन्नविषयाणां कैवल्यदीपिकायां निरूपितैः विषयैः सह तुलनात्मकेनाध्ययनेन साकं नवीनश्चिन्तनगवाक्ष उद्घाटित इति मन्यते।

प्रबन्धोऽयं सपरिशिष्टं चतुर्भिरध्यायैः प्रविभक्तः। वेदान्ते चतुर्थसङ्ख्याया महान् महिमा वर्तते। यथा सकलज्ञानराशिवेदाश्चत्वारः सन्ति। ब्रह्म चतुष्पाद् वर्तते। ब्रह्मसूत्रेषु चत्वारोऽध्यायाः सन्ति, तत्रापि प्रत्येकस्मिन्नध्याये चत्वारः पादाः। ब्रह्मजिज्ञासा स्वस्मात् पूर्वं नियमेन स्थितं यदपेक्षते तानि साधनान्यपि चत्वारि सन्ति। ग्रन्थे अनुबन्धा अपि चत्वारो भवन्ति। एवञ्च तमेव महाजनपथम् अनुकुर्वन् मयापि प्रबन्धोऽयं चतुर्ष्वध्यायेषु प्रविभक्तः।

तत्रादौ ग्रन्थेऽस्मिन् उपोद्धातभागे सम्पाद्यमानस्य ग्रन्थस्य भूमिकारूपेण किञ्चित्प्रास्ताविकरूपेण च केचनांशाः चर्चिताः। यत्र अद्वैतवेदान्तस्य सामान्यांशान् विवर्ण्य तदनु काचिदनुसन्धानभूमिका उपस्थापिता। तदनु ''कृष्णः - ''तद्देशकालकृतिवैदुष्यादीनां विचारः'' इत्याख्ये प्रथमेऽध्याये कैवल्यदीपिकाकारस्य देशकालादिपरिचितिः, ग्रन्थाभिधानम्, ग्रन्थविषयः, प्राप्तमातृकयोर्विवरणं गुणदोषविचारश्च, भाषाच्छन्दोव्यवस्था, ग्रन्थकर्तुः वैशिष्ट्यं शैली च इत्येतान् विषयानधिकृत्य उपस्थापनं कृतम्। तदनु उपलब्धमातृकयोः विवरणं गुणदोषविचारश्च, स्वीकृतमातृकायाः सम्पादनपद्धतिः, पाठसम्पादनविधिश्च वर्णितः। ''कैवल्यदीपिकायाः पाठसमीक्षात्मकं सम्पादनम्'' इत्याख्ये द्वितीयेऽध्याये सम्पादितः स्वोपज्ञव्याख्यासहितकैवल्यदीपिकाग्रन्थभागः पाठभेदपुरस्सरम् अपेक्षितपादटिप्पण्यादियुतो निबद्धः। ''तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्'' इत्याख्ये तृतीयेऽध्याये तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनं कृतम्। यत्र मङ्गलाचरणम्, अनुबन्धचतुष्टयम्, ब्रह्मणः स्वरूपतटस्थलक्षणे, साधनचतुष्टयम्, अध्यासः, जीवात्मनोः स्वरूपम्, अविद्या, चिच्चातुर्विध्यम्, लक्षणा, समाधिः, जीवन्मुक्तिः विदेहमुक्तिश्च इति अद्वैतसिद्धान्तानां भामतीविवरणप्रस्थानेन सह सिद्धान्तान्तरैः तौलनिकमध्ययनं विधाय समीक्षा कृता वर्तते। ग्रन्थस्य ''संशयच्छेदप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्'' इत्याख्ये चतुर्थेऽध्याये अद्वैतसिद्धान्तानां विषये यत्र संशया वर्तन्ते, तेषां विषयाणामत्र प्रश्नोत्तरशैल्या समाधानं वर्तते। तत्र ब्रह्मणः अवाङ्मनसगोचरत्वम्, वेदानाम् अपौरुषेयत्वम्, अन्तःकरणस्य वृत्तिविचारः विद्वदविद्वत्कर्मफलवैषम्यम्, प्रतिबिम्बवादः, ज्ञानकर्मसमुच्चयनिराकरणम्, श्रुतिवाक्यानां विरोधपरिहारः, यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः, विधिविचारः, मायास्वरूपवर्णनम्, प्रतिबिम्बसत्यताविचारः, आत्मनः अखण्डार्थत्वम्, आनन्दमीमांसा, अज्ञानभूसप्तकम्, ज्ञानभूसप्तकम्, चतुर्विधः संन्यासः, जीवन्मुक्तिः इत्यादिविषयाणां समीक्षितमध्ययनं विहितम्। तदनु निष्कर्षनिष्यन्द-पिण्डीभावाख्ये उपसंहारे प्रबन्धस्यास्य समग्रः सारः पूर्व चिन्तिता विचाराः पिण्डीभूतास्साम्यवैषम्यपूर्वकं प्रस्तुता विद्यन्ते। परिशिष्टभागे कैवल्यदीपिकायाः साधारणश्लोकसूची, प्रयुक्तानां छन्दसां सूची, उदाहृतानां ग्रन्थानां सूची, प्रभाव्याख्यायाम् उदाहृतानां श्लोकानां श्रुतिस्मृतिवाक्यानाञ्च सूची, उल्लिखितानां न्यायानां सूची, परिशीलितग्रन्थसूची च विद्यते।



एवञ्च प्रबन्धेऽस्मिन् प्रभाव्याख्योपेता कैवल्यदीपिका सम्पादिता वर्तते। तथा च परामृष्टानां ग्रन्थानां, तत्कर्तॄणां तत्सङ्केतानां च सूची, विषयानुक्रमणिका, अस्मदङ्गीकृतपाठानां सूचिकापादटिप्पणी, पाठविमर्शनरूपा टिप्पणी, ग्रन्थगतपद्यानाम् आद्यपादानुक्रमणिका चेति अपेक्षिताः अनुक्रमणिकाश्च यथास्थानं समावेशिताः सन्ति। पूर्वशास्त्राणि सञ्चित्य, मातृकासम्पादनविधिम् अनुसृत्य, विदुषां मतानि अवगाह्य, सम्पादनायोपलब्धानाम् अन्तर्बहिश्चिन्तनसूत्राणां साहाय्यं स्वीकृत्य कृष्णविरचितोऽयं कैवल्यदीपिकेति ग्रन्थः कृतविद्यानां हंसक्षीरन्यायविदां विदुषाम्, सहृदयानां सुमेधसां विमर्शकानां समक्षं सप्रश्रयं प्रस्तूयते।

यदि ग्रन्थे कुत्रचिद् मदीयाज्ञानवशात् सूक्ष्मेक्षिकाभावाद् मानवसहजदोषात् करणापाटवदोषाद्वा अवश्यं दोषास्स्युस्तथापि तान् दोषान् समीकृत्य पठनाय विद्वत्सु सहृदयेषु इयमभ्यर्थना विधीयते।

इत्थं विदुषामनुचरः

रामनवमी, वि.सं. 2075 **डॉ. जानकीशरणः आचार्यः**

# धन्यताविष्कृतिः

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम् ।
पृथुरित्थमथाणुरस्तु वा न विशेषे विदुषामिह ग्रहः॥

इति श्रीहर्षोक्तिं स्मारं स्मारं ''कृतज्ञो ननु दुर्लभः'' इति च विद्वदुपज्ञं वचनं ध्यायं ध्यायं कृतज्ञताज्ञापनमप्यत्यावश्यकं कर्मेति तत्र ममापि प्रवृत्तिः। यद्यपि अद्वैतवेदान्तस्य प्रकरणग्रन्थत्वात् अद्वैतदशायां ''यत्र त्वस्य सर्वमात्मैवाभूत् त्कि न क पश्येत्'' इति श्रुत्यनुरोधेन द्वैतवादीयं कृतज्ञताप्रकाशनम् अस्मिन् मते युक्तं नेति प्रतीयते, तथापि पूर्वाचार्योक्तरीत्या व्यावहारदशायामौपाधिकभेदकल्पनायां ''यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति'' इति श्रुतिप्रामाण्यात् सर्वं सङ्घटत एव। अत सर्वादौ सच्चिदानन्दस्वरूपपरब्रह्मणः एव कृतज्ञतां प्रकाशयामि, यत् सर्वात्मकं परब्रह्म ममान्तःप्रविष्टं सत् —

**''योऽन्तःप्रविश्य मम वाचमिमां प्रसुप्तां**
**सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना।**
**अन्याँश्च हस्तचरणश्रवणत्वगादीन्**
**प्राणान्नमो भगवते पुरुषाय तुभ्यम्॥''**

इति वचनानुसारम् इमां कैवल्यदीपिकां समपीपदत्।

श्रीसोमनाथसंस्कृतविश्वविद्यालये विद्यावारिधिकालावधौ ''कृष्णविरचितस्वोपज्ञ-प्रभाव्याख्या सहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च'' इति विषयो मया शोधकार्यत्वेन सुनिश्चितः आसीत्। महनीयकीर्तयो विद्वांसोऽनुसन्धानकर्मणो दुष्करतां जानन्त्येव। तत्रापि कस्यापि अप्रकाशित-पाण्डुलिपिग्रन्थस्य कस्या अपि नूतनाया व्याख्याया वा सम्पादनं कियत्कठिनम् इत्यपि नाविदितं तत्र भवतां प्रेक्षावताम्। अपि च अनुसन्धानकर्मणि प्रायो नूतनविषयाणां गवेषणया प्रकाशनमपेक्षते। रत्नजातं रत्नाकर इव यद्यपि तत्तु



ग्रन्थाब्धौ प्रकीर्णं विद्यते तथापि तत्र निमज्य तेषामुन्नयनं कीदृशं दुष्करमित्यपि मतिमतां नाज्ञातम्। तत्र मान्यानामदूष्यवैदुष्यविभूषितानां प्रथितयशसां गुरुजनानां ज्ञानसृतिसाहाय्यमेव उपकरणं नान्यदिति मे मतिः। अतोऽहं येषां ज्ञाननिर्देशन-प्रवचनाध्यापनविषयोपस्थापनकौशलसौष्ठवाधानेनोपकृतस्तत्प्रत्युपक्रियामन्यथा विधातुमक्षमः, अतः केवलं प्रणतिपुरस्सरशब्दप्रसूनाञ्जलिसमर्पणात्मकं कृतज्ञताज्ञापनमेव मदधीनमिति कृत्वा कृतज्ञाविष्कृतिं कुर्वे।

निखिलविभूतिनायकजानकीजीवननाथनारायणादिसहस्रपरनामाभिधेयस्य सन्निहितसच्चिदानन्दशर्मणो धर्मवर्मणो व्यापकब्रह्मणः परब्रह्मणो लोकाभिरामस्य श्रीरामस्य दिव्यानुग्रहेण, मूर्तिमतां विद्यास्वरूपदीक्षागुरूणां विविधविद्याविचार-चतुराणामध्यापनलेखनप्रवचनपटूनां सम्पादितविरचितानेकसामाजिकाध्यात्मिक-ग्रन्थानां राष्ट्रभाषाकाव्यकलाकुशलानां तत्त्वज्ञानां यतिवराणां नवतिवयस्यपि स्वकर्मकुशलानां वितरितहरिकथासत्सङ्गादीनां जोधपुरस्थस्य उत्तमाश्रमस्य (आचार्यपीठस्य) पीठाधीश्वरपदमलङ्कुर्वतां परमपूज्यस्वामिश्रीरामप्रकाशाचार्याणां च असीमया अनुकम्पया च संस्कृताध्ययनस्य अनुरागः समजनि। तेषामनुकम्पया प्रेरणया च संवर्धितोऽहं तेषां महदुपकृतं स्मारं स्मारं तच्चरणनलिन्योः प्रणमामि। तदनु श्रीशारदाया वागधिष्ठात्र्यास्सन्निधौ दक्षिणाम्नायपीठसन्निधौ राष्ट्रियसंस्कृत-संस्थानस्य शृङ्गेरिस्थराजीवगान्धिपरिसरे सङ्गीतादिकलाधिदैवतपदजगदम्बायाः शारदाम्बाया दिव्यानुग्रहेण प्रो. वेम्पटिकुटुम्बशास्त्रि - डॉ.गणेशईश्वरभट्टप्रभृतीनां मनीषिणामनुग्रहेण गुरूणामनुकम्पया च वेदान्ताध्ययनस्य कश्चित्सुमहान्नवसरः प्राप्तः। तत्र प्रवृताभिः सङ्गोष्ठीभिः श्रुताभिः विद्वत्कथाभिश्च वेदान्तदर्शनसम्बद्धेषु विषयेषु जिज्ञासाजागरीत्। अतस्तेभ्यो मुहुर्मुहुः प्रणतितर्तिं विनिवेदयामि।

अथ च श्रीसोमनाथसंस्कृतविश्वविद्यालये तत्कालीनकुलपतिवर्याणां मान्यानां प्रो. वेम्पटिकुटुम्बशास्त्रिणां समाश्रयं सम्प्राप्य विद्यावारिधिं कर्तुम् अवसरः सम्प्राप्तः। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य इमे हि कुलपतिचरा विद्यातपःपूता नैकविधशास्त्रेषु कृतावगाहाः, प्राच्यार्वाचीनशास्त्रनदीष्णाः, प्रशासननिपुणाः स्वस्य अतीव व्यस्तदिनचर्यायामपि मदीयेऽनुसन्धानकर्मणि मार्गदर्शकत्वेन मार्गदर्शनमकार्षुः। किन्तु कालस्य अचिन्त्यवेगेन श्रीसोमनाथसंस्कृतविश्वविद्यालये तेषां कौलपत्यावधौ अहममुं शोधप्रबन्धं समर्पयितुं नाशकम्। तथापि तेषां मार्गदर्शनं मदीयसंशोधन-

कर्मणि महदुपाकरोत् अतस्तान् नानाशास्त्रविचक्षणान् दिगन्तव्यापियशोराशीन् भारतराष्ट्रपतिना पुरस्कृतान् न्यक्कृतसुधाद्राक्षेक्षुरसमाधुरीवाग्विलासान् वाग्मिनो वैदुष्यप्रचयचीयमानयशःकदम्बान् शिष्यवात्सल्यकरुणार्द्रहृदयान् आचार्यान् वेम्पटिकुटुम्बशास्त्रिवर्यान् सादरं प्रणम्य कार्तज्ञ्यं तेभ्यो वितनोमि। अथ तेषां निर्देशानुसारं मम दिष्ट्या चास्य शोधकर्मणो मार्गदर्शकत्वं विद्वदपश्चिमाः षड्दर्शनाचार्या यतिवरा व्याकरणसाहित्यन्यायदर्शनवेदान्ताद्यनेकविद्यामर्मज्ञाः साधु-श्रुतिप्रकाशदासमहाराजाः स्वीचक्रुः इति कृत्वा मोमुद्यते मे स्वान्तम्। इमे आचार्याः अस्मिन् शोधकर्मण्यान्तं मार्गदर्शकत्वेन साहाय्यमकार्षुः। तेषामेव विद्यासमाराधनां सतां गुरूणां मार्गदर्शने ''कृष्णविरचितस्वोपज्ञप्रभाव्याख्या-सहितायाः कैवल्यदीपिकायाः सम्पादनं समीक्षात्मकमध्ययनश्च'' इति शीर्षकाङ्कितः शोधप्रबन्धोऽयं समाप्तिमगमत्। अत्र तेषां मार्गदर्शनमन्तरेण कथङ्कारमिदं सुसम्पन्नं भवेत्। अतस्तेभ्यो महद्भ्यो भूयो भूयः सप्रश्रयं सबहुमानं कार्तज्ञ्यं विनिवेद्य प्रणतिशतं समर्पयामि।

मातृकाग्रन्थसम्पादनायाधुनिकविमर्शपद्धत्यनुरोधेन सज्जीकृतं तमिमं शोधप्रबन्धं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. अर्कनाथचौधरी महाभागाः प्रधानसम्पादकत्वेन प्रबन्धस्यास्य शुभाशंसनपुरस्सरं प्रस्तावनां विलिख्य श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमालायां प्रकाशनाय सहर्षमनुमतिं प्रायच्छन् इति तेभ्यः सनति नमोवाकमाविष्करोमि। प्रकाशनात्मकमदः कर्म क्षिप्रं सम्पादनाय अनुमतवद्भ्यः प्रशासनकर्मण्यपि निरतेभ्यः कार्यकारिकुलसचिवेभ्यः प्रो. महेन्द्रकुमारदवेमहोदयेभ्यः वन्दनानि निवेदयामि। ग्रन्थप्रबन्धममुं प्रकाशयितुं साहाय्यमाचरितवद्भ्यः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य संशोधनाधिकारिभ्यः सुहृद्भ्यः डॉ. कार्तिकपण्ड्यामहोदयेभ्यः कार्तज्ञ्यं प्रकटयामि।

पुनश्च ग्रन्थप्रबन्धस्यास्य विद्यावारिधिशोधकर्मणि मूलमातृकासम्पादने साहित्यसिद्धान्तविद्वद्वरिष्ठा रससिद्धा आशुकवयो नयविनयादिगुणोपेताः सुहृदो डॉ. अमृतलालभोगायतामहोदयाः, ये व्याकरणसाहित्यपुराणादिविषयनदीष्णाः इति विदुषां समवाये सम्मान्यन्ते, ते महत्साहाय्यमकार्षुः। तेषां महामान्यानामनुग्रहेणैव एष प्रबन्धो जनिमापत्। कैः शब्दैरेतेषां कृतज्ञतां प्रकाशयेयम्, हृदयेनैते केवलं नमस्क्रियन्ते। अवसरेऽस्मिन् प्रकटितवेदार्थरहस्यान् प्रो. देवेन्द्रनाथपाण्डेयमहोदयान्,



साहित्यशास्त्रनिष्णाताः प्रो. अर्चनादुबेमहोदयाः, डा. नरेन्द्रपण्ड्यामहोदयाँश्च विस्मर्तुं न शक्नोमि। इमे हि महोदया निश्चितमेव सन्ति भाजनानि बहुशो धन्यवादानाम्। अन्ते च सम्पादनात्मकमदः कर्म सम्पादयितुमहर्निशं मत्साहाय्यमकार्षीत् अर्धाङ्गिनी मनीषाशर्मा। लेखनकर्मणि विश्वविद्यालयकर्मणि च शनैः शनैः व्यस्तदिनचर्याकारणात् गार्हस्थ्यकर्मसु मम प्रवृत्त्याधिक्याभावात् सा अर्धाङ्गिनी सत्यपि गार्हस्थ्यकर्मसु मदीये प्रबन्धे च पूर्णतामानैषीत्। अतः सा सर्वदा मदीये पुरुषार्थचतुष्टसाधने मत्साहाय्यभूता स्यादिपि भगवतः ससोमं सोमनाथादाशासे।

अपि च ग्रन्थस्यास्य मानकशोधनादिसम्पादनकर्मणि प्रकाशनकर्मणि च प्रत्यक्षपरोक्षाभ्यां मामुपकृतवद्भ्यः सर्वेभ्यः कृतज्ञतामाविष्करोमि, समेभ्योऽपि साधुभणितिं ब्रुवे। किं बहुना –

विशिष्टा ये सुहृज्जना असंस्मृता हि नामतः।
प्रसीदन्तु विशेषतो धन्यवादान् विज्ञापये॥

अन्ते च कृतेऽपि प्रयत्ने अस्मिन् प्रबन्धे मुद्राराक्षसाः स्युः। यतो हि पुरुषसाध्ये प्रयत्ने मानवसहजदोषकारणात् करणापाटवदोषवशाद्वा अवश्यं न्यूनता भवति इति न्यायेन यदि कुत्रचिद् मदीयाज्ञानवशात् सूक्ष्मेक्षिकाभावाद् दोषाः दृश्येरन् तर्हि ते दोषाः मदीयाः इति कृत्वा औदार्यपूर्वकं तान् दोषान् समीकुर्वन्तु इति विद्वत्सु सहृदयेषु अभ्यर्थना विधीयते।

इति विदुषामनुश्रवः

**जानकीशरणः आचार्यः**

# विषयानुक्रमणिका


- शुभाशंसनम् *v*
- मङ्गलाचरणम् *vii*
- उपोद्घातः *ix*
- धन्यताविष्कृतिः *xxxi*
- विषयानुक्रमणिका *xxxv*
- सङ्केताक्षरसूची *xl*


## प्रथमोऽध्यायः


**कृष्णः - तद्देशकालकृतिवैदुष्यादीनां विचारः 1-48**

1.1 किञ्चित् प्रास्ताविकम् 1
1.1.1 अद्वैतविकासः 1
1.1.2 श्रुतिप्रस्थानम् 2
1.1.3 स्मृतिप्रस्थानम् 4
1.1.4 न्यायप्रस्थानम् 5
1.1.5 अद्वैतसिद्धान्तविकासः 5
1.1.6 अद्वैतवेदान्ते प्रकरणग्रन्थाः 14
1.1.7 अद्वैतवेदान्तवाङ्मये कृष्णकृतकैवल्यदीपिका 14
1.2 कृष्णः कः ? 15
1.3 कृष्णस्य देशः 18
1.4 कृष्णस्य कालः 19
1.5 कृष्णस्य कृतयः 20
1.6 कृष्णस्य वैदुष्यम् 22
1.7 कृष्णस्य गुरुपदनिष्ठा 23





1.8 कृष्णस्य कवित्वम् 24
1.9 कैवल्यदीपिकायाः परिचितिः 25
1.9.1 ग्रन्थाभिधानम् 25
1.9.2 ग्रन्थविषयः 27
1.9.2.1 प्रथमप्रकरणम् 28
1.9.2.2 द्वितीयप्रकरणम् 30
1.9.3 उपलब्धमातृकयोः विवरणम् 31
1.9.4 उपलब्धमातृकयोः गुणदोषविचारः 33
1.9.4.1 ग्रन्थलिपिमातृका 34
1.9.4.1 देवनागरीलिपिमातृका 35
1.9.5 भाषाच्छन्दोव्यवस्था 36


## द्वितीयोऽध्यायः


**स्वोपज्ञव्याख्यासहिता कैवल्यदीपिका 49-238**

2.1 मातृकासम्पादनपद्धतिः 49
2.2 पाठसम्पादनविधिः 52
2.3 समीक्षितपाठयुता सव्याख्या कैवल्यदीपिका 54
2.3.1 तत्त्वप्रदीपप्रकरणम् 55
2.3.2 संशयच्छेदप्रदीपप्रकरणम् 129


## तृतीयोऽध्यायः


**तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम् 239-316**

3.1 मङ्गलाचरणम् 239
3.2 ग्रन्थरचनाप्रयोजनम् 241
3.3 अनुबन्धचतुष्टयम् 242
3.4 सगुणब्रह्मणो वाग्गोचरत्वम् 243
3.5 ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणञ्च 244
3.5.1 स्वरूपलक्षणम् 244
3.5.2 तटस्थलक्षणम् 247

3.6 सगुणनिर्गुणब्रह्मणोऽभेदः 248
3.7 साधनचतुष्टयम् 250
3.7.1 नित्यानित्यवस्तुविवेकः 251
3.7.2 इहामुत्रार्थफलभोगविरागः 253
3.7.3 शमादिषट्कसम्पत्तिः 255
3.7.4 मुमुक्षुत्वम् 259
3.8 गुरूपसदनम् 260
3.9 अध्यारोपापवादौ 262
3.10 लक्षणा 266
3.10.1 जहल्लक्षणा 267
3.10.2 अजहल्लक्षणा 268
3.10.3 जहदजहल्लक्षणा 268
3.11 अध्यासः 269
3.11.1 अध्यासलक्षणम् 270
3.11.2 अध्यासनिमित्तम् 272
3.12 अविद्या 276
3.12.1 अविद्याविषयः 278
3.12.2 अविद्याऽऽश्रयः 279
3.12.3 आवरणशक्तिः 281
3.12.4 विक्षेपशक्तिः 282
3.12.5 समष्ट्यज्ञानं व्यष्ट्यज्ञानञ्च 283
3.12.5.1 ईश्वरः प्राज्ञश्च 284
3.12.5.2 हिरण्यगर्भः तैजसश्च 285
3.12.5.3 विराट् विश्वश्च 286
3.13 सृष्टिक्रमः 288
3.13.1 पञ्चीकरणम् 288
3.14 जीवात्मनोः स्वरूपम् 291
3.15 चिच्चातुर्विध्यम् 293
3.16 साक्षी 294



3.17 ज्ञानस्य अन्तरङ्गसाधनानि 299
3.18 मुक्तिः 305
3.18.1 जीवन्मुक्तिः 309
3.18.2 जीवन्मुक्तानां लक्षणानि 311
3.18.3 विदेहमुक्तिः 314

## चतुर्थोऽध्यायः

**संशयच्छेदप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम् 317-440**
4.1 नामरूपादिविवर्जितं निर्विशेषं ब्रह्म 317
4.2 वेदानामपौरुषेयत्वम् 322
4.2.1 श्रुतिवाक्यानां विरोधपरिहारः 328
4.3 विधिविचारः 333
4.4 मायास्वरूपवर्णनम् 341
4.5 सृष्टिविचारः 353
4.5.1 सृष्टिवाक्यानां तात्पर्यम् 354
4.5.2 चतुर्विधः कल्पः 357
4.5.2.1 नित्यः प्रलयः 359
4.5.2.2 नैमित्तिकः प्रलयः 360
4.5.2.3 प्राकृतिकः प्रलयः 361
4.5.2.4 आत्यन्तिकः प्रलयः 362
4.6 ज्ञानस्य द्वैविध्यम् 363
4.7 ज्ञानभूमिकाः 370
4.7.1 अज्ञानभूसप्तकम् 371
4.7.2 ज्ञानभूसप्तकम् 374
4.8 अन्तःकरणवृत्तिविचारः 379
4.8.1 अन्तःकरणवृत्तेः प्रयोजनम् 381
4.8.2 ब्रह्मविषयिणी वृत्तिः 384
4.9 ज्ञानकर्मसमुच्च्यनिराकरणम् 387

4.9.1 यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः 393
4.9.2 त्रिविधं कर्म 396
4.9.3 विद्वदविद्वत्कर्मफलवैषम्यम् 397
4.10 वैराग्यम् 399
4.11 संन्यासः 403
4.12 अद्वैतसिद्धान्ते आत्मस्वरूपम् 410
4.12.1 प्रतिबिम्बवादः 412
4.13 आत्मनः अखण्डार्थत्वम् 417
4.13.1 अखण्डार्थलक्षणम् 418
4.13.2 सामानाधिकरण्यम् 424
4.13.3 विशेषणविशेष्यभावसम्बन्धः 425
4.13.4 लक्ष्यलक्षणभावसम्बन्धः 426
4.14 आनन्दमीमांसा 427
4.15 ग्रन्थस्यास्य फलश्रुतिः 438

**उपसंहृतिः 441-448**
**परिशिष्टम् 449-489**
- कैवल्यदीपिकायाः साधारणश्लोकसूची 449
- कैवल्यदीपिकायां प्रयुक्तानां छन्दसां सूची 460
- कैवल्यदीपिकायाम् उदाहृतानां ग्रन्थानां सूची 463
- कैवल्यदीपिकायाम् उद्धृतानां ग्रन्थकर्तॄणां नामानि सञ्ज्ञापदानि च 464
- कैवल्यदीपिकायाम् उद्धृतानां श्रुतिवाक्यादिश्लोकानां सूची 466
- कैवल्यदीपिकायाम् उल्लिखितानां न्यायानां सूची 479
- परिशीलितग्रन्थसूची 480

# सङ्केताक्षरसूची

| | |
|---|---|
| अ.उ. | अन्नपूर्णोपनिषत् |
| अ.उप. | अध्यात्मोपनिषत् |
| अ.गी. | अवधूतगीता |
| अद्व.उ. | अद्वयतारकोपनिषत् |
| अ.म. | अद्वैतमकरन्दः |
| अ.र.म. | अद्वैतरसमञ्जरी |
| अ.वे.सा.को. | अद्वैतवेदान्तसाहित्येतिहासकोशः |
| अ.सि. | अद्वैतसिद्धिः |
| अ.हृ. | अष्टाङ्गहृदयम् |
| अक्ष.उ. | अक्ष्युपनिषत् |
| अप.अनु. | अपरोक्षानुभूतिः |
| अव.उ. | अवधूतोपनिषत् |
| आ.उ. | आरुणिकोपनिषत् |
| आ.बो. | आत्मबोधः |
| आ.वि. | आत्मविद्याविलासः |
| आ.श्रौ.सू. | आश्वलायनश्रौतसूत्रम् |
| आप.श्रौ.सू. | आपस्तम्बीयं श्रौतसूत्रम् |
| इति. उ. | इतिहासोपनिषत् |
| ई.उ. | ईशावास्योपनिषत् |
| ई.उ.शां.भा. | ईशावास्योपनिषच्छाङ्करभाष्यम् |
| उ.गी. | उद्धवगीता |
| उ.सा. | उपदेशसाहस्री |
| उत्त.गी. | उत्तरगीता |

| | |
|---|---|
| ऋ.भा.भू. | ऋग्वेदभाष्यभूमिका |
| ऋ.सं. | ऋग्वेदसंहिता |
| ऐ.उ. | ऐतरेयोपनिषत् |
| ऐ.उ.शां.भा. | ऐतरेयोपनिषच्छाङ्करभाष्यम् |
| क.प. | कल्पतरुपरिमलः |
| कठ. उ. | कठोपनिषत् |
| कठ.उ.शां.भा. | कठोपनिषच्छाङ्करभाष्यम् |
| का.प्र. | काव्यप्रकाशः |
| का.सू. | कामसूत्रम् |
| का.श्रौ.सू. | कात्यायनश्रौतसूत्रम् |
| कू.पु. | कूर्मपुराणम् |
| के.उ. | केनोपनिषत् |
| के.उ.शां.भा. | केनोपनिषच्छाङ्करभाष्यम् |
| कै.उ. | कैवल्योपनिषत् |
| कै.दी. | कैवल्यदीपिका |
| कै.दी.व्या. | कैवल्यदीपिका प्रभाव्याख्या |
| कौ.उ. | कौषीतकिब्राह्मणोपनिषत् |
| कौ.ब्रा. | कौषीतकिब्राह्मणम् |
| चित्यु. | चित्युपनिषत् |
| छा.उ. | छान्दोग्योपनिषत् |
| छा.उ.शां.भा. | छान्दोग्योपनिषच्छाङ्करभाष्यम् |
| जा.उ. | जाबालोपनिषत् |
| जा.द.उ. | जाबालदर्शनोपनिषत् |
| जी.वि. | जीवन्मुक्तिविवेकः |
| जै.न्या. | जैमिनीयन्यायमाला |
| जै.सू. | जैमिनिसूत्रम् |
| तं.वा. | तन्त्रवार्तिकम् |
| त.प्र. | तत्त्वप्रदीपिका |



| | |
|---|---|
| त.सं. | तर्कसङ्ग्रहः |
| तत्त्व. | तत्त्वानुसन्धानम् |
| ते.उ. | तेजोबिन्दूपनिषत् |
| तै.आ. | तैत्तिरीयारण्यकम् |
| तै.उ. | तैत्तिरीयोपनिषत् |
| तै.उ.शां.भा. | तैत्तिरीयोपनिषच्छाङ्करभाष्यम् |
| तै.ब्रा. | तैत्तिरीयब्राह्मणम् |
| तै.वा. | तैत्तिरीयोपनिषद्भाष्यवार्तिकम् |
| तै.सं | तैत्तिरीयसंहिता |
| त्रि.ता.उ. | त्रिपुरातापिन्युपनिषत् |
| त्रि.महा.उ. | त्रिपादविभूतिमहानारायणोपनिषत् |
| द.स्तो. | दक्षिणामूर्तिस्तोत्रम् |
| द.स्तो.वा. | दक्षिणामूर्तिस्तोत्रवार्तिकम् |
| दृ.वि. | दृग्दृश्यविवेकः |
| धा.पा. | पाणिनीयधातुपाठः |
| नृ.उ.ता. | नृसिंहोत्तरतापिन्युपनिषत् |
| ना.उ.ता. | नारायणोत्तरतापिन्युपनिषत् |
| ना.प.उ. | नारदपरिव्राजकोपनिषत् |
| ना.पु. | नारदपुराणम् |
| नि.मा. | निर्गुणमानसपूजा |
| नृ.उ. | नृसिंहोत्तरतापनीयोपनिषत् |
| नै.सि. | नैष्कर्म्यसिद्धिः |
| न्या.सू. | न्यायसूत्रम् |
| पं.क. | पञ्चीकरणम् |
| पं.द. | पञ्चदशी |
| पं.पा. | पञ्चपादिका |
| पं.वि. | पञ्चपादिकाविवरणम् |
| प.सा. | परमार्थसारः |

| | |
|---|---|
| प.उ. | परमहंसोपनिषत् |
| पा.उ. | पाशुपतब्रह्मोपनिषत् |
| पा.उप. | पाराशरोपपुराणम् |
| पा.सू. | पाणिनीयसूत्रम् |
| पा.वा. | पाणिनीयसूत्रवार्त्तिकम् |
| पृ. | पृष्ठसङ्ख्या |
| पै.उ. | पैङ्गलोपनिषत् |
| प्र.व्या. | कैवल्यदीपिका प्रभाव्याख्या |
| प्रश्न.उ. | प्रश्नोपनिषत् |
| प्र.उ.शां.भा. | प्रश्नोपनिषच्छाङ्करभाष्यम् |
| बृ.उ.भा.वा. | बृहदारण्यकोपनिषद्भाष्यवार्तिकम् |
| बृ.उ.शां.भा. | बृहदारण्यकोपनिषच्छाङ्करभाष्यम् |
| बृ.वा.सा. | बृहदारण्यकोपनिषद्वार्तिकसारः |
| बृह.उ. | बृहदारण्यकोपनिषत् |
| ब्र.पु. | ब्रह्मपुराणम् |
| ब्र.बिं.उ. | ब्रह्मबिन्दूपनिषत् |
| ब्र.वै.पु. | ब्रह्मवैवर्त्तपुराणम् |
| ब्र.सि. | ब्रह्मसिद्धिः |
| ब्र.सू. | ब्रह्मसूत्रम् |
| ब्र.सू.शां.भा. | ब्रह्मसूत्रशाङ्करभाष्यम् |
| ब्रह्मा.पु. | ब्रह्माण्डपुराणम् |
| भ.गी. | श्रीमद्भगवद्गीता |
| भ.गी.आ.व्या. | भगवद्गीता आनन्दगिरिव्याख्यानम् |
| भ.गी.शां.भा. | भगवद्गीताशाङ्करभाष्यम् |
| भव.उ. | भवसन्तरणोपनिषत् |
| भा.क. | भामतीकल्पतरुः |
| भा.पु. | श्रीमद्भागवतपुराणम् |
| भा.र.प्र. | ब्रह्मसूत्रभाष्यरत्नप्रभाव्याख्यानम् |



| | |
|---|---|
| भू.सा. | वैयाकरणभूषणसारः |
| भामती | ब्रह्मसूत्रशाङ्करभाष्यभामतीव्याख्यानम् |
| म.उ. | महोपनिषत् |
| म.भा. | महाभारतम् |
| म.भा.ता. | महाभारततात्पर्यनिर्णयः |
| म.भाष्य. | पातञ्जलमहाभाष्यम् |
| म.र. | महावाक्यरत्नावली |
| मनु.स्मृ. | मनुस्मृतिः |
| महा.उ. | महानारायणोपनिषत् |
| महावा. | महावाक्योपनिषत् |
| मा.उ. | माण्डूक्योपनिषत् |
| मा.ला. | मानसोल्लासः |
| मी.श्लो. | मीमांसाश्लोकवार्तिकम् |
| मु.उ. | मुक्तिकोपनिषत् |
| मु.उ.शां.भा. | मुण्डकोपनिषच्छाङ्करभाष्यम् |
| मुण्ड.उ. | मुण्डकोपनिषत् |
| मै.उ. | मैत्रेय्युपनिषत् |
| य.वे. | यजुर्वेदसंहिता |
| यो.वा. | योगवासिष्ठः |
| यो.सू. | योगसूत्रम् |
| रा.गी. | रामगीता |
| राम.उ. | रामरहस्योपनिषत् |
| रा.ता.उ. | रामपूर्वतापिन्युपनिषत् |
| ल.उ. | लक्ष्म्युपनिषत् |
| ल.यो.वा. | लघुयोगवासिष्ठः |
| ल.सु. | लघुतत्त्वसुधा |
| व.उ. | वराहोपनिषत् |
| वा.प. | वाक्यपदीयम् |

| | |
|---|---|
| वा.वृ. | वाक्यवृत्तिः |
| वाच. | वाचस्पत्यम् |
| वार्तिकम् | तैत्तिरीयोपनिषद्भाष्यवार्तिकम् |
| वि.चू. | विवेकचूडामणिः |
| वि.चू.चं.व्या. | विवेकचूडामणिचन्द्रशेखरव्याख्या |
| वि.नी. | विदुरनीतिः |
| वि.पु. | विष्णुपुराणम् |
| वि.पु.श्री.व्या. | विष्णुपुराणस्य श्रीधरीयव्याख्यानम् |
| विव. | विवरणप्रमेयसङ्ग्रहः |
| वृ.र. | वृत्तरत्नाकरः |
| वे.क.व्या. | वेदान्तकल्पतरुव्याख्या |
| वे.प. | वेदान्तपरिभाषा |
| वे.प.अ.व्या. | वेदान्तपरिभाषा अर्थदीपिकाव्याख्या |
| वे.प.शि.व्या. | वेदान्तपरिभाषा शिखामणिव्याख्या |
| वे.वि. | वेदान्तविचारः |
| वे.सा. | वेदान्तसारः |
| वे.सा.वि. | वेदान्तसारः विद्वन्मनोरञ्जनीटीका |
| वे.सा.सु. | वेदान्तसारः सुबोधिनीटीका |
| वे.सू.म. | वेदान्तसूक्तिमञ्जरी |
| श.क. | शब्दकल्पद्रुमः |
| श.ब्रा. | शतपथब्राह्मणम् |
| शा.म.प्र. | शाङ्करदर्शनमर्मप्रकाशः |
| शा.वे.को. | शाङ्करवेदान्तकोषः |
| शा.सि.सं | शास्त्रसिद्धान्तलेशसङ्ग्रहः |
| शाट्या.उ. | शाट्यायनीयोपनिषत् |
| शि.ल. | शिवानन्दलहरी |
| शु.उ. | शुकरहस्योपनिषत् |
| श्लो.वा. | श्लोकवार्तिकम् |



| | |
|---|---|
| श्वे.उ. | श्वेताश्वतरोपनिषत् |
| सं.उ. | सन्न्यासोपनिषत् |
| सं.शा. | सङ्क्षेपशारीरकम् |
| सं.शा.अ.टी. | सङ्क्षेपशारीरक-अन्वितार्थप्रकाशिका टीका |
| सं.शा.सु.टी. | सङ्क्षेपशारीरकस्य सुबोधिनी टीका |
| स.उ. | सरस्वतीरहस्योपनिषत् |
| स.वे.सा. | सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः |
| सां.त.कौ. | साङ्ख्यतत्त्वकौमुदी |
| सां.सू. | साङ्ख्यसूत्रम् |
| सां.का. | साङ्ख्यकारिका |
| सा.द. | साहित्यदर्पणः |
| सि.बिं. | सिद्धान्तबिन्दुः |
| सि.ले.सं. | सिद्धान्तलेशसङ्ग्रहः |
| सि.ले.सं.कृ. | सिद्धान्तलेशसङ्ग्रह-कृष्णालङ्कारव्याख्यानम् |
| सू.गी. | सूतगीता |
| सूत.सं. | सूतसंहिता |
| स्क.उ. | स्कन्दोपनिषत् |
| स्क.पु. | स्कन्दपुराणम् |
| B.R.D. | Gaekwad Oriental Research Institute, Baroda |
| Gr. | Granthlipi Manuscript |
| M.G.O.M.L. | Madras Government Oriental Manuscripts Library, Madras |
| N.C.C. | New Catalogus Catalogorum |
| P. | Page Numer |
| Vol. | Volume |

प्रथमोऽध्यायः

# कृष्णः - तद्देशकालकृतिवैदुष्यादीनां विचारः

## १.१ किञ्चित् प्रास्ताविकम् -

कृष्णपण्डितविरचिता स्वोपज्ञप्रभाव्याख्यायुता कैवल्यदीपिका इति अद्वैतवेदान्तविषयकप्रकरणग्रन्थरूपमातृकाग्रन्थस्य पाठसम्पादनं समीक्षितमध्ययनञ्च प्रकृतप्रबन्धस्य विषयो वर्तते। तत्राऽऽदौ प्रकृतमनुसर्त्तुम् अद्वैतवेदान्तविषयाणां किञ्चित् प्रास्ताविकरूपेण सङ्क्षेपेण निरूपणं विधीयते।

### १.१.१ अद्वैतविकासः -

समेषामास्तिकानां विदितमेवैतद्यत् परमार्थतत्त्वदर्शनायैव प्रवृत्तानि नैकविधानि दर्शनानीति। तत्तत्त्वदर्शनं नाम सन्ततं जन्ममरणप्रवाहरूपे प्रपञ्चे संसरतो जीवस्य स्वस्वरूपसच्चिदानन्दात्मतावाप्तिरूपमिति सर्वा विद्या उद्घोषयन्ति। यद्यपि ''**नदीनां सागरो गतिः**[1]'' इतिवत् समेषास्तिकदर्शनानाम् आत्मतत्त्वबोधनाय प्रयासः तथापि न सर्वेषां दर्शनानां साक्षात्तदर्थप्रतिपादकत्वं किं तु परम्परया, इत्यतः साक्षाद् आत्मतत्त्वप्रतिपादनाद् वेदान्तदर्शनम् इतरदर्शनापेक्षया मूर्धन्यं स्थानं भजते। अस्मिन् खलु वेदान्तदर्शने प्रस्थानत्रयम् अतिप्रसिद्धम् — श्रुतिप्रस्थानम्, स्मृतिप्रस्थानम्, न्यायप्रस्थानञ्चेति। प्रस्थानं नाम प्रस्थीयतेऽनेनेति प्रस्थानं मार्गः।[2] मुमुक्षोः किल संसाराध्वनः पारं परमं विष्णुपदं प्रस्थितस्य तज्ज्ञानोपदेशको मार्गः वेदान्तः प्रस्थानपदेनाभिधीयते। यद्यपि

१. ''गगनं गति ऋक्षाणां **नदीनां सागरो गतिः**।
राजा गतिर्मनुष्याणां विप्राणां ब्राह्मणो गतिः॥'' - सुभाषितम्

२. ''प्रस्थानं मार्गे'' - वाच. पृ. ४५०१
''प्रतिष्ठन्ते परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम्'' इति लोचने अभिनवगुप्तपादाः।



सूत्रकारेण भाष्यकारेण वा क्वापि प्रस्थानशब्देन न व्यवहृतम् अथापि वेदान्तशास्त्रनिबन्धकरैः तच्छब्देन व्यवहृतम्। तत्र श्रुतिप्रस्थानम् उपनिषद् इति नाम्ना, स्मृतिप्रस्थानम् भगवद्गीता इति नाम्ना, न्यायप्रस्थानञ्च ब्रह्मसूत्रम् इति नाम्ना प्रसिद्धमस्ति।

वस्तुतः वेदेषु कर्मकाण्डम् उपासनाकाण्डं ज्ञानकाण्डञ्चेति काण्डत्रयम्। तत्र ज्ञानकाण्डं ज्ञानप्रतिपादकं चतुःसहस्रमन्त्रात्मकम्। प्रायः अद एव वेदान्तदर्शनमिति कथ्यते। तत्र वेदस्यान्तः सिद्धान्तः परमतात्पर्यं वा यस्मिन् स इति ''**अति बन्धने**[1]'' इत्यस्माद्धातोरन्तति बध्नाति व्यवस्थापयति वेदानां महातात्पर्यं यः स वेदान्तः। वेदान्तेऽस्मिन्मायाब्रह्मजीवानां निरूपणम्। तथापि ''**वेदान्तो नाम उपनिषत्प्रमाणम्**[2]'' इति वेदान्ताचार्यैरुपनिषद्दर्शनमेव वेदान्तदर्शनमिति स्वीक्रियते। वेदान्तेऽप्यद्वैतवादो विशिष्टाद्वैतवादः शुद्धाद्वैतवादो द्वैताद्वैतवादोऽचिन्त्याद्वैतवादो द्वैतवाद इति मतानि प्रस्तुतान्याचार्यैः। इदमेवोत्तरमीमांसाशब्देन व्यवह्रियते।

### १.१.२ श्रुतिस्थानम् -

''**तं त्वौपनिषदं पुरुषं पृच्छामि**[3]'' इति श्रुत्यनुसारेण परमपुरुषस्य परमात्मन उपनिषदेकसमधिगम्यत्वमुक्तमिति प्रस्थानत्रये प्रथमं मुख्यं चेदमेव उपनिषत्प्रस्थानं श्रुतिप्रस्थानं वा। श्रुतिप्रस्थाने उपनिषदोऽन्तर्भवन्ति। उपनिषदां शैली क्वचित् काव्यशैलीवल्ललितोचितसंनिवेशचारुतरा प्रसादगुणगुम्फिता, क्वचिच्च नालिकेरपाकवद् दुर्बोधार्था। वैदिकसाहित्ये उपनिषदां स्थितिरन्यादृशी प्रतीयते। औपनिषदानाम् ऋषीणां कार्यप्रपञ्चब्रह्माण्डस्य अभिन्नत्वमखण्डत्वञ्च प्रतिपादने महान् विश्वासो दृश्यते। ब्राह्मणग्रन्थाः कर्मसु पुरुषं प्रेरयन्ति किन्तु उपनिषदस्तु ज्ञाने प्रेरयन्ति। वैदिका जना ऐहिकस्यैश्वर्यस्य प्राप्त्यर्थं यथा बद्धपरिकरा दृश्यन्ते, यथा च ब्राह्मणकालिका नराः स्वर्गादिलोकपरलोकेप्सवश्च दृश्यन्ते तथा उपनिषत्कालिका मनुष्या न दृश्यन्ते। जनिमतां सम्बन्धो न केवलं

१. धा.पा. ६१

२. वे.सा., पृ. १

३. बृह.उ. ३.९.२६

गतिशीलैः प्रत्यक्षीभूतवस्तुभिस्सह वर्तते परम् अनिर्वचनीयेन केनचित् स्थिरतत्त्वेनैव तेषां सम्बन्ध इत्युपनिषत्कालवर्तिनां जनानां सिद्धान्तः। तस्मात्कारणादेव औपनिषदसिद्धान्ता विचारप्रधाना वर्तन्ते।

''**केनेषितं पतति प्रेषितं मनः**[१]'' इति जीवनसम्बद्धविचारे उपनिषदाम् ऐदम्पर्यं दृश्यते। ''**यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति॥**[२]'' इत्यत्र तु यथाऽऽकाशवेष्टनम् असम्भवं तथेश्वरज्ञानमन्तरेण संसारसन्तरणमसम्भवमित्यौपनिषदां निर्गलितः सिद्धान्तो जेगीयते। अत एव ''**तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**[३३]'' इति निर्णीतं नैगमवचसा। तर्हि कथं स पन्थाः प्राप्तव्यः ? कः देवः ज्ञेयः ? कुत्रास्ति ? कथमस्ति ? किंलक्षणः ? एको वा नैको वा ? कर्ता वाऽकर्ता ? सर्वज्ञो वा अल्पज्ञो वा ? इत्येवं रूपेण विचारे सति प्रश्नवृष्टिरेव निपतति। एतादृशचिन्तनसन्तानानां विश्रान्तिस्थानं भवति उपनिषद्दर्शनम् अर्थाद् वेदान्तदर्शनम्।[४] उपनिषदो हि रहस्यात्मकगम्भीरार्थान् काव्यसुलभया गद्यपद्यात्मकशैल्या प्रतिपादयन्ति। वेदमूलकस्मृतिवद् उपनिषत्प्रस्थानमूलकत्वेनैव अपरप्रस्थानद्वयस्य गीताप्रस्थानस्य न्यायप्रस्थानस्य च प्रामाण्यम्। यतः सूत्रकारोऽपि न्यायेन वेदान्तार्थनिर्णये प्रवृत्तः प्रथमं ब्रह्मसूत्रेषु बहुत्र ''**श्रुतेः**[५]'', ''**शब्दात्**[६]'', ''**आमनन्ति**[७]'', ''**अधीयते**[८]'', ''**शास्ति**[९]'' इत्यादिभिः श्रुतिमेव प्रमाणीकरोति। ततः ''**स्मृतेः**[१०]'', ''**स्मरन्ति च**[११]'', ''**अपि च**

१. के.उ. १.१
२. श्वे.उ. ६.२०
३. श्वे.उ. ६.१५; ३.८
४. ''वेदान्तो नाम उपनिषत्प्रमाणम्''- वे.सा., पृ. १
५. ब्र.सू. २.४.१८; ३.४.१९
६. ब्र.सू. १.१.६; १.३.१; २.१.४; २.४.१५; ३.१.२५; ४.४.१; ४.४.२२
७. ब्र.सू. १.२.३२
८. ब्र.सू. १.२.२०; १.२.२६
९. ब्र.सू. १.१.१९
१०. ब्र.सू. १.२.६; १.२.३०; १.३.३०; १.३.३८; २.२.२५; ३.४.४३; ४.३.११
११. ब्र.सू. २.३.४७; ३.१.१४; ४.१.१०



**स्मर्यते**[१]'' इति स्मृतिम्। सूत्रस्य तर्करूपत्वात् वेदान्तप्रमाणानुग्राहकत्वाच्च अङ्गत्वमेव। अतः प्रधानप्रस्थानोपकारकं सूत्रमपि प्रस्थानशब्देनाभिधीयते। अत एव भाष्यकाराः ''**वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम्**[२]'' इति वदन्तः इममाशयमभिव्यञ्जयन्ति।

## १.१.३ स्मृतिप्रस्थानम् -

उपनिषदः नैककर्तृकाः असङ्ख्याकाश्च।[३] अपि च एकस्यामेवोपनिषदि वक्तृभेदो दृश्यते। एवमसङ्ख्याभिरुपनिषद्भिरद्वैतवेदान्तभावाः प्रतिपादिताः। किन्तु उपनिषत्समय एव क्वचित् वैदिकधर्मविरोधिनां विचाराणां सूक्ष्मस्सद्भावो दृश्यते।[४] तस्माद्वैदिकमतानां हानिरिवाभूत्। विभिन्नवेदविरुद्धदर्शनानां खण्डनाय वैदिकधर्मस्य च पुनः प्रतिष्ठापनाय करुणावरुणालयो भगवान् बादरायणः वेदव्यासः[५] पञ्चमवेदतुल्यं महाभारतं, महापुराणानि उपपुराणानि च निर्ममे। एतेषु महाभारतस्थश्रीमद्भगवद्गीता अन्यतमा वर्तते। श्रीभगवन्मुखारविन्दान्निःसृता अष्टादशभिरध्यायैः सप्तशतश्लोकैश्च सुग्रथिता, स्वभावमधुरपदविन्यासयुता, निःश्रेयसप्राप्त्युपायबोधिका, श्रुतीनामाशयपरिगृहीता, परश्शतैः प्राचीनैराचार्यैः प्रज्ञावद्भिश्च व्याख्याता, अध्यात्मविद्याचरमोत्कर्षेण निःश्रेयसपथप्रदर्शिका भगवद्गीता अद्वैतवेदान्तसाहित्ये द्वितीयस्य स्मृतिप्रस्थानस्य स्थानलभत।

श्रीशङ्करभगवत्पादा अपि प्रस्थानत्रयभाष्यं निरूपयन्तः क्वचित् श्रुतीः स्मृतीश्च समाश्रित्य गीतावचनानि पुराणवचनानि च उदाजह्रुः। भगवत्पादैः

१. ब्र.सू. १.३.२३; २.३.४५; ३.४.३०; ३.४.३७;
२. ब्र.सू.शा.भा. १.१.२
३. ''सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्।
सकृच्छ्रवणमात्रेण सर्वाघौघविकृन्तनम्॥''- मु.उ. १.४४
अपि च सार्धद्विशतादधिकानाम् उपनिषदां नामानि प्राप्यन्ते।
४. ''येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येकेनायमस्तीति चैके'' (कठ.उ. १.१.२०), ''असदेवेदमग्र आसीत्'' (छा.उ. ३.१९.१) इत्यादिना सर्वशून्यवादो निष्क्रियवादो वा वेगेन प्रचलित आसीदनन्तरभावि काले।
५. ''विव्यास वेदान् यस्माच्च तस्माद् व्यास इति स्मृतः।
द्वीपे न्यस्त स्वयं बालस्तस्माद्द्वैपायनोऽभवत्॥'' - म.भा. १.५७.७३

शारीरकभाष्य एव गीतावाक्यानि बहूनि उदाहृतानि क्वचिच्च विष्णुपुराणस्य वायुपुराणस्य च श्लोकाः तैरुदाहृता दृश्यन्ते।[१]

## १.१.४ न्यायप्रस्थानम् -

सर्वकारणकारणं सच्चिदानन्दघनसत्यज्ञानानन्दस्वरूपमेकमेवाद्वितीयम् अत्यन्तमनन्तमसङ्गं नित्यं ब्रह्म औपनिषदगम्यम्। ब्रह्मज्ञानादेव मोक्ष इति वेदान्तसमयः।[२] ब्रह्मविषये अनाद्यपौरुषेयश्रुतिरेव प्रमाणम्। श्रुतिश्चातिसङ्क्षिप्तत्वात् अत्यन्तं दुरवबोधा। भाषा चातिपुरातनी। लोकाश्चोत्तरोत्तरं मन्दबुद्धयः। उपनिषत्सु जीवात्मनोऽविनाशित्वप्रतिपादनेन यज्ञादिकर्मकाण्डतदुपोद्बलकजन्यं स्वर्गादिपारलौकिकसुखमेव शाश्वतमिति लोकानां मतिरभवत्। एतादृशं लोकप्रत्ययं निराकरिष्णुः भगवान् बादरायणो ब्रह्मसूत्राणि प्रणिनाय। ब्रह्मसूत्राणि च श्रुतिमीमांसामुखेनैव तत्त्वोपदेशाय प्रवृत्तानि। श्रुत्यर्थनिर्णयार्थं यो लोकवेदसाधारणो नियमो मीमांसकैराविष्कृतः अवधारितश्च तेनैव नियमेन श्रुत्यर्थोऽद्वैतमते निरूप्यते। सोऽयं ब्रह्मसूत्रेषु प्रतिपादितो वेदान्तसिद्धान्तः भगवत्पादैः "**वेदान्तवाक्य-कुसुमग्रथनार्थत्वात् सूत्राणाम्**[३]" इति रूपेण सूत्रभाष्ये उपवर्णितम्। एवमुपनिषद्दर्शनस्य व्याख्यानार्थं प्रख्यानार्थं च भगवता बादरायणेन वेदान्तसूत्राणि सूत्रितानि। करुणावारुणालयेन शङ्करेण स्वकीयशारीरकभाष्ये युक्तितर्कसहकारेण वेदान्तसूत्राणामद्वैतव्याख्या प्रस्तुता। प्रायेण वेदान्तमतविरोधिनस्सर्वेऽपि वेदान्तमतखण्डनाय अद्वैतमेव खण्डयन्ति। इतरदार्शनिका बौद्धजैना अपि अद्वैतमेव खण्डयन्ति। तस्मात् बादरायणनिर्मितानि अद्वैतमूलभूतानि ब्रह्मसूत्राणि तृतीयं न्यायप्रस्थानमिति जेगीयन्ते।

## १.१.५ अद्वैतसिद्धान्तविकासः -

एतादृशस्य श्रुतिसिद्धस्य प्राचीनतमस्य अज्ञविज्ञोपकारकस्य सकलदर्शन-शिरोऽलङ्काररत्नभूतस्य अद्वैतदर्शनस्य विशेषतः प्रबलप्रतिवादिनः भेदवादिनो

१. द्रष्टव्यम् - १.३.२३, २.३.४५ , ३.४.३०, ३.४.३७, २.३.४७, ३.१.१४, ४.१.१९, ४.२.१४, १.२.६, ४.३.११

२. "नान्यः पन्था विद्यतेऽयनाय" - श्वे.उ. ६.१५

३. ब्र.सू.शां.भा. १.१.२ पृ. ८८



न्यायवैशेषिकादयः, शालिकनाथप्रभृतयः पूर्वमीमांसकाः आसन्। तदनु त्रयोदशशतकादनन्तरं द्वैतमतप्रवर्तका आनन्दतीर्था अपि प्रतिवादिषु अन्यतमा अभूवन्। एभिः द्वैतवादिभिः युक्त्याभासैः कलुषितस्य अद्वैतसिद्धान्तस्य रक्षणार्थं तर्केणैव समाधानार्थं चित्सुखी-न्यायमकरन्द-न्यायदीपावली-खण्डनखण्डनखाद्य-अद्वैतसिद्धि-पञ्चदशीत्यादयो ग्रन्था विशेषतोल्लेखार्हाः। तत्र इतरमतखण्डनपरग्रन्थेषु शैलीद्वयं दृश्यते। तत्र चित्सुख-आनन्दबोधादीनां तु प्राचीना शैली युक्तिसहिता अर्थगाम्भीर्यवती श्रुतिमधुरशब्दविन्याससमन्विता सम्भाषमाणा दृश्यते। नैतच्छैल्यां काठिन्यं न वा विषयप्रतिपादने युक्तिकथने शब्दविन्यासे वा मन्दता दृश्यते। दृढयुक्तिकानि न्यायोपबृंहितानि च रमणीयानि वाक्यानि तेषां वाग्मितां सिद्धान्तविमर्शक्षमताञ्च प्रदर्शयन्ति। तदनु नव्यन्यायशैल्या भेदवादखण्डनार्थं प्रवृत्ताः मधुसूदनसरस्वतीप्रभृतयस्तु "यक्षानुरूपो बलिः" इति न्यायेन नवीनन्यायशैल्या परिष्कारप्रधानशैल्या इतरमतखण्डने प्रवृत्ताः।

वेदान्ते उपनिषद्-गीता-सूत्ररूपाणि श्रुति-स्मृति-युक्तिनाम्ना व्यवहृतानि त्रीणि प्रस्थानानि प्रसिद्धानि। तथा भामतीप्रस्थानम्, विवरणप्रस्थानमिति च अवान्तरप्रस्थानं सिद्धान्तप्रतिपादनभेदमूलकं प्रसिद्धं विद्यते, एतत् प्रस्थानद्वयम् अपि —

**"यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।**
**सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता॥**[१]"

इति सुरेश्वरोक्त्या मान्यतां प्राप्नोत्येव। अत्र सिद्धान्ते प्रक्रियाभेदे सत्यपि आत्मतत्त्वसाक्षात्कारे न कोऽपि भेदः। एक एव सिद्धान्त प्रक्रियाभेदेन कुत्रचित् विभिन्नैः शब्दैः अभिव्यज्यते। अत्र मधुसूदनसरस्वतीपादस्य वचनं स्मर्तव्यम् —

**"अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा**
**सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता।**
**जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता**
**जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा॥**[२]" इति।

१. बृ.उ.भा.वा. १.४.४०२

२. सि.ले.सं., १.१

यद्यपि उभायोरपि प्रस्थानयोः सिद्धान्तस्तु एक एव तथापि सिद्धान्तप्रतिपादने प्रक्रियाभेदेन ईषद्भेदो दृश्यते। तदिह वेदान्तजिज्ञासूनां कृते सुलभतयावगमाय तालिकारूपेण प्रदर्श्यते —

| **भामतीप्रस्थानम्** | **विवरणप्रस्थानम्** |
|---|---|
| १. कर्मणां विविदिषार्थत्वम् | १. कर्मणां विद्यार्थत्वम् |
| २. ब्रह्मसाक्षात्कारे मन एव करणम् | २. तत्त्वमस्यादिवेदान्तवाक्यरूपशब्द एव करणम् |
| ३. श्रवणमनननिदिध्यासनानां मध्ये निदिध्यासनमङ्गि अपरे अङ्गभूते | ३. श्रवणमनननिदिध्यासनानां मध्ये श्रवणमङ्गि अपरे अङ्गभूते |
| ४. ''श्रोतव्यो मन्तव्यः'' इति वाक्ये विधिर्नास्ति | ४. ''श्रोतव्यो मन्तव्यः'' इति वाक्ये विधिरस्ति |
| ५. जीवात्मविषये अवच्छेदवादः | ५. जीवात्मविषये प्रतिबिम्बवादः |
| ६. अज्ञानस्य आश्रयो जीवः, विषयस्तु ब्रह्म | ६. अज्ञानस्य आश्रयविषयौ ब्रह्म |
| ७. मूलाविद्यायाः जीवभेदेन नानात्वम् | ७. एकैव मूलाविद्या |
| ८. उपहितं ब्रह्म एव अखण्डाकारवृत्तेः विषयः | ८. शुद्धं ब्रह्म एव अखण्डाकारवृत्तेः विषयः |
| ९. साधनचतुष्टये सत्यासत्यवस्तु-विवेकः प्रथमसाधनम् | ९. साधनचतुष्टये नित्यानित्यवस्तु-विवेकः प्रथमसाधनम् |
| १०. ''स्वाध्यायोऽध्येतव्यः'' इति विधिरर्थावबोधफलकः | १०. ''स्वाध्यायोऽध्येतव्यः'' इति विधिरक्षरग्रहणफलकः |
| ११. त्रिवृत्करणं स्वीक्रियते | ११. पञ्चीकरणं स्वीक्रियते |
| १२. ब्रह्मणः सर्वज्ञत्वं स्वरूपचैतन्येन | १२. ब्रह्मणः सर्वज्ञत्वं मायावृत्तिभिः |
| १३. मनस इन्द्रियत्वमस्ति | १३. मनस इन्द्रियत्वं नास्ति |
| १४. अविद्या जीवाश्रिता | १४. अविद्या ईश्वराश्रिता |
| १५. अविद्यारूपिणा उपाधिना सहितं ब्रह्मणः विशुद्धं चैतन्यं जीवः | १५. अन्तःकरणतत्संस्कारावच्छिन्नाज्ञान-प्रतिबिम्बितं चैतन्यं जीवः |



अथ वेदान्तमीमांसाशास्त्रस्य प्रस्थानत्रयात्मकस्य अखण्डाद्वितीये प्रत्यगभिन्ने ब्रह्मणि परमं तात्पर्यम्। नित्यशुद्धबुद्धमुक्तस्वभावं सत्यज्ञानानन्तानन्द-विग्रहं ब्रह्मेति वेदान्तानाम् आघोषः। जीवस्यापि इदमेव तात्त्विकं स्वरूपं प्रतिपादयितुं त्वम्पदस्य अर्थद्वयं वाच्यार्थः लक्ष्यार्थश्चेति प्रतिपाद्यते। तत्र सोपाधिकं चैतन्यं वाच्यार्थः। निरूपाधिकं चैतन्यं लक्ष्यार्थः। उपाधिश्च अविद्या तत्कार्याणि अन्तःकरणादीनि। जीवः देहादिभ्यः व्यतिरिक्तः इन्द्रियादीनां धारकः कर्मपफल-सम्बन्धी इति। अनेन प्रबन्धेन शरीरेन्द्रियादिकमेव उपाधिरिति समसूचि। तथा च निरवयवस्य अखण्डचैतन्यस्य अविद्याकार्यकारणसम्बन्धः कथमिति शङ्कां निवारयितुं तथा च एकमेव ब्रह्म अविद्याद्वारा जीवजगदादिरूपेण प्रतीयते, तत्सिद्ध्यर्थम् अद्वैतवेदान्ते त्रयो वादा अवलम्बिताः।

(१) प्रतिबिम्बवादः पद्मपादाचार्यप्रकाशात्ममुनिसर्वज्ञात्ममुनिप्रभृतीनाम्,


(२) आभासवादः सुरेश्वराचार्यप्रभृतीनाम्,

(३) अवच्छेदवादश्च वाचस्पतिमिश्रप्रभृतीनाम्। तथा हि —

**वाचस्पतेरवच्छेद आभासो वार्तिकस्य च।**
**सङ्क्षेपशारीरकृतां प्रतिबिम्बमिहेष्यते॥**[१] इति।

तत्र प्रतिबिम्बवादमते अन्तःकरणे चित्प्रतिबिम्बो जीवः। तस्य अनेकत्वात् जीवस्यापि अनेकत्वं सिध्यति। अवच्छेदवादमते यथा जले अन्तःप्रविष्टम् आकाशं जलावच्छिन्नम् इत्युच्यते तथैव अज्ञानाश्रयीभूतं शुद्धचैतन्यं जीव इत्युच्यते। येषां मते अविद्यया संयुक्तं चैतन्यं जीवः, तेषां मते अविद्याया एकत्वाज्जीवस्य एकत्वम्। अयम् एकजीववादो भामतीकाराणां मते। सुखदुःखादिवैचित्र्यन्तु उपाधिभेदाद् भवन्ति। बहुप्रकारया अविद्यया अविद्याकार्यबुद्ध्या वा संयुक्तं चैतन्यं जीवः, स च जीवः अवच्छिन्नो वा उपहितो वा प्रतिबिम्बितो भवतीति ये अङ्गीकुर्वन्ति तेषां मते जीवस्य नानात्वम्। प्रतिबिम्बवादे बिम्बस्थानीयं ब्रह्म तथा प्रतिबिम्बस्थानीयं जीवादि। तत्र जीवविषये वार्तिककारसुरेश्वराचार्याः, पञ्चपादिकाविवरणकारप्रकाशात्मयतिः, सङ्क्षेपशारीरककारसर्वज्ञात्ममुनिः, प्रकटार्थविवरणकारः अनुभूतिस्वरूपश्च - एते बहुजीववादिनः। अयमेकजीववादः बहुजीववादश्च अधोचित्रेण प्रस्तूयते —

१. सि.बिं. भूमिकाभागे पृ. ८




एवं निर्विशेषात् निर्लक्षणाच्च स्वयम्प्रकाशाद् अद्वैताद्ब्रह्मणः सविशेषस्य सलक्षणस्य नानात्मकस्य जगतः उत्पत्तिः मायास्वरूपवर्णनद्वारा आचार्यैः वर्णिता। तत्र तावद् भाष्यकारैः माया-अविद्या-अज्ञान-अव्यक्तादिशब्दानां समानार्थकत्वं भाष्ये वर्णितम्।[1] शङ्कराचार्यार्वाचीनेषु आचार्येषु माया-अविद्ययोः तारतम्ययोः विषये जीवेश्वरस्वरूपवर्णनविषये अविद्यामाययोः आश्रयत्वे सिद्धान्तभेदा उद्भाविताः। यथा भामतीमते अज्ञानविषयीकृतं चैतन्यम् ईश्वरः, अज्ञानाश्रयीभूतं चैतन्यं जीव इति। ईश्वरविषये आभासवादं जीवविषये प्रतिबिम्बवादं च स्वीकृत्य अज्ञानोपहितं बिम्बचैतन्यम् ईश्वरः, अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं

१. ब्र.सू.शां.भा. १.४.३



चैतन्यं जीवः इति विवरणप्रस्थाने। एवं तत्र माया-अविद्याशब्दयोः सूक्ष्मार्थभेदः सूचितः। जीवत्व-ईश्वरत्वप्रापकोपाधिस्तु अनादिभावरूपं त्रिगुणात्मकं सदसद्भ्यामनिवर्चनीयम् अज्ञानम्। तच्चाज्ञानं माया-अविद्याभेदेन द्विविधम्। शुद्धसत्त्वप्रधाना माया। मलिनसत्त्वप्रधाना अविद्या। मायोपहितं चैतन्यम् ईश्वरः, अविद्योपहितं चैतन्यं जीवः। मायाविवर्जिते ब्रह्मणः प्रवृत्तिर्न भवति। मायाशक्तिरेव अविद्यात्मिका बीजशक्तिरव्यक्तनाम्ना व्यवह्रियते। इयं माया अग्नेरपृथग्भूता दाहिका शक्तिरिव परमेश्वराश्रिता अपृथग्भूता भवति। अत्रेयं शङ्का भवति — मायाशक्तिः सद्वस्त्वधिष्ठाना स्याद्यदि तर्हि तस्याः कृत्स्नब्रह्मवृत्तित्वम् आहोस्विदेकदेशभाक्त्वम्? आद्ये मुक्तप्राप्यं ब्रह्म न स्यात्। द्वितीये सांशत्वापत्तिः। इत्याकारिकां मन्दधियां शङ्कां निराकर्तुं तद्बुद्ध्यनुरूपामेव भाषामाश्रित्य मायेयं एकदेशवर्तिनी, न तु कृत्स्नवर्तिनी इति अङ्गीक्रियते वेदान्तसिद्धान्ते। यथाऽभाषन्त पञ्चदशीकाराः—

**न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किन्त्वेकदेशभाक्।**
**घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते॥**
**पादोऽस्य सर्वा भूतानि त्रिपादस्ति स्वयंप्रभः।**
**इत्येकदेशवृत्तित्वं मायाया वदति श्रुतिः॥**[1] इति।

श्रुतिश्चात्र भवति "**पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि**[2]" इति। इयं सत्त्वरजस्तमोगुणात्मिका माया ज्ञानविरोधिनी न सती नापि असती। अतः सदसदुभयविलक्षणा शास्त्रे अनिर्वचनीया इति कथ्यते। तदगादिषुः शङ्कराचार्याः —

**सन्नाप्यसन्नाप्युभयात्मिका नो**
**भिन्नाऽप्यभिन्नाऽप्युभयात्मिका नो।**
**साङ्गाऽप्यनङ्गाऽप्युभयात्मिका नो**
**महाद्भुताऽनिर्वचनीयरूपा॥**[3] इति।

१. पं.द. २.५४, ५५
२. छा.उ. ३.१२.६
३. वि.चू. १९१

एवं माया नित्यशुद्धबुद्धमुक्तस्वभावमात्मानमावृत्य तद्बलेनैव तद्विपरीतभावं विक्षिपति। यथा जगदे सङ्क्षेपशारीरककारैः —

**आच्छाद्य विक्षिपति संस्फुरदात्मरूपं**
**जीवेश्वरत्वजगदाकृतिभिर्मृषैव।**
**अज्ञानमावरणविभ्रमशक्तियोगाद्**
**आत्मत्वमात्रविषयाश्रयताबलेन॥**[१] इति।

अमुष्याः मायाभिधाया अविद्यात्वं प्रमाणासहिष्णुत्वमेव। अतः तर्कादिबलेन माया ज्ञातुं न पार्यते।

**अविद्याया अविद्यात्वमिदमेव तु लक्षणम्।**
**मानाघातासहिष्णुत्वमसाधारणमिष्यते ॥**[२] इति।

सूर्योदयकाले यथा तमसो नाशो दृश्यते तथा ज्ञानोदयकाले मायायाः प्रतीतिर्नश्यति —

**सेयं भ्रान्तिर्निरालम्बना सर्वन्यायविरोधिनी।**
**सहते न विचारं सा तमो यद्वद् दिवाकरम्॥**[३] इति।

आवरणविक्षेपभेदेन मायायाः शक्तिः द्विधा वर्तते। उक्ते हि भामत्यामपि अविद्याया द्वे शक्ती — ''**अनिर्वाच्याविद्याद्वितयस्य सचिवस्य**[४]'' इत्यादिना। आभ्यामेव शक्तिभ्यां ब्रह्मणः वास्तविकं सद्रूपमाच्छाद्यते। अनया आवरणशक्त्या सच्चिदानन्दात्मकस्यात्मनः स्वरूपमानन्दाद्यात्मकम् आच्छाद्य कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छभावना सम्भाव्यते। इयं माया अविद्यापदवाच्या अज्ञानाख्या कथं जाता ? केन कारणेन अस्याः ब्रह्मणा सम्बन्धो जातः ? उच्यते — अविद्यायाः तत्सम्बन्धस्य च विषये —

**जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा।**
**अविद्या तच्चितोर्योगः षडस्माकमनादयः॥**[५]

१. सं.शा. १.२०
२. बृ.उ.भा.वा. १.१.१८१
३. नै.सि. ३.६६
४. भामती, मङ्गलाचरणे प्रथमश्लोकः
५. अ.सि. पृ. ८१ इत्यत्र उद्धृतः श्लोकः



इति अविद्याया अनादित्वाङ्गीकारात्।

नवीनास्त्वद्वैतिनः अज्ञानस्य ज्ञानशक्तिः क्रियाशक्तिश्चेति द्विधा वदन्ति। ''**सत्त्वात् सञ्जायते ज्ञानम्**[१]'' इति प्रामाण्याद् रजस्तमोभ्यामनभिभूतं सत्त्वं ज्ञानशक्तिः। क्रियाशक्तिस्तु आवरणविक्षेपभेदेन द्विविधा भवति। अत्र घटो नास्तीति व्यवहारहेतुः रजस्सत्त्वाभ्यामनभिभूतं तम आवरणशक्तिः। आकाशादिप्रपञ्चोत्पत्तिहेतुः तमस्सत्त्वाभ्यामभिभूतं रजो विक्षेपशक्तिः। ''**यथोर्णनाभिः सृजते गृह्णते च**[२]'' इति श्रुत्यनुरोधेन विक्षेपशक्तिमता अज्ञानेन उपहितस्यैव ईश्वरस्य जगत उपादानकारणता। अत्र मते आवरणशक्तिप्रधानं अज्ञानम् ''अविद्या''। विक्षेपशक्तिप्रधानमज्ञानं ''माया'' इत्युच्यते। इयमेव माया, तमः अविद्या, अव्यक्तमित्यादिशब्देन व्यवह्रियते।

पञ्चदशीकारा विद्यारण्यस्वामिनस्तु विवरणप्रस्थानानुयायिनः सन्तोऽपि विवरणप्रस्थानानुकूलसिद्धान्तानां मार्गप्रदर्शकाः, भामतीविवरणप्रस्थानयोः समन्वयकारका विराजन्ते। रजस्तमोऽनभिभूता शुद्धसत्त्वप्रधाना माया, रजस्तमोऽभिभूता मलिनसत्त्वप्रधाना अविद्या इति प्रतिपादयन् मायाप्रतिबिम्बितं सर्वज्ञत्वादिगुणविशिष्टं चैतन्यमीश्वरः, अल्पज्ञत्वादिगुणविशिष्टं अविद्याप्रतिबिम्बितं चैतन्यं जीवः। उक्तञ्च पञ्चदश्याम् —

**सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते।**
**मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः॥**[३] इति।

**मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ।**[४] इति च।

सत्त्वस्य प्रकाशकस्वभावस्य शुद्धिः गुणान्तरेणानभिभवः, अविशुद्धिः न विशेषेण शुद्धिः रजस्तमोभ्यां न्यूनाधिकतया मिश्रणः, ताभ्यां मायाऽविद्येति ते मते इति श्लोकार्थः।

एवञ्च मायां प्राचीना अद्वैताचार्याः एवं निरूपयन्ति —

१. भ.गी. १४.१७
२. मुण्ड.उ. १.१.७
३. पं.द. १.१६
४. पं.द. ६.२३६

- माया
  - आवरणशक्तिः (ब्रह्मणः शुद्धस्वरूपम् आच्छादयति)
  - विक्षेपशक्तिः (शुद्धे ब्रह्मणि धर्मधर्मिभावम्, विषयविषयिभावम्, अनात्मबुद्धिं प्रपञ्चभावञ्च उत्पादयति)

मायाविषये नवीना अद्वैतिनः —

- अज्ञानम्
  - ज्ञानशक्तिः
  - क्रियाशक्तिः
    - अविद्या (आवरणशक्तिः)
    - माया (विक्षेपशक्तिः)

एवं विवरणमते ब्रह्मचैतन्यम् ईश्वरचैतन्यं जीवचैतन्यञ्चेति चैतन्यत्रयं स्वीकृतम्। परन्तु कूटस्थचैतन्यम्, ब्रह्मचैतन्यम्, जीवेश्वरचैतन्यद्वयञ्चेति चतुर्विधं चैतन्यं स्वीकुर्वन् विद्यारण्यमुनयः भामतीविवरणप्रस्थानयोः समन्वयं प्रत्यपादयन् —

**कूटस्थो ब्रह्म जीवेशौ इत्येवं चिच्चतुर्विधा।**
**घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा॥**[1] इति।

साक्षिस्वरूपविषयेऽपि विद्यारण्यमुनेः प्राक्कालीना वेदान्तिनो जीवेश्वराभ्यां भिन्नं शुद्धं चैतन्यमात्मानं साक्षिणं वदन्ति। विद्यारण्यस्वामिनस्तु कूटस्थचैतन्यमेव साक्षीति प्रतिपादयन्ति। यथा नृत्यशालास्थदीपः साक्षी भवति तथा कूटस्थचैतन्यमेव साक्षीति।[2]

---

१. पं.द. ६.१८

२. तत्रैव, १०.११, १२



एवं दशमशतकादनन्तरं षोडशशतकपर्यन्तं विरचितेषु ग्रन्थेषु भामतीविवरण-प्रस्थानस्य विकासः, अनिर्वचनीयख्यातिसाधनम्, अखण्डार्थत्वनिरूपणम् इत्यादिविषयाः पल्लविता दृश्यन्ते। विशेषतश्च अद्वैतसिद्धान्तखण्डनपरस्य द्वैतसिद्धान्तमण्डनपराणां निराकरणाय प्रवृत्तानाम् अद्वैतसिद्धि-गुरु-लघुचन्द्रिका-विट्ठलेशीयादीनां ग्रन्थानाम् एवम् आधुनिकेऽपि काले शतभूषण्यादिग्रन्थानाम् आविर्भावः अद्वैतसिद्धान्तस्य विकासोन्मुखतामापादयति।

### १.१.६ अद्वैतवेदान्ते प्रकरणग्रन्थाः —

श्रुतिस्मृतिन्यायेति प्रस्थानत्रयान्तर्गतास्सर्वेऽपि ग्रन्था व्याख्योपव्याख्यया व्याख्याताः। अद्वैतवेदान्तसाहित्ये प्रस्थानत्रयान्तर्गता अद्वैतवेदान्तसिद्धान्त-प्रतिपादकाः प्रायः पञ्चशताधिकाः सव्याख्या निर्व्याख्याश्च विभिन्नैराचार्यैः कृता ग्रन्था उपलभ्यन्ते।[1] एते च प्रकरणग्रन्थाः सिद्धान्तमात्रप्रदर्शनपराः, वादप्रधानखण्डनमण्डनपराः अनुभवात्मकभावाविष्करणपराः काव्यशैल्या सिद्धान्तप्रदर्शनपराश्चेति चतुर्धा विभक्तुं शक्यन्ते। एते सर्वेऽपि —

**शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।**
**प्राहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥**[2]

इति लक्षणान्विताः प्रकरणग्रन्थस्थानं लभन्ते। अद्वैतमतप्रतिपादका एते ग्रन्थाः प्रकाशिता अप्रकाशिताश्च विभिन्नहस्तप्रतिसङ्ग्रहालयेषूपलभ्यन्ते।

### १.१.७ अद्वैतवेदान्तवाङ्मये कृष्णकृतकैवल्यदीपिका —

यद्यपि एतेषु प्रकरणग्रन्थेषु बहवो ग्रन्थाः विद्वद्वरेण्यैः संशोधनपुरःसरं प्रकाशिताः तथापि ग्रन्थ-तमिल-तेलुगु-कन्नड-शारदा-देवनागरीप्रभृतिषु नैकासु लिपिषु विरचिता इमे ग्रन्थाः प्रकाशिता अप्रकाशिताश्च विभिन्नेषु प्राच्यविद्याग्रन्थालयेषूपलभ्यन्ते। अमीषु ग्रन्थेषु उपलभ्यन्ते नैके वेदान्तविषया ये मुमुक्षूणां नितरामुपयोगिनस्सन्ति। अतीव सरलया रीत्या विविधदृष्टान्तपुरस्सरं, विभिन्नमतसिद्धान्तोपवर्णनपूर्वकमद्वैतमतस्य श्रेष्ठ्यमुपादेयत्वञ्च वर्णयन्त इमे न्यायप्रमाणोपबृंहिताः प्रकरणग्रन्थाः शास्त्रप्रमेयं जिज्ञासुभ्यः स्फुटं प्रबोधयन्ति।

---

१. द्रष्टव्यम् - अ.वे.सा.को. पृ. ११४

२. पा.उप. २८.२१

तादृशनिबन्धेष्वेकमिदं ग्रन्थरत्नं कृष्णकृतं ''कैवल्यदीपिका'' नाम यदद्यावधि अप्रकाशितं निगूढमिवासीत्।

कैवल्यदीपिका इति संज्ञकाः त्रयो ग्रन्थाः संस्कृतवाङ्मये विद्योतन्ते। एतेषां विवरणं निम्नरूपेण वर्तते —

(१) वोपदेवविरचितस्य ''भागवतमुक्ताफलम्'' इत्याख्यग्रन्थस्य हेमाद्रिविरचित-व्याख्याया नाम ''कैवल्यदीपिका'' वर्तते। इयं व्याख्या कलकतानगरे १९२० तमे प्रकाशिता इति N.C.C. तः ज्ञायते।[१]

(२) कैवल्यदीपिका इत्याख्योऽपरो ग्रन्थः बोधानन्देन चतुर्षु अध्यायेषु ग्रथितः। असौ बोधानन्दो द्रविडदेशीयपञ्चनद-(तिरुवयार)-क्षेत्रवासी ब्रह्मानन्दयतेः शिष्यः अष्टादशशतकीय इति ज्ञायते।[२] अस्याः कैवल्यदीपिकाया व्याख्या नारायणप्रिययत्यपराभिधानदुर्गाप्रसादयतिना ''स्नेह'' नाम्नी कृता वर्तते। सव्याख्या इयं कैवल्यदीपिका MGOML मध्ये R.2934 ग्रन्थक्रमाङ्के दृश्यते।[३] अद्वैतवेदान्तसाहित्येतिहासकोशे ग्रन्थोऽयम् अमुद्रितः इति सूचितम्।

(३) ब्रह्मानन्दापराभिधानकृष्णानन्दयतेश्शिष्यकृष्णकृता कैवल्यदीपिका मद्रासस्थ-अड्यारहस्तप्रतिग्रन्थालये प्राप्यते। अस्याः कैवल्यदीपिकायाः स्वोपज्ञप्रभाव्याख्या अपि तत्र उपलभ्यते। अयं ग्रन्थः तमिलकविताण्डव-रायस्वामिविरचितस्य कैवल्यनवनीतस्य संस्कृतीकरणरूप इति N.C.C. मध्ये लिखितं वर्तते। अस्य ग्रन्थस्य मूलमात्रं संस्कृतसंस्करणम् अपूर्णरूपेण १९३३ तमे वर्षे कुम्भकोणं नगरे प्रकाशितम्। तमिलसंस्करणं १९४० तमे वर्षे पालघाटनगरे प्रकाशितम्, यत्र कवेः नाम शङ्कुकविः इति।

## १.२ कृष्णः कः ? —

''कृष्णः'' इति उच्चरिते सति जगद्गुरुः श्रीकृष्णः अस्माकं विचारसरण्याम् अवतरति किन्तु सुविशाले संस्कृतवाङ्मये ''कृष्णः'' इति नामधेया बहवो हि

१. N.C.C. Vol. V, P. 77

२. अ.वे.सा.को. पृ. ३६७

३. N.C.C. Vol. V, P.७८



कोविदा विद्योतन्ते। सुमहत्संस्कृतवाङ्मये प्रायो द्विशतं ''कृष्ण'' इति नाम अभिदधानाः तारका विलसन्ति।[१] एतेषु बहूनां देशकालादिपरिचयो कृतित्व-व्यक्तित्वविषयकविस्तारो न ज्ञायते। केषाञ्चन नाममात्रत्वेन प्रसिद्धत्वात् तेषां स्थितिरेव सन्देहास्पदा भवति। अतस्सर्वेषां परिचय इदमित्थमेव इतिरूपेण दातुं दुःशकम्। तत्र अद्वैतवेदान्तवाङ्मये एव द्वादशाधिकाद्वैताचार्याः कृष्ण इति संज्ञया वेदान्तसाहित्येतिहासकोशग्रन्थेषु उट्टङ्कितास्सन्ति।[२] एतेषां नामानि क्वचित् कृष्णः, कृष्णगुरुः, कृष्णपण्डितः, कृष्णगिरिः, कृष्णशर्मा, श्रीकृष्ण इति रूपेण वर्तन्ते। अमुष्या मातृकायाः कर्ता कृष्णः क इति ज्ञातुं ये केचन विषया विरलतया कथञ्चिद् दृष्टिपथम् आगताः तान् समवलम्ब्य तथा ग्रन्थकर्त्रा ग्रन्थारम्भे ग्रन्थसमाप्तौ पुष्पिकायाञ्च यावन्तो निजपरिचयानुकूला निर्देशा विहिताः तानेवाधारीकृत्यात्र तदीयः परिचयः समुपस्थाप्यते।

मातृकायामस्यां ग्रन्थकारो न कुत्रापि स्वनाम उल्लिलेख। महति कालार्णवे निमग्नः कविपुङ्गवः कैवल्यदीपिकाप्रणेता वेदान्तविचक्षणः कृष्णः कस्मिन्समये कतमं जनपदं जन्मना भूषितवानिति निश्चेतुं किञ्चिद् दुःशकमेव। अस्या मातृकायाः कर्तुर्नाम क्वचित् ''कृष्णः'', क्वचित् ''कृष्णगुरुः'', क्वचिच्च ''कृष्णपण्डितः'' इति प्राप्यते। तद्यथा — अड्यारग्रन्थालयस्थशोधकेन्द्रे विद्यमानायां ग्रन्थसूच्यामस्याः कर्ता ''कृष्णः'' इति निर्दिष्टम्।[३] मद्रासविश्वविद्यालयात् प्रकाशिते N.C.C. मध्येऽपि अस्याः कर्तुर्नाम ''कृष्णः'' इत्येवास्ति। मद्रासराजकीयप्राच्यविद्यापुस्तकालयात् प्रकाशितायां न्यायचन्द्रिकायामस्याः ग्रन्थकर्तुर्नाम कृष्णगुरुः इति लिखितमस्ति।[४]

र.तङ्गस्वामिसम्पादिते अद्वैतवेदान्तसाहित्येतिहासकोशे ''कृष्णः'', ''कृष्णपण्डितः'' इति उभयथा नामनिर्देशोऽस्ति।[५] अस्या मातृकायाः

१. द्रष्टव्यम् - N.C.C. Vol. IV, P. 284-366

२. द्रष्टव्यम् - अ.वे.सा.को. पृ. ४५७

३. Descriptive Catalogue of Sanskrit Manuscripts in Adyar Library, Vol. IX, P. 790-791.

४. न्यायचन्द्रिका, पृ. २३

५. अ.वे.सा.को. पृ. ३२७

पुष्पिकावाक्येऽपि ''इति श्रीमद्गुरुब्रह्मानन्दयतीन्द्रचरणारविन्दमकरन्दतृप्तस्वान्तेन कृष्णेन विरचितेयं कैवल्यदीपिका समाप्ता'' इति निर्दिष्टमस्ति।[१] एवं विभिन्नमतेषु सत्सु मातृकाया अस्याः कर्ता कृष्णः इति निश्चीयते। अतो ग्रन्थकर्तुर्नाम कृष्ण इत्येव सुसङ्गतम्। यद्यपि एतस्य पाण्डित्यं वैदुष्यञ्च समवलम्ब्य आदरात् ''कृष्णपण्डितः'' इति नामकरणं क्वचित्कृतं स्यात्, तथाप्यत्र मातृकायाः सम्पादनकर्मणि ग्रन्थस्यास्य शीर्षके ग्रन्थकर्तुः नाम ''कृष्णः'' इत्येव लिखितमस्ति। व्यवहारे लेखने च ''कृष्णः'', ''कृष्णपण्डितः'' इति उभयथोल्लेखोऽस्ति। एतस्य इतरग्रन्थानां प्रामाणिकरीत्या उपलब्ध्यभावे सत्यपि इतरेतिहासकोशग्रन्थेषु, सन्दर्भग्रन्थेषु, कोशग्रन्थेषु च तस्य परिचयः प्राप्यते।

अयं कैवल्यदीपिकाकारः कृष्णपण्डितः ब्रह्मानन्दापराभिधानकृष्णानन्दयतेः शिष्यः आसीत्। स्वगुरुविषये ग्रन्थकारोऽयं स्वयं कैवल्यदीपिकायामित्थं ब्रूते —

**अमृतमतुलनित्यानन्दसान्द्रस्वरूपं**
**विदितसकलवेदान्तार्थतात्पर्यनिष्ठम्।**
**मृदितसकलदोषं मोक्षकामैः सुसेव्यं**
**गुरुवरमहमीडे कृष्णसंज्ञं यतीन्द्रम्॥**[२] इति।

अपि च कैवल्यदीपिकामातृकाया द्वयोः प्रकरणयोः आरम्भे अन्ते च ''**श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः**'' इत्यनेन वाक्येन ज्ञायते यदस्य गुरोर्नाम ब्रह्मानन्दः।[३] ग्रन्थस्यान्तेऽपि अयं ग्रन्थकारः स्वगुरुम् अनुस्मृत्य स्वकृतार्थतां दर्शयति। तत्रायं स्पष्टं द्योतयति यदस्य गुरोः नाम ब्रह्मानन्दः वर्तते। यथा - ''**ब्रह्मानन्दाद्यतीन्द्रादपि विपुलकृपां प्राप्य मुक्तो धरण्याम्**[४]'' इति। तथैव प्रभाव्याख्यायामयमवादीद्यदस्य गुरुः यतीन्द्रो ब्रह्मानन्दः अन्वर्थनामा वर्तते। अस्य स्वगुरुविषये अतीव निष्ठा वर्तते। स्वगुरुम् अयं ''**विदितसकलवेदान्तार्थ-तात्पर्यनिष्ठम्**[५]'' इतिरूपेण जीवन्मुक्तः इति मनुते। ब्रह्मानन्दस्य अपरं नाम

१. कै.दी. मातृकायाः पुष्पिकावाक्यम्।
२. कैवल्यदीपिकायाः प्रभाव्याख्यायाः मङ्गलाचरणे।
३. द्रष्टव्यम्- मातृकाया उभयोः प्रकरणयोः अन्तिमो भागः।
४. कै.दी., २.१७२
५. कै.दी.व्या. २



कृष्णानन्दयतिः इत्यस्ति।[१] ''**गुरुवरमहमीडे कृष्णसञ्ज्ञं यतीन्द्रम्**[२]'', ''**नत्वा श्रीकृष्णयोगीन्द्रपादपङ्केरुहद्वयम्**[३]''। एकत्र अयं ग्रन्थकारो ''**नमामि तान् शङ्करपूज्यदेशिकान्**[४]'' इति पद्येन स्वगुरुं नमस्कुर्वन् गुरोः विशेषणम् ''देशिकः'' इति प्रायुङ्क्त। अपि च समग्रे ग्रन्थे अनेन गुरोः विशेषणत्वेन ''देशिकः, वरदेशिकः'' इत्यादीनि विशेषणानि प्रयुक्तानि। यद्यपि एवं भवितुमर्हति यदेकं नाम विद्यागुरोः अपरञ्च दीक्षागुरोः इति किन्तु अस्मिन् विषये प्रबलतरं किमपि प्रमाणं नोपलभ्यते। किन्तु ब्रह्मानन्दस्वामिनः अपरं नाम कृष्णानन्दयतिः कृष्णयोगीन्द्रो वा अस्मिन् विषये कानिचन प्रमाणानि सन्ति।[५] अयमपि कृष्णानन्द इति नामधेयं स्वगुरुं बहुत्र ब्रह्मानन्द इति सम्बोधयति।[६]

अस्य ग्रन्थकारस्य वंशविषये साक्षात् प्रमाणं विवरणञ्च नोपलभ्यते तथापि ग्रन्थकारेण प्रणीतासु कृतिषु एतद्विषये ईषन्निर्देशः प्राप्यते। तद्यथा अनेन कृष्णेन विरचितायाः ''मुनिभावप्रकाशिका'' इति भगवद्गीताव्याख्याया आद्येषु पद्येषु एष सङ्केतयति यत् स भारद्वाजगोत्रीयनृसिंहगुरोः पुत्रः, श्रीरामदेशिकस्य भागिनेयः च। स्वीयमातुलाद् व्याकरणमीमांसावेदान्ताद्यनेकशास्त्राणामध्ययनञ्चकार।[७]

## १.३ कृष्णस्य देशः -

अस्य कृष्णस्य जन्मदेशः कः ? इति विचारे क्रियमाणे प्रायः सर्वेषां विदुषां मतैक्यमस्ति यदयं दक्षिणदेशीयः आसीत्। अत्र मातृकायाम् अयं ग्रन्थकारः स्वजननस्थानविषये न कुत्रापि निरदिक्षत्। अतः एतस्य जन्मस्थानविषये

१. "The author who calls himself as Krishna was the pupil of Krishnanand Yati alias Brahmananda Yati.", - Descriptive Catalogue of Sanskrit Manuscripts in the Adyar Library, Vol. IX. Page 790-92.
२. कै.दी.व्या. २
३. कै.दी.व्या. ४
४. कै.दी.व्या. मङ्गलाचरणे तुरीयश्लोकः।
५. द्रष्टव्यम्- अद्वैतवेदान्तसाहित्येतिहासकोशः, पृ. ३२७; N.C.C. Vol. IV, P. 293.
६. (१) मातृकायाः आरम्भे अन्ते चायं ग्रन्थकारः ''श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः'' इति स्वगुरुं नमस्कुर्वन् कृष्णानन्दब्रह्मानन्दयोरभेदं दर्शयति।
(२) कै.दी.व्या. इत्यत्र द्वितीयप्रकरणस्य प्रथमो मङ्गलाचरणश्लोको द्रष्टव्यः।
७. अ.वे.सा.को. पृ. ३२७

प्राथमिकं प्रमाणं तु किमपि नास्ति तथापि कानिचन गौणप्रमाणानि अस्य कृष्णस्य जन्मदेशविज्ञानाय प्रामाण्यं भजन्ति। तत्र प्रथमं प्रमाणमस्ति मातृकायाः लेखनशैली। मातृकायां प्रायः बहुत्र लकारस्य स्थाने ळकारस्य प्रयोगो विहितः। एतादृशः प्रयोगः प्रायः दाक्षिणात्यानां भवति। द्वितीयं प्रमाणमस्ति अद्वैतवेदान्तसाहित्येतिहासकोशग्रन्थे निबद्धोऽस्य परिचयः। र.तङ्गस्वामिमहोदयः स्वकीये अद्वैतवेदान्तसाहित्येतिहासकोशे लिखति यत् ''ब्रह्मानन्दापराभिधान-कृष्णानन्दयतेश्शिष्योऽयं कृष्णपण्डितः दक्षिणदेशीयस्तमिलभाषायास्साहित्ये च निष्णातश्चोलदेशवासीति ज्ञायते[1]'' तृतीयं प्रमाणमस्ति यदनेन कृष्णपण्डितेन विरचितः कैवल्यदीपिका इत्ययं ग्रन्थः तमिलभाषायां ताण्डवरायस्वामिना विरचितस्य कैवल्यनवनीताख्यस्य संस्कृतीकरणरूपः पद्यबद्धो वर्तते इति केषाञ्चन मतम्।[2] अयं ताण्डवरायस्वामी दक्षिणदेशीय आसीदिति विदुषां मतमस्ति। अतोऽयं कृष्णपण्डितोऽपि दक्षिणदेशीयः इति निर्णेतुं शक्यते।

## १.४ कृष्णस्य कालः -

अनुसन्धानकर्मणि ग्रन्थकर्तुर्देशकालसङ्कीर्तनं प्रधानं प्रथमं च स्थानं लभते। परन्तु प्रायः संस्कृतविदुषां शास्त्रकाराणाञ्च कालः कालगर्भे विलीन एव वर्तते इति ज्ञातपूर्वमेव समेषां संस्कृतपण्डितानाम्। अतः प्राचीनशास्त्रकाराणां कालनिर्धारणं किञ्चिद् दुःशकमेव वर्तते। एतद्विषये साहित्यरत्नाकरस्य अध्ययनात्मकभागे वेम्पटिकुटुम्बशास्त्रिणो लिखन्ति यत् ''पूर्वेषां रचनाव्यासङ्गः स्वमतिवैशद्यैकप्रयोजन आसीत्। मुद्रणादीनाम् अभाववति तस्मिन् काले तादात्विकोपलब्धेषु ग्रन्थेषु गुणदोषौ परिशील्य तौ सम्यगाकलयितुं तद्विषयविचारविषया ग्रन्थास्तैर्व्यरच्यन्त। अपि च स्वनाम्न उद्धाटनमपि दोषाय अकल्पत तस्मिन् काले, किमुत देशकालादिसङ्कीर्तनम्। अतश्च ग्रन्थस्थविषय-विमर्शनदृष्टीनां तेषां नासीत् ततोऽप्यप्रधानेषु कालादिनिरूपणेष्वासक्तिरावश्यकता च[3]'' इति। प्रकृतमातृकाकारोऽपि स्वमातृकायां कुत्रचिदपि स्वदेशकालावधिकृत्य स्पष्टरूपेण न किञ्चिदलिखत्। तस्मात् प्रमाणान्तरैः एष विषयो निश्चेतव्यो भवति।

१. अ.वे.सा.को. पृ. ३२७
२. अ.वे.सा.को. पृ. ३२७
३. साहित्यरत्नाकरः, पृ. १२



ग्रन्थकारस्य कालविषये साक्षात्प्रमाणस्य अनुपलब्धत्वात् पारम्परिक-प्रमाणानि इह शरणीक्रियन्ते। मातृकाग्रन्थोऽयं तमिलभाषायां ताण्डवरायस्वामिना विरचितस्य कैवल्यनवनीतस्य संस्कृतीकरणरूपः पद्यबद्धोऽस्तीति केचन।[1] मतमेतत् प्रामाणिकमप्यस्ति। अतोऽस्य कालः अष्टादशशताब्दिरिति निर्णेतुं शक्यते। यतो हि ताण्डवरायः सप्तदश-अष्टादशशतकीयः चोलदेशीयो नन्निलग्रामवासी नारायणसरस्वतीशिष्यः आसीत्।[2]

केचित्तु ताण्डवरायस्वामिनं तिरुवानैक्कावलगोपालशास्त्रिणः प्राप्तविद्यं, नारायणगुरोः प्राप्तदीक्षं, परमशिवेन्द्रशिष्यं सदाशिवब्रह्मेन्द्रसतीर्थ्यञ्च भणन्ति।[3] अतः सर्वथापि तमिलकविताण्डवरायस्वामिनः अर्वाचीनोऽयं कैवल्यदीपिकाकारः कृष्णपण्डितः अष्टादशशतकीयः (1800 A.D.) इति तर्कयितुं शक्यते। तर्केणानेन ग्रन्थकारस्यास्य समयो ख्रीष्टवर्षस्याष्टादशशताब्द्या मध्यमभाग इति निर्धारितो भवति।

## १.५ कृष्णस्य कृतयः -

कृष्णपण्डितेनाऽऽहत्य कियन्तो ग्रन्था रचितास्तत्तु नैव पूर्णतया निर्धारयितुं शक्यं तथाऽपि विभिन्नप्राच्यहस्तप्रतिग्रन्थालयानां सूचिभिः ज्ञायते यदनेन ग्रन्थकर्त्रा इमे ग्रन्था विरचितास्सन्ति —

१. कैवल्यदीपिका स्वोपज्ञप्रभाव्याख्यायुता।
२. प्रत्यक्स्वप्रकाशत्ववादः।
३. भगवद्गीताव्याख्या - मुनिभावप्रकाशिका।
४. गोपिकागीतव्याख्या - मुनिभावप्रकाशिका।
५. अद्वैतसुधाबिन्दुः।
६. छान्दोग्योपनिषत्कारिका:।

१. ''एतदीय ग्रन्थः कैवल्यदीपिकाख्या। स च तमिलभाषायां ताण्डवरायस्वामिना विरचितस्य कैवल्यनवनीताख्यस्य संस्कृतीकरणरूपः पद्यबद्धः ग्रन्थः'' - अ.वे.सा.को. पृ. ३२७
२. http://www.newkaivalyanavaneetham.blogspot.in/2011/07/kaivalya-navaneetham-in-contemporary.html. Accessed on 28.08.2014
३. अ.वे.सा.को. पृ. ३२७

एतेषु ग्रन्थेषु प्रथमक्रमाङ्के निर्दिष्टः (१) कैवल्यदीपिका इत्याख्यो ग्रन्थो मातृकारूपेण प्राप्यते। स च शोधकालावधौ शोधकार्याङ्गत्वेन स्वीकृत्य मया प्रकृते ग्रन्थप्रकाशनरूपेण स्वीकृतो वर्तते। यस्य विस्तृतं विवरणम् अस्मिन् ग्रन्थे कैवल्यदीपिकायाः परिचितिः (पृ. २५) इति शीर्षके प्रस्तूयते। इतरेषां चतुर्णां विषये विभिन्नप्राच्यहस्तप्रतिग्रन्थालयानां ग्रन्थसूच्याधारेण यत्किञ्चित् परिचयोः नामनिर्देशनञ्च दृश्यते तदत्र विमृश्यते —

(२) **प्रत्यक्स्वप्रकाशत्ववादः** — द्वाविंशतिपुटात्मको ग्रन्थोऽयं मद्रासनगरस्थ-अड्यारहस्तप्रतिसङ्ग्रहालये मातृकारूपेण ग्रन्थलिपौ वर्तते। ग्रन्थसूच्यामस्य ग्रन्थक्रमाङ्कः 23.F.44-ग्र-22 इति वर्तते। तत्र अस्या मातृकायाः कर्तुर्नाम ''कृष्णगुरुः'' इति लिखितमस्ति।[१]

(३) **भगवद्गीताव्याख्या मुनिभावप्रकाशिका** — ग्रन्थोऽयं मातृकारूपेण Catalogue of Central Provinces and Berar इति ग्रन्थसूच्यां १३९० क्रमाङ्के दृश्यते, किन्तु तत्र अस्या मातृकाया नाम ''गीताभावप्रकाशः'' इति रूपेण वर्तते।[२] तत्र अस्या मातृकायाः कर्तुर्नाम ''कृष्ण'' इति लिखितमस्ति।

(४) **गोपिकागीतव्याख्या मुनिभावप्रकाशिका** — अस्या मातृकाया विषये कस्यामपि ग्रन्थसूच्यामुल्लेखो न दृश्यते, किन्तु एतस्या नामोल्लेखः टि. चन्द्रशेखरमहोदयेन सम्पादिताया न्यायचन्द्रिकाया अन्ते कृष्णस्य परिचयभागे अनेन विरचितानां ग्रन्थानां सूच्यां विद्यते।[३]

(५) **अद्वैतसुधाबिन्दुः** — ४३ पुटात्मकोऽयं ग्रन्थो मातृकारूपेण बरोडाग्रन्थसूच्यां ७९९९ क्रमाङ्के दृश्यते।[४] यत्र अस्य कर्तुर्नाम ''कृष्णशर्मा'' इति वर्तते।

---

१. द्रष्टव्यम् - A Catalogue of The Samskrit Manuscripts in The Adyar Library, Part II, P. 146.

२. द्रष्टव्यम् - Catalogue of Sanskrit Prakrit Manuscripts in the Provinces and Berar by Rai Bahadur Hiralal, P.129.

३. न्यायचन्द्रिका, टि.चन्द्रशेखरः, मद्रासविश्वविद्यालयः, चैन्नै।

४. An Alphabetical List of Manuscritps in the Oriental Institute, Baroda. Vol. I p.516.



(६) **छान्दोग्योपनिषत्कारिकाः** — ग्रन्थोऽयं जयपुरपोटीखानासूच्यां दृश्यते।[१]

परं कैवल्यदीपिकाया ऋते अन्ये ग्रन्थाः किमनेनैव कृता उतान्येनेति निर्णेतुं न पार्यते। यतो हि केषुचित् हस्तप्रतिग्रन्थालयसूचीग्रन्थेषु स्पष्टरूपेण इमे ग्रन्थाः अनेनैव कृष्णेन विरचिता इति लिखितं न वर्तते, अतः एतद्विषये अस्माभिः निश्चप्रचमधिकं वक्तुं न शक्यते।

## १.६ कृष्णस्य वैदुष्यम् —

**श्रीमच्छारीरभाष्यादिकसकलमहाशास्त्रदुग्धाब्धिमध्या-**
**दादायात्यन्तसारं पय इव सुवचः कुम्भलक्षैर्भृतं यत्।**
**पूर्वाचार्यैस्तदद्य प्रकरणविधया वच्मि कैवल्यसर्पिः**
**प्राज्ञानामश्नतां यद्भवविषयरसो न स्वदेन्मानसाय॥**[२]

इति वचनानुसारेणासौ कृष्णः पदवाक्यप्रमाणशास्त्रज्ञः आसीत् इत्यभ्यूहितं शक्यते। अस्य प्रामाणिकरीत्या एकस्यैव ग्रन्थस्योपलब्धिसत्वात् अयं कैवल्यदीपिकाग्रन्थ एव कृष्णस्य वैदुष्यविषये निदर्शनं भवति।

(१) ''मुनिभावप्रकाशिका'' इति भगवद्गीताव्याख्याया आद्येषु पद्येषु एष सङ्केतयति यत् एषः स्वीयमातुलाद् व्याकरणमीमांसावेदान्ताद्यनेक-शास्त्राणामध्ययनञ्चकार।[३]

(२) अद्वैतवेदान्ततत्त्वानाम् सरलरीत्याऽऽविष्करणे तदुचितेतरव्याकरणन्याय-योगमीमांसादिशास्त्राणां प्रमेयांशानाम् उदाहरणरूपेण प्रथनेन अस्य सकलशास्त्रावबोधः स्फुटीभवति। समग्रकैवल्यदीपिकायां तद्व्याख्यायाञ्च अनेन प्रायः शताधिकार्षग्रन्थानां उदाहरणानि दत्तानि, यत्र सार्धत्रिशताधि-कार्षोक्तीनां समुच्चयो वर्तते।

(३) कैवल्यदीपिकायाः उभयोः प्रकरणयोः अद्वैतवेदान्तसिद्धान्तान् स्पष्टीकुर्वन् असौ कृष्णः प्रायः पञ्चाशदधिकोपनिषदः उदाजहार। तेनास्य औपनिषदं

---

१. अ.वे.सा.को., पृ. १८३

२. कै.दी. १.६

३. अ.वे.सा.को., पृ. ३२७

ज्ञानं तत्पाटवञ्च सिद्ध्यति। अत्रेदं ग्रन्थकारस्य वैशिष्ट्यं यदनेन प्रसिद्धोपनिषनिषद्भिः सह अप्रसिद्धोपनिषदामपि बहुत्र उद्धरणं दत्तम्।

(४) विहितकर्मणामुपयोगविषये अद्वैतमतं स्पष्टयन् अयं मीमांसासिद्धान्तानपि उट्टङ्कयति तस्मात् मीमांसायामपि अस्याधिकोऽभिनिवेशोऽस्ति इति ज्ञातुं शक्यते।

(५) ग्रन्थकारोऽयम् आर्षवाङ्मयस्य बहूनि आख्यानानि अनूद्य वेदान्तराद्धान्तान् स्पष्टयन् योगवासिष्ठ-महाभारत-पुराणाद्यार्षग्रन्थानां बहून्युदाहरणानि उदाजहार।[१]

## १.७ कृष्णस्य गुरुपदनिष्ठा -

ब्रह्मविद्याप्राप्तौ गुरोः अनुग्रहोऽपि अत्यावश्यकः। यतो हि वेदानुग्रहेण मनसो निष्पापत्वे सत्यपि तावत् पर्यन्तं न शास्त्रावबोधो यावच्छास्त्रोपदेष्टुः सद्गुरोरनुग्रहो न भवति। अत एव ''**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः**[२]'' इत्यादिश्रुत्या ''**देवमिव आचार्यमुपासीत**[३]'' इत्यादिस्मृत्या च गुर्वाराधनस्य ब्रह्मविद्याप्राप्त्यङ्गत्वमस्तीति द्योतितम्।

इहापि कैवल्यदीपिकाया ग्रन्थारम्भे मङ्गलाचरणे अनेन कृष्णेन ब्रह्मविद्या-प्राप्त्यर्थं स्वगुरोः शरणागतभावपुरस्सरं नमस्कारः कृतः। ''**वन्दे वरदेशिकं तम्**[४]'', ''**हिमं सूर्यवन्मामथैकञ्च कृत्वा स्थितं स्वेन रूपेण सेवे गुरुं तम्**[५]'' इति श्लोकव्याख्यानावसरे अयं ब्रह्मज्ञानहेतुः गुरुप्रसादः इति न्यरूपयत्। ''**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ**[६]'' इति श्रुत्यर्थं द्रढयन् ग्रन्थारम्भ इव ग्रन्थान्तेऽपि गुरुस्मरणपूर्वकं तदेकशरणत्वं प्रतिपादयति।[७] अयं ग्रन्थकारो गुरुं

१. द्रष्टव्यम् - कै.दी.व्या. १.९७
२. श्वे.उ. ६.२३
३. आप.श्रौ.सू. १.६.१३
४. कै.दी. १.३
५. कै.दी. १.३
६. श्वे.उ. ६.२३
७. ''शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नानिशं बिभ्रतां.....'' - कै.दी. २.१७६



परमेश्वररूपं मनुते। प्रभाव्याख्यायामयं ब्रूते यत् ''**यस्य परमेश्वरावताररूपस्य ब्रह्मविद्योपदेष्टुराचार्यस्य प्रसादाद्दीक्षादिकृतानुग्रहविशेषात् समस्तमिदं व्याकृताव्याकृतनामरूपं विश्वं मय्येव प्रत्यगभिन्ने ब्रह्मणि भातम्, तं वरदेशिकं वन्दे**[१]'' इति।

ग्रन्थोऽयं गुरुशिष्यप्रश्नोत्तरशैल्या निबद्धोऽस्ति। इत्यतो ग्रन्थेऽस्मिन् सर्वत्र ग्रन्थकारस्य स्वगुरुं प्रति अत्यन्तमादरं दृश्यते। आत्मतत्त्वस्य निर्णयार्थमयं सन्दिहानः शिष्यः स्वगुरुं भृशं प्रश्नान् करोति, प्रसन्नचित्तो गुरुरपि यावत्पर्यन्तं सन्दिहानस्य शिष्यस्य सन्देहोपशमनं न भवति तावत्पर्यन्तं विभिन्नैः उदाहरणैः शिष्यशङ्कां समाधत्ते। अत एव गङ्गादिनदीतीर्थानामवगाहनेन यत् फलं प्राप्यते तदेव फलं श्रीगुरुपादपङ्कजसेवया लभ्यत इति प्रत्यपादयदयं ग्रन्थकारः। प्रतिपादनेनानेन इदं प्रतीयते यदस्य कृष्णस्य गुरुचरणकमलनलिनयोरपारा निष्ठा श्रद्धाऽस्ति।

## १.८ कृष्णस्य कवित्वम् —

**''अय इव भुवने यो मार्गणं मार्गणो वा**
**मलमिव मलमेकं तद्गरं वा गरं च।**
**मन इह परिशुद्धं नाशयित्वा मनोऽन्यत्**
**शवदहनसमिद्धन्नाशमेति स्वयञ्च ॥''**

इति अस्य कृष्णस्य उक्तिः।[२] कैवल्यदीपिकायां प्रायः ईदृशं वर्तते अस्य कवित्वम्। अस्यां कैवल्यदीपिकायां कविना प्रायो वैदर्भी रीतिरनुसृता। कुत्रापि अर्थावबोधनाय दुरूहान्वयस्य आवश्यकता न भवति। अपि च एतस्य कविता मृदुलमृदुला वर्तते न तु बहुलाडम्बरयुता। तस्मात् सकृत्पठनेनैव रसास्वादः आस्वादयितुं शक्यते।

एवं प्रकारेण कैवल्यदीपिकाग्रन्थमाधृत्य कृष्णस्य देश-काल-कृति-वैदुष्य-कवित्व-गुरुपदनिष्ठादि निर्धारणं सम्प्राप्तं भवति।

१. कै.दी.व्या. १.३
२. कै.दी. १.५७

## १.९ कैवल्यदीपिकायाः परिचितिः —

अद्वैतवेदान्तस्य प्रकरणग्रन्थेष्वेवमिदं ग्रन्थरत्नं ''कैवल्यदीपिका'' इति नामाङ्कितं यदद्यावध्यप्रकाशितं निगूढमिवासीत्। ग्रन्थोऽयमतीव सरलो बालबोधाय अद्वैतदर्शनस्य सारार्थव्युत्पादकः सारगर्भितश्च। अस्याः कैवल्यदीपिकायाः ''प्रभा'' इत्याख्या व्याख्यापि मूलकृता कृता वर्तते।[१]

समग्रसंस्कृतवाङ्मयानुशीलनेनेदं ज्ञायते यदस्मत्सम्प्रदायविदां ग्रन्थकर्तृणाञ्च तत्तद्ग्रन्थप्रणयने कोऽपि हेतुरासीत्। तत्र बालानां सुखबोधः, यशःप्राप्तिः, राजाज्ञापालनम्, सुहृदुपकृतिः, शिष्योपकृतिः, गुरोराज्ञापालनम्, स्वानुभावकथनम्, पुण्यसम्पादनम् इत्येवं विविधानि कारणानि ग्रन्थप्रणयने व्याख्यानिर्माणे च दरीदृश्यन्ते। अत्रापि कृतार्थेन स्वान्तःतृप्तेन कृष्णेन मुमुक्षूणां स्वशिष्याणाञ्च बोधसिद्धये अद्वैततत्त्वानुभूत्यै ग्रन्थोऽयं व्यरचीति ज्ञायते। सरलभाषायां सुबोध्यशब्दप्रयोगेण सरलश्लोकैश्च प्रत्येकं विषयस्य सरलं वर्णनं कृतमस्ति।

सम्प्रति कैवल्यदीपिकाग्रन्थस्य स्वरूपव्यवस्थाविषये किञ्चिद्विचार्यते। तत्र तावदिह ग्रन्थस्य अभिधान-विषय-उपलब्धमातृकयोर्विवरण-मातृकागुणदोष-विचार-ग्रन्थपृष्ठपरिमाण-पद्यसङ्ख्यापरिमाण-भाषाच्छन्दोव्यवस्था-पाठसम्पादन-विधि-प्रकृतमातृका-सम्पादनविधयः इत्येते विषया विवेच्यन्ते।

### १.९.१ ग्रन्थाभिधानम् —

अस्या मातृकायाः आरम्भे ग्रन्थसमाप्तौ पुष्पिकावाक्ये च ''**कैवल्यदीपिका**'' इति ग्रन्थसंज्ञा ग्रन्थकारेण स्पष्टं प्रोच्यते। ग्रन्थस्य आरम्भे हि — ''**कैवल्यदीपिकाग्रन्थप्रारम्भः**'' इति उदित्वा ग्रन्थस्यान्ते ''**इति श्रीमद्गुरुब्रह्मानन्दयतीन्द्रचरणारविन्दमकरन्दतृप्तस्वान्तेन कृष्णेन विरचितेयं कैवल्यदीपिका समाप्ता**[२]'' इत्यनेन ग्रन्थसञ्ज्ञा स्फुटीकृता।

एवमेव अन्येषु स्थलेष्वपि अस्या मातृकाया अभिधानं ''कैवल्यदीपिका''

---

१. ''नत्वा श्रीकृष्णयोगीन्द्रपादपङ्केरुहद्वयम्।
भक्त्या कैवल्यदीपस्य कुर्वे व्याख्यां प्रभाभिधाम्॥'' इति प्रभाटीकायाम्।

२. कै.दी. ग्रन्थान्ते पुष्पिका।



इति स्पष्टमेव निबध्यते।[१] तथापि मातृकाया अस्या अभिधानविषय ईषद्भेदो दृग्गोचरो भवति विभिन्नेषु स्थलेषु। क्वचित् ''कैवल्यदीपिका'' क्वचिच्च ''कैवल्यदीपः'' इति। र. तङ्गस्वामिशर्मविरचिते अद्वैतवेदान्तसाहित्येतिहासकोशे अस्या मातृकायाः ''कैवल्यदीपिका'' इति नाम लिखितमस्ति।[२] एकत्र ग्रन्थकर्त्रा प्रभाव्याख्यायां ग्रन्थास्यास्य अभिधानं ''कैवल्यदीपः'' इति ईरितम्।[३] अथ च टि. चन्द्रशेखरमहोदयेन सम्पादितायां न्यायचन्द्रिकायां ''कैवल्यदीपः'' इत्यभिधानं प्राप्यते।[४] किन्तु N.C.C. मध्ये अस्य ग्रन्थस्य नाम ''कैवल्यदीप(पिका)'' इति रूपेण दृश्यते।[५] तथा अड्यारहस्तप्रतिग्रन्थालयस्य ग्रन्थसूच्याम् अस्य ग्रन्थस्य नाम ''कैवल्यदीपिका'' इति प्राप्यते।[६]

संस्कृतवाङ्मये ग्रन्थानां नामकरणे अयमपि क्रमो दृश्यते यत् ग्रन्थस्य नाम प्रायः पुंसि भवति। तस्य व्याख्यायाः नाम स्त्रियाम्। यथा ''वेदान्तसारः'' इति ग्रन्थनाम पुंसि अस्ति किन्तु अस्य व्याख्याया ''विद्वन्मनोरञ्जनी'', ''सुबोधिनी'' इत्यादीनि नामानि स्त्रियां सन्ति। किन्तु क्वचित् ग्रन्थस्य तद्व्याख्याया इत्युभयो नाम्नी स्त्रियां भवतः। यथा ''अद्वैतसिद्धिः'' इति ग्रन्थस्य नाम, ''बालबोधिनी'', ''गुरुचन्द्रिका'' इत्यादीनि व्याख्यानामान्यपि स्त्रियां सन्ति। स एव क्रम इह अनेन कृष्णेनापि अनुसृत इति विज्ञायते।

अत उपलब्धैः प्रमाणैः ग्रन्थस्यास्य पुष्पिकावाक्येन च ग्रन्थस्यास्याभिधेयं ''कैवल्यदीपिका'' इति स्पष्टमेव प्रतीयते। कैवल्यं नाम एकत्वम्, मोक्षः अद्वितीयब्रह्मभावापत्तिश्च। यथोक्तं भाष्यकारैः ''**मिथ्याज्ञानावष्टम्भं हि कार्यान्तरं देहपात उपभोगान्तरमारभते, तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन**

---

१. द्रष्टव्यम्- Descriptive Catalogue of Sanskrit Manuscripts in Adyar Library, Vol. IX, p.790-791.

२. अ.वे.सा.को., पृ. ३२७

३. ''भक्त्या कैवल्यदीपस्य कुर्वे व्याख्यां प्रभाभिधाम्'' - कै.दी.व्या., मङ्गलाचरणपद्यम्।

४. न्यायचन्द्रिका, पृ. २३. G.O.M.L., Chennai.

५. N.N.C. Vol.V, p.77

६. Descriptive Catalogue of Sanskrit Manuscripts in Adyar Library, Vol. IX, p.790-791.

**दग्धमित्यतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवति**[१]'' इति। सङ्क्षेपशारीरकटीकायामपि ''**कैवल्यं वस्तुतोऽद्वितीयत्वमसङ्गत्वम्**[२]'' इति।

अतः केवलस्य भावः कैवल्यम्[३], तद्दीपयति=प्रकाशयति या सा कैवल्यदीपिका इति ग्रन्थसञ्ज्ञा सार्थक्यं भजते।

### १.९.२ ग्रन्थविषयः —

अस्मिन् ग्रन्थे आहत्य कियन्ति पद्यानि सन्तीति विषये ग्रन्थान्ते ग्रन्थकारेण न कश्चिन्निर्देशः कृतः। अतः उपलब्धमातृकानुसारं अस्मिन् ग्रन्थे चतुरशीत्युत्तर-द्विशतश्लोकाः (२८४) वर्तन्ते। प्रथमे तत्त्वप्रदीपप्रकरणे १०८ श्लोकाः, द्वितीये संशयच्छेदप्रदीपप्रकरणे १७६ श्लोकाः सन्ति। एतैः चतुरशीत्युत्तरद्विशतसङ्ख्यातैः श्लोकैः कैवल्यदीपिकाया विविधाऽद्वैतविषयाः सारल्येन विशदीकृताः। पद्यानां भाषा सरलाऽस्ति तेनास्य ग्रन्थस्यान्वयार्थबोधः सरलतया सञ्जायते।

अस्य ग्रन्थस्य नाम्नैवास्य विषयः क इति जिज्ञासा समाधीयते यदस्यां कैवल्यदीपिकायां कैवल्यविषयः प्राधान्येन वर्णितोऽस्ति। तदनुसारमेव कैवल्यमस्य ग्रन्थस्य वेद्यविषयत्वेनावतिष्ठते। स्वयञ्चापि ग्रन्थकारेण ग्रन्थारम्भेऽभिहितं यदस्मिन् ग्रन्थे कैवल्यसुखानुभवार्थं बालानां सुखबोधाय च शारीरकभाष्यादीनां सङ्ग्रहो वर्तते।[४] शास्त्रैकवेद्यस्वस्वरूपकैवल्यानुभवस्य प्राधान्येन निरूपणेऽपि नाऽन्यविषयाणामत्र सर्वथाऽभावोऽस्तीति वक्तुं पार्यते। यतो हि कैवल्यानुभवस्य साधनत्वेन परिगणितानां साधनचतुष्टयम्, अध्यासः, पञ्चीकरणप्रक्रिया, अध्यारोपापवादः, पञ्चकोश इत्यादीनां विषयाणामपि यथायथं वर्णनमत्रोपलभ्यते। अत्र ग्रन्थकारेणैव प्रकरणविभागं कृत्वा श्लोकाः स्वोपज्ञप्रभाख्या व्याख्या च लिखिता। ग्रन्थस्य प्रथमे प्रकरणे अतीव सरलरीत्या अद्वैतसिद्धान्तान् प्रतिपादयति

---

१. ब्र.सू.शा.भा. ४.१.१९

२. सं.शा.अ.टी. ३.१८६

३. वाच. पृ. २२५६

४. ''श्रीमच्छारीरभाष्यादिकसकलमहाशास्त्रदुग्धाब्धिमध्या-
दादायात्यन्तसारं पय इव सुवचः कुम्भलक्षैर्भृतं यत्।
पूर्वाचार्यैस्तदद्य प्रकरणविधया वच्मि कैवल्यसर्पिः
प्राज्ञानामश्नतां यद्भवविषयरसो न स्वदेन्मानसाय॥'' - कै.दी. १.६



ग्रन्थकारः। ये च विषयाः कठिनाः सन्ति तत्र पौनःपुन्येन शिष्यमुखेन प्रश्नान् उद्भाव्य विभिन्नोदाहरणपूर्वकं दुरवगाहविषयमपि सरलतया समाधत्तेऽयं ग्रन्थकारः।

ग्रन्थकारेण कैवल्यदीपिका इति ग्रन्थोऽयं प्रकरणविभागद्वारा विभक्तो वर्तते। अत्र प्रकरणद्वये अद्वैतवेदान्तसम्बन्धिनो विविधा विषया निरूपिताः। स्वयं ग्रन्थकर्ताऽपि निरूपयति यदसौ ग्रन्थः द्वयोः प्रकरणयोः विभक्तो वर्तते।[१] एवमसौ ग्रन्थो गुरुशिष्यप्रणाल्यां प्रश्नोत्तरशैल्या अद्वैततत्त्वानि प्रतिपादयन् उपनिषत्प्रमाण-पूर्वकमद्वैतसिद्धान्तसम्बन्धिसंशयान् छिनत्ति। अस्मिन् ग्रन्थे प्रश्नोत्तरशैली ग्रन्थकारस्य वैशिष्ट्यं वर्तते। प्रश्नोत्तरशैल्या लिखिता ग्रन्थाः सिद्धान्तार्थवगमने महदुपकुर्वते। अस्मिन् ग्रन्थे प्रथमप्रकरणस्य नाम ''तत्त्वप्रदीपप्रकरणम्'', द्वितीयप्रकरणस्य नाम ''संशयच्छेदप्रदीपप्रकरण''ञ्चेति वर्तते।[२] प्रकरणं नाम ग्रन्थविशेषस्य सञ्ज्ञा।

### १.९.२.१ प्रथमप्रकरणम् —

तावदिह प्रथमप्रकरणे विषयोपक्रमो दृश्यते। तत्रादौ ग्रन्थकारः स्वयं कृतार्थोऽपि स्वानुभवं वदन् अन्येषामपि मुमुक्षूणां मोक्षसाधनात्मतत्त्वावगमाय वेदान्तसारस्पष्टकथनरूपं प्रयोजनं दर्शयित्वा वेदान्तैकवेद्यम् अवाङ्मनसगोचरं सच्चिदानन्दस्वरूपं परमात्मानं नमस्कुर्वन् मङ्गलमाचरति। तदनु ''**निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः**[३]'' इति कल्पतरुकारोक्तिमनुसृत्य ब्रह्मणः स्वरूपतटस्थलक्षणं निरूपयन् ब्रह्म नौति। एवं ग्रन्थारम्भप्रयोजनं सङ्क्षेपेण निरूप्य परमात्मनो नमस्कारः कृतः। ब्रह्मज्ञानप्राप्तिहेतुः गुरुप्रसाद एव। किञ्च ''**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः**[४]'' इत्यादिश्रुत्या ''**देवमिवाचार्यमुपासीत**[५]'' इत्यादिस्मृत्या च गुरुनमस्कारमपि शास्त्राङ्गत्वेन

---

१. ''कैवल्यपूर्वनवनीतसमाह्वयं तच्छास्त्रं द्विधा हि पटलं रचयामि चैकम्।
तत्त्वप्रदीपमपरं किल संशयान्धकारप्रदीपमिति सद्गुरुपादभक्त्या॥'' - कै.दी. १.७

२. कै.दी. १.७

३. वे.क.व्या. १.१.२०

४. श्वे.उ. ४.२३

५. आप.श्रौ.सू. १.६.१३

प्रतिपादितम्। इत्यतः तन्नमस्कारोऽपि पृथक्तवेन कार्यमित्यभिधाय द्वाभ्यां श्लोकाभ्यां स्वगुरुं प्रणमति।

तदनु व्यासभगवत्पादप्रभृतिभिः पूर्वाचार्यैः प्रणीतेषु न्यायोपेतेषु बहुप्रबन्धेषु सत्स्वपि अस्य प्रकरणग्रन्थस्य मननादिमात्रोपयोगितया अद्वैतविषयाः सङ्गृह्य एकत्र प्रदर्श्यन्ते तेन मुमुक्षूणां ग्रन्थेनानेन सरलतया वेदान्तशास्त्रे प्रवेशः सम्पद्यत इत्यतो ग्रन्थस्यास्य सप्रयोजनत्वमस्त्येव इति दर्शयति ग्रन्थकारः।[१] ग्रन्थोऽयं स्वान्तस्तृप्तेन कृष्णेन मुमुक्षूणां स्वशिष्याणाञ्च अद्वैततत्त्वानुभूतिसिद्धये गुरुप्रसादेन कृतः इति स्वयं ग्रन्थकारः प्रभाव्याख्यायां दर्शयति — ''**तस्मादेतच्छास्त्रं साम्प्रदायिकं गुरुप्रसादकृतं न तु पाण्डित्यादिना**[२]'' इति।

इत्थं ग्रन्थारम्भप्रयोजनं निरूप्य ग्रन्थस्य प्रकरणविभागमुपस्थापयति। अथ प्रेक्षावत्प्रवृत्त्यङ्गभूतविषयादिकथनेन ग्रन्थस्य विषयप्रयोजनप्रतिपाद्यप्रतिपादक-भावसम्बन्धं प्रदर्श्य परिशिष्टाधिकारिनिरूपणपुरःसरं साधनचतुष्टयं विवृणोति। चतुर्भिः श्लोकैः साधनचतुष्टयं निरूप्य साधनचतुष्टयं ब्रह्मजिज्ञासायाः नियमेन पूर्ववर्तित्वमिति ''**अथातो ब्रह्मजिज्ञासा**[३]'' सूत्रार्थमाश्रित्य प्रतिपादितम्। एषोऽधिकारी सुतदारवित्तवाञ्छां परित्यज्य श्रौत्रियं गुरुम् अभिगच्छति। अत्र ग्रन्थकारः गुरोः कृते ''देशिकः'' इति संज्ञायाः प्रयोगं करोति। गुरोः सविधे आगतस्य शिष्यस्य दीक्षाविधिः वर्णितः। अयञ्च दीक्षाविधिरत्र पञ्चप्रकारको भवतीति उदाहरति। यथा स्मृत्या, शक्तिपाताभिधया, उदीक्षया, चाक्षुष्या, स्पर्शेन च दीक्षाविधिः शास्त्रादौ अभिहितः।

अयं ग्रन्थकारः विवरणमतानुयायी प्रतीयते। हि ब्रह्मापरोक्षज्ञानं श्रवणमनननिदिध्यासनसंस्कृतान्तःकरणात् इति भामतीपन्थिनः, तत्त्वमस्यादि-वाक्यादिति विवरणानुयायिनः। अयं ग्रन्थकारः गुरोः तत्त्वमस्याद्युपदेशवाक्यस्य श्रवणेन तत्त्वज्ञानं भवतीति समर्थयति। अपि च जीवस्वरूपनिरूपणावसरे अयं ''अविद्याप्रतिबिम्बितः जीवः'' इति विवरणपन्थानमाश्रयति।

---

१. कै.दी. १.६

२. कै.दी.व्या. २.१७४

३. ब्र.सू. १.१.१



ततः प्रथमप्रकरणस्य आन्तम् अद्वैतविषयाः निरूपिताः। अत्रायं क्रमो दृश्यते यत् सकृदवगतोऽपि शिष्यः स्वज्ञानदार्ढ्याय पुनः पुनः गुरुं प्रश्नं पाप्रच्छति, गुरुश्च सोदाहरणं विविधरीत्या सोदाहरणं समाधत्ते। अस्मिन् क्रमे वेदान्तैकवेद्यं ब्रह्म, सगुणनिर्गुणब्रह्मणोरभेदः, साधनचतुष्टयम्, गुरूपसदनम्, अध्याससामान्य-लक्षणम्, अन्योन्याध्यासः, अध्यारोपापवादौ, अविद्यावर्णनम्, पञ्चीकरणप्रक्रिया, चिच्चातुर्विध्यम्, जीवात्मनोः स्वरूपम्, अन्तःकरणम्, चिदाभासः, अन्तःकरणवृत्तेः उपयोगिता, साक्षिविचारः, तत्त्वमसिमहावाक्यविचारः, तत्त्वमस्यादिमहावाक्यैः परब्रह्मैक्यबोधः, पञ्चकोशविवेकः, जहदादित्रिविधलक्षणा, जीवन्मुक्तिः, विदेहमुक्तिः, त्रिविधं कर्म, सप्तज्ञानभूमिकानां निरूपणमित्यादिविषयाः प्रथमे प्रकरणे अष्टोत्तरशतेन (१०८) पद्यैः विवेचिताः।

### १.९.२.२ द्वितीयप्रकरणम् —

द्वितीये संशयच्छेदप्रदीपाख्ये प्रकरणे षट्सप्तत्यधिकशतेन (१७६) पद्यैः वेदान्तवाक्यानामद्वितीये ब्रह्मणि प्रवृत्तिं दर्शयित्वा तेषामद्वितीये ब्रह्मणि समन्वयश्च विशदीकृतः। अद्वितीयब्रह्मणि वेदान्तानां तात्पर्यावधारणे ये संशयाः समुत्पद्यन्ते तेषामत्र समाधानं कृतं वर्तते। द्वितीये प्रकरणे वेदान्तवाक्यानां प्रवृत्तिविचारः, अवाङ्मनसगोचरं ब्रह्म, वेदानाम् अपौरुषेयत्वम्, मनोनाशस्य उपायः, वेदान्ताधिकारी, विद्वदविद्वत्कर्मफलवैशिष्ट्यम्, यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः, विधिविचारः, प्रतिबिम्बवादः, ज्ञानकर्मसमुच्चयनिराकरणम्, विद्ययैव ब्रह्मप्राप्तिः, कर्मणामुपयोगः, जीवन्मुक्तौ मनसः सद्भावासद्भावविचारः, अज्ञानलक्षणम्, मायास्वरूपम्, प्रतिबिम्बसत्यताविचारः, आत्मनः अखण्डार्थत्वम्, ज्ञानस्वरूपविचारः, मोक्षस्वरूपविचारः, विधिविचारः, अष्टविधः आनन्दः, आनन्दमीमांसा, चतुर्विधः संन्यासः, अज्ञानभूसप्तकम्, ज्ञानभूप्तकम् इत्याद्या नैके विषयाः प्रतिपादितास्सन्ति।

ग्रन्थान्ते ग्रन्थस्यास्याद्वैतशास्त्रजिज्ञासूनामुपकारकता कथिता। यः कोऽपि एतच्छास्त्रं परिशीलयति स नित्यानन्दे परिपूर्णे ब्रह्मणि यत्नान्तरं विना प्रतिष्ठां प्राप्य जीवन्मुक्तो यतिराट् भवतीति उक्तम्। ग्रन्थोऽयं गुरुप्रसादेन रचितः इत्युक्तम्। अन्ते अस्य शास्त्रस्य पठनश्रवणाभ्यासस्य फलं जीवन्मुक्तिरिति सङ्कीर्त्य गुरुवन्दनापूर्वकं प्रकरणम् उपसंहतम्।

एवमयं कृष्णविरचितः स्वोपज्ञप्रभाव्याख्यायुतकैवल्यदीपिकाग्रन्थः प्रकरणद्वयात्मको चतुरशीत्युत्तरद्विशतश्लोककलितश्च सारल्येन अद्वैतवेदान्ते प्रविविक्षूणामुपकारकान्विषयान्क्रोडीकृत्य विराजते ।

### १.९.३ उपलब्धमातृकयोः विवरणम् —

उपलब्धैः प्रमाणैः कैवल्यदीपिकाकर्ता अष्टादशशतकीयः इति विज्ञायते । अस्य ग्रन्थस्य रचनाऽपि एतस्मिन् काले समभवदिति अभ्यूहितुं शक्यते । एवञ्च सार्धद्विशतवर्षेभ्यः पूर्वं रचितस्य ग्रन्थस्य ग्रन्थकर्तृस्वाक्षररूपं (Auto-graph) लेखनन्तु प्रायशो नोपलभ्यते । प्राचीनरचनानां पाठा अस्माभिः प्रतिलिपिद्वारेण (Transcript Copy) प्राप्यन्ते । सर्वेषु प्रतिलिपिकारेषु न तथा पूर्णा साभिनिवेशकर्तव्यनिष्ठा भवति न वा पूर्णा योग्यता । अतः प्रतिलिपिपरम्परायां मातृकायाः पाठ उत्तरोत्तरमधिकाधिकं वा विकृतो भवन् परिवीक्ष्यते । अतः पाठसम्पादनावसरे प्रतिलिपिकारकृतानि इमानि परिवर्तनान्यपि अवधेयांशा भवन्ति । साम्प्रतं कृतेऽपि प्रयत्ने ग्रन्थस्यास्य मातृकाद्वयमुपलभ्यते । मातृकाद्वयमपि अवश्यं मातृकापरम्परातः एव प्रतिलिपिकृतं सम्प्राप्तमिति वक्तुं शक्यते ।

मद्रासनगरस्थ-अडयारहस्तग्रन्थसङ्ग्रहायलशोधकेन्द्रे द्वे मातृके उपलभ्येते। इतोऽपि एका अपरा मातृका मदुरानगरवास्तव्यः श्रीमतः एम्.आर्. सुन्दररमणशास्त्रिवर्यस्य सविधे आसीत् यां मातृकामाधारीकृत्य अड्यारग्रन्थालस्य पण्डितैः कर्गजमातृका परिलिखिता ।[१] मूलमातृकेयं सम्प्रति अनुपलब्धा अस्ति । महति प्रयत्ने सत्यपि मूलमातृकायाः अनुलब्धिभावात् तस्याः प्रतिलिपिः प्राप्यते । मद्रासविश्वविद्यालयेन प्रकाशिते New Catalogus Catalogorum मध्येऽपि कैवल्यदीपिकायाः द्वे मातृके एव स्तः इति लिखितम् अस्ति ।[२] सम्प्रति अड्यारग्रन्थालये प्राप्तयोः मातृकयोः मातृकासूचिग्रन्थपुरस्सरं विवरणं प्रदीयते यत्र ग्रन्थनाम, लिपिः, आधारपत्रमित्यादिविवरणमस्ति —

---

१. कर्गजमातृकायाः (Adyar Library 10.F.18) अन्ते एवं लिखितमस्ति - "Collected by R.S.Harihara Sastri and Y. Venkataramana Sastri from the original MS of M.R. Sundara Rama Sastri, Madura. 8th January 1916."

२. द्रष्टव्यम् - New Catalogus Catalogorum, University of Madras, Vol.5, Page 77.



| | | | |
|---|---|---|---|
| (१) | मातृकानाम | - | **कैवल्यदीपिका (प्रभाव्याख्यासहिता)** |
| | ग्रन्थसूचीसङ्ख्या | - | 10.F.18 |
| | लिपिः | - | देवनागरी |
| | आधारपत्रम् | - | कर्गजपत्रम् |
| | पृष्ठसङ्ख्या | - | ५३८ |
| | प्रतिपत्रं पङ्क्तयः | - | १६ |
| | स्थितिः | - | उत्तमा |
| | उपलब्धिः | - | सम्पूर्णा |
| | गात्रम् | - | 8¼ x 6½ inch |

अड्यारहस्तप्रतिसङ्ग्रहालयस्य मातृकाग्रन्थसूच्याम् अस्या मातृकाया विवरणं निम्नरूपेण प्राप्यते[१] —

**ग्रन्थः** - कैवल्यदीपिका (प्रभाव्याख्यासहिता)

**ग्रन्थकर्ता** - कृष्णः

**आरम्भः** - यस्याङ्घ्रिपद्मविगळन्मकरन्दसारो जीवेश्वरैक्यादृढताकृतिवज्रलेपः । न्यग्रोधमूलनिलयाय नमः परस्मै धाम्ने स्वमौनपरिबोधिततत्त्व-भूम्ने ॥१॥

**समाप्तिः** - शीतं तापत्रयादिदुःखनिवृत्तिकरं श्रीगुरुपादपङ्कजतीर्थं मूर्ध्ना उत्तमाङ्गेन सर्वदा बिभ्रतां भूगतसर्वतीर्थपयसां गङ्गादिनदीतीर्थानामवगाहनजं फलं यथा तद्वद् ये कैवल्याभिधं शास्त्रं प्रकरणं प्रबोधप्रदं विवेकविज्ञानजनकं पठन्ति, अधीय केळिं मननादेरप्युपलक्षणम्, ते सर्वपरिपूर्णसौख्य-मुदिता भूमानन्दसमुद्रनिमग्नाः। अत एव मुक्ता निवृत्ताज्ञान-तत्कार्यबन्धाः स्वयं कृतकृत्या विदितसर्ववेद्या नन्दन्ति हृष्यन्ति तुष्यन्ति च ॥१७६ ॥

**पुष्पिका** - इति श्रीमद्गुरुब्रह्मानन्दयतीन्द्रचरणारविन्दमकरन्दतृप्तस्वान्तेन कृष्णेन विरचितेयं कैवल्यदीपिका समाप्ता ।

---

१. द्रष्टव्यम् - Descriptive Catalogue of Sanskrit Manuscript in Adyar Library, Vol. IX, Page 790-92.

| | | |
|---|---|---|
| **(२)** मातृकानाम | - | **कैवल्यदीपः (प्रभासहितः)** |
| ग्रन्थसूचीसङ्ख्या | - | 40.C.3 |
| लिपिः | - | ग्रन्थलिपिः |
| आधारपत्रम् | - | कर्गजपत्रम् |
| पृष्ठसङ्ख्या | - | ४० |
| प्रतिपत्रं पङ्क्तयः | - | २४ |
| स्थितिः | - | जीर्णा |
| उपलब्धिः | - | असम्पूर्णा |
| गात्रम् | - | 13¼ x 8¼ inch |

### १.९.४ उपलब्धमातृकयोः गुणदोषविचारः —

प्राचीनरचनानां पाठा अस्माभिः प्रतिलिपिद्वारेण प्राप्यन्ते । अतः प्रतिलिपिपरम्परायां ग्रन्थस्य पाठ उत्तरोत्तरमधिकाधिकं विकृतो भवन् परिवीक्ष्यते । अपि च सर्वेषु प्रतिलिपिकारेषु साभिनिवेशा कर्तव्यनिष्ठा भवतीत्यत्रापि सन्देहो वर्तते । अत एव —

**''क्वचिद् ग्रन्थान् प्रक्षिपति क्वचिदन्तरितानपि ।**
**कुर्युः क्वचिच्च व्यत्यासं प्रमादात् क्वचिदन्यथा ॥**
**अनुत्सन्ना अपि ग्रन्था व्याकुला इति सर्वशः ।**
**उत्सन्नाः प्रायशः सर्वे कोट्यंशोऽपि न वर्तते ॥**[१]''

इति श्रीमहाभारततात्पर्यनिर्णये श्रीमन्मध्वाचार्यो मातृकापाठसमालोचनविषये पाठसमालोचनावसरे च कथं जागरूकतया भाव्यमिति तदानीमेव बोधितवान् । कश्चिच्छास्त्रज्ञो यदि लिप्यन्तरणं कुर्यात् तदा स कदाचित् स्वबुद्ध्या किमपि प्रक्षिपेत् । क्वचिदविद्यमानान् अंशानपि आनयेत्, क्वचिच्च विद्यमानेष्वपि अन्तरं प्रापयेत् । स्वबुद्ध्यनुगुणं स्वसम्प्रदायानुगुणश्च क्वचिद् व्यत्यासं कुर्यात् ।

क्वचिल्लिप्यन्तरणकरणसमये वर्णलेखनेऽपि प्रमादो भवति । कदाचित् परवर्तिवर्णः पूर्वमेव लिख्यते । यद्यपि चिन्तनं सम्यक् भवति किन्तु लेखनसमये पाठभेदा भवन्ति । यतो हि मनो वेगेन चिन्तयति किन्तु हस्तस्तावद्वेगेन न

१. म.भा.ता, २.३.४



प्रसरति । तेन लेखनसमये कश्चिद्वर्णः त्यक्तो भवति । तस्मात् कारणादपि पाठभेदा जायन्ते । अपि च पाठस्य तालपत्रलेखने काचित् पद्धतिः भवति । यथाऽक्षरं भवति तथा न लिख्यते । तालपत्राणि प्रायः शलाकया सूच्या वा लिख्यन्ते स्म । अतः शलाकया सूच्या वा सर्वाण्यपि अक्षराणि यथायोग्यं भ्रामयित्वा लेखितुं न शक्यन्ते । यथा अनुस्वारस्य चिह्नीकरणम्, हलन्तदानम् इत्यादि सूच्या लेखनावसरे कष्टकरं भवति । अतः एतान्यक्षराणि परिवर्त्य लिखितानि प्राप्यन्ते मातृकाग्रन्थेषु । अतः पाठसमालोचनावसरे उपलब्धमातृकाणां गुणदोषविचारः नितान्तम् आवश्यको भवति । तस्मादिहापि उपलब्धमातृकयोः गुणदोषविचारो विचार्यते ।

### १.९.४.१ ग्रन्थलिपिमातृका —

इयं जीर्णकर्गजपत्रे लिखिता (अड्यारग्रन्थालयस्य ग्रन्थसूचिसङ्ख्यायां 40.C.3) अतीव प्राचीना च विद्यते । ग्रन्थलिपौ लिखितेयं मातृका असम्पूर्णा ४० पत्रयुतास्ति । प्रतिपुटं पङ्क्तीनां चतुर्विंशतिरस्ति । केषुचित् स्थलेषु पत्राणि भग्नानि सन्ति । पृष्ठस्योपरि दक्षिणभागे पृष्ठसङ्ख्या लिखिताऽस्ति । इयं प्राचीनेति हेतोः कुत्रचित् अक्षराणि स्फुटतया नावगम्यन्ते । मातृकेयं पठितुं कष्टसाध्या सती चेन्नैनगरस्थे अड्यारहस्तप्रतिसङ्ग्रहालये उपलभ्यते । अस्यां मातृकायां प्रकृतिवैपरीत्यात् ग्रन्थप्रसाराभावाच्च मध्ये मध्ये पाठा लुप्ता दृश्यन्ते । सन्त्यत्र बहवो हि लेखनदोषाः । अतः बहुषु स्थलेषु ग्रन्थभागः स्फुटतया नावगम्यते । अस्यां मातृकायाम् आधिक्येन वर्णद्वित्वं लिखितमस्ति यथा ''कृतार्थः'' इतिस्थाने ''कृतार्त्थः[१]'', ''वेदान्तार्थः'' इतिस्थाने ''वेदान्तार्त्थः[२]'' इति । अत्र प्रायशः एकारस्थाने ऐकारस्याऽपि प्रयोगो दृश्यते । यथा ''वज्रलेपः'' इतिस्थाने ''व्रजलैपः'', ''वेदान्तार्थः'' इतिस्थाने ''वैदान्तार्थः'', ''मोक्षकामैः'' इतिस्थाने ''मौक्षकामैः'' इत्याद्याः प्रयोगाः ।[३] यद्यपि कालवशात् मातृकेयं जीर्णा अपूर्णा चास्ति तथापि ग्रन्थभागस्य पाठसंशोधनदृष्ट्या उपकुरुते । मातृकेयं प्रथमप्रकरणस्य २६ श्लोकपर्यन्तमेव उपलभ्यते । अस्याः पाठा आदर्शतया परिगणनार्हाः । इत्थं ग्रन्थस्यास्य सम्पादनकर्मणि मातृकेयं प्राधान्यं भजते ।

१. कै.दी. (ग्रन्थलिपिमातृका) पृ. १
२. कै.दी. (ग्रन्थलिपिमातृका) पृ. १
३. कै.दी. (ग्रन्थलिपिमातृका) व्याख्यायां मङ्गलाचरणश्लोकाः १.१, १.२, १.३

### १.९.४.२ देवनागरीलिपिमातृका —

कर्गजपत्रेषु लिखेतेयं मातृका देवनागर्यां (अड्यारग्रन्थालयस्य ग्रन्थसूचिसङ्ख्यायां 10.F.18) पूर्णतया यथामातृकं प्रतिलिपिरूपेण उपलभ्यते।[१] पृष्ठस्योभयोः पार्श्वयोः पृथक्पृष्ठत्वेन गणना विहिताऽस्ति। उभयोः पृष्ठयोः पृष्ठस्य पूर्वभागे उपरि वामभागे, पश्चाद्वर्तिभागे उपरि दक्षिणभागे पृष्ठसङ्ख्या लिख्यते। एवमेव एकस्मिन् पृष्ठे मातृकाया अभिधानं ''कैवल्यदीपिका'' इति, अपरस्मिन् पृष्ठे च प्रकरणस्याभिधानं कृतमस्ति। किन्त्वेतत् ग्रन्थाभिधानं १५२ पृष्ठपर्यन्तमेवास्ति, पृष्ठसङ्ख्या तु सर्वत्र वर्तते। अस्या मातृकायाः ३२८ पृष्ठपर्यन्तम् एन्. रामनाथशास्त्रिणा यथामातृकं प्रतिलिपिः कृता, ततः परं टि.आर्. शेषाद्रिशर्मणा चेति अस्या मातृकाया हस्तलिपिं दृष्ट्वा ऊहितुं शक्यते। एतद्विषये मातृकाया अन्तेऽपि सूचितमस्ति।[२]

५३८ पत्रयुतायामस्यां मातृकायां प्रतिपुटं १६ पङ्क्तयो विद्यन्ते तथापि पङ्क्तिषु क्वचित् न्यूनाधिक्यं दृश्यते। मातृकेयं उत्तमस्थितौ वर्तते तेनाऽत्र वर्णिताः सर्वेऽपि विषयाः सम्यक्तयाऽवगम्यन्ते। न कश्चिद्भागोऽनुमेयो भवति। इयं मातृका २९.१२.१९१५ तमे दिनाङ्के एन्. रामनाथशास्त्रिणा टि.आर्. शेषाद्रिशर्मणा च यथामातृकं विलिख्य पूर्णतां गतेति अस्या मातृकाया अन्तिमपुटाज्ज्ञायते। मातृकेयं पठितुम् अतीव योग्या मद्रासनगरस्थ-अड्यारहस्तप्रतिसङ्ग्रहालये उपलभ्यते। अस्या अक्षराण्यपि स्थूलानि स्पष्टानि च वर्तन्ते। अस्यां मातृकायां प्रतिलिपि-लेखनदोषवशात् क्वचित् अधिकपाठः, अशुद्धपाठः, पाठान्तरं, दुर्बोध्यपाठो वा विलक्षणपाठः, कठिनपाठो दृश्यते तथापि अस्याः पाठाः प्रमाणभूताः सन्तः पाठनिर्णयावसरे अतीव प्राधान्यं भजन्ते। स्पष्टतया लिखितत्वादयं ग्रन्थः सुवाच्यो विद्यते। क्वचिद् ल-ळ, य-प, व-ब, श्र-श्च इतिरूपेण परिवर्तनादिसदृश्यः सामान्या अशुद्धयः समवलोक्यन्ते। क्वचित्तु लेखकप्रमादवशात् जकार-ज्ञकारलेखनं, सकार-शकारलेखनं वा विद्यते। क्वचिच्च कस्यचिद्वर्णस्य आवृत्तौ

१. द्रष्टव्यम् - Descriptive Catalogue of Sanskrit Manuscript in Adyar Library, Vol. IX, Page 790-92.

२. ''प्रबन्धोऽयं, एन्. रामनाथशास्त्रिणा, टि. आर्. शेषाद्रिशर्मणा, च यथामातृकं परिलिखितः ॥ समाप्तोऽयं ग्रन्थः। २९-१२-१९१५ शुभमस्तु ॥'' इति ग्रन्थस्यान्तिमा पङ्क्तिः।



एक एव वर्णो लिखितो वर्तते। यथा ''अत्रैव वर्त्तते'' इति लेखने ''अत्रैवर्त्तते'' इति लिखितम्।[१] केषुचित्स्थलेषु ''प्रोक्त्वा'' इत्याद्याः अपाणिनीयप्रयोगा अपि समवलोक्यन्ते।[२] किन्तु तेषां पदानाम् आर्षवाङ्मये प्रयोगात् साधुत्वं तु निश्चप्रचमेव। एतत्सर्वं सम्पादितग्रन्थभागे परिशीलितमस्ति।

### १.९.५ भाषाच्छन्दोव्यवस्था —

भाषाच्छन्दोव्यवस्थापि ग्रन्थस्य प्रसिद्धेः कारणं भवति। यस्मिन् ग्रन्थे भाषाच्छन्दोव्यवस्था समीचीना समवलोक्यते सः ग्रन्थो लोकप्रसिद्धो भवतीति सार्वजनीनोऽनुभवः। अतः प्रसन्नगम्भीरशैल्या निबद्धा ग्रन्था अध्येतॄणां विचारसरण्यां शीघ्रमवतरन्ति। अतो भाषाच्छन्दोव्यवस्था ग्रन्थप्रसिद्ध्यर्थम् उपकरोति। तस्मात् प्रकृतेऽपि ग्रन्थस्यास्य भाषाच्छन्दोव्यवस्था विमृश्यते। सकलोऽप्ययं ग्रन्थः संस्कृतभाषायां ग्रथितः। ग्रन्थस्यास्य संस्कृतभाषा सरलाऽस्ति। प्रायः पठनेन सहार्थावबोधः प्रकटितो भवति। ग्रन्थकारः काव्यरचनायामतीव निपुण आसीत्। अनेन प्रायः संस्कृतवाङ्मये प्रसिद्धानां सर्वेषां मात्रिकवर्णिकच्छन्दसां स्वकीये काव्ये प्रयोगः कृतो वर्तते। यथा अनुष्टुप्, आर्या, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, वंशस्थम्, तोटकम्, वसन्ततिलका, मालिनी, शिखरिणी, पृथिवी, भुजङ्गप्रयातम्, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, स्रग्धरा इत्यादि। अस्य ग्रन्थकारस्य रुचिकरं छन्दः शार्दूलविक्रीडितमस्ति। अनेन समग्रायां कैवल्यदीपिकायाम् एकनवतिपद्येषु अस्य च्छन्दसः प्रयोगः कृतः। तदनु अष्टसप्ततिपद्येषु स्रग्धराछन्दसः प्रयोगो विहितः।

प्रायः महाकाव्येषु अप्रसिद्धानि इन्द्रवंशा-मत्तकोकिला-पञ्चचामर-रथोद्धतादिच्छन्दांसि प्रयुञ्जानोऽयं ग्रन्थकारः स्वकीयं काव्यकौशल्यं स्वकीय-वृत्तचातुर्यञ्च प्रादर्शयत्। केषुचित् स्थलेषु च्छन्दसां प्रयोगे यतिभङ्गो दृश्यते। यद्यपि छन्दःशास्त्रे छन्दसां सहस्राधिकावान्तरप्रकारवत्त्वाद् गुरुलघुसमविषमभेदेन किमपि च्छन्दः सम्भवति तथापि क्वचिच्छन्दोभङ्गः सम्भाव्यते। तथा ह्यत्र कानिचनोदाहरणानि प्रदर्शयामः —

१. द्रष्टव्यम्- कै.दी.व्या. २.७२

२. कै.दी. २.३, कै.दी.व्या. २.३

(१) **कृत्वा पञ्चैव भूतान्यपि च दश ततः तेषु पञ्चापि चत्वा-**
**र्येकं भागं विहाय स्वयमथ चतुर्षु प्रायशो मेलनं यत् ।**
**भागानां बुद्धिमन्तो जगति परिपठन्त्येव पञ्चीकृतिं तद्-**
**भूतग्रामः समस्तस्समभवदमुतो भोगजातानि लोकाः ॥**[1] इति ।

अस्मिन् श्लोके स्रग्धरावृत्तमस्ति । प्रथम-तृतीय-तुरीयचरणेषु स्रग्धरावृत्तस्य लक्षणं सङ्गच्छते किन्तु द्वितीयचरणे तल्लक्षणं भज्यते । तथा हि ''**म्रभ्नैर्यानां क्रमेण त्रिमुनियतियुता स्रग्धराकीर्तितेयम्**[2]'' इति लक्षणेन मगण-रगण-भगण-नगण-त्रियगणैः स्रग्धरा नाम वृत्तं भवति । प्रकृते पश्यामः —

| मगण | रगण | भगण | नगण | ~~सगण~~ | यगण | यगण |
|---|---|---|---|---|---|---|
| ऽऽ ऽ | ऽ । ऽ | ऽ । । | ।। | । ऽऽ | ऽ। ऽ | ऽ।ऽ ऽ |

**र्येकं भागं विहाय स्वयमथ चतुर्षु प्रायशो मेलनं यत् ।**

अस्मिन् छन्दसि पञ्चमगणो यगणस्स्यात्, किन्त्वत्र यगणस्थाने मगणो दृश्यते । तस्मादत्र ''चतुर्षु'' इत्यत्र च्छन्दोभङ्गः सम्भाव्यते । ''तुर्'' इत्यत्र ह्रस्वो वर्ण आवश्यकः, न तथात्र प्रतिभाति ।

अपरमुदाहरणं पश्यामः —

(२) **ज्ञानं दृष्ट्वाऽनुभूतं श्रुतिविषयत्वताभावनायोगसंज्ञा**
**प्रोक्ता यद्दृष्टिभिस्तद्विगलति न मनाक् स्वेन दृष्टं कदाचित् ।**
**दृष्टं सत्यं समस्तं मननपरिगतं वस्तुसर्वं मृषा स्याद्**
**विज्ञानं यन्निहन्याद्विषयगतमिति तद्धि बोधो न कर्म ॥**[3] इति ।

अस्मिन् श्लोके स्रग्धरावृत्तमस्ति । अस्मिन् प्रथमचरणे गणयोजना —

| मगण | रगण | भगण | ~~नगण~~ | यगण | यगण | यगण |
|---|---|---|---|---|---|---|
| ऽऽ ऽ | ऽ ।ऽ | ऽ । । | ।। ऽ | । ऽ ऽ | ।ऽ ऽ | ।ऽ ऽ |

**ज्ञानं दृष्ट्वाऽनुभूतं श्रुतिविषयत्वताभावनायोगसंज्ञा**

१. कै.दी. १.४१
२. वृ.र. ३.१०४
३. कै.दी. २.८४



इत्थं दृश्यते। स्रग्धरावृत्ते चतुर्थगणो नगणस्स्यात्, किन्त्वत्र तत्स्थाने सगणो दृश्यते । तस्मादत्र च्छन्दोभङ्गो दृश्यते । तद्दोषनिवारणाय यदि प्रथमचरणे ''श्रुतिविषयत्वताभावना'' इति स्थाने यदि ''श्रुतिविषयवती भावना'', ''श्रुतिविषयगुणा भावना'' वेति परिवर्तनं विधीयते तर्ह्यर्थपरिवर्तनमन्तरा स्रग्धरावृत्तलक्षणघटनं स्यात् —

| मगण | रगण | भगण | नगण | यगण | यगण | यगण |
|---|---|---|---|---|---|---|
| ऽ ऽ ऽ | ऽ ।ऽ | ऽ । । | । । । | ।ऽ ऽ | । ऽ ऽ | ।ऽ ऽ |

**ज्ञानं दृष्ट्वाऽनुभूतं श्रुतिविषयवती भावनायोगसंज्ञा**

किञ्च अस्मिन्नेव श्लोके चतुर्थचरणेऽपि च्छन्दोभङ्गः सम्भाव्यते । तद्धि द्वितीयचरणम् —

| मगण | रगण | भगण | नगण | यगण | यगण | ~~सगण~~ |
|---|---|---|---|---|---|---|
| ऽ ऽऽ | ऽ।ऽ | ऽ। । | ।।। | । । ऽ | । ऽ ऽ | । ऽ । |

**विज्ञानं यन्निहन्याद्विषयगतमिति तद्धि बोधो न कर्म**

अत्र पञ्चमगणे यगणस्थाने सगणो दृश्यते । अतः ''विषयगतमिति'' इत्यत्र अन्ते छन्दश्शास्त्ररक्षणाय दीर्घः अपेक्षते, किन्तु व्याख्यानरक्षणे शब्दशास्त्रमर्यादारक्षणे च ह्रस्व एव। अस्मिन् चरणे अन्तिमो वर्णो यद्यपि लघुरस्ति, अतः छन्दशास्त्रानुसारं चरणान्तो लघुवर्णो गुरुत्वेन कल्पयितुं शक्यते। तथाप्यत्र च्छन्दोभङ्गः सम्भाव्यते ।

(३) **जडाकारध्यानं कथमिति दिशेद्देहसहितां**
**विमुक्तिश्चैतत्ते मननमिह तत्तत्तनूकरम् ।**
**शरीराभिध्यानाद्भवति सशरीरो खलु जनः**
**स्वरूपाभिध्यानाद् भवति परतत्त्वं भवलयात् ॥**[1] इति ।

अस्मिन् श्लोके शिखरिणीवृत्तमस्ति । तस्य लक्षणन्तु इत्थमभाणि वृत्तरत्नाकरे ''**रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी**[2]'' इति । यगण-मगण-नगण-सगण-भगणैः लघुगुरुभ्यां च शिखरिणि नाम वृत्तं भवति यत्र रसैः

१. कै.दी. २.८६
२. वृ.र. ३.९३

षड्भिः, रुद्रैकादशभिश्छिन्ना यतिमतिर्भवति। प्रकृतश्लोके द्वितीये चरणे —

यगण मगण नगण सगण ~~भगण~~ लगु
। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ ऽ ऽ ऽ । ऽ

**विमुक्तिश्चै तत्ते मननमिह तत्तत्तनूकरम् ।**

इत्थं पठ्यते। शिखरिणीवृत्ते पञ्चमगणो भगणस्स्यात्, किन्तु तत्स्थाने अत्र मगणो दृश्यते। अतः अत्र च्छन्दोभङ्गः सम्भाव्यते। यद्यपि अतनुं तनुं करोतीति तनूकरम् इति। किञ्च व्याख्यानेऽपि अयमेवार्थः अपेक्षते। छन्दशास्त्ररक्षणाय ''तनूकरम्'' इत्यत्र ''ऊ''कारः ह्रस्वः स्यात्। एतद्विषये विस्तृतविवेचनं मातृकासम्पादनावसरे अस्य श्लोकस्य पादटिप्पण्यामस्माभिः कृतं वर्तते।

(४) **जगत्कर्त्ता कार्यं विदितमपि शक्तिर्न विदिता**
**चक्रुर्विद्यात्स्रष्टा जगति किल दृश्याऽथ पुरुषः।**
**यथा विद्या वेद्या न तु भवति केनापि सुधिया**
**तथा सर्गब्रह्मान्तरकृदपि शक्तिर्न विदिता ॥**[1] इति।

अस्मिन् श्लोकेऽपि शिखरिणीवृत्तमस्ति। शिखरिणीवृत्तलक्षणानुसारं प्रतिपादम् आदौ यगणस्स्यात्। यगणे च आदिवर्णो लघुः भवति। किन्त्वत्र द्वितीयचरणे एवं पठ्यते —

~~यगण~~ मगण नगण सगण भगण ल गु
ऽ ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । । । ऽ

**चक्रुर्विद्यात्स्रष्टा जगति किल दृश्याऽथ पुरुषः।**

अत्र प्रथमे यगणस्थाने मगणो दृश्यते। तस्मादत्र च्छन्दोभङ्गः सम्भाव्यते।

(५) **अन्धं पानादिसर्वं यदिह सुखततेस्साधनं वल्लभन्तत्**
**सर्वेषां यो यमात्मा यदि भवति तदा व्यर्थता वेदवाचाम्।**
**इत्थम्भूतः परात्मापि च विषयसुखे साधनं चेत्तदानीं**
**वत्साचक्ष्व त्वदीयं सुखमनुभवति कोऽस्ति नात्मद्वयं स्यात् ॥**[2]

इत्यत्र चतुर्थपादे वृत्तयोजनां पश्यामः। चतुर्थः पाद एवं पठ्यते —

१. कै.दी. २.९८
२. कै.दी. २.११६



मगण रगण भगण नगण ~~यगण~~ यगण यगण
ऽ ऽ ऽ ऽ । ऽ ऽ । । । । । । । ऽ । ऽ ऽ । ऽ ऽ

**वत्साचक्ष्व त्वदीयं सुखमनुभवति कोऽस्ति नात्मद्वयं स्यात् ॥**

अस्मिन् श्लोके स्रग्धरावृत्तमस्ति। अतः स्रग्धरावृत्तलक्षणानुसारम् अत्र चतुर्थचरणे पञ्चमगणो यगणस्स्यात्, परमत्र ''सुखमनुभवति'' इत्यत्र अन्तिमो वर्णः तकारोत्तरवर्त्ती इकारो ह्रस्वो दृश्यते। तेनात्र यणगस्थाने सगणयोजना। तस्मादत्र छन्दोभङ्गः सम्भाव्यते।

(६) **शार्दूलोऽप्यनुकूल एव भविता चेद्वल्लभो नन्दनो**

मगण सगण जगण सगण ~~तगण~~ तगण गु
ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ । ऽ ऽ ऽ । ।

**द्वेष्यश्चेदनुकूलतान्न लभते वत्स! तृणाद्यं भुवि।**
**औदासीन्यपदं लभेत चिदपि प्रायस्तथा वर्तते**
**स्वानन्दं परिमृश्य तिष्ठ सुखितस्वाराज्यसिंहासने ॥**[1] इति।

अस्मिन् श्लोके शार्दूलविक्रीडितं वृत्तमस्ति। तस्य लक्षणन्तु ''**सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्**[2]'' इत्यस्ति। मगण-सगण-जगण-सगण-तगण-तगणैः गुरुणा च शार्दूलविक्रिडितं नाम वृत्तं भवति। तत्र सूर्यैः द्वादशभिः अश्वैः सप्तभिश्च यतिर्भवतीत्यर्थः। अत एतल्लक्षणानुसारम् अस्य श्लोकस्य द्वितीये चरणे तगणे ''वत्स!'' इत्यत्र अन्तिमो वर्णो गुरुः स्यात्। किन्त्वत्र सकारोत्तरवृत्तिः अकारोऽस्ति, अतस्तद्सद्भावात्तगणो न दृश्यते। अपि च द्वितीयचरणस्य अन्तिमो वर्णो लघुरस्ति, तत्तु च्छन्दशास्त्रनियमानुसारं गुरुत्वेन कल्पयितुं शक्यते, तथापि मध्ये ह्रस्ववर्णत्वात् छन्दोभङ्गस्तु सम्भाव्यत एव।

(७) **एष स्वप्नो हि भुक्त्वा स्वप्नपदञ्जुषो या मनोराज्यक्लृप्ति-**
**र्जाग्रद्दृष्टं पुरा यत्स्मरणमपि पुनः स्वप्नवजाग्रत्तदुक्तम्।**
**सुप्तिर्गाढान्धकारा वृतिरिह कथिता ज्ञानभूमिः पुनस्त्वं**
**ज्ञानाख्यां भूमिमेतां भवविलयकरीं वच्मि वेदैकगीताम् ॥**[3]

१. कै.दी. २.१२१
२. वृ.र. ३.१०१
३. कै.दी. २.१४८

इत्यत्र स्रग्धरावृत्तमस्ति किन्तु प्रथमचरणे वर्णानां विंशतिरस्ति। किञ्च भगण-नगण-यगण-यगणस्थानेषु च्छान्दोभङ्गो दृश्यते। यद्यपि श्लोकस्य प्रथमचरणे विषययोजना सङ्गच्छते, तथापि अस्मिन् चरणे विषमगणयोजनात्वाद् वृत्तनिर्धारण कठिनं वर्तते। तथा हि —

| मगण | रगण | ~~भगण~~ | ~~नगण~~ | ~~सगण~~ | यगण | यगण |
|---|---|---|---|---|---|---|
| ऽऽऽ | ऽ।ऽ | ऽऽ। | ।ऽ। | ।ऽऽ | ।ऽऽ | ऽऽऽ |

**एष स्वप्नो हि भुक्त्वा स्वप्नपदञ्जु[...]षो या मनोराज्यक्लृप्तिः**

अस्मिन् चरणे ''स्वप्नपदञ्जुषो'' इति पदं यदि ''**निद्रा शयनं स्वापः स्वप्नः संवेश**[1]'' इत्यमरकोषवाक्यानुसारं ''शयनपदजुषो'' इत्यनेन परिवर्त्यते तर्हि विहायान्तिमं यगणं स्रग्धरावृत्तस्य लक्षणं सङ्गच्छते। तथाविधपरिवर्तनेन श्लोकार्थपरिवर्तनमपि अधिकं न भवति। तद्यथा —

| मगण | रगण | भगण | नगण | यगण | यगण | ~~सगण~~ |
|---|---|---|---|---|---|---|
| ऽऽऽ | ऽ।ऽ | ऽ।। | ।।। | ।ऽऽ | ।ऽऽ | ऽऽऽ |

**एष स्वप्नो हि भुक्त्वा शयनपदञ्जुषो या मनोराज्यक्लृप्तिः**

क्वचित्तु एकस्मिन्नेव छन्दसि द्वयोः छन्दसोः त्रयाणां छन्दसां वा लक्षणानि दृश्यन्ते। यथा प्रथमे चरणे स्रग्धरा, इतरेषु मन्दाक्रान्ता अथवा प्रथम-तृतीय-चतुर्थचरणेषु मन्दाक्रान्तावृत्तं द्वितीयचरणे च स्रग्धरावृत्तमिति। एतेषां छन्दसां गणना तु उपजातिवृत्ते कर्तुं शक्यते। किन्तु एतादृशाः प्रयोगाः प्रायः साहित्यिकग्रन्थेषु नोपलभ्यन्ते। तथापि ईदृशी विचित्रच्छन्दोव्यवस्था ग्रन्थकारस्य काव्यचातुर्यं दर्शयति। प्रायः एकस्मिन् वृत्ते एकं विषयमादाय वृत्तपरिवर्तनं कठिनं भवति। तस्मादिदं कवेः चातुर्यत्वेन स्वीकर्तुं शक्यते। एवमेव अन्यत्र विचित्रच्छन्दोव्यवस्था समवलोक्यते।[2] उदाहरणं हि विलोकयामः —

(१) **कैवल्यं ज्ञानयोगाद्यदि भवति गुरो ! मोहमात्रप्रदात्रीः**
**कस्मात् सिद्धीर्जगति कतिचित्प्रार्थयन्ते विमुक्तिम्।**
**कस्यारब्धं भजति विलयं भोगमात्रावसानं**
**यस्मात्तस्मादखिलविभवान्विद्धि चारब्धजातान्॥**[3] इति।

१. अ.को. ७.३६
२. कै.दी. २.७९, २.८१, २.१२३
३. कै.दी. २.४८



प्रथमचरणे स्रग्धरा, इतरेषु चरणेषु मन्दाक्रन्ता इति एकस्मिन्नेव श्लोके छन्दोद्वयलक्षणं दृश्यते। प्रायः एतादृशः प्रयोगः साहित्यिकग्रन्थेषु न दृश्यते।

(२) **किं वा शास्त्रं वदति कुहनां नाथ कारुण्यसिन्धो !**
**नाभुक्तं कर्म नश्येदिति वचनमिदं ज्ञानवह्नेकनाश्यम्।**
**सर्वं कर्मेत्यपरमपि मे संशयो वाक्ययुग्मे**
**क्षीणः कस्माद्भवति हि गुरो ! सम्यगाख्याहि भूयः॥**[1] इति।

पद्येऽस्मिन् प्रथमतृतीयचतुर्थचरणेषु मन्दाक्रान्ता, द्वितीयचरणे स्रग्धरा इति एकस्मिन्नेव श्लोके छन्दोद्वयं दृश्यते इत्याश्चर्यम्।

(३) **श्रीमद्देशिकवर्य ! यत्त्रिभिश्च करणैः क्लृप्तं तु कर्मैव चेत्**
**वृत्तिज्ञानमिदं च चित्तकलितं किं कर्म न स्याद्वद।**
**अज्ञानन्न निहन्ति कर्मविपुलं किं वास्य नामान्तरं**
**विज्ञानं बृहदित्यतीव महिमा प्राप्तः कुतो वा वद॥**[2] इति।

अस्मिन् श्लोके द्वितीय-तृतीय-चतुर्थचरणेषु शार्दूलविक्रीडितं वृत्तमस्ति। किन्तु प्रथमचरणे वर्णानां एकविंशतिः दृश्यते। यथा हि —

**श्रीमद्देशिकवर्य ! यत्त्रिभिश्च करणैः क्लृप्तं तु कर्मैव चेत्** =२१ वर्णाः

अतो यदि प्रथमे चरणे ''यत्त्रिभिश्च करणैः'' इति स्थाने ''यत्त्रिकरणैः'' इति परिवर्तनं क्रियते तर्हि अतिलघुभूतपरिवर्तनेन शार्दूलविक्रीडितवृत्तं स्यात्, अर्थस्तु स एव भवति। तथा हि —

| मगण | सगण | जगण | सगण | तगण | तगण | गु |
|---|---|---|---|---|---|---|
| ऽऽऽ | ।।ऽ | ।ऽ। | ।।ऽ | ऽऽ। | ऽऽ। | ऽ |

**श्रीमद्देशिकवर्य ! यत्त्रिकरणैः क्लृप्तं तु कर्मैव चेत्** = १९ वर्णाः

अथवा ''श्रीमद्देशिकवर्य'' इति पाठो यदि ''श्रीमद्देशिक'' इत्यनेन पाठेन विपरिणम्यते, तदानीमपि प्रथमे चरणे शार्दूलविक्रीडितवृत्तस्य लक्षणं सङ्गच्छते। तथाविधपरिवर्तनकरणेन श्लोकस्य अर्थपरिवर्तनमपि न भवति। तथा हि —

१. कै.दी. २.५०
२. कै.दी. २.८१

मगण सगण जगण सगण तगण तगण गु
ऽऽऽ ।।ऽ ।ऽ। ।।ऽ ऽऽ। ऽऽ। ऽ

**श्रीमद्देशिक ! यत्त्रिभिश्च करणैः क्लृप्तं तु कर्मैव चेत्** = १९ वर्णाः

अस्यां मातृकायां क्वचित्तु प्रतिलिपिकारस्य तथा मातृकाग्रन्थस्य एकमातृकात्वात् छन्दोभङ्गः समवलोक्यते। तथा हि —

**(१) जातं भोगात् सुखं यद्विषयसुखमिदं ब्रह्मसौख्यं सुषुप्तौ**
**निद्रान्ते वासनाख्यं सुखमिह सकलानन्दात्मसौख्यम् ।**
**योगोत्थं मुख्यसौख्यं स्वसुखमिदमुदासीनकालोत्थितं यत्**
**चाद्वैतं पूर्णदृष्ट्या जनितमपि महावाक्यजं ज्ञानसौख्यम् ॥**[1] इति।

श्लोकेऽस्मिन् स्रग्धरा वृत्तमस्ति। किन्त्वत्र द्वितीयचरणे वर्णद्वयं न्यूनमस्ति। अतः यदि ''सकलानन्दात्मसौख्यम्'' इति पदे वर्णद्वयं योज्यते तर्हि, स्रग्धरावृत्तस्य लक्षणं सङ्गच्छत अत्र। अर्थपरिवर्तनमन्तरा तदित्थं परिवर्तयितुं शक्यते —

मगण रगण भगण नगण यगण यगण यगण
ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

**निद्रान्ते वासनाख्यं सुखमिह सकलानन्ददं चात्मसौख्यम्**

अत्र ''सकलानन्दात्मसौख्यम्'' इति स्थाने ''सकलानन्ददं चात्मसौख्यम्'' इति पाठः स्रग्धरावृत्तलक्षणान्वितो युक्ततमः स्यात्।

**(२) अतन्निरासवाचकैस्स्वरूपवाचकैर्मिथः**
**समेत्य सम्यगीरितः परशिवस्स एकः ।**
**भिदा हि वाचकेषु सा न लक्ष्यवस्तुनि स्थिता**
**भवान् विधूय संशयानखण्डमेतु निश्चयम् ॥**[2] इति।

अस्मिन् श्लोके पञ्चचामरवृत्तं प्रयुक्तं दृश्यते। पञ्चचामरलक्षणं ''**जरौ जरौ जगाविदं वदन्ति पञ्चचामरम्**[3]'' इति। यत्र हि प्रतिचरणं षोडश वर्णा भवन्ति अर्थात् जगण-भगण-जगण-रगणैः युतं पञ्चचामरं नाम वृत्तं भवति।

---

१. कै.दी. २.१२३
२. कै.दी. २.१३८
३. वृ.र. ३.६७



प्रकृतश्लोकस्य द्वितीये चरणे पञ्चदश वर्णा एव दृश्यन्ते। अतो यदि द्वितीयचरणान्ते ''एकः'' इति पाठस्थाने ''एककः'' इति पाठः स्यात्तर्हि अर्थपरिवर्तनमन्तरा पञ्चचामरवृत्तलक्षणं सङ्गच्छते। तथा हि —

जगण रगण जगण रगण जगण गु
।ऽ। ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ

**समेत्य सम्यगीरितः परशिवस्स एककः ।** = १६ वर्णाः

**(३) ऊहैक्लृप्ते विचारे परिगणितमबोधाख्यभूसप्तकं बो-**
**धाख्यं भूसप्तकं तच्छ्रुतिवचनपरैरुच्यते पूर्वमादौ ।**
**बीजाख्यं जाग्रदेकं पुनरपि तथा जाग्रदन्यन्महान्यो**
**जाग्रत्स्वप्नश्च सन्ध्यं पुनरपि च तथा स्वप्नजाग्रत्सुषुप्तिः॥**[1] इति।

अस्मिन् श्लोके स्रग्धरावृत्तमस्ति। किन्तु तृतीयचरणे स्रग्धरावृत्तपूरणार्थम् एको वर्णः न्यूनः अस्ति। अतः तदर्थम् एको ह्रस्ववर्ण आवश्यकः, इत्यतः अत्र ''हि'' इति कल्पयितुं शक्यते। तद्यथा —

मगण रगण भगण नगण यगण यगण यगण
ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

''**बीजाख्यं जाग्रदेकं** [**हि**] **पुनरपि तथा जाग्रदन्यन्महान्यः**'' इति।

एवञ्च विहाय जीर्णपाठं लुप्तपाठं वा सर्वेषां छन्दसां वृत्तनिर्धारणं सुगमतया कर्तुं शक्यते। अतः प्रसिद्धानुरोधेन कृतं छन्दोऽनुसरणं निर्विवादं परितोषाय भवति। एवंविधानि कतिपयस्थलानि विहाय च्छन्दसां लक्षणानुसरणमत्र सम्यक्तया अनुसृतमस्ति। ग्रन्थारम्भे मङ्गलाचरणे तथा ग्रन्थान्ते शार्दूलविक्रीडितच्छन्दो दृश्यते। एवं साकल्येनास्य ग्रन्थस्य भाषा संस्कृता सरला मधुरा चास्ति। भाषाविषयिण्योऽशुद्धयो नात्राधिका वर्तन्ते।

अस्मिन् ग्रन्थे ग्रन्थकारेण प्रायः बहूनाम् आर्षपदानां प्रयोगः कृतोऽस्ति। शृणुष्व, तिष्ठस्व, गमिष्ये, गच्छेरन् इत्यादीनि यानि पदानि लोके अप्रसिद्धानि किन्तु भारतादौ आर्षवाङ्मये प्रसिद्धानि सन्ति, तानि पदानि अयं ग्रन्थकारः स्वकीयग्रन्थे बहुत्र अजग्रन्थत्। तथा हि —

---

१. कै.दी. २.१४६

(१) ''**ते च क्षणेन गच्छेरन्नेव तत्र दृष्टान्तः पुष्करपलाशवत्**[१]'' इति। अस्मिन् वाक्ये ''गच्छेरन्'' प्रयोगोऽयम् अपाणिनीयः। ''गम्लृँ-गतौ'' इति धातुः (धा.पा. ९८२) परस्मैपदी वर्तते। अतः परस्मैपदत्वाद् विधिलिङ्गलकारे प्रथपुरुषबहुवचने ''गच्छेयुः'' इति रूपं स्यात्। कर्मव्यतिहारे अस्य धातोः आत्मनेपदत्वं युज्यते। पाणिनीयतन्त्रे ''गच्छेरन्'' इति रूपं ''**कर्तरि कर्मव्यतिहारे**[२]'' इत्यनेन सिध्यति। क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं भवतीति सूत्रार्थः। उदाहरणानि यथा ''व्यतिलुनीते'', ''संप्रहरन्ते राजानः'' इत्यादीनि। एतद्विस्तृततरूपेण अस्य श्लोकस्य पादटिप्पण्यामस्माभिः चिन्तितम्।

(२) ''**अध्यारोपमथापवादमपि यः प्रोक्त्वास्य कारुण्यतः**[३]'' इति। इत्यत्र ''प्रोक्त्वा'' इति प्रयोगोऽपाणिनीय भाति। यतो हि ''**समानकर्तृकयोः पूर्वकाले**[४]'' इत्यनेन क्त्वाप्रत्ययो विधाय ''**समासेऽनञ्पूर्वे क्त्वो ल्यप्**[५]'' इत्यनेन अव्ययपूर्वपदे अनञ्समासे क्त्वो ल्यबादेशे कृते सति ''प्रोच्य'' इति पाठः स्यात्।

(३) ''**तिस्रस्ता हि विरक्तयः श्रुतिमता मन्दा च तीव्रातमा**[६]'' इति। अत्र ''तीव्रतमा'' इति पाठः स्यात्। किन्तु छन्दस्त्वात् ''तीव्रातमा'' इति प्रयोगः कृतः स्यात्।

(४) ''**तद्वद्विक्षिप्तचित्ता अभिलषितमहाकामजालाः पतन्ते**[७]'' इति। अस्मिन् वाक्ये ''पतन्ते'' प्रयोगोऽयमपाणिनीय इति भाति। भ्वादिगणस्थः ''पत्लृ-गतौ'' इति धातुः (धा.पा. ८४५) परस्मैपदी वर्तते। किन्तु ''पतन्ति'' इति पदप्रयोगे छन्दोभङ्गः स्यात्। किन्तु नेयं पक्षः प्रबलः।

१. कै.दी.व्या. १.९६
२. पा.सू. १.३.१४
३. कै.दी. २.३
४. पा.सू. ३.४.२१
५. पा.सू. ७.१.३७
६. कै.दी. २.१६०
७. कै.दी. २.५४



अस्मिन्नेव श्लोके चतुर्थे चरणे अन्तिमो वर्णः लघुभूतो दृश्यते, स च स्रग्धरावृत्तलक्षणानुसारं गुरुः स्यात्।

अयं मातृकाग्रन्थः स्वोपज्ञव्याख्यायुतोऽस्ति। ग्रन्थस्यास्य व्याख्या सरला सरसा च वर्तते। ''नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते'' इति मल्लिनाथोक्तरीत्या अनेन श्लोकेषु विद्यमानानां पदानां काव्यकोषार्थदृष्ट्या व्याख्या कृता। अतोऽत्र नाधिकः क्रियापदानां प्रयोगः। क्वचिदयं श्लोकस्थपदानि व्याख्यायन् समग्रव्याख्यानस्य अन्ते क्रियापदं प्रयुक्तवान्। तथापि यत्र व्याख्यानस्य आवश्यकता वर्तते तत्र भूयो भूयः उदाहरणानि दत्त्वा तत्पदं स्पष्टयति। एतदर्थम् अनेन ग्रन्थकर्त्रा संस्कृतसाहित्ये प्रसिद्धानां बहूनां न्यायानामपि प्रयोगः कृतो वर्तते। एवं साकल्येन अस्य ग्रन्थस्य स्वोपज्ञप्रभाव्याख्याऽपि सरला सुगमा सरसा च विद्यते।

अयं ग्रन्थकारो दाक्षिणात्य इत्यतः प्रायः लकारस्थाने ळकारस्य प्रयोगमकरोत्।[१] मातृकाग्रन्थे प्रतिलिपिकारस्यापि प्रमादतः क्वचिल्लेखन-सम्बन्धिदोषा दृश्यन्ते। यथा ''ब''कारस्य स्थाने ''व''कारः, ''ञ्ज''कारस्थाने ''ज्ज'' इति द्विजकारन्यास इत्याद्येवंरूपाणि भाषादृष्ट्याऽशुद्धानि पदानि वर्तन्ते। तेषां संशोधनं सम्पादिते ग्रन्थे मया विहितमस्ति।

अतः भाषायाः छन्दसश्च दृष्ट्याऽयं ग्रन्थः सरलः सुगमश्च विद्यते। तेनाऽस्य ग्रन्थस्य पठनात् सरलतया वेदान्तशास्त्रतत्त्वानां सुखबोधो भवति, किञ्च ग्रन्थकारेण ग्रन्थारम्भे या प्रतिज्ञा कृता साऽपि पूर्णतां याति।[२] ग्रन्थकारेण ग्रन्थान्ते ग्रन्थस्य फलश्रुतिविषये इत्थं निरूप्यते —

**शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नानिशं बिभ्रतां**
**यद्वद्भूगतसर्वतीर्थपयसा मामज्जन्तोत्थं फलम्।**
**ये कैवल्याख्यमिदं पठन्ति सुधियश्शास्त्रं प्रबोधप्रदं**
**ते नित्यं परिपूर्णसौख्यभरिता नन्दन्ति मुक्तास्स्वयम् ॥**[३] इति।

अस्मिन् ग्रन्थे वेदान्तसम्बन्धान् दुरूहगभीरविषयान् ग्रन्थकारः सरलयुक्तिं

१. यथा ''आर्द्राङ्गकोऽक्षिविगळत्सुखवारिपूर्णः'' - कै.दी., १-१७
२. कै.दी., १.५; १.६;
३. कै.दी., २-१७६

सरस-वर्णनपद्धतिञ्चाश्रित्य वर्णयति। अतः यथा ग्रन्थकृतोक्तं तथैव सर्वत्र ग्रन्थेऽनुभूयते।

एवञ्च इदमत्रोपसंह्रियते यदत्र ''**कृष्णः - तद्देशकालकृतिवैदुष्यादीनां विचारः**'' इत्याख्ये प्रथमाध्याये कैवल्यदीपिकायाः प्रास्ताविकरूपेण अद्वैतसिद्धान्तस्य विकासः, श्रुतिस्मृतिन्यायप्रस्थानानां परिचयम् उपस्थाप्य कर्तुः कृष्णस्य देश-काल-वंश-कृत्यादीनां विस्तृतः परिचयः विदुषां विमर्शकानाञ्च शोधलेखानामाधारेण उपकल्पितो वर्तते। अपि च ग्रन्थस्यास्य प्रतिपाद्यम्, ग्रन्थेऽस्मिन् समावेशितानां काव्यतत्त्वानां छन्दसां विवेचनम्, काव्यवैशिष्ट्यम्, प्रभाव्याख्यायाः परिचयो वैशिष्ट्यञ्च इत्येते विचारा विमर्शपद्धत्यनुरोधेन समालोचिताः समावेशिताः सन्ति।

साम्प्रतिके युगे प्राचीनसंस्कृतवाङ्मयाम्बुधिनिहितानां विचाररत्नानाम् विद्वद्भिः अनुसन्धानपूर्वकनिबद्धानां ग्रन्थरत्नानां प्रकाशनं जातमस्ति। ते ग्रन्थाः — ''शिष्यतेऽनुशिष्यते बोध्यतेऽपूर्वोऽनेनेति शास्त्रं वेदस्तथा तदुपजीवि-स्मृतीतिहासपुराणादि'' इति वाक्यानुरोधेन शास्त्रत्वसंज्ञां भजन्ते। वेदान्तशास्त्रे शास्त्रं ज्ञापकं हि प्रसिद्धं न तु कारकमिति स्थितिः। अत एव वेदान्तानां तत्प्रकरणग्रन्थानाञ्च वेदात्वाच्छास्त्रत्वप्रसिद्धिरस्ति।

अपि च यथाहुः अभियुक्ततरैः —

**''प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।**
**पुंसां येनोपदिश्येत् तच्छास्त्रमभिधीयते॥**[१]'' इति।

इत्थममी वेदान्तप्रकरणग्रन्थाः शास्त्रत्वात् अवश्यमस्माभिः आरणीयाः। अमीषां वेदान्तग्रन्थानां प्रकाशनाय बहवो हि प्रथितयशाः विद्वांसः प्रयत्नमकार्षुः। तामेव परम्परामनुसृत्य मयाऽपि भारतीयसन्दर्भे कृष्णपण्डितविरचितस्य अस्य प्रबन्धस्य प्रकाशनाय प्रयत्नः कृतः।

भारतस्य प्राचीनं मध्यकालीनं च साहित्यं विपुलं बहुविधञ्चास्ति। अस्मिन् सुविशाले साहित्ये अस्माकं भारतीयपरम्परा सन्निहिता वर्तते। अतः अस्या

१. भामती १.१.४ इत्यत्र उद्धृतम्।



संरक्षणम् आस्माकीनं कर्तव्यमस्ति। अप्रकाशितरूपेण विभिन्नहस्तप्रति-पुस्तकालयेषु निहितायाः अस्याः ज्ञानसम्पदः सम्पादनं विधाय अस्याः संरक्षणाय प्रकाशनाय च अवश्यं यतनीयमस्माभिरिति मनसि निधाय कृष्णपण्डितविरचितायाः सव्याख्यायाः कैवल्यदीपिकायाः उपलभ्यमानयोः मातृकयोराधारेण ग्रन्थकृत्सम्मतान् उपलब्धपाठान् मातृकासम्पादनविधिम् आश्रित्य युक्तिभिर्निर्णीय प्रभाव्याख्योपेता कैवल्यदीपिका सम्प्रति द्वितीयाध्याये समुपस्थाप्यते।

D D D

द्वितीयोऽध्यायः

# स्वोपज्ञप्रभाव्याख्यासहितकैवल्यदीपिकायाः पाठसमीक्षात्मकं सम्पादनम्

## २.१ मातृकासम्पादनपद्धतिः —

कैवल्यदीपिकायाः तट्टीकायाः प्रभाव्याख्यायाश्च मूलमातृका नोपलभ्यन्ते इत्यतः उपलभ्यमानयोः कैवल्यदीपिकामातृकयोः सम्पूर्णां प्राचीनाञ्च देवनागरी-लिपिबद्धां मातृकामाधृत्य ग्रन्थकृतसम्मतः पाठः अस्माभिरभ्युपगतो वर्तते। कैवल्यदीपिकाया ग्रन्थलिपौ परिलिखिता एका प्रतिलिपिमातृका (transcript copy) असम्पूर्णा, देवनागर्यां परिलिखिता तु सम्पूर्णा विद्यते। ग्रन्थलिपिमातृका प्रथमप्रकरणस्य २६ श्लोकपर्यन्तमस्ति इत्यतः अत्र न महती उपकुरुते। अपरा या मातृका अस्ति सा अष्टात्रिंशदधिकपञ्चशतपृष्ठपरिमाणा (५३८) वर्तते। अस्या मातृकाया: प्रतिलिपिलेखकौ **एन्. रामनाथशास्त्री टि.आर्. शेषाद्रिशर्मा** च स्तः। अस्या मातृकायाः १९१५ ख्रीष्टाब्दे दिसम्बरमासे २९ दिनाङ्के लेखनकार्यं सम्पूर्णताम् उपगतम्। ततः १९१६ ख्रीष्टाब्दे जनवरिमासे ८ तमे दिनाङ्के मातृकेयम् अड्यारहस्तप्रतिसङ्ग्रहालयाय समर्पिता। मातृकेयं देवनागरीलिप्यां विलिखिता। तत्र अक्षराणि पठितुं सुकराणि सन्ति। प्राचीनयोरपि मातृकयोः लेखकप्रमादादिभिः कुत्रचित् स्थलेषु भाषाविषयिण्योऽशुद्धयः कृता विलोक्यन्ते। तासु प्रमुखा अशुद्धय एवम्प्रकाराः सन्ति —

(१) ''**द्व**'' इति लेखितव्ये ''**द्ध**'' इति लिखति प्रतिलिपिकारः। यथा ''**समिद्वन्नाशम्**'' इति स्थाने ''**समिद्धन्नाशम्**'' इति।[१]

१. कै.दी. १-५७



२. अयं मातृकालेखकः दाक्षिणात्यः आसीदित्यतः अनेन प्रायशः लकारस्थाने ळकारो लिखितः। यथा ''**विगलन्मकरन्द**'' स्थाने ''**विगळन्मकरन्द**'' इति लिखितम्।[१] ''**निष्कलम्**'' इति स्थाने ''**निष्कळम्**'' इति।[२]

३. बहुत्र श्रुतिवाक्यानां लेखनावसरे लिपिकारकृता दोषा दृश्यन्ते। यथा ''**वा अरे**'' इति श्रुतिवाक्यलेखने ''**वारे**'' इति लिखितम्।[३]

४. ह्रस्वदीर्घादिभेदेन क्वचित् लेखनदोषा दृश्यन्ते यथा ''**प्रतिजानीते**'' इति स्थाने ''**प्रतिजानिते**'' इति लिखति।[४] ''**स्थितेषु**'' इति स्थाने ''**स्थित्षु**'' इति पाठो दृश्यते।[५]

५. मातृकायां विभक्तिवचनसम्बद्धा दोषा केषुचित् स्थलेषु दृग्गोचरा भवति। इमे दोषाः प्रतिलिपिकारकृताः स्युः। तद्यथा कर्ता बहुवचने अस्ति तथापि क्रिया एकवचने लिखिता वर्तते।[६]

६. कुत्रचिच्छन्दोभङ्गो न स्यात् इत्यतः छन्दस्त्वाद् पाणिनितन्त्रे अप्रसिद्धाः प्रयोगा अपि कृताः। यथा ''**तीव्रतमान्**'' इति स्थाने ''**तीव्रातमान्**'' इति प्रायुङ्क्त।[७]

७. मातृकायां क्वचिल्लेखनकालीना मात्रादोषा अपि समवलोक्यन्ते। यथा ''**पर्यालोचनम्**'' इति लेखनीये ''**पयालोचनम्**'' इति लिखति।[८]

७. क्वचित् प्रतिलिपिकारेण कृता वर्णन्यूनाधिक्यादिदोषा अपि लक्ष्यन्ते। कस्यचिद्वर्णस्य आवृत्तौ तत्र एक एव वर्णो लिखितो वर्तते। यथा ''**अत्रैव वर्त्तते**'' इति लेखने ''**अत्रैवर्त्तते**'' इति लिखति।[९]

१. कै.दी.व्या. मङ्गलाचरणम्
२. कै.दी., १-२
३. कै.दी. व्या. १-३
४. कै.दी. व्या., १-६
५. कै.दी. व्या. २.११४
६. यथा - ''अज्ञाः कामिनः वेदतात्पर्यं न जानाति'' - कै.दी. व्या., २-७५
७. कै.दी. २.१६०
८. कै.दी.व्या., २-६५, १-१०३ इत्यत्रापि दोषोऽवलोक्यते।
९. द्रष्टव्यम्- कै.दी.व्या २.७२

८. पूर्वाचार्याणां श्रुतिवाक्यानाञ्च लेखने क्वचिदधिकपाठो न्यूनपाठो वा दृश्यते। यथा ''**स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति। उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके**'' इति मन्त्रे ''**त्वम्**'' इति पाठो न लिखितः, ''**शोकातिगो**'' इति स्थाने ''**शोकागो**'' इति लिखितम्।[1]

९. ग्रन्थकारेण प्रायः बहूनाम् आर्षपदानां प्रयोगः कृतोऽस्ति। एतानि पदानि लोके अप्रसिद्धानि किन्तु भारतादौ आर्षवाङ्मये प्रसिद्धानि सन्ति। तद्यथा शृणुष्व, तिष्ठस्व, गच्छेरन् इत्यादीनि पदानि ग्रन्थकारोऽयं स्वकीयग्रन्थे व्याख्यायाम् अजग्रन्थत्। एतानि पदानि अत्र ग्रन्थे यथावद् वर्तन्ते। एतेषां पदानां साधुत्वं तु आर्षप्रयोगात् निश्चप्रचमेव।

१०. कुत्रचित् एवमपि दृश्यते यत् कर्गजमातृकायां प्रतिलिपिकारस्य लेखनानन्तरमपि केनचित् ईषत् परिवर्तनं कृतमस्ति। ''प्रकाशितो'' इति पाठः मातृकायामस्ति, तत्रैव केनचिदन्येन अन्यवर्णणीयया लेखन्या ''**शि**'' इत्यस्य उपरि ''**णि**'' इत्यपि पाठो लिखितः।[2] एवमन्यत्रापि ईदृक् पुनर्लेखनात्मकं संशोधनं समवलोक्यते। पुनर्लेखनमिदं प्रतिलिपिकारेण कृतम् उत अन्येन इति विवरणं न प्राप्यते।

११. देवनागरीलिपौ प्रतिलिपिकृताया मातृकाया द्वौ प्रतिलिपिकारौ स्तः। अतोऽत्र उत्तरार्धभागे केषाञ्चिद्वर्णानां द्वित्वलेखनं दृश्यते। यथा ''**श्रुतिर्नो मिथ्या**'' इतिस्थले ''**श्रुतिर्न्नो मिथ्या**'', ''**शनकैर्महत्सुखम्**'' इत्यत्र ''**शनकैर्म्महत्सुखम्**'' इति वर्णद्वित्वस्य आधिक्यं दृश्यते।

१२. मातृकाग्रन्थे क्वचित् ल-ळ, य-प, थ-भ, ध-घ, ट-ठ, व-ब, श्र-श्नेति परिवर्तनादिसदृश्यः सामान्या अशुद्धयः समवलोक्यन्ते। क्वचित् तु लेखकप्रमादवशात् जकार-ज्ञकारलेखनं, सकार-शकारलेखनं, टकार-ठकारलेखनं वा विद्यते यच्च सम्पादितग्रन्थभागे परिशीलितमस्ति।

एवंविधा अशुद्धयोऽस्मिन् ग्रन्थे दृश्यन्ते। तासां यथायथं भाषाव्याकरणदृष्ट्या

---

१. कै.दी., १-८

२. कै.दी.व्या. मङ्गलाचरणस्य तृतीयं पद्यम्।



शुद्धिः कृता वर्तते।

अस्य मातृकाग्रन्थस्य यद्यपि द्वे मातृके स्तस्तथापि ग्रन्थलिपिमातृकाया अपूर्णत्वात् अन्यया सह तुलनायां कः पाठः साधीयान् शुद्धः पाठो वा इति निर्धारणस्य कश्चिदेव अवकाशः आसीत्। अतः व्याकरणदृष्ट्या, कोषदृष्ट्या, पूर्वापरसन्दर्भदृष्ट्यादिनिमित्तैः पाठसम्पादनमत्र कृतमस्ति। अस्मिन् ग्रन्थे आदर्शरूपेण अङ्गीकृतासु ग्रन्थोक्तिसु कासाञ्चन अप्राप्तित्वात् तत्रोक्तकारिको-दाहरणादिभिः तुलनया पाठसम्पादनस्यावकाशो न वर्तते। अतो मया व्याकरणवेदान्तादिदृष्ट्यैवास्य सम्पादनार्थं प्रयतितम्।

यदि कस्या अपि मातृकाया एकैव प्रतिलिपिः सम्प्राप्यते तर्हि तस्या मातृकायाः पाठसम्पादनं कथङ्कारं करणीयमिति विषये पाठसम्पादनविद्भिः केचन सिद्धान्ताः प्रतिपादिता वर्तन्ते। अनुसन्धानकर्मण्यस्मिन् श्रीवसन्तकुमारभट्टैः गुर्जरभाषायां विलिखितं पुस्तकं ''संस्कृतपाण्डुलिपयः समीक्षितपाठसम्पादन-विज्ञानञ्च'' महदुपकुरुते। तदनुसारमेकमात्रमातृकाग्रन्थपाठसम्पादकेन सर्वतः प्राक् भाषादृष्ट्या अदुर्बोधोऽर्थात् व्याकरणदोषवर्जितः पाठः प्रस्तोतव्यः। नाधिकं कष्टं विना बहुपरिवर्तनं विना दूषितः पाठोऽनुमातुं शक्यते तर्हि तस्य पाठस्य संस्थापनं करणीयम्। मातृकाग्रन्थे प्राप्यमाणो दूषितः पाठ्यांशः पादटिप्पणे उद्धरणीय इति।[1] अयं मातृकाग्रन्थः एकस्यामेव पाण्डुलिपौ निहित इत्यतः अस्य सम्पादनमपि व्याकरणदृष्ट्या सुबोधपाठसम्पादनपद्धत्याऽत्र विहितम्।

## २.२ पाठसम्पादनविधिः -

कृष्णविरचितस्य स्वोपज्ञप्रभाव्याख्यासहितस्य कैवल्यदीपिकाग्रन्थस्य समीक्षितः पाठः निम्नोक्तनियमानुरोधेन सम्पादितः।

(१) मातृकासम्पादनावसरे सर्वथानुचितत्वेन भासमानानां पाठानां समुचितं संशोधनं (emendation) प्रकोष्ठान्तरितं क्वचित्प्रश्नचिह्नोपेतं च **( ?)**

---

१. दृ. ''संस्कृत पाण्डुलिपिओ अने समीक्षित पाठसम्पादन-विज्ञान'', प्रो. वसन्तकुमारभट्टः, सरस्वती पुस्तक भण्डार अहमदाबाद. पृ. १५३
दृ. ''अनुसन्धानस्य प्रविधि-प्रक्रिया'', सं.-डॉ. नगेन्द्रः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, पृ. ७१

ईदृशे कोष्ठके लिखितः। अस्माभिरनङ्गीकृताः सर्वे पाठभेदाः मूलग्रन्थे टीकायां चेति पृथक् पृथक् पादटिप्पण्यां समावेशिताः सन्ति।

(२) मातृकायां क्वचिल्लुप्ता ग्रन्थभागाः टीकाभागाश्च सन्ति, तस्माद्यदि कस्मिँश्चिदंशे वर्णादिकं सन्निवेशनीयं स्यात्तर्हि तत् चतुष्ककोष्टान्तरितम् [ ] ईदृशे कोष्ठके संस्थापितं वर्तते।

(३) यदि क्वचित् कश्चन शब्दः, वाक्यम्, वाक्यांशो वा अस्वीकार्यः अथवा पुनरुक्तो (Dittography) भवति तस्यास्वीकृतिं (omission) दर्शयितुं { } ईदृशे कोष्ठके अस्वीकृतपाठो निर्दिष्टोऽस्ति।

(४) योऽशुद्धो दुर्बोधो वा पूर्वापरसन्दर्भविसङ्गतः पाठो वर्तते, तस्य स्थाने ससन्देहः सूचितपाठः सप्रश्नार्थचिह्नं ( ?) ईदृशे कोष्ठके संस्थापितः।

(५) अस्मिन् मातृकाग्रन्थे बहुत्र अनुस्वारस्य परसवर्णसन्धिः न कृतः। अत्र समीक्षितपाठे प्रसिद्ध्यनुरोधेन कृतसन्धिकः पाठः स्थापितः। स च पाठः क्वचित् [ ] ईदृशे कोष्ठके दर्शितः क्वचित्तु प्रकोष्ठमन्तरा दर्शितः।

(६) अथात्र मातृकाग्रन्थे पूर्वसवर्णदीर्घादिसन्धिषु क्वचिदेव अवग्रहचिह्नं दृश्यते इत्यतः समीक्षितपाठसम्पादने तु यथायथम् अवग्रहचिह्नं दर्शयित्वा पाठः संस्थापितो वर्तते। यत्र तु दीर्घसन्धौ अवग्रहचिह्नम् आवश्यकमस्ति किन्त मातृकाप्रतिलिपिकारेण न संस्थापितम्, तत्र आवश्यकतानुसारम् ''ऽ'' एतादृशम् अवग्रहचिह्नं संस्थापितम्।

(७) यत्र पदं तदंशो वा दुर्बोधोऽस्ति तत्र तादृशपदानन्तरं ( ?) ईदृशं प्रश्नार्थचिह्नं स्थापितं वर्तते।

(८) मातृकाग्रन्थे मषीप्रसारणेन क्वचिल्लुप्तपाठा दृश्यन्ते। अतः लुप्तांशं दर्शयितुं (.......) इत्थं बिन्दुश्रेणी स्थाप्यते। तत्स्थाने यदि कश्चित् पाठः संशोधकेन सूचयितुं शक्यते तदा स पाठः ( ) ईदृशे कोष्ठके निधीयते। यदि सन्दिग्धः पाठः संसूच्यते चेत् ( ?) इत्थं कोष्ठके सप्रश्नार्थचिह्नं पाठः संस्थाप्यते।

(९) अस्या मातृकाया अपरा ग्रन्थलिपिप्रतिकृतिः तत्त्वप्रदीपाख्यस्य



प्रथमप्रकरणस्य २६ श्लोकपर्यन्तमेवास्ति। अतः पाठसम्पादनावसरे प्रथमप्रकरणस्य २६ श्लोकपर्यन्तं प्रतिपुटं क्रमशः Gr-१,२,३,४ इत्येवंरूपेण पाठभेदाः पादटिप्पण्यां संसूचिताः।

(१०) अस्या मातृकाया लेखकेन बहुत्र लकारस्थाने ळकारस्य प्रयोगो विहितः। अत्र संशोधनकर्मणि ळकारस्थाने लकारस्य लेखनं ( ) ईदृशे कोष्ठके विधाय पाठसम्पादनं कृतम्।

(११) अस्मिन् मातृकाग्रन्थे प्रभाव्याख्याने बहुत्र प्रकाशिताप्रकाशितग्रन्थोक्तीनाम्, सम्प्रदायाचार्याणां वाक्यानां वा उद्धरणानि सन्ति। तेषां यथायथं १,२,३,४ इत्येवंरूपेण क्रमाङ्कं दत्त्वा अधोभागे पादटिप्पणीस्थले तस्य मूलं सङ्केताक्षरैः लिखितमस्ति। क्वचित् सुतरामप्रसिद्धस्य अप्रकाशितस्य वा वाक्यांशस्य मूलं न प्राप्यते चेत् पादटिप्पण्यां प्रश्नवाचकचिह्नदानेन (?) सूचितम्।

(१२) अस्मिन् मातृकाग्रन्थे ग्रन्थकर्त्रोपज्ञप्रभाव्याख्यायाम् आर्षोक्तीनां सम्प्रदायविदां वाक्यानाञ्च उद्धरणेषु बहुत्र पाठभेदाः सन्ति। अतो मातृकाग्रन्थसम्पादनावसरे मातृकालेखनकर्त्रा अभीष्टं पाठम् उपरि विलिख्य सम्प्रत्युपलभ्यमानग्रन्थस्य ससम्पादकाभिधेयं पाठः पादटिप्पण्यां दर्शितः।

(१३) अपेक्षितेषु स्थलेषु सूचितानां संशोधनानां संयोजनानाञ्च टिप्पणी पादटिप्पण्याः अधस्तादुपकल्पिता वर्तते।

इत्थं नूतनां विमर्शपद्धतिमनुसृत्य पाठसम्पादननियमान् संश्रित्यात्र ग्रन्थकृत्सम्मतान् पाठान् युक्तिभिर्निर्णीय कृष्णविरचितस्य स्वोपज्ञप्रभाव्याख्या-सहितायाः कैवल्यदीपिकायाः नवीनं पाठसम्पादनं समीक्षात्मकमध्ययनञ्चेतत् अपेक्षिताभिः विविधाभिरनुक्रमणिकाभिः सह विदुषां समक्षमुपस्थाप्यते।

## २.३ समीक्षितपाठयुता सव्याख्या कैवल्यदीपिकाया -

सम्प्रति समीक्षितपाठयुता सव्याख्या कैवल्यदीपिका प्रस्तूयते।

॥ श्रीः ॥

श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः

# कैवल्यदीपिकाग्रन्थप्रारम्भः[१]

## तत्त्वप्रदीपप्रकरणम्

यस्याङ्घ्रिपद्मविगलन्मकरन्दसारो
जीवेश्वरैक्य[२]दृढताकृतिवज्रलेपः ।
न्यग्रोधमूलनिलयाय नमः परस्मै
धाम्ने स्वमौनपरिबोधिततत्त्वभूम्ने ॥१॥

अमृतमतुलनित्यानन्दसान्द्रस्वरूपं
विदितसकलवेदान्तार्थतात्पर्यनिष्ठम् ।
मृदितसकलदोषं मोक्षकामैः सुसेव्यं
गुरुवरमहमीडे कृष्णसञ्ज्ञं यतीन्द्रम् ॥२॥

यदीयवाक्सूर्यरुचिप्रणाशितो[३]
हृदन्धकारो नमतामशेषतः ।
महात्मनः शिष्यहिते सदा रतान्-
नमामि तान् शङ्करपूज्यदेशिकान् ॥३॥

नत्वा श्रीकृष्णयोगीन्द्रपादपङ्केरुहद्वयम् ।
भक्त्याः कैवल्यदीपस्य कुर्वे व्याख्यां प्रभाभिधाम् ॥४॥

इह कश्चित्कविः सम्यग्विदितब्रह्मात्मतत्त्वः स्वयं कृतार्थोऽपि[४] स्वानुभववद्

१. Gr- ''कैवल्यदीपः (प्रभासहितः)'' इति पाठः ।
२. Gr- ''जीवेस्वरैक्य'' इति पाठः ।
३. Gr- ''प्रकाशितो'' इति पाठः ।
४. Gr- ''कृतार्थोऽपि'' इति पाठः ।



अन्येषामपि मुमुक्षूणां मोक्षसाधनात्मतत्त्वावगमाय वेदान्तसारस्पष्टकथनरूपं किञ्चित् प्रकरणमारभमाणः तस्य निष्प्रत्यूहपरिपूरणादिसिद्धये प्रेक्षावत्प्रभृत्यङ्गभूतविषयादि-प्रदर्शनाय च स्वकृतं मङ्गलं ग्रन्थतो निबध्नाति—स्वर्णेति ।

**स्वर्णक्षेत्रवधूस्पृहासहितहृत्तन्मुक्तचित्तात्मना -**
**मन्तर्व्योमविकासिनित्यमहसे तस्मै परस्मै नमः ।**
**यद्वेदान्तगिरो वदन्त्यनुदिनं सप्तक्षमाणां परा**
**या भूमिश्च ततोऽपि दूरममलं तुर्यं सदैकं शिवम् ॥१॥**

परस्मै तस्मै परात्मने नमः । वाङ्मनः[१]कायानां प्रह्वीभावो भूयादिति योजना । तदिति सर्वनाम । सर्वश्च तद्ब्रह्मेति तच्छब्देन ब्रह्मैवाभिधीयते । ''**ओं तद्ब्रह्म**[२]'' इति श्रवणात् ।

ननु 'लक्षणप्रमाणाभ्यां वस्तुसिद्धि'रिति न्यायेन तद्ब्रह्म किं लक्षणम्, किं प्रमाणकमित्यत्राह — परस्मा इति । सर्वविलक्षणो निरतिशयानन्दस्वरूप इति यावत् । तादृशस्य कथं नमस्कारविषयत्वमिति तदाह — शिवमिति । स्वप्रकाशमिति । भक्त्या तदप्यस्तीति । तथाप्युपनिषदधिगम्यत्वमाह — यदित्यादिना । यद्ब्रह्म सत्यादिलक्षणं वेदान्तगिरोपनिषत्प्रमाणवाक्यान्यनुदिनम् उपक्रमादिभिर्लिङ्गैर्वदन्ति प्रतिपादयन्ति बोधयन्ति । किमिति तुर्यं[३] चतुर्थं विश्वाद्यपेक्षया येयं[४] सङ्ख्या न वास्तवीत्याह — सदैकमिति । सदा त्रिष्वपि कालेषु एकं वस्त्विति[५] भेदरहितं ''**सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्**[६]'' इति श्रुतेश्च । स्वतोऽविषयमपि स्वानुभूतिगम्यं तदिति दर्शयति - सप्तेति । सप्तक्षमाणां वक्ष्यमाणानां परा श्रेष्ठा या भूमिस्तुरीयाख्या, ''**चतुर्णां वर्णानां ब्राह्मणो वरीयान्**[७]'' इतिवत्, ततोऽपि

१. Gr- ''वाङ्मन'' इति पाठः ।
२. महा.उ. १५-४
३. Gr- ''तुर्यमिति'' इति पाठः ।
४. Gr- ''इयम्'' इति पाठः ।
५. Gr- अत्र ''सजातीयादि...'' इति पाठः ।
६. छा.उ. ६-२-१
७. ब्रह्म.पु. ८५-२३

दूरं तुर्यातीतपदाभिधं[१] पूर्वेण सम्बन्धः । यद्वा सप्तक्षमाणामिति । तस्य सप्तविधा प्राप्तभूमिप्रज्ञेति । पातञ्जलयोगशास्त्रोक्तानां भूमिकासप्तकानामपि परा या ज्ञानभूमिका सप्तसङ्ख्याधिका ततोऽपि दूरमत एवामलं सकलभावनामलरहितं जाग्रदादित्रय-रहितत्वात्तुर्यश्च[२] । यद्वा क्षिप्तमूढविक्षिप्तैकाग्रनिरोधसम्प्रज्ञातासम्प्रज्ञातभेदेन सप्तविधानां वा चित्तभूमिकानामपि परा या भूमिः ''**सा काष्ठा सा परा गतिः**[३]'' इति श्रुतिदर्शिता, ततोऽपि दूरम् । यद्वा सप्तक्षमाणामिति अज्ञानादिसप्तावस्थानां वात्र ग्रहः ।

ननु तादृग्वस्तुनः कथम् अनुभवसिद्धत्वमित्याशङ्क्याह — स्वर्णेत्यादि । स्वर्णं कनकं क्षेत्रं केदारादिकं वध्वः स्त्रियः अनेनेषणात्रयमुक्तम् । तासु स्पृहा तृष्णा तत्सहितं हृन्मानसं येषां जीवानां तद्रहितानां परमहंसानां जीवन्मुक्तानां च सर्वप्राणिनामन्तर्यामि[४], हार्दाकाशवासि[५], प्रकाशमानं, यं नित्यमहं[६] ''**हृद्यन्तर्ज्योतिः**[७]'' श्रुतिप्रकाशितं व्योमवदिति । वंशपर्वाद्यन्तर्वर्त्यम्बरवद्द्योतमानम् । अनेन त्वं पदार्थो[८] लक्षित उत्तरार्धेन तत्पदार्थः । ''असीत्यर्थे चतुर्थी स्याद्[९]'' इति वचनात् । तयोस्तादात्म्यलक्षणमखण्डैकरसमेव वाक्यार्थमिति दर्शितम् । तथा चोक्तम् ''**प्रत्यग् बोधो य आभाति**[१०]'' इत्यादिना । तथा च प्रत्यक् ब्रह्मैक्यमेवात्र विषयः । तत्र च तदैक्यस्याध्यासिकभेदभ्रमनिवृत्तिसाध्यत्वात् तद्भ्रान्तिनिवृत्तिरेव प्रयोजनम् । तत्सिद्धौ च तन्निवृत्तिकामोऽधिकारीत्यवगम्यते । तादृग्भ्रमस्याविचार-जन्यत्वेन विचारजन्यज्ञाननिवर्त्यतया[११] अधिकारिणा प्रकरणविचारस्य कर्तव्यतारूपः

१. Gr- अत्र ''इति'' इति अधिकः पाठः ।
२. Gr- ''...त्रयरहितं व् तुर्यश्च'' इति पाठः ।
३. कठ.उ. १-३-११
४. Gr- अत्र ''...तु अन्तर्व्यौम्नि'' इति पाठः ।
५. ''हार्दाकाशेवासि'' इति पाठः ।
६. Gr- ''नित्यंहः'' इति पाठः ।
७. बृह.उ. ४-३-७
८. Gr- ''पदार्थो'' इति पाठः ।
९. राम.उ. ४-१४
१०. पं.द. ७-७६
११. Gr- ''...ज्ञाननिवत्ति...'' इति पाठः ।



सम्बन्धः । फलस्य च प्राप्तव्यतालक्षणस्सिद्धः ।[१]

यद्वा शास्त्रार्थयोर्व्युत्पाद्यव्युत्पादकभावः । न च ''**यतो वाचो निवर्तन्ते**[२]'', ''**यन्मनसा न मनुते**[३]'' इत्यादिश्रुतिभिरविषयत्वप्रतिपादनात् न ब्रह्मणस्तज्ज्ञान-स्यापि[४] शास्त्रविषयत्वं सम्भवतीति वाच्यम् । तथाविधस्यापि कल्पितेन द्वारेण तत्सम्भवस्य पूर्वाचार्यैरभ्युपगतत्वात्, अवाङ्मनसगम्यं तं श्रुतिः बोधयितुं बलाज्जीवमीशमिति वचनाच्च। न चाध्यासासिद्ध्या[५] विषयाद्यसिद्धिरित्यपि वाच्यम्, ब्रह्मणोऽसङ्गत्वेऽपि अध्यासस्याहं बुद्धिसिद्धत्वात् । ''**अथातो ब्रह्मजिज्ञासा**[६]'' इत्यधिकरणभाष्ये युष्मदस्मदित्याद्यध्यासाभावहेतुमुपवर्ण्य तथापीत्यादिभाष्यग्रन्थसन्दर्भे लक्षणप्रमाणानुभवैरध्यासस्य साधितत्वात् । अत्रापि विषयासिद्धिरिति । तथा च प्रारिप्सितं प्रकरणमारम्भणीयम् विषयप्रयोजनवत्त्वाद् भोजनादिवत् । प्रकरणं प्रयोजनवद् बन्धनिवर्तकज्ञानहेतुत्वात्, रज्जुरियमित्यादि-वाक्यवत् । बन्धो ज्ञाननिवर्त्यः अध्यस्तत्वात् रज्जुसर्पवदित्यादि सर्वमनवद्यम् ॥१॥

एवं प्रकरणारम्भहेतुकं विषयादिकमर्थादुपवर्ण्य मुखतो दर्शयिष्यन्निर्विशेषतया महीकृतं तमेव प्रत्यक्परविभागासहमपि परमशिवं ''**निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः । ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः**[७]'' इति न्यायं क्वचित्परिणामप्रक्रियाञ्चाश्रयति ।[८] ''[९]**सगुणेषूपासनेषूपयोक्ष्यते**[१०]'' इत्युक्तभाष्यकारसम्मतिञ्चानुसृत्य स्वरूपतटस्थलक्षणाभ्यां प्रणमति — सृष्टिरिति ।

१. Gr- ''...ज्ञानस्य वा प्राप्तव्यता लक्षणबद्धम्'' इति पाठः ।
२. तै.उ. २-४-१
३. के.उ. १-६
४. Gr- ''तज्ज्ञानस्यापि'' इति न्यूनपाठः।
५. Gr- ''अध्यासासिद्ध्या'' इति पाठः ।
६. ब्र.सू. १-१-१
७. वे.क.व्या. १-१-२०
८. Gr- ''इति न्यायं.......आश्रयति'' इति न्यूनपाठः ।
९. Gr- ''सगुणैषूपासनैषु उपयौग्यत'' इति पाठः।
१०. ब्र.सू.शां.भा. ३-३-३० पृ. ८१२ (ब्रह्मसूत्रशाङ्करभाष्ये ''सगुणेषूपासनेषूपलभ्यते'' इति पाठो दृश्यते ।)

**सृष्टिस्थित्यन्तहेतूनपि[1] कमलभवाधोक्षजेशानमूर्ती-**
**रासाद्यैवाखिलेशत्वमपि परिगतं निष्कलं यत्स्वरूपम् ।**
**पूर्णं व्योम्नो विशुद्धं विमलतरमजं नित्यमुक्तं निरीहं**
**चित्ताकाशे सदाऽहं विलसितमभयं भावये ज्योतिराद्यम् ॥२॥**

भूतभौतिकादिसर्गादिनिमित्तं स्वतो निर्विकारमपि ब्रह्म, ब्रह्मादिमूर्तीरासाद्य तेषामपीशत्वमन्तर्यामितामपि गतवत्तथापि यन्निष्कलं सकलभावस्य मायिकत्वात् तत्र हेतुर्व्योम्नोऽपि पूर्णमपरिच्छिन्नं देशतः कालतो वस्तुतश्च ''**परिच्छेदरहितं ब्रह्म**[2]'' इति श्रुतेः। अत एव शुद्धमसङ्गमपरिणामि वा। सापेक्षिकं शुद्धत्वं निरस्यति — विमलतरमिति। अविद्याद्वितयतत्कार्यकामकर्ममलबन्धरहितम् अत एव अजम्, उपलक्षणमेतत्। सदा षड्भावविकाररहितम् अत एव नित्यमुक्तम्।

इदमत्राकूतम्[3]— उत्पन्नविवेकख्यातेः पुरुषस्याविद्याकामादिबन्धहेतोः निवृत्तत्वेन यथा प्रारब्धमश्नन्नपि[4] भाविबुद्धा[5]भावान्मुक्तत्वमपि। अत्र तु स्वमहिम्ना नीलपृष्ठत्रिकोणादिलक्षणाशुक्तिकाविशेषस्वरूपस्य कालत्रयेप्यारोपितरजतसंसर्गा-भावादेव मुक्तम्। ''**तद्ब्रह्म**[6]'' इति प्रदर्शनार्थं नित्यमुक्तमिति विशेषणम्। अत एव ''**निरीहम्**[7]'', ''**तदैक्षत**[8]'' इत्यादिश्रुतिबोधितव्यावहारिकेक्षणादिचेष्टापि निरस्ता। उपलब्धिस्थानं स्वानुभूतिगम्यत्वञ्च तस्य साम्प्रदायिकमाह — चित्तेति। हार्दाकाशे सदाऽहमिति अतिस्फुटं विलसितमभयमद्वयं ''**द्वितीयाद्वै भयम्**[9]'' इति श्रुतेः। आद्यं परमकारणं विवर्तोपादानरूपं ''**स कारणं करणाधिपाधिपो**

१. Gr- ''हेतोरपि'' इति पाठः।
२. त्रि.महा.उ. १-१, पृ. ३५९
३. Gr- ''अयमत्राकृतम्'' इति पाठः। देवनागरीलिपिमातृकायामपि अयमेव पाठः।
४. Gr- ''...मश्नुतोपि'' इति पाठः।
५. Gr- ''भाविबाधाभावात्'' इति पाठः।
६. तै.उ. १-५-१
७. रुद्राष्टकम् ?
८. छा.उ. ६-२-१
९. बृह.उ. १-४-२



**न चास्य कश्चिज्जनिता न चाधिपः**[1]'' इति श्रुतेः। ज्योतिमयं[2] भावये तदेवाहं प्रत्यगात्मेत्यनुसन्धतामिति ॥२॥

स्वगुरुं प्रणमति द्वाभ्याम् — यस्येति।

**यस्य प्रसादान्मयि भातमेत-**
**न्मिथ्येति विज्ञाय जगत्समग्रम्[3] ।**
**अस्म्येव[4] नित्यं परिपूर्णवस्तु**
**व्योमेव वन्दे वरदेशिकन्तम् ॥३॥**

यस्य परमेश्वरावताररूपस्य ब्रह्मविद्योपदेष्टुराचार्यस्य प्रसादाद्दीक्षादिकृता[5]-नुग्रहविशेषाच्छक्तिपातसंज्ञकात्समग्रं समस्तमिदं व्याकृताव्याकृतरूपं विश्वं मय्येव[6] प्रत्यगभिन्ने ब्रह्मणि भातं, मत्स्वरूपसत्तास्फुरणाभ्यां सत्तास्फूर्तिमदपि मिथ्येति रज्जुसर्पशुक्तिकारजतस्थाणुपुरुषमरीचिजलगन्धर्वनगरादिवत् मायैवेति ज्ञात्वा व्योमेव परिपूर्णं नित्यं[7] ब्रह्म तदेवाहं भवामि। तं वरदेशिकं वन्दे, त्रिभिः करणैः प्रह्वीभावं करोमि। ''**आचार्यवान्पुरुषो वेद**[8]'' इत्यादिश्रुतिभ्यः इति ॥३॥

ननु गुरुप्रसादस्य ब्रह्मज्ञानप्राप्तिहेतुत्वेनालम् ''**आत्मा वा अरे**[9] **द्रष्टव्यः श्रोतव्यः**[10]'' इत्युक्तश्रुत्यर्थविचारादिनेत्याशङ्क्य ''**यस्य देवे परा भक्तिः**[11]'' इत्यादिश्रुतितात्पर्यं दर्शयतीत्याह[12] — मदीयमिति।

१. श्वे.उ. ६-९ (मातृकायां ''स कारण स करणाधिपाधिपो...'' इति पाठः)
२. Gr- ''समस्तम्'' इति पाठः।
३. ''ज्योतिर्महो'' इति पाठः।
४. Gr- ''अस्त्यैव''।
५. Gr- ''...वीक्षादि''।
६. Gr- ''अस्येव''।
७. Gr- ''यन्नित्यम्''।
८. छा.उ. ६-१४-२
९. बृह.उ. २-४-५
१०. ''वारे'' इति पाठः।
११. श्वे.उ. ६-२३
१२. Gr- ''इत्याह'' इति न्यूनपाठः।

**मदीयं शरीरेन्द्रियाद्यं समस्तं**
**मदीयप्रबोधेन दूरं[1] विधूय ।**
**हिमं सूर्यवन्मामथैकञ्च कृत्वा**
**स्थितं स्वेन रूपेण सेवे गुरुं तम् ।।४।।**

मदीयमात्मा[ऽ?]विद्याद्यध्यस्ततया स्वकीयमिव प्रतीयमानं शरीरेन्द्रियादिकं कार्यकारणसङ्घातरूपं समस्तद्वैतजातं मदीयप्रबोधेन आत्मतत्त्वविचारजन्यावगति-पर्यन्तविवेकज्ञानेन[2] हिममिव सूर्यः दूरं विधूय विहृत्य[3] तदभिमानं परित्यज्य चिज्जडयोर्वैलक्षण्यं सम्यग्बोधयित्वा मां च श्रोतारं चेतनं त्वम्पदार्थं ''**तत्त्वमसि**[4]'' इति महावाक्योपदेशादिना एकमेवाद्वयं[5] सजातीयादिभेदभ्रम-निरासेन करतलामलकवत् ज्ञापयित्वा स्वेन चित्सदानन्दाद्वितीयब्रह्मात्मना स्वयमवस्थितं तमेव गुरुं सेवे। अनेनाचार्यस्य ब्रह्मविवर्तता[6] दर्शिता। ''**ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभासिने**[7]'' इति न्यायाच्चेति ।।४।।

यदर्थं गुर्वभिवन्दनमाचरितं तत्प्रदर्शयितुकामः[8] आरम्भापेक्षितविषयादिकं सङ्गृह्य दर्शयति — आद्येति ।

**आद्यन्तहीनाम्बरवत्सुपूर्ण[9]-**
**श्रीकृष्णयोगीन्द्रपदं प्रणम्य ।**
**अनात्मबन्धेतरदर्शिशास्त्रं[10]**
**मूढात्मनां वच्म्यपरोक्षतत्त्वम् ।।५।।**

---

१. Gr- ''दूरे'' इति पाठान्तरम् ।
२. Gr- ''...ज्ञाने'' इति ।
३. Gr- ''विसृज्य'' इति ।
४. छा.उ. ६-८-७
५. Gr- ''एव'' इति न्यूनपाठः ।
६. Gr- ''ब्रह्मविवर्तकता'' इति ।
७. ल.सु. १ (क्वचित् ''मूर्तिभेदविभागिने'' इत्यपि पाठो दृश्यते ।)
८. Gr- ''...प्रदर्शयितुम्'' इति ।
९. Gr- ''सुपूर्णम्'' इति पाठः ।
१०. Gr- ''दर्शशास्त्र...'' इति पाठः ।



आद्यन्तहीनश्चाम्बरवत् सुपूर्णो यः कृष्णसंज्ञको योगीन्द्रः मस्करीन्द्रः[1] तच्चरणारविन्दं प्रणम्य तत्प्रसादादेवानात्मबन्धः अविद्याऽहङ्कारादिः इतरश्च तन्निवर्त्यं कैवल्यं तानि[2] दर्शयन्ति स्पष्टमवगमयन्ति। यानि शास्त्राणि अभ्युदयनिश्श्रेयसप्रतिपादकानि[3] वेदवाक्यानि तान्यधीतुं तदर्थं च सम्यग्विज्ञातुं योग्यताहीना ये मूढाऽविवेकिनो बालास्तेषां बन्धमोक्षप्रकारप्रदर्शकवेदशास्त्रार्थ-विचारादिष्वशक्तानामपि तत्त्वमपरोक्षं यथा स्यादपरोक्षं तत्त्वं यस्मात्स्यात्तादृग्रूपं प्रकरणं कथ्यत[4] इति तात्पर्यार्थः ।।५।।

ननु पूर्वाचार्यैर्व्यासभगवत्पादप्रभृतिभिः प्रणीतेषु बहुप्रबन्धेषु न्यायोपेतेषु च तेषु सत्सु इदानीन्तनैर्दुर्विज्ञातेषु[5] च तवायं श्रमो निरर्थ इत्याशङ्क्य तत्प्रणीतार्थ-मननादिमात्रोपयोगितया एकत्र सङ्गृह्य तदर्थप्रदर्शनार्थत्वादस्य प्रकरणस्य सप्रयोजनत्वमस्तीति कथयन् प्रतिजानि(नी)ते — श्रीमदिति।

**श्रीमच्छारीरभाष्यादिकसकलमहाशास्त्रदुग्धाब्धिमध्या-**
**दादायात्यन्तसारं पय इव सुवचः कुम्भलक्षैर्भृतं यत् ।**
**पूर्वाचार्यैस्तदद्य प्रकरणविधया वच्मि कैवल्यसर्पिः**
**प्राज्ञानामश्नतां यद्भवविषयरसो न[6] स्वदेन्मानसाय ।।६।।**

श्रीमन्ति[7] पदवाक्यप्रमाणमाहात्म्यकलितानि शारीरभाष्यादिकानि। आदिशब्देन सङ्क्षेपशारीरकादिः गृह्यते। सकलानि सम्पूर्णानि वाचस्पत्यादीन्य-सम्पूर्णानि च पञ्चपादिकादीनि। तानि च महान्ति शास्त्राणि हितशंसनात्सकलशब्देन उपनिषद्भाष्यतद्वार्तिकादिकमपि गृह्यते। तेषामेव जल्पादिन्यायोपेतत्वेन महत्त्वं तदृशिरेव[8] दुग्धाब्धिः क्षीराम्भोधिः तन्मध्यात् पूर्वाचार्यैर्विद्यारण्यादिभिराचार्यैः

---

१. Gr- ''मस्करीन्द्रः'' इति नास्ति ।
२. ''तौ'' इति पाठः। ''दर्शयन्ति'' इति क्रियापदानुरोधात् ''तानि'' इति पाठः स्यात्?
३. ''...पादिकानि'' इति पाठः।
४. Gr- ''कथयामि'' इति ।
५. Gr- ''दुर्विज्ञातार्थे'' इति पाठः ।
६. Gr- ''रसानस्वदेन्मानसाय'' इति पाठः ।
७. Gr- ''श्रीमदिति'' इति पाठः ।
८. Gr- ''तद्राशिशं च'' इति पाठः ।

अत्यन्तसारं पय इवात्यन्तरहस्यमर्थमादाय सुवचः कुम्भलक्षैः शोभनानि प्रसन्नगम्भीरार्थानि तद्वचांस्येव पञ्चदशीजीवन्मुक्त्यादिप्रकरणवाक्यानन्येव गद्यपद्यकल्पितानि कुम्भरूपाणि तल्लक्षैरसङ्ख्यातैस्तैर्भृतम् । यथा क्षीरविन्यासहेतुः कुम्भः तद्वदुपनिषदर्थरहस्यामृतविन्यासाश्रयाणि प्रकरणानीति दर्शितम् । ''**सारांशस्पष्टकथनं यत्तत्प्रकरणं विदुः**[१]'' इति वचनात् । बहुप्रकरणकुम्भघृतं यदुपनिषद्रहस्यपयः तदंशमेवाहमप्यादायेदानीं प्रकरणविधया प्रकरणरूपेण वच्मि । यथा च लोके नवनीतार्थी[२] कुम्भादिस्थितं पयः क्वथनातञ्चनादियोगेनाविर्भूतं नवनीतमादत्ते तद्वत्पूर्वाचार्यप्रणीतप्रकरणकुम्भस्थितोपनिषदर्थपयो[३] विचाराग्नि-संशोधनयुक्त्याऽऽतञ्चनध्याननिर्मथनादिना आविर्भूतं कैवल्यनवनीतं करोमि।

इदञ्च कैवल्यसर्पिरश्नतां प्राज्ञानाम्, एतत्प्रकरणरहस्यार्थं सम्यग्गुरूपदेशतो[४] बुध्वा कैवल्यसुखमनुभवताम्। अत एव प्राज्ञानां विदितवेद्यानां जीवन्मुक्तानामिति यावत् । भवविषयरसः[५] संसारविषयविषमृत्तिकामानसाय न स्वदेत् । स्वप्नेऽपि तदाशा न स्फुरेत् । ''**आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्**[६]'' इति श्रुतेरित्यर्थः ॥६॥

प्रतिज्ञाते विशेषं दर्शयति — कैवल्यमिति[७]।

**कैवल्यपूर्वनवनीतसमाह्वयं तत्**
**शास्त्रं द्विधा हि पटलं रचयामि चैकम् ।**
**तत्त्वप्रदीपमपरं किल संशयान्ध-**
**कारप्रदीपमिति सद्गुरुपादभक्त्या ॥७॥**

कैवल्यपूर्वञ्च तन्नवनीतञ्च कैवल्यनवनीतमिति सम्यगाख्यातं[८] शास्त्रं पुरुषस्य

१. ?
२. Gr- ''नवनीतार्थम्'' इति पाठः ।
३. Gr- ''...पय'' इति नास्ति ।
४. Gr- ''सम्यग्रूपदेशतो'' इति पाठः ।
५. ''भवविषयरसा'' इति पाठः।
६. बृह.उ. ४-४-१२
७. Gr- ''कैवल्येति'' इति पाठः ।
८. Gr- ''...ख्यातच्छास्त्रम्'' इति पाठः ।



श्रवणादिकर्तव्यतारूपं हितं शास्तीति शास्त्रम् । ''**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते**[१]'' इत्युक्तलक्षणं प्रकरणमेव द्विधा द्वेधा विभज्य तत्रैकं तत्त्वप्रदीपम् ।[२] तत्केवलं ब्रह्म तस्य भावः प्रत्यक्ता(?) तस्य दीप इव भासकं कैवल्यप्रदीपसंज्ञम्।[३] अपरञ्च वक्ष्यमाणा-शङ्कारूपप्रतिबन्धनिवर्तकतया प्रवक्ष्ये। सन्देहप्रशमनसमाख्यमित्युपरि वक्ष्यमाणं च प्रकरणं {च} रचयामि।

ननु महदारम्भस्यापि विघ्नबाहुल्यादिना समाप्त्यदर्शनात्सान्वयव्यतिरेक-सिद्धत्वे कथमीदृशी प्रतिज्ञा ? प्रतिबिम्बितशाखाफलस्वादनप्रतिज्ञेव शोभतेतराम् इत्याशङ्क्याह —सद्गुरुपादभक्त्येति । ''**आचार्याद्ध्येव विद्या विदिता साधिष्ठं प्रापयति**[४]'' इति श्रुतेः । गुरुभक्तेस्सर्वविघ्नभञ्जकत्वेन [५]सर्वार्थसिद्धेर्न मे कोऽपि विघ्न इति ॥७॥

एवं प्रेक्षावत्प्रवृत्त्यङ्गभूतविषयादिकथनेनाज्ञातत्वेन विषयत्वं ज्ञातत्वेन प्रयोजनत्वञ्च ब्रह्मण एवार्थादुक्त्वा प्रतिपाद्यप्रतिपादकभावसम्बन्धञ्च प्रदर्श्य परिशिष्टाधिकारिनिरूपणाय तद्विशेषणतया साधनचतुष्टयं प्रदर्शयितुमुपक्रमते — नित्येति ।

**नित्यानित्यविवेचनं प्रथमतस्तत्साधनं तत्परं**
**चेहामुत्रविराग[६] एव पठितः पश्चाच्छमाद्या[७] अपि ।**
**[८]मोक्षश्चेति च सूरिभिर्निगदितं[९] मिथ्येति सत्यं परं**
**ब्रह्मैवेति विनिश्चयो भवसुखास्वादे विरक्तिः परा ॥८॥**

१. मी.श्लो. ५-४
२. Gr- ''तत्त्वप्रदीपकम्'' इति पाठः ।
३. Gr- ''...दीपसंज्ञम्'' इति पाठः ।
४. छा.उ. ४-९-३
५. ''सवार्थसिद्धेर्न'' इति पाठः।
६. Gr- ''...मूत्रविराग'' इति पाठः ।
७. Gr- ''पश्चाच्छिमाद्या'' इति पाठः ।
८. ''मोक्षे'' इति पाठः।
९. Gr- ''सूरिभिर्जगदिदम्'' इति पाठः ।

नित्यं वस्तु परं ब्रह्म अनित्यञ्च भूतभौतिकलक्षणं जगदिति नित्यानित्यवस्तुनोर्विवेचनं विभज्य ज्ञानं प्रथमतोऽधिकारिणः साधनम्। इह जन्मनि जन्मान्तरे वाऽनुष्ठितयज्ञादिभिः नितान्तविमलस्वान्तस्यात्मयाथार्थ्यं विविदिषोः पुरुषधौरेयस्य[1] जायते।

ननु ''**स्वर्गे लोके न भयं किञ्चनास्ति न तत्र [त्वं] न जरया बिभेति। उभे तीर्त्वाऽशनायापिपासे शोका[ति]गो[2] मोदते**[3]'' इत्यादिश्रुतौ स्वर्गादिफलस्य नित्यता[ऽ]वगमात्कथं तत्रानित्यताबुद्ध्यादय इति चेत् — न। ''**तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते**[4]'' इत्याद्युपपत्तिमच्छ्रुत्या तदन्यथात्वप्रतिपादनात् स्वर्गादिफलस्य आपेक्षिकनित्यत्वमेवेष्टव्यमतो न कोऽपि विरोधः। ''**[आ]भूतसंप्लवं स्थानममृतत्वं हि भाष्यते**[5]'', ''**श्रुतञ्च दृष्टवद्दुःखं स्पर्धासूयात्ययादिभिः। बह्वन्तरायकामत्वात्कृषिवच्चाति निष्फलम्**[6]'', ''**एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति**[7]'' {इति}[8] इत्यादिश्रुतिस्मृत्यादितात्पर्यालोचनतोऽवगम्यते।

नित्यानित्यविवेकः ततः परञ्च इहामुत्रार्थविरागोऽपि भवति। इह स्रक्चन्दनवनितादौ अमुत्राप्सरःस्त्रीभोगादौ विरागो वितृष्णता[9] वैराग्यं श्ववान्ताशनमूत्रपुरीषादौ जायमानजुगुप्साबुद्धिवद् अनाभोगात्मिकोपेक्षाबुद्धिः। तथा चोक्तम् ''**दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्**[10]'' इति। पश्चात्तदनन्तरं ''**शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वा**[11]''

१. ''पुरुषघौरेयस्य'' इति पाठः।
२. Gr- ''शोकातीतो'' इति पाठः।
३. कठ.उ. १-१-१२
४. छा.उ. ८-१-६
५. वि.पु. २-५-९६
६. भा.पु. ११-१०-२१ (श्रीमद्भागवतपुराणे ''श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः। बह्वन्तरायकामत्वात्कृषिवच्चापि निष्फलम् इति रूपेण श्लोकोऽयम् उपलभ्यते। पृ. ६४९)
७. मुण्ड.उ. १-२-७
८. Gr- ''इति'' नास्ति।
९. Gr- ''अष्णता'' इति पाठः।
१०. यो.सू. १-१५
११. बृह.उ. ४-४-२३



इत्यादि[1]श्रुत्युपदिष्टशमाद्या अपि वक्ष्यमाणाः षड्गुणाः भवन्ति। एवं गुणवतामपि केषाञ्चिद्योगिनां मुमुक्षादर्शनाद् मुमुक्षयापि भवितव्यमिति दर्शयति — मोक्षेच्छेति च।

ननु यमादयो बहुगुणाः तत्रापि पृथक्कृता[ऽ]हिंसादयस्ते तु देशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतमित्यपि वर्णितम्। तथा च सति कथमेतावन्ति साधनानीति चेदुच्यते — सूरिभिरिति। यतः सूरिभिर्व्यासभगवत्पादप्रभृतिः भाष्यादिषु तथा[2] प्रतिपादितमिति ज्ञेयम्। तथा चोक्तम् ''**नित्यानित्यवस्तुविवेकः**[3]'' इत्यादिभाष्ये। शिष्टपदं स्पष्टार्थम् ॥८॥

संज्ञापरिभाषितशमादिषट्कं विशदयति द्वाभ्यां — शम इति।

**शमो दमश्चोपरतिस्तितिक्षा-**
**श्रद्धासमाधानमितीह षट् ते[4]।**
**लक्ष्यैकतानत्वमुशन्ति शान्तिं**
**चित्तस्य बाह्यार्थविनिग्रहो दमः ॥९॥**

शमाद्याः समाधानान्ताः गुणाः। तत्र शमलक्षणमिदं — लक्ष्यैकतानतां मनसः शान्तिं शममुशन्ति इच्छन्ति। लक्ष्यमालम्बनं, तद्द्विविधं[5] — सभक्तिकं[6] संयोगश्च[7]। संयोगं तु ''**{स}वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञात**[8]'' इति सूत्रितलक्षणं भक्तिः सगुणदेवताभिध्यानादिरूपा। एतेन सगुणदेवतासाक्षात्कारपर्यन्तोपास्तिमतामेव शमादिगुणाविर्भावो निष्प्रतिबन्धक इति द्योतितम्। तथा चोक्तम् ''**समाधि[सिद्धि]रीश्वरप्रणिधानात्**[9]'' इति।

१. Gr- ''इत्यादि'' इति न्यूनपाठः।
२. Gr- ''कथम्'' इति पाठः।
३. ब्र.सू.शा.भा. १-१-१, पृ. ७१
४. Gr- ''षटके'' इति पाठान्तरम्।
५. ''तद्द्विविधा'' इति पाठः।
६. ''सक्रिकम्'' इति पाठः। ग्रन्थलिपिमातृकायां तु ''सभक्तिकम्'' इति पाठः।
७. Gr- ''संयोगश्च'' इति पाठः।
८. यो.सू. १-१७
९. यो.सू. २-४५

तत्रान्तःकरणदर्पकामादिदोषं शमयतीति शमः। दम इति — बाह्यकरणनिग्रहो दमः ॥९॥

किञ्च —

**न्यासं वदन्त्युपरतिं सहनं शुचां यत्**
**क्षान्तिं च देशिकवरोदितशास्त्रमार्गे।**
**श्रद्धातिविश्वसनमात्मपरैक्यमात्रे**
**धीस्थापनं खलु वदन्ति समाधिमार्याः ॥१०॥**

न्यासं सर्वसङ्गत्यागं काम्यकर्मसन्न्यासं वा। उपरतिं शुचामाध्यात्मिकादि-दुःखानां सहनं; क्षान्तिं, क्षमां, तितिक्षां वदन्ति। ''**सहनं सर्वदुःखानाम् अप्रतीकारपूर्वकम्। चिन्ताविलापरहितं सा तितिक्षा निगद्यते**[1]'' इति वचनात्। देशिकवरेण ब्रह्मविद्यासम्प्रदायप्रवर्तकाचार्येण उदित उपदिष्टे शास्त्रमार्गे तच्छ्रवणादौ चातीव विश्वास आदरः श्रद्धा। तथा चोक्तम् ''**निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता**[2]'' इति। अन्यत्राप्युक्तम् ''**शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यावधारणम्। सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते**[3]'' इति। आत्मपरयोः प्रत्यग् ब्रह्मणोस्तादात्म्य एवैकस्मिन्विषये धीस्थापनं वृत्तिसंरोधो हि समाधिः समाधानमार्याः ''**ध्येयैकगोचरं चित्तं समाधिः**[4]'' इति वचनादिति भगवत्पादाः। तथा चोक्तम् ''**सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा**[5]। **तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्**[6]'' इति ॥१०॥

एवं[7] नित्यानित्यवस्तुविवेकिनामपि केषाञ्चित्पौराणिकानां शास्त्रज्ञानाम्

---

१. वि.चू. २५
२. अप.अनु. ८
३. वि.चू. २६
४. पैङ्गल.उ. ३-२
५. Gr- सर्वधा इति पाठः।
६. वि.चू. २७ ( सम्प्रति उपलभ्यमानायां विवेकचूडामणौ श्लोकोऽयं ''सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा'' इति रूपेण प्राप्यते।)
७. Gr- ''एवम्'' इति नास्ति।



इहामुत्रविषयविरागादर्शनाद् विरागेणापि[1] भवितव्यमिति उक्तम्। तदुभयवतामपि काष्ठतपस्विनां कदाचित्कोपतापशापादिदर्शनात् शमादिनापि भवितव्यमित्युक्तम्। तत्त्रयवतां केषाञ्चित् सिद्धिलोलुपतया मुमुक्षादर्शनात् तथापि भवितव्यमिति मुमुक्षाभिधं चतुर्थं साधनमर्थतोऽनुवदति — अहम इति।

**अहमोऽज्ञानसमुत्थादात्मज्योतिरावृतेस्तूर्णम् ।**
**निजरूपबोधमात्रादिच्छा मोक्तुं मुमुक्षुता कथिता ॥११॥**

अज्ञानकल्पितादविद्याविलसिताद् अहमोऽहङ्कारग्रहाद् यथा तमोग्रह आदित्यज्योतिरावृणोति तद्वदात्मानमावृणोति अहङ्कारः। आदित्यवत् स्वयञ्ज्योति[2]रूपस्याप्यात्मन आवरकादहङ्कारादितादात्म्याध्यासबन्धात् मोक्तुं [3]पृथग्भवितुमिच्छा निजरूपबोधान्नित्यसिद्धात्मतत्त्वयाथार्थ्यावगमादेव सा मुमुक्षुतेति आम्नाता[4]। तथा चोक्तम् ''**अहङ्कारादिदेहान्तान्बन्धानज्ञानकल्पितान्। स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता**[5]'', ''**अहङ्कारग्रहान्मुक्तः स्वरूपमुपपद्यते**[6]'' इति च ॥११॥

एवमधिकारिविशेषणतया साधनचतुष्टयन्निरूप्य अथान्वयव्यतिरेकाभ्यां तद्वदेव पुरुषार्थसिद्धिर्नान्यस्येति। ''**तेषु हि सत्सु**[7]'' इत्यत्र भाष्यकारसम्मतिं प्रमाणयति — त्यक्त्वेति।

**त्यक्त्वा साधनसञ्चयं न हि भवेत्साध्यप्रबोधो नृणां**
**तस्मात्साधनशालिनामिह भवेद्ब्रह्मात्मबोधोदयः।**
**प्रत्यग्रस्य हि साधकस्य न भवेत्स्याच्चेत्क्वचित्कस्यचि-**
**ज्जन्मस्तोमशतैः कृतेन तपसेत्येवं सतां निश्चयः ॥१२॥**

---

१. Gr- ''विरागिणा'' इति पाठः।
२. ''...ज्योतीरूप...'' इति पाठः।
३. Gr- ''पृथगभवि...'' इति पाठः।
४. Gr- ''आम्नातम्'' इति पाठः।
५. वि.चू. २८
६. वि.चू. ३०१
७. ब्र.सू.शां.भा. १.१.१

पूर्वोक्तलक्षणं साधनजातं विहाय गुरूपसदनपूर्वककृत्स्नोपनिषत्तात्पर्य-श्रवणाद्यावृत्तिं[१] विना ब्रा(ब्र?)ह्मात्म्यैक्यावगतिर्न भवेत्। यस्माद्भाष्यकृद्भिः ''**तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वञ्च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुञ्च न विपर्यये**[२]'' इति। तस्मात् साधनशालिनामेव मुमुक्षूणां ब्रह्मेवाहमात्मा न संसारीति ज्ञानोत्पत्तिः स्यात्।

ननु लोकवेदयोः क्वचिदकृतविचाराणामपि केषाञ्चित् ब्रह्मवित्त्वमवगम्यते। ''**गर्भ एवैतच्छयानो वामदेव एवमुवाच**[३]'' इत्यादि वेदे लोके च ज्ञानसम्बन्धादीनामित्यत्राह — प्रत्यग्रस्य नवीनस्य साधकस्याभ्यासिनो न भवेत्। निष्प्रतिबन्धकब्रह्मात्मावगतिर्न स्यात्। क्वचिद्यस्य कस्यचित् चेत्स्यात् वामदेवादिवत् तज्जन्मस्तोमशतैः कृतेन तपसैव पूर्वजन्मार्जिततपोविशेषेणैव सिद्ध्यतीति सतामयं सम्प्रदायविदां निश्चयः। नात्र विवदितव्यम्। यतो ''**येषामस्ति**[४] **परिज्ञानं विनेह ज्ञानसाधनम्। कल्प्यं तत्साधनं तेषां पूर्वजन्मसु सूरिभिः**[५]'' इति वचनात्। ''**अनेकजन्मसंसिद्धः**[६]'', ''**बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते**[७]'' इत्यादिवचनेभ्यश्चेति ॥१२॥

एवं विषयप्रयोजनादिकं ससाधनमुपवर्ण्याधिकारिणा विचारस्य कर्तव्यतारूप-सम्बन्धं वक्तुकामः विशिष्टाधिकारिणं गुरूपसदनविधिं च दर्शयति —कश्चिदिति।

**कश्चित्कोटिशतेषु देहिषु नरो देहोत्थितैर्व्याधिभि-**
**र्दैवादापतितैरथाक्षजनितैर्भूतोत्थितैर्भौतिकैः ।**
**दुःखैर्नित्यसुपीडितोऽर्ककिरणैस्संतप्तकीटो यथा**
**भीतस्संसृतिमोक्षणाय चकमे प्राप्तुं स्वतत्त्वामृतम् ॥१३॥**

---

१. Gr- ''श्रवणाद्यापत्तिम्'' इति पाठः।
२. ब्र.सू.शा.भा. १-१-१ पृ. ७३
३. ऐ.उ. २-५
४. Gr- ''एषामस्त...'' इति पाठः।
५. ?
६. भ.गी. ६-४५
७. भ.गी. ७-१९



कोटिष्वसङ्ख्यातेषु देहवत्सु कश्चिदेव पुमान्। अनेन ज्ञानाधिकारी दुर्लभ इति सूचितम्। देहोत्थितैर्व्याध्यादिभिर्ज्वरादिपीडाभिः दैवाद्दिष्टात्[१] आपतितैरशनि-पातादितापैर्भूतोत्थितैः प्रेतपिशाचिकादिदुःखैर्भौतिकैः सर्पव्याघ्रचोरादिभिः दुःखैस्सन्तापैर्देहवद्भिरशक्यपरिहारैर्नित्यं सुतरां पीडितः क्लिष्टः ससाधनात्संसाराद् भीतः किं मे शरणमिति तदन्वेषी च अर्ककिरणैः शुचिसमयमध्याह्नार्कमरीचि-तप्तात्युन्नतभृगुमध्यगतकीटादिवत् स निदानसांसारिकदुःखमोक्षार्थम् आत्मतत्त्वामृतं ''**तमेव विदित्वा**[२]'' इति श्रुतिप्रदर्शितमात्मज्ञानामृतं गुरूपदेशश्रवणादिनाऽवगन्तुं प्राप्तुं चकमे प्रयत्नं कृतवान्॥१३॥

एवं विद्याधिकारिण ईश्वरप्रसादात्सद्गुरुलाभो भवतीत्यर्थसिद्धमपि ''**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्**[३]'' इत्यादिश्रुत्युपदिष्टं सम्प्रदायार्थं कथयति — एष इति।

**एषोऽधिकारी सुतदारवित्त-**
**वाञ्छा विलूयैण इवाथ जालम्।**
**यावान् समित्पाणिरशेषतत्त्व-**
**वेत्तारमेवाप गुरुं शरण्यम् ॥१४॥**

एष उक्तलक्षणोऽधिकारी मुमुक्षुः सुतदारवित्तवाञ्छाः एषणात्रयं [विलूय][४] परित्यज्य एणः मृगः जालकमिव च्छित्वाथ त्वरया यावान्सद्गुरुमन्वेषमाणः समित्पाणिः[५] समिद्भारगृहीतहस्तश्चाशेषतत्त्ववेत्तारमेव विदितवेद्यं न तु शास्त्रज्ञमात्रं गुरुं शरण्यमाप संसारभयत्रातारं प्राप्तवान्। अनेन ''**तद्विज्ञानार्थं स गुरुमेवाभि-गच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्**[६]'' इत्युक्तश्रुतितात्पर्यार्थः सङ्गृहीतः ॥१४॥

अनन्तरं तत्कृतप्रार्थनमाह — नत्वेति।

---

१. Gr- ''...अदृष्टात्'' इति पाठः।
२. श्वे.उ. ६-१५, ३-८
३. मुण्ड.उ.१-२-१२
४. Gr- ''विलूय'' इति अधिकपाठः।
५. Gr- ''समित्पाणिः'' इति न्यूनपाठः।
६. मुण्ड.उ. १-२-१२

**नत्वा तिष्ठन्स गुरुसविधे मूर्ध्नि बद्धाञ्जलिस्सन्**
**प्राह स्वामिन् ! विषयगरलै[१]र्मायिकैर्दूनदूनः[२] ।**
**च्छित्वा कोशान्हृदयमपि मे साधु शीतं विधाय**
**श्रीमन् ! बोधामृतशिशिरया मां गिरा बोधयेति ॥१५॥**

आदौ साष्टाङ्गपातं प्रणम्य स शिष्यः गुरुसविध एव मूर्ध्नि बद्धाञ्जलिरेव सन् तिष्ठन् न त्वोपविशन्वक्ष्यमाणं वाक्यमाह । स्वामिन् ! इत्यादिशिष्यकृत-सम्बोधनम् । गुरावीश्वरभावबुद्धिद्योतनार्थम् । भो देशिकेन्द्र ! अहं मायिकैः आविद्यकैः[३] अनित्याशुचिदुःखरूपैर्विषयगरलैः विषवत्तापकरैः विषयैः सांसारिकैर्दूनदूनः अतिमात्रं दुःखितः कोशैश्च पिनद्धः, अतः कोशान् आविद्यकाञ्छित्वा उपदेशवाक्यासिना विखण्डय[४] मे हृदयमन्तःकरणञ्च शीतं स्वच्छं निर्विक्षेपं विधाय बोधामृतशिशिरयाऽऽत्मज्ञानामृतशीतलधारासम्पत्त्या[५] गिरा वाण्या मां बोधय मत्स्वरूपं स्मारय । यदज्ञानादहं बद्धो दुःखितश्च तन्मोक्षार्थी भगवन्तमुपगतः तदात्मयाथार्थ्यमुपदिशेत्यर्थः ॥१५॥

''**तथाऽऽगताय**[६] **तस्मै स विद्वानुपसन्नाय सम्यक्**[७]'' इत्यादि-श्रुतिप्रदर्शितं गुरोरपि नियमविधिं दर्शयति — कमठ इति ।

**कमठझषवयांसीवादरात्स्मृत्युदीक्षा**
**च्छदयुग[८]पुटमध्यस्पर्शनैर्दीक्षयित्वा ।**
**अमुमथ गुरुराह त्वज्जनिं मार्जयिष्या-**
**म्यहमपि मम वाक्यं श्रूयते चेत्सुभक्त्या ॥१६॥**

१. Gr- ''...गरभै'' इति पाठः ।
२. Gr- ''दनेदने'' इति पाठः ।
३. Gr- ''अविद्यकैः'' इति पाठः ।
४. Gr- ''खड्गेन'' इति पाठः ।
५. Gr- ''...धारसवत्यागिरा'' इति पाठः ।
६. ''तथागतय'' इति पाठ: ।
७. मुण्ड.उ. १-२-१३
८. Gr- ''...छीदयुग...'' इति पाठः ।



कमठः कच्छपः झषो मकरः वयांसि पक्षिणः कुक्कुटाद्याः । आदरात् प्रेमविशेषात् स्मृत्या स्वयं तीरादौ स्थितोऽपि कूर्मादिः यत्र कुत्रचित् निहितापत्यः[१] संस्मरणमात्रेण वर्द्धयतीति लोकप्रसिद्धिः । उदीक्षा तिर्यङ्निपतिता दृष्टिः ।[२] मत्स्यादयस्तु स्वदृष्टिसन्निधौ चरतो[ऽ]णु(णी?)यसो बालमत्स्यान् पुनः पुनरीक्षणेन पोषयन्ति च । पक्षिणस्तु च्छदयुगपुटमध्यस्पर्शनेन[३] पत्रयुगलमध्यालिङ्गनेन स्वं स्वं वत्सकुलं वर्द्धयन्ति तद्वत् । अयञ्च दीक्षाविशेषविधिः शिवरहस्यादौ प्रसिद्धः। आगमे च ''**दीक्षयाचार्यमूर्तिस्थ**[४]'' इत्यादिदर्शनात् । अमुमपि शिष्यं गुरुः स्मृत्या शक्तिपाताभिधया उदीक्षया चाक्षुष्या च दीक्षया स्पर्शदीक्षया चानुगृह्य । दीक्षादिविशेषस्तु साम्प्रदायिकः ''**दीक्षां मे दिश**[५] **चाक्षुषीम्**[६]'' इति शिवानन्द-लहर्याम् । स्पर्शदीक्षास्तु बहुप्रकाराः । प्रह्लादोपाख्यानेऽप्युक्तम् ''**तन्मूर्ध्न्युदयात् कराम्बुजं कालाहिवित्रस्तधियां कृताभयम्**[७]'', ''**स तत्करस्पर्शयुता-खिलाशुभः सपद्यभिव्यक्तपरात्मदर्शन**[८]'' इति । एवं दीक्षाद्यनुगृहीताय शिष्यायाभयवाक्यमपि ददावित्याह — त्वज्जनिम् । तव पुनर्जननभयं मार्जयिष्यामि । त्वया चैतावत् कर्तव्यमित्याह । मम वाक्यं सुभक्त्या जिज्ञासुना त्वया [९]कुतर्कशङ्काद्यभावेन श्रूयते चेच्छ्रुत्वा चावधार्यते चेत्तदेवालमित्यर्थः । ''**मुक्तिदा गुरुवागेका**[१०]'' इति वचनाच्च ॥१६॥

एवं गुरुवाक्यं श्रुतवतः शिष्यस्यानन्दाविर्भावि[११]विज्ञापनञ्चाह — संलग्नेदति ।

१. Gr- ''निहितं वत्सम्'' इति पाठः ।
२. Gr- ''तिर्यङ्नपातिता...'' इति पाठः ।
३. Gr- ''...स्पुटनेन'' इति पाठः ।
४. ?
५. Gr- ''चाक्षुर्षीं सकुरणा'' इति पाठः ।
६. शि.ल. २९ (?)
७. भा.पु. ७-९-५ उत्तरार्धः (श्रीमद्भागवतपुराणे ''तच्छीर्ष्ण्यदधात्कराम्बुजं...'' इत्यपि पाठः उपलभ्यते । पृ. ३३८)
८. भा.पु. ७-९-६ पूर्वार्धः ।
९. Gr- ''कुतर्क्याद्य...'' इति पाठः ।
१०. ?
११. Gr- ''...भाव...'' इति पाठः ।

**संलग्नघोरभवरोगनिवृत्त्युपायं**
**वक्तर्यथो गुरुवरेऽमृतमग्न[1]वत्सः ।**
**[2]आर्द्राङ्गकोऽक्षिविगलत्सुखवारिपूर्णः**
**प्राह प्रणम्य पुनरेव विनीतगात्रः ॥१७॥**

संलग्नोऽविद्यया संरूढः घोरो ज्ञानमन्तरा निवार्यो भवरोगः जननमरणादि-दुःखप्रदो व्याधिः तन्निवृत्त्युपायं वेदान्तश्रवणाद्यावृत्तिरूपं निवृत्तिसाधनं गुरुवरे वक्तरि[3] । अथ तदानीममृतमग्नवद्[4] ग्रीष्मतापितः जाह्नवीह्रदं प्राप्तश्च पुरुषः यथा तद्वदार्द्राङ्गकः शीतीकृतसर्वगात्रः। यथा च लोके आर्तानाममृतसेकेन झटित्येव तन्निवृत्तिः । यथा [5]वार्ककिरणतप्तानां ह्रदप्रवेशः तदाध्यात्मिकादितापपीडितानां सद्गुरुवागमृतसेवैव तन्निवृत्तिकारणमिति । तथा चोक्तम् ''**ब्रह्मानन्दरसानुभूति-कलितैः**[6]'' इत्यादिना । अक्षिभ्यां दृग्भ्यां विगलन् च्यवन्[7] सुखवारिपूरः आनन्दजलप्रवाहो यस्य तथा च सन् पुनस्तं नमस्कृत्य विनीतगात्र एव कारुण्यात् प्रसन्नोऽयं गुरुरिति ज्ञात्वानन्तरमाह विज्ञापितवान् । ''**प्रसन्नं तमनुप्राप्य पृच्छेद् ज्ञातव्यमात्मनः**[8]'' इति वचनात् ॥१७॥

तमेव प्रश्नं दर्शयति — त्वद्वाक्येति।

**त्वद्वाक्यश्रवणाक्षमोऽपि भगवन् ! कारुण्यदृष्ट्या विभो !**
**स्वाधीनं प्रविधातुमत्र किल मां को वा प्रयासस्तव ।**
**त्वज्जन्मक्षतयेऽस्त्युपायमिति यन्मां प्रत्यवोचः पुरा**
**तत्स्वामिन् ! सपदि प्रदर्श्य कृपया मां रक्ष रक्षेति च ॥१८॥**

---

१. Gr- ''...मश्न'' इति पाठः ।
२. Gr- ''...आर्द्राङ्गकोक्षविगल'' इति पाठः ।
३. Gr- ''गुरुवरो वक्ति'' इति पाठः ।
४. Gr- ''अमृतमश्नवत्'' इति पाठः ।
५. Gr- ''चार्क...'' इति पाठः ।
६. वि.चू. ४१
७. Gr- ''श्रवन्'' इति पाठः ।
८. वि.चू. ३६



भगवन्नित्यादि सम्बोधनं गुरोः[1] सर्वज्ञसर्वशक्तिताख्यापनार्थम्[2]। तथा चोक्तम् ''**यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ । मर्त्यबुद्धिः श्रुतं[3] तस्य सर्वं कुञ्जरशौचवत्**[4]'' इति । त्वद्वाक्यवश्रवणाक्षमोऽपि त्वदुपदिष्टपदवाक्यार्थश्रवण-मननाद्यत्य[य]मर्थोऽपि यतस्त्वामुपागतः अत्रातो मां स्वाधीनं भवदधीनं भवदीयशक्तिपातेन तदधिकारयोग्यं प्रविधातुं तव को वा प्रयासः । त्वज्जन्मक्षतये जन्मेत्युपलक्षणत्वाज्जन्मजरादिदुःखदोषनिवृत्तये कश्चनोपायऽस्तीति यद्यतो माम् अनुग्राह्य प्रत्यवोचः प्रत्युक्तवानसि । तत्साधनं सपदि तदेतदिति प्रदर्श्य । तच्च कृपया न तु प्रेरणया मां चानन्यशरणं शरणागतञ्च रक्ष रक्ष । आदरे वीप्सा।

गुरोरुपदेशारम्भं दर्शयति — प्रत्येति ।

**प्रत्याहृताक्षनिचयं परमप्रशान्तं**
**योग्योऽयमित्यथ गुरुः प्रणिधाय चित्ते ।**
**ब्रह्मीविधातुमपि भृङ्गककीटवत्तं**
**श्रोतारमाह कृपया परमार्थतत्त्वम्[5] ॥१९॥**

अथ शिष्य[6]कृतसविनयप्रार्थनानन्तरं गुरुरपि योग्योऽयं शिष्यः ब्रह्मविद्यामृत-निक्षेपपात्रमिति मनसि विधाय तञ्च प्रत्याहृताः विषयप्रावीण्यं[7] विहायात्मवश्य-तामापादिताः अक्षनिचयाः इन्द्रियवर्गा येनात एव परमप्रशान्तं शान्त्यादिगुणवन्तमेनं भृङ्गककीटवत् भ्रमरकीटन्यायेन श्रोतारं चेतनं ब्रह्मीविधातुम् अब्रह्मत्वभ्रमं निवारयितुं न त्वपूर्वं विधातुं ''**ब्रह्मैव सन्**[8]'' इति श्रुतिविरोधात् । परमार्थतत्त्वं परमश्वासावर्थः[9],

---

१. Gr- ''गुरोः'' इति न्यूनपाठः ।
२. ''...ख्यापनार्थः'' इति पाठः । ग्रन्थलिपौ मातृकायां तु ''..पनार्थम्'' इत्येव पाठः ।
३. Gr- ''श्रुता'' इति पाठः ।
४. भा.पु. ७-१५-२६ (श्रीमद्भागवतपुराणे ''मर्त्यासद्धीः श्रुतं तस्य...'' इत्यपि पाठः उपलभ्यते । पृ. ३५४ )
५. Gr- ''परमात्मतत्त्वम्'' इति पाठः ।
६. ''शिष्ये'' इति पाठः । Gr- अत्र तु ''शिष्य'' इत्येव पाठः।
७. Gr- ''प्रापकम्'' इति पाठः ।
८. बृह.उ. ४-४-७
९. Gr- ''सावर्थश्च'' इति पाठः ।

स एव तत्त्वं मोक्षसाधनमात्मतत्त्वज्ञानमुपदिष्टवान् ''**तत्त्वमसि**[१]'' इत्यादिश्रुतिभिरिति। यद्वा परमात्मतत्त्वमिति पाठः। आत्मतत्त्वं प्रत्यक्चैतन्यमेव परं ब्रह्माखण्डानन्दादिलक्षणं तदेव तत्त्वं न ततोऽन्य इति ''**अयमात्मा ब्रह्म**[२]'' इति श्रुतेः ॥१९॥

तद्विशेषं दर्शयति — वत्सेति।

**वत्सायाह्यथि मामक[३] श्रृणु परब्रह्मैक्यबोधोज्झिता[४]**
**ये मर्त्याः पुनरेव जन्म च समेत्याशु भ्रमन्त्यातुराः।**
**ते चक्रानिलधूतघासतुलिताः तत्कालवेगादध[५]-**
**श्चोर्ध्वं यावदहं परश्शिव इति ज्ञानं न विन्दन्त्यमी ॥२०॥**

वत्सेत्यादि सादरसम्बोधनं गुरोः[६] कारुणिकत्वं गुरोर्विशेषणमिति गम्यते। भोः शिष्य ! वक्ष्यमाणं शृणु। परब्रह्मैक्यबोधोज्झिताः[७] परस्य देहेन्द्रियसङ्घाताद् विवेचितस्य चिद्धातोरात्मनः ब्रह्मणः तत्पदलक्षितस्य परमात्मनस्तादात्म्यज्ञानहीना ये जना मर्त्या मरणधर्मिणः जन्म च समेत्याशु घटीयन्त्रवज्जन्ममरणाभ्यामातुराः परिभ्रमन्ति, न कदापि मुच्यन्ते। तत्रायं दृष्टान्तः। चक्रानिलेन चक्रवातेन धूतघासेन बहुधा भ्रामयित्वा परित्यक्तपलालादिकल्प[८]कालवेगाच्च दुस्तरादधश्चोर्ध्वञ्च यान्ति। यावता कालेनाहं प्रत्यगात्मैव न संसारी परः शिवः स्वप्रकाशचिद्रूपं परं ब्रह्मेति गुरूपदेशश्रवणादिना नैव विन्दन्ति न लभन्ते। ''**तरति शोकमात्मवित्**[९]'' इत्यादिश्रुतेश्च ॥२०॥

सामान्यतोपदिष्टमर्थं विशेषतोऽप्यवधारयति — स्वश्चेति।

---

१. छा.उ. ६-८-७, ६-१६
२. बृह.उ. २-५-१९
३. Gr- ''मामकः'' इति पाठः।
४. Gr- ''...जिता'' इति पाठः।
५. Gr- ''...वेगादय'' इति पाठः।
६. Gr- ''गुरुराह'' इति पाठः।
७. Gr- ''बोधोज्झिता'' इति पाठः।
८. Gr- ''...कल्पाः'' इति पाठः।
९. छा.उ. ७-१-३



**स्वश्च स्वाधारमीशं भुवि विबुधवरो वेत्ति चेत्स स्वयं स्याद्**
**भूत्वा ब्रह्मैव तिष्ठन्यदि जनिमृतितो मुच्यते तत्क्षणेन।**
**वेत्सि त्वं त्वां सुपूर्णं न हि तव विहतिः कल्पकालेऽपि नूनं**
**यस्मान्मामेत्य[१] भक्त्यां कृतबहुविनयः पृष्टवन्तं[२] मयोक्तम् ॥२१॥**

भुवि मनुष्यलोके यो वा को वा विबुधवरः सन् उत्तमविवेकी मुमुक्षुः सन् स्वं स्वयमर्थं कूटस्थमात्मानं स्वाधारमीशं च शोधिततदर्थमखण्डानन्दलक्षणं सकलविकल्पाधिष्ठानं परमात्मानञ्च महावाक्यतदर्थश्रवणाद्युपायेन अहमेव ब्रह्मेति वेत्ति चेत्साक्षादवगच्छति। तदवगत्या भ्रमकारणाविद्याया अपोदितत्वात्[३], भूयः स्वयं ब्रह्मैव तिष्ठन्देहेन्द्रियादिसङ्घातादिधर्मानात्मत्वेन वा तदीयत्वेन वानुसन्दधानः तत्क्षणाज्जन्मादिबन्धान्मुच्यते। ''**ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैः**[४] **जन्ममृत्युप्रहाणिः**[५]'' इति श्रुतेः। अतो हेतोः त्वं च प्रष्टा त्वामेवात्मतत्त्वं सुपूर्णं त्रिविधपरिच्छेदहीनभूमरूपं जानासि चेद्दार्ढ्यत्वात्पूर्वोक्तस्य सामान्यरूपत्वाद्वा न दोषः। न हि विहतिर्विनष्टिस्तव भवति। कल्पकालेऽपि सर्गप्रलययोरपि नूनमेतन्निश्चितमवगम्यते। त्वञ्च यस्मान्मामेत्य भक्त्या पृष्टवान्। अत इदमित्थं परिज्ञानमेव मोक्षसाधनं मुमुक्षोरिति मयाप्युक्तमिति भावः ॥२१॥

तत्र सन्दिहानः शिष्यः पृच्छतीत्याह — मामिति।

**मां विज्ञाय जडं गुरो ! हृदि भवानेतद्वचः प्रोक्तवान्**
**सर्वे ज्ञातनिजस्वरूपगतयो लोके भवन्त्यातुराः।**
**उत्पत्तिक्षयशालिनः कथमहो निश्चित्य तत्त्वं मम**
**ब्रूहि त्वत्पदपङ्कजं गतवतां भूयो न दुःखं क्वचित् ॥२२॥**

हे गुरो देशिकेन्द्र ! मां जडम् अत्यन्तमपण्डितमत्र भवान् हृदि मत्वा एवद्वचः उक्तलक्षणं वाक्यमुक्तवानिति मे भाति। नाहमत्र कारणं जाने।

---

१. Gr- ''मामेव'' इति।
२. Gr- ''पृष्टवान् तम्'' इति।
३. Gr- ''अपोहितत्वात्'' इति।
४. Gr- ''क्लीबैः'' इति।
५. श्वे.उ. १-११

तथाऽऽत्मापरिज्ञानं चेत् सकलदुःखनिदानं ज्ञातनिजस्वरूपगतयोऽपि विज्ञात-ब्राह्मणत्वादिविभवा अपि लोके आतुरा एव भवन्ति। तापत्रयाभिभूता वर्तन्ते। उत्पत्तिक्षयशालिनो जन्ममरणादिविकारवन्तः कथं दृश्यन्ते? कथमेतद्विपर्ययः? यतस्तन्निर्णयाय भगवन्तमहमुपगतः। त्वत्पादपङ्कजमुपगता न भूयः पुनरपि संशयादिजातदुःखमनुभवेयुः। अयमभिप्रायः आत्मादिपदार्थमेव[1] तत्त्वतो न जाने। तत्पूर्वकत्वाद्वाक्यार्थावगमस्य कथं चाहं भगवदुक्तं महावाक्यार्थमवगच्छामि। अत्र शास्त्रकारा अपि विप्रत्तिपन्ना भवेयुरेव। दुर्विज्ञेयत्वाच्च वस्तुनो यथा मे सम्यक् ज्ञानमुदयात्[2] तथा विविच्य उपदेशः करुणया विधेय इति ॥२२॥

आत्मानात्मविवेकविलसितोऽयं भ्रम इति गुरुर्मनसि निधाय तद्विवेकं वक्तुकामस्तद्वाक्यम् अनुवदति — अयमिति।

**अयं देहो देह्यप्ययमिति यथार्थाद्विदितवान्**
**नरो यो वा लोके स तु भवति बुद्धात्मविभवः।**
**गुराविथ्थं वाचि स्वयमथ जगादैष वपुषो**
**निजात्स्थूलात्कोऽस्तीत्ययमपि जहासोरुविमनाः ॥२३॥**

अयं घटादिवत्प्रत्यक्षमुपलभ्यमानः देहः उपचयादिधर्मवत्त्वादनात्मा। अयं च देही प्रत्यक्चेतनः अस्मदर्थ इति यथार्थाद्वस्त्ववगत्या[3] यो वा को वा मनुजो विदितवान् स एव बुद्धात्मविभवः, न तु ब्राह्मणत्वादिज्ञानवान्। ''**क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तद् ज्ञानं मतं मम**[4]'' इति भगवद्वचनाच्च। इत्थं वक्तरि गुरौ अथ तद्वाक्यसारमपर्यालोच्य तदर्थमजानन् शिष्यः सम्यग्ज्ञानार्थं जगाद —निजादस्मात् स्थूलाच्च देहाद्विलक्षणः कोऽन्योऽस्ति? अयश्च गुरुस्तच्छ्रुत्वा स्वप्रकाशेप्यात्मनि विप्रत्ति[5]पत्तिर्लोकस्येति जहास। कथमेनं बोधयामीति किञ्चिद्विमना इव बभूवेति यावत् ॥२३॥

---

१. Gr- ''आत्मादिपदवाक्यमेव'' इति पाठः।
२. Gr- ''ज्ञानमुदियात्'' इति।
३. Gr- ''...वस्तुगत्या'' इति।
४. भ.गी. १३-२
५. क-''विवृति'' इति पाठान्तरम्।



तर्ह्युपेक्षैव कार्येत्याशङ्क्य ततः परमकृपालुत्वव्याहतिरेव भवेदिति तद्वाक्यमनूद्य देहाद्यात्मत्वभ्रमं परिहरन् तत्त्वमुपदिशति गुरुः — देहादिति।

**देहादन्यो नास्ति देहीति चेत्त्वं**
**स्वप्ने को वा वेत्ति सर्वं विकारम्।**
**सुप्तौ को वा शून्यवेत्ता प्रबोधे**
**गृह्णात्यक्षैर्दृश्यजातं वदस्व ॥२४॥**

देहादुपचयादिधर्मकादस्माच्छरीरादन्यो विलक्षणः देही। देहादिपञ्जराध्यक्षः क्षेत्रज्ञो नाम कश्चन पुरुषो नास्तीति चेद्ब्रूषे तर्हि स्वप्ने ''**जाग्रत्संस्कारजनितः**[1] **प्रत्ययः सविषयः स्वप्नः**[2]'' इत्युक्तलक्षणे स.....[सन्ध्ये?] स्थाने सर्वं विकारं गिरिनदीसमुद्रादिरूपं विषयजातं को वेत्ति? अन्यस्य वेदितुरभावात्। ''**उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि**[3] **पश्यन्**[4]'' इत्यादिश्रुत्युक्तत्वाच्च को वेत्तीत्याक्षेपो[5] देहात्मवादो निरस्तः।

किञ्च सुषुप्तौ सम्प्रसादावस्थायां ''**बुद्धेः कारणात्मनाऽवस्थानं सुषुप्तिः**[6]'' इति उक्तलक्षणावस्थायां ज्ञानसाधनानां करणानां विलयदर्शनात्तदानीं शून्यवेत्ताऽभावप्रत्ययद्रष्टा को वा? न किञ्चिदवेदिषमिति स्मृत्यन्यथानुपपत्त्या तदनुभवोऽस्तीति गम्यते।[7]स कः स्यादिति पर्यालोच्य वदस्व। अयमभिप्रायः त्वदभिमतस्य देहरूपस्य करणरूपस्य कर्तृरूपस्य वाऽऽत्मनस्तदानीमदर्शनात् सकर्तृकस्यावस्थात्रयव्यवहारस्यारोपितत्वमेव। निरधिष्ठानभ्रमस्य निरवधिकबाधस्य चानुपलम्भात्तदधिष्ठानावधितया तत्सर्वप्रत्ययदर्शी समः कूटस्थ एक आत्माऽस्ती-

---

१. ''जागरितसंस्कारजः'' शाङ्करग्रन्थावल्याम् असौ पाठः उपलभ्यते।
२. पं.क. २
३. ''...भयं नि'' इति पाठः। ग्रन्थलिपौ मातृकायां तु ''भयानि'' इति पाठः। उपनिषत्सङ्ग्रहे तु ''...जक्षदुतेवापि भयानि पश्यन्'' इति पाठ उपलभ्यते। पृ. ३२१)
४. बृह.उ. ४-३-१३
५. Gr- ''...याक्षेपोक्त्या'' इति।
६. पं.क. ५
७. Gr- ''तस्याप्यनुभवित्रपेक्षत्वात् कश्चिदनुभवितापि अस्तीति गम्यते'' इति अधिकः पाठः।

त्यभ्युपगन्तव्यः । स एवास्मदर्थ इति । किञ्च प्रबोधेऽपि[१] जाग्रदवसरे चक्षुरादिकरणजातैः शब्दादिविषयजातं गृह्णात्यनुभवति । ''**इन्द्रियैरर्थोपलब्धिर्जागरणम्**[२]'' इत्युक्तत्वात् । दृश्यभूतावस्थातत्साक्षिणोर्विवेकज्ञानं सम्यक् ज्ञानमिति तात्पर्यार्थः ॥२४॥

एवमाक्षेपमिषेण दृग्दृश्यविवेकसर्वस्वमुपदिष्टमपि क्रमेण तद्विज्ञातुं शिष्यो यथामति पृच्छति — जाग्रदिति।

**जाग्रत्काले सकलविषयानक्षजातैर्हि जाने**
**स्वप्ने पश्याम्यहमपि तथा सुप्तिकाले न किञ्चित् ।**
**जानाम्येवं प्रतिदिनमथाप्यन्तरं तन्न जाने**
**किञ्चिद्धातं किल सपदि मे ब्रूहि तत्त्वं महात्मन् ! ॥२५॥**

भो महात्मन् देशिकेन्द्र ! जाग्रदवस्थायां चक्षुरादिकरणकलापैः[३] रूपादिविषयान् जाने । स्वप्नेऽपि सर्वं विषयं पश्यामि । सुषुप्तौ न किमपि जानामि । इत्थमेव प्रतिदिनमनुभवामि स्मरामि च । तत्तन्मध्ये किमपि वस्तु सर्वावभासकं[४] स्थायि सामान्यतो भाति । तद्विशेषावगमो न मेऽस्ति अतस्त्वमेव तत्त्वं यत्सत्ताप्रकाशानुविद्धं सर्वं भाति तदेतदिति करतलामलकवद्यथाहमवगच्छामि तथा मे कथयतु भवानित्यर्थः ॥२५॥

एवं प्रार्थितो गुरुरपि ''**अध्यारोपापवादाभ्यां ज्ञातव्यस्तत्त्वनिर्णयः**[५]'' इत्युक्तन्यायमनुसृत्य सदृष्टान्तं वक्तुमपक्रान्तवानित्याह — लोक इति।

**लोके तारं प्रदर्श्य प्रकटमथ जनोऽरुन्धतीं दर्शयिष्यन्**
**शाखामुच्चैः प्रदर्श्य प्रथितमुडु ततश्चन्द्रिकां वा यथेह ।**
**स्थूलं सम्यक्प्रबोध्य प्रथममतितरां सूक्ष्ममाकाशतो यत्**
**पश्चाद् ब्रह्मस्वरूपं वरगुरुरभयं बोद्धुमैच्छत्क्रमेण ॥२६॥**

---

१. Gr- ''प्रबोधेति'' इति ।
२. पं.क. १ (शाङ्करग्रन्थावल्यां ''...जागरितम्'' इति पाठः उपलभ्यते ।)
३. ''...कलापै'' इति पाठः ।
४. Gr- ''किमपि वस्तु सर्वावभासकम्'' इति न्यूनपाठः ।
५. भ.गी.शां.भा. १३-१३ ''अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चयते'' इति पाठो दृश्यते । अत्रापि अयमेव पाठः स्यादि इति मे मतिः ।



लोके भुवि जनः आप्तादिः कस्यचित्कृतेऽरुन्धतीं तन्नामकां प्रसिद्धां तारां दर्शयितुमिच्छन्प्रथमं प्रकटं प्रकाशमानम् उडुतारकं प्रदर्श्यारुन्धतीति बोधयित्वा तत्प्रत्याख्यायाथ पश्चान्मुख्यामेवारुन्धतीं ग्राहयति । यथा च चन्द्रिकां चन्द्रलेखां दिदर्शयिषुरपूर्वमुच्चैः शाखां दर्शयित्वा तन्मतो वा उडुगणं चन्द्रं च ग्राहयति तथा स्थूलं शरीरं पूर्वं प्रबोध्य पञ्चीकरणादिना तदुत्पत्तिप्रकारं सम्यग्विस्पष्टं बोधयित्वा अतितरां चाकाशतोऽपि सूक्ष्ममपरिच्छिन्नं ब्रह्मस्वरूपमतं निरसनविधिना बोद्धुं तज्ज्ञानेनाभयं दर्शयितुं जनकादेः याज्ञवल्क्याषदिवदचिन्तयत् ॥२६॥

प्रतिज्ञातमध्यारोपादिकं सप्रयोजनं वक्तुमुपक्रमते — अध्येति ।

**अध्यारोपान्मृषोत्थाद्भवति खलु नृणां बन्धनं चापवादान्**
**मोक्षो भूयाद्बुधानामिति खलु विदितो निर्णयः पूर्विकानाम् ।**
**तत्रारोपं शृणु त्वं जडविषयमिमं मोक्तुमत्यन्तबन्धं**
**पश्चाद्वक्ष्येऽपवादं परिचितिसुखतः स्थातुमानन्दसीम्नि ॥२७॥**

अध्यारोपाद् अतस्मिन् तद्बुद्धिलक्षणाध्यासान्मृषोत्थादिति हेतूक्तिः । मिथ्याज्ञानविलसितान् नृणां संसारिणां बन्धनम् अहं ममेत्यादिप्रत्ययो जायते । तदपवादाच्च बन्धनात् बुधानां ब्रह्मविदां स्वस्वरूपावस्थानलक्षणो मोक्षश्च भवति । पूर्वाचार्याणां साम्प्रदायिकोऽयं निर्णयः । तयोश्च मध्येऽत्यन्तबन्धं सर्वात्मना बन्धहेतुम् आरोपञ्च शृणु । वक्ष्यमाणमिमञ्च जडविषयमनात्मविषयं बन्धं मोक्तुं त्यक्तुं पश्चात्तदध्यासवर्णनानन्तरम् अपवादञ्च वक्ष्ये ।

यद्वा जडविषयं चित्सङ्घातगोचरं बन्धं मोक्तुम् आविद्यकोऽयं बन्धः, न तात्त्विक इति ज्ञानात्परित्यक्तुमिति परिचितिपरिपूर्णचिद्रूपे आनन्दसीम्नि भूमानन्दलक्षणे स्वमहिम्नि स्थातुं सुखेनावस्थातुमपवादं वक्ष्यामीति । यद्वा परा देहेन्द्रियादिभ्यो विलक्षणा या चितिः चेतनधातुः प्रत्यगात्मा सैव सुखं परप्रेमास्पदत्वात्तदात्मनाऽवस्थातुम् अपवादमध्यासनिषेधोपायं च वक्ष्यामीति तात्पर्यार्थः ॥२७॥

नन्वध्यासे वादिविप्रतिपत्तेः कथं लक्षणसिद्धिरित्याशङ्क्य सदृष्टान्तमध्या-[स]सामान्यलक्षणं दर्शयति — अध्यारोप इति ।

**अध्यारोपः कश्चेदन्यस्मिन्नन्यताभ्रान्तिः ।**
**सर्पः स्त्रज्यर्कोस्त्रे तोयं स्थाणौ च चोरताधिषणा ॥२८॥**

अध्यारोपः कः ? किं लक्षणकः ? किं प्रमाणकश्चेति चेच्छृणु । अन्यस्मिन्नतस्मिन् अन्यथाबुद्धिः । तथा चोक्तम् ''**अध्यासो नाम अतस्मिन् तद्बुद्धिः**[1]'' इति । रामगीतायामप्युक्तम् ''**यदन्यदन्यत्र विभाव्यते भ्रमादध्यास[म्] इत्याहुरमुं विपश्चितः**[2]'' इति । स्रजि रज्वादौ सर्पोऽहिबुद्धिः । अर्कोस्त्रे आदित्यपादे तोयं जलबद्धिः । स्थाणौ चोरताबुद्धिश्चेति । च शब्दोऽनुक्तशुक्तिरजतादिद्योतनार्थः । बहुदृष्टान्तसिद्धोऽयमध्यासः । अतो लक्षणसद्भावात् ''**तथा च लोकेऽनुभवः**[3]'' इत्यादिभाष्ये । लोकानुभवादेरेव प्रमाणत्वेन गृहीतत्वादुक्ताध्याससिद्धिरिति तात्पर्यार्थः ॥२८॥

ननु सद्रूपत्वसांशत्वपराक्त्वादीनामध्यासकारणानामद्वैतात्मन्यसम्भवात् स्वप्रकाशत्वेनावरणाभावाच्च कथमध्यास इत्याशङ्क्याह — गतोपमान इति ।

**गतोपमाने सति निष्प्रपञ्चे**
**संवित्स्वरूपे च सदा[ऽ]द्वितीये ।**
**यथाम्बरे नैल्यतलादिकल्पना**
**तथा परे ब्रह्मणि विश्वकल्पना ॥२९॥**

गतोपमाने निरूपमे निष्प्रपञ्चे निर्भेदे संवित्स्वरूपे सदा भारूपे सदा त्रिष्वपि कालेषु । अद्वितीये सजातीयादिविकल्पशून्येऽपि ब्रह्मणि । अम्बरे अप्रत्यक्षेऽप्याकाशे नैल्यतलादिकल्पनेव नभ इन्द्रनीलकटाहकल्पम्, पीतं नभो मलिनमित्यादिव्यवहारवत् सति ब्रह्मणि अधिष्ठाने समेऽप्यात्मनि विश्वकल्पना वक्ष्यमाणप्रकारेण भवतीति । अतोऽधिष्ठानसामान्याऽऽरोपितविशेषज्ञानमेव मुख्यमध्यासकारणम्, न सादृश्यादिकम्, ब्राह्मण्यादिजात्याद्यध्यासे तथाऽदर्शनादिति भावः ॥२९॥

---

१. ब्र.सू.शा.भा., पृ. ४४
२. रा.गी. ३७ अत्र ''यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः'' इति पाठो दृश्यते ।
३. ब्र.सू.शा.भा., पृ. ३२



अध्यासपरम्परां वक्तुं तन्मूलभूतामवस्थामाह — यत्रेति ।

**यत्राव्यक्तेऽखिलतनुभृतो वासनाभिः प्रलीनाः**
**सुप्तौ यद्वत्प्रलयपरसीम्न्यादिहीनाः तदेव ।**
**ईशालोकाद्विगुणसमतां सन्त्यजद्व्यक्तसंज्ञां**
**गच्छत्सत्त्वं रज इति तमो नैकभेदश्च जातम् ॥३०॥**

यत्र सृष्टेः पूर्वमव्यक्तेन केनापि व्यज्यत इत्यव्यक्तं प्रकृतिः । अव्याकृतनामरूपे आदिहीना अनादिभूताः अखिलतनुभृतः सर्वे जीवाः वासनाभिः स्वस्वकर्मार्जितपूर्वपूर्वसंस्कारविशेषैः सह प्रलीना एकीभूताः । जतुपिण्डे स्वर्णरेणव इव वर्तन्ते । प्रलयपरसीम्नीति अव्यक्तविशेषणत्वात् तस्यैवं महाप्रलय इत्यादिसंज्ञा । तदेवाव्याकृतं व्याकृतनामरूपबीजं तत्त्वमीशालोकात् सर्वाधिष्ठातृपरमेशेक्षणाद् गुणसमतां सन्त्यजद् गुणसाम्यावस्थां विजहत् उच्छूनमिव बीजं व्यक्तसंज्ञां च गच्छत् सत्त्वं रजस्तम इति तद्व्यक्तीभावादेव गुणभेदः । तद्भेदान्नैकभेदं जगद्वक्ष्यमाणक्रमेण जातमुत्पन्नमिति यावत् ॥३०॥

गुणवैचित्र्यात्तद्विकारवैचित्र्यमिति वक्तुं गुणस्वभावानाह — सत्त्वमिति ।

**सत्त्वं भवति विशुद्धं रजस्तु रक्तं तमस्तु कृष्णञ्च ।**
**परिवर्तिषु चैतेषु द्वे न्यूने चैकमधिकं स्यात् ॥३१॥**

सत्त्वं सात्त्विको गुणः विशुद्धं निर्मलं स्वच्छस्वभावम् । रजस्तु कामक्रोधादिलोभमूलत्वेन रागात्मकत्वाद्रक्तस्वभावमेव । तमस्तु कृष्णमावरकम् । एतेषु गुणेषु सुखदुःखमोहाद्यात्मकेषु अङ्गाङ्गिभावपरिणतेषु द्वे न्यूने उपसर्जनीभूते एकमधिकं प्रधानञ्च भवेत् । ''**रजस्तमश्चाभिभूय सत्त्वं भवति भारत**[1]'' इत्यादि भगवद्वचनाच्च ॥३१॥

पूर्वोक्तसृष्टिप्रक्रियायां प्रकारान्तरोऽप्यस्तीति दर्शयितुं श्रौततान्त्रिकभेदेन तद्भेदमाह — अयमिति ।

**अयमिह मार्गश्चैकः स्वपरोऽव्यक्तादभून्महत्तत्त्वम् ।**
**भवति ततोऽहङ्कारः तस्मादेते गुणा जाताः ॥३२॥**

---

१. भ.गी. १४-१०

अयञ्च मार्ग इह ब्रह्मविद्यासम्प्रदाय एक एव। तत्र प्रकृतिपुरुषयोरनादित्वेन तत्कार्यमप्यनादिसिद्धमिति किल श्रौतोक्षुण्णः राजमार्गः। ''**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्**[१]''। ''**प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि। विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्**[२]'' इति श्रुतिस्मृतिवचनाच्च। अपरोक्षोऽपि कश्चिदस्ति तान्त्रिकः। तत्रायं क्रमः अव्यक्तं स्वतन्त्रं सर्वनिदानम्। तदव्यक्तात्त्रिगुणसमुदायरूपान्महत्तत्त्वं जायते। प्रकृतेराद्यः परिणामो महानित्युच्यते। ततश्चाहङ्कारः। स च वैकारिकादिभेदेन त्रिधा भिद्यते। तस्मादेते गुणाः गुणशब्ददृश्यानि तन्मात्राणि पञ्च जातानीति। तथा चोक्तम् ''**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त**[३]'' इति ॥३२॥

एवं सामान्यतो दर्शितं जगत्सर्गादिक्रमं विशेषतो दर्शयितुं कारणविशेषं कश्चिदाह — ब्रह्मेति।

**ब्रह्मच्छाया भवति हि गुणेष्वेषु सर्वेषु माया**
**सत्त्वं तत्र प्रतिफलति या हीश्वरश्चान्तरात्मा।**
**तस्योपाधिस्तदनुभविता सोऽयमीशो निमित्तं**
**सोपादानं सकलजगतामूर्णनाभिर्यथैकः ॥३३॥**

एषूक्तलक्षणेषु गुणेषु सत्त्वादिषु ब्रह्मच्छाया ब्रह्मचैतन्यप्रतिबिम्बः प्रतिफलति, कूपजल आकाशादिप्रतिबिम्बनमिव। तत्र सत्त्वं सात्त्विको गुणः सत्त्वप्रधाना शक्तिः, मायाकारणोपाधिः तस्यां यद्ब्रह्मचैतन्यानुगतिः भवति, तदाऽन्तरात्मा-ऽन्तर्यामिशब्दप्रतिपाद्यः ईश्वर इति संज्ञा भवति। प्रसिद्धश्चायमर्थ इति हि शब्देन द्योत्यते। तस्य विशुद्धसत्त्वप्रधानमायाप्रतिबिम्बितस्य तदेव सत्त्वसंज्ञा मायातत्त्वमुपाधिः। ईश्वरत्वादिसाधकः[४] आलम्बनविशेषः। ''**भविष्यति मायोपाधिर्जगद्योनिः**[५]'' इत्यादिवचनात् स एव सर्वशक्तिरीश्वरः सकलजगतां

१. श्वे.उ. ४-१०
२. भ.गी. १३-१९
३. सां.का. ३
४. ''...साधको'' इति पाठः।
५. ?



सूक्ष्मोत्पत्तिक्रमेण वक्ष्यमाणानां भूतभौतिकजगतामुपादानकारणं मृत्सुर्णम्[१] इव घटरुचकादीनां कुलाल इव निमित्तकारणञ्च। यथा च लोके एक असहाय ऊर्णनाभिर्लूताकीटः तन्तूत्पादन उभयकारणम्, तद्वत्परमेश्वरः स्वयं मायावी सर्वज्ञः सर्वशक्तिश्च सन् उभयकारणमपि भवतीत्यर्थः ॥३३॥

एवमीश्वरोपाधिकथनेन कारणसृष्टिमभिधाय जीवस्यापि कारणोपाधिं दर्शयति — अविद्येति।

**अविद्यायाः सक्ताः सकलपशवः सैव भविता**
**तदानन्दः कोशो दृढतरसुषुप्तिर्वपुरपि।**
**अमीषामज्ञानप्रचुरमथ वक्ष्ये सुमलिनाद्**
**गुणादुद्भूतं यच्छृणु तदिह भूयोऽप्यवहितः ॥३४॥**

अविद्यायाः कार्योपाधौ सक्ताः प्रतिबिम्बिताः सकलपशवः पशुरिव [२]प्रवृत्त्यादिष्वीश्वरप्रेरणं विना अस्वतन्त्रा जीवाः। जीवबहुत्वमपि स[र्वो]पाधि-प्रयुक्तम्, ''**तद्वैचित्र्यादनेकधा**[३]'' इति वचनात्। सैवाविद्या तदाऽऽनन्दः कोशः। तेषामेव जीवानामानन्दमयः कोशः, वपुश्च कारणं शरीरम्, दृढतरसुषुप्तिः सुषुप्त्यवस्था च भवति। अमीषामविद्याविशिष्टानां जीवानां सुमलिनाद् गुणात्तमसोऽज्ञानप्रचुरम् अज्ञानभूयिष्ठं यत्सूक्ष्मं शरीरं वक्ष्यमाणमुत्पन्नम्। अथ सूक्ष्मभूतोत्पत्त्यनन्तरं वक्ष्ये। यतः सूक्ष्मोत्पत्तिः सम्प्रदायोपदेशम् अन्तरा दुरूहा, अतः अवहितः समाहितः शृणु ॥३४॥

तदुत्पत्तिक्रमं दर्शयति — पत्युरिति।

**पत्युः पशूनां कृपयैव सर्व-**
**भोगार्थमज्ञानमयं तमो हि।**
**विक्षेप इत्यावरणञ्च नाम्ना**
**द्वेधा भवत्यावृतये विसृष्टयै ॥३५॥**

१. ''मृत्सुवर्ण'' इति पाठः।
२. ''प्रवर्त्या...'' इति पाठः।
३. पं.द. १-१७

पशूनां जीवानां पत्युर्नियन्तुरीश्वरस्य कृपयैव कारुण्यविलासेनैव । अदृष्टादीनां जडत्वेनाप्रधानत्वद्योतनार्थ एवकारः । सर्वभोगार्थं सर्वोपभोगसाधनसूक्ष्मदेहोत्पत्त्यर्थं पूर्वोक्तमज्ञानमयमज्ञानप्रचुरं तमः एकं नाम्ना विक्षेप इति । विक्षिपत्याकाशादिरूपेण आत्मानं परिणमयतीति वा। विक्षिप्यतेऽनेन ज्ञात्रादिरूपेणात्मेति विक्षेपः । विक्षेपशक्तिरिति आवरणश्चेति। आवृणोति आत्मानात्मनोर्भेदमित्यावरणम् । आवरणशक्तिरिति द्विधा भवति । तत्र प्रधानत्वादावृतिकार्यं पूर्वमुच्यते । आवृतय इति विसृष्ट्यै बहुविधविसर्गाय चेति। ''**विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत् । अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः। आवृणोत्यपरा शक्तिः**[१]'' इति च वचनात् ॥३५॥

किञ्च गुर्वादिहेतुत्वेनाभ्यर्हिततत्वेन विक्षेपकार्यं पूर्वं दर्शयति — शक्तिरिति ।

**शक्तिर्विक्षेपनाम्नी समभवदथ सा व्योम तस्मान्नभस्वान्**
**तस्मादग्निस्ततोऽम्भः समभवदवनिः पञ्चभूतानि तानि ।**
**नाम्ना प्रोक्तानि धीरैरिति सकलनृणां भोगलाभाय तेभ्यो**
**जातं पुर्यष्टकं तज्जगति जनिमतां लिङ्गदेहं वदन्ति ॥३६॥**

अथेश्वरेक्षणानन्तरं विक्षेपनाम्नी सैव शक्तिः व्योमशब्दतन्मात्रमभवत् । तस्मान्नभस्वान्वायुः शब्दस्पर्शगुणः । तस्माच्छब्दस्पर्शरूपगुणोऽग्निः । तदनन्तरं शब्दस्पर्शरूपरसैः चतुर्गुणा आपः । ताभ्यो भूमिः पूर्वगुणेन स्वगन्धगुणेन च पञ्चगुणा मही जाता । एतान्येव पञ्च सूक्ष्मभूतानीति नाम्ना धीरैर्धीमद्भिः प्रोक्तानि । तेभ्यस्तन्मात्रसंज्ञकेभ्यो भूतेभ्यः अपञ्चीकृतेभ्यः सकलजीवानां भोगलाभाय भोगोत्पादनाय पुर्यष्टकं तत्संज्ञं लिङ्गदेहमुत्पन्नम् । तथा चोक्तं ''**ज्ञानेन्द्रियाणि खलु पञ्च**[२]'' इत्यादि । एतच्च सर्वजीवानां साधारणं लिङ्गशरीरम् । लीनं शब्दाद्यर्थं गमयतीति वा। लिङ्ग्य[ते] गम्यते दृश्यं ब्रह्म वेति लिङ्गम्, द्रष्टृदृश्ययोर्गमश्च । एतदेवानादिजीवोपाधिरिति तात्पर्यार्थः ॥३६॥

सामान्यतो दर्शितं तदेव लिङ्गमवयवशो[३] दर्शयितुं तदुत्पत्तिहेतुसमुदायोत्पत्तिश्च

१. स.उ. १८,१९ पूर्वार्धम्
२. ?
३. ''लिङ्गमवयसो'' इति पाठः।



आह द्वाभ्याम् — भूतेष्विति ।

**भूतेषु पञ्चसु गुणत्रयमस्ति नित्यं**
**सत्त्वाद्भवन्ति खलु पञ्च मतीन्द्रियाणि ।**
**आसीन्मनश्च धिषणाश्च समष्टिसत्त्वाद्**
**एतानि सप्त खलु बोधविवर्धकानि ॥३७॥**

एतेषु पञ्चस्वपि नित्यं तदुपादानत्वेनानुगतं गुणत्रयमस्ति । तत्र सत्त्वादीश्वर-प्रेरिताद् भूतपञ्चकसंवलितात्पृथक् पञ्च मतीन्द्रियाणि श्रोत्रादीनि जातानि। समष्टिसत्त्वाच्च भूतसंवलितसत्त्वगुणसमुदायादन्तःकरणम्, तदेव करणरूपेण इदं वृत्तिरूपं मनः कर्तृरूपेणाहं वृत्तिबुद्धिश्च स्यात् । एतानि मनश्च बुद्धिश्च रूपञ्च श्रोत्रादीनीन्द्रियाणि च बोधविवर्धकानि विषयावगतिसाधनानि ॥३७॥

किञ्च — गुणादिति ।

**गुणाद्धि रजसोऽनिला खलु भवन्ति पञ्चाप्यमी**
**तथा प्रबलकर्मकाण्यपि भवन्ति चाक्षाणि हि ।**
**दशैव मिलितान्यतो भवति सप्त लिङ्गाभिधं**
**शरीरमिदमात्मना सुरनृदैत्यनिस्सौकसाम् ॥३८॥**

भूतपञ्चकसमुदायनिष्ठरजोगुणान्मुख्यप्राणो जायते । स च प्राणादिवृत्तिभेदेन पञ्चविधोऽपि सुवर्णसलिलादिवद्भवति। तथा पूर्ववत्पृथग्भूतगतरजोगुणात् प्रबलकर्मकानि कर्मप्रवणानि वागादीनि करणानि भवन्ति । एतत् सर्वं मिलित्वा लिङ्गाख्यं शरीरं भवति । तच्च ब्रह्मादिस्तम्बपर्यन्तानां प्राणिनां साधारणं शरीरम् । तथा चोक्तम् ''**पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्**[१]'' इति ॥३८॥

तत्प्रवेशतः सिद्धजीवेश्वरनामादिकं कथयति — व्यष्टिष्विति ।

१. आ.बो. १३

**व्यष्टिष्वेतासु जीवो यदि परिगतस्तैजसाख्यां विधत्ते**
**सूत्रात्मा चेत्समष्टिष्वपि भवति परस्वप्न एष द्वयोश्च।**
**प्राणव्यापारवत्त्वादपि खलु ममताहेतुतः कर्तृभावात्**
**स्यात्कोशानामिदं तत्त्रितयमिति वदन्त्यात्मशास्त्रप्रवीणाः ॥३९॥**

व्यष्टिष्वेतासु प्रत्येकं[1] भिन्नेषु सूक्ष्मशरीरेषु अनुगतोऽनुप्रविष्टो जीवः तैजसाख्यां प्रातिभासिकस्वप्नकल्पितस्तैजस इत्यादिसंज्ञां लभते। समष्टौ सूक्ष्मोपाधौ अनुगतः परः परमात्मा सूत्रात्मेति व्यवहारार्हो भवति। द्वयोर्जीवेशयोर: अस्मिन्यावदवस्थानं स्वप्नः स्वप्नावस्था। एतदेव लिङ्गं समष्टिव्यष्टिरूपं प्राणव्यापार-वत्वादुच्छ्वासादिधर्मवत्वान्ममत्वाद्यभिमानास्पदत्वात् कर्तृत्वादिव्यवहारवत्त्वाच्च। त्रयाणां कोशानां वक्ष्यमाणानां प्राणमनोविज्ञानमयानां त्रितयमपि त्रिकोशात्मकमेव लिङ्गशरीरमिति आत्मशास्त्रप्रवीणाः वेदान्तशास्त्रकुशलाः वदन्ति ॥३९॥

निराश्रयस्य लिङ्गस्य स्थित्ययोगाद्भोगायतनभूतस्थूलदेहोत्पत्तिं वक्तुमुक्तं निगमयति — एतदिति।

**एतत्सूक्ष्मशरीरजातमुदितं पश्चात्प्रवक्ष्ये शृणु**
**स्थूलारोपविधानमाश्वसुभृतां स्थूलाय भोगाय हि।**
**पञ्चीकारमतश्चकार भगवानेकः परात्मा स्वयं**
**यत्तेषां तमृते भवन्ति न हि ते भोगाश्च सूक्ष्मा तनुः ॥४०॥**

एतदपञ्चीकृतभूतकार्यत्वेन सप्तदशावयवं सूक्ष्मशरीरमुक्तम्। पश्चादनन्तरम् आश्विति। यतः वक्ष्यमाणदेहसम्बन्धं विना तदवस्थानं दुर्लक्ष्यम्, अतः असुभृतां जीवानां स्थूलाय भोगाय स्थूलदेहकल्पनाप्रकारश्च कथयामि। एकोऽसहायोऽपि परमात्मा भगवान्सर्वज्ञत्वादिसम्पन्नो महामायावी पञ्चीकारं वक्ष्यमाणरीत्या पञ्चीकरणं कृतवान्। यतस्तेषामस्वतन्त्राणां जीवानां तत्र ते स्वाधीनशक्तिकं परमेश्वरं विना ते भोगाः स्थूलशरीरग्रहणपूर्वोपभोक्तव्या विषयानुभवा न भवन्ति। सूक्ष्मा तनुश्च सूक्ष्मा दुर्लक्ष्या तनुः देहसन्ततिः नीचोत्तमादिशरीरप्राप्तिश्च न भवतीति पूर्वेण सम्बन्धः ॥४०॥

---

१. ''प्रत्येक'' इति पाठः।



पञ्चीकरणप्रक्रियां दर्शयति — कृत्वेति।

**कृत्वा पञ्चैव भूतान्यपि च दश ततः तेषु पश्चापि चत्वा-**
**र्येकं भागं विहाय स्वयमथ चतुर्षु[1] प्रायशो मेलनं यत्।**
**भागानां बुद्धिमन्तो जगति परिपठन्त्येव पञ्चीकृतिं तद्-**
**भूतग्रामः समस्तस्समभवदमुतो भोगजातानि लोकाः ॥४१॥**

पश्चापि भूतान्याकाशादीनि दशकृत्वा पृथिव्यन्तभूतपञ्चकमादौ द्विधा विभज्येत्यर्थः। तेषु द्विधा विभक्तेषु मध्ये पुनरपि एकैकं भागं चतुर्धा विभज्य तेषु तथा विभक्तेषु अर्धपञ्चकेषु स्वं स्वं भागं विहायागृहीत्वा पृथक्चतुर्थविभक्तभूतपञ्चक-भागेषु इतरभागानामेकतश्चतुर्धा विभक्तानां स्वस्वभागपरिहारेणेतरत्र संयोजनं पञ्चीकरणम्। भागस्य चतुर्धा विभक्तमेकं भागं वाय्वादिभूतेषु। एवमेव वाय्वादिविभक्तचतुर्थभागम् आकाशार्धभागेषु मेलनं तदेव बुद्धिमन्तो बुधाः पञ्चीकरणं पठन्ति। ततः समस्तश्चतुर्विधो भूतग्रामः सर्वे लोकाः, तेषां निवासस्था[ना]नि, भोगा भोगोपकरणा अन्नादयः समभवन्। पञ्चीकरणादेव हेतोः समष्टिव्यष्टिभेदभिन्नं चतुर्दशभुवनात्मकं ब्रह्माण्डम् उत्पन्नमिति तात्पर्यार्थः ॥४१॥

स्थूलशरीरप्रवेशनजीवपरयोर्नामादिप्रसिद्धिर्भवतीति दर्शयति — स्थूलेति।

**स्थूलाभिमानी खलु विश्व उच्यते**
**विराट् समष्ट्या ग्रहतः परेशः।**
**एतद्द्वयोर्जागरणश्च कोश-**
**स्त्वन्नाभिधस्थूलविसर्ग एषः ॥४२॥**

व्यष्टिस्थूलशरीराद्यभिमानी पुरुषो विश्व उच्यते। विश्वो व्यावहारिक इत्यादिसंज्ञाभिः प्रतिपाद्यते। समष्टिस्थूलाभिमानतो विराट् वैश्वानरादिसंज्ञया कथ्यते। एतच्छरीराभिमानेन तयोर्द्वयो{भि}र्यावदवस्थानं तावज्जागरणं जाग्रदवस्था भवति। यद्यपि विराडाद्यात्मनः स्वोपाधावभिमानादिकं नास्त्येव। मिथ्याज्ञानप्रयुक्ता-न्यारुत्वादेः(?) अयोगादीश्वरस्य तथापि तयोश्चैकराशित्वमप्यस्तीति भाष्यकार-

---

१. अस्मिन् श्लोके स्रग्धरावृत्तमस्ति। यत्र पञ्चमगणो यगणस्स्यात्। तस्मात् ''चतुर्षु'' इत्यत्र च्छन्दोभङ्गः सम्भाव्यते। ''तुर्'' इत्यत्र ह्रस्वो वर्ण आवश्यकः, अत्र न तथा प्रतिभाति।

सम्मतिमालम्ब्यैव युक्तमिति द्रष्टव्यम्। एतच्च शरीरमन्नमयकोशः। एष उक्तः विसर्गस्थूलः पञ्चीकृतभूतकार्यत्वेन विक्षेपशक्तेः सम्भूत इति ॥४२॥

जीवपरयोरुपाधिसाम्ये संसारित्वादिसाम्यमपि स्याद्वेति पृच्छति — उपाधिमिति।

**उपाधिमेकं वदसीशजीवयोः**
**कथं प्रभेदस्त्विति चेच्छृणुष्व तम्।**
**समष्टितो व्यष्टिवशेन कारणात्**
**क्रमेण कार्यादपि नान्यथा भवेत् ॥४३॥**

ईशजीवयोरेकमुपाधिं स्थूलरूपं सूक्ष्मरूपं कारणरूपञ्च समं चेद् ब्रवीषि कथं जीवः परतन्त्रः ईश्वरश्च स्वतन्त्र इति भेदव्यवहारः। शरीरसम्बन्धस्यान्वयव्यतिरेकाभ्यां कर्मप्रयुक्तेनेश्वरस्यापि संसारिवदनीश्वरत्वमेव स्यादिति चेच्छृणुष्व[1]। तं यथा चेश्वरोपाधिस्तस्य नाशुभं धत्ते स्वमहिमप्रतिष्ठितत्वात्समष्टितः ईश्वरोपाधेर्विश्वरूपत्वात्पृथगभिमानकारणाभावाच्च। जीवगतभेदप्रहाणाय कल्पितत्वाङ्गीकाराच्च न दोषः स्यात्। व्यष्टिवशेन व्यष्टिस्थूलशरीराद्यभिमानवशेन जीवस्यानीश्वरत्वं स्वात्मतत्त्वापरिज्ञानाद्भवति। किञ्च कारणात् कारणत्वात् चेश्वरस्य मायया सर्वं सेत्स्यति। कार्यादपि कार्योपाधिलक्षणाविद्याप्रयुक्तत्वाच्च संसारित्वस्य पारतन्त्र्यम् उपपद्यते। अन्यथोपाधिद्वयाभावे वस्तुगत्या न कोऽपि भेदव्यवहार इति ॥४३॥

उक्तमर्थं स्पष्टयितुं दृष्टान्तं वदन् भेदव्यवहारस्य लौकिकत्वं दर्शयति — वृक्ष इति।

**वृक्षो व्यष्टिः स्यादरण्यं समष्टिः**
**गेहो व्यष्टिः पत्तनं स्यात्समष्टिः।**
**देहो व्यष्टिः स्यात्प्रपञ्चः समष्टिः**
**शम्भोर्जीवस्यैष एव प्रभेदः ॥४४॥**

एकत्र वृक्षो व्यष्टिः वृक्षादिसमुदायस्थलविशेषस्यैवारण्यशब्दवाच्यत्वेन

१. पाणिनीयव्याकरणे ''श्रु-श्रवणे'' (धा.पा. ९४२) इति धातुः परस्मैपदी वर्तते। अतः प्रयोगोऽयमपाणिनीय इति भाति।



वृक्षराशिरेव समष्टिः। एकश्च देवदत्तादेर्गृहो व्यष्टिः। पत्तनं बहुजनवासयोग्यं समष्टिः। जीवस्य प्राणानां धारयितुर्देहिनो देह एक व्यष्टिः उपाधिः। ईश्वरस्य सर्वोऽपि प्रपञ्चः समष्टिरुपाधिरिति भेदः कल्पितः। ''**कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः। कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते**[1]'' इति ॥४४॥

एवमविद्यादिस्थूलशरीरान्तमारोपजातमुपवर्ण्य तदपवादं वक्तुं प्रयोजनमुक्तमर्थं निगमयति — कल्पनेति।

**कल्पनागमविभ्रमस्तव दर्शितः खलु युक्तितः**
**स्वप्न एव जगत्समस्तमितीक्षितात्र हि बोधवान्।**
**क्षिप्रमेव घनागमक्षतिकालशुद्धनभोपम-**
**स्वस्वरूपविशुद्धये[2] ह्यपवादमार्गमथो ब्रुवे ॥४५॥**

कल्पनया पूर्वपूर्वाध्यासपरम्परयाऽऽगमः आगमनं परिस्फूर्तिरुत्पत्तिर्यस्य जगद्भ्रमस्य स युक्तित उपपत्त्या दर्शितः। अत्रास्मिन्विषये मायिके समस्तं जगद्द्वैतरूपं स्वप्नः स्वप्नमायामरीच्युदकगन्धर्वनगरादिवन्मृषेति ज्ञाता स एव बोधवान् सम्यक् ज्ञानी। अतस्तथाविधबोधसिद्धये अध्यासकल्पनाहानाय च क्षिप्रं शीघ्रं च घनागमक्षत्योपलक्षितः शरत्कालेन शुद्धं[3] नभः उपमा यस्य तथाविधस्वस्वरूपविशुद्धये नित्यशुद्धबुद्धमुक्ताद्वितीयात्मलाभायापवादमार्गं कथयामीत्यर्थः ॥४५॥

सदृष्टान्तोऽपवादः कथ्यते द्वाभ्याम् — सर्पेति।

**सर्प एष न रज्जुरेव न रूप्यमेव हि शुक्तिका**
**स्थाणुरेव नरो भवेन्न हि चैवमेव गुरोर्गिरा।**
**नैव गात्रमतीन्द्रियाण्यपि नैव भूतपरम्परा**
**ब्रह्ममात्रमहं सदेत्यपवादमार्गमुशन्त्यमुम् ॥४६॥**

नायं सर्पः सम्प्रतिपन्नः किन्तु रज्जुरेव, वृथा मया भ्रान्तम्। तथा रूप्यन्न

१. शु.उ. १२
२. ''स्वस्वरूपं...'' इति पाठः।
३. ''शुद्धः'' इति पाठः।

किं तु नीलपृष्ठत्रिकोणाकारा शुक्तिरेव । न चायं चोरः किन्तु स्थाणुरेवेत्येवमादिज्ञानं यथा प्रेक्षावतां सम्यग्दर्शिनां जायते तथा श्रुतियुक्त्यनुभवैर्गुरोश्च गिरा नासि त्वं संसारी किन्तु तत्त्वमेव । त्वमेव तत् इत्येतद् गुरुबोधनेन नाहं गात्रादिकं भौतिकं कारणत्वाच्च चक्षुरादीन्द्रियाण्यपि नाहं भूतपरम्परा तत्सङ्घातो वा नाहं, किन्तु सत्त्वादिलक्षणं ब्रह्मैवाहमित्येवं ज्ञानमेवापवादमध्यासनिवृत्तिमुशन्ति ब्रह्मविदः ॥४६॥

किञ्च ।

**वस्त्रतन्तुकिरीटकुण्डलनिष्ककाञ्चनकुञ्चिका-**
**मृत्तिकावदुदीक्षितामिह चैकमेव हि वस्तुतः ।**
**कारणाद्व्यतिरिक्तमस्ति न कार्यवस्तु कदाचने-**
**त्यात्ममात्रविलोकनं त्वपवादमाहुरमुं बुधाः ॥४७॥**

पटतन्त्वोः किरीटकुण्डलनिष्ककाञ्चनवद्घटमृदोरिव च उदीक्षतां सम्यक् पश्यताम् । उपादानकारणसत्तां विना न कोऽपि विकारः पृथगस्ति । ''**वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्**[१]'' इति श्रुतेः । तद्वदिहाप्यात्मनि दार्ष्टान्तिकेऽप्येवमुपादानं परं ब्रह्म कारणं न तद्व्यतिरिक्तं किञ्चिदस्ति । ''**एकमेवाद्वयं ब्रह्म नेह नाना**[२]'' इत्यादिश्रुतिभ्यः । यतश्च कारणाद्व्यतिरिक्तं पृथग्भूतं कार्यं नाम वस्तु कदापि न भवतीत्यात्ममात्रविलोकनम् । आत्मैव ब्रह्म ''**अयमात्मा ब्रह्मैव**[३]'' इत्यवलोकनं साक्षात्कारं जाग्रद्बोधेन स्वप्नजगदपवाद-वदात्मव्यतिरिक्तद्वैतविभ्रमनिषेधमपवादमाहुर्विवेकिनः ॥४७॥

गुरुशास्त्राद्यवगमेऽपि हेतुत्वेन विक्षेपशक्तेर्बन्धमुक्तिसाम्यमस्तीति अर्हितमभ्यर्हितमिति पूर्वं दर्शितम् । इदानीन्त्वावरणशक्तिं कार्यस्वभावज्ञानेन विना तदपनयासम्भवात्तत्कार्यञ्च वक्तव्यमिति शिष्यप्रश्नमनुभाषते गुरुरित्याह — विक्षेपेति ।

१. छा.उ. ६-१-४
२. अ.उप. ६३
३. बृह.उ. २-५-१९, १-५-१९



**विक्षेपावृत्ति[१]संज्ञयोरतिजडात्सञ्जातयोस्त्वं गुणा-**
**च्छक्त्योर्वै तमसस्तु सम्भणितवान् विक्षेपशक्तेः कृतिम् ।**
**शंसत्वावरणस्य कार्यमखिलं येनैव बन्धो भवेद्**
**इत्याख्यातवति प्रभूतविनये शिष्ये गुरुः प्राह तम् ॥४८॥**

आवरणविक्षेपयोर्विशेषणं गुणात्सञ्जातयोरिति । अतिजडादित्यनेन जाड्यबहुला तमो गृह्यते । तयोश्च शक्त्योर्मध्ये विक्षेपकार्यं विकारं भूतभौतिकादि-द्वैतजातमुक्तवान् । येन च तमोविकारेणावरणेन बन्धः तत्त्वाग्रहणपूर्वकोऽन्यथाभ्रमः तस्यावरणस्याखिलं कार्यं नास्ति न भातीत्यादिव्यवहाररूपं स्वप्रकाशेऽप्यात्मवस्तुनि कथमेतदुपपद्यत इति तदुपपत्तिं च मे शंसतु भवान्। इत्येवं बहुविनयादिधर्मवति शिष्ये पृच्छति गुरुश्च सोपपत्तिकं तदुत्तरमाह उक्तवानित्यर्थः ॥४८॥

आवरणस्वभावं विशेषं च कथयति — स्वेति ।

**स्वोपमानपरमेश्वरं विना**
**ज्ञानिनं त्वसदभानरूपवत्(?)।**
**ज्ञानलोचनपिधानकारि यत्**
**प्रावृणोति सकलं तमो यथा ॥४९॥**

स्वस्य स्वयमेवोपमानान्यवस्त्वन्तरमस्तीति स्वोपमानः । स चासौ परमेश्वरश्च ''**सर्वस्य वशी सर्वस्येशानः**[२]'' इति श्रुतेः । तं स्वमहिमप्रतिष्ठितपरमात्मानं ज्ञानिनं ब्रह्मनिष्ठं च वर्जयित्वा सदिति नास्तीति । ब्रह्मेति च न भाति ब्रह्मेति च व्यवहारहेतुरसदभाने रूपे लक्षणे यस्य । किञ्च ज्ञानलोचनस्य विवेकज्ञानदृष्टेः पिधानमाच्छादनं करोतीति । तथाविधं सद्यदावरणं सकलमन्तर्बाह्यञ्चावृणोति तम इवेति यथा बाह्यं शार्वरादिकं तमः ॥४९॥

तदेव दुःखनिदानमपीति विशेषतो दाढ्र्याय दर्शयति — पूर्णस्येति ।

१. ''विक्षेपावृति...'' इति पाठः।
२. बृह.उ. ४-४-२२

**पूर्णस्य ब्रह्मणो वा बहिरपि जगतां वर्तते यो विभेदः**
**कूटस्थस्यापि चान्तर्घनतरविकृतेरस्ति यो वा विभेदः ।**
**आवृत्यैतत्समस्तं विलसति घनवद्घोररूपावृतिः सा**
**संसारव्याधिबीजं सकलजनिमतामेतदेवाहुरार्याः ॥५०॥**

पूर्णस्यापरिच्छिन्नस्य ब्रह्मणस्तत्पदार्थस्य जगतामारोपितसर्वबाह्यविकाराणाञ्च बहिर्विषये यो विभेदः पृथक्त्वमस्ति सदसत्त्वादिलक्षणम्, अन्तश्च स्थूलशरीरापेक्षया अन्तरपि कूटस्थस्य प्रत्यग्दृशः घनतरविकृतेः अनादिदृढभावनाविजृम्भिताहङ्कारादि-विकारस्य च सकार्यस्य यो भेदः वैलक्षण्यं वर्तत इति विद्वद्दृष्ट्याऽयन्निर्देशः । तदेतत्समस्तमावृत्याऽऽच्छाद्य घनवदिति दृष्टान्तोऽयम् । यथा भानुजातो मेघः तमेवाच्छादयति । यद्वा वार्षिककालीनमेघः सर्वमावृणोति । तद्वदेव घोररूपाकाल-रात्रिरिव । यद्वा घोरसंसारो रूप्यतेऽनयेति । तद्बीजभूता एषैव शक्तिः सर्वसंसार-व्याधीनां बीजं मूलमिति आर्या आहुः । सा संसारस्य कारणमित्युक्तत्वात् ॥५०॥

तत्त्वाग्रहणान्यथाग्रहणबीजभूतयोर्विक्षेपावरणशक्त्योः कार्यं श्रुतवतः शिष्यस्येयमाशङ्का स्यादिति तदनूद्य परिहरति — आधार इति ।

**आधारश्चेन्निगूढो भवति वरगुरो ! कुत्र वाऽऽरोपयोगो**
**नो चेदारोपवार्ता न हि भवति यदीत्युच्यते तच्छृणुष्व ।**
**आधारो यः समानो भवति शुभमते यो विशेषस्तयोर्वा**
**सर्वः सर्वत्र चैको भवति हि चरमः कल्पितोऽयं भ्रमेण ॥५१॥**

आधारः शुक्तिकादिर्निगूढः तिरोहितश्चेद्भवति कुत्र रजतादेरारोपो भवेत् निरधिष्ठानविभ्रमायोगात् कथं पुरुषाशयः। अधिष्ठाने सति स्फुरति वा आरोपः असत्यस्फुरति वा । आद्य आरोप एव न सिद्ध्येत् । नीलपृष्ठत्रिकोणादिरूपाधिष्ठान-वस्तुनि भासमाने विशेषतो ज्ञातत्वेन तद्विपरीतारोपो न भवेत् । द्वितीयेऽपि असत्यप्रकाशमाने सामान्यतोऽप्यज्ञातत्वेन दोषसम्प्रयोगाद्यभावादारोपवार्ताऽपि न भवेदितीमामाशङ्कां परिहर्तुमाह — शृणुष्वेति । य आधारोऽधिष्ठानमिति यावत् । स समान एव । यश्च रजतादिविशेष एव । अयमभिसन्धि — आधारमात्रन्त्वधिष्ठानं न भवति । किन्तु सविलासाविद्याविषयं वस्त्वधिष्ठानमिति सम्प्रदायः । तथा



चोक्तम् "**संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगीर्नाधारे**[१]" इति । तथा चाधिष्ठानस्य सामान्यरूपं विशेषरूपं चेति द्वैरूप्यमस्ति । तत्राधिष्ठानविशेषरूपनील-पृष्ठत्वाद्यंशमगृहीत्वा तत्सामान्यरूपमिदमंशञ्च पश्यन्निदं रजतमिति मूढो व्यवहरति । अतः स्वप्रकाशस्याप्यात्मनो न स्वरूपतोऽध्यासः । यदि तस्यापि स्वरूपतोऽध्यासः स्याच्छून्यवादप्रसङ्गश्च स्यात् । अत एव पूर्वो विज्ञाताखण्डानन्दतादिरूपः अंश एक एव । यश्च चरमो रजतादिस्तद्विशेषश्च कल्पितः । अत आत्मानात्मनोरध्यासे आत्मन्यनात्मवस्तु न स्वरूपतोऽध्यास अनात्मनि च संसर्गमात्रादिति । तथा चोक्तम् "**सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः**[२]" इति ॥५१॥

नन्वधिष्ठानसामान्यारोपितविशेषयोर्ज्ञानं यदध्यासकारणमुक्तं तद्भवतु । अन्योन्याध्यासे तु आत्मविषयविशेषज्ञानमन्तरा तस्यानात्मन्यध्यासायोगात्तस्य च पूर्वं विशेषतो ज्ञातत्वे तदज्ञानप्रयुक्तविभ्रमाद्यभावात्कथमेतदुच्यते ? कथं चादावध्यास उक्तलक्षणसिद्धिरित्याशङ्क्याह — आश्चर्यमिति ।

**आश्चर्यमेतदवनौ परमं हि साम्यम्**
**अन्तर्हितं न तु कदापि विशेषयोगात् ।**
**न ह्यावृणोत्यहमिति स्म परं स्वसाम्यं**
**किन्त्वावृणोति तम ईश्वरजीवबोधः ॥५२॥**

अवनौ भूमौ शुक्तिरजतस्थले तदाश्चर्यं प्रसिद्धम् । परमं सामान्यरूपादंशाद् भिन्नतया या समत्वेनावस्थितं शुक्तिस्वरूपाविशेषयोगात् रजतादिसंव्यवहारात् कदापि पूर्वं पश्चादपि अन्तर्हितं न भवति । तया दार्ष्टान्तिकेऽपि स्वसाम्यं सत्तासामान्यरूपं परं ब्रह्माहमिति कल्पितो रौप्यादिरिव विशेषरूपोऽहङ्कारादिर्न आवृणोति प्रत्यग्ब्रह्मणः तिरोधायकवस्त्वन्तराभावाच्च । किन्तु तमोऽज्ञानम् ईश्वरः परमात्मैव, जीवो न संसारीति यो बोध एकत्वज्ञानं तदेवावृणोति । अत एव पूर्वपूर्वभ्रमेणोत्तरोत्तरभ्रमसन्ततेरनिश्चितत्वादात्मतत्त्वापरिज्ञानात्सर्वोऽपि विभ्रमस्तत्त्व-ज्ञानाच्च मुक्तिरुपपद्यते, न शून्यताऽपि भवति । निषेधावधित्वेन ब्रह्मण एव

---
१. सं.शा. ३-२३९
२. ब्र.सू.शा.भा. पृ. १६

परिशिष्यमाणत्वादिति । तथा च श्रुतिः ''**भिद्यते हृदयग्रन्थिः**[१]'' इत्याद्या अत्र प्रमाणमित्यर्थः ॥५२॥

बहुनामरूपात्मना परिणतविक्षेपस्य दुःखनिदानत्वे वक्तव्ये कथमावरणस्य क्लेशहेतुत्वमभिहितमित्याशङ्कामनुवदन्नुत्तरमाह — कोशेति ।

**कोशाः पञ्च हि केवलं परमकं स्थानं तिरस्कुर्वते**
**जीवेशादिजगद्विकल्पजननी विक्षेपशक्तिः किल ।**
**आवृत्या ह्यथ किञ्चिदत्र विदिता शून्यं कुतोऽनर्थता**
**तस्याश्चेदिति वत्स मे कथमतस्तन्निर्णयं धारय ॥५३॥**

हेतौ कोशाः अन्नमयाद्यानन्दमयान्ता विशेषतो वक्ष्यमाणाः, ते पञ्चकमपि परमकं स सर्वान्तरतमं प्रत्यगात्मतत्त्वं तिरस्कुर्वते । अनेन विक्षेपस्याच्छादकत्वम् अभिहितम् । किञ्च जीवेशादिजगद्विकल्पजननी च विक्षेपशक्तिरेव जीवाविद्योपाध्यवच्छिन्नः विज्ञानात्मेशः मायोपाध्यवच्छिन्नः सर्वज्ञत्वादिशक्तिसम्पन्नः परमात्मा जगत्तदुभयोपाधिलक्षणं तथाविधं भेदं जनयतीति । तथा सत्यावरणशक्तिः सा शून्यमेव तमोवत्केवलं विदिता न किञ्चित्कर्तृकारयित्री वा । कुतो हेतोः तस्याः सकाशादनर्थता पुरुषार्थभङ्ग इति चेद् ब्रूषे तन्निर्णयं वक्ष्यमाणमवधारय जानीहि ॥५३॥

विक्षेपस्य श्रैष्ठ्यकारणमुच्यते — सेयमिति ।

**सेयं विक्षेपशक्तिर्बहुविधजगतः संविधात्री यदि स्यात्**
**ब्रह्माभ्यासैकभाजामपि खलु कुरुते तन्निवृत्तिं बुधानाम् ।**
**तामस्यां यामवत्यां दिवसवदपि वा वर्तते चोपकारः**
**तद्दुष्टा ह्यावृतिः सा सकलजनिमतां दुःखसंसारहेतुः ॥५४॥**

जीवेशोपाधिकजगदाकारेण विवर्तितापि विक्षेपशक्तिर्ब्रह्माभ्यासैकभाजामपि तच्चिन्तनं तत्कथनम् अन्योन्यं तत्प्रबोधनम्, ''**एतदेकपरत्वञ्च ब्रह्माभ्यासं विदुर्बुधाः**[२]'' इत्युक्तलक्षणब्रह्मविद्याभ्यासपराणां मुमुक्षूणामपि तदभ्यासपाटवेन तन्निवृत्तिं भेदभ्रमादिनिवृत्तिमपि तदनुकूलदेशकालादिरूपेण विवर्तिता(?) कुरुते ।

१. मुण्ड.उ. २-२-८
२. वे.वि. २-१०५



अतः साधारणत्वान्मोक्षोपयोगित्वमपि विद्यत इतीयान्विशेषः । दृष्टान्तश्च भवतीति तमाह — तामस्यां रात्र्यां दिवसवदुपकारः पुरुषास(?)प्रवृत्तिरूपं प्रयोजनं न विद्यते यतस्तत आवृत्तिः सैव दुष्टा । दुष्टत्वादेव सर्वप्राणिनां बहुविधदुःखभूयिष्ठसंसारोपाधिबीजश्च । तथा चोक्तम् ''**अभावना वा विपरीतभावना सम्भावना विप्रतिपत्तिरस्याः । संसर्गयुक्तं न हि मुञ्चति ध्रुवं विक्षेपशक्तिः प्रवणस्य हेतुः**[२]'' इति ॥५४॥

तदेव स्पष्टयति — अपीति ।

**अपि क्षये वा जगतां सुषुप्तौ**
**संवर्तकालेऽपि च कस्य मोक्षः ।**
**विक्षेपकार्यं किल मुक्तिबीजं**
**दुष्टा वृत्तिः संसरणैकहेतुः ॥५५॥**

जगतां भूतभौतिकविकाराणां क्षये विनाशे संवर्तकाले प्रलयसमये नैमित्तिके सुषुप्तौ च नित्यप्रलये च यद्यपि समष्टिविकारणोपाधौ बीजात्मनावस्थानं कार्यस्य प्रलये वर्तते । सुषुप्तौ चाविद्याकृतात्मनावस्थितिः । तथापि द्वैतप्रतीत्यभावाद्विक्षेपस्य विलीनत्वेन मोक्षो भवेत् । मोक्षोपायगुरुशास्त्रादेरभावाद्विक्षेपस्य बन्धकत्वे तन्निवृत्तौ तदानीं बन्धनिवृत्तिरपि भवेत् । न च भवति, तस्मादुत्थितस्य पुनस्संसारदर्शनात्, अन्वयव्यतिरेकाभ्यां विक्षेपस्य मुक्तिसाधनत्वमेष्टव्यम् । संसारस्य मुख्यं कारणन्तु आवरणमेव तन्निवृत्तौ विनष्टदिङ्मोहादिवद्द्वैतप्रतीतावपि मोक्षविरोधाभावात् परोक्षापरोक्षविद्याविनाश्यावरणमेव संसारदुःखनिदानमित्युक्तं युक्तमेवेत्यर्थः ॥५५॥

ननु सर्वद्वैतविकल्पस्याविद्यकत्वेन गुरुशास्त्रादेरपि तथात्वात् तज्जन्यमोक्षस्य कथं सत्यत्वमिति सदृष्टान्तमाशङ्क्य परिहरति — विक्षेपेति ।

**विक्षेपशक्तिपरिकल्पितमेव सर्वं**
**शुक्तिस्थरूप्यवदसत्प्रतिभाति चेत्तत् ।**
**मोक्षोप्यसत्य इति तर्हि न पुण्डरीक-**
**स्वप्नोऽपि किं वितनुते प्रतिबोधमात्रम् ॥५६॥**

२. वि.चू. ११७ (श्रीचन्द्रशेखरभारतीमहास्वामिना सम्पादितायां विवेकचूडामणौ ''संसर्गयुक्तं न विमुञ्चति...'' इति पाठः उपलभ्यते ।)

शुक्तिकारजतादिवद्विक्षेपशक्तिकल्पितं गुरुशास्त्रादिकमपि असन्मायामयमेव चेत्तर्हि तत्साधनसिद्धोऽपि मोक्षः असत्यः, जन्यत्वेन विनाश्येवेति चेन्न तथावगन्तव्यः। यथा स्वाप्नोऽपि स्वप्नविक्षेपकार्योऽपि व्याघ्रादिः प्रतिबोधमात्रं जाग्रदवगतिं न जनयति, किं परमार्थबोधमिति पाठेऽप्ययमेवार्थः। यथाऽऽचारेऽनृताक्षरादेः[1] सत्याक्षरावगतिर्दृश्यते तस्य बाधकप्रमाणाभावात् यथार्थत्वमेव न मिथ्यात्वमिति भावः ॥५६॥

ननु गुरुशास्त्रश्रवणाद्यभ्यासजन्यावगतिरविद्याविलासद्वैतभ्रमनिवर्तिका सत्या च भवतीत्युक्तम्। तथा सति तदवगतेरपि मानसप्रत्ययत्वमेव सेत्स्यति। तस्य च बन्धनिवृत्तावप्यवशिष्टत्वेन सत्यत्वे[ऽ]द्वैताभ्युपगमहानिरित्याशङ्क्याह — अय इति।[2]

**अय इव भुवने यो मार्गणं मार्गणो वा**
**मलमिव मलमेकं तद्गरं वा गरश्च।**
**मन इह परिशुद्धं नाशयित्वा मनोऽन्यत्**
**शवदहनसमिद्धन्नाशमेति स्वयञ्च ॥५७॥**

अस्मिन्भुवने प्रपञ्चे अयोऽयोविकारं लवित्रादिकम् अयः कार्ष्णायसनिर्मित-कृकचादिलक्षणं क्षपयति। यथा मार्गणं च शरदादिकम्बलतत्प्रयुक्तश्च मार्गणः क्षपयति। मलवस्त्रादिगतं मलमन्यत्क्षारगोमयादि नाशयति। गरश्च विषद्रव्यं प्रबलमन्यन्नाशयति। एवमिहापि परिशुद्धं सन्मनः रजस्तमोगुणशास्त्राचार्यप्रसाद-पूर्वकब्रह्माभ्यासपाटवेन सत्त्वोद्रेकादतिस्वच्छं मन इति मनुतेऽवगच्छत्यात्मानं परं ब्रह्मेति मनः वृत्तिज्ञानम्। अन्यच्च मनः रजस्तमोगुणतद्विकल्पितं विषयोन्मुखं नाशयित्वाऽनात्मप्रवणतरं विहाय शवदहनसमिद्वत्कुणपदाहार्थमुपयुक्तं काष्ठादितच्छान्तौ स्वयमपि अग्निना शाम्यति। निरिन्धनोऽप्यग्निरपि यथा शाम्यति तथा स्वयं च मनोजन्यमपि ब्रह्मावगतिपर्यन्तं वृत्तिज्ञानं द्वैतभ्रमं नाशयित्वा स्वयं चाद्वैतात्मस्वरूपमात्रम् अवशिष्यते। तदानीं पृथग्दर्शनाद्यभावाद् ''**यत्र त्वस्य**

१. ''यथा चरेनृताक्षरादेः'' इति पाठः।

२. इतः आरभ्य आन्तम् अग्रिमश्लोकस्य प्रथमं वाक्यम् अवतारिकायां दत्तमस्ति।



**सर्वात्मैवाभूत्तत्केन [कं] पश्येत्**[1]'' इत्यादिश्रुतेश्च। नाद्वैताभ्युपगमविरोध इति भावः ॥५७॥

एवमध्यारोपापवादवर्णनतः सिद्धमवस्थासप्तकं दर्शयितुमुपक्रमते — अवस्थेति।

**अवस्थाः सप्तैताः प्रकृतित इतः स्युर्मलवताम्**
**अबोधः पश्चादावरण इति विक्षेप इति च।**
**परोक्षप्रत्यक्षे तदनुभवितारावपगती**
**ततो दुःखध्वंसस्तदनु सुखलब्धिश्च महती ॥५८॥**

इतोऽध्यासकारणतयाभिहितायाः प्रकृतेरविद्याया हेतोर्मलवतां मलशब्दः शुभाशुभमिश्रकर्मवाची(.....[2])शाः संसारिणो जीवास्तेषाम् एवैता वक्ष्यमाणाः सप्तावस्था अनुभवविशेषाः स्युर्भवेयुः। जीवानामेवावस्था इत्यनेन नेश्वरस्य वक्ष्यमाणाऽवस्थासप्तकमित्युक्तं भवति। तत्राबोधोऽज्ञानं पूर्वं पश्चादावरणं विक्षेपश्च तृतीयावस्था परोक्षप्रत्यक्षे अवगती परोक्षज्ञानमपरोक्षज्ञानं च द्वौ(द्वे ?) तदनन्तरं दुःखनिवृत्तिः निरतिशयसुखलाभश्चेति क्रमादेता अवस्था भवन्तीति यावत् ॥५८॥

तदेवोक्तजीवावस्थासप्तकमर्थतोऽनुवर्णयति द्वाभ्याम् — ब्रह्मेति।

**ब्रह्मस्वरूपास्मरणं त्वबोधः**
**तदेव नास्तीत्युदितावृतिः सा।**
**विक्षेपनाम्नी वपुरादिभानं**
**गुरोर्गिरास्तीति परः परोक्षः ॥५९॥**

ब्रह्मस्वरूपास्मरणमहमेव परं ब्रह्मेत्यवगमाभावः अज्ञानम् ''अनादिभावत्वे सति ज्ञाननिवृत्यम्'' इत्युक्तलक्षणम्। यद्यप्यज्ञानाधीनविभागो जीवः तदुपाधिश्च अज्ञानं तत्पूर्वभावित्वेनाज्ञानस्य ब्रह्मावस्थ{ता}त्वं नैवाशङ्कितव्यम्। मामहं न जानामीत्यनुभवस्य जीव एवोपलब्धेः। तदेव सत्यादिलक्षणं प्रत्यगभिन्नं नास्ति।

२. बृह.उ. ४-५-१५ (''यत्र त्वस्य सर्वात्मैवाभूत् तत् केन कं पश्येत्'' प्रायः इत्यपि पाठः उपलभ्यते।)

१. अत्र पाठो लुप्तोऽस्ति।

यतो न भातीति व्यवहारहेतुरावृत्तिरुक्ता। वपुरादिभानं शरीराभिमानपूर्वककर्तृत्वादिप्रतीतिरेव विक्षेपः तृतीयावस्थापरः। देहेन्द्रियसङ्घातादिविलक्षणः प्रत्यगात्मा अस्तीति गुरोराचार्यस्य गिरा तत्त्वमसीत्युपदेशवाक्येन यो विश्वासपूर्वकोऽवगमः सः परोक्षो बोधः परोक्षज्ञानं सा चतुर्थी ॥५९॥

किञ्च।

**तत्त्वार्थस्य विचारणाज्जगदिदं त्यक्त्वा ह्यसत्सन्निभं**
**ब्रह्मैवाहमिति स्थितिर्हि कथिता सैवापरोक्षं बुधैः।**
**कर्तृत्वादिनिवृत्तिरेव विदितादुःखप्रहाणिश्चिराद्**
**आनन्दाप्तिरथोत्तरेव कृतकृत्यस्वरूपा हि सा ॥६०॥**

तदिति सर्वनाम सर्वात्मकं ब्रह्मोच्यते। तस्य भाव[:] प्रत्यक्ता, तत्त्वं तस्यार्थस्य उपक्रमादिभिर्लिङ्गैर्विचारणात्पुनः पुनः पर्यालोचना। इदं परिदृश्यमानं जगत्सर्वं नामरूपविकृतं स्वप्नादृष्टहस्त्यादिवदसत्सन्निभं मिथ्याकल्पम्। यद्वा असदेवेदं सत्सन्निभं सदिव प्रतीतं मृषेति त्यक्त्वा तथा चोक्तम् ''**मायामात्रमिदं द्वैतम्**[१]'' इति श्रुतिभिः। ''**अहमेव परं ब्रह्म**[२]'' इति साक्षादवगम्य स्थितिरवस्थानम् अपरोक्षज्ञानावस्था पञ्चमीति च कथिता। कर्तृत्वादिनिवृत्तिः कर्तृत्वभोक्तृत्वादिरूपविविधविक्षेपनिवृत्तिरेव दुःखनिवृत्तिः षष्ठी। चिरादभ्यासवैराग्यादिपाटवेन कृतकृत्यत्वस्वरूपं कृतं कृत्यं प्रापणीयं प्राप्तुमिति या परा सन्तुष्टिः सैवानन्दावाप्तिः सप्तम्यवस्था। एवकारतः जीवस्यावस्थान्तरं नास्तीति दर्शयति, उत्तरैव सेति ॥६०॥

मन्दबुद्ध्यारोहायोक्तमेवार्थं सदृष्टान्तं लौकिकन्यायमाश्रित्य दर्शयति — अत्रेति।

**अत्र हि दृष्टान्तोऽयं तीर्त्वा सरितश्च दर्शनास्तेषाम्।**[३]
**गणयन्स्वं मुक्त्वैको भ्रान्त्वा जानन्सुखी बभूवेति ॥६१॥**

१. माण्डू.उ. १-१७
२. तै.उ. ६-४४
३. अत्र मषीप्रसारणाद्वाक्यमिदमस्पष्टं वर्तते। प्रसङ्गानुगुणं ''दश नरास्तेषाम्'' इति पाठः स्यात् ? परमित्थं संशोधनेन च्छन्दोभङ्गः स्यात् , यतो हि अस्मिन् श्लोके गीतिः इत्याख्यं मात्रिकवृत्तमस्ति।



अत्र प्रकृते विषये अयं पूर्वाचार्यबहुमतो दृष्टान्तः। दशसङ्ख्याका नराः पुरुषाः काञ्चन सरितं तीर्त्वोत्तीर्य स्वाभिमतं देशं गन्तुं प्रस्थितेषु तेषु मध्ये एको गणकः स्वमात्मानं मुक्त्वा पूर्वं गणयन्न जानन्नेव भ्रान्त्वा भ्रमपरम्परां नद्यां ममार दशम इति परिक्लिश्य पुनराप्तवाक्येन जानन्सुखी विगतभ्रमः बभूवेति। इति शब्दो लोकशास्त्रप्रसिद्धिद्योतकः ॥६१॥

अत्रैवावस्था सप्तका विविच्य दर्शयति — भ्रमिरिति।

**भ्रमिरज्ञात्वा बोधो नास्ति न भातीति चावृत्तिः कथिता।**
**विक्षेपो घनशोकः दशमस्यास्तित्ववाक्परोक्षं हि ॥६२॥**

आत्मानं गणकमविदित्वा स कुत्रेति परिभ्रम अबोधो ज्ञेयः। स दशमो नास्ति न वर्तते। यदि स्यात्तर्हि भयान्न भातीति च व्यवहार आवरणम्। तद्धेतुकशिरस्ताडनादिदुःखानुभवो विक्षेपः। काकतालीयवदागतहितोपदेशेन दशमोऽस्ति, त्वं मा शुच इति क्लृप्तास्तित्वज्ञानमेव परोक्षापरोक्षावस्था ॥६२॥

किञ्च।

**कस्याप्युक्तिवशान्नवापि पुरुषान् सङ्ख्याय पश्चात्स्वकं**
**साक्षात्कृत्य हि दर्शनं समुदितः प्रत्यक्षबोधो बुधैः।**
**दुःखित्वादिनिवृत्तिरत्र कथिता सा[ऽ]नर्थहानिः परा**
**सङ्ख्याता हि समस्तसंशयलयादानन्दलब्धिश्चिरात् ॥६३॥**

कस्यचित्कारुणिकजनस्योक्तिवशान्नवसङ्ख्याकान्पुरुषान्सङ्ख्याय पश्चात् तदनन्तरं स्वकं स्वमात्मानं गणयितारं चेतनं साक्षात्कृत्य दर्शनमहमेव दशम इति सम्यग्ज्ञानमपरोक्षज्ञानावस्था दुःखित्वादिनिवृत्तिः। नष्टो दशम इति विभ्रमप्रयुक्तरोदनादिविक्षेपनिवृत्तिरेवानर्थहानिरिति कथिता। समस्तसंशयलयात्सर्ववृत्तिबन्धहानिवशात्परानन्दलाभः। चिरान्निर्विकल्पसमाध्यभ्यासपाटवेन पराऽन्त्या सप्तमाऽवस्था विज्ञाता विवेकिभिरिति शेषः ॥६३॥

पदार्थबोधो हि वाक्यार्थावगतेर्हेतुरिति[१] न्यायमनुसृत्य दशमपुरुषसाक्षात्कार-

१. ''...गतेरिहेति'' इति पाठः।

वच्छ्रोतुः शिष्यस्य स्वरूपसाक्षात्काराय तत्प्रश्नानुवादमुखेन महावाक्यार्थमवगमयितुम् उपक्रमते —— ददर्शेति ।

**ददर्श दशमो यथा निजतनुं पुराऽऽप्तोक्तित-**
**स्तथैव कलयाम्यहं कथय मत्स्वरूपं निजम् ।**
**इतीरयसि चेद्ब्रुवे तव हि तत्त्वमर्थं पुन-**
**र्विशोध्य परमाद्वयं ह्यसिपदेन यत्प्रोच्यते ।।६४।।**

पुरा पूर्वं यथा दृष्टान्तस्थले दशम आप्तोक्तितः हितोपदेशान्निजतनुं ददर्श । अहमेव दशमो न मत्तोऽन्य इति ज्ञातवान् तथाऽहमपि निजं मान्यं मत्स्वरूपं परं ब्रह्म यथाऽवगच्छामि तथा दर्शय । अत्रात्मनि पुरोऽस्तितत्वाभावात् उपायोपदेशम् अन्तरा न स्वमनीषिकया वेदितुं शक्य आत्मेत्यर्थः इति इत्थं कथयसि चेत्तव तुभ्यं तत्त्वमर्थं तत्त्वं पदवाक्यार्थं तादात्म्यलक्षणं ब्रुवे। यदेव तादात्म्यम् अद्वयमभिन्नं ह्यसिपदेन तत्त्वमसीति दर्शितेन प्रोच्यते । भागत्यागलक्षणया बोध्यते श्रुतिस्तत्त्वमसीत्याह —— ''**श्रोतुर्मोहापनुत्तय**[१]'' इति वचनाच्च ।।६४।।

स्वानुकूलदृष्टान्तप्रदर्शनपूर्वकं दार्ष्टान्तिकेऽपि चैतन्यचतुष्टयं प्रकृतोपयोगाय कथयति —— व्योमेति ।

**व्योमैकमेव जलदाम्बरमित्यथान्यत्**
**कुम्भाम्बरं घटजलस्थनभश्चतुर्धा ।**
**ब्रह्मैकमेव परिपूर्णमपीश्वरश्च**
**साक्षी च जीव इति नामवशाच्चतुर्धा ।।६५।।**

यथा एकमेव व्योमाम्बरं जलदाम्बरं मेघाकाशम् अन्यच्च कुम्भाम्बरं तत्स्थजलप्रतिबिम्बितत्वेन साभ्रनक्षत्रमायादिसहितं घटजलाकाशमिति चतुर्धा व्यपदिश्यते तथा एकमेव ब्रह्म चैतन्यं परिपूर्णमपि चतुर्धा भिद्यते। ईश्वरो मायोपाधिवशात् साक्षी च दृष्टत्वात् जीव इति अविद्यावशाच्चतुर्धा व्यवह्रियत इत्यर्थः ।।६५।।

यदर्थं चैतन्यभेदोऽभिहितस्तमाह —— वाच्येति ।

---

१. ? (मूलं मृग्यम्) ।



**वाच्यावीश्वरजीवकावभिहितौ तत्त्वं पदस्य क्रमात्**
**लक्ष्यं चेन्मलवर्जितः परपुमान्ब्रह्मापि मायोज्झितम् ।**
**क्षीरेष्वाज्यमुपायशालिभिरिव त्वं स्वं विजानासि चेत्**
**सङ्घातात्सुविविच्य वेदवचनैर्युक्त्या विमुक्तो भवेः ।।६६।।**

ईश्वरः सर्वज्ञत्वादिधर्मकं जगत्कारणं चैतन्यञ्च, जीवश्चाविद्याकार्योपाध्यवच्छिन्नं चैतन्यञ्च, द्वावेतौ तत्त्वं पदस्य क्रमात्पर्यायेण वाच्यौ वाच्यार्थौ कथितौ । स एव जीवो मलवर्जितो मलशब्दो व्यष्ट्युपाधिसङ्घातवाचकः शोधितं चिदात्मरूपं त्वम्पदस्य लक्ष्यम्, मायोज्झितं परित्यक्तमायासम्बन्धं चैतन्यं तत्पदस्य लक्ष्यमभिहितं श्रुतिभिराचार्यैश्च । तथा चोक्तम् —— देहेन्द्रियादिधर्मानात्मन्यारोपयन्नभेदेन कर्तृत्वाद्यभिमानी जीवः स्यात् त्वम्पदस्य वाच्योऽर्थः। देहस्य चेन्द्रियाणां साक्षी तेभ्यो विलक्षणत्वेन प्रतिभातितोऽवबोधः प्रोक्तोऽसौ त्वम्पदस्य लक्ष्योऽर्थः । वेदावसानवचसा वेद्या(?) सकलजगदुपादानं सर्वभूताद्युपेतं चैतन्यं तत्पदस्य वाच्योऽर्थः । विविधोपाधिविमुक्तं विश्वातीतं विशुद्धचिद्रूपम् अक्षरमनुभवेद्यं चैतन्यं तत्पदस्य लक्ष्योऽर्थ इति ।

ननु शास्त्रेष्वेवमभिहितमपि कथं पृथक्क्रियत इत्याशङ्क्य सदृष्टान्तमुपायं दर्शयति —— क्षीरेष्वपि । यथा लोक उपायशालिभिः क्षीरेष्वभिन्नतयाऽवस्थितम् आज्यं तञ्चनाद्युपायवद्भिः यथा पृथगुद्धृत्य गृह्यते तथा सङ्घातात् कार्यकरणरूपाद् युक्त्या वेदवचनैश्च श्रुतिप्रमाणैः तत्प्रदर्शितोपपत्त्या च विविच्य स्वमात्मानं प्रत्यञ्चं जानासि चेत्तदैव विमुक्तः समूलात्संसारादुद्गतः स्याः ।।६६।।

तद्विवेचनञ्च स्वयमेवाह —— विवेचनमिति ।

**विवेचनं वच्मि शवोपमानं**
**शरीरमात्मा न हि भौतिकत्वात् ।**
**प्राणः परात्मा न हि राजसत्वात्**
**नासौ दृतिः स्वस्य विनिर्गतोऽयम् ।।६७।।**

कुणपतुल्यमिदं शरीरं शीर्यते व्याध्यादिनेति शरीरं भौतिकत्वादेवात्मा न हि भवति। राजसत्वात् रजोगुणारब्धत्वात् अभोक्तृत्वाज्जडत्वात्प्राणोऽपि पञ्चवृत्तिको वायुविशेषः दृतिरिवात्मा न भवति ।।६७।।

यद्यपि क्रियाशक्तिप्रधानस्याप्यनात्मत्वं प्राणस्य तथापि ज्ञानशक्तिप्रधानम् अन्तःकरणमात्मा भवत्वित्याशङ्क्य तदनात्मत्वं दर्शयितुं तस्य करणत्वेन च कर्तृत्वेन चोभयविधत्वमस्तीति वदन्नानन्दमयान्तस्य सर्वविकारस्याविद्यकत्वेनात्मतां दर्शयति — मनोऽपीति ।

**मनोऽपि नात्मा करणत्वतो धीः**
**कर्तृत्वतः सत्त्वविकारहेतोः ।**
**नैवायमानन्दमयः परात्मा**
**स्वाज्ञानवृत्तौ प्रतिबिम्बितत्वात् ॥६८॥**

मनोऽपीदं वृत्तिरूपम् अन्तःकरणमप्यात्मा पृथक्चेतनो न हि भवति करणत्वादेव, क्रूरादिवत्सर्वविषयपरिच्छेदकारणं ''**यस्य चावधानानवधानाभ्यां विषयोपलब्ध्यनुपलब्धि(लब्धी?) भवतस्तन्मनः**[१]'' इति भाष्योक्तेश्च, ''**यन्मनसा न मनुते येनाहुर्मनो मतम्**[२]'', ''**मनसो मनो यत्**[३]'' इति श्रुतिभ्यश्च । अनेन ज्ञानेन्द्रियाणामप्यनात्मत्वमुक्तं वेदितव्यं, मनोवृत्तिरूपत्वाच्छ्रोत्रादिकरणानाम् । तर्हि विज्ञानमात्मा भवतु तस्य श्रुतिप्रसिद्धत्वादित्याशङ्क्याह — धीरपि विज्ञानमयः कोशः । कर्तृत्वोपाधिरूपमन्तःकरणमपि सत्त्वगुणविकारत्वादनात्मैव सुषुप्तौ विलयदर्शनात् । तर्हि सुषुप्त आनन्दमयः आत्मा भवत्वित्याशङ्क्याह — ''**अयमानन्दमयः प्रियाद्यवयवः**[४]'' इति तैत्तिरीयकश्रुत्यवगतः स्वाज्ञानवृत्तौ स्वस्वरूपभूतकूटस्थचिद्रूपाश्रयन्तद्विषयं च यदज्ञानं तदेव वृत्तिरूपा धीः । तत्र प्रतिबिम्बितत्वादेव परात्मा अन्नमयाद्यानन्दमयान्तस्याधिष्ठानभूतः परप्रेमास्पदः चैतन्यमात्रसत्तास्वलक्षणो न हि भवति । सङ्घातो ये तत्त्वाच्चेत्यर्थः ॥६८॥

एवञ्च पञ्चकोशविवेके कृते तदवधित्वेनावशिष्टः विज्ञातव्य आत्मेति तदवगमाय तल्लक्षणमाह — सच्चितदिति ।

---

१. ब्र.सू.शां.भा. २.३.३२ (सम्प्रत्युपलभ्यमानेषु ब्रह्मसूत्रशाङ्करभाष्यपाठेषु ''यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः'' इति पाठो दृश्यते ।)
२. के.उ. १-६
३. के.उ. १-२
४. ?



**सच्चित्सुखं सकलमद्वयमेकमाद्यम्**
**आत्मानमच्युतमखण्डनभःस्वरूपम् ।**
**ज्ञात्वाऽहमित्यनृतदुःखजडस्वरूपात्**
**त्वं पञ्चकोशकुहरात्परिमुक्तिमेहि ॥६९॥**

''सदबाध्यं बाध्यं मिथ्येति'' वचनात् चिच्चैतन्यं नित्यज्योतिस्स्वरूपं सुखमानन्दः सदेव चित् तदेव[१] सुखं सदित्यनृतव्यावृत्तिः चिदिति जाड्यव्यावृत्तिः सुखमिति दुःखव्यावृत्तिः । ''**मिथ्यात्वादि यदध्यस्तं ब्रह्मण्येतस्य बाधनम् । नानापदैर्विना नेति ब्रह्म तैरुपलक्ष्यते**[२]'' इति वार्तिकवचनात् । ''**सत्यं ज्ञानमनन्तं ब्रह्म**[३]'' इति श्रुतेश्च, सम्परिपूर्णं त्रिविधपरिच्छेदरहितत्वात् । अत एवाद्वयं सदन्यस्य तुच्छत्वेन शशशृङ्गवदसत्त्वात् । एकं भेदत्रयराहित्यात्, ''**एकमेवाद्वितीयं ब्रह्म**[४]'' इति श्रुतेः । अच्युतं कूटस्थचित्सदानन्दाद्वितीयस्वरूपान्न च्यवत इत्यच्युतमखण्डनभस्स्वरूपं चिदाकाशस्वरूपम्, ''**आत्मन आकाशः**[५]'' इति श्रुतेः । एवमुक्तलक्षणमात्मानम् अहमेव परं ब्रह्मेत्यवधानेन ज्ञात्वाऽवगम्य तद्विलक्षणात्पञ्चकोशकुहरात् पञ्चकोशपञ्जरमध्यात् परिमुक्तिं वैलक्षण्यमेहि प्राप्नुहि । एवं भूतविवेकज्ञानमेव ततो मोक्षोपाय इति तात्पर्यार्थः ॥६९॥

देहाद्यानन्दमयान्तसङ्घातस्यानात्मत्वेन त्यागे शून्यतैव मे भातीति शिष्याशङ्काम् अनुवदति — कोशेति ।

**कोशेषु पञ्चसु युतेष्वहमद्य पश्चात्**
**शून्यं विनैव न हि किञ्चिदवैमि नाथ ! ।**
**कालाञ्जनोपममहं तम एव वा स्यां**
**साधो ! वदेति परिपृच्छति सोऽप्युवाच ॥७०॥**

---

१. मूले ''सेव'' इति पाठोऽस्ति। अत्र अर्थानुरोधात् ''तदेव'' इति पाठस्स्यात्।
२. वार्तिकमिदं तैत्तिरीयभाष्यादिवार्तिकग्रन्थानां स्यात्, किन्तु उपलभ्यमानेषु वार्तिकग्रन्थेषु नेदं वार्तिकं दृश्यते ।
३. तै.उ. २-१-१
४. छा.उ. ६-२-१
५. तै.उ. २-१

असेरिवावच्छेदकेषु पूर्वोक्तलक्षणेषु कोशेषु पञ्चस्वपि उपसङ्क्रमितेषु पश्चात्तदनन्तरं शून्यं सर्वाभावं विना न हि किञ्चिद्वस्तु परिशिष्टमवगच्छामि। कालाञ्जनोपमं तत्तुल्यं तम एवाहं स्याम्। शून्यं तत्त्वमित्यभ्युपगमः। न चोपनिषदां[१] सिद्धान्तभावं भजते। अत्रापि मे मनः स्वास्थ्यं नोपैति। स्वतो वा तत्त्वं नावैमि। अतस्त्वमेव ''वरिष्ठम् अस्ति चेद्वस्तु तदेतदिति'' मह्यं वदेति शिष्ये पृच्छति सोऽप्युवाच गुरुः वक्ष्यमाणं सदृष्टान्तमर्थमुक्तवानिति यावत्॥७०॥

स्वानुभूतिरेवात्र मानमिति पूर्वोक्तं दृष्टान्तं स्मारयति — सङ्ख्येति। पूर्वं पूर्वोक्तदृष्टान्ते मोहेनात्मापरिज्ञानेन नवापि पुरुषान् सङ्ख्याय स्वमात्मानमविदित्वा चिरं भ्रान्त्वा विक्षेपादिकमनुभूयाप्तोपदेशेन शून्यं वाऽऽत्मानमवेदीत्।

**सङ्ख्याय मोहेन नवैव पूर्वं**
**भ्रान्त्वा स्वमज्ञाय चिरं परोक्त्या।**
**शून्यं ततो वा दशमो ह्यजानत्**
**त्वमेव सर्वं परिवेत्सि विद्वन्! ॥७१॥**

निजस्वरूपस्य शून्यस्य वक्तुमशक्यत्वाच्च तदनुभवस्य तत्क्षीणमन्तरा अनुपपत्तेश्च त्वमेव सर्वं परिवेत्सि तव सर्ववेदितृत्वात्। तस्य चाभावे सर्वाऽऽन्ध्यापातात्, ''[२]**न हि द्रष्टुर्दृष्टेः**[३]'', ''**न हि विज्ञातुर्विज्ञातेः**[४]'' इत्यादिश्रुतिभ्यश्च ''**सर्वस्य साक्षी तमसः साक्षी**[५]'' इति च वचनात्। ''**दृश्यते त्वग्रयया**[६] **बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः**[७]'' इति सूक्ष्मदृष्टिग्राह्यत्वाभिधानाच्च। अविषयमात्मानं स्वयमेव जानीहीति यावत्॥७१॥

सर्वसाक्षित्वमात्मनोऽभिहितं तदेव दृढीकरोति — जाग्रदिति।

---

१. ''चोपनिषदानाम्'' इति पाठः।
२. मातृकायां ''न द्रष्टुदृष्टेः'' इति पाठो दृश्यते।
३. बृह.उ. ४-३-२३
४. बृह.उ. ४-३-३०
५. नृ.उ. (द्वितीयखण्डे ''प्राणस्य साक्षी तमसः साक्षी सर्वस्य साक्षी'' इत्यपि पाठः प्रायः उपलभ्यते। पृ. २२८)
६. ''त्वग्रिया'' इति पाठः।
७. कठ.उ. १-३-१२



**जाग्रत्स्वप्नसुषुप्तऽयो बहुतराः कालास्त्रयो भूयशः**
**के वा सन्ति गता भवाम्बुनिलये कल्लोलवर्गा इव।**
**सर्वान्तानपि सर्वदृक्किल भवान्द्रष्टैव नो संशयः**
**कण्ठेकालपदाम्बुजद्वयमहं स्पृष्ट्वा वदाम्युच्चकैः॥७२॥**

जाग्रदादयः शरीराद्यवस्थाः बहुतराः ताश्चासङ्ख्याताः। कालाः भूतभविष्यद्-वर्तमानभेदभिन्नाः। यद्वा निमेषादिवत्सरान्ताः कालावयवाः भूयशः अनन्ताः बाल्यादयः भवाम्बुनिलये संसारसागरे के[१] वा भावाः कल्लोलवर्गा इव दृष्टनष्टस्वभावाः न गताः स्थायिनो वर्तन्ते। सर्वान्भावान्विषयान् अवस्थातद्धर्मान् तत्परिच्छेदककालावयवानपि भवान् सर्वदृक् सर्वदर्शी, त्वं द्रष्टैव ज्ञातैव, न ज्ञेयो न दृश्यो नापि विकारवान्। अत्रात्मनि सर्वसाक्षित्वनिर्णयविषये स्वप्रकाशत्वेन ''**अत्रायं पुरुषः स्वयंज्योतिः**[२]'' इति श्रुतिबोधिते संशयो न विद्यते। अहञ्च कण्ठेकालस्य शम्भोः परमगुरोः सर्वज्ञस्य सर्वशक्तेः परमेश्वरस्य साम्बस्य पदाम्बुजद्वयं चरणयुगलं स्पृष्ट्वा मनसाऽऽलिङ्ग्य स एव शरणमिति उच्चकैः सत्यमिति भुजं चोद्धृत्य वदामि। नातः परं किञ्चिद्वक्तव्यमस्तीत्यभिप्रायः॥७२॥

स्वानुभूतिप्रमाणसिद्धात्मनि उपायान्तरान्वेषणा निरर्थकैवेति दृढीकरणाय पूर्वोक्तदृष्टान्तं स्मारयति — पश्यन्तमिति।

**पश्यन्तन्निखिलं पदार्थनिचयं मां केन पश्यामि नेत्-**
**याख्याहि स्वयमुद्यतस्य महसो नैवास्ति तेजोऽन्तरा।**
**स्वाज्ञानाद्दशमस्य विभ्रमजुषः पश्चात्स्वयं जानतः**
**स्वं मुक्त्वास्ति ततः परो न हि वद स्वस्वावबोधोदये॥७३॥**

निखिलं समस्तविषयजातं कार्यकारणसङ्घाततद्धर्मजातं च पश्यन्तम् अवबोधयन्तं मामस्मदर्थं[३] केन करणेन पश्यामि जानामीति, न ख्याहि न वदतु भवान्। आत्मनः स्वप्रकाशत्वेनावृतत्वात् आवृतं किल स्वतेजसि स्वाभिव्यक्तौ

---

१. ''को...'' इति पाठः।
२. बृह.उ. ४.३.९
३. ''मामस्मदार्थम्'' इति पाठः।

वृत्त्यादिकमपेक्षते। आत्मा सर्वबोधकः न कस्यापि विषयः, न साधनाधीनसिद्धिकश्च ''**न विज्ञातेर्विज्ञातारं विजानीया**[१]'' इत्यादिश्रुतिभ्यः। तत्रायं दृष्टान्तः स्वयमुद्यतस्य ज्योतिषः अवगमाय न तेजोऽन्तरापेक्षा, यद्यप्यादित्यादिदीपादिकं वा ज्योतिः चक्षुरादिकमपेक्षते तथापि तस्यापि तदंशत्वादेव न पृथक्तेजोऽन्तरा-पेक्षेत्युक्तम्। तत्र पराक्तं हेतुः। अत्र तु अभौतिकत्वात् सर्वपृथक्त्वाच्च स्वावृत्तिनिवर्तकवृत्त्यपेक्षायामपि तदज्ञाननिवृत्तिमात्रेण वृत्तेरप्युपक्षीणत्वादेतस्यार्थस्य उत्तरत्र पृथग्वक्ष्यमाणत्वाच्च नात्मावगमायान्यत्साधनन्न मृग्यं स्वात्मनात्माऽवगन्तव्य इत्यर्थः। स्वाज्ञानात् माम् अहं न जानामीति भ्रमानुभवरूपाद्विभ्रमजुषः नष्टमात्मानं मन्वानस्य दशमस्य पश्चादाप्तोक्त्या जानतश्च स्वात्मानं मुक्त्वा वृथैव मया भ्रान्तम्, अहमेव दशमः पूर्वमप्यासमिदानीमस्मि उपर्यपि भविष्यामीति च विदितवतस्ततः परं दशमसङ्ख्या पूरणायागतो वा ''[२]**न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते**[३]'', ''**न हि तद्द्वितीयमस्ति**[४]'' इति दर्शनात् ॥७३॥

एवं श्रुत्यादिबोधनेन निरुत्तरीकृतेऽपि शिष्ये ''**यमेवैष वृणुते तेन लभ्यः**[५]'' इत्युपदिष्टाध्यात्मयोगाधिगमाय ''**अन्यदेव तद्विदिताद्**[६]'' इत्युपप्रदर्शितागम-सम्प्रदायानुरोधेन दर्शनोपायमन्यथादोषश्चाह — ज्ञानस्येति।

**ज्ञानस्यापि ज्ञापकं ज्ञानमस्ती-**
**त्याख्यातॄणां दुर्धियां साऽनवस्था।**
**नाज्ञातस्त्वं ज्ञात एवासि न त्वं**
**ज्ञातारं स्वं स्वानुभूत्यैव विद्धि ॥७४॥**

{ज्ञानस्येति—} ज्ञानशब्दो भावसाधनो न कारणसाधनः। तथा च ज्ञप्तिर्ज्ञानमवबोधः स्वयञ्ज्योतिस्स्वभावः प्रत्यगात्मा तस्यापि ज्ञापकं बोधकमन्यत्

---

१. बृह.उ. ३-४-२
२. ''न हि विज्ञातुर्विज्ञार्विपरिलोपो विद्यते'' इति पाठः।
३. बृह.उ. ४-३-३०
४. बृह.उ. ४-३-३० (उपलब्धोपनिषत्सङ्ग्रहे ''न तु…'' इति पाठो दृश्यते।)
५. कठ.उ. १-२-२३, मुण्ड.उ. ३-२-३
६. के.उ. १-३



ज्ञानान्तरमस्तीत्याख्यातॄणां तदप्यन्येन तदप्यन्येनेति अनवस्था स्यात्। अतः कुतार्किकतां विहाय श्रुत्यर्थोऽवगन्तव्यः। यतश्च त्वं श्रोता श्रोतुस्तव स्वरूपभूतं ब्रह्म नाज्ञातम्[१], सर्वात्मना न विदितम्, वेदनहेतुश्रवणादिविधेर्निरर्थकत्वप्रसङ्गात्। न चात्मा ज्ञातः, सर्वावभासकस्य ज्ञानविषयत्वायोगात् ''**ज्ञाता ज्ञातश्च…दन्यम्**[२]'' इति वचनाच्च। अतो ज्ञातारं बौद्धाः सर्वेऽपि पत्तिया(?)[३] यस्य विषया भवन्ति तं सर्ववेत्तारं स्वमनन्यं स्वानुभूत्या श्रुत्याचार्यानुग्रहलब्धया फलाभासवर्जितया प्रत्यगेकप्रवणया ब्रह्माकारवृत्त्या निदिध्यासलब्धया जानीहि ॥७४॥

एवमात्मनो ज्ञाताज्ञातविलक्षणतया हेयोपादेयरहितायां प्रतिपादितायां दुर्विज्ञेयत्वं पर्यवसितमिव मन्दमतिराकलयेदिति ''**सर्वं खल्विदं ब्रह्म**[४]'' इति दर्शितसर्वात्मभावमप्याह सदृष्टान्तं — पिष्टस्येति।

**पिष्टस्येव कृतस्य शर्करिकया यद्विद्यते तद्गतं**
**माधुर्यं सकलं तदेव विदितं नैसर्गिकं शार्करम्।**
**तच्चेदं त्विति भासते यदखिलं तज्ज्ञानमेव स्वयं**
**सर्वोपाधिभिरान्तरं विरहितं त्वं विद्धि बोधं परम् ॥७५॥**

शर्करिकया गुडादिना कृतस्य पिष्टादेः तत्सम्बन्धि यन्माधुर्यं विद्यते सकलं तत्स्वाभाविकं शार्करं माधुर्यमेवान्यस्य माधुर्याद्यर्पकस्याभावात्। एवमेवेदमिति इदं प्रत्ययाविषयीकृतं यत्किञ्चन वस्तुजातं तत्सकलमपि सर्वोपाधिभी रहितं निर्विकारमान्तरं प्रत्यगभिन्नं बोधं ज्ञानस्वरूपं परं ब्रह्मैव विद्धि। ''**आत्मैवेदं सर्वम्**[५]'', ''**ब्रह्मैवेदं सर्वम्**[६]'' इति श्रुतिभ्यश्च ॥७५॥

सामान्यतः प्रदर्शितं तत्त्वमसिवाक्यार्थं विशेषतो दर्शयति — अयमिति।

---

१. ''नाज्ञात'' इति पाठः।
२. ?
३. अत्यन्तम् अस्पष्टं वर्तते, अस्य विषयो मृग्यः।
४. छा.उ. ३-१४-१
५. छा.उ. ७-२५-२
६. मुण्ड.उ. २-२-११

**अयं भवाँस्त्वम्पदलक्ष्यमेव**
**ब्रह्माद्वयं तत्पदलक्ष्यमेव ।**
**अन्तान्वितौ जीवपरौ हि वाच्यौ**
**नैक्यन्तयोर्भेदवतोः कदापि ॥७६॥**

अत्रायं प्रष्टा भवान्, त्वम्पदस्य तत्त्वमसीत्यत्र [१]तत्-त्वमर्थस्य लक्ष्यमेव लक्षणया प्रतिपादितम्[२] । कोशपञ्चकादवस्थात्रयाच्च शोधितः प्रत्यगात्मैव लक्ष्यार्थः । अद्वयं वियदादिद्वयरहितं प्रकृतितो विकृतितो विलक्षणं ब्रह्म पूर्णचैतन्यं तत्पदस्य तदर्थस्य लक्ष्यम् । लक्ष्यं वक्ष्यमाणलक्षणावृत्तितो गम्यम् । मायाऽविद्योपाधिभ्यामवच्छिन्नौ[३] विलक्षणधर्मकौ जीवेश्वरौ तत्पदस्य त्वम्पदस्य च वाच्यौ मुख्यार्थौ भवतः । तयोरुपाधिप्रविलापनमन्तरा ऐक्यं तादात्म्यं कदापि न भवति । ''**कार्योपाधिरयं जीवः**[४]'' इत्युक्तत्वात् ॥७६॥

भिदामेव व्यावहारिकीं कथयति — कीदृगिति ।

**कीदृग्भूता भिदेति प्रवदसि यदि तां वच्म्यहं जीवशम्भ्वो-**
**राख्यारूपोरुभेदैस्तनुभिरतितरां चावकाशैः प्रबोधैः ।**
**शक्त्या सिद्ध्या क्रियाभिः लघुगुरुतरोपाधिभिः चैनयोर्वा**
**दूराद्दूरे स्थितत्वात् क्षितिगगनवन्नैकभावः कदापि ॥७७॥**

उक्तं जीवेशयोः कीदृशो भेदः ? स च लौकिको वा वैदिको वा ? स च स्वाभाविको वाऽऽगन्तुकः । स्वाभाविकश्चेन्न निवारयितुं शक्यते । आगन्तुकश्च हेत्वपायाद्गच्छतीति चेत्तामेव भिदां वच्म्युभयविधाम् । आख्यारूपोरुभेदैः ईश्वरो हिरण्यगर्भो वैश्वानरो व्यावहारिकस्तैजसः सौषुप्त इति आख्याभेदो रूपभेदश्च हिरण्यश्मश्रवाद्युपास्यरूपं श्रौतम् । ''**उमासहायं त्रिलोचनं नीलकण्ठम्**[५]''

---

१. ''त्यस्य'' इति पाठः ।
२. ''प्रतिपादितः'' इति पाठः ।
३. ''...पाधिभ्यामवच्छन्नौ'' इति पाठः ।
४. शु.उ. ३-१२, त्रि,महा.उ. ४-८
५. कै.उ. १-७ (उपनिषत्सङ्ग्रहे ''उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्'' इति पाठः उपलभ्यते । पृ. १४३)



इति च जीवरूपश्च मानुषम् उपासकाद्यात्मकाम्, तत्रापि तारतम्यं दर्शयति । उरुशब्दस्तनुभिर्लीलावतारैः ''**जन्मकर्म च मे दिव्यम्**[१]'' इति दर्शनात् । देवमनुष्यशरीराणि जीवस्यास्वातन्त्र्यात् साङ्कुशैश्वर्यवत्वाच्च परमेश्वरस्य लीलामात्रामूर्तयो जीवस्य कर्माधीना इति भेदः । स्वशरीरावकाशश्च जीवः ईश्वरः सर्वावकाशः। प्रबोधश्च जीवस्य पराधीनः, नेश्वरस्य निरावृतज्ञानत्वात् । शक्तिश्चेश्वरस्य स्वतन्त्रा । ''**परास्य शक्तिर्विविधैव श्रूयते**[२]'' इति श्रुतेः । न जीवस्य शक्तिस्तथा । देहेन्द्रियाद्यपेक्षया[३] च क्रियाश्च ईश्वरस्य विश्वसर्जनादिरूपाः वैवस्वन्तादिव केवललीलाकैवल्यमात्राः, जीवस्य रागादिसहिताः वासनाधीनाः पुण्यापुण्यमिश्राश्च । सिद्धिश्च परमेश्वरस्य नित्यसिद्धा । ''**तत्र निरतिशयं [४]सर्वज्ञबीजम्**[५]'' इत्यभिहितत्वाज्जीवस्य योऽधीना(?)लघुगुरुतरोपाधिभिरिति जीवोपाधिः कार्यरूपः[६] तदभावे नश्यति । ईश्वरस्य मूलप्रकृतिः कालानवच्छेद्यमायामयी गुरुतरसंरम्भा च । अतस्तयोर्दूराद्दूरे स्थितत्वात् अत्यन्तविलक्षणरूपत्वात् क्षितिगगनवन्मेरुसर्षपराजभृत्यतः प्रकाशादिवन्नैकभावः कदाप्युपाधिविलापनम् अन्तरा तत्सद्भावे तादात्म्यं न घटत इति तात्पर्यार्थः ॥७७॥

मुख्यार्थैक्यविरोधाल्लक्षणाप्रत्याश्रयणेन तदैक्यं श्रुतिर्बोधयतीति तद्दिदर्शयिषुः लक्षणासामान्यं तद्विशेषञ्च दर्शयति — मुख्येति ।

**मुख्यार्थस्य विरोधो यत्र**
**भवेत्तत्र लक्षणा ग्राह्या ।**
**तत्रैका जहती स्यादजह-**
**त्यपरोभयात्मिका च स्यात् ॥७८॥**

मुख्यार्थस्य रूढ्यर्थस्य वाच्यस्येति यावत् । यत्र विरोधः स्फुरेत्तत्र लक्षणा

---

१. भ.गी. ४-९
२. श्वे.उ. ६-८, भव.उ. २-४४
३. ''देहेन्द्रियाद्यपेक्षा'' इति पाठः ।
४. ''सार्वज्ञबीजम्'' इति पाठः ।
५. यो.सू. १-२५
६. ''कार्यरूपा'' इति पाठः ।

ग्राह्या। तत्र लक्षणार्थोऽवगन्तव्यः। अयं भावः ''प्रमाणाधीना च प्रमेयसिद्धिः'' इति हि क्षुण्णो राजमार्गः। पदकदम्बोऽपि रूढ्यैव तत्तदर्थमवगमयति। अत्र तु तत्त्वमसिवाक्ये तदीयार्थबोधो न सङ्गच्छते विरोधस्य दर्शितत्वात्प्रमाणविरोधाच्च। अतो लक्षणाऽत्र ग्राह्या। तथा चोक्तम् — ''**मानान्तरोपरोधे तु मुख्यार्थस्य परिग्रहे। मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते॥**[१]'' सा च लक्षणा त्रिविधा प्रसिद्धा — जहती अजहती उभयात्मिका चेति॥७८॥

उदाहरणं दर्शयति — गङ्गेति।

**गङ्गायामिति घोषो जहत्यजहतीह धावति हि शोणः।**
**उभयात्मिका तु सोऽयं द्विज इत्येताभिरेव न विरोधः॥७९॥**

''गङ्गायां घोषः प्रतिवसति'' इति जहल्लक्षणाया उदाहरणम्। तत्र गङ्गाशब्दस्य तत्प्रवाह एव मुख्यार्थः। घोष आभीरादिः प्रवाहे तत्स्थित्ययोगात्तीरे लक्षणा। ''शोणो धावति'' इत्यत्र च शास्त्रप्रयोगे शोणस्य केवलस्य गुणत्वेन यं कञ्चिद् गुणिनमनाश्रित्य धावनाद्ययोगात् शोणगुणमपरित्यज्य अश्वाद्यानयनेन अश्वे लक्षणा। तत्र शोणपदेन त्यक्त इति। इयमजहल्लक्षणेत्युच्यते। ''सोऽयं देवदत्त'' इत्यत्र तु तदेतद्देशकालयोर्विरोधकारणयोः राज्यभिक्षाहरणादिधर्मयोः विरोधेऽपि देवदत्तपिण्डमात्रस्यापरित्यक्तत्वेनैकत्वसम्भवादेकदेशत्यागपूर्वकैकदेशग्रहण-रूपोभयात्मिका चेत्येताभिरविरोधो वर्णितः परीक्षकैरिति शेषः॥७९॥

तृतीयां लक्षणामत्रोपयोगित्वेन स्पष्टीकरोति — सोऽयमिति।

**सोऽयं द्विज इति वाक्ये**
**तदिदं भावेन यो विरोधोऽस्ति।**
**परिहृत्यैव तमेत(तं?)**
**द्विजमात्रैकत्वमेतदविरोधः॥८०॥**

उक्तार्थत्वात्स्पष्टोऽर्थः॥८०॥

दार्ष्टान्तिकेऽपि लक्षणयाऽर्थग्रहणं दर्शयति — तत्त्वमिति।

१. वा.वृ. ४७ (''मानान्तरविरोधे तु'' इत्यपि पाठभेदो दृश्यते।)



**तत्त्वं परं ब्रह्म परश्च साक्षिणं**
**नोपेक्ष्य किञ्चिद् भ्रममप्युपेक्ष्य।**
**तद्धि त्वमेवासि सदा त्वमेव**
**[१]असीतिवाक्यं परमाह पूर्णम्॥८१॥**

तदिति किञ्चित्पदं त्वमिति पदश्च परं देहेन्द्रियादिभ्यो विवेचितं साक्षिणं द्रष्टारं प्रत्यक्चेतनं ब्रह्म च निर्माय भूमानन्दस्वलक्षणं नोपेक्ष्य वाच्यार्थमुपेक्ष्यैव तद्भेदकारणं भ्रममपि त्यक्त्वा। हि अवधारणार्थः। त्वमेव तद् ब्रह्मासि तच्च सदा त्रिष्वपि कालेषु त्वमेव भवसीति वाक्यं परमखण्डैकरसत्वेन पूर्णं तादात्म्यम् अबोधयदिति। यत्परं ब्रह्म सर्वात्मा तत्त्वमेव त्वमेव तत् इति व्यतिहारेण अभेदप्रतिपादनादितिशब्दः प्रमाणश्रुतिसम्मतिं द्योतयति। ''**त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि**[२]'' इति वचनात्॥८१॥

सम्प्रज्ञातभावनाद्यपरपर्यायसमाधियोगश्च सम्प्रदायविच्छिक्षितं दर्शयितुं पूर्वोक्ताकाशदृष्टमत्र स्मारयति सुखावगमाय गुरुरित्याह — घटेति।

**घटाम्भसि घनाम्भसि स्फुरति यद्द्विधा पुष्करं**
**मृषा भवति तद्द्वयं घटघनस्थमेकं नभः।**
**चिदेकरसयोस्तथा परमसाक्षिणोरेकतां**
**शिवोऽहमिति भावयन्ननुभवस्वरूपं निजम्॥८२॥**

घटाम्भसि घटस्थितोदके घनाम्भसि मेघजले यद्यपि तत्र प्रत्यक्षं न प्रसरति, तथाप्यनुमानगम्यं तदिति ज्ञेयमुभयत्र पुष्करमाकाशं प्रतिबिम्बितं दृश्यते। तद् द्वयं च मृषैव प्रतीतमात्रशरीरत्वाद् अर्थक्रियाद्यभावाच्च। घटघनाभ्रघटमेघश्च अप्रत्यगान्तर्बहिरपि पूर्णन्नभः अनवच्छिन्नमेकरसमेव तद्वदेव परमसाक्षिणोः प्रत्यग्ब्रह्मणोश्चिदेकरसयोरिति चिदित्युपलक्षणम्। सच्चिदानन्दरूपयोरेकता स्वाभाविकी, ताश्च शिवोऽहमिति स्वप्रकाशानन्दलक्षणः परशिव एवाहमिति तद्भेदजनकाज्ञानं परिहरन्निजं स्वरूपमव्यवधानेनानुभवश्रुतियुक्त्यनुभवबलेन

१. ''तसीतिवाक्यम्'' इति पाठः। अर्थानुरोधात् अत्र ''असीतिवाक्यम्'' इति स्यात्।
२. व.उ. २.३४; ब्र.सू.शां.भा. ३-३-३७ पृ. ८२४

साक्षात्कुरुष्व ॥८२॥

एवं प्रत्यायितः शिष्यः एकान्त उपविश्य गुरूपदिष्टसमाधियोगेनात्मानं साक्षात्कृतवानिति दर्शयति — आचार्येति ।

**स्वाचार्योक्तस्वतत्त्वप्रवणतरमनाः पञ्चकोशान्विहाय**
**त्यक्त्वा शून्यं निजान्तःस्फुरितमथ तथोपेक्ष्य किञ्चिज्ज्ञभावम् ।**
**कूटस्थब्रह्मभावावगतिविगलाल्लीनवृत्तिर्महात्मा**
**सत्यानन्दैकरूपं विमलतरमजं ब्रह्म पूर्णं ददर्श ॥८३॥**

स्वाचार्येण परमेश्वरावताररूपेण स्वगुरुणा उक्त उपदिष्टे तत्त्वे प्रत्यग्ब्रह्मणि प्रवणतरं प्रलीनं मनो यस्य स तत्रैवात्मबुद्धिं दृढीकुर्वन्नित्यः पञ्चकोशाननात्मत्वेन त्यक्त्वा तदात्मभावं त्यक्त्वाऽथ कोशत्यागानन्तरं पूर्वं स्फुरितं प्रतीतं सर्वाभावरूपञ्च उपेक्ष्य किञ्चिदज्ञतां पलाभासतां च विहाय कूटस्थस्य चिद्धातोरात्मनः ब्रह्मत्वावगतिसाक्षात्कारेण लीनवृत्तिः कतकरजोन्यायेन शान्तवृत्तिः स्वयं महात्माऽखण्डाकारवृत्तिसम्पन्नः सत्यज्ञानानन्दरूपं ब्रह्म भूमार्थं ददर्शाव्यवधानेन दृष्टवान् । ''**ततस्तु तं पश्यते निष्कलं ध्यायमानः**[१]'' इत्यादिश्रुतेः, ''**ब्रह्म वेद ब्रह्मैव भवति**[२]'' च श्रुतेरिति यावत् ॥८३॥

ततः किं जातमित्यत्राह — अनुभवेति ।

**अनुभवसुखतोये भासमग्नस्सुपूर्ण-**
**स्तनुमुखकरणानां संक्षयाद्बोधमात्रः ।**
**स्वगुरुसविध एव प्राप्य निष्ठां महात्मा**
**परनभसि सुषुप्तो दीर्घकालं बभूव ॥८४॥**

ब्रह्मानन्दानुभूतिरसपूरे निमग्नश्च देहाद्यभिमानादीनां प्रलीनत्वेन चिन्मात्रः स्वगुरुसन्निधावेवाक्षुद्रबुद्धिः स शिष्यः परनभसि भूमरूपे निष्ठां समाधिमुपेत्य जाग्रति सुषुप्त इव स्वस्थो विश्रान्तिमाप ॥८४॥

स्थित्वेति ।

---

१. मुण्ड.उ. ३-१-८
२. मुण्ड.उ. २-२-९



**स्थित्वा चिराय परमाम्बररूपमात्रो**
**बुद्ध्वा पुनर्जगदिदं निजदेशिकश्च ।**
**च्योतत्सुखाम्बुनयनः शिरसा प्रणम्य**
**बद्धाञ्जलिः पुलकिताङ्ग इदं बभाषे ॥८५॥**

चिराय बहुकालं परमाम्बररूपमात्रः चिदाकाशस्वरूपः समाधौ स्थित्वा पूर्णानन्दाद्वितीयब्रह्मावस्थानसुखमनुभूय पुनः प्रारब्धवेगेनेदं जगदाभासं बुद्ध्वा निजदेशिकं च दृष्ट्वाऽनेन पूर्वं तद्दर्शमपि नासीदिति गम्यम् । तद्दर्शनजातानन्दा-श्रुक्लिन्न सर्वाङ्गश्च तं प्रणम्य नमस्कृत्य कृताञ्जली रोमाञ्चितगात्रश्चेदं वक्ष्यमाणं वाक्यमुक्तवान् ॥८५॥

गुरुकृतप्रसादविशेषं स्मृत्वा जनकादिवदिमे विदेहा ''**अयमहमस्मि**[१]'' इति श्रुतिप्रदर्शितं सर्वार्पणं सप्रमाणं कृतवानिति तद्दर्शयति — स्वामिन्निति ।

**स्वामिन् ! ममान्तःस्थितघोरवासना-**
**निशाप्रणाशोदितचण्डभानो !**
**तुभ्यन्नमस्त्वत्कृतजन्ममुक्तेः**
**किं वा विदध्यामहमस्मि किं वा ॥८६॥**

ममान्तर्हृदि स्थिता या घोरवासना राजसतामसप्रत्ययविशेषाश्चित्तगत-संस्काररूपा दम्भदर्पाद्यसुरसम्पद्रूपाः । चित्ते वास्यमानत्वात्ता एव निशा रात्रयस्तत्प्रणाशे तन्निवृत्त्यै उदित आविर्भूतश्चण्डसूर्य इवात्र भवान् मन्मनोगतान्धकार-निवर्तक स्वामिन्! तुभ्यन्नमोऽस्तु । त्वत्कृतायास्तव प्रसादसिद्धाया जन्ममुक्तेः संसारबन्धनिवृत्तेः किं विदध्यां प्रत्युपकारं किं कुर्याम् ? तव दास्याय अहमस्मि किं वाऽन्यत् कुर्याम् ? विद्यते वा ब्रह्ममात्रमेव सर्वमवगच्छामि नान्यत् किञ्चिन्मे भातीति तात्पर्यात् ॥८६॥

अनन्तरं गुरुकृतं शिष्यानुग्रहविशेषं जीवन्मुक्तिलाभाय तमुपदेशविशेषं च दर्शयितुं तदुक्तिं दर्शयति — इत्थमिति ।

---

१. बृह.उ. ४-२-४

**इत्थं शिष्ये वदति स गुरुः तुष्टचित्तः प्रपश्यन्**
**संस्थाप्याग्रे बहुलकृपया प्राह भूयो विनीतम् ।**
**त्यक्त्वा बन्धत्रयमिदमसद्वासनातः प्रतीतं**
**सच्चिद्रूपो भवसि यदि मे क्लृप्त एवोपकारः ॥८७॥**

एवं वक्तरि शिष्ये कृतकृत्योऽपि गुरुः तुष्टचित्तः फलितोऽयमुपदेश इति मुदितमनाः तं पुनरपि बहुलकृपया निरवधिकरुणया दृशावलोक्य स्वसमीपे संस्थाप्य अयमनुभवः सदा स्फुरत्विति अनुग्रहं कृत्वा विनीतं शिष्यमाह — असद्वासनातः । प्राचीनकर्मवासनावेगात्प्रतीतं वक्ष्यमाणं बन्धत्रयमाभासत्वानुसन्धानेऽपि पूर्वाध्यास-बलेन यदि कदाचिदुद्भूतं विनष्टदिग्भ्रमादिवत् त्यक्त्वा सच्चिद्रूपश्चित्सदानन्दा-द्वितीयब्रह्ममात्रानुसन्धानपरायण एव यदि वर्तसे तथा वर्तमानमेव म उपकारः मदुक्तब्रह्मविद्योपदेशफलं नान्यत्किञ्चिन्मे कृत्यमिति तात्पर्यार्थः ॥८७॥

साक्षाद्विदिते तत्त्वे को नाम प्रतिबन्ध इति प्रश्नमनूद्य भर्जुकथान्यायवत् कदाचित्कस्यचिद्भवेदिति दर्शयितुं वासनातानवं मोक्ष इति वक्तुं तस्या एव प्रतिबन्धकतामाह — त्वमिति ।

**त्वमहमिति विहीनं व्योमवत्सर्वपूर्णं**
**स्वयमनुभवमात्रं न च्युतं स्यात्कदापि ।**
**इति वदति स शिष्ये प्राह भूयो गुरूक्त्या**
**स्फुरदपि निजरूपं न स्थितिं याति बन्धैः ॥८८॥**

त्वमहमिति विहीनं सर्वविकल्परहितं व्योमेव पूर्णं स्वयमनुभवमात्रं साक्षादनुभवगोचरं वस्तु न च्युतं स्यात् न विस्मृतं भवेत् । निष्प्रतिबन्धकज्ञानस्येव सम्यक्त्वादित्यर्थः । इत्थं वक्तर्यपि स्वान्तेवासिनि ''**तस्याभिध्यानाद्योजना[त्] तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः**[१]'' इत्युक्तं श्रुतिरहस्यं मनसि स्थितं प्रकटयितुमाह गुरूक्त्या श्रवणादिबलेन स्फुरदपि अपरोक्षमवगतमपि निजरूपं ब्रह्मस्वरूपं बन्धैः प्रतिबन्धैः पूर्वोक्ताविद्याविलासैः स्थितिं निश्चलतां न याति न प्राप्नोति । साक्षाद्दृष्टेऽपि भ(.....?) तथाऽवगमादित्यर्थः ॥८८॥

---

१. श्वे.उ. १.१०; ना.प.उ. ९.९



तर्हि ते के प्रतिबन्धा इति तान्दर्शयति — अज्ञानेति ।

**अज्ञानसन्देहविपर्ययास्ते**
**बन्धाश्चिराभ्यासवशान् प्रबोधम् ।**
**घ्नन्त्येव नित्यं श्रुतिचिन्तनाभ्यां**
**ध्यानेन चैतान्विलयं नयस्व ॥८९॥**

अज्ञानं प्रचण्डमार्ताण्डमण्डले पेचकानुभवसिद्धान्धकारवन्मामहं न जानामीति भ्रमानुभवरूपमनादिभावत्वे सति ज्ञाननिवृत्यमित्युक्तलक्षणम् । सन्देहः ममैव ब्रह्मत्वमस्ति वा न वेत्यादिः । विपर्ययः विपरीतप्रत्ययस्त एव बन्धाः प्रबन्धा इति । ते चिराभ्यासवशात् पूर्ववासनाबलादागत्यागत्याप्रतिबोधमवगतिपर्यन्तमपि ज्ञानं घ्नन्ति प्रतिबध्नन्ति । अतो नित्यं नियमेन श्रुतिचिन्तनाभ्यां ध्यानेन च मनोनाशसाधनयोगधारणया चिन्तनेन वासनाक्षयकरप्रतिकूलवासनापरिचयेन श्रुत्या श्रवणाद्यावृत्त्या च जीवन्मुक्तिसाधनयोगेन विलयं विनाशं नयस्व । निर्विकल्प-समाधिपरं कालं नयस्व । अन्यव्यापारपरो न कदापि स्या इति तात्पर्यार्थः ॥८९॥

उक्तार्थसम्प्रतिपत्तये दृष्टान्तं दर्शयति — बन्ध इति ।

**बद्धानलो[१] नैव दहेत्तृणाद्यं**
**बोधस्तथा[ऽ]ज्ञानमलं न हन्यात् ।**
**बन्धप्रहाणाय चिरं समाश्रये[२]-**
**च्छ्रुतिं च चिन्तामपि तं समाधिम् ॥९०॥**

बद्धो मणिमन्त्रादिना निरुद्धशक्तिकोऽग्निस्तृणाद्यं तृणकाष्ठादि नैव दहेत् तथा बोधोऽपि तत्त्वज्ञानमपि असम्भावनादिप्रतिबन्धैः प्रतिबद्धः अज्ञानमलं न हन्यात् । अतः प्रतिबन्धविनाशाय चिरं श्रुतिं चिन्तां श्रवणं मननं समाधिं निदिध्यासनं चाश्रयेत् ।

---

१. ''बन्धानलो'' इति पाठः । अर्थानुरोधात् ''बद्धानलो'' इति पाठः स्यात् ।

२. प्रथमद्वितीयचरणयोः इन्द्रवज्रावृत्तम्, चतुर्थचरणे च उपेन्द्रवज्रावृत्तमस्ति । किन्तु तृतीयचरणे द्वादशवर्णाः सन्ति, तत्र यदि एकः गुरुवर्णो न्यूनीभवति तर्हि तृतीयचरणेऽपि इन्द्रवज्रावृत्तं स्यात्, तस्मादस्य वृत्तस्य गणना उपजातिवृत्ते कल्पयितुं शक्यते ।

समाधिश्च सविकल्पादिभेदेन द्विविधः। सविकल्पः अपि दृश्यशब्दानुविद्ध-भेदेन द्विविधः। निर्विकल्पस्तु एकविध एव। यदा जिज्ञासुरेव शिष्यस्तदा तत्त्वज्ञानाय श्रवणाद्यावृत्तिर्विधीयते। ''**आवृत्तिरसकृदुपदेशात्**[1]'' इति न्यायाच्च। अत्र कृतकृत्यं विदितवतः चित्तविश्रान्तये वासनादिनिवृत्तये चेति न पौनरुक्त्यम्, विविधत्वादधिकारिणामित्यर्थः। यस्य तु सकृच्छ्रवणादिनैव निष्प्रतिबन्धब्रह्मा-वगमस्तन्महिम्ना वक्ष्यमाणो जीवन्मुक्तिलाभः, न तं प्रति एषोऽभ्यास[2] इति नियम्यते। अतो नात्र विवादावसर इति भावः ॥९०॥

तानेव प्रतिबन्धान्स्पष्टं दर्शयति — आवृत्येति।

**आवृत्य ब्रह्मभावं प्रभवति विदधद्भेदमज्ञानमेतद्**
**वाक्ये श्रीदेशिकोक्ते कलुषितमनसोऽप्रत्ययः संशयोऽसौ।**
**सत्याऽसत्यप्रपञ्चो वपुरिदमहमित्येष मोहोऽन्तरङ्गे**
**प्राहुस्तं प्रत्ययाख्यं भ्रममिह सुधियस्त्याज्यमेतत्त्रयं हि ॥९१॥**

ब्रह्मभावं प्रतीचः स्वाभाविकीं ब्रह्मतामाच्छाद्य भेदं प्रत्यक्परविभागं कुर्वच्च यदज्ञानं प्रभवति। एतदज्ञानशब्दवाच्यब्रह्मभावाभावहेतुरसम्भावना। श्रीदेशिकोक्ते ब्रह्मविद्यासम्प्रदायविदाचार्योपदिष्टे वाक्ये तत्त्वमसिवाक्येन तदर्थपरिज्ञाने च कलुषितमनसः चित्तदोषेण कथमेतत्सम्भवतीति विक्षिप्तचेतसः अप्रत्ययः संशयः संशयभावनेत्युच्यते। आचार्यस्त्वमेव ब्रह्मेति बोधयति, तत्सम्भवति वा उपचारो वा तथा साक्षात्कर्तुं शक्यते वेत्याद्युभयकोट्यालम्बनरूपत्वादसत्यः मायिको मरुमरीचिकादिवदध्यस्तः प्रपञ्चः सत्य इति। इदं वपुरापादमस्तकं दृश्यमानं शरीरम् अहमेव स्थूलोऽहं कृशोऽहं ब्राह्मणोऽहमित्याद्यविवेकमूलो मोहः चित्तस्थः तमेव व्यत्ययाख्यं भ्रममिह सुधियोऽपि प्राहुः। विपरीतभावनां सर्वप्रतिबन्धनिदानं वदन्ति। अत एतत्त्रयमपि त्याज्यम्। तत्त्यागाच्च चित्तं विश्रान्तिमेतीत्यर्थः। ''**ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्**[3]'' इति सूत्राच्चेत्यर्थः ॥९१॥

प्रतिबन्धनिवृत्तिरपि श्रवणाद्यावृत्त्यैव प्रभवतीत्युक्ता(क्तिं?) निदर्शयति —

१. ब्र.सू. ४-१-१
२. ''एषोऽभ्यासो'' इति पाठः।
३. ब्र.सू. ३-४-५१



तत्त्वेति।

**तत्त्वानुभूतिप्रयतिः श्रुतिर्भवेद्**
**युक्त्योहमानन्दपदस्य चिन्तनम्।**
**एकाग्रताया मनसो हि सन्ततं**
**ध्यानन्तदेवेति वदन्ति साधवः ॥९२॥**

तत्त्वानुभूतिः तत्त्वस्य प्रत्यगभिन्नब्रह्मभावस्यानुभूतिः वक्ष्यमाणभूमिकाभ्यास-परिपाकेन चित्तविश्रान्तिः। तत्र प्रयतिः प्रयत्नविशेषः पौरुषः वासनाक्षयमनो-नाशाद्यभ्यासरूपः श्रुतिर्भवेत्। युक्त्या चानन्दपदस्य ऊहम्, आनन्द एव पदं पद्यते ज्ञायते इति पदमानन्दस्वरूपम्। तस्य युक्त्या योगेन ''**यावद्यावन्मुनिश्रेष्ठ! स्वयं सन्त्यज्यतेऽखिलम्। तावत्तावत्परालोकः परमात्मैव शिष्यते**[1]'' इति श्रुत्युपदिष्टोपायेन समाधानं चिन्तनम्। तथा च मोक्षधर्मे ''**यतो यतो निवर्त्यते ततस्ततोऽपि मुच्यते। निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि**[2]'' इति। मनसश्चित्तस्य निरोधपरिणामयुक्तस्य या एकाग्रता नैश्चल्यं तदेव ध्यानं वदन्ति साधवः ''**तत्र प्रत्ययैकतानताध्यानम्**[3]'' इति सूत्राच्च ॥९२॥

कियत्पर्यन्तं तत्कार्यमित्याशङ्क्य तदवधिमाह — यावदिति।

**यावज्ज्ञात्रादिभेदः त्वयि भवति भवेत्तावदभ्यासयोगः**
**पश्चान्मास्त्वेव किञ्चिद्गगनमिव परैः भौतिकैर्नैव सक्तः।**
**ज्ञेयाकारैकमात्रो जगदिदमखिलं स्वप्नवद्दीक्षमाणो**
**वैदेहे मुक्तिभावे तदनु परिगतो दीव्यति स्वे महिम्नि ॥९३॥**

त्वयि विदुषि यावद् ज्ञात्रादिभेदः तव [4]त्रिपुटीविकल्पो यावद्भाति पूर्ववासनाबलात् तावदभ्यासो विधेयः। पश्चात्तदभावे सुषुप्तवत्प्रशमितसर्ववृत्तिके मनसि स्वरूपनाशं प्राप्ते किञ्चिदप्यनुष्ठानं मास्त्वेव। यथा सर्वत्रावस्थितं गगनं

१. अ.उ. १-४४
२. वि.नी. ३६-१४ (''यतो यतो निवर्तते ततस्ततो विमुच्यते...'' इत्यपि पाठो दृश्यते।)
३. यो.सू. ३-२
४. ''त्रपुटी...'' इति पाठः।

भौतिकैः मेघाद्यैर्न स्पृश्यते तद्वदसक्तस्वभावत एव ब्रह्मस्वरूपमात्रः कदाचिदिदं जगत् स्वप्नवद्वीक्षमाणः प्राशनादिककर्मापि पश्यन् तथा चोक्तं वार्तिके "**निद्रया दर्शितानर्था[न्] न पश्यति यथोत्थितः । सम्यक् ज्ञानोदयादूर्ध्वं तथा विश्वं न पश्यति**[१]" । वैदेहमुक्तिभावं परिगतः सत्यसति वा देहे स्वे महिम्नि दीव्यति महीयते । "**ब्रह्मैव सन् ब्रह्माप्येति**[२]" इति श्रुतेरिति यावत् ॥९३॥

निवृत्ताविद्यस्यापि विदुषो जीवन्मुक्तिचित्तविश्रान्तिसिद्धये अभ्यासः कर्तव्य इत्युक्तम् । तत्र के वा जीवन्मुक्ताः ? कीदृशं तेषां सुखम् ? विदेहमुक्तिश्च कीदृशीत्याद्याशङ्क्याह — चत्वार इति ।

**चत्वारो ज्ञानभाजो जगति हि गणिताः सर्वलोकैरुपास्याः**
**तेषामेवं चतुर्णां प्रथम इह भवेद् ब्रह्मविन्नामधेयः ।**
**तत्पाश्चात्त्यो वरोऽन्यो भवति स हि वरीयान्ततोऽन्यो वरिष्ठो**
**वक्ष्यामि ब्रह्मवेत्तुर्गतिमपि च परेषां त्रयाणाञ्च भेदम् ॥९४॥**

ज्ञानभाजः तत्त्वज्ञानिनश्चत्वारो जगति गणिताः सङ्ख्याताः । सर्वलोकैः लौकिकैर्वैदिकैः श्रेयोऽर्थिभिर्मुमुक्षुभिरप्युपास्यः(स्याः?) पूज्याः । "**तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः**[३]" इति विहितत्वात् । तेषां मध्ये प्रथम आद्यश्चतुर्थीं भूमिकामारूढः ब्रह्मविन्नामधेयः । ततः पञ्चमीं भूमिकामारूढः ब्रह्मविद्वरः । [४]षष्ठीमारूढो वरीयान्, सप्तमीं भूमिकामारूढः वरिष्ठ इति च विदितः । तत्र ब्रह्मविदः गतिमवस्थाम् अन्येषां त्रयाणामपि पृथग्लक्षणप्रमाणादिना विशेषं कथयिष्यामि ॥९४॥

आद्यस्य लक्षणमुच्यते — धीरा इति ।

---

१. द.स्तो.वा. १-१२
२. बृह.उ. ४-४-६
३. मुण्ड.उ. ३-१-१०
४. "षष्ठामारूढो" इति पाठः ।



**धीरा ब्रह्मविदः प्रशान्तमनसो बोधात्पुरा यत्स्थितं**
**तत्सर्वं परकार्यवद्विदधते न त्यक्तवर्णाश्रमाः ।**
**सम्यग्बुद्धनिजस्वरूपमुदिता नोज्झन्ति नैजस्थितिं**
**लोकानुग्रहतत्पराश्च विचरन्त्यानन्दपूर्णाशयाः ॥९५॥**

धीरा ब्रह्माकारमनोवृत्तिसम्पन्नाः ब्रह्मविदश्च ब्रह्मसत्यादिलक्षणमहमेवेति विदितवन्तः, अत एव प्रशान्तमनसः विषयसुखोपक्षीणबुद्ध्यः बोधात् पुरा तत्त्वज्ञानसम्पत्तेः पूर्वं यत्स्थितं यत्स्वाभाविकमुपस्थितमासीत्तत्सर्वं लौकिकं वैदिकं च विदधते कुर्वन्ति उदासीना आचरन्ति तच्च परकार्यवदेव । तथा चोक्तम् "**यथा विपणगा लोका विहरन्तोऽप्यतत्समाः । असम्बन्धात्तथा ज्ञस्य ग्रामोऽपि विपिनोपमः**[१]" इति । न त्यक्तवर्णाश्रमाः गृहाद्याश्रमवन्तो वर्णिनोऽपि वर्तन्ते । तादृशां तत्त्वविदां बहूनामुपलम्भाल्लिङ्गाच्च । "**महाशाला महाश्रोत्रिया उद्दालको हारुणिः**[२]", "**भृगुर्वै वारुणिः वरुणं पितरम्**[३]" इत्यादिश्रुतिभ्यश्च सम्यक् निःसंशयं बुद्धमवगतं निजमसाधारणस्वरूपं परं ब्रह्म येन तेन मुदिता मतेन कृतार्थाः नैजस्थितिं नोज्झन्ति गृहस्थादिमर्यादां न परित्यजन्ति । लोकानुग्रहपरा एवात्मविद्यासुखसम्पूर्णाशया विचरन्ति त एव ब्रह्मविद इति । अपीति चोप्यर्थः[४] ॥९५॥

किञ्च ।

**कामादयो हृदि यदि क्षणतो व्रजेयुः**
**सक्ता न पुष्करपलाशवदत्र लोके ।**
**उद्योगिनोऽपि जडमूकसमाश्चरन्ति**
**मौनान्विताश्च सुधियोऽपि विमुक्तदेहाः ॥९६॥**

यदि कदाचिद् ब्रह्मविदां हृदि कामादयः रोषादयश्च भवेयुः प्राचीनकर्मवासना-

---

१. अ.उ. १-३३
२. छा.उ. ६.८.१
३. तै.उ. ३-१
४. "चोप्यर्थः" इति पाठः । अत्र "चेत्यर्थः" इति पाठः स्यात् ?

वशात् तथापि ते तत्र सक्ता न भवन्ति। ते च क्षणेन गच्छेरन्नेव[१]। तत्र दृष्टान्तः पुष्करपलाशवदिति। तथा चोक्तम् ''**रागी कश्चित्**[२]'' इत्यादिना। यथा ''**पुष्करपलाश आपो न श्लिष्यन्ते**[३]'' इति श्रुतेश्च। किञ्च त उद्योगिनः प्रयत्नवन्तोऽपि जडमूलसमाः पाण्डित्यं न बहिः प्रकटयन्ति। मौनेन आत्मतत्त्वमननात् मुनिः तस्य भावो मौनं तेनान्विताः सदाऽऽत्मानुसन्धानपरा एव वर्तन्ते। तथा चोक्तम् ''**क्षणमात्रं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना**[४]'', ''**ब्रह्मविद् ग्रसति ज्ञानात्सर्वं ब्रह्मात्मनैव तु**[५]'', ''**समाधिमथ कर्माणि मा करोतु करोतु वा**[६]'' इति श्रुतिभिः। त एव सुधियः विमुक्तचित्ताश्च। न तु विषयासक्ता इव रागादिपारवश्येन पुनः संसरन्तीत्यर्थः ॥९६॥

तेषां वेदकिङ्करत्वमपि नास्तीति दर्शयति — आरब्धेति।

**आरब्धानां कर्मणां नैकभावात्-**
**तेषां तेषां वृत्तयो नैकभेदाः।**
**वाणिज्यं वा ते तपोऽनुष्ठितिं वा**
**भिक्षाचर्यं कुर्वते वाऽथ राज्यम् ॥९७॥**

प्राचीनकर्मणामनेकत्वात्तेषामेव ब्रह्मविदां वृत्तयोऽपि आचारादिकमपि

---

१. ''गच्छेरन्'' प्रयोगोऽयम् अपाणिनीय इति भाति। ''गम्लृँ-गतौ'' इति धातुः (धा.पा. ९८२) परस्मैपदी वर्तते। अतः परस्मैपदत्वाद् विधिलिङ्लकारे प्रथपुरुषबहुवचने ''गच्छेयुः'' इति रूपं स्यात्। पाणिनीयतन्त्रे ''गच्छेरन्'' इति रूपं ''**कर्त्तरि कर्मव्यतिहारे**'' (अष्टाध्यायी १.३.१४) इत्यनेन सिध्यति। कर्मशब्दः क्रियावाची। व्यतिहारो विनिमयः। यत्रान्यसम्बन्धिनीं क्रियामन्यः करोतीतरसम्बन्धिनीं चेतरः स कर्मव्यतिहारः। तथा च क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं भवतीति सूत्रार्थः। उदाहरणानि यथा ''व्यतिलुनीते'', ''संप्रहरन्ते राजानः'' इत्यादीनि। तथा च ''गच्छेरन्'' इत्यस्य अन्यस्य योग्यं गमनं कुर्युः इति। किन्त्वत्र कर्मव्यतिहारो न दृश्यते।

२. ?

३. छा.उ. ४-१४-३

४. अप. १३४ (अपरोक्षानुभूत्यां ''निमेषार्धं न तिष्ठन्ति...'' इति पाठः उपलभ्यते।)

५. पा.उ. ३९

६. पं.द. ९-१०२



नैकविधमेव। केचिद् ब्रह्मविदो धर्मव्याधप्रभृतयः वाणिज्यं कृतवन्तः। केचित्तपोऽनुष्ठितिं समाध्यनुष्ठानं कृतवन्तः। शुकादयः केचिद्भिक्षाचर्यं परित्यज्य सर्वं परमहंसाश्च भूत्वा भगवत्पादादयः। केचन जनकादयः राज्यं कुर्वते। महान्तं राज्यभारं कृतवन्तः सुरघुपरिघादीनामपि विलक्षणाचारत्वदर्शनात् ॥९७॥

स्वाभाविकोऽयं ब्रह्मविदां महिमा। तेषां यथावर्तनमेवालङ्कार इति। अत्र ब्रह्मवित् प्रकरणमुपसंहरति — स्मरन्तीति।

**स्मरन्ति न गतं तथा मनसि भावि दृष्टेः पुर-**
**स्थितन्त्वनुभवन्त्यमी गगनतः पुरोहे सति।**
**रवौ शिशिरदीधितावपि शवे[१] पुनर्जीविते**
**गुणागुणधियोज्झिता अपि चतुर्थभूमिं गताः ॥९८॥**

गतमतिक्रान्तं विषयजातं मनसि न स्मरन्ति। मिथ्यात्वनिश्चयेन दृष्टेः पुरस्थितं तत्तदवसरोचितं संव्यवहारमनुभवन्ति। गगनत आकाशात्पुरोहे सति उत्पन्ने तस्यापि मायिकत्वनिश्चयेन मायायां सर्वसम्भवादिति निश्चयेन च युक्ता एव। ते कदाचिद्रवौ सूर्ये शिशिरदीधितावपि चन्द्रे जातेऽपि, शवे मासात्पूर्वं मृतेऽपि देवदत्तादौ पुनर्जीविते पुनरागतेऽपि गुणागुणधिया शुभाशुभबुद्ध्यवियुक्ता एव सर्वत्र समबुद्धय एव वर्तन्ते। तथा चोक्तम् ''**सवितर्यपि शीतरुचौ**[२]'' इति। तुर्यभूमिं सत्त्वापत्तिलक्षणां चतुर्थीं भूमिकामारूढाः प्रारब्धवेगे नष्टे कैवल्यं प्राप्नुवन्तीति तात्पर्यार्थः ॥९८॥

तदन्येषां ततो विशेषमाह — त्रयाणामिति।

**त्रयाणामाद्यौ द्वावथ दृढसमाधिं च कुरुत-**
**श्शरीरार्थोत्थानो वर इति तयोश्चाद्य उदितः।**
**वरीयानुद्बुद्धः परकृतविबोधेन समये**
**वरिष्ठोऽनुत्थानो भवति परतोऽपि स्वत इह ॥९९॥**

त्रयाणां वरादीनां क्रमेणासंसक्तिकादिभूमिकात्रयमारूढानां वक्ष्यमाणानामाद्यौ

---

१. ''शिवे'' इति पाठः। किन्त्वत्र व्याख्यायां ''शवे'' इत्येव पाठो दृश्यते। अतः व्याख्यानुरोधात् अर्थानुरोधाच्च ''शवे'' इति पाठः समीचीनः प्रतिभाति।

२. आ.वि. १८

वरो वरीयानिति च पूर्वोक्तौ द्वावेतौ दृढसमाधिं कुरुतः । सदा कुर्वाणावेव तथाविधौ[1] । स्वतः स्वप्रयत्नेन शरीरार्थं शरीरसंरक्षणहेतुकभिक्षाटनमूत्रपुरीषादिमोचनार्थं चोत्तिष्ठति । अन्यत्र काले समाहित एवार्धसुप्तवन्निद्रालुरिव लक्ष्यते । यो लौकिकैर्जनैः सः परमविद्वर उदितः वासिष्ठादाविति[2] शेषः । वरीयाँस्तु समये उचितव्यवहार-योग्यकाले परकृतविबोधेन परप्रयत्नागतेन बहिर्ज्ञानेन शिष्यादिना वोद्बुद्धः उद्बोधवान्, ग्रहग्रस्तवन्मदिरामदान्धवच्च लक्ष्यते स वरीयान् । वरिष्ठस्तु सप्तमीं भूमिकामारूढः स्वतो वा परतोऽनुत्थानः[3] प्रशान्तसर्ववृत्तिकः परां काष्ठामुपगतः । एष महात्मा दुर्लभः सर्वदा विदेह एवेत्यर्थः ॥९९॥

ननु ''**ज्ञानादेव तु कैवल्यम्**[4]'' इति श्रुतिप्रमाणानुरोधेन ब्रह्मविद्वरादि-भेदभिन्नानां मुक्तिसाम्येऽपि केचन समाहितचित्ताः केचन व्यवहारवन्तश्च मुक्ता इत्यत्राभिहितम्। लोके शास्त्रे च समाधिविधिः किमर्थ इति प्रश्नमनूद्य विक्षेपनिवृत्तिरेव समाधिफलमिति दर्शयति — नानाविधेति ।

**नानाविधानामपि मुक्तिभाजां**
**समाधियोगस्य तु किं फलं चेत् ।**
**बृहद्विदोऽस्त्येव हि दृष्टदुःखं**
**तेषान्त्रयाणान्न तदस्ति भेदः ॥१००॥**

पूर्वाभिहितरीत्या बहुप्रकाराणामपि ज्ञानमहिम्ना मुक्तिभाजां ब्रह्मविज्ञानिनां ब्रह्मविद्वराद्यनुष्ठितसमाधियोगस्य निर्विकल्पकसमाध्यभ्यासस्य किं प्रयोजनम् अवान्तरमिति चेद् ब्रह्मविदश्चतुर्थीं भूमिकामारूढस्य विदुषोऽपि दृष्टदुःखमस्त्येव । ब्रह्मविदः सर्वं व्यावहारिकं मायिकमात्मा निर्विकार्यसङ्गस्स एव अहं न संसारी कर्ता भोक्तेति निश्चयवन्तोऽपि दृष्टदुःखं प्रारब्धागतमशक्यपरमित्यनुभवन्ति । इतरेषां त्रयाणां सदा समाहितमनस्कतया बहिर्वृत्त्यनुदयात् तन्नास्त्येवेतीयान्विशेषः । अवान्तरफलं मुख्यस्य ज्ञानफलकैवल्यस्यैकरूपत्वाद् ''**ज्ञानसमकालमुक्तः**[5]''

१. ''तथाविव'' इति पाठः। अर्थानुरोधात् ''तथाविधौ'' इति पाठः स्यात् ?

२. ''वासिष्ठादिविति'' इति पाठः। अर्थानुरोधात् ''वासिष्ठादाविति'' पाठः समीचीनः प्रतीयते।

३. ''...नुत्थानो'' इति पाठः।

४. स.वे.सा. १७०

५. प.सा. ८३



इति श्रुतेश्चेत्यर्थः ॥१००॥

ज्ञानिनां संव्यवहाराद्यभ्युपगमे रागादिना पुनः संसारोऽपि भवेत् भरतादीनां तथा दर्शनादित्याशङ्क्याह — बुद्धेति ।

**बुद्धब्रह्मस्वरूपा अपि जडमतिवत्कर्मभिः भ्रान्तचित्ताः**
**संसक्ताश्चेदबोधक्षतिरपि च कुतो जन्महानिश्च तेषाम् ।**
**इत्थं चेत्पृच्छसि त्वं सकलगतमपि व्योम सर्वैरसक्तं**
**यद्वत्तद्वद्विमुक्ता अपि तदितरे क्ष्मादिवत्सक्तचित्ताः ॥१०१॥**

विदितात्मतत्त्वा अपि प्राकृतजन इव कर्मभिर्लौकिकादिव्यवहारैर्भ्रान्तचित्ता विक्षिप्तमनसः संसक्ताश्च स्युः ? तेषामबोधक्षतिः निःशेषाज्ञाननिवृत्तिस्तद्धेतुक-जन्मादिबन्धनिवृत्तिश्च कुतो हेतोर्भवेत् । इत्थं संशयानः यदि त्वं ज्ञास्यसि — तच्छृणु । सर्वगतमपि सर्वानुस्यूतं व्योम सर्वैर्मेघाद्यैः स्वभावतोऽसक्तमेव । तद्वदेव विमुक्ता अपि ब्रह्मज्ञानमहिम्नो निवृत्ता ज्ञानतत्कार्या अपि ज्ञानिन इतरैः संसारीति गृहीता गुञ्जापुञ्जाग्निदाहवत्तत्सङ्गिनो न भवन्ति । ''**तत्त्ववित्तु महाबाहो गुणकर्म-विभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते**[1]'' इति भगवद्वचनात् । ''**रागादयः सन्तु कामं न तद्भावोऽपराध्यति**[2]'' इति च वचनात्तदितरे अज्ञानिनः क्ष्मादिवन्मूकद्रव्यवत्सक्ता एव भवन्ति । अतो व्रात्यश्रोत्रिययोः व्यवहारसाम्येऽपि यथा परीक्षायां भेदोऽवगम्यते तद्वदविद्वद्विदुषोऽपि महद्वैलक्षण्यम् अस्तीत्यभिप्रायः ॥१०१॥

तच्छुश्रूषणपूजनादिकं च संसारिणां परमं श्रेयःसाधनमिति श्रुतिर्विधत्त इति दर्शयति — ब्रह्मेति ।

**ब्रह्मश्रीपतिशङ्कराः प्रतिदिनं सम्पूजिताः सत्तपोऽ-**
**नुष्ठानं सकलं च साधु चरितं तैरेव सम्यक् कृतम् ।**
**जीवन्मुक्तपदारविन्दमपि ये सम्पूजयन्त्यादराद्-**
**इत्याहुः श्रुतयो विदेहपरमां मुक्तिं च तेषां श्रुणु ॥१०२॥**

१. भ.गी. ३-२८

२. बृ.उ.भा.वा. १-४-१५३९

ब्रह्माद्या ईश्वराः प्रतिदिनं नियमेन सम्पूजिताः समाराधिताः सत्तपोऽनुष्ठानं कृच्छ्रादिकमशनादिकं व्रतरूपश्चानुष्ठितं सर्वं ये जनाः जीवन्मुक्तपदारविन्दं जीवन्तोऽपि ज्ञानमहिम्ना मुक्ताः। यद्वा जीवन्तश्च ते मुक्ता तत्पादशुश्रूषणं कुर्वन्तीति श्रुतयः ''**तं तं लोकं जयते ताँश्च कामान् तस्मादात्मज्ञं ह्यर्चयेत्**[1]'' इत्याद्याः तेषां परमां विदेहमुक्तिं च वक्ष्यामि शृणु त्वमिति यावत् ॥१०२॥

ज्ञाननिष्ठानां विदेहमुक्तिक्रमं ''**विमुक्तश्च विमुच्यते**[2]'' इत्यादिश्रुतिदर्शितं प्रदर्शयति — तूलमिति।

**तूलं दावहविर्भुजीव सकलं प्राक्सञ्चितं बोधतः**
**तज्ज्ञानाग्निशिखावलीढमखिलं स्याद्धस्मसाद् ज्ञानतः।**
**ऊर्ध्वं कर्म यदस्ति तच्च निखिलं न श्लिष्यते ज्ञानिनः**
**प्रारब्धं क्षयमेति भोगवशतस्त्वेवं त्रयाणां क्षतिः ॥१०३॥**

दवाग्नौ तूलमिव बोधात्पुरा तत्त्वज्ञानलाभात्पूर्वं सञ्चितं सकलं ज्ञानाग्नि-शिखावलीढं सत् भस्मसाद्भस्मभूतं[3] भवेत्, समूलं नश्येत्। तदूर्ध्वं तत्त्वज्ञानोत्तरकाले क्रियमाणं कर्म त्रिविधमागामि सञ्चितं यदस्ति तत्सर्वं ज्ञानिनो जीवन्मुक्तान्न स्पृशति। ''**अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः**[4]'' इति श्रुतेश्च। प्रारब्धन्तु एतच्चरमशरीरारम्भकं कर्म तु भोगवशाद्भोगदानेन क्षयमेति। निराश्रयाग्निवच्छाम्यति। एवं त्रयाणां नाशः। ''**भोगेन त्वितरे क्षपयित्वा सम्पद्यते**[5]'' इति श्रुतिभिः। ''**तदधिगमे उत्तर पूर्वाघयोरश्लेषविनाशौ तद्दर्शनात्**[6]'' इति च ॥१०३॥

ज्ञानोत्तरभाविकर्म ज्ञानिनं न स्पृशतीत्युक्तं ''**नाभुक्तं क्षीयते कर्म**[7]'' इति वचनविरुद्धमिवेत्याशङ्क्य तल्लयप्रकारं दर्शयति — मुक्तानामिति।

---

१. मुण्ड.उ. ३-१-१०
२. कठ.उ. २-२-१
३. ''भस्मभूयं'' इति पाठः। अर्थानुरोधेन ''भस्मभूतम्'' इति पाठः स्यात्?
४. छा.उ. ८-१२-१
५. ब्र.सू. ४-१-१९
६. ब्र.सू. ४-१-१३ (ब्रह्मसूत्रशाङ्करभाष्यस्य संस्करणेषु सूत्रमिदं ''...विनाशौ तद्व्यपदेशात्'' इति रूपेण दृश्यते।)
७. ब्र.वै.पु. १.४४.७४; ना.पु. २९.१८



**मुक्तानां भोगकाले प्रविहितमपि यत्कर्म जन्मान्तराय**
**स्यान्नैवं तद्यथा त्वं शृणु मम वदतः तत्प्रकारं मनीषिन्।**
**दोषारोपं मुनीनामपि विदधति ये ते लभन्ते शुभानि**
**प्रीतिं ये योगभाजां विदधति निखिलं पुण्यमायान्ति तेऽपि ॥१०४॥**

मुक्तानां ब्रह्मविद्वरादीनां भोगकाले प्रारब्धभोगानुभवसमये प्रविहितं यत्कर्म पुण्यापुण्यमिश्ररूपं तदपि जन्मान्तरारम्भणाय न स्यात्, कारणभावं न गच्छेत्। तद्यथा स्पष्टं भवति तदवधारय। विद्वदाचारं दृष्ट्वा दोषारोपं ये कुर्वन्ति, तदन्तर्निष्ठां बहिर्दृशा ज्ञात्वा तन्निन्दन्ति ये पापिष्ठाः तत्कृतमशुभं सर्वं गृह्णन्ति। ये जनाः साधवः सर्वथा पूज्या इति दृष्ट्या ज्ञानयोगिनां प्रीतिं सन्तोषमन्नपानशुश्रूषणादिना कुर्वन्ति, ते तत्सुकृतं सर्वमपि गृह्णन्ति। ''**सुहृदः साधुकृत्यान्द्विषन्तः पापकृत्याम्**[1]'' इति श्रुतिरप्यत्र मानमित्यर्थः ॥१०४॥

विदेहमुक्तेर्लिङ्गभङ्ग एव मुख्यं कारणं तथापि तत्सामग्री निवृत्तिमन्तरा न निवर्तत इति तत्साधारणकर्मसामग्रीनिवृत्तिप्रकारोऽभिहितः। इदानीं प्रतिभाननाशोऽपि तदा भवतीति दर्शयति — संविदिति।

**संवित्पावकदग्धमेव हि पुराऽविद्याशरीरं वपुः**
**स्थूलं कालवशात्पतेदथ पुनः सूक्ष्मं शरीरं क्रमात्[2]।**
**तप्तायःपतिताम्बुवत्सुविमले पूर्णे तुरीये पदे**
**नित्यानन्दचिदात्मके परतरे लीनं भवेच्छाश्वते ॥१०५॥**

हि यस्मात्पूर्वं ज्ञानाग्निनाऽविद्याशरीरम् अविद्याख्यं कारणशरीरं दग्धं विनष्टम्, स्थूलमिदं शरीरं कालवशाच्छिन्नमूलो वृक्ष इव पतेत्। सूक्ष्मं लिङ्गसंज्ञं शरीरन्तु तप्तायःपतिताम्बुवत् प्रतप्तलोहनिक्षिप्तजलमिव सुविमले निर्माये पूर्णेऽखण्डे तुरीये जाग्रदादिविनिर्मुक्ते नित्यानन्दचिदात्मके परतरे सदसदुपाधिवर्जिते ''**अक्षरात्परतः परः**[3]'' इति श्रुतिप्रदर्शिते पदे ब्रह्मणि लीनं शान्तं भवेत्। उपाधित्रयलयवशाद्विद्वान्

---

१. ब्र.सू.शां.भा. ३-३-२६ पृ. ८०४
२. ''ब्रुमात्'' इति पाठः। अर्थानुरोधेन ''क्रमात्'' इति पाठः समीचीनः प्रतिभाति।
३. मुण्ड.उ. २-१-२

जीवन्मुक्तः विदेहमुक्त इत्युच्यत इत्यर्थः। ''**जीवन्मुक्तपदं त्यक्त्वा विदेहे कालसात्कृते। विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव**[१]'' इति श्रुतेश्चेति यावत् ॥१०५॥

तेषामवस्था मनोवागतीतेति दर्शयति — कुम्भ इति।

**कुम्भे नष्टे सति गगनवद्देहनाशे प्रपन्ने**
**मुक्ताः पूर्वं विगतसकलोपाधयः तुर्यभूताः।**
**नैवाद्यन्ता न तु परिमिताः कोटिमध्यादिशून्या-**
**श्चेदतो दूरा गगनविमलाश्शान्तदीपा इव स्युः ॥१०६॥**

कुम्भे घटे नष्टे मुद्गरपातादिना भग्ने गगनवत्तदवच्छिन्नं नभो यथा महाकाशं गच्छति। तथा देहनाशे पूर्वोक्तरीत्योपाधिभूतशरीरत्रयनाशे जाते विगतसकलोपाधयः पूर्वमेवेत्युक्ता एव। ते तुरीयं ब्रह्मगता अपि नैवाद्यन्ताः पुनर्जन्मनाशाद्यभावात्, न तु परिमिता लिङ्गस्यापि सामग्रीनिवृत्या नष्टत्वात्। कोटिमध्यादिशून्याः सर्वसङ्ग-विनिर्मुक्ताश्चेतसोऽपि सर्वप्रत्यायकबुद्धिवृत्तेरपि दूरा अविषया गगनविमलाः सूक्ष्माश्च शान्तदीपा इव प्रशान्तकर्पूरादिप्रदीपा इव स्युर्भवेयुः। ''**घटे नष्टे यथा व्योम व्योमैव भवति स्वयम्। तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम्**[२]'' इति श्रुतेश्चेत्यर्थः ॥१०६॥

सम्प्रतिज्ञातानां[३] ब्रह्मविदां विदेहमुक्तिं चाख्याय तदेव ब्रह्मविद्याया अवान्तरमुख्यभेदेन फलमिति निर्दिष्टं तदेतत्सर्वं त्वं सावधानेनावधारय इत्युपदिशति — सर्वत्रेति।

**सर्वत्र वत्स! गगने सति कूपखातात्**
**सन्दृश्यते खलु यथैव तथा सुपूर्णम्।**
**ब्रह्मापि सद्गुरुगिरा प्रविभासते हि**
**सोऽहं सदैकमिति तिष्ठ सुपूर्णभूमा ॥१०७॥**

१. मु.उ. २-७६ (उपनिषत्सङ्ग्रहे ''...त्यक्त्वा स्वदेहे'' इति पाठः उपलभ्यते।)
२. वि.चू. ५६६ (श्रीचन्द्रशेखरभारतीसम्पादितायां विवेकचूडामणौ ''घटे नष्टे व्योम व्योमैव भवति स्फुटम्'' इति पाठो दृश्यते। पृ.२६५)
३. ''सम्प्रतिज्ञाताम्'' इति पाठः। व्याख्यानुरोधेन ''सम्प्रतिज्ञातानाम्'' इति स्यात्?



सर्वत्र देशे तदवकाशमात्रत्वेनाकाशेऽवस्थितेऽपि कूपखातान्मठादिनिर्माणतः कूपाकाशोऽयं मठाकाशोऽयमिति अभिव्यक्तः प्रकाशते। तथा सुपूर्णं प्रत्यगभिन्नम् अनवच्छिन्नं सर्वानुगतं ब्रह्मापि सद्गुरुगिरा प्रविभासते। हि यस्मात्प्रमादतो विस्मर्यते च। अतः ''स एव भूमाऽहम्'' इति सदा तिष्ठ। स्वस्वरूपभूतकेवलचित्सदा-नन्दाद्वितीयब्रह्ममात्रतां न विस्मर ॥१०७॥

अध्यारोपापवादन्यायमाश्रित्य सर्ववेदान्तसिद्धान्तोऽर्थोऽत्र दर्शित इति वदन् सदृष्टान्तं प्रकरणमुपसंहरति — रज्जाविति।

**रज्जौ सर्पवदर्करश्मिजलवत्स्थाणौ नरभ्रान्तिवत्**
**स्वप्नालोकितलोकवच्च गगनप्रोद्यन्महाग्रामवत्।**
**वन्ध्यानन्दनवन्मृषा हि विदितः सर्वो जगद्विभ्रमः**
**सत्यं ज्ञानमहो ममोपरि शपे त्वं त्वां च मा विस्मर ॥१०८॥**

दृष्टान्तार्था अपि[१] स्पष्टाः। सर्वोऽपि जगद्विभ्रमः मिथ्येति विदितः। अयमध्यासवर्णनप्रयोजनभूतः[२] ज्ञानमात्मरूपं चैतन्यमेकमेव सत्यमबोध्यं वस्तु ममोपरि च शपे शपथं च करोमि। त्वं त्वामसङ्गानन्दस्वरूपं मा विस्मर। स्वस्वरूपनिष्ठातः प्रच्युतो मा भव। सदा त्वमात्मारामो वर्तस्वेति तात्पर्यार्थः मां चेति शब्दादवगम्यते। मदुक्तमर्थमप्रमादेन ज्ञात्वा सुखं तिष्ठेति तात्पर्यार्थः ॥१०८॥

*तत्त्वप्रदीपप्रकरणं समाप्तम्*

*॥ श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः ॥*

***

१. ''दृष्टान्तार्थापि'' इति पाठः।
२. ''अयमध्यासवर्णनप्रयोजनभूतः'' इति पाठः। व्याख्यानुरोधेन अग्र विद्यमानस्य ''ज्ञानम्'' इति पदस्य विशेषणं यदि स्वीक्रियते तर्हि ''इदमध्यासवर्णनप्रयोजनभूतम्'' इति पाठः स्यात्?

॥ ब्रह्मानन्दस्वामिने नमः ॥

## संशयच्छेदप्रदीपप्रकरणम्

यत्पादाम्बुरुहामृतानि पिबतां भूयो न मातुः स्तन-
क्षीरं दुर्लभमेव यस्य करुणा भ्रूक्षेपभूत्या नृणाम् ।
आकाशं[1] प्रसवायते जगदिदं प्राक्सत्यवत्संस्थितं
ब्रह्मानन्दयतीश्वरो विजयते ब्रह्मप्रबोधाकरः ॥

**यत्पादपद्मविगलन्मकरन्दसारो**
**जीवेश्वरैक्येदृढताकृतिवज्रलेपः ।**
**न्यग्रोधमूलनिलयाय नमः परस्मै**
**धाम्ने स्वमौनपरिबोधिततत्त्वभूम्ने ॥१॥**

यस्य परमेश्वरस्य चरणाम्बुजच्युतपुष्परससारः जीवेश्वरतादात्म्यदार्ढ्यसम्पादने वज्रलेपः निर्यासविशेषो भवति । वटतरुनिकटनिवासाय स्वमौनव्याख्याप्रकटित-ब्रह्मसुखाय तस्मै सर्वोपनिषदर्थाय परस्मै धाम्ने परञ्ज्योतिषे नमः । वाङ्मनःकायानां प्रह्वीभावो भूयात् । अयमाशयः श्रुत्यर्थविचाराद् ब्रह्मात्मज्ञानोदये सत्यपीश्वरानुग्रहो-ऽपि सर्वप्रतिबन्धनिवृत्तये भवतीति द्योतितं यदिति। स्वमौनेत्यादिनास्य प्रयोजनादिकमभिहितमिति ॥१॥

एवं परगुरुमूर्तिं दक्षिणामूर्तिं प्रणम्य कविश्चिकीर्षितं सदृष्टान्तं प्रतिजानीते — गृहेति ।

**गृहाधारस्तम्भेऽप्यवटनिहिते तस्य परितो**
**दृढस्थित्यै भूयो निखननमिवात्रापि गुरुतः ।**
**परे तत्त्वे ज्ञाते निभृतमनुभूतिं दृढयितुं**
**प्रवक्ष्ये सन्देहप्रशमनसमाख्यं प्रकरणम् ॥२॥**

१. ''आकाश'' इति पाठः। अर्थानुरोधेन ''आकाशम्'' इति पाठः स्यात् ?



गृहावष्टम्भनस्थाणावगाधे प्रवेशितेऽपि तस्य नैश्चाल्याय पुनरपि परितो निखननताडनादि यथाऽऽचरन्ति स्थूणानिखननन्यायेनात्रापि गुरुतो गुरुशास्त्रादिना परे ब्रह्मात्मतत्त्वे साक्षादवगतेऽपि निभृतन्निर्भरमनुभूतिं दृढयितुं वासनाक्षयादिना स्थिरीकर्तुं सन्देहप्रशमनसमाख्यं वक्ष्यमाणानां सन्देहानां प्रशमनं निःशेषनिवृत्तिः तत्संज्ञकं प्रकरणं वक्ष्ये कथयिष्यामीति यावत् ॥२॥

विदितवेद्यस्यापि शिष्यस्य [1]त्वमाशरीरपतनादहमप्युपास इति सम्प्रदाय-विचारवाक्यानुरोधेन गुरूपसदनमाह — अत्यन्तमिति ।

**अत्यन्तं परिशुद्धशीतहृदयो बोधे विमग्नः स्वके**
**कीशन्यायवदेव देशिकपदं शिष्यः सिषेवे दृढम् ।**
**अध्यारोपमथापवादमपि यः प्रोक्त्वास्य[2] कारुण्यतः**
**स्वस्थाने विगुणे चिरन्निजपदे ह्यस्थापयत्स्वं सुखम् ॥३॥**

नितरां परिशुद्धं [3]रजस्तमोवासनाकलङ्करहितं शीतलं मानसं यस्य सः स्वकेऽसाधारणे बोधे ज्ञानामृते निमग्नो गाढमग्नः कीशन्यायेन मर्कटन्यायवत् मर्कटवदवलम्बितं स्वप्नेऽपि न जहाति । तद्वच्छिष्योऽपि दृढं गुरुमुपपन्नवान् । तस्य विशेषणं गुरोः यः पूर्वम् अध्यारोपं ब्रह्मात्मनि विश्वारोपप्रक्रियाम् अपवादं निरसनक्रमं चास्य कारुण्यत एव प्रोच्य[4] न तु द्रव्यादिसमर्पणेन निजस्वरूपे स्वस्थाने स्वात्मसाम्राज्ये स्वमात्मानमनायासेन ह्यस्थापयत् । प्रतिष्ठापितवानिति पूर्वेण सम्बन्धः ॥३॥

गुरुरपि स्वकृतोपदेशसाफल्यज्ञानाय शिष्यानुभूतिं पृच्छति — च्छायेति ।

**च्छायावदेनं तमनुव्रजन्तं**
**श्रीदेशिकेन्द्रोऽवददादरेण ।**
**त्वं साक्षिमात्रोऽसि मनः स्वरूपे**
**निःसंशयं तिष्ठति तद्वदस्व[5] ॥४॥**

१. ''त्वाम्'' इति पाठः। अत्र ''त्वम्'' इति पाठः स्यात् ?
२. प्रयोगोऽयम् अपाणिनीय इति भाति, अत्र ''प्रोच्याऽस्य'' इति पाठः पाणिनीयः ।
३. ''रजस्तमोवसना'' इति पाठः ।
४. ''प्रोक्त्वा'' इति पाठः अपाणिनीयः। अत्र ''प्रोच्य'' इति पाठः स्यात्। सैवात्र स्थापितः।
५. अपाणिनीय इति भाति । ''वद-व्यक्तायां वाचि'' (धा.पा. १००९) इति भ्वादिगणस्थधातुः परस्मैपदी । महाभारतादिषु (१२.३.३७) धातोरस्य आत्मनेपदप्रयोगोऽपि दृश्यते ।

यथा पुरुषमनुसरति तद्वदेव देशिकमेनमनुसन्तमपरित्यजन्तं शिष्यमादरेण प्रेम्णाऽवदत्। भो शिष्य! त्वं सर्वत्र साक्षिमात्रः असङ्गोदासीनः वर्तसे। तव मनश्च निःसंशयं निर्विक्षेपं सत्स्वरूपे विश्राम्यति तद्वद ॥४॥

सर्वे संशया गताः, कृतार्थोऽहमभवं भवत्कृपयेत्याह शिष्यः — इतीति।

**इत्येवं भाषमाणं निजगुरुमथ तं स प्रणम्याथ शिष्यो**
**जन्मारण्येऽतिमोहोद्भटतिमिरयुते भेदसंज्ञाः पिशाचाः।**
**युष्मत्कारुण्यशैलोत्थितभवदुपदेशाब्जबन्धोर्मयूखे-**
**ष्वादीप्तेष्वन्तरङ्गे[१] मम कथमुदयं प्राप्तवन्तो भवेयुः ॥५॥**

एवं पूर्वोक्तप्रकारेण पृच्छन्तं स्वहितोपदेष्टारं गुरुं तं प्रणम्य शिष्योऽपि[२] कयाचिद्वचनभङ्ग्या निरूपकन्यायेन सर्वे मे संशया गताः, स्वच्छः प्रसन्नश्चाहं निवृत्त इतीह जन्मारण्ये संसारकान्तारे अत्यन्तमतिमात्रं वा, मोहः प्रमादः एव तिमिरम्। तत्संयुक्ते भेदसंज्ञाः बहुविधसंज्ञाः पिशाचाः युष्मत्कारुण्यरूपाद् उदयपर्वतादुत्थितः भवदुपदेश एव सोपपत्तिकं श्रुतिप्रमाणवाक्यान्येव सूर्यरश्मयः तेष्वादीप्तेषु[३] सर्वतो व्याप्य प्रकाशमानेषु अन्तरङ्गे मम हृदि अवकाशं प्राप्तवन्तो भवेयुः स्युः। सर्वविभ्रमनिवृत्त्या सुख्यहं विश्रान्त इति यावत् ॥५॥

तस्य[४] देहपातजीवन्मुक्तिसुखानुभवाय सौषुप्तमौनमज्ञातचरितं वाऽवलम्ब्य कालन्नयेति गुरुराज्ञापयेदिति विचार्यैव पुनरपि प्रष्टव्यं किञ्चिदस्ति मे चेति पृच्छति सदृष्टान्तं कृतकरणदोषपरिहाराय — मन्त्रज्ञेति।

**मन्त्रज्ञेन युते पिशाचनिवहे भूयोऽप्यनिष्पत्तये**
**यन्त्रं साधु विलिख्य यद्वदभयं लोको विधत्ते गुरो!।**
**तद्वत्त्वद्वचनामृतैरपि गते सम्मोहवर्गेऽखिले**
**विज्ञाप्यं मम किञ्चिदस्ति भगवन्! विज्ञानवृद्ध्यै चिरम् ॥६॥**

१. "...दीप्रेष्वन्तरङ्गे" इति पाठः। अत्र अर्थानुरोधेन "...दीप्तेष्वन्तरङ्गे" इति पाठस्स्यात्।
२. "शिष्योप्य" इति पाठः
३. "तेष्वादीप्रेषु" इति पाठः। अत्र "तेष्वादीप्तेषु" इति पाठः स्यात्?
४. "तस्या" इति पाठः।



मन्त्रज्ञेन मन्त्रसिद्धेन पुरुषेण युते प्रोत्सारिते पिशाचनिवहे भूतप्रेतगन्धर्वादि-ग्रहजाते भूयोऽपि पुनरपि कालान्तरेऽप्यसम्भवाय लोके यन्त्रं सुवर्णमयं मन्त्राक्षरलसितं विलिख्य रचयित्वा पुनरप्यभयं रक्षाबन्धादिना करोति इति किल लौकिकी प्रसिद्धिः। दृश्यते च तथा त्वदुपदेशवाक्यार्थसारैः। सर्वेऽपि मोहराशौ गलितेऽपि मम किञ्चित्प्रष्टव्यमस्ति। तच्चाधिगतज्ञानदार्ढ्याय चित्तविश्रान्तये इति प्रश्नार्थः ॥६॥

तथा चेत्पृच्छस्वेत्यनुवदन्तं गुरुं पृच्छति।

**विध्यागमेन परतत्त्वमिति स्मवाचा-**
**मत्यन्तदूरमिति चाह भवान् परत्र।**
**वेद्यं हृदेति नितरां मनसोऽप्यवेद्य-**
**मित्यन्यतो विशययुग्ममपाकुरु त्वम् ॥७॥**

परतत्त्वं परं ब्रह्मागमे नोपनिषत्प्रमाणेन त्वं विद्धि जानीहि "**तं त्वौपनिषदं पुरुषं पृच्छामि**[१]"। अन्यैः प्रमाणैः त्रिभिरप्यवेद्यम् "**वेदान्तविज्ञान-सुनिश्चितार्थाः**[२]" इति श्रुतयः "**शास्त्रयोनित्वात्**[३]" इति न्यायाच्च। तथा क्वचिद् ब्रुवन्ति वाचामत्यन्तदूरे वर्तते। सर्वथाऽविषयमेव। "**यतो वाचो निवर्तन्ते**[४]", "**यद्वाचानभ्युदितम्**[५]" इति च। अन्यत्र भवानेव वेदाचार्यरूपेण उपदिष्टवान्। यद्यपीतः पूर्वस्मिन् ग्रन्थभागे तथा साक्षाद्गुरुवाक्यं नोपलभ्यते तथापि श्रुतौ तथाप्रतिपादनदर्शनात्तद्वाक्यं गुरुवाक्यमेवेति चाह भवान् परत्रेत्याह। किं च हृदा मनसा वेद्यं ब्रह्म। "**मनसैवेदमाप्तव्यम्**[६]", "**दृश्यते त्वग्र्यया बुद्ध्या**[७]" इति च श्रुतिवाक्यमस्ति। अन्यत्र च नितरां मनसाऽप्यवेद्यमविज्ञेयमेव ब्रह्मेति। अत उभयविधवाक्योत्थं संशययुग्ममेकजातं निवारयेति ॥७॥

१. बृह.उ. ३-९-२६
२. मुण्ड.उ. ३-२-६; कैव.उ. ३
३. ब्र.सू. १-१-३
४. तै.उ. २-४-१
५. के.उ. १-४
६. कठ.उ. १-२-११
७. कठ.उ. १-३-१२

आद्यस्योत्तरमिदमुच्यते — अन्यैरिति ।

**अन्यैः प्रमाणैः त्रिभिरप्यवेद्यं**
**जातिक्रियाभूतगुणाद्यभावात् ।**
**अगोचरं वाच इतीरितं मे**
**वेदप्रमाणेन सुवेद्यमेव ॥८॥**

अन्यैः प्रमाणैः प्रत्यक्षादिभिस्त्रिभिरर्थापत्त्यादीनामप्यत्राभेदः । अवेद्यमेव ब्रह्मणोऽतीन्द्रियत्वाज्जात्यादिचतुष्टयानां शब्दप्रवृत्तिनिमित्तानाम् अभावाच्च हेतोः ब्रह्मागोचरं वाच इतीरितं मे मया वेदाचार्यरूपेण। तदेव ब्रह्म वेदप्रमाणेन वेदार्थतात्पर्यविचारजन्यप्रमया सुवेद्यमेव । सुष्ठु सम्यग्ज्ञातव्यमेव। ''**नावेदविन्मनुते तं बृहन्तम्**[1]'', ''**वेदाहमेतं पुरुषं महान्तम्**[2]'' इति शासनादित्यर्थः ॥८॥

ननु उभयया प्रतिपादकस्य वाक्यद्वयस्य समस्य कथमप्रमाणत्वम् इत्याशङ्क्य सामान्यविशेषविधानादिवदत्रापि तदाशयं दर्शयति — वाचामिति ।

**वाचां सुदूरमिति या परतत्त्वमाह**
**सैव श्रुतिर्वदति वाग्विषयं हि वस्तु ।**
**किं वा प्रमाणमिति चेद्वचनद्वयेऽपि**
**सत्यद्वयं च न मृषैव कदापि वेदः ॥९॥**

वाचां प्रमाणवाक्यानां पराग्विषयाणां सुदूरमिति। दूरं परतत्त्वमिति या श्रुतिः पूर्वं दर्शिता कथितवती सैव तदेव वस्तु वाग्विषयं वदति उपनिषदधिकारे स्थित्वा सा ''**परा यया तदक्षरमधिगम्यते**[3]'' इत्यादिना वचनयुगले किं प्रमाणमिति चेद्यद् ग्राह्यं किं त्याज्यम् इति चेत्तथा त्वं मा पृच्छः । यतो ''**न हि वेदविहितं किञ्चिदकर्तव्यतामियात्**[4]'' इति भाष्यवचनात् उभयमपि वचनं

---

१. तै.ब्रा. ३-१२-९-७; शाट्या.उ. ४; इति.उ. २०

२. श्वे.उ. ३-८

३. मुण्ड.उ. १-१-५

४. ब्र.सू.शां.भा. २-१-२२ (पाठोऽयं भाष्ये न दृश्यते किन्तु उपलभ्यमाने भाष्ये ''न हि तस्य हितं किञ्चित्कर्तव्यमस्ति'' इति पाठ उपलभ्यते । पृ. ४७२) द्रष्टव्यम् - ब्र.सू.शां.भा. ३-२-१५ ''न हि वेदवाक्यानां कस्यचिदर्थवत्त्वं कस्यचिद् अनर्थवत्त्वमिति युक्तं प्रतिपत्तुम्''।



सत्यमेव । यतः कदापि भूमौ वेदश्रुतिः मृषा मायालीकवञ्चनादिदोषेण व्यभिचरितविषया न भवेत् । अपौरुषेयत्वेन वेदप्रमाणस्य पूर्वाचार्यैरभ्युपगतत्वादिति यावत् ॥९॥

तर्हि कथमविषयं ब्रह्म वेदो बोधयतीति शङ्कानिवृत्तयेऽतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च वेदान्तानां प्रवृत्तिः स्यादिति पूर्वाचार्यदर्शितन्यायमाश्रित्य तदुत्तरमाह सदृष्टान्तं — पृष्टेति ।

**पृष्टाऽऽलीभिर्दयितमबला नेति चान्यान्निरस्य**
**स्वप्राणेशं विनतवदना दर्शयामास मौनात् ।**
**यद्वत्तद्वच्छ्रुतिरपि सती नामरूपे निरस्य**
**ब्रह्माद्वैतं वदति परमं मौनवृत्त्या च साक्षात् ॥१०॥**

अबला काचन सती दयितमतिवल्लभं स्वप्राणनायकं विष्णुगुप्ताभिधम् आलीभिः स्वसखीजनैरेव प्रतिपृष्टा — त्वत्पतिः देवदत्तो यज्ञदत्तो वेति वदेति । प्रेरिताऽपि तदनुक्तौ तदहितकरणसख्यभङ्गदोषम् उक्तौ च मर्यादाभङ्गकृतदोषं च मनसा विचार्य किमप्यब्रुवाणा पुनरालीभिरेव वदस्वेति प्रेरिता विष्णुमित्रादीनयं वा स वा चेति तान् सर्वान् अनभिमतान्निरस्य नायमिति निवार्यानन्तरं तमेव विष्णुगुप्तं परिशिष्टं पृष्टा विलज्जमाना मौनाद्वचनेनैव दर्शयामासेति यथा तद्वदेव दार्ष्टान्तिकेऽपि सती क्वचिदप्यव्यभिचरन्ती निर्दुष्टा वेदलक्षणा सरस्वती नामरूपे निरस्य ''**अथात आदेशो नेति नेति**[1]'' इत्यादिना [2]निषेधाद्वैतमेकरसं ब्रह्म परमं सकलनिषेधावधिभूतं मौनवृत्त्याऽवचनेनैव प्रोवाच इत्यादिसम्प्रदायलब्धप्रत्यक्प्रवणवृत्त्यैव वदति। कदाचित्साक्षाद्विधिमुखेन च ''**सत्यं ज्ञानमनन्तं ब्रह्म**[3]'' इति वदतीत्यभिप्रायः । तथा चोक्तं व्यासादिभिः ''**शब्दोऽपि बोधनिषेधतयाऽऽत्ममूलम् । अर्थोक्तमाह यदृते न निषेधसिद्धिः**[4]'' इति ॥१०॥

एवं प्रथमप्रश्नस्योत्तरमुक्त्वा द्वितीयप्रश्नं वक्तुमुपक्रमते — इत्थमिति ।

---

१. बृह.उ. २-३-६

२. ''निषेद्धा...'' इति पाठः।

३. तै.उ. २-१-१

४. भा.पु. ११-३-३६ (भागवतपुराणे श्लोकोऽयं ''...बोधकनिषेधतया'' इति रूपेण दृश्यते ।)

**इत्थं विहाय प्रथमं च संशयं**
**शृणु त्वमन्यस्य निरासवाक्यम् ।**
**सर्वेन्द्रियाणां पतिरन्तरङ्गं**
**बुद्ध्यादिभेदेन चलत्यजस्रम् ॥११॥**

आद्यस्य समाहितत्वाद् द्वितीयस्योत्तरं वक्ष्यमाणं शृणु। सर्वेषामिन्द्रियाणां श्रोत्रादीनां करणानां पतिः प्रधानमन्तरङ्गम् अन्तःकरणं समष्टिसत्त्वोत्पन्नत्वाद् इत्युक्तम्[1], तव अहमिदमात्मकवृत्तिभेदेन सदा परिणमते। तथा चोक्तम् ''**कर्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिन्द्रियम्। विज्ञानं स्यादहं वृत्तिरिदं वृत्तिर्मनो भवेत्**[2]'' इति।

अयमाशयः यथा स्वभावतोऽच्छं तटाकोदकं छिद्रादिद्वारा बहिर्निर्गत्य कुल्यात्मना केदारादिकं प्रविश्य तद्गतचतुष्कोणताद्याकारं भासते, तद्वदिदमप्यन्तःकरणमपञ्चीकृतभूतोत्थत्वेन तैजसं चिदाभाससंवलितं सत्त्वमयमपि चक्षुरादिद्वारा प्राग्विषयदेशं गत्वा तत्तदाकारेण परिणमते। तथा परिणाम एव वृत्तिरिति कथ्यते। ''**कामः सङ्कल्पो विचिकित्सा**[3]'' इत्यारभ्य ''**सर्वं मौन एव**[4]'' इति अन्तःकरणस्य बहुविधवृत्तिमत्वप्रतिपादनश्रुतेश्चेत्यर्थः ॥११॥

एवमन्तःकरणं प्रदर्श्य चिदाभासमपि पृथग्दर्शयतुमाह — आदर्शेति।

**आदर्शान्तरिव त्वदीयवचनं च्छायैव बुद्धौ चिते-**
**श्चिशद्दधाति तदध्वनैव विषयान् गृह्णात्यशेषात्मनः ।**
**चैतन्यं न हि केवलं च हृदयं जानाति किञ्चिद्यतो**
**वृत्तिज्ञानमिदं वदन्ति कवयश्चैतन्ययुक्तं मनः ॥१२॥**

दर्पणमध्ये मुखादिप्रतिबिम्बवच्चितेरात्मनः च्छायाभासः बुद्धौ विज्ञाने प्रतिफलिता सती चिद्दधाति। तदध्वनैव चिदाभासमुखेनैव सर्वान् बाह्यान् गृह्णाति।

१. प्रथमप्रकरणस्य ३७ तमे श्लोके उक्तम्।
२. प.द. ३-८
३. बृह.उ. १-५-३
४. बृह.उ. १-५-३



तत्तज्जडविषयाऽज्ञाननिवृत्तिद्वाराताननुभवति। मनः मनुते नेति[1] मनः अन्तःकरणवृत्तिरिति यावत्। यतः केवलमसङ्गं चैतन्यमात्मा तदाभासो वा जीवः न किञ्चिदपि जानाति। हृदयं चात्मानुप्रवेशमन्तरा न किञ्चिदप्यवगच्छति। अतश्चैतन्ययुक्तं मनः अन्तःकरणसंवलितमात्माभासं वा वृत्तिज्ञानमिति कवयो मेधाविनः निरूपयन्ति। ''**चिदाभासान्तधीवृत्तिज्ञानबोधेऽध्यासबुद्धिः**[2]'' इति वचनात् ॥१२॥

विवेचनफलमाह — तप्तेति।

**तप्तस्ताम्ररसोऽग्निना परिणमत्यश्वादिरूपं यथा**
**चेतोवृत्तिरियं तथा घटपटाद्याकारिणी जायते।**
**आभासोऽपि चितः प्रकाशयति तान्सर्वान्पटादीन्वपु-**
**र्द्रष्टुं वस्तु तमोगतं च नयनं दीपं जनो वाञ्छति ॥१३॥**

अग्निना तप्तः ताम्रद्रवः अश्वादिप्रतिमारूपं परिणमते तथा चेतोवृत्तिरपि इयमिदमात्मिका घटपटाद्याकारिणी सञ्जायते। चितः आभासोऽपि तदेव फलचैतन्यमित्युक्तम्। तान् वृत्तिव्याप्तान् घटाद्यर्थान् प्रकाशयति। स्वात्मतादात्म्येनावभासयति। अयं घटः पट इत्यादिव्यवहारयोग्यान् करोति। अतो विषयावगतौ द्वयमप्यपेक्षते। लोकः तत्र दृष्टान्तः। तमोगतं तमसाऽऽवेष्टितम् अपवरकादिस्थितं वस्तु द्रष्टुमुपलब्धुं चक्षुरिन्द्रियं दीपं च वाञ्छति काङ्क्षति। द्वाभ्यां विना तद्दर्शनायोगादिति यावत् ॥१३॥

तत्रापि विशेषमाह — दीप्तेति।

**दीपश्चक्षुरिति द्वयश्च तिमिरे वस्त्वर्थ्यते वीक्षितुं**
**चक्षुर्मात्रमपेक्षते दिनकरं द्रष्टुं च सर्वैर्जनैः।**
**लोकं विस्तरभाजमीक्षितुमियं वृत्तिः फलं चोभयं**
**प्रार्थ्यं तत्परमं पदं स्वविषयीकर्तुं हि वृत्तिस्त्वलम् ॥१४॥**

तिमिरगतं वस्तुदृष्टये दीपश्चक्षुः चेति द्वयमप्यपेक्षते। दिनकरं स्वप्रकाशं चक्षुषोऽप्यनुग्राहकं द्रष्टुं विषयीकर्तुं चक्षुरेकमेव सर्वैरपेक्ष्यते। आदित्यस्य

१. ''नेनेति'' इति पाठः।
२. मूलं मृग्यम्।

पराग्रूपत्वेऽपि तद्दर्शने पूर्वदर्शितन्यायः दूरापेतस्तथा विस्तरभाजं बहुविस्तारयुक्तं लोकं प्रपञ्चबाह्यविषयजातं द्रष्टुं वृत्तिः फलं च द्वयं प्रार्थ्यमेव। तत्स्वप्रकाशमजडं परमं प्रत्यगभिन्नं साक्षात्कर्तुं वृत्तिवाक्यार्थविचारोत्पन्ना तदाकारवृत्तिरेकैवालम्। ''**ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षते**[1]।'', ''**फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्**[2]'' इति वचनाच्चेति यावत्॥१४॥

पूर्वोक्तद्वितीयाशङ्कायाः[3] उत्तरमिदमित्याह — वृत्तेरिति।

**वृत्तेः फलस्य विकृतिं हृदयं वदन्ति**
**ब्रह्मातिथिर्हि मनसः फलवर्जितस्य।**
**युक्तं फलेन न हि पश्यति वस्तु चित्तं**
**ज्ञात्वार्थ ईदृश इति प्रतियाहि शान्तिम्॥१५॥**

वृत्तेरिदमाकारपरिणममानायाः कारणत्वोपाधेः फलस्य चिदाभासस्य च विकृतिं तादात्म्यविकारमेव केचन हृदयं वदन्ति। तत्रापि फलवर्जितस्य मनसश्चिदाभासवियुक्तस्य प्रत्यङ्मुखस्य मनसः तद्वृत्तेः ब्रह्मप्रत्यगभिन्नम-तिथिर्विषयः यतः फलेन जडजातस्फुरणहेतुकेन चिदाभासरूपेण युक्तं चित्तं ब्रह्मवस्तुतत्त्वं न पश्यति। अतः अयमेवार्थः ''**मनसैवेदमाप्तव्यम्**[4]'' इत्यादिश्रुतेः तात्पर्यार्थ इति ज्ञात्वा शान्तिं विश्रान्तिं प्रतियाहि प्राप्नुहि॥१५॥

प्रदीपज्वालेव वृत्तिसन्तानरूपेण[5] परिणममानं चित्तमित्युक्तम्। तन्निर्विकल्पं कथं स्यादिति शिष्यः पृच्छति — इत्थमिति।

**इत्थं वाचं दधाने पुनरपि स गुरौ प्राह शिष्योऽमलात्म-**
**न्नुक्त्वा चाञ्चल्यदोषं परनभसि मनश्चेद्विलीनं समाधिः।**
**डोलालोलस्वभावं सदथ निमिषतोऽभ्येति नानास्वरूपं**
**यच्चित्तान्तर्निवातस्थितलसितमहादीपतुल्यं कथं स्यात्॥१६॥**

---

१. पं.द. ७-७२ (पञ्चदश्या ''...वृत्तिव्याप्तिरपेक्षिता'' इत्यपि पाठः उपलभ्यते। पृ. ३१५)
२. पं.द. ७-९०
३. ''...द्वितीयाशङ्का'' इत्येव पाठः।
४. कठ.उ. २-१-११
५. ''...सन्तारूपेण'' इति पाठः।



इत्थमेवं वाचं द्वितीयप्रश्नसमाधानवाक्यं दधाने गुरौ शिष्यः प्राह वक्ष्यमाणार्थं पृष्टवान्। भोः स्वामिन्! सद्गुरो! मनः स्वभावतश्चञ्चलमपि तद्दोषं त्यक्त्वा परनभसि चिदाकाशे भूमात्मनि विलीनं चेत्तदेव समाधिः। ''**ध्येयैकगोचरं चित्तं समाधिः**[1]'' मनः प्रचारशून्यं परमात्मनि लीनं भवतीति श्रुतेरवगम्यते।

सामान्यतस्तु मनः डोलेवान्दोलिकेव लोलस्वभावं सत् निमिषतो निमेषमात्रेण नानास्वरूपमभ्येति। ''**घटात्पटमुपायाति पटाच्छकटमुत्कटम्। चित्तमर्थेषु चरति पादपेष्विव मर्कटः**[2]'' इति वासिष्ठोक्तेः। तच्चलं मनः निवातस्थले निवातप्रदेशे लसितमहादीपेन प्रतिष्ठापितदीपेन तुल्यं कथं केन वा योगेन भवेत्? अयमाशयः यथा जलाद् द्रवत्वं निवारयितुं न शक्यते वह्नेर्वौष्ण्यम्, तथा चित्ताद्वृत्तिरूपेण पुनर्जायमानकर्तृत्वादिनिवारणदुर्घटं प्रतिभातीति॥१६॥

पूर्ववासनैव चित्तचलनकारणम्, तन्निवृत्तिं न चाञ्चल्यमपि निवर्तत इति वक्तुं मनसः गुणात्मकं दर्शयति — श्रुत्वेति।

**श्रुत्वेत्थं पुनराह शिष्यवचनं श्रीमानसौ देशिको**
**हृत्सङ्कल्पविकल्पवक्तृगुणकन्यूनं सदैकाधिकम्।**
**दैवीं सम्पदमेति सत्त्वसहितं चेन्मानसं वासना-**
**युक्तं चेद्रजसाऽऽसुरीरपि तमोयुक्तं तु दुःसम्पदः॥१७॥**

इत्थं शिष्यवचनं चित्तशान्त्युपायवेदनार्थकप्रश्नवाक्यं श्रुत्वोक्तवान्। त्रिगुणकं त्रिगुणात्मकमपि हृदन्तःकरणं सङ्कल्पविकल्पवदेव। सङ्कल्पः ''**सङ्कल्पो निश्चयो गर्वः स्मरणं विषया इमे**[3]'' इति वचनात्सङ्कल्पो मानसधर्मः। विकल्पस्तु मानसः प्रत्ययविशेषः। ''**शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः**[4]'' इति योगशास्त्रोक्तलक्षणवृत्तिविशेषो वा। सदैकाधिकमेकेन सत्यादिनाऽधिकं प्रधानं न्यूनं द्वाभ्याम्। तत्र मनसः सत्त्वसहितं सत्त्वगुणाधिकं पूर्वजन्मकृततपोविशेषाद्यदापि

---

१. पै.उ. ३-२
२. अ.उ. ३-६ (तत्र ''पटाद्धटमुपायाति'' इति पाठो दृश्यते।)
३. मा.ला. २-३६ (श्रीदक्षिणामूर्तिस्तोत्रस्य मानसोल्लासाख्ये व्याख्याने ''संशयो निश्चयो गर्वस्स्मरणं विषया अमी'' इति पाठः उपलभ्यते। पृ. ५४)
४. यो.सू. १-९

भवति तदा दैवीं वेदनामियं सम्पत् । ''**अभयं सत्त्वसंशुद्धिः**[१]'' इत्यादिभगवद्वचन-प्रदर्शिता तामेति । रजसा रजोगुणेन सहितं वासनाः कामरागादिधर्मान् प्राप्नोति । तमसा युक्तं तदेव मनः दुःसम्पदो दुष्टानाम् असुराणां सम्पत्, हिंसादिलक्षणा राक्षसी च सा तामेति चलं गुणवृत्तमिति । गुणसामान्यलक्षणस्य अभिहितत्वात् तदात्मकस्य मनसोऽपि चाञ्चल्यं स्वाभाविकमिति दर्शितम् ॥१७॥

यद्यपि गुणात्मकत्वं मनसस्तथापि सत्त्वप्रधानमत एव स्वच्छतरं च तदिति दर्शयति — स्वरूपमिति ।

**स्वरूपं सत्त्वाख्यो गुण इह हृदो द्वावथ परौ**
**समायातौ त्यागादुपशमनमभ्येष्यत इमौ ।**
**स्थिरे सत्त्वे नष्टा घनपरिणतिश्चञ्चलदशा**
**मनः स्वच्छाकाशप्रतिममथ तिष्ठेत् परपदे ॥१८॥**

हृदो मनसः सत्त्वसंज्ञो गुणः स्वरूपं स्वाभाविको धर्मः । अथ क्रमेण द्वौ परौ तदन्यौ रजोगुणतमोगुणौ त्यागात् सत्त्ववृद्धिकरसत्त्वमूर्तिध्यानादिरूपोपायेन रजस्तमो वृत्तिशोधनेन तावुपशान्तिमभ्येष्यतः । तत्रायं त्यागक्रमः । तमो द्वाभ्यां रजः सत्त्वात्सत्त्वं शुद्धेन नश्यति । तस्मात्सत्त्वमवष्टभ्य स्वाध्यायापनयं कुर्विति उक्तः । सत्त्वे स्थिरे प्रवृद्धे क्षीणयोश्च रजस्तमसोः तद्द्वाराऽनयोश्च घनपरिणतिः निरन्तरविषयपरिणामरूपा मनश्चञ्चलदशा नष्टोपशान्ता भवति । तदानीं मनश्च स्वच्छाकाशप्रतिमं सन्निर्मलमपि[२] पूर्णाकाशोपमं परपदे परमात्मनि तिष्ठेत्स्थितिं प्राप्नुयात् । ''**रजस्तमश्चाभिभूय सत्त्वं भवति भारत**[३]'' इत्यादिभगवद्वचनात् इत्यर्थः ॥१८॥

तदानीं स्वरूपनाशावस्थामधिगतस्य मनसो न कदाचिदपि चलनमुपपद्यत इति सदृष्टान्तं दर्शयति — आदर्शेति ।

---

१. भ.गी. १६-१
२. ''...निर्मला'' इति पाठः।
३. भ.गी. १४-१०



**आदर्शे निष्कलङ्के भवति यदि परो दर्पणो निष्कलङ्कः**
**तद् द्वौ लब्ध्वैकभावं सुचिरमपि यथा निर्विकल्पौ भवेताम् ।**
**मानैर्मातुं सुदूरे गगनवदभितो व्यापके सच्चिदब्धौ**
**लीनं चेतो यदि स्यात् क्व च जगदिदं लोलता वा क्व शङ्का ॥१९॥**

निष्कलङ्के धूलिधूसरादिकलङ्करहिते स्वच्छे दर्पणे तादृग्विध एवं परो दर्पणः प्रदर्शितश्चेदन्योन्यन्न प्रतिबिम्बते । द्वावपि तौ एकभावं लब्ध्वा सुचिरं बहुकालं निर्विकल्पौ निर्भेदौ स्याताम् । तद्वदेव मानैः प्रत्यक्षादिभिः विज्ञातुं सुदूरे आकाशवत् सर्वपूर्णे सच्चिदानन्दात्मनि चेतो लीनं चेत्तदानीं क्व च जगदिदं तद्विषयालोलता वा । तत्प्रयुक्तशङ्का न क्वापि सम्भवतीत्यर्थः । ''**चित्तं ब्रह्मरसं स्पृष्ट्वा नैवोत्तिष्ठेत किञ्चन**[१]'' इति वचनादिति यावत् ॥१९॥

ननु मनसः सद्भावासद्भावपक्षयोर्जीवन्मुक्तिव्यवहारो न सिध्येदिति पृच्छति — ब्रह्मैकत्वमिति ।

**ब्रह्मैकत्वं गतानामिह जगति सतामावपुः पातमेषां**
**स्यात्प्रारब्धस्य भोगः कथमिह भविता चेन्मनो नैव नश्येत् ।**
**नष्टं चेतो यदि स्याद्भवति न हि मनाक् भोगगन्धं स्फुरेच्चेत्**
**चेतो मुक्ता न हि स्युर्मम विशयमिमं च्छिन्धि विद्वन्सुखाप्त्यै ॥२०॥**

ब्रह्मैकत्वं गतानां देहाद्यात्मत्वभ्रमं विहाय अहमेव परं ब्रह्मेत्यात्मनः ब्रह्मानन्दस्वरूपतामापन्नानामिह लोके यत्र कुत्र वा वर्णाश्रमादौ वर्तमानानां ब्रह्मविदां प्रारब्धस्य कर्मणो भोगमन्तरा शक्यपरिहारस्य भोगोऽनुभवः सुखादिसाक्षात्कारश्च भोगः कथं स्यात् । चित्तवृत्तिर्विना भोगानुभवायोगात् स चेत्स्याद्भोगः, मनोऽपि नैव नश्येत् । यदि चेतो नष्टमेव परावरदर्शनेन पूर्वमेव हृद्ग्रन्थेर्विनष्टत्वान्निवर्तमेव स्यात् तर्हीषदपि भोगलेशं न भवेदेव । वृत्तिमच्चेतो विनाशेन तद् वृत्तेरप्यसम्भवे साधनाभावात् । प्रारब्धभोगासम्भव एव स यदि स्यात् चेतोमुक्ता न हि स्युः । यदि विदुषां चेतस्तस्य जडत्वाच्चित्तादात्म्यं विना किञ्चिदपि कर्तुं भोक्तुमसमर्थं सत्तटस्थमेव भवेत् । अतो भोगदानाय चिदाभासाद्यपेक्षायां मुक्ता एवैते ब्रह्मविद

---

१. ?

इति वक्तुं न शक्यते इत्येवमुत्पन्नं मम संशयं च्छिन्धि निःसन्देहानुभूतय इति ॥२०॥

तदुत्तरं वक्तुं मनोनाशस्य द्वैविध्यं कथयति — इत्थमिति ।

**इत्थं पृष्टवते जगाद स पुनर्द्वेधा मनस्संक्षयो**
**जीवन्मुक्तियुजां सरूप इति चारूपो विदेहात्मनाम् ।**
**उज्झित्वैव रजस्तमश्च हृदयं सत्त्वात्मकं चेत्सरू-**
**पो नाशः स तु लिङ्गदेहविलये सत्त्वक्षयो रूपकः ॥२१॥**

इत्थं पूर्वोक्तरीत्या पृष्टवते प्रश्नं कृतवते शिष्याय देशिकोऽप्युत्तरमुक्तवान् । मनः संक्षयो मनोनाशः द्वेधा द्विप्रकारः सरूपोऽरूपश्चेति । जीवन्मुक्तानां निवृत्तहृदयग्रन्थ्यादिबन्धानां साक्षात्कृतब्रह्मभावानां विदुषां सरूपनाशः प्रारब्धावसाने विदेहमुक्तवाच्यानां तेषामरूपो नाशः । ''**सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते । निदाघाऽरूपनाशस्तु वर्तते देहमुक्तके**[1]'' इत्युक्तत्वात् । उभयलक्षणं चाह — रजस्तमश्च तद्वासनावृत्तिः परिशोध्य त्यक्त्वा सत्त्वात्मकं सत्त्वैकप्रधानम् । उपशान्तिर्विक्षेपश्च मनः सरूपो नाशः । लिङ्गभङ्गसमये लिङ्गशरीरावसाने लिङ्गनाशस्य द्वे कारणे — सामग्रीनिवृत्तिः प्रबलतरयोगाभ्यासश्च । सामग्री च प्रारब्धकर्मादिरूपा[2] तदवसाने च लिङ्गभङ्गः, सत्त्वप्रधानस्य मोहलेशावष्टम्भस्य मनसः नाशः। तत्प्रतिभासनाशः अरूपनाश इति । तथा चोक्तम् ''**विदेहमुक्ति-विषये पदे परमपावने । चित्तनाशे विरूपाख्ये न किञ्चिदवशिष्यते॥**[3]'', ''**विदेहमुक्त एवासौ विद्यते निष्कलात्मकः । समग्राग्र्यगुणाधारमपि सत्त्वं विलीयते॥**[4]'' इति वचनात् ॥२१॥

ननु निर्वासनमनस्कानामपि प्रारब्धभोगः आभासानुवृत्त्या घटत इत्युक्तम्, तथापि सर्वत्राभिमानस्येव प्रवर्तकत्वात् सम्यक् ज्ञानिनामभिमानपूर्वकं प्रवृत्त्ययोगात् कथं व्यवहृतिरिति पृच्छन्तमन्वाह — चित्तमिति ।

१. अ.उ. ४-१८
२. ''...कर्मादिरूपः'' इति पाठः।
३. अ.उ. ४-१९ पूर्वार्धम् २० उत्तरार्धम्। (उपनिषत्सङ्ग्रहे ''विदेहमुक्तिविषये तस्मिन् सत्त्वक्षयात्मके'' इति पाठ उपलभ्यते ।)
४. अ.उ. ४-१९ (''...सत्त्व प्रलीयते'' इति पाठः ।)



**चित्तं सत्त्वस्वरूपं किल यदि रजसा याति साकं तमश्चेत्-**
**चित्ताख्या नैव जातन्त्वनुभवति गतं भावि काङ्क्षेन्न मुक्तः ।**
**अम्लानः कर्तृताया विगलितहृदयः[1] कर्तृभावेन तुष्टः**
**साक्षी सर्वेन्द्रियाणामपि विषयपरो नैव लिप्येत विद्वान् ॥२२॥**

चित्तं स्वभावतः सत्त्वमयं सत्त्वतत्त्वात् तथापि रजसा सह तमः याति चेत् मनसः सकाशाद्रजोगुणतद्दोषा निवारिताश्चेत्तदानीं चित्तस्य चित्तमित्याख्या नैव भवेत् । अविचारमूलाज्ञानफलितस्य चित्तस्य विचारविवेकजनितज्ञानेन ब्रह्मभावम् आपन्नस्य चित्तमित्याख्यैव न भवेत् । सर्वं ब्रह्ममात्रं पश्यन् साक्षादवगतब्रह्मभावो विद्वान् गतमतीतं विषयजातं न स्मरति । भावि च न काङ्क्षेत् । यतोऽयं मुक्तः कर्तृताया हेतोः, अम्लानो ग्लानिहीनः, विगलितहृदयः विनष्टहृदयग्रन्थिश्च अकर्तृभावेनाकर्तृब्रह्मानुभवेन तुष्टस्तृप्तः । सर्वेन्द्रियाणां च साक्षिविषयपरोऽपि प्राकृतदृष्ट्या संसारीव दृश्यमानोऽपि नैव लिप्यते । न विषयैः संयुज्येत । प्रबुद्धस्य स्वप्नविलोकितार्थस्मरणवद् ग्रहग्रस्तनिद्रादिवदेव सर्वं करोति । तथा चोक्तं वासिष्ठे ''**यथा विपणगा लोका विहरन्तोऽप्यतसत्समाः। असम्बन्धात्तथा ज्ञस्य ग्रामोऽपि विपिनोपमः**[2]'' इति ॥२२॥

नन्वसङ्गव्यवहार एव ज्ञानिनोऽभ्युपगतः । व्यवहारसमाध्योरन्योन्यविरोधात् तमःप्रकाशादिवद्विरुद्धयोः कथमेकत्र सम्भवः इत्याशङ्क्य सदृष्टान्तमुत्तरमाह — व्यापारेति ।

**व्यापारे सत्समाधिर्यदि भवति तदा स्याद्विकल्पोऽपि भूयां-**
**श्चेतो लौल्यं प्रयायाच्चलति यदि मनो लक्ष्यदार्ढ्यं न हि स्यात् ।**
**इत्थं वक्तोपमानं शृणु परपुरुषे सक्तचित्ता हि नारी**
**तत्तत्कार्याणि कुर्वन्त्यपि सुरतसुखं नैव मुञ्चेत्कथञ्चित् ॥२३॥**

सति व्यापारे ''**न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः सम्भवति**[3]''

१. ''विगलितहृदयो'' इति पाठः।
२. अ.उ. १-३३; यो.वा. (?)
४. ब्र.सू.शां.भा. अध्यासभाष्यम्, पृ. ४१

इति भाष्योक्तेः सर्वोऽपि व्यवहारः करणापेक्षः । ''**पराञ्चि खानि व्यतृणत्**[१]'' इत्यादिश्रुतेश्च । बहिः प्रवणस्वभावेषु तेषु कथञ्चित् समाधिः सति सन्मात्रे ब्रह्मणि समाधिश्चित्तस्य विलयो भवति यदि तदा भूयान् विकल्पो विरोधः स्यात्, समाधिविधायकशास्त्रे कथाभिधानात् । ''**यच्छेद्वाङ्मनसी प्राज्ञः**[२]'' इति श्रुतेश्च । चेतसो लौल्यं चाञ्चल्यं प्राप्नुयात् । ''**इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञाम्**[३]'' इति भगवद्वचनाच्च । यदि मनश्चलति लक्ष्यदार्ढ्यं प्रमादादिना लक्ष्यविच्युतिरेव स्यात् । ''**लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येन्द्रियं स्वस्थाने विनिवेश्य निश्चलतनुश्चावेक्ष्य देहस्थितिम्**[४]'' इति समाध्युपायाभ्यासबोधकभाष्यकारमतिविरोधश्च स्यात् इति चेत्पृच्छसि तत्रोपमानं शृणु । यथा व्यवहरन्नपि विद्वान् सदा समाहित एवेति तव निश्चयः स्यात् । परपुरुषे सक्तचित्ता स्वनायके वियुक्ते ।

यद्वा समीपस्थे जारे आवेशितचित्ता काचन स्त्री तत्तत्कार्याणि गृहोचितानि सम्मार्जनलेपनपाकादिरूपाणि कुर्वन्त्यपि ''**सुरतसुखं तत्सङ्गसौख्यं मनसाऽनुभवन्त्येव कथञ्चिन्नैव मुञ्चेत्**[५]'' इत्युक्त्वा इतरैर्वार्यमाणापि तत्पारवश्यं यात्येव । तथा चोक्तं वासिष्ठे ''**परव्यसनिनी नारी व्यग्रापि गृहकर्मणि । तदेवास्वादयत्यन्तः परसङ्गरसायनम् ।। एवं तत्त्वे परे बुद्धे धीरो विश्रान्तिमागतः ।**[६]'', ''**तदेवास्वादयत्यन्तः बहिर्व्यवहरन्नपीति । गाढम् आलिङ्ग्य मच्चित्तयोषा जारमिव प्रियम्**[७]'' इति वेदपादस्तुतौ । किन्त्रिमेन्द्रोपाख्यानेऽपि तथाऽवगम्यते ।।२३।।

ननु विदुषां निःसङ्गव्यवहारः न बाधक इत्युक्तं तन्न सङ्गच्छते । सर्वत्र

१. कठ.उ. २-१-१
२. कठ.उ. १-३-१३
३. भ.गी. २-६७
४. वि.चू. ३७९ (विवेकचूडामणौ ''...स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम्'' इत्यपि पाठो दृश्यते ।)
५. ?
६. यो.वा. ५-७४-८३,८४
७. ?



कर्तृत्वस्य दुःखरूपत्वात्तदभावे सुषुप्तादौ भोगादर्शनादित्याशङ्क्य तदनुवादपूर्वकं विद्वत् भेदं दर्शयति — देहेति ।

**देहाहन्तोज्झितस्य व्यपगतमलवद्भावनस्याप्यकर्तुः**
**ब्रह्माकारस्य भोगः कथमिह भविता यद्यकर्ता क्व भोगः ।**
**क्लेशव्रातादिवज्रायितवचनगुरो ! संशयं छिन्धि वेदि-**
**त्याख्यास्ये ते त्रयोऽमी जगति बहुमतास्ते महाकर्तृपूर्वाः ।।२४।।**

देहाहन्ता देहोऽहमिति तत्तादात्म्याध्यासः तयोज्झितस्य तन्मुक्तस्य स्वस्य सर्वसाक्षित्वानुभवात् स्वाप्निकदेहादाविव त्यक्तदेहाद्यभिमानिनः देहादितादात्म्यम् अहङ्कारस्य विद्यत इत्यभिहितम् । दृग्दृश्यविवेके —

''**च्छायाहङ्कारयोरैक्यं तप्तायःपिण्डवन्मतम् ।**
**तदहङ्कारतादात्म्याद्देहः चेतनतामगात् ।।**
**अहङ्कारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः ।**
**सहजं कर्मजं भ्रान्तिजन्यश्च त्रिविधं क्रमात् ।।**[१]'' इति च ।

अत एव व्यपगतमलवद्भावनस्य व्यपगता निवृत्ता मलवतो रागादिदोषवतो जीवस्य मनसो वा भावना यस्मात्तस्या त एवाकर्तुः, कर्तृत्वाभिनिवेशरहितस्य ब्रह्माकारस्य ब्रह्मभावमागतस्य विदुषः भोगः कथं केनेह लोके भविष्यति । ''**यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्**[२]'', ''**आत्मानं चेद्विजानीयाद् अयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्**[३]'' इति च श्रुतेः । विद्वानकर्तैव, तस्य भोगोऽपि भवेद्यदि सः क्व भवेत् । बालकादिवत्तदङ्गीकारे अपि स्वाधीनप्रवृत्तिः इष्टप्रयत्नादि अनिष्टनिवारणादिकमपि न स्वेच्छयोपपद्यते । मुग्धता च प्रसज्येत । क्लेशः अविद्यायाः तेषां व्रातः समूहः स एवाद्रिः पर्वतः तस्य वज्रायितं वचनं यस्य तत्सम्बोधनम् । तथैतमपि संशयं निवारयेति पृच्छसि चेत्तन्निर्णयम् आख्यास्ये वदिष्यामि ते । विदितवेद्या मुक्ताः त्रयः त्रिविधा भवन्ति । महाकर्ता महाभोक्ता महात्यागीति तत्र तत्र प्रतिपादिता बहुमताश्च महाव्रतोपेतत्वात् ।

१. दृ.वि. ७-८
२. बृह.उ. ४-५-१५
३. बृह.उ. ४-४-१२

''**महाकर्ता महाभोक्ता महात्यागी भवानघ**[१]'' इति श्रुतेश्चेत्यर्थः ॥२४॥

महाकर्तृलक्षणं तदनुभवश्च दर्शयति — यद्वदिति ।

**यद्वच्चुम्बकभूधरस्य पुरतोऽकर्तुर्ह्ययश्चेष्टते**
**किञ्चाकारयितुश्च विश्वमपि मे सर्वं पुरश्चेष्टते ।**
**देहादिन्द्रियवृत्तितोऽन्तरतमां वृत्तिं च पश्यन् स्वयं**
**भाम्यादित्यवदित्ययं वदति यः सोऽयं महाकर्तृकः ॥२५॥**

चुम्बकभूधरस्यायःकान्तपर्वतस्य सन्निधावकर्तुरपि स्वभावादेव ह्ययो लोहसूच्यादिकं चेष्टते भ्रमति, तद्वत् अकारयितुः कर्तृत्वादिप्रयोजकस्य च शब्दादकर्तुर्निरुपाधिकस्य त्यक्तसर्वसङ्गस्य विश्वं सर्वं देहेन्द्रियादिकञ्च स्वभावात् चेष्टते देहाद्भौतिकादस्मादिन्द्रियवृत्तितः इन्द्रियवृत्तिभ्योऽपि । यद्वा इन्द्रियेभ्यः चक्षुरादिभ्यः वृत्तितो मनसोऽप्यन्तरतमां प्रत्यक्तमां वृत्तिमात्ममात्रगोचरां पश्यन् स्वयमादित्यवदेवाहं तदा प्रत्यक् ज्योतिःस्वरूपः भामीति प्रकाशे इति यो वदति शिष्यायोपदिशति सोऽयं महात्मा महाकर्तृकः ॥२५॥

तदितरयोर्लक्षणमाह — षण्णामिति ।

**षण्णां न्यूनाधिकसमतया संस्थितानां रसानां**
**भुङ्क्ते जानन्विपिनशिखिवद्यो महाभोगवान् सः ।**
**अस्तोकं वा लघुगुरुनिजं दुःखमन्यत्सुखं वा**
**यायाद्यो नो मणिरिव महात्यागवान् मुक्तिरेषाम् ॥२६॥**

न्यूनाधिकसाम्यभावेन वर्तमानानां षड्रसानां ''**रसाः स्वाद्वाम्ललवण-तिक्तोष्णकषायकाः**[२]'' इति वैद्यशास्त्रोक्तानाम् । तानेव भेदानजानन् न चिन्तयन् ''**अहमन्नं सदान्नाद इति ब्रह्मवेदनम्**[३]'', ''**ब्रह्मविद् ग्रसति ज्ञानात्सर्वं ब्रह्मात्मनैव तु**[४]'' इति वचनात् जानन्वा सर्वानपि स्वात्माभेदेन पश्यन् यो भुङ्क्ते

१. अ.उ. १-१८
२. अ.हृ. १२६.१४
३. पा.उ. ३८ (''अहमन्नं सदान्नाद इति हि ब्रह्मवेदनम्'' इत्यपि पाठो दृश्यते ।)
४. पा.उ. ३९



विपिनशिखिवदिति सर्वभक्षणे तद्गुणदोषाभावे च दृष्टान्तः । स एव महायोगी कथ्यते । तथा चोक्तम् ''**यथा रविः सर्वरसान्प्रभुङ्क्ते हुताशनश्चापि हि सर्वभक्षः । तथैव योगी विषयान्प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च शुद्धः ॥**[१]'' इति ।

अस्तोकमनल्पं लघ्वल्पं गुरुर्महत् निजं स्वात्मीयं दुःखमन्यत्सुखं यो न यायात्, स्वपरदुःखसुखादिवशतां न प्राप्नुयात्मणिरिव । यथा मरकतः[२] स्वाशितं सर्वं स्वच्छायं करोति नान्यभावं गच्छति । कुत्रापि न सज्जते, परित्यक्तान्यभाव एव वर्तते । तद्वत्स्वातिरिक्तं सर्वं परित्यज्य स्वमात्रेणावस्थितो विद्वान् सर्वत्यागीति कथ्यते । तेषामेवोक्तव्रतत्रयोपेतानां मुक्तिः सिध्यत्येव । ते सदा मुक्ता एव इत्यर्थः ॥२६॥

ननु यथाप्रारब्धं व्यवहरतां कथं कृतकृत्यतेति पृच्छति — कर्मेति ।

**कर्मारब्धं कथमनुभवन्देहवान् सन्विमुक्तः**
**कर्मासक्तान् भुवि वशयितुं कर्मकर्ता कथं वा ।**
**कुर्वन्कर्माण्यपि न विदधच्चेति वक्तुं कथं वा**
**शक्यः शङ्कातृणकणशुचे श्रीगुरो ! शंस मे त्वम् ॥२७॥**

प्राकृतं कर्म तत्फलं बहुरूपं भुञ्जानो देहवान् तदभिमानवाँश्च सन् कर्मासक्तान्[३] वैदिकान् लौकिकाँश्च वशयितुं स्वाधीनं कर्तुं ''**भक्ते भक्तसमाचार**[४]'' इति श्रुतिदर्शितरीत्या कर्मकर्ता कथं वा भवति ? लोकसङ्ग्रहार्थं कर्माणि कुर्वन्नपि विवेकी न विदधच्चेति न प्राकृतवत् करोतीति वक्तुं कथं वा शक्यः ?, सः साधनफलव्यवहारस्य साम्येऽनयोः को विशेषः ? आशङ्कारूपतृणलवानलरूपगुरो ! त्वमेव मे शंस । यथाऽहं सर्वं रहस्यं त्वन्मुखादवगच्छामि तथा मे कथयेत्यर्थः ॥२७॥

तदाक्षेपपरिहारार्थं विद्वदविद्वत्कृतकर्मफलवैषम्यं दर्शयति — एवमिति ।

१. अव.उ. ६ (''तथैव योगी विषयान्भुङ्क्ते...'' इत्यपि पाठो दृश्यते । पृ. ५३०)
२. ''मरतकः'' इति पाठः ।
३. ''कर्मात्तान्'' इति पाठः ।
४. अ.उ. २-३०

**एवं शिष्येण पृष्टे गुरुरपि कथयामास भूयो मनुष्याः**
**त्रेधा कर्माऽऽचरन्ते[1] प्रकृतिपरिगतास्त्वेषणाद्यैरुपेताः ।**
**तीव्राहन्ताममत्वे भुवि विदधति ये त्वैहिकाऽऽमुष्मिकार्था**
**मुक्तयै विद्यां भजन्ते परमपदजुषां कर्मभिः किं फलं स्यात् ॥२८॥**

शिष्येण पृष्टे सति आचार्योऽपि भूयोऽपि उक्तवान् । अनेन गुरोः कदापि शिष्यप्रश्ने विगानाभावो दर्शितः ''**न मन्त्राणां विदुषां जामितास्ति**[2]'' इति न्यायात् । इह जगति त्रिविधा जनाः[3] — प्राकृता मुमुक्षवो मुक्ताश्चेति । ते स्वस्वप्रकृत्या पूर्वपूर्ववासनया परिवेष्टिताः एषणाद्यैः पुत्राद्येषणाभिः संयुक्ताः । आदिशब्देन तत्तद्वर्णाश्रमादिसंव्यवहारैश्च तत्र तीव्राहन्ताममत्वेऽहं श्रोत्रियो वदान्य इत्यादिलक्षणे । अहमत्राधिकृतो मयैतत्कर्तव्यमिति च अहङ्कारममकारौ । ये मनुष्या विदधति त एवैहिकाऽऽमुष्मिकार्थाः । ऐहिकोऽर्थः पशुपुत्रादिः, आमुष्मिकः स्वर्गरम्भादिः । तत्प्रयोजनाः तत्साधनान्यनुतिष्ठन्ति । येऽत्र मुमुक्षवो मुक्त्यै मुक्तिसाधनब्रह्मविज्ञानाय विद्यां विद्यासाधनश्रवणादिकमाचरन्ति । केचन मुक्ता निवृत्ताविद्याः ब्रह्मविदस्तेषामेव परमपदजुषां[4] परमात्मस्वरूपावस्थानमाप्तानां[5] कर्मभिः पूर्वकृतैरुत्तरैर्वा किं फलं स्यात् ? ''**यज्ञायाचरतः कर्म समग्रं प्रविलीयते**[6]'' । न किमपि फलमाप्तव्यं भवेत् । चतुर्विधक्रियाफलविलक्षणत्वाच्च कैवल्यस्य ॥२८॥

ननु मुमुक्षुवो मुक्तिसाधनज्ञानसिद्धयये श्रवणाद्यभ्यासं कुर्वन्ति । न ब्रह्मविदां न किञ्चित् कर्तव्यमस्तीत्युक्तम् । तथा चेत्तथा नियमोऽपि न सर्वत्रानुगच्छतीत्यत्र किं कारणमिति पृच्छति — उक्तमिति ।

---

१. ''आचरन्ते'' इति प्रयोगोऽपाणिनीय इति भाति । यतो हि ''चर - गत्यर्थे भक्षणेऽपि'' इति भ्वादिगणस्थधातुः (धा.पा. ५५९) परस्मैपदी वर्तते ।
२. ई.उ.शां.भा. ४, पृ. ७
३. ''जनः'' इति पाठः ।
४. ''परमपदंजुषाम्'' इति पाठः ।
५. ''...वस्थानमाता'' इति पाठः ।
६. भ.गी. ४-२३



**उक्तं श्रीगुरुनाथ ! सम्यगधुना त्यक्तैहिकाऽऽमुष्मिकाः**
**तत्त्वज्ञानसमार्जनाय सुतरां कुर्वन्ति यत्नं परम् ।**
**संलब्धात्मसमाधयो न विदधत्यभ्यासयोगं चिरं**
**कस्मात्तैः श्रवणादयो हृदयनैश्चल्याय नापेक्षिताः ॥२९॥**

श्रीगुरुनाथ ! श्रीमतोक्तं सर्वं सम्यक् समीचीनम् । त्यक्तैहिकाऽऽमुष्मिकाः इहामुत्रविषयसङ्गरहिताः परमहंसाः ''**त्वम्पदार्थविचाराय संन्यासः सर्वकर्मणाम्**[1]'' इत्युक्तन्यायेन तत्त्वज्ञानसिद्धये परं यत्नं कुर्वन्तीति सम्यग्लब्धः आत्मनोऽन्तःकरणस्य समाधिः समाधानं विश्रान्तिर्यैस्ते ।

यद्वा[2] संलब्धाः सम्यगभ्यासेन प्राप्ताः सवितर्काद्याः समाधयो निर्बीजान्ताः समाधयो वा । यद्वा बाह्यान्तर्भेदेन सविकल्पादिभेदेन च षड्विधा वा । तेऽभ्यासयोगं तच्चिन्तनं तत्कथनमित्युक्तलक्षणं न विदधतीत्येतदपि सम्यगेवोक्तम् । तैरपि यावज्जीवं चित्तचाञ्चल्यनिवृत्तये श्रवणादयो नापेक्षिताः[3] न काङ्क्षिताः ।

अयं भूताभिसन्धिः — अधिकारिणो द्विविधाः — कृतोपास्तिका अकृतोपास्तिकाश्चेति । उपास्यदेवतासाक्षात्कारपर्यन्तमुपासनं कृत्वा तत्प्रसादात् वैराग्यादिपूर्वं श्रवणादिकं गुरुमुखात् कुर्वन्ति । त एवोत्तमाधिकारिणः ब्रह्मज्ञानेन जीवन्मुक्ता भवन्ति । तदितरे तात्कालिकवैराग्यादिसाधनवन्तोऽपि पूर्ववासनाबलाद् विदुषोऽपि ये क्लिश्यन्ति, तेषामभ्यासावृत्तिः सदा कर्तव्या वा नवेति प्रश्नार्थः ॥२९॥

विनोदाय गूढाभिसन्धिरेवोत्तरमाह — एवमिति ।

**एवं चेच्छृणु वत्स ! वच्म्यविदितस्वात्मस्वरूपा जनाः**
**शृण्वन्त्यादृतमानसाश्च मननं कुर्वन्तु सन्देहिनः ।**
**ध्यायन्त्येव विपर्ययाभिधमहाभूतगृहीतान्तरा**
**ये चिद्व्योममया भवेयुरथ तैर्नापेक्ष्यते किञ्चन ॥३०॥**

---

१. उ.सा. २२२ (उपदेशसाहस्र्याम् ''त्वम्पदार्थविवेकाय संन्यासः सर्वकर्मणाम्'' इत्यपि पाठो दृश्यते । पृ. २५५)
२. ''यद्व'' इति पाठः ।
३. ''नपेक्षिताः'' इति पाठः ।

अज्ञातब्रह्मतत्त्वा जनाः ! शृण्वन्तु । गुरोः श्रुतितात्पर्यविचारं कुर्वन्तु । ‘‘**शृण्वन्त्वज्ञाततत्त्वास्ते जानन् कस्माच्छृणोम्यहम्**[1]’’ इति गुरुवचनात् । श्रुतार्थदार्ढ्याय मननं युक्तिभिः अनुचिन्तनलक्षणं ये सन्देहवन्तः ते तत्कुर्वन्तु । ‘‘**मन्यन्तां संशयापन्ना**[2]’’ इति वचनात् । ध्यायन्त्येव ध्यानं ‘‘**तत्र प्रत्ययैकतानता ध्यानम्**[3]’’ इत्युक्तलक्षणं [4]निदिध्यासनसंज्ञितमनुतिष्ठन्तु । ये विपर्ययसंज्ञकेन विपरीतभावनारूपमहाभूतेन गृहीतं वशीकृतमन्तरमन्तःकरणं येषां ते । ‘‘**विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्ययः**[5]’’ इति वचनात् । ये चिदाकाशस्वरूपभूता भवेयुस्तैः किञ्चनापि साधनं नापेक्ष्यते । ‘‘**नैवास्ति किञ्चित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ।**[6]’’ ‘‘**यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते**[7]’’ इति श्रुतिस्मृतिभ्यः ॥३०॥

ननु जाग्रत्प्रबोध इव स्वप्नव्यवहारस्य तत्त्वज्ञानं सविलासाज्ञानकार्यनिवर्तकम् इत्युक्तम् । तथा च सति प्राकृतवद् ब्रह्मविदोऽपि कथं गच्छाम्युपदिशामीत्यादि-व्यवहार उपपद्यत इति स्वाभिसन्धिं प्रकटयन् पृच्छति — स्वामिन्निति ।

**स्वामिन् ! सत्यपरायणा अपि बुधा अज्ञानिवन्नित्यदा**
**कुर्वे वच्मि ददामि यामि निवसाम्यायामि चेत्यादिकम् ।**
**कार्यं ते कथमावहन्ति विगतं ब्रूषेऽनृतं तेष्वलं**
**ब्राह्मी नो विकृतिः कदापि भगवन्नेषाऽनुगृह्णीष्व माम् ॥३१॥**

अद्वैतब्रह्मात्मनिष्ठा बुधा विवेकज्ञानिनः अज्ञानिवत्प्राकृतो जन इव नित्यदा नियमे कुर्वे व्यवहारमावश्यकं वाऽन्यत्करोमि तदर्थं वच्मि ददामि गच्छामि, अत्र वा निवसामीत्यादिरूपं कार्यं कथमावहन्ति ? स्वाप्निकजगत्प्रति प्रतिबुध्यस्य

---

१. अव.उ. १६ पूर्वार्धम्
२. अव.उ. १६ उत्तरार्धम् (उपनिषत्सङ्ग्रहे ‘‘मन्यन्तां संशयापन्ना...’’ इति पाठो दृश्यते ।)
३. यो.सू. ३-२
४. ‘‘निदिध्यासरांजितम’’ इति पाठः ।
५. प.द. ७-२६१ (पञ्चदश्याम् ‘‘...ध्यानमविपर्ययात्’’ इति पाठः उपलभ्यते । पृ. ३८५)
६. जा.द.उ. १-२३ (उपनिषत्सङ्ग्रहे ‘‘न चास्ति किञ्चित्कर्तव्यमस्ति...’’ इति पाठः उपलभ्यते ।)
७. भ.गी. ३-१७



तथा दर्शनात् । अनृतमसत्यम् अज्ञानं तत्कार्यञ्च गतं तत्त्वज्ञानोदयेन । निवृत्तं तच्चालं सम्यङ् न कदाचित्पुनरुत्तिष्ठेदिति च । ‘‘**निवृत्ता सा कथं भूयः प्रस्तूयेत प्रमाणतः**[1]’’ इति भाष्यकारसम्मतिरप्यत्र प्रमाणं वर्तते । विकृतिः गच्छामीत्यादिका ब्राह्मी ब्रह्मगोचरा न भवति । अत एतं संशयं निवारयेति प्रश्नार्थः ॥३१॥

‘‘**तस्य तावदेव चिरम्**[2]’’ इत्यादिश्रुत्यवष्टम्भेन सदृष्टान्तमुत्तरम् उपदिशति - यातेति ।

**यातः स्वप्नकथां वदन्ति हि यथा तद्वासनातो जनाः**
**{तद्[3]} अज्ञो वक्ति तथैव सम्यगनिशं जायेत नाभासकः ।**
**आदेहक्षयमामनत्यपि तथा देवो मनुष्योऽहमि-**
**त्याभासस्य लयावधिव्यवहृतिः नाशेन गच्छेदियम् ॥३२॥**

लोके जनाः स्वानुभूतनिवृत्तस्वप्नवृत्तान्तं तद्वासनावशाद्वदन्ति । आरुरुक्षुमिव गिरिशृङ्गमद्राक्षमिव वनराजिमिति च । तथैव भूतपूर्वगत्या विवेकी यत्किञ्चिद्वदति करोति तेनाभासकः पूर्ववत्संसारी न भवति । आभासमात्रत्वज्ञानाद् रज्जुसर्पोऽपि मुख्यसर्पवदेव भीषयन्नुपलभ्यते । आभासत्वानुसन्धानकोऽपि बाधः । तथा चोक्तम् ‘‘**नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम्**[4]’’, ‘‘**यस्य तु यथापूर्वं नासावधिगतब्रह्मात्मभावः**[5]’’ इत्यादिदेहपातपर्यन्तं विद्वान् देवोऽहं मनुष्योऽहम् इत्यामनत्यपि व्यवहृतिश्च आभासस्य व्यावहारिकस्य तज्जगतश्च लयावसानः, तन्मध्ये नाशं विलयं न गच्छेत् ॥३२॥

ननु भूतपूर्वगत्या आभासत्वानुसन्धाने व्यवहारो न बाधक इति चोक्तम्, व्यवहारेण बाधाभावेऽपि विक्षेपस्य चित्तक्षोभकत्वान्न ज्ञानफलं सौख्यमिति पृच्छति — तर्हीति ।

---

१. उ.सा. १८
२. छा.उ. ६-१४-२
३. अधिकः पाठः । गृहीते सति शार्दूलविक्रीडितवृत्तभङ्गः स्यात् ।
४. ब्र.सू.शां.भा. १-१-४ पृ. १५०
५. ब्र.सू.शां.भा. १-१-४ पृ. १५२

**तर्ह्याचार्येन्द्रदृश्यं सकलमपि मृषेत्येव निर्णीतभाजां**
**नानाकार्यैन्न दुःखं कथमिह तनुयाज्ज्ञानसौख्यं कुतः स्यात् ।**
**याते प्रापञ्चिकेऽर्थे सति परमशिवे शाश्वती सिद्धिनिष्ठा**
**नो सम्यङ्निष्ठितानां कथय कथमहो जायते कर्तृता वा ।।३३।।**

आचिनोति शास्त्रमिति वा अध्यापयतीति वाऽऽचरति वाऽऽचार्यः । तथा चोक्तम् ''**आचिनोति हि शास्त्राणि शिष्यानध्यापयत्यपि । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते**[१]'' इति । सकलमपि दृश्यं नामरूपविकृतं सर्वं मृषा मायैव । ''**वाचारम्भणं विकारो नामधेयम्**[२]'' इति श्रुतेः । इत्येवं निश्चयवतां सम्यक् ज्ञानिनां नानाविधं कार्यं देहेन्द्रियादिप्रकृतिरूपं दुःखं विक्षेपं कथं न तनुयात् कुर्यादेव । कुतः कारणात् ? दुःखिनां ज्ञानसौख्यम् आनन्दावाप्तः किल ज्ञानफलं निर्दिष्टम् । आदौ प्रापञ्चिके प्रयोजने वैषयिकसुखे गते यति परमशिवे परमात्मनि शाश्वती निष्ठा परमावस्थिता[३] स्यात् । सम्यङ्निष्ठितां परमात्मनि लब्धप्रतिष्ठानां कर्तृता वा कथन्न जायते । अहो ! ब्रह्मभावमापन्नानां नैष्कर्म्यमेव अभ्युपेयेन संव्यवहारादिकं नैष्कर्म्यसंव्यवहारयोर्भिन्नविषयत्वमस्ति वा नवेति शङ्कार्थः ।।३३।।

इतरमुपदिशति — जानीहीति ।

**जानीहि व्यवहार एष सुधियामारम्भमात्रक्षयी**
**ज्ञानं संव्यवहारकादिसकलं चित्तस्य कार्यं खलु ।**
**तुर्यं ब्रह्मसमाश्रिता विदधते कर्माणि कस्माद् बुधा**
**[४]आरूढा [न] भवन्ति ते प्रतिदिनं ध्यानादिनिष्ठाश्च ये ।।३४।।**

सर्वं खल्विदं ब्रह्मविज्ञानिना मोक्षव्यवहारः भिक्षाचरणादिः यथोचिताऽऽचारादिः वा आरम्भमात्रेण विनाशी भवति । न पुनः संसारबीजायापि ध्यानं मानसी भावना

१. ब्रह्माण्ड.पु. ३२-३२
२. छा.उ. ६-१-४
३. ''परमावस्तित'' इति पाठः ।
४. ''आरूढा भवन्ति'' इत्येव पाठः । प्रभाव्याख्यानुरोधेन ''आरूढा न भवन्ति'' इति पाठः स्यात् ।



संव्यवहारजातश्च लौकिकं वैदिकं चित्तस्य कार्यमेव । तुर्यमवस्थात्रयातीतं ब्रह्मसमाश्रिता यमधिष्ठिता बुधा विद्वांसः, कर्माणि इतिकर्तव्यतारूपाणि कस्मात् किन्निमित्तं विदधते कुर्वन्ति ? चित्तशुद्धिः पूर्वमेव सिद्धा । कर्मणां परमं फलं तदेव ध्यानादिकं च । चित्तैकाग्र्यफलकं तच्छमादिलाभेनैव चरितार्थम् । ये प्रतिदिनं ध्यानादिनिष्ठाः आदिशब्देन यमाद्यङ्गानि गृह्यन्ते, ते सर्वेप्यारूढा[१] न भवन्ति, किन्त्वारुरुक्षव एव ते । ज्ञानध्यानयोर्महदेव वैलक्षण्यमतो व्रात्यश्रोत्रिययोः व्यवहारसाम्येऽपि परीक्षायां वैलक्षण्यमिव । विद्वदविद्वद्व्यवहारेऽपि महान्भेद इत्यर्थः ।।३४।।

अभ्यासिनामारुरुक्षुत्वमेव नारूढत्वमिति दर्शितम्, तथा चेदुत्तरोत्तर-भूमिकोपदेशः किमर्थम् इति पृच्छति — आरूढेति ।

**आरूढाश्च महागुरो ! भुवि परे निष्किञ्चना नित्यदाः**
**चित्तस्योपशमाय योगसरणेरध्यासभाजः कथम् ।**
**इत्याकर्णय भूतलेऽत्र च यथा प्रारब्धवेगं तथा-**
**मुक्तास्तेऽपि भवेयुरित्यभिहिताः[२] पूर्वं कुतो विस्मृतम् ।।३५।।**

निष्किञ्चना निष्परिग्रहाः संन्यासिनः परमहंसा आरूढाश्च चित्तस्योपशमाय चित्तविश्रान्त्यै योगसरणेरभ्यासभाजः योगमार्गस्य साष्टाङ्गस्याभ्यासभाजः कथं भवन्तीति चेत् यथा प्रारब्धस्य वेगमनतिक्रम्य उद्दालकवीतहव्यचूडालादिवत् केचित्तथाविधा अपि दृश्यन्ते । तथा चोक्तम् ''**आरब्धस्य फले ह्येते भोगो ज्ञानं च कर्मणः । अविरोधस्तयोर्युक्तः**[३]'' इति । ते विमुक्ता अपि बन्धविमुक्ता भवेयुः इत्याख्यं पूर्वम् आरब्धानां कर्मणां नैकधाः[४] तेषां वृत्तयो नैकभेदा इति तत्कुतो विस्मृतम् । पूर्वोक्तमेवैतत् समाधानमिति यावत् ।।३५।।

हेयोपादेयशून्यब्रह्मभावमापन्नानां व्यवहारोऽपीश्वरलीलेव परोपकारायैवेति दर्शयति — साधो त्वमिति ।

१. ''सर्वेप्यारूढम्'' इति पाठः ।
२. ''भवेयुरित्यभिहित'' इति पाठः ।
३. उ.सा. ४-४
४. ''नैकभा'' इति पाठः ।

**साधो ! त्वं शृणु तत्त्वविद्व्यवहृतिः लोकोपकारक्षमा**
**प्राप्तव्यं न हि विद्यते भुवि सतां दुःखं सुखं वा तया ।**
**सर्वानुग्रहहेतवे वितनुते सृष्टिं परेशो मुदा**
**नैवाप्नोत्यपि पुण्यपापकणिकामीशस्तया लेपकः ॥३६॥**

भो सौम्य ! त्वया[१] श्रोतव्यम् । सर्वं शृणु । प्रश्नतो मम परितुष्टिरेव । इदं रहस्यं शृणु । तत्त्वविद्व्यवहृतिः ज्ञानिनां व्यवहारः लोकोपकारसमर्थैव । ''**योगी चरति लोकानामुपकाराय केवलम्**[२]'' इति वचनात् । यतस्तेषां पूर्वमप्राप्तं सत्पुनः प्राप्यन्न विद्यते । अनिवृत्यं निवारितव्यं दुःखमहितं वा तया व्यवहृत्या न विद्यते । सर्वलोकोपकाराय लीलयैवेश्वरः सृष्टिं विश्वसृष्टिं करोति । ''**लोकवत् लीलाकैवल्यम्**[३]'' इति न्यायात् । स्वतो लेपकस्तया लीलाविनोदोत्पन्नया सृष्ट्या प्राणिधर्माधर्मकृतवैषम्येन पुण्यपापकणिकां काँश्चित्सुखभाजः कृतवानिति पुण्यं काँश्चिद्दुःखभाजः कृतवानिति पापं वा नैवाप्नोति । काँश्चित्पालयति कदाचित्संहरति इत्यादिदोषोऽपि[४] तस्य न भवति । अलेपकत्वादेव । तथा च श्रुतिस्मृतिन्यायाः । ''**कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च**[५]'', ''**असङ्गो ह्ययं पुरुषः**[६]'', ''**न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।**[७]'', ''**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः**[८]'', ''**वैषम्यनैर्घृण्येन सापेक्षत्वात् तथा हि दर्शयति**[९]'', ''**सर्वधर्मोपपत्तेः**[१०]'' इत्याद्या अत्र प्रमाणम् ॥३६॥

१. ''त्वम्'' इति पाठः।
२. सू.गी. ५-६४ (अत्र ''योगी चरति लोकानामुपकाराय नान्यथा'' इति पाठो दृश्यते।)
३. ब्र.सू. २-१-३३
४. ''इत्यादिदोषम'' इति पाठः।
५. श्वे.उ. ६-११
६. बृह.उ. ४-३-१५
७. भ.गी. ५-१४,१५
८. भ.गी. १८-४६
९. ब्र.सू. २-१-३४
१०. ब्र.सू. २-३-३७



नन्वीश्वरज्ञानिनोरभेदे ईश्वरवदस्यापि सर्वज्ञत्वाद्यैश्वर्यसाम्यमस्ति वेति पृच्छति — ईशेति ।

**ईशज्ञानगुरुस्वरूपभगवन्नीशेन तुल्यः कथं**
**ज्ञानी चेदिति पृच्छसि शृणु तथाऽहन्ताममत्वोज्झनात् ।**
**तुल्यौ जीवपराविति प्रविदितौ प्रज्ञानसाम्यादयं**
**देवो जीवगणाश्च यच्च विदितं सर्वं तदेकात्मकम् ॥३७॥**

हे परमेश्वरावताररूप ! देशिकेन्द्र ! भगवन् ! ईशेन सर्वज्ञशक्तियुक्तेन परमेश्वरेण कथं केन धर्मेण तुल्यः सद्यो ज्ञानी विद्वानिति पृच्छसि चेत्साम्यकारणं शृणु । अहन्ताममताभावादेवाहङ्कारममकारशून्यत्वादेव समौ जीवपरौ तत्त्वमर्थौ प्रविदितौ विद्वद्भिः ''**जीवः शिवः शिवो जीवः**[१]'' इति श्रुतिवचनात् । प्रज्ञानसाम्यादपीति सत्तैक्यात् स्फूर्त्यभावात् अयम् आत्मविद्देवः जीवगणाश्च । यच्च विदितमविदितं च विश्वं सर्वं तदेकात्मकम् आत्मैवेदं सर्वं स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयो न सन्ति । नासि माया च । ''**पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलम्**[२]'', ''**तत्सृष्ट्वा तदेवानुप्राविशत्**[३]'' इत्यादिश्रुतिभ्यः ॥३७॥

ननु ज्ञानिनः सर्वात्मकत्वमुक्तं तत्कुतः स्यादिति पृच्छति — सर्व इति ।

**सर्वे जीवास्त्वयमिति गुरो ! प्रोक्तवानस्य मोक्षे**
**सर्वे मुक्तिं कथमितितरान्नो लभन्ते वदस्व ।**
**सर्वे भिन्ना इति वदसि चेदस्य सर्वात्महानिः**
**सर्वव्याख्याकुशल ! कथयस्वैतदप्यात्ममूर्ते ! ॥३८॥**

अयमभिन्नात्मदर्शकः सर्वे जीवा इति ''**इन्द्रो मायाभिः पुरुरूप ईयते**[४]'', ''**एक एव हि भूतात्मा भूते भूते व्यवस्थितः**[५]'', ''**एकं रूपं बहुधा यः**

१. स्क.उ. ६
२. कै.उ. १४ (उपनिषत्सङ्ग्रहे ''पुरत्रये क्रीडति यश्च जीवस्ततः सुजातं सकलम्'' इति पाठो दृश्यते।)
३. तै.उ. २-६
४. बृह.उ. २-५-१९
५. ब्र.बिं.उ. १२

**करोति**[1]'' इत्यादिश्रुत्यवष्टम्भेन उक्तवान् । तथा सत्यस्य विदुषो मोक्षे मुक्तौ सर्वेऽपि जीवाः मुक्तिं कथं वा न लभन्ते ? अत एकजीववादो न सङ्गच्छते । सर्वे च भिन्ना विलक्षणाः । एक एव चेत् केचन बन्धाः मुक्ताश्च वर्तन्त इति तत्राप्यस्य सार्वात्म्यहानिः । सर्वात्मत्वप्रतिपादनं न सम्भवति । सर्वरहस्यार्थप्रकाशकगुरो ! एतमर्थं वदस्व ॥३८॥

प्रतिबिम्बन्यायमाश्रित्योत्तरं वक्तुमारभते — अहन्तेति ।

**अहन्तासाक्ष्येको विभुरपि परात्मा बहुविधा-**
**स्तथा जीवा अन्तःकरणबहुताया अहमिति ।**
**जगत्येकश्चन्द्रः सलिलशशिनोऽमी बहुविधा**
**उपाधीनां भेदात् घटकलशकूपादिपयसाम् ॥३९॥**

अहन्ताया अहम्भावयुक्तान्तःकरणस्य वृत्तिमतः साक्षी साक्षाद् द्रष्टा चिदात्मा तदधिष्ठानचैतन्यमेकमेव विभुरनवच्छिन्नः परात्मा सर्वसत्तास्फूर्तिप्रदश्च । जीवास्तु तदंशभूता बहुविधा असङ्ख्या अहमहमिति स्फुरत् अन्तःकरणबहुत्वादेव तद्बहुत्वम् । तत्रायं दृष्टान्तः जगति बिम्बभूतश्चन्द्रः एक एव । प्रतिबिम्बिततया प्रतीयमाना जलचन्द्रा अनेका इव । तदनेकत्वं च घटकलशकूपादिपयोलक्षणानाम् उपाधीनां नानात्वादेव भवति । तथा चोक्तम् ''**एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत्**[2]'' इति । औपाधिकबहुत्वं न वास्तवैकत्वं निरुणद्धीति भावः ॥३९॥

फलितमाह — उपाधाविति ।

**उपाधावेकस्मिन्नपि घटशरावादिषु पुन-**
**र्विनष्टे तच्चन्द्रः प्रकृतिमयते नापरशशी ।**
**गते जीवोपाधौ परमशिवभावं स लभते**
**परे नोपाध्याढ्याः कथमपि लभन्ते निजपदम् ॥४०॥**

घटशरावोदकश्च नाद्युपाधिषु मध्य एकस्मिन्घटादिरूपोपाधौ भग्ने तच्चन्द्रः

१. कठ.उ. २-२-१२
२. ब्र.बिं.उ. १२



तदौपाधिकश्चन्द्रः प्रकृतिं स्वमूलकारणं बिम्बचन्द्रं गच्छति । तदितरोपाधिकश्चन्द्रः पूर्ववत्तिष्ठति । एवं जीवोपाधौ । अत्र धर्मधर्मिणोरभेदः जीवत्वोपाधौ । यद्वा जीवलक्षणोपाधौ । तत्त्वज्ञानेन निवृत्ते परमशिवभावं परिपूर्णानन्दब्रह्मतां तदात्मना अवस्थानं कैवल्यं विगतोपाधिर्विद्वान् प्राप्नोति । अपरे जीवा उपाधियुक्ताः कथमपि तत्त्वज्ञानमेकं शरणं विना केनाप्युपायेन ब्रह्मपदन्न लभन्ते । तथा चोक्तं ''**न योगेन न साङ्ख्येन कर्मणा वा न विद्यया । ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा ।।**[1]'' ॥४०॥

वास्तवमेव[2] जीवपरयोरेकत्वमित्युक्तं तत्रापि सन्दिहानः पृच्छति — ऐश्वर्यमिति ।

**ऐश्वर्यं पद्मजाताम्बुजनयनललाटेक्षणानां विमुक्तः**
**कस्मात्प्राप्नोति सर्गस्थितिलयकरणे तेऽपि शक्ताश्च पूर्णाः ।**
**सर्वज्ञाः सिद्धिमन्तो गुरुवर ! करुणां वारिधेऽमुष्य किञ्चित्**
**सामर्थ्यं विद्यते न क्वचिदपि कथयाहं यथा विश्वसेयम् ॥४१॥**

पद्मजातो विश्वगुरुनारायणनाभिपद्मसम्भूतः चतुर्मुख इति किल प्रसिद्धिः । अम्बुजनयनः पुण्डरीकाक्षः विष्णुर्ललाटेक्षणः रुद्रस्तेषामैश्वर्यं सामर्थ्यमनुग्रह-निग्रहादिरूपम् । कुतो हेतोर्विमुक्तो जीवन्मुक्तो नाप्नोति । तेऽपि सर्गस्थितिलयकरणे सृष्टिस्थितिसंहारे शक्तिमन्तोऽणिमादिविभूतिभिः पूर्णाश्च । सर्वं कालत्रयविषयं जानन्तीति तथा सिद्धिमन्तश्च । हे गुरुश्रेष्ठ ! कारुण्यसिन्धो ! अमुष्य ब्रह्मविदस्तादृशं सामर्थ्यमाकाशगमनादिकं च न दृश्यते । तथा सति कथं तत्सौम्यमहमुक्तं भगवता विश्वसेयं विश्वासेन गृह्णीयामित्यर्थः ॥४१॥

**ग्रामायान्धूदकमलमलं चन्द्रिका वर्तिका च**
**दीपज्योतिः कलशसलिलं गेहमात्रोपयोगी ।**
**जीवेशानावपि शुभमते बोधमात्रादभिन्नौ**
**उच्चैर्नीचैरिति हि विदितं मायिकैरेव दोषैः ॥४२॥**

१. वि.चू. ५८
२. ''वास्तमेव'' इति पाठः ।

ग्रामाय ग्रामोपभोगाय। ग्रामश्चोक्तलक्षणः - ''**विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति ते। स तु ग्राम इति प्रोक्तो नदीगिरिसमाश्रयः**[१]'' इति। अन्धूदकं कूपादिजलमलं पर्याप्तं पानभोजनाद्युपभोगाय। तथा चन्द्रिका वर्तिका चन्द्ररश्मिवत् प्रकाशमानभालचूर्णसंयुक्तवर्तिकाविशेषमिश्रिततेजःपुञ्जविशेषः अलम्, प्रकाशनादेकत्र[२] स्थापितः परितः प्रकाशयति। दीपज्योतिः तेजः प्रकाशः कलशपूरितजलं चैकगृहमात्रस्योपयोगि। तदेव जीवेशानावपि ज्ञानदृष्ट्यैकरसौ। अधिक ईश्वरः नीचो जीव इति भेदः मायिकैर्दोषैरचितः स्वप्नेऽपि जीवेश्वरव्यवहार-दर्शनात्। ''**आत्मनि चैवं विचित्राश्च हि**[३]'' इति न्यायाच्चेत्यर्थः। श्रुतिरपि ''**एष सर्वेश्वर एष सर्वज्ञः**[४]'' इत्यभेदमेव तार्किकमुपदिशतीत्यर्थः ॥४२॥

किञ्च तत्रापि विशेषं दर्शयति — मर्त्येष्विति।

**मर्त्येष्वेतेषु योगी नृप इव च सुरेष्वेव विष्णवादिकास्ते**
**स्वाधीनीभूतमाया अधिगततपसः सर्वसिद्धीः प्रपन्नाः।**
**तत्सिद्धीनामभावादिह जगति नरा क्षुल्लका अप्यतीव**
**ब्रह्मज्ञानानुभावादयमिति त इति ह्यत्र भेदं न पश्येः ॥४३॥**

मरणादिधर्मवत्सु मनुष्येषु नृप इव योगी मन्तव्यः। आहारादिसाम्येऽपि यथा राज्ञः शासितृत्वं नेतरेषाम्, तथा सुरेषु देवेष्वधिकारिकेषु इन्द्रादिषु त्रिमूर्तयो विशिष्टाः श्रुतिस्मृतिपुराणादिभ्योऽवगम्यन्ते। ते च स्वाधीनीभूतमायाः ऐन्द्रजालिकादिवदधिगतशक्तयः सम्प्राप्ततपोफलाश्च सर्वज्ञत्वसर्वशक्तित्व-सर्वकर्तृत्वादिसिद्धीः प्राप्ताः तादृग्विधविविधसिद्धीनाम् अभावाद्धेतोर्मनुष्याः अल्पा अपि ब्रह्मविद्यावैभवात्तु अयं मनुष्यः त उपरिस्था देवाः कल्पान्तजीविन इति भेदं न पश्येः। पारमार्थिक ईश्वरस्तु त्रिमूर्तिभ्योऽन्य एव। तेऽपि तदंशा एव। जीवश्च न देहादिविशिष्टः प्रत्यभिज्ञाविरोधापातात्। सर्वसिद्धिफलमपि कर्मफलमेव न

---

१. वि.पु. श्रीधरीयव्याख्यानम् (श्रीधरस्वामि-उद्धृतभृगुवचनम्) - श्लोके पाठभेदो दृश्यते। अत्र हि ''नृपावासः पुरी प्रोक्ता विशां पुरमपीष्यते'' इति पाठो दृश्यते।)
२. ''प्रकाशनातदेकत्र'' इति पाठः।
३. ब्र.सू. २-१-२८
४. माण्डू.उ. १-६



ज्ञानफलं तस्यैकत्वादिति तात्पर्यार्थः ॥४३॥

सिद्धिजालादीनां तपोफलत्वेऽपि देवाधीनत्वर्णितं तत्राशङ्कते — मुक्तिप्रदानमिति।

**मुक्तिप्रदानमुनिनायकमानवेषु**
**ताः सिद्धयः प्रतिवसन्ति शिवस्य चैनाः।**
**आख्यासि चेदिति वदामि परेशभक्त्या**
**ताः[१] प्राप्नुवन्त्यपि नरा इह योगसिद्धीः ॥४४॥**

भो मुक्तिसाधनज्ञानप्रदगुरो! केषुचिन्मानवेषु भुविष्ठेषु ताः सिद्धयोऽणिमाद्याः प्रतिवसन्ति। शिवस्य चैना एताः सिद्धयः ईश्वरस्य त्रिमूर्तीनामिति कथयसि चेत्पृच्छसि तत्रापि वदामि। परेशभक्त्या परमेश्वरध्यानधारणाद्युपायेन केचन बुधास्ताः सिद्धीः प्राप्नुवन्ति। दूरश्रवणादिभोगफलं लभन्ते। ''**मद्धारणां धारयतः कानुसिद्धिः सुदुर्लभा**[२]'' इति भगवद्वचनात्। अतः सर्वमपि सिद्धिफलं पुरुषप्रयत्नयसाध्यमिति तात्पर्यार्थः ॥४४॥

कृतोपास्तिकानां नराणामीश्वरकारुण्यात्सिद्धयो जायन्त इत्युक्तम्। तथा चेत् ''**येषामस्ति परिज्ञानम्**[३]'' इति वचनानुरोधेन सर्वेऽपि ज्ञानिनः कृतोपास्तिका एवेति निश्चीयते। ''**यस्त्वेवं ब्राह्मणो विद्यात्तस्य देवा असन्वश**[४]'' इति वचनानुसारेण सर्वेऽपि ज्ञानिनो योगसिद्धिसम्पन्ना वाच्याः। तत्तु नियतं न दृश्यते। तत्कारणं वक्तव्यमिति पृच्छति — शिवेति।

**शिवाकार स्वामिन्! प्रथिततपसः सिद्धिमतुलां**
**विमुक्तिं यातारो यदित इव सर्वे न दधति।**
**किमु ज्ञानं सिद्धिर्भवति किल तेष्वेव नितरा-**
**ममी चेदात्मज्ञाः कथमिह विभूतिर्न भविता ॥४५॥**

---

१. ''तान्'' इति पाठः। परं व्याख्यानुरोधात् ''ताः'' इति पाठः स्यात्।
२. उ.गी. ५-३२ (''मद्धारणा धारयतः का सा सिद्धिः सुदुर्लभा'' इत्यपि पाठो दृश्यते।)
३. ?
४. तै.आ. ३-१३

भो देशिकेन्द्र स्वामिन् ! जन्मान्तरार्जितप्रकृष्टतपोबलयुक्तां निरुपमां सिद्धिमणिमादिरूपां विमुक्तिज्ञानफलं कैवल्यं च गन्ता। यदि त इव सर्वेऽपि विद्वांसः कुतः कारणान्न दधति। तथा च श्रूयते बृहदारण्यकादौ याज्ञवल्क्यगार्गि-प्रभृतीनां सिद्धिज्ञानं च शापानुग्रहादौ स्वातन्त्र्युमप्रतिहतश्च। तदितरेषां शाकल्यादीनां विवेकिनामपि तदभावः। वासिष्ठे च शिखिध्वजोपाख्याने राज्ञः सिद्ध्यभावः चूडालाया ज्ञानं योगसिद्धिश्च तद्वदेवाद्यतनेषु नरेष्वपि दृश्यते। अमी च मनुष्याः आत्मज्ञाः। विभूतिः परकायप्रवेशाकाशगमनदूरदर्शनश्रवणादिर्न भविष्यति ॥४५॥

तत्र कारणं ब्रुवन्नुक्तमाह — अकाम्यमिति।

**अकाम्यं काम्यश्च द्वयमिति परेशाङ्घ्रिभजनं**
**विमुक्तिः पूर्वस्माद्भवति परतः सिद्धय इमाः।**
**फलं चैकैकस्मादपि भवति चैकैकमपि तद्**
**द्वयं कृत्वा प्राञ्चः फलयुगलमायान्त्यपि तथा ॥४६॥**

अकाम्यं कामनारहितम्, काम्यं तत्सहितं चेति द्वयं परेशाङ्घ्रिभजनं परेश्वरपादारविन्दसेवनं द्विविधम्। पूर्वस्मान्निष्कामभजनाद्विमुक्तिः ज्ञानद्वारा कैवल्यं भवतीति क्षुण्णो राजमार्गः। द्वितीयाच्चेमाः सिद्धय एकैकस्मात् साधनादनुष्ठितादेकैकं फलद्वयं द्विविधमपि सकामं निष्कामं च परमेश्वरभजनं कृत्वा प्राञ्चोऽतीता महान्तः फलयुग्मं ज्ञानसिद्धिं यान्ति। तथैकस्मात् साधनात्तदेकफललाभवत्सकामं निष्कामं च तपोऽनुष्ठाय प्राञ्चः प्राचीनाः योगिनो ज्ञानिनश्च फलद्वयं निष्कामतपोफलत्वेन शुद्धिशुद्धतदैकाग्र्यज्ञानं च फलमेकं सकामतपोनियमेनानुष्ठायाणिमादिकञ्च सहैव वा पूर्वोत्तरं वा प्राप्नुवन्ति। नात्र क्रमनियमः ॥४६॥

द्विविधतपोफलत्वेन वर्णितज्ञानसिध्योर्ज्ञानस्य वैशिष्यं कथयति — ज्ञानमिति।

**ज्ञानं केवलमेव मोक्षविधये तत्साऽनघ श्रूयतां**
**सीतातातभगीरथप्रभृतयस्सम्प्रार्थयन्ते न तु।**
**सिद्धीः काश्चन केचन द्वयमपि प्राप्योज्झिता भूतले**
**कालक्षेपकृते च सिद्धय इमा नैव प्रबोधप्रदाः ॥४७॥**

केवलमन्यसाधननिरपेक्षं ज्ञानं ब्रह्मज्ञानमेव मोक्षविधये मुक्तिप्रदानाय श्रूयताम्,



न कर्मसमुच्चितं ज्ञानसमुच्चितं वा कर्मेत्यर्थः। ''**ज्ञानादेव तु कैवल्यम्**[1]'' इति वचनात्। अत एव ज्ञानलाभादेव कृतकृत्यतया जनकादयो ब्रह्मविदः काश्चिदपि सिद्धीः न काङ्क्षन्ते। केचन विश्वामित्रादयो महान्तः ऋषयो मनुष्याश्च विद्यारण्यादयो द्वयमपि ज्ञानं सिद्धिश्च प्राप्योच्छ्रिता भूतले ज्ञानरहितास्तु सिद्धयः न कालान्तरेऽपि प्रबोधहेतवः किन्तु कालक्षेपाय भवन्ति। ऐन्द्रजालिकविद्येव परव्यामोहायेत्यर्थः। तथा चोक्तम् ''**द्रव्यमन्त्रक्रियायोगशक्त्याप्नोत्येव सद्द्विजः**[2]'', ''**अनात्मज्ञस्य विषय आत्मज्ञो ह्यात्ममात्रदृक्**[3]'', ''**द्रव्यमन्त्रक्रियाकालयुक्तयः साधु-सिद्धिदाः। परमार्थपदप्राप्तौ नैव कुर्वन्ति काश्चन**[4]'', ''**यस्तु मूढोऽल्प-बुद्धिर्वा सिद्धिजालानि वाञ्छति**[5]'', ''**अनात्मविदमुक्तोऽपि नभो विहरणा-दिकम्**[6]'' इत्यादि। अन्यत्राप्युक्तम् ''**पिशाचस्वेच्छितमरूपम्**[7]'' इत्यादि ॥४७॥

ज्ञानाभावे सिद्धयोऽपि स्वर्गादिफलवन्नश्वरा एवेति वक्तुं शिष्यप्रश्नम् अनूद्योत्तरमाह — कैवल्यमिति।

**कैवल्यं ज्ञानयोगाद्यदि भवति गुरो ! मोहमात्रप्रदात्रीः**[8]
**कस्मात् सिद्धीर्जगति कतिचित्प्रार्थयन्ते विमुक्तिम्।**
**कस्यारब्धं भजति विलयं भोगमात्रावसानं**
**यस्मात्तस्मादखिलविभवान्विद्धि चारब्धजातान् ॥४८॥**

ज्ञानयोगाद् ज्ञानसाधनश्रवणादियोगात्कैवल्यं यदि जायते अकर्त्रात्मविज्ञानं मुक्तिनिदानं तदेव भवति। यदि तर्हि मोहमात्रप्रदात्रीः बुद्धिदौस्थ्यहेतुर्मोहः प्रमादो

---

१. स.वे.सा. १७०
२. अ.उ. ४-२ (उपनिषत्सङ्ग्रहे ''द्रव्यमन्त्रक्रियाकालशक्त्याऽऽप्नोत्येव स द्विजः'' इति पाठो दृश्यते।)
३. अ.उ. ४-३ (उपनिषत्सङ्ग्रहे ''नात्मज्ञस्यैष विषयः...'' इति पाठो दृश्यते।)
४. अ.उ. ४-६
५. अ.उ. ४-६
६. अ.उ. ४-२
७. ?
८. प्रथमचरणे स्रग्धरा, इतरेषु चरणेषु मन्दाक्रान्ता इति एकस्मिन्नेव श्लोके छन्दोद्वयं दृश्यते इत्याश्चर्यम्। प्रायः एतादृशः प्रयोगः साहित्यिकग्रन्थेषु न दृश्यते।

वा तमेव प्रददाति। तथाविधाः सिद्धीः जगत्यस्मिन्प्रपञ्चे कतिचित्पण्डितम्मन्याः काङ्क्षन्ते, साधने च यतन्ते। न ते कदापि विमुक्तिं वाञ्छन्तीति चेत् यैर्यैः पूर्वजन्मनि यद्यत्कृतं तत्कर्मभोगं प्रदायैव[1] नश्यति। तस्मात्तानखिलान् ज्ञानरहित-सर्वैश्वर्यानपि काम्यतपोनियमजन्यानत एव नश्वरफलान् विजानीहि। ''**अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते**[2]'' श्रुतिवचनाच्च ॥४८॥

एतावत्प्रश्नप्रतिवचनविमर्शेन शिष्यस्य महाँश्चित्तप्रसादो जात इति स्वानुभूतिं गुरौ निवेदयति — सहस्रेति।

**सहस्रश्रुत्युक्त्या विमलतरयुक्तया च भगवन्!**
**स्थिरीकर्तुं चित्तं मम गदति वाक्यामृत! गुरो!।**
**प्रसादः प्राप्तोऽन्तर्भ्रमणमपि दूरे परिगतं**
**पुनः पृच्छेर्घृष्ट्या न तु विहतिमायाति मुकुरः ॥४९॥**

असङ्ख्यातैः श्रुतिवचनैः तनुगृहीतया युक्त्या च मम चित्तं प्रत्यगभिन्ने ब्रह्मणि स्थिरीकर्तुं स्थैर्यमापादयितुम्, उदिष्टवाक्यामृत! भो गुरो! भगवदनुग्रहवैभवात् प्रसादः मनःसन्तुष्टिलक्षणः प्राप्तः सञ्जातः। भ्रमणमपि सन्देहनिदानं दूरे परिगतं नष्टमेव। तथा त्वां पृच्छामि। भवत्सन्निधौ प्रश्नात्तत्प्रतिवचनश्रवणाच्च मे प्रबोधबुद्धिः फलं दृश्यते। घृष्ट्या पुनः पुनर्घर्षणेन मुकुरो दर्पणादिस्वाच्छ्यमेवोपयाति न तु विहतिं मालिन्यमिति ॥४९॥

तत्राप्योमिति वदन्तं पृच्छति — किं वेति।

**किं वा शास्त्रं वदति कुहनां नाथ! कारुण्यसिन्धो[3]!**
**नाभुक्तं कर्म नश्येदिति वचनमिदं ज्ञानवह्नेकनाश्यम्।**
**सर्वं कर्मेत्यपरमपि मे संशयो वाक्ययुग्मे**
**क्षीणः कस्माद्भवति हि गुरो! सम्यगाख्याहि भूयः ॥५०॥**

---

१. ''प्रदत्वैव'' इति पाठः। अत्र ''प्रदायैव'' इति पाठः स्यात्।
२. ईश.उ. ९; मातृकायाम् ''येसम्भूतिमुपासति''इति पाठो दृश्यते। परम् उपनिषद्भाष्ये प्रथमे खण्डे ''...उपासते'' इति पाठः उपलभ्यते। पृ. ११
३. पद्येऽस्मिन् प्रथमतृतीयचतुर्थचरणेषु मन्दाक्रान्ता, द्वितीयचरणे स्रग्धरा इति एकस्मिन्नेव श्लोके छन्दोद्वयं दृश्यते इत्याश्चर्यम्।



हे नाथ! करुणासागरभगवन्! शास्त्रमृग्वेदादि कुहनां वदति। वा तथा प्रतारकवाक्यवदप्रमाणं वाक्यं भवेत्। यतः कुत्रचिन् ''**नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि**[1]'' इत्याह। अन्यत्र ''**ज्ञानाग्निः सर्वकर्माणि भस्मासात् कुरुते**[2]'', ''**सर्वं कर्माखिलं पार्थ! ज्ञाने परिसमाप्यते**[3]'' इति चान्यत्र स्मर्यते। तथाविधे वचनद्वयेऽपि मे संशयो जातः। तत्कस्मात्क्षीणो नष्टो भवेत्। तथा सम्यङ् निर्णयमाख्याहि भूयः पुनरपीति ॥५०॥

उत्सर्गापवादन्यायमाश्रित्य तदुत्तरं विवक्षुः पूर्वकाण्डार्थं सङ्गृह्य कथयति — एत इति।

**एते जीवा असङ्ख्या अपि चरितममीषामसङ्ख्यं समीक्ष्य**
**श्रुत्या तत्तज्जनानां हृदयपरिणतिं स्वाधिकारं तथोक्तः।**
**[4]पुष्पोत्पत्तेस्तु पश्चादपि फलजनिवत्पूर्वसिद्धान्त एवं**
**काण्डत्रय्या प्रवृत्तिस्तदनु च कथिता सा निवृत्तिः क्रमेण ॥५१॥**

एते प्राणानां धारयितारः जीवा असङ्ख्या अनन्ताः अनादौ संसारसागरे परिमग्नाः। अमीषां चरितं चारित्रं कर्मेति यावत्। तदप्यसङ्ख्यम्। ''**गहना कर्मणो गतिः**[5]'' इति भगवद्वचनाच्च। समीक्ष्य पर्यालोच्य तेषामेव जनशब्द-वाच्यानां हृदयपरिणतिम्। ''इष्टं मे भूयादनिष्टं मा भूत्'' इति मनोवृत्तिं स्वाधारं च तत्तद्वर्णाश्रमोचिताधिकारं च दृष्ट्वा श्रुत्या वेदेनैव तथोक्तः —''**आचित्तशुद्धि कर्मानुष्ठेयम् आब्रह्मसाक्षात्कारं विद्याऽभ्यसनीया**[6]'' इत्यादिः। तच्च पुष्पोत्पत्तेः पश्चात्कुसुमोद्गमनानन्तरं फलोत्पत्तिवत्। तथोक्तिश्च पूर्वकाण्डसिद्धान्तः।

यद्वा प्राचीनसम्प्रदायागतः राद्धान्तः। य एष एवमेव काण्डत्रय्या त्रिकाण्डविषयया श्रुत्या प्रवृत्तिकामिनां प्रकाशिता। तदनुविरक्तानां क्रमेण निवृत्तिश्च

---

१. ना.पु., पूर्वभागः ३१-६९,७०
२. भ.गी. ४-३७
३. भ.गी. ४-३३
४. ''पूष्पोत्पत्तेस्तु'' इति पाठः।
५. भ.गी. ४-१७
६. ?

कथिता। ‘‘**लोकेऽस्मिन्द्विधा निष्ठा पुरा प्रोक्ता मयाऽनघ ! ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्**[१]’’ इति भगवद्वचनात् । तथा च भाष्याभिहितम् ‘‘**नित्यान्यभिहितानि कर्माण्युपात्तदुरितक्षयार्थानि काम्यानि च फलार्थिनां पूर्वस्मिन् ग्रन्थे अथेदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते**[२]’’ इति । तथा च व्यासवचनम् —

‘‘**द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः।**
**प्रवृत्तिलक्षणो धर्मो निवृत्तिश्च विभाषित ।।**[३]’’ इति ।।५१।।

किञ्च —

**पापिष्ठानामवश्यं यदि नरकगतिर्भाविनी चेज्जनानां**
**प्रायश्चित्तैरनेकैर्बहुविधनियमैः तन्निवृत्तिर्मृषा किम् ।**
**कर्माण्यत्यन्तहीनान्यपि जननशतैः सञ्चितानि क्षणेन**
**ज्ञानाग्निर्भस्मकुर्यादिति मुदितमना यो विमुक्तिं प्रयायात् ।।५२।।**

पापिष्ठानां निषिद्धं कर्म कुर्वतां हिंसादिपराणां जनानां मरणादूर्ध्वं तत्फलत्वेन नरकवसतिः रौरवादिनिरयवासः अवश्यम्भाविनी भविष्यतीति चेच्छास्त्रं प्रमाणमेव । अनेकैर्बहुविधैः प्रायश्चित्तैर्मन्वादिप्रणीतैर्ज्ञात्वाऽनुष्ठितैः तन्निवृत्तिः पापनाशो मृषा मिथ्या किम् । तथा चोक्तम् ‘‘**पापे गुरुणि कुर्वाणा स्वप्नान्यल्पे च तद्विदः । प्रायश्चित्तानि मैत्रेय ! जगुः स्वायम्भुवादयः**[४]’’। ‘‘**तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः**[५]’’ इति । अन्यत्राप्युक्तम् ‘‘**न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः । स वै ध्रुवं प्रेत्य नरकानुपैति ये कीर्तिता**

१. भ.गी. ३-३
२. तै.उ.शां.भा. १-१-१ (उपनिषद्भाष्ये प्रथमखण्डे ‘‘नित्यान्यधिगतानि...इदानीं कर्मोपादान...’’ इति पाठः उपलभ्यते । पृ. ३६४)
३. ब्र.पु. २३७-६
४. वि.पु. २-६-३८ ग्रन्थकारेण अपूर्णः श्लोकः उद्धृतः । विष्णुपुराणे श्लोकोऽयमेवं दृश्यते ‘‘पापे गुरूणि गुरुणि स्वल्पान्यल्पे च तद्विदः । प्रायश्चित्तानि मैत्रेय ! जगुस्स्वायम्भूवादयः ।।’’ इति ।)
५. भा.पु. ६-२-१७



**भवतस्तिग्मयातना**[१]’’ इति नियमैश्च बहुभिरिति । नियमाश्च पातञ्जलेऽभिहिता ‘‘**शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः**[२]’’। तैरपि पापनिवृत्तिः जननशतैः पूर्वजन्मसहस्रैः सञ्चितानि सम्पादितानि कर्माणि अत्यन्तहीनान्यपि ज्ञानाग्निः क्षणेन स्वोदयक्षणमात्रेण भस्म कुर्यादेवेति । सन्तृप्तान्तरङ्गः यो वा को वा तज्ज्ञानं श्रवणादिद्वारा सम्पादितवान् स मुक्तिं च प्रयायात् । किं पापमात्रनिवृत्तिम् इति उत्तरार्थः ।।५२।।

तर्ह्येवं प्रभवति ज्ञानैश्वर्ये ज्ञानिभिरेव सर्वैर्भवितव्यं न कर्मपरैरिति शङ्कते — मदिति ।

**मत्स्वान्तैकमहालयस्थितगुरो ! बोधस्त्वयोक्तो महान्**
**जन्मान्तामयनाशनाय चतुरो ब्रह्मैकताप्रापकः ।**
**इत्थं सत्यपि पण्डिताश्च निपुणाऽनावृत्य कस्मादिमं**
**कर्मान्धौ निपतन्ति भूरि तिमिरे तत्कारणं शंस मे ।।५३।।**

मन्मानसमुख्यक्षेत्रविराजमानदेशिकेन्द्र ! त्वयोपदिष्टो बोधो महान् स्वतन्त्रो जन्मजरामरणसर्वदुःखसन्ताननिवृत्तयेऽतिनिपुणो ब्रह्मैकत्वसाधकश्च । नात्र सन्देहः । इत्थं सति पण्डिताः शास्त्रज्ञाः सारासारविवेकनिपुणाश्च जनाः कस्माद्धेतोः इमं पूर्वोक्तलक्षणज्ञानयोगं विहाय तदसम्पादमनादरः भूरि तिमिर अन्धन्तमोयुते कर्मकूपे निपतन्ति । सर्वत्यागपूर्वकं सर्वश्रुतितात्पर्यमविदित्वा श्रौतस्मार्तकर्मपरायणा एव परिभ्रमन्ति । ‘‘**एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति**[३]’’ इति श्रुतेः । ‘‘**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते**[४]’’ इति च । तत्कारणं ब्रूहि । अज्ञानं पतनमस्तु पण्डितानां तु न तत्सम्भाव्यं तेऽपि मुह्यन्ति । अतः त्वयैव कारणं वक्तव्यमिति प्रश्नार्थः ।।५३।।

१. भा.पु. ६-१-७ (श्रीमद्भागवतपुराणे श्लोकोऽयं ‘‘न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः । ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ।।’’ इतिरूपेणोपलभ्यते । पृ. २७९)
२. यो.सू. २-३२
३. मुण्ड.उ. १-२-७
४. ईश.उ. ९

कामादिधीदोष एव संसारपरिभ्रमनिदानमतः विवेकिभिस्तदवसरो न देय इति दर्शयति — अक्षय्यमिति ।

**अक्षय्यं तत्पदं ये नियमितमनसस्ते प्रपश्यन्ति नूनं**
**यद्वत्सञ्चारभाजां सति नयनयुगेनेक्षतां कूपपातः ।**
**तद्वद्विक्षिप्तचित्ता अभिलषितमहाकामजालाः पतन्ते[१]**
**संसाराख्याम्बुराशौ परमशिवपदं नो लभन्ते कदापि ॥५४॥**

ये जनाः स्वाधीनीकृतचित्ताः नितान्तःकरणा त एवाक्षय्यं शाश्वतं तत्पदं विष्णोः पदं पश्यन्ति साक्षात्कुर्वन्ति नूनमेतत् । नेतरे कामिनः पण्डितम्मन्याः सञ्चारभाजां पद्भ्यां धावतां नयनयुगले सत्यपि निम्नोन्नतादिनेक्षतां मनोराज्याऽऽसक्तानां कूपादिपातो दृष्टः । तद्वदेवात्रापि ये विक्षिप्तचित्ताः रजोवासनादोषेणासुरसम्पदा वा दूषितमनसोऽभिलषितमहाकामजालाः काङ्क्षितरागादिपाशबद्धाः संसारसमुद्रे पतन्त्येव । परमशिवपदं कैवल्यं न प्राप्नुवन्ति । कदापीत्यनेन स्वर्गादिफलमनुभूयापि पुनरपि तदेव काङ्क्षन्ते, कदापि न मुच्यन्त इति सूचितं भवति ॥५४॥

ननु ''**एष ह्येव साधुकर्म कारयति**[२]'', ''**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति । भ्रामयन्सर्वभूतानि**[३]'' इति श्रुतिस्मृती जीवानां परमेश्वराधीनतां दर्शयतः । तथा सति कथं तदपराधः शक्यते वक्तुमिति पृच्छति — कृत्यमिति ।

**कृत्यं साधु तथेतरच्च पशवः पत्यैव यत्कुर्वते**
**नुन्नाः सद्गुरुनाथ ! जातपशवः किं वाऽपराद्धा इति ।**
**आख्यास्ये शृणु सौम्य ! नैगमशिरस्तात्पर्यमार्गाविदः**
**सञ्जल्पन्त्यपि मूढचेतस इति भ्रान्तं विबुध्यस्व तत् ॥५५॥**

---

१. ''पतन्ते'' प्रयोगोऽयमपाणिनीय इति भाति । भ्वादिगणस्थः ''पत्लृ-गतौ'' इति धातुः (धा.पा. ८४५) परस्मैपदी वर्तते । किन्तु ''पतन्ति'' इति पदप्रयोगे छन्दोभङ्गः स्यादिति धिया ग्रन्थकर्त्रा अस्य पदस्य प्रयोगोऽकारि, किन्तु नेयं पक्षः प्रबलः । अस्मिन्नेव श्लोके चतुर्थे चरणे अन्तिमो वर्णः लघुभूतो दृश्यते, स च स्रग्धरावृत्तलक्षणानुसारं गुरुः स्यात् ।

२. कौ.ब्रा. ३-८

३. भ.गी. १८-६१



पशवः पशव इव अस्वतन्त्रा जीवाः, साधु शोभनम् इतरदशोभनं कृत्यं कर्म पत्यैव परमेश्वरेण नुन्नाः प्रेरिताः राज्ञेव भृत्याः कुर्वते । सर्वत्र चेष्टन्ते । किं तेऽपराद्धा इति चेत्तदुत्तरं शृणु । परमेश्वरस्य कर्तृत्वं कारयितृत्वं वा ये स्वाभाविकम् आचक्षते ते नैगमशिरस्तात्पर्यमार्गाविदो वेदान्ततात्पर्यक्रमपरिज्ञानरहिता एव । ते मूढबुद्धयोऽत एव तथा सञ्जल्पन्ति । यतः ''**काम एष क्रोध एष रजोगुण-समुद्भवः**[१]'', ''**इन्द्रियस्येन्द्रियार्थे रागद्वेषौ व्यवस्थितौ**[२]'', ''**न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । [३]न कर्मफलसंयोगम्**[४]'', ''**असङ्गो ह्ययं पुरुषः**[५]'' इत्यादिवचनानि जीवसृष्टे वैषम्यं दर्शयन्ति । अतस्तदीश्वरे वैषम्यारोपणं भ्रान्तं विबुद्ध्यस्व । नेश्वरे वैषम्यसर्गहेतुरिति तात्पर्यार्थः ॥५५॥

जीवपरसर्गफलविशेषं दर्शयति — उदिति ।

**उत्कृष्टस्य परस्य सृष्टिरनघा जीवस्य सृष्टिः परा**
**सामान्याऽपि यदादिसर्वजगतां विस्फूर्तिराद्या मता ।**
**अन्त्याहङ्कृतिकामलोभविषयप्राग्भारसन्दूषिता**
**सृष्टिर्जीवकृतैव नेश्वरकृतेत्येवं भवान्तुष्यताम् ॥५६॥**

उत्कृष्टस्य विश्वाधिकस्य परस्य परमेश्वरस्य सृष्टिः सर्गरचना समैव जीवस्य अविद्यावतः सृष्टिः परा सदोषाऽपि यदादिसर्वजगतां भूतभौतिकविकाराणां सामान्या विष्फूर्तिराविर्भावः? आद्या पारमेश्वरी सृष्टिः मता सम्मता । अन्त्या चरमा जीवकृता । सा तु अहङ्कृत्या कामेन लोभेन तत्तद्विषयप्राग्भारेण च संदूषिता कलुषिता । सैवाऽनर्थहेतुर्नेश्वरकृता सृष्टिः मोक्षहेतुत्वात्तस्या इति भवान्तुष्यतां तुष्टिं भजतु ॥५६॥

अन्वयव्यतिरेकाभ्यां जीवपरसृष्टयोः बन्धमोक्षकारणत्वं विशेषतो दर्शयति — नेतुरिति ।

---

१. भ.गी. ३-३७

२. भ.गी. ३-३४

३. ''कर्मफलसंयोगम्'' इत्येव पाठः । अर्थानुरोधेन ''न कर्मफलसंयोगम्'' इति पाठः स्यात् ।

४. भ.गी. ५-१४

५. बृह.उ. ४-३-१५,१६

**नेतुर्ब्रह्मादिमूर्तेः सकलतनुभृतां सृष्टयो मुक्तिदात्र्यो**
**जीवानां सृष्टयस्ता जनिमृतिकलना दुःखरूपा भवन्ति ।**
**नष्टेऽस्मिन्स्थावरादावपि जगति न कोऽप्याप्नुयादेव मुक्तिं**
**नष्टे कामादिदोषे कृतबहुलभयं जन्मदुःखं विनश्येत् ॥५७॥**

ब्रह्मादिमूर्तेरवान्तरसर्गाद्यर्थं ब्रह्माद्यात्मनापि गृहीतस्य सकलतनुभृतां चतुर्विधभूतग्रामाणां नेतुर्नियन्तुरन्तर्यामिणः सृष्टय ईक्षणादिप्रवेशावसानाः सर्गा लीलाविनोदमात्राः, तेषां जीवानां मोक्षदात्र्यो मोक्षप्रदाः । जीवसृष्टयस्तु जाग्रदादि-विमोक्षान्ता अपि मध्ये जनिमृतिकल्पनादुःखभाजः जन्ममरणसंयोगवियोगादि-क्लेशवत्यो भवन्ति । सति जीवसर्गे संसारदुःखमित्यन्वयः । व्यतिरेकमाह — यतः प्रलयसमये स्थावरादिलक्षणे ईश्वरसर्गे नष्टेऽपि कोऽपि मुक्तिं नाप्नुयात् । सुषुप्ताविव पुनरुत्थानदर्शनात् । कामादिदोषे जीववैषम्ये आविद्यके सर्गे गते कृतबहुभयं संसारदुःखं विनश्येत् ॥५७॥

तदेव स्पष्टयति — कल्पान्तेति ।

**कल्पान्ते परमेश्वरस्य कलने नष्टेऽपि के वा गता**
**मुक्तिं सत्यपि देशकालकलने जीवस्य मोहे गते ।**
**वैराग्येण नयेऽपि सञ्चितलयात्प्राप्ता विमुक्तिं परां**
**पाशो मोहमयः पशोर्विरचितो नासौ भवेत्तत्पतेः ॥५८॥**

कल्पश्चतुर्विधः । नित्यो नैमित्तिकः प्राकृतिक आत्यन्तिकश्चेति । नित्यो दैनन्दिनः सौषुप्तः, नैमित्तिकः बाह्यः, प्राकृतिकः सर्वविकारस्य प्रकृतौ लयः, आत्यन्तिकः विदेहमुक्तिफलः । कल्पस्यान्तस्तस्मिन् प्राकृतिके विलये परमेश्वरस्य प्रकृत्यधिष्ठातुः परमेशितुः कलने ईषणादिरूपे प्रयत्ने नष्टे शान्तेऽपि के वा जनाः विमुक्तिमज्ञाननिवर्तकतत्त्वज्ञानं विना कैवल्यं गताः प्राप्ताः । ‘‘**नान्यः पन्था अयनाय विद्यते**[१]’’ इति वचनाद्देशकालसम्बन्धे सत्यपि जीवस्य मोहे मामऽहं न जानामि, परं ब्रह्मेति भ्रमानुभवे गते गलिते वैराग्येणेति मर्त्यं वेदं शरीरमित्युक्त-

१. महावा. ३; ल.उ. ७ (‘‘नान्यः पन्था विद्यतेऽयनाय’’ (श्वे.उ. ६.१५) इत्यपि पाठः अत्र स्वीकर्तुं शक्यते।)



वचनतात्पर्यविचारसञ्जातवैराग्यादिसाधनेनैव सञ्चितलयात् कर्मक्षयात् परां मुक्तिं ज्ञानफलरूपं कैवल्यं न गताः । अतो मोहमयः पाशः पशोरस्वतन्त्रस्य जीवस्यैव रचितः[१] । तत्पतेः पशुपतेः पाशमोचकस्य स्वतन्त्रस्य नित्यतृप्तस्य न[2] भवेत् । ‘‘[३]**एष ह्येवानन्दयाति**[४]’’ ‘‘**न तस्य कार्यं करणं च विद्यते**[५]’’ ‘‘**अपाणिपादो जवनो गृहीता**[६]’’ इत्यादिश्रुतिभ्यः ॥५८॥

जीवस्य संसारित्वमीश्वरस्य नित्यमुक्तत्वं च श्रुतिरेव परोक्षवातमाश्रित्य रूपकन्यायतः बोधयतीति दर्शयति — अश्वत्थेति ।

**अश्वत्थे कृतनीडकौ च विहगौ द्वावेतयोरेकको**
**भुङ्क्ते तत्फलमाकलय्य रुचिमंनान्योत्त्यसौ तत्सखा ।**
**पश्यंस्तिष्ठति भागभेदत इमौ जीवेश्वरौ वैदिकी**
**वाणी वक्ति विभज्य मायिकगुणैर्विद्धि त्वमेतादृशौ ॥५९॥**

श्वः पर्यन्तमपि स्थास्यतीति विश्वसानर्हत्वादश्वत्थः ‘‘**ऊर्ध्वमूलमवाक्छाखः**[७]’’ इति श्रुतिनिर्दिष्टः संसारवृक्षः अश्वत्थः अश्वत्थवत्कामकर्मवातेरितप्रचलितस्वभावः तस्मिन्कृतनीडकौ कृतस्थानौ द्वौ विहगौ सवर्णौ वर्तेते । तयोश्च पक्षिणोरेकः खगस्तत्फलं रुचिमदत्ति मधुरमाकलय्य हृदि सङ्कल्प्यात्ति । तत्सखा तद्विनाभूतोऽन्यः खगो नात्ति न भुङ्क्ते । किन्तु पश्यन् पक्षिणमश्नन्तं वृक्षं फलं च पश्यन्नवलोकयन् तिष्ठत्येव । इत्येवं भागिभेदतः सुवर्णरूपकन्यायेन इमौ जीवेश्वरावेव । वैदिक्यथर्ववेद-निष्ठा वाणी ‘‘**द्वा सुपर्णा सयुजा सखाया**[८]’’ इत्यादिका सरस्वती वक्ति

१. ‘‘रजितः’’ इति पाठः।
२. ‘‘नित्यतृप्तस्य भवेत्’’ इति पाठः। अत्र व्याख्यानुरोधेन पशुपतेः पाशस्य निषेधात् ‘‘नित्यतृप्तस्य न भवेत्’’ इति पाठः स्यात्।
३. ‘‘एष ह्येवानन्दति’’ इति पाठः। उपलब्धश्रुतौ तु ‘‘एष ह्येवानन्दयाति’’ इत्येव पाठः श्रूयते।
४. तै.उ. २-७
५. श्वे.उ. ६-८
६. श्वे.उ. ३-१९
७. कठ.उ. २-३-१ (अत्र ‘‘ऊर्ध्वमूलोऽवाक्शाख’’ इति पाठः उपलभ्यते। अपि च भगवद्गीतायां (१५-१) ‘‘ऊर्ध्वमूलमधश्शाखम्...’’ इति पाठो दृश्यते।)
८. मुण्ड.उ. ३-१-१; ऋ.सं. १-१६४-२०; श्वे.उ. ४-६; ना.उ.ता. १-१; भवसं. २-२

कथयति। व्यावहारिकमेव भेदमनूद्योपदिशति। मायिकगुणैरेव भिन्नौ न तत्त्वतो भिन्नौ। ''**तत्त्वमसि**[१]'' इत्यादिवचनविरोधादित्यर्थः ॥५९॥

जीवपरविभागफलं दर्शयति — अमत्वेति।

**अमत्वैतज्जीवप्रकलितमिदं सर्वचरितं**
**विजानन्तः शम्भोरिदमिति विमूढाश्च पतिताः।**
**पशूनां तद्वृक्तं[२] पशुविहितमेवेति मुदिता**
**विभोर्नेति ज्ञानात्परमपदमायान्ति मुनयः ॥६०॥**

इदमुच्चावचफलं सर्वमपि कर्म पुण्यापुण्यमिश्ररूपजीवकृतमेवेत्यज्ञात्वा शम्भोरेवेदमित्थं कृतं कारितं वेति विजानन्तो जनाः विमूढाः श्रुतितात्पर्यज्ञानहीनाः पतिता भवन्ति। पशूनां स्वकर्मपाशबन्धानां जीवानां वृक्तं सर्वमपि पशुविहितमेव। अन्यथा कृतनाशाकृताभ्यागमदोषप्रसङ्गेन जीव एव कर्ता भोक्तेति च नेश्वरः, तत्साक्षीति ज्ञानात्तस्यासङ्गत्वविज्ञानान्मुनयः परमपदं चित्सदानन्दाद्वितीयब्रह्मावस्थानम् आयान्ति ॥६०॥

बहुविधं जगत् सृजतः कथन्न वैषम्यमीश्वरस्येत्याशङ्क्य सदृष्टान्तम् उपदिशति — साधो इति।

**साधो श्रीगुरुनाथ! सर्वतनुभृत्सामान्य एवेति चेद्**
**ईशः काँश्चन दुर्विधान्कतिचन श्लाघ्याँश्च निर्माति किम्।**
**इत्थं पृच्छसि चेत्पितेव कृपया दुष्टाँश्च शिष्टान्विभुः**
**हन्तीशोऽवति दण्डनामपि विदुस्तस्य प्रसादं बुधाः ॥६१॥**

भो देशिकवर! सर्वतनुभृतां सामान्यः मध्यस्थ ईश्वरः यदि चेत्काँश्चन जीवान्दुर्विधान् दुर्गतान्दुःखिनः काँश्चन श्लाघ्यान्सम्पन्नान्मुदिताँश्च किमर्थं निर्माति? एतच्चोद्यस्यादिकल्पेऽपि समत्वादनादित्वकल्पनायामपि प्रवाहवत् नित्यत्वेन अवच्छिन्नत्वप्रसङ्गादिति चेत् पृच्छसि। तत्प्रष्टव्यमेव। ईश्वरस्तु साधारणं कारणं सुखित्वदुःखित्वादिवैषम्ये च। तत्कर्मैवेति तत्र तत्राभिहितम्। किञ्चेश्वरः पितेव

१. छा.उ. ६-८-७
२. ''तद्वृक्ते'' इति पाठः। अत्र ''तद्वृक्तम्'' इति पाठः स्यात्?



जनक इव कृपया करुणयैव तथा करोति। दुष्टान्हन्ति शिष्टानवति रक्षति। ''**परित्राणाय साधूनां विनाशाय च दुष्कृताम्**[१]'' इति ईश्वराविर्भावफलस्य वर्णितत्वात्। किञ्च पर्जन्यवदीश्वरः सर्वस्यानुग्रहमेव करोति। अतो न किञ्चिदपि तस्य वैषम्यमिति तात्पर्यार्थः ॥६१॥

इतोऽपि साधारणकारणत्वादीशस्य समत्वमाह — बन्धेति।

**बन्धोत्तीर्णमहामते! सुरतरुर्वह्निश्च भागीरथी-**
**स्वाभ्याशं भजतान्तु दैन्यमिहिकासन्तापदुःखं यथा।**
**आधूयावति तद्वदेव भगवान्पायान्निजान्नापरान्-**
**तद्दोषा निखिलाः पशोरिति मुदा नित्यं भवान् वर्तताम् ॥६२॥**

भोस्त्यक्तकर्मबन्ध! सद्बुद्धे! सुरतरुकल्पवृक्षः वह्निश्चाग्निः भागीरथी गङ्गा च स्वाभ्याशं भजतां स्वसन्निधिं प्राप्तानामेव दैन्यदुःखं शीतदुःखमुष्णदुःखं चावधूय निवार्य रक्षति। तद्वद् भगवान् सर्वज्ञः सर्वशक्तिमान् महामायी निजान्स्वाश्रितान् भक्तान् पायाद्रक्षेत्, नापरान् अस्वीयान्[२] न रक्षति। तद्दोषा निखिलाः पशोरेव परमेश्वरं न भजन्ते। अन्यत्क्षुद्रं कर्म कुर्वन्तीति। एते दोषाः पशोर्जीवस्यैव नेश्वरस्येति सदा भवान्तुष्यताम् ॥६२॥

परमेश्वरतत्त्ववेदने वेद एक एव प्रमाणमतस्तदनुसारेणैव श्रेयो भवतीत्याह — एकेति।

**एका मुक्तिः शृणु त्वं प्रथममिह पुमान्सर्वजीवोदयार्थं**
**यश्चक्रे शास्त्रमार्गं तदनुसरणतः सर्वमीशेऽर्पयित्वा।**
**पश्चाच्छुद्धान्तरङ्गा गुरुवरसविधं प्राप्य वैराग्ययुक्ता**
**ये ब्रह्मज्ञानभाजो न पुनरिह भवं यान्ति सिद्धान्त एषः ॥६३॥**

इदं वक्ष्यमाणं सर्वशास्त्रसङ्ग्रहरूपं वाक्यं शृणु। पुमान् परः पुरुषः सर्वजीवानां क्षेमाय यं शास्त्रमार्गं चक्रे कृतवान् तदनुसृत्य पूर्वं तद्विहितं स्वस्ववर्णाश्रमोचितम् अवश्यानुष्ठेयतया मयेदमधिकृतेन कर्तव्यमिति श्रद्धापूर्वमनुष्ठायानुष्ठितं सर्वं

१. भ.गी. ४-१८
२. ''अस्वेमान्'' इति पाठः। अत्र ''अस्वीयान्'' इति पाठः स्यात्?

तस्मिन्परमगुरौ परमेश्वरेऽर्पयित्वाऽनन्तरं परिशुद्धान्तरङ्गाः विवेकवैराग्यशमादिगुणवन्तश्च मुमुक्षवो भूत्वा सद्गुरुसन्निधिं प्राप्य ये तदुपदेशश्रवणमननादिद्वारा ब्रह्मज्ञानसम्पन्ना त एव भवं संसृतिदुःखं न यान्ति । इत्येष एव परमो वैदिकसिद्धान्तः । तथा चोक्तम् ''**श्रुतिप्रमाणैकमतेः स्वधर्मनिष्ठा तयैवात्मविशुद्धिरस्य । विशुद्धबुद्धेः परमात्मवेदनं तेनैव संसारसमूलनाशः**[1]'' इति ॥६३॥

वैदिकाद्ब्रह्मज्ञानान्मुक्तिश्चेदस्तु तद् ज्ञानं दुःसम्पाद्यमेवेत्याशङ्क्य सुकरोपायं तत्प्रकारं च कथयति — ब्राह्ममिति ।

**ब्राह्मं विज्ञानमेतत्कथमिह भविता दीर्घक्लृप्ताद्विचारात्**
**सोऽयं कस्मादनादौ वपुषि कथमिदं कोऽहमित्यादरेण ।**
**का वा संविज्जडं वा किमिदमिति जगच्चिज्जडग्रन्थयः का**
**बन्धो मोक्षः कथं वेत्यनुदिनकलितं चिन्तनं स्याद्विचारः ॥६४॥**

ब्राह्मं ब्रह्मस्वरूपविषयं ज्ञानमपरोक्षावगमः कथं केनोपायेन भविष्यति । इह जन्मन्येवेति चेत् — विचाराच्छ्रुतिवाक्यामनाम् । दीर्घक्लृप्तादित्यनेन ''**आवृत्तिः असकृदुपदेशात्**[2]'' इत्युक्तत्वात् । अवगतिपर्यन्तं ज्ञानोदयपर्यन्तं तद्विचारः कर्तव्य इति गम्यते । तथा चोक्तम् —

**''विचार्याप्यापरोक्ष्येण ब्रह्मात्मानं न वेत्ति चेत् ।**
**आपरोक्ष्यावसानत्वाद्भूयो भूयो विचार्यताम् ॥**
**विचारयन्नामरणाद् ब्रह्मज्ञानं न वेद चेत् ।**
**जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति ॥**[1] इति ।

सोऽयं विचारश्च कस्माद्धेतोः ? अनादौ वपुषि लिङ्गोपाधावहमिति प्रत्ययः शरीरादाविदमिति च । का वा संवित् — किं वृत्तिपरिणामरूपा ? किं वा रीत्यैव ? किमिदं जडं स्वतन्त्रं जगच्च ? कीदृशं नित्यमनित्यं वा ? चिज्जडग्रन्थयश्च

१. वि.चू. १५०
२. ब्र.सू. ४-१-१
१. पं.द. ९-३२,३३ (पञ्चदश्यामिमौ श्लोकौ एवंरूपेण दृश्येते —
''विचार्याप्यापरोक्ष्येण ब्रह्मात्मानं न वेत्ति चेत् । आपरोक्ष्यावसानत्वाद्भूयो भूयो विचारयेत् ॥
विचारयन्नामरणं नैवात्मानं लभेत चेत् । जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति ॥'' इति ।)



काः ? बन्धश्च तात्त्विकः आविद्यको वा ? मोक्षः किमुत्पाद्यादिरूपः[1] ? यद्वा चतुर्विधद्रव्यविलक्षण इत्यनुदिनकलितं चिन्तनं विमर्शः उपक्रमादिषड्विधलिङ्गपर्यालोचनं विचारः मुक्तिं ज्ञानं दास्यति किं विचारेणेत्याशङ्क्य परिहरति । प्रयातेति ।[2]

कर्मैव मुक्तिफलज्ञानं दास्यति किं विचारेणेत्याशङ्क्य परिहरति — प्रयातेति ।

**प्रयातभवसञ्चितैरपि च पुण्यपुञ्जैर्भवेत्**
**प्रबोध इति किं फलं निजविचारतश्चेच्छृणु ।**
**गताऽशुचिरलं भवेच्छुचिरथेशपादार्पितैः**
**कृतैर्दृढविचारतः तत उदेति बोधो हृदि ॥६५॥**

अतीतेषु जन्मसु सम्पादितैः सुकृतराशिभिः स्वर्गादिफलवत् प्रबोधफलमपि स्यात् । अदृष्टस्य दुर्विज्ञेयमभिमतत्वात् विचारात् स्वतन्त्रात् किं फलं स्यात् इति चेच्छृणु । यद्यप्यदृष्टस्य फलजनकत्वमवश्यम्भावि तदपि पुंतन्त्रम्, तथापि आत्मतत्त्वविचारान्निरन्तरकृताद्गुरुशुश्रूषादिना च गताऽशुचिर्निवृत्तरागादिमलः, ईश्वरार्पणरूपेण कृतैः कर्मभिश्च परिशुद्धः दृढविचारतः दीर्घकालनैरन्तर्यसत्कारसेवितात् विचारात् हृदि बोधः तत्त्वज्ञानमुदेति आविर्भवति । अतो विचारमन्तरा न ज्ञानस्य पुष्कलकारणमन्यदस्ति । तथा चोक्तम् ''**नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः । यथा पदार्थविज्ञानं प्रकाशेन विना क्वचित्**[3]'' इति ॥६५॥

१. ''...पाद्यादिरूपम्'' इति पाठः ।
२. उभयोरवतरणीकयोरन्तरे अयं पाठः प्राप्यते परन्तु श्लोकसङ्गत्यभावेन अवतरणिकाद्वयेन चेति विचार्य पाठोऽयम् अधिकः पाठः इति कृत्वा पादटिप्पण्यां निक्षिप्तः । पाठोऽयमेवम् अस्ति — ''प्रयातभवसञ्चितैरपि पुण्यपुञ्जैर्भवेत् प्रबोध इति किं फलं निजविचारतश्चेच्छृणु । गतन्नुचित्प्रकारेण ज्ञानफल(?) इति । तथा चोक्तं ऋभुनिदाघसंवादे ''कोऽहं कथमिदं जातं कथं मरणजन्मनी । विचारयान्तरे वेत्थं महत्तत्फलमेष्यति'' इति ॥६४॥
अत्रायं विशेषः - विष्णुपुराणस्य द्वितीयांशे पञ्चदशाध्याये ऋभुनिदाघसंवादे श्लोकोऽयं न दृश्यते किन्तु अन्नपूर्णोपनिषदि एवंरूपेण दृश्यते — ''कोऽहं कथमिदं किं वा कथं मरणजन्मनी । विचारयान्तरे वेत्थं महत्तत्फलमेष्यसि ॥'' इति ।
३. अप.अनु. ११ (अपरोक्षानुभूत्याम् ''...यथा पदार्थभानं...'' इति पाठः उपलभ्यते ।)

ननु विचारोऽपि मानसकर्मण्यन्तर्गत एव। त्रिविधकरणव्यापारस्यापि कर्मत्वाभ्युपगमात्। तथा सति अपूर्वद्वारा सर्वफलकारणस्य कर्मण एव फलं ज्ञानमस्तु। कृतं विचारेणेति पुनरप्याशङ्कते — वैराग्यमिति।

**वैराग्यं भक्तिपूर्वं त्रिदशपुरगतिं सत्तपश्चाणिमादि**
**ध्यानं योगं सरूपाभिधमपि नितरां मोक्षमाचार्यवर्यम्।**
**यत्कर्मैव प्रदत्ते निजमभिलषितं कर्मणा साध्यते किं**
**बोधस्सम्मोहनाशो न हि भवति फलं किं विचारेण भूमन्! ॥६६॥**

वैराग्यं श्ववान्ताशनमूत्रपुरीषादाविव जायमाना जुगुप्साबुद्धिर्वैराग्यम्। विषयेष्वनाभोगात्मिका उपेक्षाबुद्धिर्वा वैराग्यम्। तद्भक्तिपूर्वं परमेश्वरभजनसहितं त्रिदशानां देवानां पुरममरावतीत्युक्तं तद्गतिः प्राप्तिः सत् तपः शोभनम् इन्द्रियजयादिरूपं तपश्चाणिमादिमष्टैश्वर्यम्। ध्यानं सगुणदेवताभिध्यानम्, योगं चित्तवृत्तिनिरोधरूपम् अष्टाङ्गोपेतम्, सरूपाभिधं मोक्षं सालोक्यादिफलञ्च। नितरामतिशयेन कर्मैव वाङ्मनःकायचेष्टितं देहापातानन्तरं वारत्रिकं सति देहे ऐहिकं फलं च अपूर्वद्वारा ददाति। स्वाभिलषितं तादृशेन महामाहात्म्यवता ''**गहना कर्मणो गतिः**[1]'' इति दुर्विज्ञेयमहिमत्वप्रतिपादकः साक्षाद् भगवत्प्रशंसितेन केवलं सम्मोहनाशः मोहमात्रनिवर्त्तकः किं फलं न भवति? कर्म न जयति। किं फलं कर्मणोऽन्यद्विचारेण क्रियते। कर्मणः सकाशात् सर्वफलसिद्धौ विचार इति प्रकारान्तरेण तस्यैव नामकरणतः किं प्रयोजनम्? ज्ञानध्यानयोर्मानसयोरभेदेऽपि भेदवदत्रापि भेदोऽस्ति वेति प्रश्नार्थः ॥६६॥

अविचारकर्मणोरपि पुंतन्त्रत्वासाम्येऽपि [2]वैलक्ष्यण्यमस्तीति दर्शयितुं दृष्टान्तमाह — वेषेति।

**वेषप्रच्छन्नगात्रा जगति कतिपये चेष्टितैस्स्वस्वभावैः**
**शीलैस्तेषां प्रवृत्त्या सुचिरपरिचयैश्शक्यरूपाः प्रबोद्धुम्।**
**सञ्चारैर्ध्यापनैर्वाऽऽवृत्तपरिचरणैः कर्मभिश्चातितीव्रै-**
**रुच्चस्तम्भाधिरोहैर्भवति न विदितं तच्चरित्रं सुगूढम् ॥६७॥**

१. भ.गी. ४-१७
२. ''वैलक्षिण्यम्'' इति पाठः।



जगत्यस्मिन् प्रपञ्चे वेषेण कृत्रिमालङ्कारादिरूपेण प्रच्छन्नं गात्रं येषां कतिपया जना यदि भवेयुः ते चावश्यं विज्ञातव्या यदि तदा चेष्टितैश्चारित्रैर्देवदत्तकृतमेतन्नान्यः करोत्येतदिति स्वस्वभावैस्स्वरादिभिरसाधारणैराकृतिभिः शीलैर्वृत्तैः प्रवृत्त्या बहुसहवासपरिचयैराप्तोपदेशादिभिश्च प्रबोद्धुं विज्ञातुं शक्यरूपा भवन्ति। इतरथा सञ्चारैर्गमनादिव्रताद्यनुष्ठानैः मासोपवासादितीव्रनियमसाध्यैः कर्मभिः प्राणायामादिभिश्च उन्नतवृक्षमारोहगमनैश्च[1] तच्चरित्रं देवदत्तः असावेव इदं करोतीति न विदितं विज्ञातं भवेत्। यतः गूढम् अतः आप्तोपदेशादिनैव ज्ञातव्यमित्यर्थः ॥६७॥

दृष्टान्ताभिहितमर्थं दार्ष्टान्तिके योजयति — इतीति।

**इतीवैतद् ब्रह्म प्रकटनपरैर्वेदवचनै-**
**र्यदुक्तं तज्ज्ञानं प्रभवति विचारेण न विना।**
**तपोदानाद्यं वा त्रिषवणजलस्नानमथवा**
**ह्यधीतो वा वेदो न दिशति परं ज्ञानमतुलम् ॥६८॥**

इतीवेति यथा दृष्टान्ते तथा अतीन्द्रियेऽपि ब्रह्मणि तत्प्रकटनपरैः तद्याथार्थ्यावेदकैर्वेदवचनैरुपनिषद्वाक्यैः यदुक्तं ज्ञानं तदज्ञानबाधकम्, नेतरदिति। तद्विचारेण विना महावाक्यार्थविचारमन्तरा कस्यापि कदापि न भवति। तर्हि तपोनियमादि निरर्थकम्? नेत्याह। तपः अनशनादिव्रतम्, दानाद्यं यज्ञादिकम् आदिशब्देन गृह्यते। तेषां विविदिषाजनकत्वात् ''**तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन**[2]'' इत्यादिश्रुतेः। त्रिकाल-जलावगाहनं साङ्गः सरहस्योऽधीतो वेदः अतुलं ज्ञानं न दिशति।

अमलमिति वा पाठः। निरवद्यं ज्ञानं सम्यक् ज्ञानन्नोत्पादयति। तथा चोक्तम् ''**ब्रह्मात्मैकत्वविज्ञानं सम्यग् ज्ञानं श्रुतेर्मतम्**[3]'', ''**तदात्मानात्मनोः सम्यग्विचारेणैव सिध्यति**[4]'' इति। अतस्सर्वमपि कर्माविद्यां वर्धयत्येव न

१. ''उन्नतवृक्षमारोगमनैश्च'' इति पाठः।
२. ''अत्र ''यज्ञो दानेन तपसाऽनाशके'' इति पाठः उपलभ्यते। परं बृहदारण्यकोपनिषदि (४.४.२२) ''...विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'' इति पाठः श्रूयते।)
३. वि.चू. २०४
४. वि.चू. २०५

निवर्तयति। विचारः मानसोऽपि श्रुत्याऽऽचार्याऽनुगृहीतः अविद्यां क्षपयतीत्यर्थः ॥६८॥

ज्ञानं विचारमेकमेव स्वोत्पत्तावपेक्षते। [१]उत्पन्नज्ञानमन्यनिरपेक्षमेव निवर्तयति इत्युक्तम्। तत्र प्रकारान्तरेण सन्दिहानः सदृष्टान्तं पृच्छति —स्वच्छेति।

**स्वच्छादर्शगतम्मलङ्करतलीघर्षादृते को भुवि**
**श्रीमद्देशिकवर्य! सूक्ष्मधिषणायोगात् क्षयन्नीतवान्।**
**अप्रक्षाल्य तथैव कर्मनिकरैरज्ञानमाच्छादकं**
**तत्त्वज्ञानपरामृतेन विलयं कुर्यात्कथं तद्वद ॥६९॥**

स्वच्छं स्वभावतो निर्मलमविमूर्त्तमादर्शं तत्संयुक्तं मलं धूलिधूसरादिकं करतलीघर्षादृते इष्टकाचूर्णं सङ्घर्षणं वस्त्रादिसम्मार्जनाद्युपायमन्तरं भुवि को वा पुरुषः सूक्ष्मधिषणायोगात् तन्मलक्षयं कृतवान्। सर्वेऽपि[२] तत्तदुपायैस्तत्तन्मलं क्षपयन्ति। तथा सति ''**न हि दृष्टे अनुपपन्नं नाम**[३]'' इति न्यायवत् अत्रापि यथोचितैः कर्मनिकरैरात्मतत्त्वावारकम् अज्ञानमलमपि अप्रक्षाल्य तत्त्वज्ञानपरामृतेन विलयं कथं कुर्यात्? तन्निर्णयं वदेति प्रश्नार्थः ॥६९॥

त्वयोक्तदृष्टान्तः मूर्त्तपदार्थगोचरः वास्ति वा मलविषयश्च? तम आरोपित-मलत्यागेन दृष्टान्ततामायातीति स्वानुकूलं दृष्टान्तान्तरमादाय परिहरति — भवतीति।

**भवति मुकुरबिम्बे वास्तवं यन्मलन्तत्-**
**स्फटिकदृषदि तत्तु भ्रान्तिमात्रैकसिद्धम्।**
**मुकुरगमुपयायात् कर्मणैव प्रहाणि**
**हृदयमलमथान्यद्भ्रान्तमेषेति बोद्धुम् ॥७०॥**

मुकुरबिम्बे आदर्शबिम्बे यत् मलमस्ति तद्वास्तवं निवारितमपि पुनर्दर्शनात्। स्फटिकदृषदि तु प्रतीयमानं लौहित्यादिकं तदविवेकभ्रमारोपितम्, प्रत्यक्षत्वात् सिद्धं च मुकुरगं तुं कालिमादि कर्मणैव करतलमार्जनवस्त्रादिशोधनेन प्रविलयम् उपगच्छेत्। हृदयमलं तत्तादात्म्याध्यासादिरूपं रक्तस्फटिक इति व्यवहारकारणं

१. ''उत्पन्नमज्ञानम्'' इति पाठः। अर्थानुरोधनात्र ''उत्पन्नज्ञानम्'' इति पाठः स्यात्।
२. ''सर्वो'' इति पाठः। क्रियायाः बहुवचनत्वेन अत्र ''सर्वे'' इति पाठः स्यात्।
३. ब्र.सू.शां.भा. ४-१-२; बृ.उ.शां.भा. ४-३-६



मलं तु भ्रान्तमविवेककल्पितमेवेति सोढुं हृदयं बुद्धिरेकैवालम् ॥७०॥

तदेव स्पष्टयति — द्वाभ्याम्।

**सत्यानन्दचिदम्बुधावपि तथा शुग्जाड्यमित्यादिकं**
**मायाकल्पितमेव जातु न भवेत् स्वाभाविकं वास्तवम्।**
**अज्ञानं प्रदहेन्न कर्मनियतं किन्तु प्रकर्षं नयेद्**
**विज्ञानं विदधीत कर्मनिखिलं स्वोत्पत्तितो भस्मसात् ॥७१॥**

सत्यज्ञानानन्दसागरे तथा स्फटिके लौहित्यमिव अनृतजडदुःखात्मकं जगत् मायाकल्पितमेव अविद्यारोपितमेव, न स्वाभाविकम्। स्वभावस्य परित्यागा-सम्भवात् तस्यैवार्थः वास्तवमिति। यद्वा वास्तवमज्ञानमिति। तद्विशेषणज्ञानं कर्म, कर्म च कर्तृ न प्रदहेत्। निश्चितमेतत् कर्माज्ञानयोः कार्यकारणभावेन विरोधाभावात् किन्त्वज्ञानं प्रकर्षं प्रवृद्धमेव कुर्यात्। विज्ञानम् उपनिषदर्थविचारजन्यविवेकवृत्त्यारूढं ज्ञानमेव स्वाऽऽविर्भावमात्रेण सर्वं कर्म समूलं भस्मसात् कुर्यात् निश्शेषं नाशयेत् ॥७१॥

श्रुतितात्पर्यविचारजन्यवृत्तिज्ञानमेव सकार्यमज्ञानन्निवर्त्तयतीत्युक्तं तदपि दृष्टान्तान्तरेण दृढयति — गर्भेति।

**गर्भागारगतन्न वस्तु विषयीकुर्याद् भृशं रोदनै-**
**र्विस्मर्ता पुनरेव तत्तु मनुजः स्मृत्या यथा ज्ञास्यति।**
**आत्मानञ्च तथैव शुद्धमपहत्याज्ञानमावरकं[१]**
**जानीयात् स्वविचारतो बहुभिः कल्पैः कृतैः कर्मभिः ॥७२॥**

गर्भागारगतम् अन्तर्गृहस्थितं वस्तु रत्नादिकं विस्मर्ता अत्र निहितमिति विस्मरणशीलः मनुजः पुनः रोदनताडनादिभिः तदन्वेषणश्रान्तोऽपि तत्स्मृत्या स्मरणेनैव वृथा मया भ्रान्तम् अत्रैव वर्तते[२] इति तदसम्प्रमोषेण ज्ञास्यति। तथा आत्मानं शुद्धमविद्यातत्कार्यमलास्पृष्टं स्वरूपभूतं प्रत्यञ्चं नित्यसिद्धमविवेकी तदावारकमज्ञानमपहत्य स्वविचारेणैव क्लृप्त्वा सोऽहमिति प्रत्यभिज्ञाय

१. ''...मावारकम्'' इति पाठः। अत्र ''...मावरकम्'' इति पाठः स्यात्?
२. ''अत्रैवर्तते'' इति पाठः।

विजानीयात् । अन्यथा बहुभिः[१] कल्पैः कृतैरपि कर्मभिर्न जानातीत्यर्थः ॥७२॥

ननु ज्ञानादेव चेत् सुखं तर्हि वेद एव किमर्थं कर्म कर्त्तव्यमित्युपदिशतीति पृच्छति — आचार्येति ।

**आचार्यश्रेष्ठ ! या त्रय्यभिवदति सुखं बोधमात्रादितीयं**
**सा पुण्यापुण्यमिश्रैस्सुरनरकुरुहां प्राप्नुयुर्देहयोगम् ।**
**वर्णाचारक्रमार्थं सुखमपि विपुलं प्राप्नुवन्तीति तेऽमी**
**ब्रूते किङ्कर्मकाण्ड्या प्रकथयतु भवान् केवलं मे कृपालो ! ॥७३॥**

भो देशिकेन्द्र ! स्वामिन् ! बोधमात्राद् देवतत्त्वज्ञानाद् वैराग्यफलात् कैवल्यसाधनात् सुखं परमा तृप्तिरिति या त्रयी ''**तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्**[२]'' इति श्रुतिः अभिवदति । सैव पुण्यापुण्यमिश्रैः पुण्यं शुभं इष्टफलम्, अपुण्यं पापमनिष्टफलम्, मिश्रं तदुभयं व्यामिश्रम् । तैरेव त्रिविधैः कर्मभिः सुरनरकुरुहां देहयोगम्[३] । तत्र पुण्यैर्देवशरीरम्, अपुण्यैः[४] स्थावरादिभावम्, मिश्रैर्मानुषं प्राप्नुयुरिति । तथा चोक्तम् ''**पुण्येन पुण्यं लोकं नयति पापेन पापम् । उभाभ्यामेव मनुष्यलोकम्**[५]'' इति । स्मृतिरपि ''**पुण्यैर्देवत्वमाप्नोति निषिद्धैर्नारकीं गतिम् । उभाभ्यां पुण्यपापाभ्यां मनुष्यं लभतेऽवशः**[६]'' इति । तेऽमी संसारिणः वर्णाचारक्रमार्थं स्वस्ववर्णाश्रमकुल-गोत्राद्यभिमानप्रवृत्त्यनुरूपं सुखमपि, एतदेव परमं सम्पादितमिति प्राप्नुवन्तीति च कर्मपरग्रन्थभागेन ब्रूते कथयति तत्र किं कारणम् ? भवानेव केवलं कथयतु कृपालो ! इति । नान्य एतद्वक्तुं समर्थः, जानन्नपि न बहिः प्रकटयति । कृपालुत्वात्

१. ''बाहुभिः'' इति पाठः।
२. कठ.उ. २-२-१२
३. ''देहयोम्'' इति पाठः।
३. ''अपुण्ये'' इति पाठः।
५. प्रश्न.उ. ३-७
६. म.भा. शान्तिपर्वणि ३२९-२५ (''शुभैर्लभति देवत्वं व्यामिश्रैर्जन्ममानुषम् । अशुभैश्चाप्यधोजन्म कर्मभिर्लभतेऽवशः ॥'' इति पाठो दृश्यते। अपि च श्लोकोऽयं नैष्कर्म्यसिद्धौ (१-४१) अपि ''शुभैराप्नोति देवत्वं निषिद्धैर्नारकीं गतिम् । उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवशः ॥'' इति रूपेण दृश्यते । पृ. २१)



श्रीमता वक्तव्यम् । नाहं वेदरहस्यमुपदेशमन्तरा विज्ञातुं पारयामीति प्रश्नार्थः ॥७३॥

''**परोक्षवादो वेदोऽयं बालानामनुशासनम् । कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा**[१]'' इति प्रतिपादितन्यायमनुसृत्य तदुत्तरं सदृष्टान्तम् उपदिशति — नित्यमिति ।

**नित्यं मृद्भक्षणेच्छोर्जगति निजशिशोर्ल्लड्डुकादीन् प्रदर्श्य**[२]
**व्याधिघ्नं काटवाढ्यं वितरति जननी भैषजं तद्यथैव ।**
**धर्मानातिष्ठ यज्ञानपि कुरु भविता भूरिसौख्यं तवेति**
**ब्रूते तद्वच्छ्रुतिस्सा तदभिमतमिमे कामिनो नैव विद्युः ॥७४॥**

जगति अस्मिन् प्रपञ्चे मृद्भक्षणेच्छोः बाल्यचापल्येन प्रतिदिनं मृदादिभक्षा-ग्रहिणः निजशिशोः पोष्यस्य लड्डुकादीन् अपूपशष्कुलादीन् प्रदर्श्य न तु दत्त्वा तत्समीप एव किञ्चिद्दत्त्वापि मृदादिभक्षणसञ्जातबहुविधव्याधिनिवारकं काटवाढ्यं तं माता कृपया भैषजमौषधं यथा वितरति ददाति । ''एतत् भुङ्क्ष्व अनन्तरमिदं गुलादिकं दास्ये'' इत्युक्त्वा भोजयति । विश्वासार्थं किञ्चित् क्वचिद्ददाति च । अनन्तरं ''काको गृहीत्वा गतः'' इति वञ्चयति च । एवं हि लोकप्रसिद्धिः । तथा चोक्तम् ''**शिखा ते वर्धते वत्स गडूचीं पिब सादरम् । मातेव प्रेरयेद्बालं**[३]'' श्रुतिरिति । तद्वदेव त्वमत्राधिकृतः न [४]काणत्वकुब्जत्वाद्यधिकारधर्मवान् । अत एव धर्मानग्निहोत्रादीन् नित्यानातिष्ठ । सयूपानयूपाँश्च क्रतुविशेषान् कुरु । तव परलोके भूरि सौख्यं भविष्यतीति । तत्र तस्य प्रवृत्तौ शुक्ला या श्रुतिः ब्रूते तदभिमतं वेदतात्पर्यं कामिनः अज्ञाता[५] अज्ञत्वात् नैव विजानीयुः ॥७४॥

ननु अज्ञाः कामिनः वेदतात्पर्यं न जानन्तीत्युक्तम् । सत्यम्, तत् व्याख्यातारः तदर्थं कस्मादित्थं न वर्णितवन्तः इत्यादिशङ्कामनूद्य[६] परिहरति — स्वेति ।

१. भा.पु. ११-३-४४
२. मूले व्याख्याने च ''प्रदृश्य'' इति पाठः। उभयत्र ''प्रदर्श्य'' इति पाठः स्यात् ।
३. तै.वा. २.१.२३ (''...गुडूचीं श्रद्धया पिब...'' इति पाठो दृश्यते।)
४. ''...कुब्दत्वाद्य...'' इति पाठः।
५. ''अज्ञात'' इति पाठः। अत्र ''अज्ञाताः'' इति पाठः स्यात्?
६. ''इत्यादिशङ्कामद्य'' इति पाठः। अत्र ''इत्यादिशङ्कामनूद्य'' इति पाठः स्यात् ?

**स्वेष्टाहारे वधूनामभिमतगमने सर्वजन्तोः प्रवृत्तिं**
**नित्या यस्मात्किमेतां वदति हि निगमस्तावदेषोऽप्रवीणः ।**
**कृष्ण स्याः काक वह्ने दह भव कटुको निम्बवृक्षानिल त्वं**
**क्षिप्रं गन्ता भवेति प्रकथितवचनो मा स्म भूत्कोऽपि लोके ॥७५॥**

यथारुचिभुक्तौ वधूनां स्त्रीणां गमने सर्वजन्तोः प्राणिमात्रस्य प्रवृत्तिर्दृष्टा सा च नित्यैव रागतः प्राप्ता। यस्मात् सा प्राणिधर्मः पश्वादीनामपि दर्शनात् वैधः। एतां प्रवृत्तिं निगमः ''**ऋतौ भार्यामुपेयात्**[1]'', ''**ब्रह्मचर्यं समाप्य गृही भवेत्**[2]'' इत्यादिका श्रुतिर्वदति। किं विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सतीति किल प्रोच्यते। तथा चेद्वदेद्वेदः अप्रमाणः असर्वज्ञः किम्? तस्मान्नायमर्थो वेदस्यनुप्रजनश्च(?) स्वाध्यायप्रवचने चेत्यादौ पुत्रोत्पादनादिकं गृहस्थस्य चोद्यते इति चेत् — न। तत्रापि संसारिणस्तस्य ऋणविमोचनार्थं नियमः क्रियते।

तथा च वर्णितम् ''**लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्न हि तत्र चोदना। व्यवस्थितिस्तासु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा**[3]'' इति। तथा विधाने सिद्धसाधनदोषोऽपरिहार्यस्स्यात्। तथाविधवचनमप्रमाणमेव। तत्र दृष्टान्ताः[4] एते — हे काक! त्वं कृष्णः कृष्णवर्णस्स्याः भवेः। भो वह्ने! दहनस्वभाव! त्वं दह। भो निम्बवृक्ष! पिचुमन्द! त्वं कटुकस्स्याः। भो वायो! त्वं शीघ्रगतिर्भवेति वचनशीलः कोऽपि मा भूत्, प्रामाणिको न स्यात्। अतः वेदः अपूर्वमर्थं विधातुं नियन्तुं वा न प्रवृत्तः। अतस्तन्निषेधद्वारा परमपुरुषार्थबोधक एवेत्याशयः ॥७५॥

अपूर्वनियमलक्षणौ विधी वेदस्य नेष्टौ चेत् पारिशेष्यात् परिसङ्ख्या विधिरेव इष्ट इत्यापतति। तर्हि ''**आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्**[5]'',

१. आ.श्रौ.सू. २-१६-२५
२. जा.बा. ४
३. भा.पु. ११-५-११ (श्रीमद्भागवतपुराणे ''व्यवस्थितिस्तेषु विवाहयज्ञ...'' इत्यपि पाठो दृश्यते। पृ. ६३५)
४. ''दृष्टान्ताम्'' इति पाठः।
५. जै.सू. १-२-१



''**तद्भूतानां क्रियार्थेन समाम्नायः**[1]'' इत्यादिवचनानां का गतिरित्याशङ्क्य परिसङ्ख्याविधान एवेत्याह — चेदिति।

**चेन्मद्यामिषपानभक्षणविधौ वाञ्छा कुरुष्वाध्वरान्**
**भोगे स्यान्मनसो रुचिर्यदि तदा दारान्निजानाहर।**
**इत्याख्यानपरश्रुतेरभिमतौ नाद्यौ विधी कावुभौ**
**किन्त्वेषा परिसङ्ख्ययैव सकलं हातुं प्रवृत्ता खलु ॥७६॥**

मद्यं सुराऽऽमिषं मांसं तयोः पानमाद्यस्यान्यस्य भक्षणं तद्विधाने वाञ्छा काङ्क्षा चेदस्ति तर्हि अध्वरान् कुरुष्व सौत्रामण्यादौ सुराग्रहादिविधानात्। भोगे व्यवाये मनसः रुचिरभिसङ्गच्छेत्। निजान्दारानाहर, स्वानुरूपां स्त्रियं न्यायतः विवाहादिकर्मपूर्वं परिणयस्व। निजानिति विशेषणं परस्त्रीसङ्गदोषनिवृत्यर्थम्। इत्येवं प्रतिपादनवेदभागस्य कर्मकाण्डस्य तत्तद्वर्णाश्रमनियमविधायकस्याद्यौ अपूर्वनियमौ विधी नेष्टौ। ''**प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरम् एषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति**[2]'' इति पुनर्निन्दादर्शनात्।

अतः पारिशेष्यात् अपूर्वविधिच्छायापन्नं तद्वैधवाक्यं नियमिविधिद्वारा परिसङ्ख्याविधावेव समाप्तम्। एषा श्रुतिः परिसङ्ख्यया ''**पञ्च पञ्चनखा भक्ष्याः**[3]''

१. जै.सू. १-१-२५
२. अत्र मातृकायां ''प्लावाव्येते अदृढा यजूरूपा'' इति पाठः। मुण्डकोपनिषदि (१-२-७) ''प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तम् अवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति ॥'' इति पाठः उपलभ्यते।
३. ''पञ्च पञ्च नखा भक्ष्याः'' इति श्रुतिवाक्यम्। एतदर्थकं वाक्यं मनुयाज्ञवक्यवसिष्ठादिस्मृतिषु, व्याकरणमहाभाष्ये, श्रीमद्रामायणे एवमन्यत्रापि प्राप्यते। स्मृतिस्तु न स्वतन्त्रा, वेदमूलत्वेन एव तस्याः प्रामाण्यम्। अतः एतन्मूलं श्रुतिवाक्यं क्वचित् शाखायां नूनं स्यादिति अनुमीयते। साक्षाच्छ्रुतिवाक्यं तु उपलभ्यमानासु शाखासु न क्वचिद् दृश्यते। वाल्मीकिरामायणे (४.१७.२९) वाक्यमिदमित्थं दृश्यते ''पञ्च पञ्चनखा भक्ष्याः ब्रह्मक्षत्रेण राघव। शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः ॥'' मनुस्मृतौ (५.१८) ''श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा। भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्राँश्चैकतोदतः''। याज्ञवल्क्यस्मृतौ (१.१७७) ''भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्यकाः''। गौतमस्मृतौ (१७) ''पञ्चनखाः शशशल्यकश्वाविद्गोधाखड्गकच्छपाः''। वसिष्ठस्मृतौ (१४.२९) ''श्वाविच्छल्यकशशकच्छपगोधाः पञ्चनखानां भक्ष्याः''।

विषं भुङ्क्ष्वेत्यादिवाक्यप्रवृत्तिवत् सकलं दुःखजालं संसारं कर्म च हातुम् अपवदितुं प्रवृत्ता सर्वनिवृत्तावेव परिसमाप्तेति तात्पर्यार्थः इति ॥७६॥

उभयप्रतिपादने वाक्यं भिद्येतेत्याशङ्क्य निवृत्तिर्भूमौ स्थित्वैव तथा ब्रवीति। नातो वाक्यभेद इति तदपि दर्शयति — आघ्राणिति।

**आघ्राणभक्षं पिशितासवाना-**
**माख्यातिवेदोऽथ रतिं प्रजायै।**
**उन्मुच्य पश्चादखिलं तदेत-**
**न्निष्ठा परस्स्यादिति वक्ति पश्य ॥७७॥**

पिशितासवानां मधुमांसादीनाम् आघ्राणं भक्षं तत् घ्रातिर्भक्षणं स्यादिति वक्ति। प्रजायै पुत्रार्थं रतिं तत्तदृतुकाले वक्ति। पश्चात् ऋणत्रयमोचनानन्तरम् अखिलमेषणादिकमुन्मुच्य सर्वं संन्यस्य विरक्तः ''**शान्तो दान्त उपरतः**[1]'', ''**निष्ठापरस्समाधिपरस्स्यात्**[2]'' इति च वक्ति तच्च पश्य। तथा चोक्तम् ''**आघ्राणभक्षो विहितः सुरायास्तथा पशोरालभनान्तर्हिंसा। एवस्यवाधः प्रजया न रत्यै इमं विशुद्धं न विदुः स्वधर्मम्**[3]'' इति ॥७७॥

ज्ञानाज्ञानयोस्तमःप्रकाशयोरिव विरोध उक्तः, कर्माज्ञानवर्धकमेवेत्यपि प्रतिपादितम्। अज्ञानसंवलितमात्मचैतन्यं जगत्कारणमिति कथं वक्तुं शक्यत इति पृच्छति — अज्ञानेति।

**अज्ञानस्य न कर्मणाऽस्ति रिपुतेत्येतद्यथार्थं वचो**
**विज्ञानन्तु परन्निहन्ति नितरामज्ञानमित्यायं(?) चेत्।**
**ज्योत्स्नायान्तिमिरन्तथैव पतितन्त्वज्ञानमेतच्चितौ**
**लग्नं लोकमिमं कथं विरचयत्याख्याहि सम्यग्गुरो ! ॥७८॥**

---

१. बृह.उ. ४-४२३

२. ?

३. भा.पु. ११-५-१३ (श्रीमद्भागवतपुराणे श्लोकोऽयं ''यदघ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा। एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मम् ॥'' इतिरूपेणोपलभ्यते। पृ. ६३५)



अज्ञानस्य अनादिभावरूपस्य ज्ञाननिवर्त्यस्य ''माम् अहं न जानामि'' इत्युक्तलक्षणस्य कर्मणा तत्कार्यभूतेन रिपुता विरोधः नास्तीति पूर्वोक्तं तत्सत्यम्। विज्ञानम् आत्मैकाकारवृत्त्यारूढं ज्ञानं नितरां सर्वात्मना तदज्ञानमिति चेत् तदपि सत्यमेव। ज्योत्स्नायां कौमुद्यां पतितं तिमिरमिव चितौ आत्मचैतन्ये संलग्नं तदज्ञानं तिमिरं लोकं कथं विरचयति इत्येतदाख्याहि। तत्कारणमुपदिश। विलक्षणन्निहन्ति बाधते। परं च तत्फलाभासभिन्नम्।

यद्वा परं परमात्मविषयमिति सम्बन्धः न क्वापि दृष्टः। खद्योतादावपि पक्षावयवसङ्कोचविकासनिमित्तकम्। आत्मा च निरवयवः स्वप्रकाशश्च। स कथं तमोरूपाज्ञानसम्बन्धेन जगत् सृजति ? तत्तत्त्वं वदेति प्रश्नार्थः ॥७८॥

अधिष्ठानसामान्यरूपं चैतन्यं न कस्यापीदमंशादिवद्विरोधीति दर्शयितुं ज्ञानस्य द्वैविध्यं कथयति — {द्वेधेति} एकमिति।

**[1]एकं ज्ञानं परमपि कथितं वृत्तितश्च स्वरूपाद्**
**[2]वृत्तिज्ञानस्वरूपाभिधचितिरवभात्येव वत्सास्ति नान्यत्।**
**नाज्ञानस्यैव शत्रुर्भवति परचितिर्दृष्टमेवैति सुप्तौ**
**वृत्तौ लग्ना स्वरूपाभिधचितिरपि सा नाशयेत् स्वीयमोहम् ॥७९॥**

ज्ञप्तिः ज्ञानमिति[3] भावार्थः। ज्ञायत इति करणार्थः। ज्ञानमात्मस्वरूपश्चैतन्यम् एकरसमपि वृत्तितः स्वरूपादपि द्विधा द्विप्रकारं निर्दिश्यते — स्वरूपज्ञानं वृत्तिज्ञानं चेति। वृत्तिज्ञानं च वृत्त्यारूढं ज्ञानमपि स्वरूपाभिन्नाचितिरेव अवभाति। न स्वरूपाद् वृत्तिज्ञानस्य भेदः। आधारं विनाऽऽधेयायोगात्। परचितिः देहादिविलक्षणम् आत्मचैतन्यमज्ञानस्य शत्रुर्विरोधि[4] न भवति, सुषुप्तौ विरोधाननुभवात्। तदेव वृत्तौ लग्ने प्रविष्टं सत् स्वीयमोहं स्वात्मीयमज्ञानं नाशयेत् ॥७९॥

ननु सुषुप्तावज्ञानानिवर्त्तकस्य ज्ञानस्य कथमन्यत्र तन्निवर्त्तकत्वमित्याशङ्क्य सदृष्टान्तं कथयति — स्वरूपेति।

---

१. प्रथमचरणे चन्द्रलेखावृत्तम् इतरेषु च स्रग्धरावृत्तमिति आश्चर्यम्।

२. ''...वभन्त्येयेवेर्वे वत्सास्ति...'' इति पाठः।

३. ''ज्ञानिमिति'' पाठः।

४. ''शत्रुर्विरोधी'' इति पाठः।

**स्वरूपज्ञानं यन्न दहति सुषुप्तावपि तमः**
**कथं वृत्तौ लग्नं गुरुवर ! दहेच्चेदिति तमः ।**
**रवेरुस्रा यद्वन्न दहति न जगत्सूर्यदृषदि**
**प्रसक्तश्चेत् सर्वं दहति हि तथैतच्छृणु सखे ! ॥८०॥**

स्वरूपभूतं ज्ञानं स्वरूपज्ञानम् । स्वरूपं च तत् ज्ञानकञ्च आत्मचैतन्यमिति यावत् । सुषुप्तौ सम्प्रसादावस्थायां यत्तमः आत्मावारकमज्ञानं न विनाशयति । तदेव निर्विशेषं वृत्तौ बुद्धिवृत्तौ संयुक्तं तदेतत् ज्ञानं दहेत् नाशयेत् । सदृष्टान्तः रवेरादित्यस्य उस्रः किरणः जगत्तृणकाष्ठादिकन्न दहत्यपि स एव सूर्यकान्तमणौ प्रसक्तश्चेत् आविर्भूतविशेषगुणः सर्वं तृणकाष्ठादिकं दहेत् ॥८०॥

वृत्तिज्ञानकर्मणोः को भेद इति पृच्छति — श्रीमदिति ।

**श्रीमद्देशिकवर्य ! यत्त्रिभिश्च करणैः[1] क्लृप्तं तु कर्मैव चेत्**
**वृत्तिज्ञानमिदं च चित्तकलितं किं कर्म न स्याद्वद ।**
**अज्ञानन्न निहन्ति कर्मविपुलं किं वास्य नामान्तरं**
**विज्ञानं बृहदित्यतीव महिमा प्राप्तः कुतो वा वद ॥८१॥**

वाङ्मनःकायलक्षणैस्त्रिभिः करणैः क्लृप्तं कृतं यत् लौकिकं वैदिकं च तत् कर्म सञ्चितं चेत् इदं वृत्तिज्ञानं च विचारजन्यं मनोवृत्तिविशेषरूपं मानसं कर्म न स्यात् । किं मनोव्यापाररूपस्य कर्मत्वाङ्गीकारे विरोधः कः ? विपुलं ध्यानधारणादिरूपं कर्म अहिंसादिलक्षणम् अज्ञानन्न निहन्ति ? किं तस्यैव मानसस्य बृहद्विज्ञानमित्युक्त्वा को महिमा प्राप्तः ? कुतः कारणात् भवेत् तद्वदेति प्रश्नार्थः ॥८१॥

१. अस्मिन् श्लोके द्वितीय-तृतीय-चतुर्थचरणेषु शार्दूलविक्रीडितं वृत्तमस्ति । किन्तु प्रथमचरणे वर्णानां एकविंशतिः दृश्यते । अतो यदि प्रथमे चरणे ''यत्त्रिभिश्च करणैः'' इति स्थाने ''यत्त्रिकरणैः'' इति परिवर्तनं क्रियते तर्हि अतिलघुभूतपरिवर्तनेन शार्दूलविक्रीडितवृत्तं स्यात्, अर्थस्तु सैव भवति ।

अथवा ''श्रीमद्देशिकवर्य'' इति पाठो यदि ''श्रीमद्देशिक'' इत्यनेन पाठेन विपरिणम्यते, तदानीमपि प्रथमे चरणे शार्दूलविक्रीडितवृत्तस्य लक्षणं सङ्गच्छते । तथाविधपरिवर्तनकरणेन श्लोकस्य अर्थपरिवर्तनमपि न भवति ।



मानसमपि वृत्तिज्ञानमज्ञानतत्कार्यं निवारयतीत्यत्र दृष्टान्तं प्रदर्शयन् तद्वस्तुतन्त्रं चेति दर्शयति — वृत्तिरिति ।

**वृत्तिज्ञानमिदं च वृत्तिजनितं हन्यात्तदीयं मलं**
**ह्येकस्यास्तनुजास्त्रयोऽपि कलहायन्ते मिथो वैरिणः ।**
**पुंतन्त्रं किल कर्मजालमखिलं कर्तृत्वहेतोरिदं**
**विज्ञानन्न तथैव किन्तु विबुधास्तद्वस्तुतन्त्रं विदुः ॥८२॥**

उपनिषत्प्रमाणवाक्यार्थविचारजन्यं वृत्तिज्ञानं विमर्शात्मकवृत्तिजन्यमपि तदीयं मनोगतं सकलमपि दोषं हन्याद्विनाशयेत् । एकस्याः जनन्याः तनुजाः पुत्राः त्रयः । त्रयो वा अन्योऽन्यं कलहं कुर्वन्ति बद्धवैराश्च दृश्यन्ते । उक्तं च ''**कर्मजालं कर्त्रधीनत्वात् पुंतन्त्रमिदम् अज्ञानविरोधि अवगतिपर्यन्तवृत्तिज्ञानं न तथेति पुंतन्त्रं भवति**[1]'' । यथार्थावगतिरूपत्वाद् वस्तुतन्त्रमेव अग्नाविवाग्निबुद्धिः न योषित्पुरुषादावग्निबुद्धिरिव पुरुषतन्त्रमिति विवेकिनो विदुः ॥८२॥

उभयत्र हेतुं प्रदर्शयति — नोऽकर्तुमिति ।

**नोऽकर्तुं कर्तुमन्यद्विरचयितुमिदं कर्म शक्यं मनुष्यैः**
**ब्रह्मज्ञानं तथैतन्न तु भवतितरां यत्स्वरूपादनन्यत् ।**
**अन्यस्मिन्नन्यभावो जगति हि गदितो ध्यानशब्देन बोधो**
**जातस्सम्यग्विचारान्न हि भवति मृषा वास्तवत्वान्न मोहः ॥८३॥**

कर्तुमकर्तुमन्यथाकर्तुं च कर्म शक्यं मानवैः एतदौपनिषदं ब्रह्मज्ञानन्तु तथा न भवति । यतः स्वरूपादात्मनो नान्यत् अभिन्नमतः वस्तुतन्त्रम् । तच्च कर्मवत् साध्यं च न भवति । जगति अन्यस्मिन् स्थाण्वादौ अन्यभावः पुरुषभावः आदित्यादौ वा ब्रह्मभावः ध्यानशब्देन निर्दिष्टः । मानसोऽपि पुरुषतन्त्र एव । बोधस्तु सम्यक् निस्संशयं विचारात्तत्त्वविचाराज्जातः मृषा मिथ्या बाधितविषयो न भवति । अविद्यानिवृत्त्यैकफलत्वान्निवृत्तायास्तस्याः पुनरुत्पत्त्यसम्भवाच्च । तथा चोक्तम् ''**निवृत्ता सा कथं भूयः प्रसूयेत विचारतः**[2]'' इति । वस्तुतन्त्रत्वान्न

१. ?

२. उ.सा. १-१८ (उपदेशसाहस्र्यां ''...प्रसूयेत प्रमाणतः'' इति पाठो दृश्यते । पृ. ११)

मोहः, भ्रमोऽपि न भवतीति। यद्यपि यत्र कुण्ठीभवेत् बुद्धिः स मोह इति लौकिक इति दर्शितं तथापि तल्लौकिकविषयगोचरः बोधस्तु मोहनिवर्त्तक एव। तथा चोक्तम् ''**श्रुतिस्तत्त्वमसीत्याह श्रोतुमोहापनुत्तये**[१]'' इति ॥८३॥

अत्र विप्रतिपत्तिर्न[२] कार्येति। उक्तमर्थं दृढीकरोति — ज्ञानमिति।

**ज्ञानं दृष्ट्वाऽनुभूतं [३]श्रुतिविषयवताभावनायोगसंज्ञा**
**प्रोक्ता यद्दृष्टिभिस्तद्विगलति न मनाक् स्वेन दृष्टं कदाचित्।**
**दृष्टं सत्यं समस्तं मननपरिगतं वस्तुसर्वं मृषा स्याद्**
**विज्ञानं यन्निहन्याद्विषयगतमिति[४] तद्धि बोधो न कर्म ॥८४॥**

दृष्ट्वा वस्तुस्वरूपं साक्षादवगम्य निश्चितं ज्ञानमनुभवः, श्रुतिकृतविषया भावना श्रुत्यवबोधितं यथाभिमतवस्तु भावनायोग इति संज्ञायते। सम्प्रज्ञात-शब्दवाच्यो योगः आख्यातः। यद्वस्तु प्रमाणवृत्तिभिर्दृष्टमवगतं तच्च स्वेनैव तत् मनागपि न विगलति। कदापीति व्यावहारिकदशायामिति। तत्तत्प्रमाणदृष्टं प्रमेयं तत्तद्भूमौ सत्यं मननपरिगतं मनोराज्यध्यानादिपरिज्ञातं वस्तु कदाचित्स्वप्नादिवत् मृषा स्यात्। तत्र विज्ञानं ब्रह्मात्मैक्यविज्ञानं द्वैतप्रपञ्चगतभ्रान्तिज्ञानं हन्यादेव। तदेव बोधो न कर्मान्तर्भूतो भवेत् ॥८४॥

ध्यानादिजन्यस्य पुरुषतन्त्रत्वेन मायिकत्वेऽपि मुक्तेः तद्वैलक्षण्यं कथयति — ध्यानमिति।

**ध्यानं सायुज्यमुक्तिप्रदमपि च मृषा चेद्भवेत् साऽपि मुक्तिः**
**मिथ्या भूयादिति त्वं मनसि कलयनोशङ्कितं(?) चारुबुद्धे!।**
**स्वाकारस्मृत्यनेहस्यपि मनसि कृतध्यानतो यन्मृषा तत्**
**स्मृत्योपेते च काले तदपि च लभते पश्यतां सत्यभावम् ॥८५॥**

१. नै.सि. ४-२४
२. ''विप्रतिर्न'' इति पाठः।
३. ''श्रुतिविषयत्वता'' इति पाठः।
४. अस्मिन् श्लोके स्रग्धरावृत्तमस्ति। अतः ''विषयगतमिति'' इत्यत्र अन्ते छन्दश्शास्त्ररक्षणे दीर्घः अपेक्ष्यते, व्याख्यानरक्षणे तु ह्रस्व एव। तस्मादिह च्छन्दोभङ्गः सम्भाव्यते।



ध्यानं स्वस्वरूपानुसन्धानलक्षणं सायुज्यमुक्तिप्रदमपि; सम्यग्युज्यते एकीभवतीति सायुज्यं तादात्म्यम्। तदात्मनावस्थानलक्षणमुक्तिसाधनमपि च मृषा चेद्भवेत् साधनाधीनस्य मिथ्यात्वनियमेन साऽपि मुक्तिः स्वरूपावस्थितिश्च स्वर्गादिवन्मिथ्या बाधितविषया भूयादिति हृदि सन्देहं मा कुरुष्व। यतः स्वाकारास्मरणकाले मनसि ध्यानतः यत् कृतं तन्मृषैव। पुनः स्मरणकाले सम्यक् पश्यतां यथार्थभावं लभत इति ॥८५॥

संवादिभ्रमन्यायेन ध्यानयोगोऽपि कदाचिन्मुक्तये भवति। किमु ज्ञानमिति दर्शयति — जडेति।

**जडाकारध्यानं कथमिति दिशेद्देहसहितां**
**विमुक्तिञ्चैतत्ते मननमिह तत्तत्तनूकरम्।[१]**
**शरीराभिध्यानाद्भवति सशरीरो खलु जनः**
**स्वरूपाभिध्यानाद्भवति परतत्त्वं भवलयात् ॥८६॥**

जडविषयस्य ध्यानं चिन्तनं देहसहितां विमुक्तिं सारूप्यादिफलं कथं दद्यादिति चेत् तत्तन्मननं निरन्तरस्मरणमेव तत्तत्तनूकरं भ्रमरस्य निरन्तरध्यानेन कीटस्यापि तद्भ्रमरभावदर्शनात्। ''**कीटको भ्रमरं ध्यायन् भ्रमरत्वाय कल्पते**[२]'' इति वचनात्। सगुणदेवतादिध्यानात् सशरीरो देवतासमानशरीरः

१. अस्मिन् श्लोके शिखरिणिवृत्तमस्ति। तत्र द्वितीयचरणे छन्दोभङ्गः सम्भाव्यते। यतो हि ''तनूकरम्'' इत्यत्र नकारोत्तरवर्ति-''ऊ''कारः ह्रस्वः स्यात्, किन्तु तन्न दृश्यते। अतनुं तनुं करोतीति तनूकरम् इति। व्याख्याने अयमेवार्थः अपेक्षते। भ्रमरः कीटं भ्रमत्वाय कल्पते इत्यर्थे अभूततद्भावे ''कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः'' (पा.सू. ५.४.५०) इत्यनेन च्विप्रत्यये कृते सति ''च्वौ च'' (पा.सू. ७.४.२६) इत्यनेन च्विप्रत्यये परतोऽजन्तरस्य अङ्गस्य दीर्घविधानेन तनूकरोतीति रूपम्। तथैव तनूकरणमित्यादीनि रूपाणि।
अथवा ''तनूकरणे तक्षः'' (पा.सू. ३.१.७६) इत्यत्र च्व्यन्तादेव प्रतीयते, अतनुं तनुं करोतीति तनूकरोत्यर्थात् तनूकरमिति तनुं करोतीति तनुकरः, कर्मण्युपपदे टः, तनूं करोतीति वा तथैव तनूकरः ''स्त्रियां मूर्तिस्तनुस्तनूः'' (अ.को. २.६.७१) इत्यमरवाक्येन अङ्गपर्यायवाचित्वे केवलादपि कर्मपदात् तनूकरणमिति भवति। तक्षणे तु अतनुः तनुः क्रियते अथवा अतनुं तनुं करोति इत्यत्र तनुशब्दस्य कृशपर्यायत्वाद् तनूकरणं तु अभूततद्भावे एव भवति। तत्कर्तरि तनूकरः इति भवति।
२. वि.चू. ३५९

जनः खलु स्याच्चेत् ''**देवो भूत्वा देवानप्येति, य एवं वेद**[१]'' इत्यादिवचनात्। स्वरूपाभिध्यानात् स्वात्मस्वरूपानुसन्धानात् भवलयात् देहादिसंसारनाशात् परतत्त्वं ब्रह्मतत्त्वं भवति। यद्वा जनः शरीराभिध्यानात् देहादौ आत्माभिमानात् सशरीरः सदेहः भवेद्यदि अशरीरब्रह्मस्वरूपानुद्धानाद् ब्रह्मैव भवति इति ॥८६॥

''**ततस्तु तं पश्यते निष्कलं ध्यायमानः**[२]'' इत्यादिश्रुतौ ध्यानफलं ब्रह्मज्ञानन्निर्दिष्टम्। किमन्तर्गमनाविचारेणेत्याशङ्क्य मन्दाधिकारविषया सा श्रुतिः। ''**आत्मा वा अरे द्रष्टव्यः**[३]'' इत्यादिश्रुतयस्तु चिरकालविचार एव विद्याद्वितय-हेतुरिति सफलां तां विद्यां दर्शयति — ब्रह्मेति।

**ब्रह्मध्यानेन मुक्तिर्यदि भवति गुरो ! किं विचारात्प्रबोधाद्**
**इत्थं मा पृच्छ वत्स ! प्रभवति हि परोक्षप्रमातत्त्वचिन्ता।**
**सैव ब्रह्मापरोक्ष्यामृतरससुखदा कालतस्स्याद्विचाराद्**
**बोधानन्दैकरूपा गतसकलमला मुक्तिरित्येव विद्धि ॥८७॥**

ब्रह्मभावनया कैवल्यं भवति सिध्यति। यदि विचारात् किं फलम्? प्रबोधात् विचारजन्यज्ञानाच्च किं फलमिति त्वं मा पृच्छ। यतः तत्त्वचिन्ताभावना अपरोक्षप्रमैव, न वस्तुस्वरूपमुल्लिखति। सैव चिरपरिचिताऽपरोक्षब्रह्मज्ञानानुभूतिः सुखप्रदात्रीव कालपरिपाकानुसारेण वासनादिनिवृत्या मुक्तिरपि। सा च मुक्तिः गतसकलमला निवृत्ताऽविद्याद्वितयकामकर्ममलरूपा बोधानन्दैकरूपा च केवलचित्सदानन्दाद्वितीयब्रह्मावस्थितिलक्षणा च भवतीति विद्धि विजानीहि। सा न कर्मफलस्वर्गादिवत् शास्त्रगोचरा किन्त्वनुभवसिद्धा ''**यत्साक्षादपरोक्षाद् ब्रह्म**[४]'', ''**स आत्मा सर्वानुभूतिः**[५]'' इति श्रुतेरित्यर्थः ॥८७॥

ब्रह्मानुभूतिः सकलद्वैतविभ्रमं निवर्तयतीत्युक्तम्। तस्या अवस्थाने

१. बृह.उ. ४-१-२ (''देवो भूत्वा देवानप्येति, य एवं विद्वान्...'' इति पाठो दृश्यते। पृ. २९१)
२. मुण्ड.उ. ३-१-८
३. बृह.उ. २-५-४
४. बृह.उ. ३-४-१
५. ?



द्वितीयत्वाभ्युपगमकोपस्स्यादित्याशङ्क्याज्ञाननिवृत्तिमात्रेण तस्या अपि चारितार्थात् सा विलीयत एव। अतो नाद्वितीयाभ्युपगमविरोध इति सदृष्टान्तमाह — मोक्ष इति।

**मोक्षागारे सुपर्णे परनभसि शिवे वृत्तिबोधस्थितश्चेत्**
**का वाऽखण्डानुभूतिस्त्विति वदसि गिरां मामिकानां शृणुष्व।**
**तोयान्यासाद्य यद्वत्कतकफलरजस्तन्मलन्नाशयित्वा**
**पश्चान्नष्टं स्वयं सा चितिरपि च तमो नाशयित्वैव नश्येत् ॥८८॥**

सुपर्णे अनवच्छिन्ने मोक्षग्रहे ब्रह्मणि चिदाकाशे शिवे स्वप्रकाशे वृत्तिबोधः स्थितश्चेत् — तदज्ञाननिवर्त्तकं वृत्तिज्ञानम् अवशिष्टं विद्यते चेत् का वाऽद्वितीयात्मानुभूतिरिति चेत् पृच्छसि तच्छङ्कानिवर्त्तकमदीयवाक्यानि शृणुष्व। यथा कतकरेणुः पङ्कादिमिश्रितजलपरिशुद्धये निक्षिप्तः तत्पङ्कादिकापुष्पं निवार्य तज्जलं परिशुद्धं कृत्वा स्वयमपि क्षीयते। तथा सा चितिः ब्रह्मात्माज्ञानबाधकं वृत्तिज्ञानं तमोऽविद्यावरणं नाशयित्वा तन्नाशमात्रेण स्वस्य चारितार्थात् ब्रह्मणः स्वप्रकाशत्वेन फलचैतन्यापेक्षायोगात् तत्क्षण एव नश्येत्, न पृथगवतिष्ठते। अतो नोक्तदोषावकाशः। तथा चोक्तम् ''**अज्ञानकलुषं जीवं ज्ञानाभ्यासात् सुनिर्मलम्। कृत्वा ज्ञानं स्वयन्नश्येत् जलं कतकरेणुवत्**[१]'' इति ॥८८॥

एवं सर्ववृत्तिविलयात् ब्रह्मभावमापन्नानां निष्ठां कथयति — एवमिति।

**एवन्निश्चयशालिनां सुमनसां कीदृग्विधा चेत्स्थिति-**
**स्तुल्यास्ते गतचिन्तनैश्च शिशुभिः श्रीसार्वभौमैरपि।**
**बन्धो मोक्ष इति द्वयं स्मृतमभून्नैषान्तदस्तीरणे**
**हासस्स्यान्मशकी च छर्दगमनं भुक्त्वेति न स्यात् स्मितम् ॥८९॥**

इत्थं दृढनिश्चयवतां सर्वविकल्परहितानां ब्रह्मविदां सुमनसामुपशान्तचित्तानाम् अवस्थितिर्निष्ठा कीदृग्विधा? मूढेभ्यो विलक्षणा सामान्या विशेषवती वेति चेत् गतचिन्तनैश्शिशुभिस्समा एव। ते अभिमानाद्यभावात् गुणदोषबुध्यभावाच्च। तथा चोक्तम् ''**दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते। गुणबुद्ध्या च**

१. आ.बो. ५ (''...ज्ञानाभ्यासद्विनिर्मलम्। इत्यपि पाठो दृश्यते।)

**विहितं तु करोति यथार्भकः ॥**[१]'', ''**सचक्षुरचक्षुरिव**[२]'' इत्यादिश्रुतेश्च। यद्वा शिशुभिस्तुल्या निद्रालसश्शिशुसमा अन्तः किमपि न कलयन्ति। तथोक्तम् —

''**उद्बोधितोऽपि कबले कबले जनन्या**
**निद्रालसश्शिशुरिवा विदितान्यभावः।**
**आलोकयन्नपि बर्हिर्जगदिन्द्रजालमन्तः**
**कयापि कलया न परिच्युतोऽस्मि ॥**[३]'' इति।

किञ्च श्रीभौमैरपि तुल्याः। यथा श्रीमन्तस्सार्वभौमाः स्वच्छन्दं व्यवहरन्ति तथा बन्धः अविद्यया, मोक्षो विद्ययेत्यपि द्वयं कदापि स्मृतन्नाभूत्। पूर्वं बन्ध आसम् इदानीं मुक्तस्तिष्ठामीति स्मरणमपि तेषान्नोदेति। कैश्चित् तद्वयमस्तीति वाक्येऽपि वन्ध्यासुतात् मे मरणादिकथातत्त्ववेदिनामिव हासः स्यात्। तथा चोक्तम् —

''**कूटस्थनित्यसुखबोधतनोः प्रातीचो**
**बन्धो विमोचनमिति भ्रमदुर्विलासः।**
**वन्ध्यासुतस्य वपुरादिगुणप्रपञ्च-**
**स्तत्पञ्चताऽपि सुतरां परिकल्पनैव ॥**[४]'' इति।

किञ्च मशकीगमनं विशालम्। अपां क्व चर्चयते तरणेऽपि स्मितं हासो न स्यात्। तथा चोक्तम् —

''**अपि शीतरुचावर्के सुतीक्ष्णे बिन्दुमण्डले।**
**अप्यधः प्रसरत्यग्नौ जीवन्मुक्तो न विस्मयी ॥**[५]'' इति।

अन्यत्राप्युक्तम् —

---

१. भा.पु. ११-७-११ (श्रीमद्भागवतपुराणे श्लोकोऽयं ''गुणबुद्ध्या च विहितं न करोति यथार्थकः'' इति पाठः उपलभ्यते। पृ. ६४१)
२. ब्र.सू.शां.भा. १-१-४ पृ. १५२
३. अ.र.म. ३०
४. अ.र.म. ५
५. अ.उ. ४-९ (उपनिषत्सङ्ग्रहे अपि ''शीतरुचावर्के सुतीक्ष्णेऽपीन्दुमण्डले।'' इति पाठो दृश्यते।)



''**मायामेघो जगन्नीरं वर्षत्येव यथा तथा।**
**चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ॥**[१]'' इति ॥८९॥

सर्वोऽपि जीवेश्वरजगद्व्यवहारः मायिकत्वान्मृषैवेत्यवगन्तुं बालका-ऽऽख्यायिकान्यायमनुसृत्य काञ्चित्कथान्निरूपयति — वन्ध्येति।

**वन्ध्याजस्थाणुमर्त्यौगगनतरुसुमस्त्रक्पिनद्धोत्तमाङ्गौ**
**गन्धर्वाणां पुरे तौ बहु कलहयुतौ शुक्तिकारौप्यहेतोः।**
**प्राणत्यागं प्रपन्नौ शशपुरुषशिरोरूढशृङ्गप्रहारै-**
**रित्थं भूते च कार्ये जगति न दधते निर्णयं बुद्धिमन्तः ॥९०॥**

वन्ध्यासुतश्च स्थाणुपुरुषश्चेति द्वौ सखायौ आस्ताम्। तौ च कदाचिद् अम्बरकुसुममालासमलङ्कृतशिरःकायौ विजयार्थं प्रस्थितौ। गन्धर्वाणां पुरे गन्धर्वनगरे क्षणं विश्रान्तौ। गन्धर्वपुरमिति आकाशमण्डले नगरवत् परिदृश्यमानाः तरणिकिरणा उच्यन्ते। तत्र मरुमरीचिकातीरस्थशुक्तिकारजतहेतोः मया दृष्टमिदं रजतं गृहीतव्यम्, न त्वयेति व्यवहरन्तौ बहुकलहायन्तौ तत्र लब्धशशशृङ्गपुरुष-शृङ्गप्रयुक्तप्रहारविशेषैः प्राणत्यागं प्राणनाशं प्राप्तौ बभूवतुरिति। कथातत्त्वविदिव इत्थंविधकार्ये जगत्यस्मिन् प्रपञ्चे मायिके बुद्धिमन्तो विवेकिनो निर्णयं सत्यमेतदिति निश्चयं न दधते, न स्वीकुर्वन्ति। किन्तु स्वप्नदृष्टतद्व्यवहारवत् मिथ्येति निश्चिन्वन्तीत्यभिप्रायः। तथा चोक्तम् —

''**जगज्जीवेश्वरत्वादिविचित्रविभवं विना।**
**केवलं चित्सदानन्दब्रह्मैक्यपरा श्रुतिः ॥**[२]'' इति ॥९०॥

ब्रह्मान्यस्य मिथ्यात्वनियमेन तन्निष्ठैव परं श्रेयस्तदेवाश्रयस्वेति दर्शयति — मायेति।

**माया मिथ्या तत्प्रसूतानि मिथ्या**
**माता न स्याच्चेत् कुतः पुत्रजन्मा।**
**निश्चित्यैवं सर्वमेतन्मृषेति**
**ब्रह्म स्यास्त्वं सच्चिदानन्दरूपम् ॥९१॥**

---

१. पं.द. ८-७५
१. ?

मायाकारणोपाधिर्मिथ्या मृषैव। मिथ्याशब्दः व्यर्थः अपह्नववचनः। अनिर्वचनीयतावचनश्च। अत्रापह्नवार्थः स्वीकर्तव्यः। तत्प्रसूतानि तद्विकारजातानि च मृषैव। माता यदि न भवेत् कुतो वा पुत्रसम्भवः। इत्थं सर्वस्य मायिकत्वेन मिथ्यात्वन्निश्चित्य सत्यज्ञानानन्दस्वरूपं ब्रह्म स्याः भवेः। ब्रह्मैकमेव सत्यमहमस्मि नान्यत् किञ्चिद्विद्यत इति ॥९१॥

सर्वस्य मायिकत्वेन मिथ्यात्ववर्णनेन भवेद्वा दोषः शून्यवादिसिद्धान्तश्च कथन्नागमिष्यतीति पृच्छति — ब्रह्मेति।

**ब्रह्माद्यास्सर्वदेवा जगति च सुधियषड्भिरङ्गैस्समेता**
**वेदा मन्त्रास्तपांसि त्रिदशपुरनदीपूर्विकाः पुण्यनद्यः।**
**एतत्सर्वं मृषा स्यादिति गदितवतां पण्डितानान्न दोषः**
**कस्मात्स्याद्देशिकेन्द्र ! प्रकथय कृपया संशयानस्य मे त्वम् ॥९२॥**

ब्रह्माद्यास्त्रिमूर्त्तयो देवास्सेन्द्राः जगति प्रपञ्चे ये सुधियो मेधाविनः बृहस्पतिप्रभृतयः शीक्षाद्यैरङ्गैरुपेताः ऋगादयो वेदाः मन्त्राः पञ्चाक्षराद्याः। यद्वा मन्त्राः ''**इषे त्वा**[1]''दयः नियतपदावसाना, वाक्यानि किल मन्त्रा इति। तपांसि नियमाः, गङ्गाद्याः पुण्यसरितः। तदेतत्सर्वं मायाविकारत्वात् स्वप्नवन्मिथ्येति प्रवदतां पण्डितानां विदुषां दोषः कस्मान्न भवति ? यतः गुरौ मनुष्यबुद्धिश्च, मन्त्रे चाक्षरभावनाम्, प्रतिमासु [2]शवबुद्धिं कुर्वाणो नरकं व्रजेदिति परोक्षदेवता प्रत्यक्षमनुष्याक्षरभावनावतामपि दोषविधाने तन्मूलभूतेषु तेषु मायिकत्वनिश्चये दोषाभावः कथमौपनिषदसिद्धान्ततामुपयातीति प्रश्नार्थः ॥९२॥

''**रक्षको विष्णुरित्यादि सर्वं मिथ्येति निश्चिन्विति**[3]'' श्रुतिप्रबोधितत्वात् न दोषायेति निर्णीतमपि विषयभेदेनापि तदभावं सदृष्टान्तं दर्शयति — वस्त्विति।

---

१. य.वे. १-१

२. ''शिवबुद्धिं'' इति पाठः।

३. तै.उ. ५-११ (उपनिषत्सङ्ग्रहे मन्त्रोऽयं ''रक्षको विष्णुरित्यादि ब्रह्मा सृष्टेस्तु कारणम्। संहारे रुद्र इत्येवं सर्वं मिथ्येति निश्चिनु ॥'' इतिरूपेण दृश्यते।)



**वस्तुस्वप्नगतं समस्तमपि तन्मिथ्येति दुष्टं वचो**
**यद्यल्पप्रकृतौ प्रतीतमपि तन्मिथ्येति वाग्दोषभाक्।**
**स्वप्नोद्भूतपदार्थजातमखिलं मिथ्येति वक्तुं क्षमं**
**यद्यल्पप्रकृतौ प्रतीतमपि तन्मिथ्येति वक्तुं क्षमम् ॥९३॥**

स्वप्नगतं स्वप्नावस्थानुभूतं समस्तं गिरिनदीसमुदायादिकं कामिनीविलासादि च मिथ्येति वचः दुष्टं चेद्यदि अल्पप्रकृतौ पूर्वपूर्वाध्यासप्रवाहागतवासनावशात् प्रतीतं देहेन्द्रियादिसमस्तमपि मनोराज्यादि दृष्टमिव मिथ्येति वाग्दोषयुक्ता भवेत्। स्वप्नदृष्टस्य दृष्टनष्टस्वभावत्वेन मिथ्यात्वं वक्तुं युक्तं चेत् दीर्घस्वप्नमनोरथादिवत् अनुभूयमानसर्वद्वैतविषयस्य मिथ्यात्वं वक्तुं शक्यते। तत्र न कोऽपि बाध इति तात्पर्यार्थः ॥९३॥

ननु लौकिकव्यवहारस्य मिथ्यात्ववर्णने दोषासम्भवेऽपि ''**अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति**[1]'' इत्यादिश्रुतिदर्शितसाध्यसाधनरूपस्य वैधव्यवहारस्य मायिकत्वं वक्तुं कथं शक्यते इत्याशङ्क्य तदपि प्रौढवादेन परिहरन् सत्यानृते विभज्य दर्शयति — मिथ्येति।

**मिथ्या सत्यमिति प्रमूढमनसः पुण्या भवन्तीति चेत्**
**सञ्जल्पन्ति पुराणकानि यदृतन्तत्सत्यमेवेति च।**
**जानानस्य विनिन्दकं किमु भवेच्छास्त्रं च किञ्चेन्मृषा**
**रूपन्नाम च भूतभौतिकगणः किं वा ऋतं ब्रह्म तत् ॥९४॥**

ऐहिकमामुष्मिकं च जगत् मायिकमत एव मिथ्या। तथा सति तत् सत्यमबाध्यमिति विपरीतं जानन्तः। अत एव प्रमूढमनसः अतिमूढबुद्धयः पुण्याः पुण्यपुरुषाः भवन्तीति पुराणकानि श्रुतिस्मृतिपुराणवाक्यानि सञ्जल्पन्ति प्रतिपादयन्तीति चेत् तथा प्रतिपादयन्तु, तदन्यविषयत्वादिति। तत्र न विवादं कुर्मः। यदृतं कालत्रयापरिच्छेद्यं वस्तु तदेव सत्यमबाध्यमित्येवमुपनिषत्प्रमाणेन जानानस्य निन्दकं शास्त्रं किमुपैत् न भवेदेव सत्यस्य कृताप्यारोपायोगात्। अन्योन्याध्यासेऽपि सत्ये असत्यस्य स्वरूपतः अन्यत्र सत्यस्य सामान्यरूपेणैव

---

१. आप.श्रौ.सू. १-२८-१

अध्यासः, न स्वरूपेणेति पूर्वत्र प्रतिपादितत्वात् रूपं नाम च मायिकं मायिकत्वादेव मिथ्या। ब्रह्म च तदृतं सत्यम्, तदेवाविनाश्यात्मस्वरूपम्। तथा चोक्तम् ''**अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा**[१]'' इत्यादिश्रुतिभिः ॥९४॥

दर्शयित्वा हि विपरीतग्रहणं पश्चान्निवर्त्तयितुं शक्यत इति न्यायेन तन्मायास्वभावविशेषान् पृच्छति — मायेति।

**माया नाम कथंविधा परिगताः के वा तया सा कथं**
**सम्प्राप्ता च किमर्थमागतवती भिन्ना यदि ब्रह्मणः।**
**द्वैतं प्राप्तमभेदवत्यपि पराच्चेत्स्यान्मृषा तत्परो**
**मायामेघविधूतिचण्डपवनश्रीदेशिक! ब्रूहि मे ॥९५॥**

प्रसिद्धा शक्तिः किम्प्रकारा? स्वतन्त्रा न वा? तया परिगताः परिवेष्टिताः तद्वन्तः के वा कथं सम्प्राप्ताः स्वभावतो हेतुतो वा गता आगमनप्रयोजनं च किम्? ब्रह्मणश्चेत् भिन्ना तर्हि द्वैतं प्राप्तम्, ब्रह्मणः[२] अद्वितीयत्वं व्याहतम्। पराच्चेदभेदवती अभिन्ना तर्हि मायेव परः परमात्मापि मृषा मिथ्याभूतस्स्यात्। मेघस्य वायुरिव मायामोहनिवर्त्तकदेशिकेन्द्र! एतत्संशयोत्तरं मे ब्रूहि ॥९५॥

उत्तरमुपदिशति — सेति।

**सेत्थंभूतस्वरूपेत्यभिगदितुमशक्या कृतित्वादवाच्या**
**तेमी मायाभिभूता जगदृतमिति ये वादिनो देहनिष्ठाः।**
**द्रष्टारो नैव विद्युः कथमियमभवद्युक्तिशून्येति माया**
**मिथ्या जाड्या सुखात्मा परमपदविचारोज्झितानां विभाति ॥९६॥**

सा दुर्घटघटनापटीयसी युक्तिशून्यप्रकाशात्मिका अविद्यादिशब्दवाच्या इत्थंभूतस्वरूपेति एवमात्मिकेति वक्तुमप्यशक्यस्वरूपत्वादवाच्येत्युच्यते। अनिर्वचनीया इति विद्वद्भिः कथ्यते। अनृतमेवेदं जगदृतम् इति वदनशीलाः तार्किकादयो द्वैतिनः ते एवामी मायाभिभूताः मायामयेन तमसावृताः। अत एव देहनिष्ठाः, उदरम्भराः। इयं च माया इत्थमुद्भूतेति द्रष्टारो नैव विद्युः, सर्वज्ञा अपि नैव विजानीयुः। यतः

१. बृह.उ. ४-५-१४
२. ''ब्रह्मणम्'' इति पाठः।



इयं युक्तिशून्या कयाचिद्युक्त्यापि निरूपयितुमशक्या। सा चानृतजडदुःखात्मिका ब्रह्मात्मतत्त्वविचारहीनानां विभाति, न ब्रह्मविदामित्यर्थः इति ॥९६॥

युक्तिशून्यप्रकाशस्य संज्ञा मायेत्युक्तमर्थं दृष्टान्तेन स्पष्टयति — प्रागिति।

**प्राक् शैलूषस्य विद्या न विदितविहृतेर्नैव दृश्याप्यरूपा**
**पश्चान्नानास्वरूपा प्रसरति शतशो नामरूपादिदात्री।**
**ब्राह्मी शक्तिस्त्वनन्ता कथमपि विदिता नैव केनाप्यमेया**
**भूतानां भौतिकानामुदयगतिवशात्सानुमातुं च शक्त्या ॥९७॥**

विहृतेः अविज्ञातचेष्टितस्य शैलूषस्य शाम्बरीकस्य विद्याशक्तिः प्राक् कार्योत्पत्तेः पूर्वं न दृश्या अरूपा च, पश्चात् पिञ्छिकाचलनाद्यनन्तरं नानाविध-कार्यरूपा विजृम्भते। तात्कालिकवाच्यवाचकप्रदात्री च यथा तथैव ब्राह्मी पारमेश्वरी शक्तिस्त्वनन्ता। अपरिमितत्वादेव केनापि प्रमात्रा प्रमाणेनाविदिताऽमेया च। भूतभौतिकलक्षणविकाराणामुत्पत्तिवशादनुमातुं विद्यत एव। सा शक्तिरन्यथा कार्योत्पत्यसम्भवादिति शक्त्या न स्वरूपतो द्रष्टुमित्यभिप्रायः। ''**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च**[१]'' इति श्रुतेः ॥९७॥

दृष्टान्तसिद्धमर्थं दार्ष्टान्तिकेऽपि दर्शयति — जगदिति।

**जगत्कर्त्ता कार्यं विदितमपि शक्तिर्न विदिता**
**चक्रु[२]र्विद्यात्स्रष्टा जगति किल दृश्याऽथ पुरुषः।**
**यथा विद्या वेद्या न तु भवति केनापि सुधिया**
**तथा सर्गब्रह्मान्तरकृदपि शक्तिर्न विदिता ॥९८॥**

जगत्कर्त्ता जगदधिष्ठाता पुरुषः परमेश्वरः महामायावीव स्थितः सर्वज्ञः सर्वशक्तिस्स्वतन्त्रः परमात्मा, कार्यं तदीक्षणा विजृम्भितमाकाशादिकं जगत् उभयमपि विदितं विज्ञातमपि शक्तिः न विदिता न प्रत्यक्षीकृता कैश्चिदपि।

१. श्वे.उ. ६-८
२. छन्दोभङ्गः सम्भाव्यतेऽत्र। अस्मिन् श्लोके शिखरिणी वृत्तमस्ति। यत्र ''रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी'' इति लक्षणानुसारेण आदौ यगणो भवति, यत्र आदिवर्णः लघुः स्यात्। नैतदत्र दृश्यते।

ननु ''**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्**[1]'' इति श्रुत्या शक्तेरपि दृश्यत्वम् ऋषिध्याने योगादवगम्यते इत्याह — यथा ऐन्द्रजालिकविद्याशक्तिः केनापि वेद्या दृश्या न भवति। तत् कार्यं हस्त्यादि दृष्टं तथा सर्गब्रह्मणोऽन्तरं भेदं करोतीति सा शक्तिः न विदिता ॥९८॥

किञ्च शक्तिशक्तिमतोरभेददर्शनफलमुपदिशति — भिन्नेति।

**भिन्ना शक्तिमतो न शक्तिरपि तच्छक्तेन मायाविना**
**सृष्टं कार्यशतं मृषैव विदितं शक्तो न मिथ्यामयः।**
**धीमन्! [2]तत्तदिहापि पूर्णमभयं ब्रह्मैव शक्तं स्वयं**
**दृष्ट्वैतां पदवीं मयाद्य कथिता नित्यं प्रसन्नो भव ॥९९॥**

शक्तिमतः परमात्मनः शक्तिः कारणत्वादिव्यवहारहेतुरपि भिन्ना न भवति। चन्द्रचन्द्रिकयोरिव अग्न्युष्णियोरिवाभेदेन गृहीतुमशक्यत्वादसम्भवाच्च। शक्तेन शक्तियुक्तेन मायावता कारणोपाधिसम्प्रवृत्तेन सृष्टमुत्पादितं कार्यशतं मिथ्यैव, शक्तश्च भूमिष्ठमायावी न मिथ्यामयः। सूत्रारूढपुरुषादिवत् मायामयो न भवति। तद्वदेव इहापि दार्ष्टान्तिके पूर्णमनवच्छिन्नम् अभयं शक्तं च। ''**सर्वशक्तिपरं ब्रह्म नित्यमापूर्णमद्वयम्**[3]'' इति श्रुतिवचनात् स्वयमात्मस्वरूपं सत्यमेतां पदवीं शिष्टपरं परावगताम् इदानीं मया तुभ्यं कथिता न दृष्ट्वा विज्ञाय नित्यं सर्वदा त्वं प्रसन्नश्शान्तहृदयः भव चिरं तिष्ठ ॥९९॥

ईश्वरस्य ईश्वरत्वादिक[म]पि शक्त्यधीनमेव। अतस्सर्वविकारसृष्टौ सैवोपादानं सैव व्यवस्थानिदानञ्चेति दर्शयति — मिथ्येति।

**मिथ्याकारैव शक्तिः कथमियमुदयं प्राप्नुयाच्चेच्छृणुष्व**
**गुल्माद्याचेतनानां कुसुमफलजनिं पश्य कालेषु जाताम्।**
**चिच्छक्तिस्तेषु तेषु प्रसरति न हि चेदव्यवस्थं समस्तं**
**भूयाद्भिन्नस्वभावञ्जगदिदम् अनघस्स्यादमर्यादमेव ॥१००॥**

---

१. श्वे.उ. १-३
२. ''तदिहापि'' इति पाठः।
३. म.र. १७-४७



मायामय्येषा शक्तिः कथमाविर्भवतीति चेत्तदाविर्भावं वक्ष्यमाणं शृणु। गुल्माद्यानामचेतनानां तत्तकालेषु व्यवस्थितेषु सम्भूतां कुसुमफलजनिं पश्य अवलोकय। न स्वभावतः तरुगुल्मादिविचित्रकार्यसम्भूत्यभ्युपगमे को विरोध इत्याशङ्क्याह — तेषु तेषु विकारेषु विचित्रवर्णकुसुममयूरशुकाद्यवयवेषु विचित्रेषु अतिकोमलेषु चिच्छक्तिः प्रसरति नानुगच्छति यदि समस्तमप्यव्यवस्थं हतनायकराज्यमिव भिन्नस्वभावं च स्यात्। निश्शक्तिकस्य ईश्वरस्य ईशितृत्वाद्य-सम्भवात् वर्णाश्रमादिमर्यादाहीनं च भवेत्। अतः सर्वनियामिका माहेश्वरी शक्तिः सर्वकारणमस्ति इत्यभिप्रायः ॥१००॥

एवं मायाशक्तिनिरूपणस्य तज्ज्ञानस्य च तज्जिहासैव फलमिति तद्धानोपायं व्यतिरेकमुखेनापि तदेव दृढयति — अण्डाम्भेति।

**अण्डाम्भश्शुक्लमेकं भवति बहुविधाः पक्षिणश्चित्रवर्णा**
**नो चेत्तत्रात्मशक्तिर्हतनृपनगरी साम्यमायाति सर्वम्।**
**पश्यायात्तोयभावं शुचिरपि कटुकश्शर्करात्वं समीयान्**
**नीचा वेदान् पठेयुर्गिरिरपि जलदो वारिधिर्मृत्तिका स्यात् ॥१०१॥**

अण्डे विद्यमानं गर्भोदकं शुक्लं शोणितमिश्रमपि योनिपुष्पे विशत्तत्र एकात्मकमेव भवति। तज्जाः पक्षिणो बहुविधाः विचित्रावयवाः। तत्र शुक्लबीजे चिच्छक्तिर्न चेद्वर्तेत हतनृपनगरीसाम्यं हतराजमण्डलसमं सर्वमप्यायाति, अव्यवस्थां प्राप्नोतीति। पशवः शुचिं वह्निस्तोयभावं कटुको निम्बादिः शर्करात्वं पञ्चसारतां समीयात्। नीचा म्लेच्छा वेदान् पठेयुः। गिरिः मेघः समुद्रश्च मृत्तिका स्यात् इत्यभिप्रायः ॥१०१॥

एवं मायाशक्तिनिरूपणस्य तज्ज्ञानस्य च तज्जिहासैव फलमिति तद्धानोपायं पृच्छति — अदृश्येति।[2]

---

१. ''पश्व'' इति पाठः।
२. पूर्वश्लोकेऽपि किञ्चिद्वैत्यासेन इयमेवावतरणिका तत्र वर्तते। कदाचित् प्रतिलिपिकारस्य प्रमादोऽयमिति चिन्त्यम्।

**अदृश्याऽवाच्याख्या कृतिकलमयाना भगवतो**
**यदि प्रोक्ता शक्तिः कथमिव च निश्शेषविलयम् ।**
**व्रजेत्सा भिन्ना चेत् कथमिव परात्मैक्यमयते**
**विमुक्तिः मा लभ्या कथय सकलं मे गुणनिधे ! ॥१०२॥**

अदृश्या केनापि द्रष्टुमशक्या, अनिर्वाच्या सदसत्त्वादिनिर्वचनायोग्या च आख्या कृतिकलमयाना बहुनामरूपस्य बीजमाया[1] तुच्छाऽनिर्वचनीया वास्तवी चेत्यादिपूर्वाचार्यैः प्रपञ्चितापि सा भगवतः परमेश्वरस्य शक्तिः न जीवस्य वशे तिष्ठति । यदि कथं निश्शेषनाशम् आत्यन्तिकविलयं व्रजेत् तद्विलये शक्तिमतः परमेश्वरस्य कथमवस्थानमुपपद्यते ? यदि विवेककरणे परमेश्वराद्भिन्ना पृथक्कृता अवतिष्ठेत तदा मुमुक्षुस्साधकः सर्वात्मब्रह्मैकत्वं कथं प्राप्नुयात् ? तदैक्यज्ञानाभावे विमुक्तिर्मा लभ्या । तदेतत्सर्वं यथाहमवगच्छेयं तथा कथय उपदिशेति प्रश्नार्थः ॥१०२॥

शक्तिशक्तिमतोरभेदेऽपि वियोगात् शक्तिर्निवर्तनीयेत्युपदिशति सदृष्टान्तं — वह्नाविति ।

**वह्नौ वायौ कृपीडे जगति च मणिमन्त्रौषधैस्स्तम्भिते त-**
**च्छक्तिः कुत्र [2]प्रयातेत्यपि न तु विदिता यद्वदत्रापि विद्वन् ।**
**सत्यानन्दामृताब्धौ यदि वसति भवान् विस्मरन्नामरूपे**
**शाम्येन्माया स्वयं तत्क्षणमिह परया नास्त्युपायः कथञ्चित् ॥१०३॥**

अग्निवायुजलेषु मणिमन्त्रौषधैस्स्तम्भितेषु निरुद्धशक्तिकेषु तेषां शक्तिः उष्णस्पन्दद्रवशैत्यशक्तिः कुत्र प्रयाता गतेति ? जगति केनापि पण्डितम्मन्येन न विदिता न दृष्टा । तद्वदेवात्रापि सत्यानन्दामृताब्धौ यदि भवान् तिष्ठतु, विहाय सर्वमपि व्यासङ्गं पूर्णाचलसमुद्रवत् पूर्णबोधात्मस्वरूपमात्रः यदि भवान् वसति, नामरूपे च विस्मरन् तदा सा माया शाम्येत् । शमं गच्छेत् माया । कथं वा शाम्येत् ? क्षणकालं वा उपरमेत् परया अन्यथा तु भवान् त्रयीषु चतुर्ष्वपि वेदेषु

१. ''बीजामाया'' इति पाठः ।
२. ''प्रायातेत्यपि'' इति पाठः ।



नास्त्युपायान्तरमिति ॥१०३॥

ननु वह्न्यादावुष्णादिशक्तिः मणिमन्त्रादिभिः प्रतिबद्धापि पुनरप्यागमिष्यति तथा विद्यया निवारितोऽपि बन्धः कालान्तरे पुनरप्युदीयादित्याशङ्क्य मायाशक्तेः मिथ्यात्वेन तत्कार्यस्यापि तथात्वात् पुनर्नोदीयादेवेत्याह — अव्यक्तमिति ।

**अव्यक्तं व्यक्तभावं व्यवहरणकृते याति मृत्स्नैव कुम्भः**
**वाचा नश्येत्तथा यन्मृदिति च कलनं सम्यगीक्षाहि यद्वत् ।**
**नाना नामानि रूपाण्यपि सकलगतान् जीवभेदाँश्च विद्वन्**
**विस्मृत्यैव त्वमास्वामलगगनवपुर्निर्विकल्पे समाधौ ॥१०४॥**

अव्यक्तं केनापि न व्यज्यत इत्यव्यक्तं नामरूपव्याकरणबीजभूतम् अव्याकृत-नामरूपं तत्त्वं या मूलप्रकृतिरित्यभिधीयते तदेव व्यवहरणकृते प्रपञ्चव्यवहारसिद्धये व्यक्ततां कार्यरूपतां प्राप्नोति । मृत्स्नैव यथा कुम्भ इत्युच्यते वाचा तया कुम्भ इत्युदितो विकारः परिशोधने नश्येत् मृत्सत्ताव्यतिरेकेण पृथगसत्त्वात् । ''**वाचारम्भणं विकारो नामधेयम्**[1]'' इति श्रवणाच्च । मृदित्येव कलनं चिन्तनं सम्यक् ज्ञानं प्रकृतिमात्रस्य सत्यत्वात् । ''**मृत्तिकेत्येव सत्यम्**[2]'' इति श्रुतेश्च । तद्वदेव यथा दृष्टान्ते तथा दार्ष्टान्तिकेऽपि नाना नामानि भूतभौतिकविषयाणि सकलगतान् जीवभेदाँश्च चतुर्विधभूतग्रामाँश्च अविद्याविलसितत्वेन स्वप्नदृष्ट-जगज्जीवादिव्यवहारानिव प्रतिबुद्धः विस्मृत्य तत्स्मरणपि परित्यज्यामलगगन-वपुर्निर्मलचिदाकाशस्वरूपः । निर्विकल्पे निर्भेदसमाधौ तिष्ठस्व[3] निर्विकल्पानन्दम्

१. छा.उ. ६-१-४
१. छा.उ. ६-१-४
३. ''तिष्ठस्व'' इति पूर्वपाणिनीयः प्रयोगः । पाणिनितन्त्रे ''ष्ठा-गतिनिवृत्तौ'' इति धातुः (धा.पा. ९२८) परस्मैपदी वर्तते । तत्र लोट्लकारे मध्यमपुरुषैकवचने ''तिष्ठ'' इति रूपं भवति । किन्तु आर्षग्रन्थेषु अस्य प्रयोगबाहुल्यं दृश्यते । यथा महाभारते (१. ३२.१९) — ''इमां महीं शैलवनोपपन्नां ससागरां साकरपत्तनां च । त्वं शेष सम्यक् चलितां यथावत् संगृह्य **तिष्ठस्व** यथा अचला स्यात् ॥'' इति ।
अपि च तत्रैव (३.१५४.२७) ''भो भो राक्षस ! **तिष्ठस्व** सहदेवोऽस्मि पाण्डवः । हत्वा वा मां नयस्वैनान्हतो वाद्येह स्वप्स्यसि'' इत्यत्रापि यदात्मनेपदप्रयोगो दृश्यते तत्तु आर्षप्रयोगः ।

अनुभवस्वेत्यर्थः[4] ॥१०४॥

ननु द्वैतजालस्य मिथ्यात्वनिश्चये तत्प्रतीतिः कथं नश्येदिति प्रश्नमनूद्य परिहरति — नो कालेति ।

**नो कालत्रितये स्थितं जगदिदं शुग्जाड्यमिथ्यामयं**
**सत्यज्ञानसुखात्मकेऽपि विपुले भात्येव नश्येत्कथम् ।**
**एतच्चेदिति नीरबिम्बितवपुश्चाधोमुखश्चञ्चलं**
**तीरस्थस्य विलोकने कथय तत्कुत्र प्रलीनं मृषा ॥१०५॥**

अनृतजडदुःखरूपं जगदिदं परिदृश्यमानं नित्यज्ञानानन्दलक्षणभूमाऽऽत्मनि तत्त्वतः अविद्यमानमित्युक्तमपि प्रतिभात्येव । तत् कथं नश्येदप्रतीतं भवेत् इति चेत् — नीरे नदीतटाकादिजले प्रतिबिम्बितं वपुरधोमुखश्चञ्चलश्च प्रतिभाति तथापि तत्तीरस्थस्य स्वस्य विलोकने तत्प्रतिबिम्बिनं कुत्र प्रलीनम् ? पूर्वप्रतीतसमयेऽपि मृषैव । यद्यपि [2]पुरुषः ऊर्ध्वमुखः अधःपादादिमान् तद्विपरीतत्वेन जले दृष्टः तथापि आकाशे ऊर्ध्वभागे मुखं भूम्याद्याधारे पादद्वयन्निहितं दृष्टम् । तद्वदेव प्रतिबिम्बितेऽपि आकाशे दृश्यत इति ज्ञेयम् । निरधिष्ठानभ्रमस्य कुत्राप्यनभ्युपगमात् ॥१०५॥

मनोनिरोधे सर्वे सङ्कल्पा उपशमं यास्यन्तीति दर्शयति — किमिति ।

**किं कार्यं किमु कारणं जगदिदं कस्माद् बभूवेति या**
**चिन्ता सा विफलैव किन्तु जगतामुत्पत्तिनाशावपि ।**
**विस्मृत्यैव निरन्तरश्चितिसुखाम्भोधौ परब्रह्मणि**
**त्वावर्त्तस्व विलीनचित्तचलनस्सम्पूर्णबोधात्मना ॥१०६॥**

जन्मादिधर्मवत्वाद्विकारात्मकमिदं किं कार्यम् । यद्वा कार्यं किम् ? कारणं

४. ''अनुभवस्व'' इत्यपि पूर्वपाणिनीयः प्रयोगो भाति । ''भू-सत्तायाम्'' इति धातुः (धा.पा. १) परस्मैपदी वर्तते । किन्तु ''परिभ्रमसि किं व्यर्थं क्वचन चित्त विश्राम्यतां स्वयं भवति यद्यथा तत्तथा नान्यथा । अतीतमपि न स्मरन्नपि च भाव्यसङ्कल्पयन्नतर्कितगमनान**नुभवस्व** भोगानिह ॥'' इति वैराग्यशतके (६३) आत्मनेपदप्रयोगो दृश्यते ।

२. ''पुरुषाः'' इति पाठः ।



च निमित्तमुपादानं च किमु ? कस्माद्धेतोरिदं जगद् बभूव इत्येवमादिरूपा चिन्ता निरर्थकैव । जगतामुद्भवप्रलयावपि निष्फलौ अनाद्यनन्तत्वात् । अतस्त्वं सर्वं गतं विकल्पं विस्मृत्य चिति सुखाम्भोधौ चित्सुखसमुद्रे ब्रह्मणि सम्पूर्णबोधात्मना परिपूर्णज्ञानस्वरूपेण विगलितान्तःकरणः वर्त्तस्व । सुषुप्तवत् प्रशमितसर्वभाव-वृत्तिकः विश्रान्तचित्तः स्वस्थो भवेत्यर्थः ॥१०६॥

वैराग्यश्च असङ्गात्मबोधहेतुरिति दर्शयति — संसारेति ।

**संसारे यावदाशा भवति जडधियो जायते चेद्विरागः**
**तावान् स्वस्य स्वरूपे भवति सुदृढता तच्चिराभ्यासयोगात् ।**
**चित्तं वश्यं यदि स्यात्तव निजसुखयुक् तुच्छसंसारभोग-**
**स्थित्यां सत्यान्न दोषो भवति चितितनोरम्बरस्येव पङ्कैः ॥१०७॥**

संसारे देहेन्द्रियादिप्रपञ्चे यावदाशा तृष्णा जडधियः क्षुद्रबुद्धेर्जनस्य तावद्विरागो वैतृष्ण्यं हृदि स्यात् । स्वस्य स्वरूपे सुदृढता चिराभ्यासयोगात् सञ्जायते । ततः चित्तश्च वश्यं यदि स्यात् निजसुखयुग् आत्मसुख्यां प्रयुक्तं तुच्छसंसारभोगस्थित्यां सत्यान्न दोषो भवति । देहेन्द्रियादिसङ्घातः तुच्छः तद्विषयभोगः विषसम्पृक्तमधुयवः[1] न सुखायेति निश्चये जाते उपरि तनुभोगेन तुष्टिरसङ्गता च न दोषः सुगः । यथा अम्बरस्य आकाशस्य पङ्कैस्सङ्गो लेपो न भवतीति ॥१०७॥

सच्चिदानन्दलक्षणपदानामखण्डार्थं जिज्ञासुः पृच्छति — स्व इति ।

**स्वज्ञानानतिरिक्तपूर्णवपुषः सच्चित्सुखाख्या गुणाः**
**तुल्यास्सर्वशरीरिणामिति वचः सम्यग् न भातीव मे ।**
**सर्वेषां चितिरेकिका यदहमित्येकानुभूतेर्गुरो !**
**नानन्दस्य तदैक्यमस्ति यदिदं सर्वैर्न विज्ञायते ॥१०८॥**

स्वमनन्यं स्वरूपभूतं यत् ज्ञानं तदतिरिक्तम् अभिन्नं पूर्णश्च वपुस्तस्य प्रत्यगभिन्नब्रह्मणः सच्चित्सुखाख्या गुणाः सत्यज्ञानानन्दाभिधा गुणाः तुल्याः

१. ''...मधुवयः'' इति पाठः ।

२. ''यदयं'' इति पाठः ।

सर्वेषां जीवात्मनामिति यद्वचः उक्तं तत् सम्यक् न भातीव सच्चिदानन्दपदानि गुणवाचकानि विशेषार्थानि लक्षणपराणि वा। तानि सर्वेषां जीवानामित्युक्तम्। तथा च धर्मिबहुत्वे धर्माणामपि बहुत्वं स्याद्वा न वा ? किञ्च सर्वेषां जीवानां चितिश्चैतन्यमेकरूपमेव यस्मादहमित्येकाकारैवानुभूतिः दृश्यते। यद्यपि चैतन्यमात्मस्वरूपमेव तथाप्यत्र धर्मत्वेन पृथगवभासनात् तथा पृष्टम्। यद्वा शिलापुत्रस्य शरीरमितिवत् विकल्पमात्रमात्मानन्दस्य तथा एकत्वं नास्ति यस्मादयम् आत्मा आनन्दस्वरूप एव सर्वैर्न विज्ञायते [1]कदाचिदहं दुःखीत्यपि प्रतीतिदर्शनात्। धिक् मां दुःखिनं दुरात्मानमिति च। अतः कथमेषामात्मस्वरूपत्वेन धर्मतां विनाऽखण्डार्थत्वमिति प्रश्नार्थः ॥१०८॥

सदृष्टान्तमुत्तरमुपदिशति — इत्थमिति।

**इत्थं शिष्ये ब्रुवाणे पुनरपि कथयामास चैकप्रसूने[2]-**
**रूपं स्पर्शस्सुगन्धो यदि कुसुमगुणोऽप्येक एकैककेन।**
**वेद्योऽक्षेणैव यद्वत्परमचितिगुणास्सच्चिदानन्दसंज्ञा**
**नानावृत्तिस्थभेदैस्स्वयमपि गमिता लौकिकैर्भेदभावम् ॥१०९॥**

इत्थं पूर्वोक्तप्रकारेण शिष्ये पृष्टरि पुनरपि गुरुस्सदृष्टान्तं कथयामास। यथा एकस्मिन् प्रसूने कुसुमे स्पर्शः त्वग्ग्राह्यः, गन्धः घ्राणग्राह्यः, रूपं चक्षुग्राह्यम् — एते गुणा वर्तन्ते। एको गुणः एकेन इन्द्रियेण नान्येन इन्द्रियेणान्यो गुणः अक्षेण वेद्यो विज्ञातव्यः। तद्वदेव परमात्मगुणाः एते सच्चिदानन्दाभिधाः समानजातीयेभ्यो निवर्तकतया विशेषणभूताः सर्वतो व्यावर्तकत्वेन अवकाशदात्राऽऽकाशमितिवत् लक्षणभूताश्च वृत्तिस्थभेदैः सत्त्वादिवृत्तिनिष्ठभेदैः लौकिकैरेव भेदभावं गमिता न स्वरूपतः। प्रसूने तु मूर्तत्वमात्मनि तदभावात् तत्रारोपिताः तद्धर्मव्यावृत्तिद्वारा स्वरूपपर्यवसन्ना अखण्डार्था इति यावत् ॥१०९॥

आत्मस्वरूपा अपि सच्चिदानन्दा वृत्तिभेदेन भिन्नवद् गृहीता इत्युक्तम्। ता एव वृत्तीः विभज्य मुखतो दर्शयति — तम इति।

१. ''तदाचिदहम्'' इति पाठः।
२. ''चैकप्रसूनै'' इति पाठः।



**तमो रजस्सत्त्वगुणैर्विभिन्ना**
**हृद्वृत्तयो मूढसुघोरशान्ताः।**
**सदैकरूपा अपि संविदाद्या**
**भिन्ना यदा सुप्रतिबिम्बितास्ते ॥११०॥**

[1]आवरकत्वाद् रजो रञ्जनात्मकत्वात्, सत्त्वं शुद्धस्वभावात् तत्संज्ञकैः गुणैः वृत्तयो मनोवृत्तयो विभिन्नाः भेदं प्राप्ताः तासां[2] स्वभावविशेषाः — मूढसुघोरशान्ता इति। मूढं तमः घोरः रजोगुणः शान्तस्सत्त्वस्वभावः। आसु वृत्तिषु प्रतिबिम्बिता अनुगता एते सच्चिदानन्दाः एकरूपा अभिन्नार्था अपि भिन्ना भेदव्यवहारयोग्या भवन्ति न वस्तुवृत्तेनेत्यर्थः ॥११०॥

कार्यानुगतिं विना गुणपरिज्ञानं दुष्करमिति तत्कार्यभेदप्रदर्शने तदनुगतसदादि-स्वरूपं निरूपयति — कुड्येति।

**कुड्यादौ जडरूपके प्रविलसत् सन्मात्रमेव स्फुटं**
**कामाद्यातुरचित्तवृत्तिषु सुखं ब्राह्मन्तु न व्यज्यते।**
**सच्चित्तत्र चकास्ति रागविमुखेष्वेतत्तया भासते**
**मुक्त्वा काममलं प्रशान्तहृदयेष्वानन्द एवाधिकः ॥१११॥**

अचेतात्मके कुड्यादौ प्रथितकाष्ठपाषाणादावपि प्रविलसत् सन्मात्रमेव प्रस्फुरत् सत्तामात्रं स्फुटमवगम्यते। पृथिवी सतीत्यादिस्पष्टत्वात्। कामाद्यातुर-चित्तवृत्तिषु कामक्रोधादिपीडितमनोवृत्तिषु जनेषु ब्राह्मं सुखं विना सदपि चिदपीति द्वयं भासते। रागविमुखेषु उपशान्तरागादिदोषेषु सत्त्ववृत्तिप्रधानेषु जनेषु त्रयमपि सच्चित्सुखमित्येतत् त्रयमपि भासते। अन्योन्यमवर्जनीयतया त्रयाणामपि तत्रोपलम्भात्। काममलम् अविद्याकामकर्मदोषं विद्याऽऽविर्भावेन विहाय ये प्रशान्तहृदयाः प्रकर्षेण शान्तं क्षीणं हृदयं येषां तेषु जीवन्मुक्तेषु आनन्द एवात्मानन्द एवाधिको निरवधिको निरतिशयश्चकास्ति। तन्मुखप्रसादगम्यश्च स इति एवकारेण सूच्यते ॥१११॥

१. ''आवारकत्वाद्'' इति पाठः।
२. ''तेषाम्'' इति पाठः।

यद्यपि वृत्तिभेदभिन्नाः सदादयस्तथापि तेषां पर्यायताद्यभावात् लक्षणं वक्तव्यमिति प्रष्टुकामं शिष्यं तल्लक्षणकथनतोऽपि बोधयति — सत्यानन्द इति ।

**सत्यानन्दचिताञ्च लक्ष्म भगवन् ! ब्रूहीति चेदुच्यते**
**यत्कालत्रितयेष्वबाध्यमपि तत्सत्यं चितिस्तद्भवेत् ।**
**यत्सर्वानवभासयत्स्वयमपि स्वेनैव भातं सुखं**
**ब्रह्माकाररसानुभूतिसमये यल्लभ्यते निर्भरम् ॥११२॥**

सत्यज्ञानानन्दानां लक्ष्म चिह्नमुपदिशेति[१] चेत् नीलं महत् सुगन्ध्युत्पलम् इत्यादिप्रयोगवत् विशेषणार्थानि इव तानि पदानि भान्ति । तथा च धर्मपरा ह्येव भवेयुः[२] । लक्षणार्थानि च तानीत्युक्तं तर्हि लक्षणं वक्तव्यम् लक्षणभेदे[३] च वस्तुभेदः अभेदे च पर्यायता हस्तकरादिवत् । अतः औपनिषदाभिमतलक्षणं भवता वक्तव्यमिति चेदुच्यते ''**कालत्रितयेषु अबाध्यं तत्सत्यं सत्यमबाध्यं बाध्यं मिथ्या**[४]'' इति वाचस्पतिमिश्रवचनात् । यद्वस्तु स्वाध्यस्तान् सर्वान् अवभासयत् स्वयमपि स्वसत्तयैव भाति तत् चिदिति कथ्यते । ब्रह्माकारसुखानुभूति-समये निर्विकल्पकसमाध्युदितपूर्णानन्दानुभवकाले[५] वृत्तिक्षयात्तदानीं निर्भरं गाढं यन्निरतिशयं सुखं सुषुप्ताविव लभ्यते तदेवानन्दः । यद्यपि तदानीं वृत्तेरभावात् तदानन्दो मनोवृत्तिविषयो न भवति तथापि समाध्युत्थितस्य तत्स्मरणसम्भवात् अनुभूतिमय एवेति बोधार्थम् । स्वानुभूतिसमय इत्युक्तं सुषुप्तौ मनः प्रकृतौ लीयते समाधौ च निर्बीजे निरतिशयानन्दे शान्ते ब्रह्मणीति ज्ञेयम् । किञ्च सुतौ चित्तलय एव, अत्र तु तथा न किन्तु तत्पृथग्भाव एवेत्यर्थः ॥११२॥

एतद् ब्रह्मलक्षणं प्रतीतिः[६] कथं घटते इति पृच्छति — नश्यदिति ।

---

१. ''चिह्नमुपदेशेति'' इति पाठः ।
२. ''भावेयुः'' इति पाठः ।
३. ''लक्षणंभेदे'' इति पाठः ।
४. भामती (?)
५. ''...पूर्णानुनन्दानुभवकाले'' इति पाठः ।
६. ''प्रतीचि'' इति पाठः ।



**नश्यद्देहगतं शरीरिणमिमं वेदान्तवाक्यानि वा**
**सत्यानन्दचितिं वदन्त्यपि कथं ब्रह्मेति तन्निर्मलम् ।**
**संवित्सत्यसुखोऽहमित्यनुभवो भूयात्कथं वास्य भोः**
**कोशागारविनाशमत्तगज ! मे सर्वं वदस्वादरात् ॥११३॥**

नश्वरशरीरतादात्म्यमापन्नमत एव संसारिणमिमं जीवात्मानं वेदान्तवाक्यानि स्वतःप्रमाणभूतौपनिषत्प्रमाणवाक्यानि सत्यज्ञानानन्दस्वरूपं कथं वदन्ति । तन्निर्मलं निर्गुणं ब्रह्म वा कथं प्रतिपादयन्ति । तत्सत्यं ''**स आत्मा तत्त्वमसि**[१]'' इत्यादि वचनात् तथाविधसत्यज्ञानानन्दस्वरूपं ब्रह्माहमेवेति अस्य संसारिणः कथमनुभवो भूयात् । पञ्चकोशागारभञ्जनमदोन्मत्तकुञ्जर ! स्वभावादरात् मयि करुणया सर्वं वदस्व ॥११३॥

आदौ प्रतीचस्सत्यत्वे हेतुं दर्शयति — समिति ।

**संस्मृत्यातीतजन्मव्रजकृतसुकृताघौघमुच्छोकपङ्क्तेः**
**पश्चाल्लोकान्तरेष्वप्यमितसुखगतिप्रार्थनासम्भवाच्च ।**
**नाशं प्राप्तेषु मर्त्याऽमरदनुशरीरेष्वेव जातेषु भूयो**
**यस्मात्तस्मादयं सन् घट इव गगनं सत्यमेतस्य विद्धि ॥११४॥**

अतीतेष्वतिक्रान्तेषु जन्मव्रजेषु जननसहस्रेषु कृतसुकृताघौघं कृतस्य सुकृतौघस्य पापौघस्य च परिपाकजातमुत्सन्तोषशशोकव्यसनं तत्पङ्क्तिः परम्परा तस्या हेतोः । पश्चात् शरीरवियोगानन्तरं लोकान्तरेषु आमुष्मिकेषु ऐहिकेषु चामितसुखप्राप्तिकां क्षणाच्च पुण्यफलेषु देवशरीरेषु पापफलेषु क्षुद्रशरीरेषु मिश्रेषु चासुरमनुष्यादिशरीरेषूत्पन्नेषु स्थितेषु[२] नष्टेष्वपि बहुवारं जाग्रदादिष्ववस्थास्विव यस्मादयं प्रत्यगात्मा सन्न व्यभिचारी अनुवर्त्तमानः सदा तथेव[३] तिष्ठति । घटे गगनमम्बरमिव । अत एवैतस्य सत्यं सत्यत्वं सिद्धमित्यभिप्रायः ॥११४॥

चित्त्वमानन्दरूपत्वञ्च दर्शयति — अज्ञानेति ।

---

१. छा.उ. ६-१०-३
२. ''स्थितषु'' इति पाठः ।
३. ''ततोव'' इति पाठः ।

**अज्ञानाकारसुप्तौ निशि मिहिरमुखज्योतिषामप्यभावे**
**ज्ञातृत्वादर्थराशेरपि बहुतमसस्सा चितिर्वस्तुभूता।**
**भोगाभोगोपभोगेष्वपि निजवपुषि प्रेमसारैकसत्त्वा-**
**दानन्दोऽयं स्वभावादपि च समुदितो वत्स ! जानीहि सम्यक् ॥११५॥**

अन्धतमोरूपसुषुप्त्यवस्थायामादित्यादीनां ज्योतिषामप्यभावे वर्षकालार्ध-रात्र्याम् अर्धराशेर्विषयजातस्य ज्ञातृत्वात् चक्षुरादीनां तदनुग्राहकतेजोऽभावेन विषयबोधकत्वायोगात् बहुतमसस्सकाशादश्मौषति[१]। श्वा[२] रौतीत्यादिव्यवहारे यद्यपि श्रोतादिगत्या तदवगतिरिति मतं तथा ''**आत्मैव स्वयं ज्योतिर्भवति**[३]'' इत्यादिश्रुतेः अयमर्थोऽवगन्तव्यः। सा चावगतिः चितिर्वस्तुभूतात्मस्वरूपा च। बहुविधविस्तारो ह्येतद्विषयसुखानुभूतिष्वपि स्वकीयशरीरादौ तत्तदधिकारानुरूपेण प्रेम्णा[४] विद्यमानत्वात् अयं प्रत्यगात्मानन्दस्सुखरूपस्वभावादेव नाप्युपाधितः[५]। ''**आत्मनस्तु कामाय सर्वं प्रियं भवति**[६]'' इति श्रुतेः। अयमर्थः समुदितः पूर्वाचार्यैः अतस्त्वं शेषी परमप्रेमास्पदः प्रत्यगात्मा सुखरूप इति जानीहीति यावत् ॥११५॥

प्रतीचः निरतिशयसुखरूपत्वं स्पष्टयति षड्भिः — अन्ध इति।

**अन्धं पानादिसर्वं यदिह सुखततेस्साधनं वल्लभन्तत्**
**सर्वेषां यो यमात्मा यदि भवति तदा व्यर्थता वेदवाचाम्।**
**इत्थम्भूतः परात्मापि च विषयसुखे साधनं चेत्तदानीं**
**वत्साचक्ष्व त्वदीयं सुखमनुभवति[७] कोऽस्ति नात्मद्वयं स्यात् ॥११६॥**

---

१. ''बहुतमसस्सकाशादश्लोषति'' इति पाठः।
२. ''श्ला'' इति पाठः।
३. बृह.उ. ४-३-९ (अत्र ''अत्रायं पुरुषः स्वयं ज्योतिर्भवति'' इति पाठो दृश्यते अथवा तत्रैव (४-३-६) ''आत्मैवास्य ज्योतिर्भवति'' इति श्रुतिः गृहीतुं शक्यते।)
४. ''प्रेमेणा'' इति पाठः।
५. ''नाप्यौपाधितः'' इति पाठः।
६. बृह.उ. २-४-५
७. छन्दोभङ्गः सम्भाव्यतेऽत्र। अस्मिन् श्लोके स्रग्धरावृत्तमस्ति। स्रग्धरालक्षणानुसारम् अत्र ''भवति' इत्यत्र अन्तिमो वर्णो गुरुः स्यात्। किन्तु नैतदत्र दृश्यते।



इह संसारमन्धं मे यदिदमन्नपानादिविषयजातं सुखततेस्तृप्तेः साधनम्। तद्वल्लभं प्रियं सुखसाधनत्वादेव सर्वेषां प्राणिनां योऽयमस्मच्छब्दप्रत्ययालम्बनतया प्रसिद्धः प्रत्यगात्मा तथा साधनं भवति। [१]शेषतां यदि कदाचिद्याति तदा वेदवाचाम् ''**आत्मनस्तु कामाय सर्वं भवति**[२]'' इत्यादिलक्षणानां व्यर्थताऽऽनर्थक्यञ्च स्यात्। इत्थम्भूतः परमप्रेमास्पदः परात्मापि विषयसुखे स्त्र्यादिवत् साधनं चेत् भवेत् तदानीं त्वदीयं तत्साधनसाध्यं सुखमनुभविता साधनभूतादात्मनः अन्यः को वा विद्यते ? [३]यत् आत्मद्वयमप्रामाणिकं न स्यात्। प्रमाणविरोधादेव ''**एक एव हि भूतात्मा भूते भूते व्यवस्थितः**[४]'' इति श्रुतिभ्यः यद्यात्मनः स्त्र्यन्नपानादिवत् साधनभावमभ्युपगम्य तस्यान्यः आत्मानुभविता कश्चिदस्तीति कल्प्येत तदा द्वयोस्तयोर्लक्षणभेदो वक्तव्यः। स च निरस्ततदौपाधिकभेदाङ्गीकारेऽपि[५] तस्य अनुभविताऽन्यस्तस्याप्यन्य इत्यनवस्था च प्रसज्येत। अत एव नात्मद्वयं स्यादित्युक्तं सूक्तमेवेत्यभिप्रायः ॥११६॥

परमप्रेमास्पदत्वम् आत्मन आनन्दरूपत्वे हेतुरित्युक्तं तदेव विषयादि-वैलक्षण्येन स्पष्टयन् अहेयानुपादानतां च दर्शयति — स्यादिति।

**स्यात्प्रीतिर्विषये परन्निजसुखे स्यात्प्रेम भूयस्तरां**
**व्यत्यस्तं विषये सुखन्निजसुखं व्यत्येति न क्वापि च।**
**मोक्तुं भोक्तुमपि क्षमो हि विषयो नात्मा तथा शक्यते**
**त्यक्ता यो विषयान् स केन हि परित्यक्तुं पुनश्शक्यते ॥११७॥**

विषये स्रगादौ परं प्रीतिरेव स्यात् परिमितालम्बनत्वात्। निजसुखे स्वाभाविकसुखे भूयस्तरामत्यन्तं प्रेम भवेत्। विषये सुखं विषयगतं सुखं व्यत्यस्तं भिन्नरुचित्वात्। लोकस्य निजसुखं क्वाप्यवस्थायां कस्याञ्चिदपि न व्यत्येति

---

१. ''यदि शेषतां यदि'' इति पाठः।
२. बृह.उ. २-४-५
३. ''यत् आत्मद्वयमप्रामाणिकं न स्यात्'' इति पाठः। अत्र नकारः अधिकः पाठः इति प्रतीयते। ग्रहीते सति आत्मद्वयमस्तीति अर्थो भवेत्, स च नेष्टः, अग्रिमवाक्यविरोधात्।
४. ब्र.बिं.उ. १२, त्रि.ता.उ. ५-१२
५. ''भेदमङ्गीकारेऽपि'' इति पाठः।

व्यत्यस्ततां गच्छति। विषयस्त्र्यादिरूपो हि यस्मात् कदाचिदानुकूल्ये भोक्तुं प्रातिकूल्ये त्यक्तुं च क्षमश्शक्यः। आत्मा तु तथा दातुं त्यक्तुं वा न शक्यः। आत्मत्वादेव सर्वानपि स्वातिरिक्तान्विषयान् त्यक्त्वा स केन कर्त्रा परित्यक्तुं शक्यते। अतः अहेयानुपादेयस्वरूप एव प्रत्यगात्मा नान्यशेष इति तात्पर्यार्थः ॥११७॥

ननु केचिल्लौकिका व्याध्यादिपरिपीडिता वैदिकाश्च देवत्वकामा भृगुपतनादिकमाचरन्त आत्मानं त्यजन्तीति स्थिते कथमुक्तसिद्धिः इत्याशङ्क्य तस्यान्यविषयत्वादिति परिहरति — तप्यदिति।

**तप्यत्कोपवशादहं हि मरणं गच्छेयमित्यातुराः**
**केचित्स्वं स्वयमुत्सृजन्ति यदतः स्वात्यक्तभावः कुतः।**
**एवं चेच्छृणु यो वपुस्त्यजति स त्यक्ता न तु स्वं मनाक्**
**स्वस्मिन् स्वाप्यरुचिर्जनस्य न भवेत्कस्यापि कोपादृते ॥११८॥**

तप्यत्कोपवशात् देहाद्यन्तस्तापकरक्रोधपारवश्याद् अहं मरणं गच्छेयम्, आत्मानं परित्यजामीति केचनातुराः आर्त्ताः जनाः केचित्स्वमात्मानं स्वयं स्वप्रयत्नेनोत्सृजन्ति त्यजन्ति। यस्माद्दृष्टं चैतत् अतः स्वात्यक्तभावः स्वस्वात्मनः स्वविषयत्यागं कर्तृत्वाभावः कुतः स्यात्? एवं चेत् पृच्छसि तत्राप्युत्तरं शृणु। यो हि त्यागकर्त्ता यच्च त्यक्तव्यकर्म करोति तत् कर्म शरीरविषयं नात्मविषयम्। त्यक्तुः स्वरूपं च ब्रह्म; न स्वरूपं कोऽपि त्यक्तुमुत्सहते। त्यक्तव्यशरीरसम्बन्धाद् असह्यदुःखं सम्प्राप्तं तत्त्यागात् सुखी स्यामिति विचार्य किल त्यजति। शरीरमेव लिङ्गमविद्यां च विहाय नित्यानन्दस्तिष्ठति। तस्मिन्नित्यातिशये[१] स्वस्मिन्नात्मनि क्वापि भूमौ कस्यापि प्राणिनः कृम्यादेरप्यरुचिरस्नेहः न भवेत्। तत्तादात्म्याध्यासवशात् शरीरदावात्मभावं कृत्वा संसरति[२]। कोपात् कदाचित्तदेव त्यजति स्वीकरोति च। तं विना तु पुनरात्मानं न त्यजति गृह्णाति वा। पूर्णत्वात् स्वरूपत्वाच्चेत्युक्तमिति तात्पर्यार्थः ॥११८॥

प्रियं तारतम्यादात्मतारतम्यमपि उपाधिसिद्धं दर्शयति — वित्त इति।

---

१. ''नित्यतिशये'' इति पाठः।

२. ''सुसरति'' इति पाठः।



**वित्तेभ्यो दयितस्सुतस्तनुरतो नेत्रं ततोऽपीन्द्रिया-**
**ण्यन्तःस्थं करणं प्रियन्ततोप्यसुगणो जीवस्ततोऽपि प्रियः।**
**आत्मेहापि च स त्रिधैव भविता वत्स ! शृणुष्वादिमो**
**गौण्योऽन्यस्तु मृषात्मकस्तदपरः कर्त्रात्मकश्च क्रमात् ॥११९॥**

वित्तेभ्यस्सुवर्णादिभ्यो दयितः सुतः गौणात्मा प्रियः, ततोऽपि गौणात्मनः तनुः मिथ्यात्मेत्युक्तं शरीरं प्रियम्, ततोऽपि नेत्रं गोलकादिकमिति ग्राह्यम्, तस्मादपीन्द्रियाणि चक्षुरादिकरणानि प्रियाणि, तस्मादन्तःकरणं प्रियम्, ततोऽपि प्राणसमूहः, ततोऽपि जीवः कर्त्रात्मा[१] प्राणानां धारयिता देहादिपञ्जराध्यक्षः चेतनो विज्ञानमयः प्रियः। स एव त्वम्पदार्थभूतः जीवात्मा त्रिधा भविष्यति। स एव देहसम्बन्धात् तत्तादात्म्यमुपपन्नः मिथ्यात्मा गौणात्मा कर्त्रात्मकश्च पुत्रादावात्मत्वभ्रमात् तद्गतसाकल्यवैकल्याद्यभिमानात् कर्त्ताहं भोक्ताहम् इत्याद्यनुभवाच्च त्रिधा व्यवहृतश्शास्त्रेषु ''[२]**गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्**[३]'' इत्यादिवचनाच्च ॥११९॥

व्यवहारदशायाम् आत्मनः त्रैविध्यमस्ति हि तद्देशकालादिभेदेन प्रियभेदेऽपि आत्मलक्षणाऽप्रियं[४] न शेषतामायातीति दर्शयति — वृद्धत्वेति।

**वृद्धत्वे द्रव्यहेतोस्स भवति दयितः पुत्रको गौण आत्मा**
**मिथ्यात्मा स प्रियस्स्यादनुभवसमये सम्पदां स्त्र्यादिकानाम्।**
**कर्त्तात्मा वल्लभस्स्यान्निजसुकृतगतिप्रार्थनायामभीक्ष्णं**
**चित्सत्यानन्दमुक्तौ बहुदयिततमस्स्यादयं प्रत्यगात्मा ॥१२०॥**

स्वस्य वृद्धभावे जाते स्वार्जितद्रव्योपयोगाय पुत्रः औरसः दयितः पुत्रानुशासनानन्तरं पितुः परलोकयात्रादिविधायकशास्त्राच्च स्त्र्यादिकानां सम्पदामुपभोगकाले यौवनकाले मिथ्यात्मा देहः प्रियः बहुविधपोषणोत्सुक्यादि-

---

१. ''कर्त्तात्मा'' इति पाठः।

२. ''गौणमिथ्यात्मनोस्सत्त्वे'' इति पाठः।

३. ब्र.सू.शां.भा. १-४-४ पृ. १५४

४. ''आत्मलक्षणाप्रियं'' इति पाठः। अत्र ''आत्मलक्षणाऽप्रियं'' इति पाठः भवेत्।

दर्शनात् शरीरादेः नश्वरत्वदर्शनेन श्रुतौ विश्वासेन च निजसुकृतस्य स्वसम्पादित-पुण्यपुञ्जस्य या गतिरुत्कृष्टप्राप्तिः तत्प्रार्थनात् परलोके सुखी भूयासम् इत्यादि-समाधानदर्शनात् शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादिति न्यायाच्च । परलोकचिन्तायां कर्त्तात्मैव मुख्यः अन्यथा [1]शरीरशोषणाद्यानुष्ठानप्रसङ्गात् । केवलचित्सदानन्दा-द्वितीयब्रह्मरूपमात्रावस्थालक्षणे कैवल्ये अयं नित्यापरोक्षानुभवसिद्धः प्रत्यगात्मैव बहुदयिततमः तस्यासङ्गत्वनिर्विकारत्वपरिपूर्णत्वादिज्ञानानुभवं विना कैवल्यायोगाद् इति तात्त्विकार्थः ॥१२०॥

''**आत्मनस्तु कामाय सर्वं प्रियम्**[2]'' इत्युक्तश्रुत्यर्थं सम्प्रतिपत्तये अन्वयव्यतिरेकं दर्शयति — शार्दूलेति ।

**शार्दूलोऽप्यनुकूल एव भविता चेद्वल्लभो नन्दनो**
**द्वेष्यश्चेदनुकूलतान्न लभते वत्स[3] ! तृणाद्यं भुवि ।**
**औदासीन्यपदं लभेत चिदपि प्रायस्तथा वर्तते**
**स्वानन्दं परिमृश्य तिष्ठ सुखितस्वाराज्यसिंहासने ॥१२१॥**

शार्दूलोऽप्यनुकूलः लीलाविहारादौ भविष्यति चेत्तदा सोऽपि वल्लभ एव । अत्यन्तविरोधिनः तस्य ग्रहणं कात्वदर्थं(?) ज्ञेयम् । नन्दनोऽपि स्वपुत्रोऽपि द्वेष्यः प्रतिकूल एव भवति यदि कदाचिद् अभीष्टतां न याति । तृणाद्यं भुवि प्रपञ्चे औदासीन्यभावं लभेत, चिच्चैतन्याभिप्रायेण तथैव तटस्थत्वेनावतिष्ठते । तत्त्वं स्वानन्दन्नित्यसिद्धं परिमृश्य ज्ञात्वा अनुभूय स्वाराज्यसिंहासनेऽखण्डसाम्राज्ये भूमानन्दात्मनि विश्रान्तः सुखितः चिरं तिष्ठ वर्तस्व ॥१२१॥

औपाधिकाऽऽत्मतारतम्यावगतप्रियतारतम्यं बुध्वापि तद्विशेषबुभुत्सोः आनन्दसङ्ख्यां कथयेति प्रश्नमनूद्य तस्याष्टधा भेदं दर्शयति —मान्येति ।

---

१. ''शरीरशेषणा'' इति पाठः।

२. बृह.उ. २-४-५

३. अस्मिन् श्लाके शार्दूलविक्रीडितं वृत्तमस्ति । अतः तल्लक्षणानुसारं ''वत्स !'' इत्यत्र अन्तिमो वर्णो गुरुः स्यात् । कित्वत्र सकारो ह्रस्वो वर्तते । तस्मादत्र च्छन्दोभङ्गः सम्भाव्यते ।



**मान्यानां मान्यपादाम्बुजगुरुचरणानन्दाः कतीत्युच्यते**
**ब्रह्मानन्दस्तथैकः परमचितिमयो वासनानन्द एकः ।**
**अन्यश्शब्दादिकोत्थं कतिचन कथयन्त्यष्टधैतेषु पञ्चा-**
**प्यन्ये लीना इतीत्थं पुनरिह कथयाम्यष्टधाऽऽनन्दभेदान् ॥१२२॥**

पूज्यानामपि पूज्यचरणारविन्द ! देशिकेन्द्र ! ह्यानन्दाः कतीत्युच्यन्ते ? कति सङ्ख्याका इति चेत् — कथ्यते । ब्रह्मानन्द एकः परमात्मचैतन्यस्वरूपः । वासनानन्द एकस्तदन्यो विषयानन्दः । स एव शब्दादिकोत्थः[1] इत्यभिहितः कतिचनाचार्याः अष्टधा कथयन्ति । एतेषु ब्रह्मानन्दवासनानन्दविषयानन्दभेदेन त्रिधा स्थितेष्वानन्देषु पञ्चाप्यन्ये वक्ष्यमाणा लीना एकीभूता इति हेतोरित्थं कथयन्ति । एक एव ब्रह्मानन्दस्त्रिधा भिन्नः पञ्चधा ह्यष्टधा चेति इहाष्टधा भिन्नानानन्दान्(?) कथयामीति यावत् ॥१२२॥

तान्येव पृथग्विभज्य दर्शयति — जातमिति ।

**जातं भोगात् सुखं यद्विषयसुखमिदं ब्रह्मसौख्यं सुषुप्तौ**
**निद्रान्ते वासनाख्यं सुखमिह सकलानन्दात्मसौख्यम् ।[1]**
**योगोत्थं मुख्यसौख्यं स्वसुखमिदमुदासीनकालोत्थितं यत्**
**चाद्वैतं पूर्णदृष्ट्या जनितमपि महावाक्यजं ज्ञानसौख्यम् ॥१२३॥**

सुखादिसाक्षात्कारो भोगो विषयानुभवाज्जातं यत्सुखं स विषयानन्दः । सुषुप्त्यवस्थायां यत्सुखं सुखमहमस्वाप्सम् इति स्मरणादवगम्यते स ब्रह्मानन्दः । निद्रान्ते निद्रावसाने यत्सुखं स वासनानन्दः । सर्वानुस्यूतं सनातनं सौख्यमात्मानन्दः । योगोत्थं निर्विकल्पसमाध्याविर्भूतं मुख्यानन्दः । यद्वा सम्प्राज्ञातासम्प्रज्ञातादियोगोत्थं सौख्यं वा मुख्यानन्दः । उदासीनावस्थासम्भूतं यत्सुखन्निजानन्दः । परिपूर्णब्रह्मा-

---

१. ''शब्दादिकोत्थमि इत्यभिहितः'' इति पाठः।

१. अस्मिन् श्लोके स्रग्धरा वृत्तमस्ति । किन्त्वत्र द्वितीयचरणे वर्णद्वयं न्यूनमस्ति । अतः यदि ''सकलानन्दात्मसौख्यम्'' इति पदे यदि वर्णद्वयं योज्यते तर्हि, स्रग्धरावृत्तस्य लक्षणं सङ्गच्छत अत्र । अतः ''सकलानन्दात्मसौख्यम्'' इति स्थाने ''सकलानन्ददं चात्मसौख्यम्'' इति पाठः स्रग्धरावृत्तलक्षणान्वितो युक्ततमः स्यात् । तथाविधपरिवर्तनेन अर्थपरिवर्तनमपि न भवति ।

वगत्या सम्भूतोऽद्वैतानन्दः। उपनिषद्वाक्यार्थपरिशीलनजातं सुखं विद्यानन्द इति आनन्दाष्टकसङ्ख्या उक्ताः ॥१२४॥

तत्र विषयानन्दं लक्षणतः कथयति —— जाग्रदिति।

**जाग्रत्कालशुचोपनोदविधये सम्यक् शयित्वैकदा**
**शय्यायां पुरुषस्य सुप्तिसमये ह्यन्तर्मुखे चेतसि।**
**छायायां प्रतिबिम्बिता निजचितेरानन्दरूपाऽत्र तां**
**वत्सेमां सुखकोविदास्तु विषयानन्दं समाचक्षते ॥१२४॥**

इन्द्रियैरर्थावगतिसमये इष्टानिष्टसंयोगवियोगदुःखादिनिवृत्तये कदाचित् सम्यक् शयित्वा प्रासादपर्यङ्कादौ शय्यायां विश्रममानस्य पुरुषस्य सुषुप्त्यारम्भवेलायां मनसि च अन्तर्मुखे बाह्यविषयालम्बनहीने निजचित्ते चित्सत्तानन्दरूपस्यात्मनः या छाया छायेव। स आभास आनन्दरूपः। अत्र तां छायां सुखकोविदाः सुखादिविवेकज्ञानिनः विषयानन्दं कथयन्ति तथा चोक्तम् ॥१२४॥

ब्रह्मानन्दं कथयति द्वाभ्याम् —— सङ्गेति।

**सङ्गोत्पन्नसुखत्रिपुट्यपि शुगित्यज्ञाय पूर्णात्मना**
**नीडे स्वे पतयालुपत्रिवदसौ जीवः परेणैकताम्।**
**निश्चितं समुपेत्य सत्सुखमयो यच्चानुभुङ्क्ते सुखं**
**ब्रह्मानन्दमुशन्ति तन्निरुपमं वेदान्तविज्ञानिनः ॥१२५॥**

सङ्गोत्पन्नसुखविषया या त्रिपुटी साऽपि दुःखमेव परिच्छिन्नत्वादिति ज्ञात्वा स्वे नीडे पञ्जरे पतयालुपत्रिवत् ''**श्येनो वा सुपर्णो वा**[1]'' इत्यादिश्रुत्युक्तक्रमेण प्रवेशनव्यग्रपक्षिवत् असौ विज्ञानमयः पूर्णात्मना परेण ब्रह्मणा एकरसतान्निश्चितं यथा तथा समुपेत्य चित्सदानन्दमय एव सन् यन्निरुपमाख्यं सुखमनुभवति। न बाह्यमान्तरं वा विषयमन्यमवगच्छति। निरुपमन्निरतिशयं तमानन्दमौपनिषदं ब्रह्मानन्दमिच्छन्ति ॥१२५॥

१. बृह.उ. ४-३-१९
२. ''तमानन्दमौपनिषदो'' इति पाठः।



किञ्च ——

**ब्रह्मानन्दो यमेव श्रुतिवचनविचारोत्थिता योगनिद्रा**
**या सुप्तौ जातसौख्यं स्वयमपि लभते ब्रह्मसौख्योपमानम्।**
**स्त्रीपुम्भेदाद्यभावादमननवशतो दृष्टबाह्यान्तरत्वा-**
**च्छय्याद्यं चारुसुप्तेर्यमनियमविधिस्साधनं योगसुप्तेः ॥१२६॥**

अयं पूर्वोक्तलक्षणः ''**सता सोम्य तदा सम्पन्नो भवति**[1]'' इत्यादिश्रुति-प्रदर्शितब्रह्मतादात्म्यसम्भूतो ब्रह्मानन्दश्श्रुतिवाक्यविचारजनिता योगनिद्रा साऽपि सुप्तौ सम्भूतसुखं च ब्रह्मानन्दसादृश्यं लभत एव। योगनिद्रासम्भूतसौख्यं ब्रह्मानन्द इति एकदेशिनो वदन्ति। तत्र स्त्रीपुम्भेदाद्यभावात् अनुपलम्भात्। मननस्मरणाद्य-भावाच्चाविज्ञातबाह्यान्तर्विषयत्वाच्च हेतोः ब्रह्मानन्दः स इति ज्ञेयः। सुप्तेः सम्बन्धि-तत्सुखस्य साधनं शय्याद्यम्। योगनिद्रायाः तु यमादिविधिः साधनमित्यर्थः ॥१२६॥

ननु सौषुप्तः ब्रह्मानन्दः कथं विश्वेन गृह्यत इत्याशङ्कते —— ब्रह्मेति।

**ब्रह्मात्मज्ञानहेतौ जगति भवता या परस्यानुभूतिः**
**साऽन्यस्येति प्रसिद्धा परसुखमयतां याति सौषुप्तजीवः।**
**विश्वोऽभ्येत्य [1]प्रवक्ति सुखमहमगमं चेति निद्रामि हेत्थं**
**सन्दिग्धं मे मनस्त्वं कथय गुरुविभो ! देवपूज्याङ्घ्रिपद्म !॥१२७॥**

ज्ञानोत्पत्तिसाधने जात्वस्मिन् भूमण्डले परस्यान्यस्य याऽनुभूतिस्सा तदितरस्य न भविष्यतीति प्रसिद्धा चेत् सुषुप्त्यवस्थायामव्याकृतनामा जीवः प्राज्ञः परसुखमयतां ब्रह्मानन्दमयतां प्राप्नोति। पुनश्च जाग्रति विश्वस्तस्मादागत्य ''सुखमहमेतावन्तं कालमासम्'' इति प्रवक्ति निद्रामनुभूयेति। स्थूलप्रविविक्तानन्दभोक्तारस्त्रयो जीवात्मान इति पूर्वमुक्तमनुभवितुरवस्था नामैकत्वम् उत नानात्वं वेति मे सन्दिग्धमिव भाति। भो देव ! पूज्यचरणगुरुविभो ! एतन्निर्णयं कथय ॥१२७॥

आत्मैकत्वस्य पारमार्थिकत्वादविरुद्धमेवोक्तमिति परिहरति —— छायेति।

१. छा.उ. ६-८-१
२. ''प्रवक्ता'' इति पाठः।

**छायैका परसंविदो व्यवहृतौ चित्तैकतामेयुषी**
**विश्वाख्यां लभते लयेथ मनसश्शोकात्मनस्सा पुनः ।**
**भूम्न्यानन्दमजत्वमेति मिलितावत्यै तयोर्नो भिदा**
**भेदो नास्ति तटीतटाकनवनीताज्याम्बुबिन्द्वम्भसाम् ।।१२८।।**

परसंविदः प्रत्यक्चैतन्यस्य छायैका चित्तसाम्यमेयुषी व्यवहारार्थं विश्वाख्यां विश्व इत्यभिधानं लभते । शोकात्मनो विक्षेपरूपस्वमनसो लये सम्प्रसादावस्थायां सैव विश्वसंज्ञा चिच्छाया जीव इति यावत् । भूम्नि ब्रह्मणि मिलिता[म्] एकतां प्राप्तानन्दमयभावमुपैति । एतयोः विश्वायनन्दमयसंज्ञयोः आत्मनोर्भिदा (.......) वास्तवो भेदो नास्ति । तत्रैते दृष्टान्ताः तटीतटाकवत् नवनीताऽऽज्यवत् जलकणाम्बुवच्चेत्यर्थः । लक्षणभेदो हि वस्तुनो भेदं साधयेत् तदत्रात्मनि न विद्यते । ''**चैतन्यस्यैकरूपत्वाद् भेदो युक्तो न कर्हिचित्**[1]'' इति वचनात् चेत्यर्थः ।।१२८ ।।

ननु सुषुप्तौ ब्रह्मभावमापन्नस्य कथं पुनः स्मृतिरित्याशङ्कां परिहरन् वासनानन्दं कथयति —— ऐक्यमिति ।

**ऐक्यं लब्ध्वापि भूम्ना सह पशुरयते किं पुनर्जीवतां चेत्**
**[2]आख्यास्ये पूर्वकर्म श्लथयति परमानन्दभावं हि जन्तोः ।**
**पश्चादुत्थेन सुप्तेर्निजसुखलहरी नोज्झिता बाह्यदृष्टौ**
**नासक्तेनाप्य ते यत्सुखमिदमुदितं वासनानन्दसंज्ञम् ।।१२९।।**

सम्प्रसादे भूम्ना भूमा च ''**यत्र नान्यत् पश्यति**[3]'' इत्यादिश्रुत्युक्तलक्षणः परमात्मनैकतां लब्ध्वापि पशुः परतन्त्रः कर्मपाशपरिवेष्टितोऽवस्थान्तरगामी जीवः पुनश्च जीवितां संसारितां किं किमर्थम् अयते प्राप्नोतीति चेत् —— आख्यास्ये । तत्प्रच्युते हेतुं पूर्वजन्मकृतं कर्मैवाविद्यां सचिवं परमानन्दभावं श्लथयति, ब्रह्मतां वियोजयति, पश्चात्तु सुप्तेस्सकाशात् उत्थेन निजसुखलहरीमपरित्यजता बाह्यदृष्टौ

१. अप.अनु. ४३
२. ''याख्यास्ये'' इति पाठः।
२. छा.उ. ७-२४-१



नासक्तेन यत् प्राप्यते तत् सुखं वासनानन्द इति कथ्यते ।।१२९ ।।

निजानन्दं दर्शयति द्वाभ्याम् —— देहेति ।

**देहाहन्ता हि जन्तोर्जनयति सुदृढं क्लेशमात्मीयसौख्यं**
**दूरापास्तं करोति प्रदिशति विमला मध्यमास्था हि मौनम् ।**
**निर्निद्रस्यापि कस्य प्रभवति विगताशेषचिन्तस्य पुंसः**
**त्वौदासीन्यं सुखं यन्मुनिभिरभिहितं तन्निजानन्दनाम ।।१३०।।**

जन्तोः प्राणिनः देहाहन्ता देहादावहं बुद्धिरेव नितरां क्लेशं जनयति क्लेशपरम्परामुत्पादयति । आत्मीयं स्वकीयसौख्यं निर्दुःखित्वं दूरापेतं करोति च । विमला निर्मला मध्यमास्था माध्यस्थावस्थानमेव मौनं निश्चिन्तत्वं प्रदिशति । निर्निद्रस्य जाड्यनिद्रामुक्तस्य यस्य कस्यापि पुरुषस्य विगताशेषचिन्तस्य अहङ्कार-ममकारवासनारहितस्य यदौदासीन्यं ताटस्थ्यं सुखं तदेव मुनिभिः विद्यारण्यादिभिः निजानन्द इति प्रसिद्धन्नामाभिहितम् ।।१३० ।।

किञ्च निजानन्दमुख्यानन्दयोरीषद्विशेषं दर्शयन् मुख्यानन्दं दर्शयति —— शान्तेति ।

**शान्ताहन्तामलस्य व्यपगतकलनस्योज्झितस्वापवृत्ते-**
**र्निष्कम्पाकारयष्टेर्गतविषयतते यत्सुखं भाति पुंसः ।**
**मुख्यानन्दस्स उक्तो घटगतसलिलस्येव शैत्यं बहिर्या**
**मात्रैस्तस्यास्ति धीरा निजसुखमिति तां सङ्गिरन्ते जगत्याम् ।।१३१।।**

निर्गताहंभावदोषस्य निरस्तवासनस्य त्यक्तनिद्राव्यामोहस्य निश्चलदेहस्य अन्तर्बाह्यविषयदर्शनहीनस्य यत् सुखमन्तर्भाति स मुख्यानन्द उक्तः । घटगतसलिलस्य कुम्भपूर्णजलस्य शैत्यं बहिर्यथा गच्छति ता एतस्याऽऽनन्दमात्रांश एव । निजानन्दः पूर्वोक्त इति कवयः सङ्गिरन्ते । अत्रैव निजानन्द एकीभूत इति यावत् ।।१३१ ।।

सर्वोऽप्यानन्दो ब्रह्मानन्दस्य मात्रैवेति ''**एतस्यैवानन्दस्यान्यानि भूतानि**

१. ''सागिरन्ते'' इति पाठः।

**मात्रामुपजीवन्ति**[1]'' श्रुतिरपि आनन्दमहिमानमुद्घोषयति। इत्यतस्तल्लाभाय महान् प्रयत्न आस्थेय इति कथयति — आसार्वेति।

**आसार्वभौमसुखमा च हिरण्यगर्भ-**
**सौख्यं शतोत्तरगुणं समुदाहृतं यत्।**
**तत्सर्वमन्तरहितस्य चिदम्बुराशे-**
**रेको हि बिन्दुरुदिते श्रुतिसारविद्भिः ॥१३२॥**

आसार्वभौमसुखं मनुष्यानन्दमारभ्य ब्रह्मानन्दपर्यन्तम् एकैकशतोत्तरगुणं समुदाहृतं ''**ते ये शतम्**[2]'' इत्यादिश्रुत्या तत्सर्वमपरिच्छिन्नस्य चिदानन्दसमुद्रस्य एको बिन्दुरेव नाधिक इति कथितः पूर्वाचार्यैर्याज्ञवल्क्यादिभिः। अतो निरतिशय-महिमा ब्रह्मानन्द इति ॥१३२॥

तन्निष्ठावतो जीवन्मुक्तस्य माहात्म्यं स्तौति — तुर्यातीतेति।

**तुर्यातीते वसेद्यो यदि परमपदे भूमिषट्कात् परस्मिन्**
**तस्यै तस्यानुभूतिर्द्रुहिणहरिमृगीधृक्शुकब्रह्मजानाम्।**
**तुल्यादिव्यानुभूत्या व्यवहृतिरपि च स्वैरिणी वृत्तितुल्या**
**तत्पादाम्भोजजातं शिरसि कुसुमवद्धारयाम्येव रेणुम् ॥१३३॥**

तुर्यातीते भूमानन्दात्मनि परमपदे परस्यां काष्ठायां भूमिकाषट्कात् पदार्थाभावनासंज्ञितात् परस्मिन्नतीते मनोवागविषये ब्रह्मणि यो महानुभावो वसेत् तिष्ठेत् तस्यैतस्य सप्तमीं भूमिं वक्ष्यमाणलक्षणामारूढस्य याऽनुभूतिः प्रसिद्धा स्तुता च —

**''निष्ठा तस्य महात्मनः सुरवरा वक्तुं मया शक्यते**
**न प्रौढेन शिवेन वा मुनिगणैर्नारायणेनापि वा॥**
**वेदेनापि पुरातनेन परया शक्त्या परेणाथवा**
**मूकीभावमुपैति तत्र विदुषां निष्ठा हि ता दृग्विधा॥**[3]''

१. बृह.उ. ४-३-३२
२. तै.उ. ३-८
३. स्क.पु. ४.९.५६



इति तया सा तुल्या समाना केषामिति द्रुहिणो विरिञ्चः हरिः वासुदेवः मृगीधृग्रुद्रः शुको वैयासकिः[1] नारदसनकाद्या ब्रह्मजाः तेषां तुल्या समाना कदाचित् समाध्युत्थितस्य तस्य व्यवहृतिरपि स्वैरिण्या कामिन्या वृत्तिसमाना। यथा कामिनी स्वप्रियं पुरुषं न विस्मरति, अयमपि तथा। तच्चरणपङ्कजसम्भूतं रेणुमपि कुसुमवत् शिरसि मस्तके धारयामि तत्प्रसादस्य ब्रह्मादिभिरप्यपेक्षितत्वात्।

**''तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः।**[2]''

**''निरपेक्षं मुनिवरं तं निर्वैरं समदर्शिनम्।**
**अनुव्रजाम्यहं नित्यं पूयेयेत्याङ्घ्रिरेणुभिः॥**[3]''

इति च स्मृतेः ॥१३३॥

प्रतिज्ञातानन्दाष्टकमध्ये विद्यानन्दस्य वक्ष्यमाणत्वाद् इतरे उक्ता एवेति दर्शयति — उक्तानीति।

**उक्तानि पञ्च हि सुखान्यपि बोधसौख्यं**
**पश्चाद् ब्रवीमि कथिते ननु पूर्वमेव।**
**आत्माऽद्वयाभिधसुखे परिपृच्छ वत्स !**
**सम्प्राप्तसंशयगणो यदि तच्छिनद्मि ॥१३४॥**

पञ्च सुखानि विषयानन्दादीनि अभिहितानि पूर्वत्रेति शेषः। विद्यानन्दं पश्चाद्वक्ष्यामि। आत्मानन्दाद्वयानन्दौ द्वावपि[4] ह्युक्तावेव। उपर्यपि सम्प्राप्तसंशयश्चेत् त्वं पृच्छ। तमपि संशयं परिहरामि तदुत्तरकथनेन निस्संदेहिनं त्वां कृतकृत्यं विधास्यामीत्यर्थः ॥१३४॥

''**इष्टं हि विदुषां लोके समासव्यासधारणम्**[5]'' इति न्यायमनुसृत्य सदादिपदानामखण्डार्थं सामान्यतो दर्शितम्। बुभुत्सुः पृच्छति — वल्लीति।

१. ''वैयासिकिः'' इति पाठः।
२. मुण्ड.उ. ३-१-१०
३. भा.पु. ११-१४-१६ (''निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम्। अनुव्रजाम्यहं नित्यं पूयेयेत्याङ्घ्रिरेणुभिः॥'' इत्यपि पाठो दृश्यते।)
४. ''द्वावपी'' इति पाठः।
५. का.सू. १.१ (''....समासव्यासभाषणम्'' इत्यपि पाठो दृश्यते। पृ. ९)

**वल्लीशस्य ममापि तात ! जगतस्संरक्षिकत्वं गुरो !**
**सत्यानन्दचितां भिदा यदि भवेदेकार्थता सा कथम् ।**
**पर्यायस्य न योग्यतास्ति विशयासक्तं मदीयं मनः**
**पूर्णं पौत्रिकवत्सदैकरसतां यायात् कथं तद्वद ॥१३५॥**

सच्चिदानन्दानां पदानां भेदो भिन्नार्थो भवेद्यदि प्रमाणग्रन्थे निरर्थकपद-प्रयोगायोगादिति न्यायेन । पदभेदेनार्थभेदोऽप्यस्तीति चेत् सा पूर्वोक्ता[1] एकार्थताऽखण्डार्थत्वं कथं स्यात् ? यदि तानि पदानि एकमर्थं समर्पयेयुस्तर्हि एकार्थवाचकत्वेन पर्यायता करपाण्यादिशब्दानामिव । पर्यायार्थता तेषां पदानां न ग्राह्या परमप्रमाणनिष्ठत्वादित्येवं संशयासक्तं मम मनः पौत्रिकं मधुमक्षिका-सम्पादितमधुसारवत् पूर्णं सत्सदैकरसतां चित्सदानन्दसामरस्यं कथं प्राप्नुयात् तद्वदेति प्रश्नार्थः ॥१३५॥

सदृष्टान्तं तेषामेव पदानामखण्डार्थत्वं कथयन् तेषां व्यावर्त्तकार्थत्वेन लक्षणार्थकत्वं च दर्शयति — शीतेति ।

**शीतस्वच्छद्रवास्ते पयसि विदधते वाचकाः किं भिदा वा**
**रक्तत्वोष्णप्रकाशाश्शिखिनि च जगतां खादिकानां च तद्वत् ।**
**जाड्यं दुःखं मृषात्वं न हि न हि पुनरित्येव वक्तुं त्रयी सा**
**सत्यानन्दप्रबोधान् कथयति सुतरां लक्ष्म तद्ब्रह्म चैकम् ॥१३६॥**

शीतमाधुर्यस्वच्छद्रवादिका जलधर्मा जलस्याभिधायका भिदां वा विदधते । लोहितोष्णप्रकाशाश्च शिखिन्यग्नौ भेदं जनयन्ति वा । तद्वदेव आकाशादिजगतां धर्मा जाड्यदुःखानृतरूपाः प्रकृत्या ब्रह्मात्मन्यारोपिता न हि भवन्ति । असंसर्गिणम् आत्मानं न सज्जन्तीति वक्तुं सा श्रुतिः ''**सत्यं ज्ञानमनन्तं ब्रह्म**[2]'', ''**विज्ञानमानन्दम्**[3]'' इत्याद्या सत्यादीन् शब्दान् ब्रह्मात्मनो लक्षणं तदितर-व्यावर्त्तकत्वेन बोधयति । तद्ब्रह्म लक्ष्यभूतमेकमखण्डमेव । तथा चोक्तम् —

---

१. ''पूर्वोक्तता'' इति पाठः ।
२. तै.उ. २-१-१
३. बृह.उ. ३-९-२८



**''मिथ्यात्वादि यदध्यस्तं ब्रह्मण्येतस्य बोधनम् ।**
**नानापदैर्विना नेति ब्रह्म तैरुपलक्ष्यते ॥[1]''** ॥१३६॥

इतराण्यपि लक्षणपदानि विज्ञानं ज्योतिरित्यादीनि अखण्डमेव ब्रह्म लक्षयन्तीति तान्यादाय दर्शयति — सत्यमिति ।

**सत्यं ज्योतिर्महत्तत्परमपदमजन्नित्यमेकं विशुद्धं**
**ब्रह्माद्वैतं तुरीयं शिवममलमनन्तं परन्निर्विकल्पम् ।**
**कूटस्थं साक्षि शान्तन्निरुपममममृतन्नामरूपादिहीनं**
**चेत्याहातन्निरासादपि विधिमुखतो वेदवाग् ब्रह्मलक्ष्म ॥१३७॥**

सत्यमनृतविरोधिरूपं ज्योतिस्तमो निवर्त्तकं महत्पूज्यं तत्सर्वात्मकं परमपदं कैवल्यस्वरूपमजं जननहीनं नित्यमविनाशि एकं भेदत्रयहीनं विशुद्धं निर्मलं ब्रह्म वृद्धतमम् अद्वैतं भेदकारणहीनं तुरीयं चतुर्थं शिवं स्वप्रकाशममलन्निर्मायम् अनन्तं परिच्छेदशून्यं परं निरतिशयं निर्विकल्पं निष्कलं कूटस्थं निर्विकारं साक्षि द्रष्टृस्वरूपं शान्तं सर्वदोषहीनं निरुपमन्निस्तुलममृतं मरणधर्मनामरूपहीनं ब्रह्म चेति । अतन्निरा-सादपि विधिमुखतः साक्षाद्विधायकवाक्यादपि वेदवाक्यं ब्रह्मलक्ष्मावोचत् ॥१३७॥

लक्ष्यवस्तुन एकत्वात् पदव्यक्तिभेदेऽप्यखण्डार्थपर्यवसानात् [2]पर्यायदोषोऽपि इत्याह — अतदिति ।

**अतन्निरासवाचकैस्स्वरूपवाचकैर्मिथः**
**समेत्य सम्यगीरितः परश्शिवस्स [3]एककः।**
**भिदा हि वाचकेषु सा न लक्ष्यवस्तुनि स्थिता**
**भवान् विधूय संशयानखण्डमेतु निश्चयम् ॥१३८॥**

---

१. वार्तिकमिदं तैत्तिरीयभाष्यादिवार्तिकग्रन्थानां स्यात्, किन्तु उपलभ्यमानेषु वार्तिकग्रन्थेषु नेदं दृश्यते । इदं हि वाक्यं ग्रन्थकारेण पूर्वमपि (कै.दी.व्या. १.६९) स्मृतम् ।
२. ''पर्यादोषो...'' इति पाठः ।
३. ''...परश्शिवस्स एकः'' इति पाठः । अस्मिन् श्लोके पञ्चचामरवृत्तमस्ति । यत्र हि प्रतिचरणं षोडश वर्णा भवन्ति । किन्त्वत्र द्वितीये चरणे पञ्चदश वर्णा एव दृश्यन्ते । अतो यदि द्वितीयचरणान्ते ''एकः'' इति पाठस्थाने ''एककः'' इति पाठः स्यात्तर्हि अर्थपरिवर्तनमन्तरा पञ्चचामरवृत्तलक्षणं सङ्गच्छते ।

अतत् अपवादपरैस्स्वरूपबोधकैश्च शब्दैस्सह स एक एव परश्शिवः परमात्मा कथितः। हि यस्मात्तस्मात् भिदा सदादिपदनिष्ठा तल्लक्ष्यभूतब्रह्मात्मवस्तुनि वर्तते। अत एव भवान् सर्वानपि सन्देहान्विधूय [१]त्यक्त्वाऽखण्डनिश्चयमेतु। कदाचिदपि इमानि पदानि अखण्डं ब्रह्म विहायाल्पवस्तुनि परिसमाप्तानीति सम्यक् निश्चयमेतु ॥१३८॥

निर्गुणमगोचरं ब्रह्म कथं वेदः किमर्थं च बोधयतीति पृच्छन् तं बोधयति — ईश इति।

**ईशे त्यक्तगुणे गुणस्य कथनं वन्ध्यासुतालङ्कृतिं**
**नो मन्यस्व बुधो न लक्ष्म कथनं [२]चेद्वेत्ति कस्सद्गुणः।**
**वेदो वक्ति सदादिलक्ष्मजनतामुक्त्यै प्रबोधाप्तये**
**सत्याद्या न पुनः गुणास्स त इमे किन्तु स्वरूपन्निजम् ॥१३९॥**

स्वभावत एव निरस्तगुणे परमेश्वरे परमात्मनि गुणस्य धर्मजातस्य कथनं वन्ध्यासुतालङ्कारप्रायमिति न मन्यस्वाकलय, सगुणोपासनेषूपयोगात्। किञ्च निर्गुणेऽपि तस्मिन् लक्षणकथनं नोक्तं चेत् श्रुत्या को वा मुमुक्षुः पुरुषः तद् ब्रह्म वेत्यवगच्छति। लक्षणप्रमाणाभ्यां हि वस्तुनः स्वरूपं विज्ञातव्यमिति। त्वं च सद्गुण अत एव वेदोऽपि परमसुहृद् भूत्वा मुमुक्षुजनमुक्त्यै तत्साधनप्रबोधाप्तये च ब्रह्मस्वरूपलक्षणं वक्ति ''**सत्यम्**[३]'' इत्यादि। यतः सत्याद्याश्शब्दा न गुणाः धर्मवाचकाः किन्तु निजं स्वरूपं प्रत्यगभिन्नं ब्रह्म समर्पयन्तीति। तथाप्युक्तम् —

**''आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः।**
**अपृथक्त्वे च चैतन्यात् पृथगिवावभासन्ते ॥**[४]'' इति ॥१३९॥

एतावदुपदेशेनाविर्भूतां स्वानुभूतिं कथयन् शिष्यः स्वाभिमतं गुरौ विज्ञापयति — व्यामोहेति।

१. ''त्यक्ता...'' इति पाठः।
२. ''चेद्वेस्ति'' इति पाठः।
३. तै.उ. २-१-१; छा.उ. ७-१६; बृह.उ. ५-५-१
४. पं.पा., पृ. ४



**व्यामोहाख्यमहान्धकारपटली चण्डार्ककोट्याकृते**
**त्वेकाखण्डविलीनमानसमहं मां ज्ञातवाश्चिन्नभः।**
**वेदोदीरितलक्षणेन सरसक्षोणीरुहे शल्यवद्**
**दाढ्यार्थं मनसो विधस्व [१]विपुलानूहान् महत्सम्मतान् ॥१४०॥**

चित्तकालुष्याभिधमहातमःपुञ्जभञ्जनचण्डभानुसहस्ररूपगुरो! एकस्मिन् अखण्डे ब्रह्मणि [२]विलीनहृदयमात्मानश्चिन्नभश्चिदाकाशस्वरूपं विदितवान् वेदोपदिष्टलक्षणार्थविचारादिनैव। तथापि रसवद्भूरिह प्रवेशितशल्यवत् मनसो दाढ्र्याय प्रारब्धक्षयपर्यन्तं निवासनतया ब्रह्मण्येव मनसोऽवस्थानाय महत्सम्मतान् पूर्वाचार्यैर्दर्शितानूहान् युक्तिविशेषान्[३] प्रदर्शितयुक्तिविशेषान् श्रवणमात्रेण निर्विकल्पसमाधिसुखप्रदान् अनुग्रहात् पुनरपि कथय। नाहं तत्र तृप्तिं प्राप्स्यामीति प्रश्नार्थः ॥१४०॥

सदादिपदानां यदखण्डार्थता प्रतिपादिता तत्रोपपत्तिं दर्शयति द्वाभ्याम् — सदिति।

**सत्स्यादेव चितिर्न चेदपि मृषा तत्साक्षिकं किं भवेत्**
**चित्सत्यं भविता न चेदपि जडन्तस्य स्थितिर्न क्वचित्।**
**स्यातां भानसती यदि प्रमिलिते तत्प्रेमपूर्णं भवे-**
**दूहानामिदमेव बीजमपि चेन्नात्मानुभूतिर्न हि ॥१४१॥**

सदेव सत्तैव चितिश्चैतन्यं तत् स्याच्चेत् सदभिन्नमसन्मृषा सदन्यस्य असत्यत्वनियमादेव चिन्मृषा भवेद्यदि तत्साक्षिकश्चैतन्यविलक्षणस्य जडत्वनियमेन द्रष्टृत्वायोगाच्चिच्चैतन्यमेव सत्यं सद्रूपम्। सत्यं च चैतन्यं तत् चेत् सज्जडं जडत्वात् क्वापि स्थितिः प्रतिष्ठा न भवेत्। तस्मात् भानसती भानं चैतन्यं सत्सत्ता चेद् द्वे यदि एकरूपे तत्प्रेमापरिच्छिन्नं सुखं च सर्वेषामपि युक्तिविशेषाणामिदं कारणम्। अन्यथाऽखण्डार्थात्मानुभूतिर्न हि स्यात् ॥१४१॥

१. ''विपुला महत्सम्मतान्'' इति पाठः।
२. ''विलीनहृदयमामात्मान'' इति पाठः।
३. ''युक्तिविशेषान् वियत्स्वमहत् प्रदर्शित...'' इति पाठः।

किञ्च —

**यद्भानन्नित्यमेतत्सत इह निजतस्स्वाऽन्यतो वेति वाचा**
**तस्मिन्नुक्ते परस्मादिति तदसत्सच्च वा यद्यसत्स्यात् ।**
**वन्ध्यापुत्रोऽर्थकारी किमु भवति जडप्रज्ञतच्चेदसत्यं**
**नोत्सन्ना सानवस्था भवगतबहुतर्कोऽर्थनानाविकल्पः ॥१४२॥**

इह सदादिपदार्थाखण्डरसे सतः यन्नित्यं भानमभिहितं तत्स्वतः परतो वेति वाचा उक्ते तस्मिन् परस्मादन्यस्मादेवेति यन्मतं तदसत्तुच्छम् । सतः भासकं तद्भानं सद्वाऽसद्वा ? सदेव चेत्तस्य भानरूपता सच्चेत्तर्हि वन्ध्यापुत्रोऽप्यसन् अर्थक्रियाकारी भविष्यति । तच्च भानमसत्यं चेत्तर्हि अबाधितानवस्था तदन्यस्य सतः कल्प्यत्वप्रसङ्गेन तदप्यन्येन तदप्यन्येनेति सद्भानविषयानवस्था मूलक्षयकरी स्यात् । संसारगोचरबहुतर्कसम्भूतबहुविधविकल्पश्च स्यात् । अतः आगमगम्येऽर्थे तदनुकूलयुक्तिरेव ग्राह्यकाऽशुष्कतार्किकयुक्तय इत्यर्थः ॥१४२ ॥

आत्मनस्सच्चिद्रूपत्वे स्वानुभूतिरप्यस्तीति दर्शयति — श्रुतिमिति ।

**श्रुतिं युक्तिं युक्तामिव तव वदेयं ह्यनुभवं**
**सुखावस्था सुप्तावपि चितिसती स्वेन हि पृथक् ।**
**क्षये सुप्तावेकस्त्वमपि तिमिरं पश्यसि यतः**
**समालोच्येत्थं स्यान्निजहृदि सदैको गतमलः ॥१४३॥**

श्रुतिं युक्तां योग्यतोपपन्नां युक्तिमबाधितविषयामनुभवं च वदेयम् । सुप्तौ सुषुप्तिसमये सुखावस्थैव सुखरूपेणैवावस्थानं स्थितिरात्मनो दुःखकारणद्वैतप्रतीतेः तत्राभावात् । सद्भाने च स्वे आनन्दरूपात्मनो भिन्नेन विलक्षणभूते ''योऽहं सुख्यासम्'' इति परामर्शात्सुप्तौ क्षये प्रलये[1] च त्वमेवैकः परिशिष्टः । तमस्तिमिरं सुषुप्तं प्रलयकालीनञ्चावलोकयसि । अतस्त्वमेव सर्वं सत्त्वं चित्त्वमानन्दस्वरूपत्वञ्च । सम्यगालोच्य स्वे हृदि सदा सर्वदैकः एकरसः गतशङ्कामलश्च भव ॥१४३ ॥

---

१. ''प्रलय'' इति पाठः ।



अनन्तरं शिष्यस्य समाध्यवस्थामभिनयेन दर्शयति — नानेति ।

**नानाशास्त्रविदो गुरोस्तु वचनं यद्वत्तथा स्वानुभू-**
**त्यानन्दन्बहुपुष्पसम्भवमधुप्रायं स सच्चित्सुखम् ।**
**लब्ध्वैकं परमार्थमेष नयने सम्मील्य तिष्ठन् सुखी**
**यर्ह्येवं बहिरीक्षिता बहु जगच्चित्रैकवस्त्रोयऽभवत् ॥१४४॥**

सर्वज्ञस्य शास्त्रार्थपरिज्ञानवतः गुरोराचार्यस्य यथा वचनं तद्वदेव स्वानुभूत्या च नन्दन् हृष्यन् बहुपुष्पसम्भवमधुप्रायं बहुकुसुमसञ्चितमधुरसप्रायं सच्चिदानन्दरसं लब्ध्वा तदेव परमार्थं ज्ञात्वा स एष शिष्यः एकान्ते उपविश्य नयने च सम्मील्य अर्धोन्मीलितलोचनो भूत्वा सुखी तिष्ठन् सुखासनमारूढः । यद्वा सुखी चिरकालं ब्रह्मनिर्वाणसुखम् अनुभवन् यर्हि यदा बहिर्दृष्टिरीक्षिताऽभूत् तदा सर्वजगद्विभ्रमचित्रस्याधाररूपाऽभूत् । मय्येव सर्वजगच्चित्रं भातीति ज्ञातवान् ॥१४४ ॥

एवं निर्विकल्पसमाधिपर्यन्तचित्तविश्रान्त्यनुभवात् स्वयं कृतार्थोऽपि जीवन्मुक्तिपर्यन्तं साधनं सम्यगनुष्ठितमपि तुर्यातीतपदबुभुत्सुः पृच्छति — मच्चेतस्स्थितेति ।

**[1]मच्चेतस्स्थितसद्गुरो ! परमतो मुक्त्वा विनोदन्त्विम-**
**न्नास्माकं विधिरस्ति कश्चन सतां तच्चिन्तनं तत्कथा ।**
**स्वाभावीत्युदितेव यत्प्रथमतः प्रोक्तं प्रमुख्यं त्वया**
**तुर्यातीतपदन्तदीयगतिमप्याख्याहि दार्ढ्याय मे ॥१४५॥**

[2]मन्मनोमन्दिरप्रतिष्ठसद्गुरो ! तच्चिन्तनं तत्कथनम् इत्युक्तलक्षणं वक्ष्यमाणाभ्यासरूपं परं विनोदं श्रमाद्यभावात् विनोदरूपमिमं प्रश्नप्रतिवचनकालक्षेपं विना नास्माकम् औपनिषदां विधिरन्योऽनुष्ठेयो विद्यते । यतस्सतां ब्रह्मभूतानां विदुषां तच्चिन्तना तत्कथा तत्प्रसङ्गा स्वाभाविकीत्युदिता । यत् प्रथमतः पूर्वं तुर्यातीतपदमुक्तम् । सप्तमीं भूमिकां तुर्यं च तदतीतं च पदं च विद्वद्भिः पठ्यते ज्ञायत इति पदं तदीयगतिमपि तदवस्थां च दार्ढ्याय पुनरप्याख्याहि । सङ्गृह्योक्तं

---

१. ''मच्चेतस्थितसद्गुरो'' इति पाठः ।
२. ''मन्मनोमन्दिरं प्रतिष्ठसद्गुरो'' इति पाठः ।

विस्तरेण प्रतिपादयेत्यर्थः ॥१४५॥

अधर्मोऽपि जिज्ञास्यः परिहारायेतिवत् ज्ञानभूमिकाप्रश्नागतं प्रासङ्गिकम् अज्ञानभूसप्तकं च कथयति — ऊहेति।

**[१]ऊहैर्क्लृप्ते विचारे परिगणितमबोधाख्यभूसप्तकं बो-**
**धाख्यं भूसप्तकं तच्छ्रुतिवचनपरैरुच्यते पूर्वमादौ।**
**बीजाख्यं जाग्रदेकं हि[२] पुनरपि तथा जाग्रदन्यन्महान्यो**
**जाग्रत्स्वप्नश्च सन्ध्यं पुनरपि च तथा स्वप्नजाग्रत्सुषुप्तिः ॥१४६॥**

ऊहैर्युक्तिविशेषैरुपनिषद्वाक्यार्थविचारे क्लृप्ते पूर्वमध्यारोपवत् अबोधाख्य-भूसप्तकमज्ञानभूसप्तकं परिगणितं ज्ञानभूसप्तकं च श्रुतिवचनपरैरागमवाक्यार्थ-सम्प्रदायविदाचार्यैर्वसिष्ठादिभिः तदुच्यते। तत्रादौ पूर्वं भूसप्तकं बीजाख्यं जाग्रद्बीजजाग्रदित्येका भूमिका जाग्रद् द्वितीया महाजाग्रत् तृतीया जाग्रत्स्वाप्नः चतुर्थी सन्ध्यं स्वप्नः पञ्चमी स्वप्नजाग्रत्षष्ठी सुषुप्तिस्सप्तमीत्येवं सङ्ख्याता ज्ञानभूमिकाः ॥१४६॥

ता एवार्थतः कथयति द्वाभ्याम् — चैतन्यमिति।

**चैतन्यं पूर्णबोधात्प्रथममुदयवद्यच्च तद्बीजजाग्रद्**
**बीजाङ्कुरप्रनाडीवदुदयमयतेऽहङ्कृतिर्जाग्रदेतत्।**
**तीव्राहन्ताममत्वोद्भवमृतिमिलनं तन्महाजाग्रदुक्तं**
**जाग्रत्स्वप्नो हताहङ्कृतिपरिमिलनाद्यन्मनोराज्यमत्र ॥१४७॥**

पूर्णबोधात्परिपूर्णसच्चिदानन्दस्वभावाद् ब्रह्मात्मनः प्रथममादौ यच्चैतन्यं विज्ञानमुदयवद् उद्गतमभवत् तदेव बीजजाग्रदित्युच्यते। समष्टिव्यष्टिप्रपञ्च-बीजत्वादेव बीजाङ्कुरक्रमवत् पूर्वम् अविद्यमानकल्पाहङ्कृतिरुदयमाविर्भावं प्राप्नोतीति यत्तज्जाग्रदित्युच्यते। रजस्तमोविकारत्वेन तीव्राहङ्कारममकारसञ्जात-

१. ''ऊहैर्क्लृप्तेर्विचारे'' इति पाठः।

२. ''...जाग्रदेकं पुनरपि...'' अस्मिन् श्लोके स्रग्धरावृत्तमस्ति। किन्तु तृतीयचरणे स्रग्धरावृत्त-पूर्णार्थम् एको वर्णो न्यूनोऽस्ति। अतः तदर्थम् एको ह्रस्ववर्ण आवश्यकः, इत्यतः अत्र ''हि'' इति कल्पयितुं शक्यते। अतः अत्र पाठः ''जाग्रदेकं हि पुनरपि'' इति स्यात्।



जन्मजरामरणादिसम्प्रयोगो महाजाग्रत्। महाहङ्कृतिपरिमिलनात् नष्टाहङ्कारा-ध्यासात् अत्र हृदि यन्मनोराज्यक्लृप्तो मनोराज्यकरणं तज्जाग्रत्स्वप्नः ॥१४७॥

किञ्च —

**एष स्वप्नो हि भुक्त्वा स्वप्नपदञ्जुषो या मनोराज्यक्लृप्ति-**
**र्जाग्रद्दृष्टं पुरा यत्स्मरणमपि पुनः स्वप्नजाग्रत्तदुक्तम्।**
**सुप्तिर्गाढान्धकारा वृत्तिरिह कथिता ज्ञानभूमिः पुनस्त्वं**
**ज्ञानाख्यां भूमिमेतां भवविलयकरीं वच्मि वेदैकगीताम् ॥१४८॥[१]**

भुक्त्वाऽऽशयस्थानमश्नादिकमाश्रितस्य इन्द्रियार्थानगृह्णतः सुषुप्त्यवस्थाम-प्यनापन्नस्य या मनोराज्यक्लृप्तिर्जाग्रद्वासनया पूर्ववन्मानसो व्यापारः स एव हि स्वप्नः। पुरा पूर्वं जाग्रदवस्थादृष्टं श्रुतं वा वस्तु पुनस्स्मरणं स्वप्नजाग्रत्। गाढान्धकारावृत्तिरेव गाढान्धकारवद्वा वृत्तिः सुषुप्तिस्सम्प्रसादावस्था चेति अज्ञानभूमिका सप्तविधेति कथिता। अनन्तरमेतां वक्ष्यमाणां ज्ञानभूमिकां सप्तविधां संसारनिवृत्तिकरीमत एव वेदैकप्रतिपादितां स्तुतां वच्मि शृण्वित्यर्थः ॥१४८॥

ता एव ज्ञानभूमीस्सङ्ख्यातः कथयति — अत्रेति।

**अत्राद्या हि शुभेच्छा विचारणाद्द्वितीया तृतीया च।**
**तनुमानसी[२] चतुर्थी सत्त्वापत्तिरसंसक्तिनामा च ॥१४९॥**

अत्र प्रतिज्ञातभूसप्तकमध्ये आद्या शुभेच्छा शुभवस्तुप्रेप्साया[३] एव तल्लाभोपायप्रवर्तकत्वादस्या आद्यत्वम्। विचारणा ब्रह्मज्ञानविचारः द्वितीया। तनुमानसी वासनाद्युपरमात् बुद्धेस्तनुत्वं तृतीया भूः। सत्त्वापत्तिब्रह्माद्वितीयम् आत्मस्वरूपं चेति तत्त्वज्ञानोदयाविद्यानिवृत्तिपूर्वकचतुर्थी। असंसक्तिनामा निस्सङ्गकेवलब्रह्मावस्थितिः पञ्चमी। सुषुप्ताविव नामरूपाद्यप्रतीतिः षष्ठी ॥१४९॥

अत्र प्रकारान्तरमाह —

१. अत्र स्रग्धरावृत्तमस्ति किन्तु प्रथमचरणे वर्णानां विंशतिरस्ति, तस्मात् छन्दोभङ्गः सम्भाव्यते अस्मिन् श्लोके।

२. ''तनुमानसि'' इति पाठः।

३. ''वस्तुप्रेप्सया'' इति पाठः।

**सा पञ्चमी तु षष्ठी पदार्थाभावना तुरीया ।**
**भूसप्तमी सुधीन्द्रैरेवं कथिता निबोधैताः ॥१५०॥**

असंसक्तिः पञ्चमी पदार्थाभावना सुषुप्तवन्नामरूपविस्मृतिः षष्ठी तुर्या । तिसृभ्यः अवस्थाभ्यो विलक्षणत्वाच्च तुर्या सैव तुर्यातीतेत्यपि कथ्यते । सुधीन्द्रैः पूर्वाचार्यैरेवं पूर्वोपदर्शितरीत्या सप्तभूमिका कथिता । एता एवार्थतो निबोध । एतासां जयाय तत्तात्पर्यमुच्यमानं शृणुष्वेत्यर्थः ॥१५०॥

चतसृणां भूमीनां तात्पर्यार्थमनेन दर्शयति — दुष्टमिति ।

**दुष्टं सङ्गमुपेक्ष्य या परशिवज्ञाने शुभेच्छारति-**
**र्ब्रह्मज्ञैस्सह बोध्यशास्त्रसतताभ्यासो विचाराभिधा ।**
**सम्प्रोक्ता तनुमानसीति मुनिभिस्सर्वेषणावर्जनं**
**सत्त्वापत्तिरियञ्च भूत्रितयकाऽभ्यासेन तत्त्वोदयः ॥१५१॥**

प्राकृतं सर्वमपि वैषयिकं सङ्गं त्यक्त्वा परशिवस्य परमात्मनः ज्ञाने या रतिरत्यादरः सा शुभेच्छेत्युच्यते । ब्रह्मज्ञैः ब्रह्मविद्भिस्साकं शास्त्रस्य उपनिषत्प्रमाण-रूपस्य सन्तताभ्यासो दीर्घकालनैरन्तर्यसत्कारपूर्वकः प्रयत्नविशेषो विचाराख्यः । सर्वसङ्गत्याग एव तनुमानसी वासनादिसङ्कोचहेतोस्तृतीया भूमिः । भूत्रितयकाभ्यासेन प्रदर्शितभूमिकात्रयाभ्यासपरिपाकक्रमेण तत्त्वज्ञानोत्पत्तिः चतुर्थी ॥१५१॥

अविशिष्टभूमिका अर्थतोऽनुक्रामति — तत्त्वेति ।

**तत्त्वासक्तहृदोऽप्यभानमसतां प्रोक्ता त्वसंसक्तिका**
**स्वानन्दस्फुरणा त्रिपुट्यनुदये भावः पदार्थस्य हि ।**
**ब्राह्मैकस्थितिरेव मौनरसिकैस्तुर्येति सा गीयते**
**तुर्यातीतपदेति पूर्वमुदितामेतां शृणुष्वाधुना ॥१५२॥**

ब्रह्मावेशितमनसः विवेकिनः असतां नामरूपविकाराणाम् अर्धनिद्रालोरिव अभानमप्रतीतिः सामान्यप्रतीतिर्वाऽसंसक्तिसंज्ञा पञ्चमी भूमिः कथिता । स्वात्मा-नन्दाविर्भावात् त्रिपुट्यनुदयः त्रिपुटीग्रहणाभावः पदार्थाभावः षष्ठी ब्रह्मैकस्थितिः । भूमानन्दपर्यवसानमेव मौनरसिकैः सौषुप्तमौननिष्ठैस्तुर्येति सप्तमी गीयते । भूमिकापूर्वं तुर्यातीते वसेद्यद्यः इति उदितामुक्तां तामप्यत्र वक्ष्यमाणां शृणुष्व ॥१५२॥



पदार्थाभावनाभिधषष्ठ्याः भूमेस्तुरीयत्वाभिधाने हेतुं दर्शयति — पूर्वेति ।

**पूर्वासां त्रितये भुवाञ्जगदुदेत्येतद्धि जाग्रत्ततः**
**स्वप्नस्तुर्यभुवि प्रपञ्चविभवः सुप्तः पुनः पञ्चमी ।**
**अत्याश्चर्यनिजानुभूतिबलतष्षष्ठी तुरीया स्मृता**
**पश्चात्कल्पनहानतो मुनितयातीतं ब्रवीति श्रुतिः ॥१५३॥**

पूर्वासां भुवां त्रितये शुभेच्छादितनुमानसान्ते नामरूपाद्यात्मकजगत्प्रतीतिः अस्ति । भूत्रितयजाग्रदिति सत्त्वापत्यभिधे चतुर्थस्थाने प्रापञ्चिकानुभवस्सर्वोऽपि स्वप्नतुल्य इति स्वप्न इति कथ्यते । पञ्चमी भूमिरर्धसुषुप्तिरिवातः मनसः सङ्गलेशाभावात् असंसक्तिरिति कथ्यते । निरतिशयस्वानन्दानुभूतिनिर्भरा षष्ठी गाढसुषुप्तितुल्या तुर्येति कथ्यते । ''**सर्वविकल्पहानात् मौनेन च**[१]'' श्रुतिरपि सप्तमीं भूमिं तुर्यातीतपदं प्रतिपादयति ।

''**सा हि वाचामगम्यत्वादसत्तामिव शाश्वतीम् ।**
**नैरात्मसिद्धान्तदशामुपयातेव शिष्यते ॥**[२]'' इति वचनात् ॥१५३॥

उक्तमर्थं बुध्यारोहाय प्रपञ्चयन् मतभेदहेतुं दर्शयति — तुर्येति ।

**तुर्यस्थानस्य तुर्योत्तरपदकथने योग्यतां संशयाना**
**विद्वांसस्सामिसुप्तिं पुनरपि दधते पञ्चमीं योगसुप्तिम् ।**
**षष्ठीमेतत्पुनस्त्वं हृदि परिकलयन् आस्व भूयः प्रवक्ष्ये**
**भूमीनां ज्ञाननाम्नां विबुधपरिगता ये प्रभेदा हिताश्च ॥१५४॥**

तुर्यपदस्य तुर्यातीतत्वप्रतिपादने योग्यत्वं संशयानाः वाङ्मनोविषयातीत-स्थितिबोधनमशक्यं मन्वाना[३] विद्वांस एव पञ्चमीं सामिसुप्तिम् अर्धसुषुप्तिं षष्ठीं गाढसुषुप्तिं प्रतिपादयन्ती सम्प्रदायानुसारेणैव निरूपयन्ति । एतत्तुर्यातीतपदं हृदि विमर्शन् जितं स्थानमुपेक्ष्य उत्तरमुत्तरमवलम्बमानस्तिष्ठस्व । भूयोऽप्यहं तवस्थिति-दार्ढ्याय ये विशेषाः पूर्वाचार्यैः प्रमाणतो विदिताः तान्वक्ष्ये शृणुष्वेत्यर्थः ॥१५४॥

---

१. बृह.उ.(?) ३-५-१ (अत्र ''मौनं च'' इति पाठः उपलभ्यते ।)
२. सं.उ., १-२८ (उपनिषत्सङ्ग्रहे ''...नैरात्मसिद्धात्मदशा...'' इत्यपि पाठो दृश्यते ।)
३. ''मन्वना'' इति पाठः ।

पूर्वपूर्वभूमिष्ववस्थितानुत्तरोत्तरमारुरुक्षूनवेक्ष्यारूढत्वव्यवहारेऽपि किञ्चिद्विशेषं दर्शयति — ये पूर्वेति ।

**ये पूर्वत्र गताविरूढिमथिते भूमित्रयेऽभ्यासिनो**
**मुक्तास्ते चरमत्रयेषु च वरा वर्या वरिष्ठा इति ।**
**जीवन्मुक्तशरीरिणो विद इति प्रोक्ताश्चतुर्थीं गता**
**भूयो ज्ञानभूवां वदामि विभवं सम्यक् शृणुष्वादरात् ॥१५५॥**

पूर्वत्र भूत्रितये विरूढिं गता भूत्रितयमप्यारूढा अभ्यासिनः[१] आरुरुक्षव एव चरमत्रयेषु असंसक्तिप्रभृतिषु अस्थितास्ते जीवन्मुक्ता[२] एव वरा वरीयांसः वरिष्ठा इति च कथ्यन्ते । ते जीवन्मुक्ताश्च ''**शरीरिणश्च सचक्षुरचक्षुरिव**[३]'' इत्यादि-श्रुतिप्रतिपादितमहिमानस्सत्त्वापत्ति-अभिधामारूढा ब्रह्मविदो ज्ञानिनः । भूयोऽपि ज्ञानभूमिकामाहात्म्यं वदामि । त्वं च शृणुष्वेति यावत् ॥१५५॥

ननु भूमिकाविषये आरुरुक्षुत्वादीयत्ताभावेऽनादर एव स्यादित्याशङ्क्य महाफलभोगान्मैवमिति दर्शयति — सत्त्वेति ।

**सत्त्वापत्तिपुरातनेषु च पदेष्वभ्यासिनो ये नराः**
**ते मृत्वा शनकैर्महत्सुखजुषो मुक्तिं परां प्राप्नुयुः ।**
**आशाघोरभवे पतेयुरथ ते नागुश्शुभेच्छामपि**
**प्राप्तं चेत्परमं पदं करगतां जानाहि मुक्तिं मुने ! ॥१५६॥**

सत्त्वापत्त्यभिधचतुर्थभूमेः प्राचीनभूमिषु ये नरा वर्त्तन्ते त एवाभ्यासिनः मृत्वा शरीरं त्यक्त्वा प्राक् ज्ञानोत्पत्तेः शरीरनाशमासाद्य शनकैर्महत्सुखजुषो ब्रह्मादिपदेषु पुण्यफलमनुभूय सत्कुले लब्धजन्मानः क्रमेण परां मुक्तिं लभेयुरेव । ''**प्राप्य पुण्यकृतां लोकानुषित्वा**[४]'' इत्यादिभगवद्वचनाद् आशाघोरभवे रागादिक्लेशसंसारसागरे न मज्जेयुः । यतः प्रायेण जनाः शुभेच्छामपि नागुः ।

१. ''अभ्यासिनो'' इति पाठः ।
२. ''जीवन्मुक्त'' इति पाठः ।
३. ब्र.सू.शां.भा. १-१-४ पृ. १५२
२. भ.गी. ६-४१



''**ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।**
**महाभयपरित्राणाद्विप्राणामुपजायते ॥**[१]'' इति स्मृतेः ।

परमं मुक्तिसाधनं पदं शुभेच्छाख्यं प्राप्तं लब्धं चेत् हस्तगतां मुक्तिं कैवल्यं जानीहि । ''**न हि कल्याणकृत्कश्चिद् दुर्गतिं तात ! गच्छति**[२]'' इति दर्शनात् । हे मुने ! इति त्वं च मुनिः ''**यं विदित्वा मुनिर्भवति**[३]'' इति वचनेन समधिगतज्ञान एवातस्त्वं मुक्त एवेत्याशयः ॥१५६॥

नात्र प्राकृतवर्णाश्रमादिक्रमाद्यपेक्षेति प्रमाणयति — अस्यामिति ।

**अस्यां ये भुवि योगभूमिषु नराः पूर्वाद्वितीयां च वा**
**प्राप्ताश्चेदधमाधमा अपि भृशं मुक्ताश्शपे श्रीगुरौ ।**
**ये वाक्ये कृतसंशयाः पुनरमी भ्रष्टाः श्रुतिर्नो मृषा**
**ब्रह्मैवाहमिति स्थिरो भव महावाक्योक्तरीत्या सदा ॥१५७॥**

अस्यां भुवि कस्मिन् प्रपञ्चे योगभूमिषु पूर्वोक्तासु पूर्वां शुभेच्छां द्वितीयां विचारणाख्यां वा प्राप्ता जनास्तेऽधमाधमा म्लेच्छा [४]नीचादयोऽपि भृशं मुक्ता नात्र सन्देहः कार्यः । श्रीगुरौ शपथमहं करोमि । ये वाक्ये श्रुतिगणे कृतसंशयाः ते पुनरमी भ्रष्टाः पुरुषार्थात् श्रेयोमार्गात् । यतः श्रुतिः कदापि मृषा मिथ्या न[५] भवति । ''**न हि वेदविहितं किञ्चिदकर्त्तव्यतामियात्**[६]'' इति न्यायात् । अतः अहमेव तत्परं ब्रह्म इति स्थिरो भव । स्वे पदे परिनिष्ठितो भव । महावाक्योक्तरीत्या तत्त्वम्पदार्थलक्ष्यप्रत्यग्ब्रह्मतादात्म्यानुभूतिबलेन कृतार्थो भवेत्यर्थः ॥१५७॥

ननु ''**तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन**[७]'',

१. अ.गी. १-१
२. भ.गी. ६-४०
३. बृह.उ. ४-४-२२ (''तमेव विदित्वा मुनिर्भवति'' इति पाठो दृश्यते । पृ. ३७०)
४. ''निचादयोऽपि'' इति पाठः ।
५. मूले ''न'' इति पाठो न दृश्यते । परमत्र अर्थानुरोधात् ''न'' इति पाठः अत्र स्यात् ।
६. ब्र.सू.शां.भा. २-१-२२ (?)
७. बृह.उ. ४-४-२२

''**वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः**[१]'' इति श्रुतयः ''**वर्णाश्रमाचारवता पुरुषेण**[२]'' इत्यादिस्मृतयश्च क्रमाद्वर्णिभिराश्रमिभिश्च ज्ञानाधिकृतैर्भवितव्यमिति वदन्ति। तथा सति नीचानामपि कथम् अत्र मुक्तिसिद्धिरित्युच्यते ? विरुद्धं च लोकशास्त्रयोरेतदित्याशङ्कते — म्लेच्छेति।

**म्लेच्छानामपि योगभूमिरुदिता मुक्तिप्रदेति प्रभो !**
**दत्तं तण्डुलवत्त्वया निजपदं मे शालिवज्जन्मिनः।**
**ये दारात्मजगेहभोगविमुखास्संन्यासिनस्तान् पुन-**
**र्ज्ञानाद्धाऽधिकृतान्वदन्ति कतिचित्तत्संशयञ्छिन्धि मे ॥१५८॥**

म्लेच्छानामसंस्कृतानामपि योगभूमिर्ज्ञानभूमिस्सञ्जाता चेत् मुक्तिप्रदैवेति चेत् ज्ञानफलभूता या मुक्तिरपाक्षिकफलत्वेन नीचानामपि कैवल्यं ज्ञानयोगात् सिध्यतीति चेत् तत्र पृच्छामि शालिवत् व्रीहिबीजवत् जन्मिनो मे त्वया करुणया निजपदं तण्डुलवत् दत्तं पञ्चकोशतुषापनोदनेन तण्डुलवज्जन्मबीजमज्ञानं भवता निवारितम्। ये पुत्रदारगृहाद्यासक्तिहीनाः संन्यासिनः परमहंसाः तानेव ज्ञानमार्गाधिकारिणः कतिचिदाचार्याः ''**त्वम्पदार्थविचाराय संन्यासः सर्वकर्मणाम्**[३]'' इत्यादिवचनानि च वदन्ति। तत्सन्देहं छिन्धि विनाशय ॥१५८॥

वैराग्यमेव संन्यासपुष्कलकारणं न वेषभाषादिकमिति परिहरति — स्थान इति।

**स्थाने ते विशयः शृणुष्व कथये वत्साद्यमोक्षाप्तये**
**यत्सन्न्यासचतुष्टयन्निगदितं तत्रापि भेदा इमे।**
**आद्यो यस्स कुटीचकः किल बहूदाख्यश्च हंसः परो**
**हंसश्चेति हि हेतुरत्र विरतिन्न्यासो न वेषः किल ॥१५९॥**

तवायं विशयसंशयस्थाने युक्त एवेत्यर्थः। तन्निर्णयं वक्ष्यमाणं शृणुष्व इदानीमिदं वदामि। भो वत्स ! मोक्षाप्तये मोक्षसाधनतत्त्वज्ञानलाभाय यत्संन्यास-

१. मुण्ड.उ. ३-२-६, नारा.उ. १२-३, कैव.उ. ३
२. वि.पु. ३-८-९
३. उ.सा. २१९ (''तत्त्वम्पदार्थविवेकाय...'' इत्यपि पाठो दृश्यते। पृ. २५५)



चतुष्टयमाख्यातं तत्रापि भेदा इमे श्रुत्युक्ताः। संन्यासश्चतुर्विधो ज्ञेयः। तत्राद्यो नाम कुटीचकः बहूदकः हंसः परमहंसश्चेति। अत्र चतुर्विधेऽपि संन्यासे विरतिर्वैराग्यमेव कारणम्। संन्यासहेतुर्वैराग्यं ''**यदहरेव विरजेत्तदहरेव प्रव्रजेत्, गृहाद्वा वनाद्वा**[१]'' इति श्रुतिवचनदर्शनात् न वेषस्संन्यासहेतुः ॥१५९॥

संन्यासनिदानं वैराग्यमित्युक्तं तद्विभज्य दर्शयति — तिस्र इति।

**तिस्रस्ता हि विरक्तयः श्रुतिमता मन्दा च तीव्रातमा**[२]
**तीव्रा शुक्समये विरक्तिरधमा यावच्छरीरं मम।**
**स्त्रीपुत्रद्रविणादि नेति विदिता तीव्रातितीव्रा पुनः**
**सर्वं कर्मफलं मृषेति नितरां त्यागो निबोधादरात् ॥१६०॥**

विरक्तिः श्ववान्ताशनमूत्रपुरीषादाविव जायमाना विषया जुगुप्साबुद्धिर्विषयेषु अनाभोगात्मिका उपेक्षाबुद्धिर्वा विरक्तिः वैराग्यम्। सा त्रिविधा मन्दा तीव्रा तीव्रतमा चेति। तत्र शुक्समये पुत्रदारधनादिनाशकाले धिगिमं संसारं तात्कालिकी बुद्धिर्मन्दा विरक्तिरस्यां विरक्तौ संन्यासाधिकारायोगाद् अधमेत्युक्तम्। मम यावच्छरीरमस्मिन् जन्मनि शरीरवातावधिपुत्रदारादिसम्बन्धो मम मा भूदिति बुद्धिस्तीव्रा विरक्तिः कथ्यते। सर्वं कर्मफलं वारत्रिकमैहिकं ब्रह्मादिपदमपि मृषा कुत्रापि मे शरीरग्रहणं मा भूदिति मनसि सर्वत्यागो हि तीव्रतरा विरक्तिः। सा हि गुणवैतृष्ण्यं ''**तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्**[३]'' इति न्यायात् इति ॥१६०॥

तत्संन्यासहेतुकवैराग्यभेदं दर्शयित्वा मन्दवैराग्यस्य संन्यासकारणताम् अवदन् तत्संन्यासभेदलक्षणं दर्शयति — मन्द इति।

**मन्दे न्यासः कोऽपि पापेन तीव्रे**
**न्यासस्स स्याद्यः कुटीचो बहूदः।**
**निश्शक्तीनां पूर्व एव प्रक्लृप्त-**
**श्शक्त्याढ्यानामन्तिमो वेदविद्भिः ॥१६१॥**

१. जा.उ. ४-१
२. अत्र ''तीव्रतमा'' इति पाठ स्यात्। मूले छन्दस्त्वात् ''तीव्रातमान्'' इति प्रयोगः दृश्यते।
३. यो.सू. १-१६

मन्दे वैराग्ये पापे पापफलानुभवकालजन्यत्वेन क्षणिके। यद्वा पापे अशुद्धपुरुषे शुद्धेरेव वैराग्यादिजनकत्वात् तीव्रे वैराग्ये कुटीचो बहूदश्चेति द्वौ विहितौ। ''**मन्दे न्यासो न कोऽपि हि**[१]'', ''**तीव्रे न्यासद्वयं भवेत्**[२]'' इति वचनात् निश्शक्तीनां यात्रादिशक्तिरहितामाद्यस्तच्छक्तिमतां द्वितीय इति विद्वद्भिः कथितः। पराशर-स्मृतिग्रन्थेष्वित्यर्थः ॥१६१॥

क्रममागततीव्रतरवैराग्यसाधनन्यासद्वयं दर्शयति — द्वेधेति।

**द्वेधा न्यासो वर्णितश्चातितीव्रे**
**हंसो [३]हंसस्स्यात्परो हंसयोगी।**
**मुक्तिं सत्ये लोक एव प्रयाया-**
**दन्यो ज्ञानादत्र मुक्तिं लभेत ॥१६२॥**

अतितीव्रे वैराग्ये विहितसन्न्यासोऽपि द्विप्रकारो वर्णितः हंसः परमहंसश्चेति। तत्र सत्यलोक एव सञ्जातज्ञानानुभवः तत्रत्येव ''**ब्रह्मणा सह ते सर्वे**[४]'' इत्युक्तवचनानुरोधेन मुक्तिं प्राप्नुयात्। ''**स हंसो नाम तल्लोके तत्त्ववित् हंसः**[५]'' इति स्मृतेः। अत्रैव जन्मनि लोके च सञ्जाततत्त्वज्ञानात् मुक्तिं विदेहकैवल्यं प्राप्नुयात्। ''**स परमहंसो विज्ञेयः लोकेऽस्मिन् परमहंसकः**[६]'' इति स्मृतेश्च ॥१६२॥

परमहंसेऽप्यस्ति विशेष इत्याह — द्वैविध्यमिति।

**द्वैविध्यं परहंसकेति विदितं वत्स ! शृणुष्व ब्रुवे**
**जिज्ञासुः प्रथमो मतस्तदपरो विज्ञानवान् सम्मतः।**
**आद्यो भूत्रयनिष्ठितो हि चरमो जीवन्विमुक्तस्स्वयं**
**जिज्ञासुद्वितयं वदन्ति कवयस्तद्भेदमाकर्णय ॥१६३॥**

१. जी.वि. ४-८
२. जी.वि. ४-९
३. ''हंसस्यात्'' इति पाठः।
४. ब्र.सू.शां.भा. ४-३-११
५. जी.वि. (?)
६. जी.वि. १-१० (अत्र ''तल्लोके तत्त्वविद्वांसो लोकेऽस्मिन्...'' इति पाठो दृश्यते। पृ. २)



परमहंसकेऽपि आश्रमे द्विविधत्वमस्ति तदपि वच्मि शृणुष्व। तत्र जिज्ञासुरेकः परो विज्ञानवान् चेति सम्मतः। ''**जिज्ञासुर्ज्ञानवाँश्चेति परहंसो द्विधा मत**[१]'''' इति दर्शनाद्धि यस्माद्भूत्रितयेषु साधनभूतेषु स्थितः अत आद्यः जिज्ञासुः ज्ञातुमिच्छुरेव न ज्ञानी। तदन्यः जीवन्मुक्तः। जिज्ञासुविषयेऽपि केचिद् द्वैविध्यं कथयन्ति तच्च शृणु ॥१६३॥

ज्ञानमार्गे वर्णाश्रमादिक्रमः न नियतोऽस्तीत्युक्तं तदेव दृढयति — बन्धेति।

**बन्धायायकगेहसक्तिरहिताः केचिच्च विज्ञानिनां**
**जायन्ते कतिचिद्द्विजान्वयभवा भूपा विशः पादजाः।**
**ज्ञानेनैव विमुक्तिमापुरिति यद्दृष्टं च लोके श्रुतौ**
**तत्तिष्ठोज्झितसंशयश्श्रुतिगिरा युक्त्याऽनुभूत्या सुखी ॥१६४॥**

बन्धप्रदगृहाद्यासक्तिरहितास्त्यक्तैषणाः परमहंसाः केचिद्विज्ञानिनो जाताः। कतिचिद् द्विजकुलोत्पन्ना वर्णिन आश्रमिणश्च। ज्ञानिनः केचिद्राजानो जनकादयः, विशस्तुलाधरादयः, धर्मव्याधविदुरहरिप्रभृतयः पादजाः, ते सर्वेऽपि ज्ञानेनैव ज्ञानबलेनैव विमुक्तिं कैवल्यं प्राप्तवन्तः। एतच्च श्रुतौ वेदे स्मृतौ भारतादौ दृष्टस्तस्मात्त्यक्तसंशयः श्रुत्या युक्त्याऽनुभवेन च तिष्ठ। श्रुतियुक्त्यनुभूतिभ्यः अन्यत् प्रमाणान्तरं नास्त्येवेति यावत् ॥१६४॥

स्वानुभूतिं दर्शयति — उत्पत्तिरिति।

**उत्पत्तिर्मम चेन्मृतिश्च भविताऽनुत्पत्तिगन्धस्य मे**
**नैव स्यान्मृतिभाषणश्च जनिमृत्याख्यानदूरं परम्।**
**ब्रह्मैवाहमजस्थितस्तदपि मद्रूपं स्थितं नो भिदा**
**व्योमे वा ततविग्रहो ह्यनुभवानन्दामृताम्भोनिधिः ॥१६५॥**

मम निर्विकारस्याजस्यात्मनः उत्पत्तिश्चेत् स्यान्मृतिश्च विनाशश्च भविष्यति। अनुत्पत्तिगन्धस्य जन्मलेशरहितस्य मे मरणादिभाषणश्च हेयं[२] स्यात्। जन्ममरणा-ख्यातदूरं परं ब्रह्मैवाहमज एव स्थितस्तदपि ब्रह्म मद्रूपम्। अहं च ब्रह्माऽऽवयोर्न

१. वाच., २५
२. ''हेयः'' इति पाठः।

भिदा। अहश्चाऽऽकाशवत् परिपूर्णविग्रह अनुभवानन्दनिधिश्च सर्वदा भवामीत्यर्थः ॥१६५॥

अविचारजन्यस्सर्वोऽपि जगद्विभ्रमः मनोनिरोधे निवर्त्तत इति दर्शयति — मन इति।

**मनस्सङ्कल्पोत्थं जगदिदमशेषन्निवसति**
**प्रबोधेनान्यत्र स्फुटतरमुपेक्ष्यैव मनसा।**
**विचारे सङ्क्लृप्ते गगनमिव चाद्यन्तरहितं**
**परं तत्त्वं शिष्टं यदहमहमेतन्न विशयः ॥१६६॥**

मनोधर्मरूपेण सङ्कल्पेनोत्थमुत्पन्नमशेषं व्याकृतं व्याकृतनामरूपं जगत्प्रबोधे चैतन्यात्मनि तिष्ठति नान्यत्र। आरोपितस्याधिष्ठानाद् अन्यस्थित्ययोगात् कुतो मनसैव सर्वमुपेक्ष्य तत्त्वविचारे कृते आकाशमिवाद्यन्तहीनं परं यदवशिष्यते तदवशिष्टं परं ब्रह्मैवाहमहश्च ब्रह्म। नात्र संशयः ॥१६६॥

तादृग्ब्रह्मावस्थितिलाभाय उपायान्तरं दर्शयति — यथेति।

**यथा पूर्णो भूत्वा कथमनुभवेयं हि वितता-[१]**
**मिति प्रोक्तेऽवस्थास्वपि च तिसृषु त्वन्निजहृदि।**
**समुत्पन्ना वृत्तीर्मुहुरपि निषिध्यैव शनकैः**
**स्थितश्चेदानन्दो निरतिशय एव स्फुरति ते ॥१६७॥**

परिपूर्णपरमात्मस्वरूपो विततामात्मनो परिच्छिन्नतां कथमनुभवेयं यदा चेति उक्ते निजहृदि स्वान्तरङ्गे तिसृष्वप्यवस्थासु समुत्पन्ना पूर्वपूर्ववासनया नदीस्रोतोवदुत्पद्यमाना वृत्तीः क्लिष्टाऽक्लिष्टरूपा इति योगशास्त्रदर्शिता मुहुर्निषिध्य चित्तशोधनेन विहाय क्रमेण विशुद्धसत्त्वावलम्बनेन स्थितः अवस्थितश्चेदभावान्ते तव निरतिशयानन्दः ब्रह्मसुखं स्फुरति प्रकाशते ॥१६७॥

वृत्तित्यागोपायमाह — अनवरतमिति।

---

१. अत्र ''...कथमनुभवेयं वितता'' इति पाठः। पद्येऽस्मिन् शिखरिणिच्छन्दसः अस्मिन् चरणे वर्णन्यूनताऽस्ति। अतोऽत्र ''हि'' इति पदं निधाय ''कथमनुभवेयं हि वितता'' इति पाठः कर्तुं शक्यते।



**अनवरतमुदग्रावासनाभिः प्रवृत्ता**
**हृदि पुनरिह वृत्तिर्नाथ! हास्यामि केन।**
**इति भजति नृपत्वं चेत् प्रबोधो मनीषा**
**सहकरणसमूहैर्दासतां त्वं विमुक्तः ॥१६८॥**

अनवरतं सर्वदा वासनाभिश्चित्तगतधर्माऽधर्मादिसंस्कारो हि वासनाचित्ते वास्यमानत्वात्ताभिः प्रवृत्ता वृत्तिः ''अहम्''-''इदमा''द्यात्मकाः पूर्वोक्ता वा केनोपायेन हास्यामि परित्यक्ष्यामीति चेत् पृच्छसि शृणु उपायम्। प्रबोधो विवेकज्ञानं नृपत्वं चक्रवर्त्तित्वं भजति चेत् कदा मनीषा मतिः करणसमूहैस्सहभृत्यतां याति। तदानीं स्वतन्त्रस्त्वं विमुक्तो भवेः। नृपवत् स्वातन्त्र्ये सिद्धे भृत्यतुल्यकारणवशता निवर्तते। तदानीमेव ''**वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता**[१]'' इत्युक्तभगवद्वचनानुरोधिनी स्थितप्रज्ञलक्षणा जीवन्मुक्त्यवस्थितिः भवति इत्यर्थः ॥१६८॥

मनोवृत्तिनिरोधे उपायान्तरमाह — भस्त्रीरति।

**भस्त्रीवद्यमनोद्यते मरुति हृत्पद्मे निरुद्धे सुखं**
**यत्तद्वृत्तिनिरोधनामकमहायोगेन ता वृत्तयः।**
**न स्युः काश्चन तत्र चेन्न लभते चित्तं प्रतिष्ठान्न वा**
**विद्या संसृतिकारणं यदि हता लीयेत वृत्तिस्स्वयम् ॥१६९॥**

भस्त्रीवत् भस्त्रिकावत् यमनोद्यते यमनीप्रेरिते वायौ हृत्पद्मे हृदयपङ्कजे निरुद्धे रेचकादिप्राणायामाद्युपायैः प्राणनिरोधे कृते ''**योगश्चित्तवृत्तिनिरोधः**[२]'' इत्युक्तलक्षणयोगनामकसाधनेन सफलेन योगेन च ता वृत्तयो न स्युः भवेयुः। न निरुद्धत्वादेव सुषुप्त्यादाविव न भवेयुः। तत्र प्राणसंयमो मनोनिरोधश्चेत्युभौ उपायौ भवतः। तथा चोक्तम् ''**द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानञ्च राघवः**[३]'' इति। वासिष्ठे —

---

१. भ.गी. २.५८
२. यो.सू. १.२
३. ल.यो.वा. २७.७२

**''असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः।**
**इत्थं विचिन्त्य मार्गौ द्वौ जगाद परमेश्वरः॥[1]''**

इति वचनाच्च। तत्र योगानुष्ठाने ते चित्तं प्रतिष्ठामवस्थितिं न प्राप्नुवन्ति चेत् सर्वसंसारनिदानमविद्याज्ञानं यदि हता विचारजन्यज्ञानेन निवर्त्तिता हता तत्कार्यभूता वृत्तिस्स्वयमेव लीयते। बिम्बहाने प्रतिबिम्बवत् नश्येदिति॥१६९॥

संवादिभ्रमन्यायेन धारणाध्यानोपायेनापि सा निवर्त्तते इति दर्शयति — अज्ञानमिति।

**अज्ञानं कारणाख्यं कथमिव भविता संहृतश्चेदिति त्वं**
**यस्माद्वेदो न मिथ्या प्रवदति तदिहाम्नायगीतं रहस्यम्।**
**अन्तर्मत्वाहमर्थं मयि विमलपरव्योम्नि सच्चित्स्वरूपे**
**लब्धा चेद्धारणा सा स्थितिमुपलभते नैव तिष्ठेदविद्या॥१७०॥**

संसारमूलकारणमज्ञानमव्याकृतादिशब्दवाच्यमनादिभावरूपं संहृतं विनाशितं कथं भविता भविष्यति? स्वं स्वकीयं यस्मात् ''**तरति शोकमात्मवित्**[2]'' इत्यादि वेदः मिथ्या मृषार्थं कदापि न वदति। तस्मादाम्नायगीतं परमरहस्यमर्थमस्मदर्थमहंशब्दप्रत्ययालम्बनभूतं प्रत्यगेकरसं ब्रह्मेत्यन्तर्मत्वाऽन्तर्दृष्ट्या विविच्य ज्ञात्वा सच्चिदानन्दरूपे विमले निर्माये परमव्योम्नि चिदानन्दाकाशे साधारणा लब्धा प्राप्ता चेत् कदाचित्प्राप्ताऽपि स्थितिन्निष्ठामुपलभते चेदविद्या नैव तिष्ठेत् नश्यत्येवेत्यर्थः॥१७०॥

अविद्यानिवर्तकज्ञानफलभूताया मुक्तेः गुरुप्रसादोऽपि पुष्कलं कारणं दर्शयति — अहमिति।

**अहमिति वपुरेतन्मन्यमानस्त्वनेका-**
**स्वपि जनिषु निकृष्टोत्कृष्टता या ह्यवाप्ता।**
**परगुरुकृपयैषा सा मरीचिप्रवाहे-**
**ष्वधिगतसलिलाभा मां शिवं व्याप्य मुक्तः॥१७१॥**

१. ल.यो.वा. २९.६०
२. छा.उ. ७-१-३



भौतिकमिदं शरीरमहमिति मन्यमाना अनेकासु जनिषु सुरनरतिर्यक्प्रेतादिभवेषु निकृष्टता उत्कृष्टता च कर्मवशात् प्राप्ता, सैषा भ्रान्तिः परगुरुकृपयैव अचार्यकारुण्येन मृगतृष्णाभ्रान्तिरिव गता। शिवं स्वप्रकाशात्मानं मां प्राप्य ज्ञात्वा समूलात्संसारान्मुक्तः अहमित्यर्थः॥१७१॥

महाफलं च देशिकप्रसादाल्लब्धमिति तं गुरुमनुस्मृत्य स्वकृतार्थतां दर्शयति — किं वेति।

**किं वा भाग्यन्न जाने किमु सुकृतमहन्नैव जाने प्रक्लृप्तं**
**ब्रह्मानन्दाद्यतीन्द्रादपि विपुलकृपां प्राप्य मुक्तो धरण्याम्।**
**धन्यो धन्योऽस्मि धन्यो बत बत नितरां धन्यधन्योऽस्मि भूयो**
**नृत्तं कुर्वे प्रहर्षादुपरि चितिमदादाधुनोम्युत्तरीयम्॥१७२॥**

किं वा भाग्यं पूर्वजन्मसञ्चिमद्य वा सञ्चितमिति नाहं न जानामि। किं वा सुकृतं दुष्कृतं[1] सुष्ठु कृतं प्रक्लृप्तमादरादिनानुष्ठितम्। यतो ब्रह्मानन्दाभिधात् अन्वर्थनामकाद्यतीन्द्रात् निरवधिकरुणामवगम्य धरण्यामस्मिन् लोके धरण्यां भुवि मुक्तश्च ''**ब्रह्म वेद ब्रह्मैव भवति**[2]'' इति श्रुतेः। धन्योऽस्मि कृतार्थोऽस्मि अत्यादरे बहुवीप्सावताश्चर्ये नितरां नितान्तं धन्योऽस्मि प्रहर्षात्[3] परमानन्दलाभात् नृत्तं ताण्डवं कुर्वे चितिमदात् ज्ञानरसपारवश्यात् उपरि उत्तरीयमाधुनोमि॥१७२॥

मनोवागगोचरनिरतिशयब्रह्मानन्दावाप्तिः प्रसादादेव गुरोरिति तं प्रणमति — ब्रह्मेति।

**ब्रह्मात्मैक्योत्थितं यन्निरतिशयसुखं न वा वर्णयेयं**
**चेतस्यापूर्य पूर्णं सदुदितमखिलेष्वेव लोकेषु भूयः[4]।**
**आद्यन्तोन्मुक्तमित्थं गुरुरिह कृपया बोधयामास यो मे**
**वाक्यैर्वेदान्तजातैः पदकमलमहं सर्वदा तस्य सेवे॥१७३॥**

१. ''दुष्कृतम्'' इति पाठः अधिकः प्रतीयते।
२. मुण्ड.उ. २-२-९
३. ''प्रकर्षात्'' इति पाठः। अत्र मूलपद्यानुसारेण ''प्रहर्षात्'' इति पाठः स्यात्।
४. ''भूयम्'' इति पाठः।

ब्रह्मात्मतादात्म्यज्ञानं समुपजातमत एव निरतिशयश्च सुखमहं केन करणेन वर्णयेयम् ? एवं विधमिति वर्णयामि । [1]तद्वर्णनमशक्यमेवेत्यर्थः । तत्र हेतुश्चेतस्यन्तः हृदि आपूर्य बहिश्च पूर्णं सद् अखिलेषु लोकेषु उदितमाद्यन्तोन्मुक्तमित्थम्भूतं गुरुरिह मह्यं कृपया बोधयामास स्वाभाविकमिति ज्ञापयामास च । उपनिषत्प्रमाण-जातैर्वाक्यैरेव तस्याचार्यस्य पदपङ्कजं सर्वदा आ शरीरपतनात्सेवे वन्दे ॥१७३॥

इदमेव विद्यानन्द इति दर्शयति — इत्थमिति ।

**इत्थं विद्यासुखमिति मया वर्णितं भक्तियोगात्**
**एतच्छास्त्रं यदि परिचिनोत्यत्र यः कोऽपि मर्त्यः ।**
**नित्यानन्दे प्रविततपदे प्राप्य निष्ठामयत्नाज्-**
**जीवन्मुक्तो भवति यतिराट् सत्यमेवं मयोक्तम् ॥१७४॥**

इत्थम्भूतं ब्रह्मविद्यासुखमिति भक्तियोगात् परमेश्वरभक्त्या गुरुभक्त्या च यथा भानं वर्णितमनिर्वाच्यमपीत्यर्थः । तस्मादेतच्छास्त्रं साम्प्रदायिकं गुरुप्रसादकृतं न तु पाण्डित्यादिना । यः कोऽपि ब्राह्मणादिः परिशीलयति नित्यानन्दे परिपूर्णे ब्रह्मणि यत्नान्तरं विना निष्ठां प्रतिष्ठां प्राप्य जीवन्मुक्तो भवति । यतिराड् यतीनामपि राजा सम्प्रदायप्रवर्त्तको गुरुर्भवति । मयोक्तमेतत्सत्यम् अव्यभिचारिश्रुतिसिद्धम् इत्यर्थः ॥१७४॥

एतत्प्रकरणज्ञानात् सर्वज्ञोऽपि भवति पूज्यश्चेति दर्शयति — वाक्ये इति ।

**वाक्ये छान्दोग्यगामिन्यपि किल सदसीत्येव यद्घुष्यते तत्**
**त्वच्चैतन्यं तुरीयं त्वनुभवति जनश्शास्त्रतो यो विदित्वा ।**
**मुक्त्वा सन्देहजातन्निरतिशयसुखं निर्विकल्पन्निरीहं**
**ब्रह्म प्राप्यानुभूतिं स तु भजतितरां पूज्यते सर्वदैकः ॥१७५॥**

छान्दोग्यषष्ठपाठकस्थितम् ''**ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि**[3]'' इति यच्चैतन्यमात्रसत्ताकं तत्त्वं श्रुत्या घुष्यते तत्तुरीयं परं ब्रह्म

१. ''तद्वर्णानाम्'' इति पाठः।
२. ''सर्वं'' इति पाठः। उपलब्धश्रुतिषु ''सत्यम्'' इति पाठो दृश्यते।
३. छा.उ. ६.८.७ (अत्र ''सर्वं तत्सत्यं स आत्मा...'' इति पाठः उपलभ्यते।)



शास्त्राचार्यप्रसादाभ्याम् अवगम्य यो महात्मा अनुभवति संशयादिप्रतिबन्धजातं त्यक्त्वा निरतिशयानन्दन्निर्भेदमनुदितानस्तमितचैतन्यरूपं ब्रह्म तदन्तरमनुभूतिं जीवन्मुक्तिसुखानुभवं च प्राप्यतेतराम् । स विद्वानेक एव पूज्यते स्तूयते च ॥१७५॥

एतच्छास्त्राभ्यासफलजीवन्मुक्तिरिति दर्शयन् प्रकरणमुपसंहरति — शीतमिति ।

**शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नानिशं बिभ्रतां**
**यद्वद्भूगतसर्वतीर्थपयसा मामज्जनोत्थं फलम् ।**
**ये कैवल्याख्यमिदं पठन्ति सुधियश्शास्त्रं प्रबोधप्रदं**
**ते नित्यं परिपूर्णसौख्यभरिता नन्दन्ति मुक्तास्स्वयम् ॥१७६॥**

शीतं तापत्रयादिदुःखनिवृत्तिकरं श्रीगुरुपादपङ्कजतीर्थं मूर्ध्ना उत्तमाङ्गेन सर्वदा बिभ्रतां भूगतसर्वतीर्थपयसां गङ्गादिनदीतीर्थानामवगाहनजं फलं यथा तद्वत् ये कैवल्याभिधं शास्त्रं प्रकरणं प्रबोधप्रदं विवेकविज्ञानजनकं पठन्ति, अधीय केळिं[1] मननादेरप्युपलक्षणम् । ते सर्वपरिपूर्णसौख्यमुदिता भूमानन्दसमुद्रनिमग्नाः । अत एव मुक्ता निवृत्ताऽज्ञानतत्कार्यबन्धाः स्वयं कृतकृत्या विदितसर्ववेद्या नन्दन्ति हृष्यन्ति तुष्यन्ति च ॥१७६॥

॥ इति श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः ॥

॥ श्रीगुरुचरणारविन्दाभ्यां नमः ॥

॥ शुभमस्तु ॥

॥ ब्रह्मार्पणमस्तु ॥

॥ ओं तत्सत् ॥

*॥ इति श्रीमद्गुरुब्रह्मानन्दयतीन्द्रचरणारविन्दमकरन्दतृप्तस्वान्तेन कृष्णेन विरचितेयं कैवल्यदीपिका समाप्ता ॥*

***

१. ''अधीय केळिं'' इति पाठः अधिकः प्रतीयते।

**तृतीयोऽध्यायः**

# तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्

प्रबन्धस्यास्यास्मिन् तृतीयाध्याये कैवल्यदीपिकायाः तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनं प्रस्तूयते। अत्र प्रबन्धे ग्रन्थकारेण केषां विषयाणां निरूपणं कृतमस्ति तन्निरूपणं कथं कियदंशेन पूर्वग्रन्थकर्तॄनकरोतीत्यपि विमृश्यते। अस्मिन् तत्त्वप्रदीपप्रकरणे अष्टोतरशतं श्लोकाः सन्ति। तेषु प्रतिपाद्यानां विषयाणां समीक्षितमध्ययनं पुरस्कर्तुं तेषां विषयाणां पूर्वाचार्यप्रतिपादितविषयेभ्यः सादृश्यं वैलक्षण्यञ्च यथाऽवकाशमत्र विशदीक्रियते।

## ३.१ मङ्गलाचरणम् —

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं विशिष्टशिष्टाचारानुमितस्मृति-परिकल्पितश्रुतिबोधितकर्तव्यताकं मङ्गलमाचरणीयमिति शिष्टोक्तिः।[१] कैवल्यदीपिकाकारेण कृष्णेनास्य ग्रन्थस्यारम्भः ''श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः'' इति वाक्येन कृतः। ततः स्वयं कृतार्थेनापि ग्रन्थकारेण स्वानुभववदन्येषामपि मुमुक्षूणां मोक्षसाधनात्मतत्त्वावगमाय वेदान्तसारस्पष्टकथनरूपं आरभ्यमाणस्य प्रकरणस्य निष्प्रत्यूहपरिपूरणादिसिद्धये प्रेक्षावत्प्रभृत्यङ्गभूतविषयादिप्रदर्शनाय च उपनिषदैकगम्यस्य निरतिशयानन्दस्वरूपस्य परब्रह्मणः परमात्मनो नमस्कारात्मकं मङ्गलाचरणं कृतम्। अत्रापि ग्रन्थकर्त्रा चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्ति-

१. (१) ''मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति आयुष्मत्पुरुषाणि च, अध्येतारश्च मङ्गलयुता यथा स्युः'' - म.भाष्य. १.३.१ पृ. १११
(२) वे.सा.वि. पृ.१



सिद्धये स्वानुभववद् इतरेषां मुमुक्षाणां मोक्षसाधनात्मतत्त्वावगमाय च मङ्गलाचरणं करोति — ''स्वर्णक्षेत्रवधूस्पृहा'' इत्यादिना। तदनु ''**निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दाऽनुकम्प्यन्ते सविशेषनिरूपणैः**[१]'' इति कल्पतरुकारोक्तिम् अनुसृत्य अविद्याद्वितयसचिवसृष्टिस्थितलयहेतुपरब्रह्मणः स्वरूपतटस्थलक्षणं वदन् प्रणमति।[२] अस्मिन् मङ्गलाचरणे ग्रन्थकारेण ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणञ्च उक्तं भवति।

इत्थं द्वाभ्यां श्लोकाभ्यां वेदान्तैकवैद्यमुपनिषदैकगम्यं शास्त्रप्रतिपाद्यपरब्रह्म-तत्त्वानुस्मरणलक्षणं मङ्गलं विधाय स्वगुरुवन्दना द्वाभ्यां श्लोकाभ्यां विहिता। वेदानुग्रहेण हि मनसो निष्पापत्वे सत्यपि तावच्छास्त्रावबोधो न भवति यावच्छास्त्रोपदेष्टुः सद्गुरोरनुग्रहो न भवति। तस्माद्देवताभक्तिवद् गुरुभक्तेरपि विद्याङ्गप्राप्तौ कारणं प्रतीयते। अत एव ''**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः**[३]'' इत्यादिश्रुत्या ''**देवमिवाचार्यमुपासीत**[४]'' इत्यादिस्मृत्या च गुर्वाराधनस्य विद्याप्राप्त्यङ्गत्वम् अस्तीति द्योतितम्। अयमेवार्थः सङ्क्षेपशारीरककारेणेत्थमभाणि —

**गुरुचरणसरोजसन्निधानादपि**
**वयमस्य गुणैकलेशभाजः।**
**अपि महति जलार्णवे निमग्नाः**
**सलिलमुपाददते मितं हि मीनाः॥**[५]

इत्यनेन मङ्गलवाक्येन ग्रन्थकारस्य जीवने निजसद्गुरोरनतिशयो महिमा प्रकटितो भवति। भगवन्नमस्कारात्प्राक् गुरुदेववन्दना सद्गुरोर्निरतिशयं माहात्म्यम् अभिव्यनक्ति। अपि च एभिः पद्यैरिष्टदेवगुरुवन्दनात्मकं मङ्गलं विधाय मङ्गलाचरणस्य शिष्टपरम्पराऽपि समादृता ग्रन्थकारेण।

१. वे.क.व्या. १-१-२०
२. कै.दी. १.२
३. श्वे.उ. ६.२३
४. आप.श्रौ.सू. १.६.१३
५. सं.शा. १.९

## ३.२ ग्रन्थरचनाप्रयोजनम् —

प्रेक्षावतां प्रयोजनमन्तरा न क्वाऽपि कर्मणि प्रवृत्तिर्दृश्यते।[१] अत एव ग्रन्थकारेण ग्रन्थादौ ग्रन्थरचनाप्रयोजनप्रतिपादनमवश्यं विधेयं भवति। स्वान्तस्तृप्तः अपि अयं ग्रन्थकारः नित्याध्ययनविध्यधीतसकलवेदराशीनाम् अद्वितीये ब्रह्मात्मन्येव तात्पर्यमस्तीति दर्शयितुं ग्रन्थं ग्रथयामास। ब्रह्मात्मप्रतिपत्तिपरेषु श्रुतिसूत्रेषु व्यासभगवत्पादप्रभृतिभिः पूर्वाचार्यैः प्रणीतेषु न्यायोपेतेषु विद्वन्निर्मित-निबन्धेषु वेदान्तशास्त्रविषयकबहुप्रबन्धेषु सत्सु ग्रन्थोऽयं कथमुपादेयो भवतीति प्रथमप्रकरणस्य षष्ठे श्लोके प्रतिपादितम्।[२]

वेदार्थवागिव तर्कवितर्काढ्यैर्विद्वद्भिर्वेद्या नैका ग्रन्थास्सन्ति परन्त्वेषः कैवल्यदीपिकाग्रन्थः शब्दशास्त्रमधीत्य अद्वैतवेदान्तसिद्धान्तवर्त्मनि श्रमोत्सुकानां कृते वर्तते। अतोऽस्मिन् प्रकरणग्रन्थे मननादिमात्रोपयोगितया अद्वैतविषयाः सङ्गृह्य एकत्र प्रदर्श्यन्ते तेन मुमुक्षूणां ग्रन्थेनानेन सरलतया वेदान्तशास्त्रे प्रवेशः सम्पद्यत इत्यतो ग्रन्थस्यास्य सप्रयोजनत्वमस्त्येव। यथा लोके कश्चिन्नवनीतार्थी कुम्भादिस्थितं पयः क्वथनाऽऽतञ्चनादियोगेन नवनीतमादत्ते तथैव पूर्वाचार्यप्रणीत-प्रकरणग्रन्थेषु उपनिषदर्थपयो ब्रह्मविचारसंशोधनयुक्त्या सङ्गृह्य अल्पश्रमेणैव जिज्ञासुभिरादातुं शक्यत इति ग्रन्थकारप्रदर्शितग्रन्थरचनाप्रयोजनम्।

यद्यप्येतत्समानविषयका अद्वैतग्रन्था विद्वद्भिः ससम्पादनपुरस्सरं प्रकाशिताः, हस्तप्रतिपुस्तकालयेष्वप्रकाशिताः सन्तः सन्त्येव तथापि तेषु काठिन्यस्य सत्त्वादस्य ग्रन्थस्य कोमलत्वादत्र जनानां सहजा प्रवृत्तिर्भवेत्। यतो हि कटुकौषधशमनीयो रोगो यदि मधुरौषधेन शाम्यति तर्हि निसर्गतो रोगिणो मधुरौषध एव प्रवृत्तिर्भविष्यति। अतोऽस्य ग्रन्थस्यापि कोमलत्वादत्र मुमुक्षूणां जिज्ञासूनाञ्च प्रवृत्तिः सहजतया भवेदेव। पूर्वोक्तरीत्या एतद्ग्रन्थरचनायाः प्रधानं प्रयोजनं सारल्येन साकल्येनाद्वैतवेदान्तशास्त्रस्य बोधप्राप्तिरस्ति। ग्रन्थोऽयं स्वान्तस्तृप्तेन कृष्णेन

१. ''प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते''- प्रसिद्धं संस्कृतसुभाषितम्।

२. ''श्रीमच्छारीरभाष्यादिकसकलमहाशास्त्रदुग्धाब्धिमध्या-
दादायात्यन्तसारं पय इव सुवचः कुम्भलक्षैर्भृतं यत्।
पूर्वाचार्यैस्तदद्य प्रकरणविधया वच्मि कैवल्यसर्पिः
प्रज्ञानामश्नतां यद्भवविषयरसो न स्वदेन्मानसाय॥'' - कै.दी. १.६



मुमुक्षूणां स्वशिष्याणाञ्च अद्वैततत्त्वानुभूतिसिद्धये गुरुप्रसादेन कृतो न तु पाण्डित्येनेति स्वयं ग्रन्थकारः स्वोपज्ञप्रभाव्याख्यां कथयति - ''**तस्मादेतच्छास्त्रं साम्प्रदायिकं गुरुप्रसादकृतं न तु पाण्डित्यादिना**[१]'' इत्यनेन। एवमिह ग्रन्थादौ ग्रन्थान्ते च ग्रन्थरचनाप्रयोजनं फलञ्च अभिहितम्।

## ३.३ अनुबन्धचतुष्टयम् —

सर्वेषामपि दर्शनानां शास्त्राणाञ्चादावनुबन्धचतुष्टयं प्रतिपाद्यते। अनुबन्ध-चतुष्टयमन्तरा प्रेक्षावतां ग्रन्थे प्रवृत्तिरेव न स्यात्। किञ्च यच्छास्त्रैकदेशसम्बद्धं यत्प्रकरणग्रन्थं भवति तत्तच्छास्त्रीयैवानुबन्धैः स ग्रन्थः अनुबन्धयुक्तो भवेत्। अन्यथा शास्त्रप्रकरणोर्भिन्नविषयादिमत्त्वेन तच्छास्त्रेण ग्रन्थस्यास्यासम्बद्धत्व-प्रसङ्गादसम्बद्धप्रलिपितमिदमापद्येत।

अनुबन्ध इति शब्दस्य व्युत्पत्तिलभ्योऽर्थो भवति — अनु स्वज्ञानाद् अनन्तरं बध्नन्ति शास्त्रे ग्रन्थे वा आसञ्जयन्ति प्रवर्तयन्ति ये ते अनुबन्धाः इति। अर्थाद् यस्य ज्ञानानन्तरं ज्ञाता कस्मिँश्चिच्छास्त्रे ग्रन्थे वा प्रवर्तते, स अनुबन्ध इत्युच्यते। यदि अनु-उपसर्गपूर्वकात् बन्ध् धातोः करणार्थे घञ्प्रत्ययो विधीयते तर्हि अनुबन्ध इत्यस्य अर्थो भवति — अनुबध्यते शास्त्रं यैस्ते अनुबन्धाः। अत एवोक्तम् अभियुक्ततरैः —

**ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥**[२] इति।

तथा अधिकारिविषयसम्बन्धप्रयोजनञ्चेति अनुबन्धचतुष्टयशब्देन व्यपदिश्यते। संस्कृतवाङ्मये शास्त्रादौ एतदनुबन्धचतुष्टयं निर्णेयं भवति अन्यथा शास्त्रे प्रवृत्तिर्न स्यात्। अतो भट्टपादैरपि अभाणि —

**सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्।**
**यावत् प्रयोजनं नोक्तं तावत् तत्केन गृह्यते॥**[३] इति।

१. कै.दी.व्या. २.१७४

२. वा.प. (प्रथमो भागः) पृ. १७९; श.क. (पञ्चमकाण्डः) पृ. २८४

३. श्लो.वा. १.१२

अत एव विषयप्रयोजनादीनां शास्त्रारम्भप्रयोजकत्वाद्धेतुत्वम् । तत्र स्वार्थ-प्रतिपत्तारम् अनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगाद् आदौ अधिकारी अपेक्षितः । तस्य च अधिकारिणो विषयबोधमन्तरेण अप्रवृत्तेः विषयस्य अधिकार्यनन्तरं निरूपणं क्रियते । विषयस्य च शक्यप्रतिपाद्यत्वसिद्धये सम्बन्धस्य विषयात् आनन्तर्यम् उच्यते । प्रयोजनस्य च चरमत्वं प्रसिद्धमेव । एवं वेदान्ते अनुबन्धचतुष्टयं प्रसिद्धम् ।

तत्र तावद् ब्रह्ममीमांसाया ब्रह्मात्मैक्यं विषयः, अपुनरावृत्तिरूपो मोक्षः प्रयोजनम्, नित्यानित्यविवेकादिसाधनचतुष्टयसम्पत्तिमान् प्रमाता अधिकारी, सम्बन्धश्च यथायोगं बोध्यबोधकभावप्राप्यप्रापकभावादिरूपेण अभिधीयमानो भवति । इहापि अस्याद्वैतवेदान्तस्य प्रकरणग्रन्थस्यास्य[१] अनुबन्धचतुष्टयं निरूपणीयं भवति । किन्तु यच्छास्त्रैकदेशसम्बन्धो यत्प्रकरणग्रन्थो भवति तच्छास्त्रीयैरेव अनुबन्धवद्युक्तो भवतीति नियमः ।[२] अतोऽस्य वेदान्तग्रन्थस्य वेदान्तशास्त्रीय-प्रकरणग्रन्थत्वात् वेदान्तशास्त्रसिद्धैरेवानुबन्धैः तद्वत्तासिद्धिर्भवति । अतो ग्रन्थकारेण कृष्णेन निरूपितमेतद् अनुबन्धचतुष्टयं प्रभाव्याख्यायाम् । तद्यथा — ''**प्रत्यग् ब्रह्मैक्यमेवात्र विषयः । तत्र च तदैक्यस्याध्यासिकभेदभ्रमनिवृत्ति-साध्यत्वात् तद्भ्रान्तिनिवृत्तिरेव प्रयोजनम् । तत्सिद्धौ च तन्निवृत्तिकामोऽ-धिकारीत्यवगम्यते । तादृग्भ्रमस्याविचारजन्यत्वेन विचारजन्यज्ञाननिवर्त्य-तयाऽधिकारिण प्रकरणविचारस्य कर्तव्यतारूपस्सम्बन्धः**[३]'' इति ।

## ३.४ सगुणब्रह्मणो वाग्गोचरत्वम् —

अनुबन्धचतुष्टयं निरूप्य ग्रन्थकारो वेदान्तप्रतिपाद्यस्य सगुणब्रह्मणो वाग्गोचरत्वम् अवर्णयत् । तथा हि केवलज्ञानस्वरूपं वाचामविषयश्चापि ब्रह्म मायोपाधिकत्वेन सर्वज्ञत्वमिव वाग्विषयतामप्यर्हति । तदेव न्यगादि ग्रन्थकारेणानेन मङ्गलाचरणे — ''**यद्वेदान्तगिरो वदन्त्यनुदिनम्**[४]'' इति । श्लोकमेनमेवम्

१. प्रकरणग्रन्थो नाम - ''शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥'' - पराशर-उपपुराणम् १८.२१-२२
२. वे.सा.वि. पृ. २२
३. कै.दी.व्या. १.१
४. कै.दी. १.१



अवतरणपूर्वकमाचष्टे व्याख्याकारः ''**यद्ब्रह्म सत्यादिलक्षणं वेदान्तगिरो-पनिषत्प्रमाणवाक्यान्यनुदिनम् उपक्रमादिभिर्लिङ्गैर्वदन्ति प्रतिपादयन्ति बोधयन्ति**[१]'' इति । वेदान्तेषु ब्रह्मेश्वरपरमात्मादिशब्दाः सत्यज्ञानानन्दशब्दाश्च निर्विशेषे प्रज्ञानघनाद्वितीयवस्तुनि प्रयुज्यन्ते । तथापि तेषां पदानां लक्ष्यं ब्रह्मैव, न तु वाच्यम्, नाम्नः जगद्धर्मत्वेन ब्रह्मणि तदभावात् । केवलं बोध्यबोधकादि-शास्त्रव्यवहारसिद्धये तत्र ब्रह्मादिशब्दप्रयोगः क्रियते । एवं यद्यपि ब्रह्म परमार्थतः सर्वशब्दव्यापारस्य अविषयः तथाप्युपचारतः सर्वशब्दव्यापारविषयो भवति । यथाऽऽहुः सङ्क्षेपशारीरककाराः — ''**सकलवाङ्मनसातिगता चितिः सकल-वाङ्मनसव्यवहारभाक्**[२]'' इति । एवं मायाशाबल्येन ईश्वररूपेण स्थितं ब्रह्म वाग्गोचरतां भजते । तदेव ब्रह्मणो वाग्गोचरतां प्रत्यपादयत् ग्रन्थकारो मङ्गलाचरणे ।

## ३.५ ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणञ्च —

मङ्गलाचरणं विधाय ग्रन्थकारोऽयं कृष्णपण्डितो निर्गुणसगुणब्रह्मणोऽभेदं प्रतिपादयन् परमात्मानं च नमस्कुर्वन् ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणं ''**सृष्टिस्थित्यन्तहेतूनपि कमलभवाधोक्षजेशानमूर्तीः**[३]'' इत्यनेन पद्येन ब्रूते । ब्रह्मसूत्रेषु शास्त्रारम्भसूत्रमिदं पठ्यते — ''**अथातो ब्रह्मजिज्ञासा**[४]'' इति । तत्र साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्येति सूत्रार्थः । अत्र ज्ञानेच्छा-वाचिना जिज्ञासाशब्देन इच्छाज्ञानयोर्मध्ये अवश्यप्राप्तो विचारो लक्ष्यते । एवञ्च ब्रह्मसाक्षात्काराय ब्रह्मविचारः प्रतिज्ञातः । पूर्वं प्रतिज्ञाऽथ प्रतिज्ञातस्य लक्षणं ततो विभागादिकमिति शास्त्रविदां मतम् । तस्मादत्रापि ग्रन्थकारेण प्रतिज्ञातस्य ब्रह्मणो लक्षणमुक्तम् । लक्षणं द्विविधं भवति — स्वरूपलक्षणं तटस्थलक्षणञ्च ।

### ३.५.१ स्वरूपलक्षणम् —

वस्तुस्वरूपज्ञानजनने प्रथमं वस्तुस्वरूपे जिज्ञासा पश्चाद्वस्त्वसाधारणधर्मे जिज्ञासेत्येवं क्रमसत्त्वेन वस्तुस्वरूपलक्षणस्य प्रधानत्वात् स्वरूपलक्षणमादौ

१. कै.दी.व्या. १.१
२. सं.शा. १.३३१
३. कै.दी. १.२
४. ब्र.सू. १.१.१

विचार्यते। तटस्थलक्षणस्य उपजीव्यत्वादनन्तरं निरूपणम्। अथवा सूचीकटाह-न्यायेनापि आदौ स्वरूपलक्षणं निरूपणीयम्।[१] यद्यप्येतत् स्वरूपतटस्थलक्षणं बहुत्र प्रपञ्चितं तथापि प्रकृते कर्मणि तस्य उपयोगित्वात् किञ्चिदिह विव्रियते।

सच्चिदानन्दरूपमेव ब्रह्मणः स्वरूपलक्षणम्।[२] तद्व्याख्यायन् वेदान्तपरिभाषायां शिखामणिकारोऽब्रवीत् — "**इतरानिरूप्यं यल्लक्षणं तत्स्वरूपलक्षणम् इत्यर्थः**[३]"। यथा लोके कः चन्द्र इति जिज्ञासायां प्रकृष्टप्रकाशः चन्द्र इति चन्द्रस्वरूपमुच्यते, तथैव ब्रह्मस्वरूपविषये सच्चिदानन्दं ब्रह्मेति वेदान्ता बाभाषन्ते। ब्रह्मणः स्वरूपं श्रुतिषु इत्थं निरूपितम् "**सत्यं ज्ञानमनन्तं ब्रह्म**[४]", "**विज्ञानमानन्दं ब्रह्म**[५]", "**आनन्दो ब्रह्मेति व्यजानात्**[६]" इति। वेदान्तशास्त्रे सत्त्वसत्यत्वयोः भेदो नास्ति। यदेव ब्रह्म सत्तदेव सत्यम्। छान्दोग्योपनिषदि "**तत्सत्यम्**[७]" इति श्रूयते। अत्र तच्छब्देन जगत्कारणीभूतं सदाख्यं ब्रह्म परामृश्यते। तदेव न्यगादि भाष्यकारेण "**येन चात्मना आत्मवत् सर्वमिदं जगत्, तदेव सदाख्यं कारणं सत्यं परमार्थसत्**[८]", "**सत्त्वोक्त्यैव सत्यत्वमुच्यते**[९]" इत्यनेन।

अपि च तैत्तिरियश्रुतौ "**ब्रह्मविदाप्नोति परम्**[१०]" इति ब्रह्मज्ञानिनो ब्रह्मप्राप्तिलक्षणं मोक्षाख्यं फलमभिधाय किं तद्ब्रह्म इत्याकाङ्क्षायामाह "**सत्यं ज्ञानमनन्तं ब्रह्म**[११]" इति। अत्र वेद्यतया विवक्षितं ब्रह्म विशेष्यम्, सत्यादीनि त्रीणि तस्य विशेषणानि। यथा नीलं महत्सुगन्ध्युत्पलम् इत्यत्र त्रिभिः विशेषणैः विशेष्यमुत्पलं विशेष्यान्तरेभ्यो निर्धार्यते, तथैवेहापि सत्यादिविशेषणत्रयोपेतं ब्रह्म

१. वे.प.शि.व्या. पृ. ३०५
२. "स्वरूपमेव लक्षणं स्वरूपलक्षणम्"- वे.प. पृ. ३०४
३. वे.प.शि.व्या. पृ. ३०४
४. तै.उ. २.१.१
५. बृह.उ. ३.९.२८
६. तै.उ. ३.६.
७. छा.उ. ६.८.७
८. छा.उ.शां.भा. ६.८.७
९. तै.उ.शां.भा. २.६
१०. तै.उ. १.१
११. तै.उ. १.१



इतरव्यावृत्ततया निर्धार्यते। किन्तु अत्रायं विशेषो यदिमानि विशेषणानि लक्षणार्थानि। यतो हि विशेषणं सजातीयव्यावर्तकं भवति। ब्रह्मणश्च सजातीयं न किमप्यस्ति। अतः एतानि सत्यादीनि लक्षणार्थप्रधानानि, लक्षणस्य सजातीयविजातीयव्यावर्तकत्वात्। अत्रायं भावः — ब्रह्मशब्दनिर्वचनबलेन यद् अविशेषतो महत्त्वेन प्रतिपन्नम्, तत् सत्यं ज्ञानमनन्तमिति विशेषतः प्रतिपत्तव्यम् इति विशेषावगतिशेषभूतं लक्षणम्। अतः एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन सम्बध्यते। तथा हि सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्म, आनन्दो ब्रह्मेति। न हि सत्यं ब्रह्म इत्युक्तौ लक्षणस्य क्वचिदतिव्याप्तिर्भवति, ब्रह्मैव केवलं सत्यमिति सिद्धान्तस्य जागरूकत्वात्। एवमानन्दो ब्रह्म इत्यत्रापि, ब्रह्मैव आनन्दः, नेतरदिति सिद्धान्तितत्वात्। तर्हि किमर्थं लक्षणत्रयमिति जिज्ञासा पुनः समुदेति। समाधानञ्चास्याः तैत्तिरीयभाष्यादौ प्रसिद्धत्वात् तत्र मृग्यम्।[१] पुनरुक्तिभयाद् विस्तरभयाच्च नेह प्रपञ्च्यते।

अस्मिन् स्वरूपलक्षणे लक्षणार्थाः सत्यादिविशेषणशब्दा विशेषणान्तरेण असम्बद्धाः केवलं ब्रह्मशब्देन सम्बध्यन्ते। अतः सत्यं ब्रह्म इत्युक्तौ ब्रह्मणः असत्याद् अनृताद्विकाराद् व्यावृत्तिः ज्ञायते। ब्रह्मणः सत्यत्वे च तस्य जगत्कारणत्वं प्राप्तम्। एवं सति कुलालादिषु कर्तृत्वादिकारकभावदर्शनात् ब्रह्मणः कारकत्वमपि प्राप्तम्। ननु लोके अचिद्रूपाणां मृदादीनां कारणत्वदर्शनात् ब्रह्मणः अपि कारणत्वे तस्य मृद्वत् जडत्वं प्राप्तमिति चेत् — उच्यते, ज्ञानं ब्रह्म इति। ज्ञानशब्दोऽत्र भावव्युत्पत्त्या सत्यादिपदसन्निधानात् निर्विशेषं चिन्मात्रं लक्षयति। तथापि लौकिकज्ञानवद् अन्तवत्त्वदर्शनात् ब्रह्मणोऽपि अन्तवत्त्व स्यात्। अत उक्तम् अनन्तं ब्रह्म इति। देशकालवस्तुपरिच्छेदशून्यम् इत्यर्थः। एवमपि ब्रह्मप्राप्तिः मोक्ष इति सिद्धान्तात्, मोक्षो हि ब्रह्मस्वरूपः। मोक्षप्राप्त्यर्थं च मुमुक्षवः तदैव प्रयतेरन्, यदि तत्र आनन्दस्स्यात्। आनन्दशून्यस्य पुरुषार्थत्वासम्भवात्। किन्तु मोक्षे ब्रह्मातिरिक्तं किमपि नास्ति। अतः मोक्षकालीन आनन्दो ब्रह्मस्वरूपः। अत एवोक्तमद्वैतसिद्धौ "**यद्यपि सर्वेषां सत्यादिपदानां लक्ष्यमेकमेव निर्विशेषं ब्रह्म तथापि निवर्त्तनीयांशाधिक्येन न पदान्तरवैयर्थ्यम्**[२]" इति।

१. द्रष्टव्यम्, तै.उ.शां.भा. १.१
२. अ.सि. पृ. ६७६

अत्रेयं शङ्का — अतिव्याप्त्यादिदोषरहितस्य व्यावर्त्तकधर्मस्य लक्षणत्वं चेत् कथं स्वरूपस्य लक्षणत्वं सम्भवति। स्वरूपस्य धर्मित्वेन स्ववृत्तित्वाभावेन च धर्मत्वाभावात्, अभेदे लक्ष्यलक्षणव्यवहाराभावाच्च। अत्रेवं समाधानम् — स्वस्यैव ब्रह्मणः स्वरूपभूतसत्यत्वाद्यपेक्षया धर्मधर्मिभावकल्पनया लक्ष्यलक्षणभावः सम्भवति। यद्यपि सत्यज्ञानानन्दादयः परस्परं वस्तुतो न भिद्यन्ते, तथापि अन्तःकरणवृत्त्युपाधौ आकारभेदमापद्यमानाः चिद्रूपाद्ब्रह्मणो भिन्नः इव प्रतिभासमाना धर्मधर्मिभावं प्रतिपादयन्ति। तस्मात् स्वस्वरूपभूतानामपि सत्यादिपदानां लक्षणत्वं नानुपपन्नम्। तदुक्तं पञ्चपादिकायाम् —

**आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः।**
**अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते॥**[१] इति।

### ३.५.२ तटस्थलक्षणम् —

''**यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्त्तकम्**[२]'' इति तटस्थलक्षणम् यथा गन्धवत्त्वं पृथिव्या लक्षणम्। महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु गन्धाभावात्। अतो लक्ष्यं यावत् कालं वर्तते तावत् कालम् अविद्यमानत्वे सति इतरभेदबोधकं तटस्थलक्षणमित्यर्थः।

प्रकृते ब्रह्मणः तटस्थलक्षणं भवति जगज्जन्मादिकारणत्वम्। अत्र जगत्पदेन कार्यजातं विवक्षितम्। तथाहि पारमार्षसूत्रम् — ''**जन्माद्यस्य यतः**[३]'' इति। अत्र आदिपदेन स्थितिसंहारययोः सङ्ग्रहः। यस्मादस्य प्रत्यक्षादिप्रमाणसिद्धस्य द्वैतप्रपञ्चस्य सृष्टिः यस्मिन् स्थितिः लयश्च भवति तद् ब्रह्मेति इति सूत्रार्थः। तथा च श्रुतिः — ''**यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यं प्रयन्त्यभिसंविशन्ति**[४]'' इति। इह लक्षणे यद्यपि जगज्जन्मस्थितिलयेषु एकैककारणत्वमपि इतरव्यावर्तकत्वाद् ब्रह्मणो लक्षणं भवितुमर्हति तथापि एकैककारणत्वस्य निमित्तकारणसाधारणत्वाद् ब्रह्म जगतः

१. पं.पा. २३
२. वे.प. पृ. ३०६
३. ब्र.सू. १.१.२
४. तै.उ. ३.१



निमित्तकारणमिति कदाचिच्छङ्का स्यात्तद्व्यवच्छेदार्थं ब्रह्मणः उपादानत्वं निमित्तत्वञ्च ज्ञापनार्थं त्रितयग्रहणं कृतम्। अथवा निखिलजगदुपादानत्वं निखिलकार्योपादानत्वमपि ब्रह्मणः तटस्थलक्षणं भवितुमर्हति। तथा चोक्तं वेदान्तसूक्तिमञ्जर्याम् —

**उपादानत्वविज्ञत्ववस्त्वन्तरनिराक्रियाः।**
**व्युत्क्रमाल्लब्धुमाचख्युरन्ये संवलितं त्रयम्॥**[१] इति।

## ३.६ सगुणनिर्गुणब्रह्मणोऽभेदः —

सर्वासूपनिषत्सु सगुणब्रह्मपराणि निर्गुणब्रह्मपराणि च बहूनि वाक्यानि आम्नातानि। तथा हि ''**मनोमयः प्राणशरीरो भारूपः**[२]'', ''**अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ**[३]'' इत्यादीनि। तथापि शब्दगोचरस्य ईश्वररूपस्य सविशेष-भावस्य मायाकल्पितेन मिथ्यात्वात्, सगुणरूपं निर्गुणब्रह्मणः अभिन्नम्। इदमस्ति तात्पर्यं यद् ब्रह्मणः सविशेषनिर्विशेषस्वरूपयोर्मध्ये निर्विशेषं पारमार्थिकं स्वरूपम्, अन्यच्च अपारमार्थिकं कल्पितमिति यावत्। अयमर्थः कैवल्यदीपिकायाम् अकथ्यत। तथा हि ''**स्वतो निर्विकारमपि ब्रह्म**[४]'' इति। अत्र ग्रन्थकारः कृष्णः निर्गुणं ब्रह्म प्रकृत्य तदेव ''**ब्रह्मादिमूर्तीरासाद्य**[५]'', ''**भूतभौतिकादि-सर्गादिनिमित्तम्**[६]'' इत्यादिना सविशेषं भवतीति सप्रमाणमचकथत्।

वस्तुतो निर्गुणब्रह्मण उत्तमाधिकारिभिः सुलभग्राह्यत्वेऽपि मन्दमध्यमाधि-कारिणां तु न तत्सकृद्बुद्धिपथमारोहति। सगुणवस्तुग्रहणाभ्यासबलात् मन्दानां लौकिकानां झटिति निर्गुणं ब्रह्म अवगन्तुं बुद्धिर्न प्रवर्तते। सर्वान् जनिमतः समुद्धर्तुं प्रवृत्ता उपनिषल्लोकबुद्धिमनुसरन्ती ब्रह्मणः सगुणं निर्गुणञ्च रूपं प्रतिपादयति। एवं सति सगुणोपासनेन शुद्धायां बुद्धौ निर्विशेषब्रह्मस्वरूपम्

१. वे.सू.मं. १.५
२. छा.उ. ३.१४.१
३. मुण्ड.उ. २.१.४
४. कै.दी.व्या. १.२
५. कै.दी.व्या. १.२
६. कै.दी.व्या. १.२

अनुभवगोचरं दृश्यते ''**त्वग्रयया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः**[१]'' इत्यादि श्रुत्यनुसारं भवितुमर्हति। अतो लौकिकान् अनुग्रहाय श्रुतिः ब्रह्मणः सविशेषं रूपमरुरूपत्। अतः परमार्थत एकरूपमेव ब्रह्म द्विरूपेण सञ्ज्ञीयते। एतद्विषये भाष्यकारा एवमाक्शासिषुः ''**द्विरूपं हि ब्रह्म अवगम्यते, नामरूपविकार-भेदोपाधिविशिष्टम्, तद्विपरीतञ्च सर्वोपाधिविवर्जितम्**[२]'' इति, ''**निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यते**[३]'' इति च। अपि च ''**न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि**[४]'' इति सूत्रमिदं सोपपत्तिं व्याख्यास्यन् भाष्यकाराः - ''**न तावत् स्वत एव परस्य ब्रह्मण उभयलिङ्गत्वम् उपपद्यते। न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेति अवधारयितुं शक्यम्, विरोधात्**[५]'' इत्यूचिरे।

अत उपासनार्थमेव निर्गुणस्य ब्रह्मणः सगुणत्वं कल्पितम्। उपास्यो-पासकादिव्यवहारश्च भेदबुद्ध्याश्रितोऽविद्याऽवस्थायामेव भवति। सत्यां च विद्याप्राप्तौ सर्वविधक्रियाकारकनिर्मुक्तम् अद्वैतं ब्रह्मैव अवशिष्यते। अयमेवार्थः श्रुतावपि एवं शोश्रूयते ''**यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्**[६]', ''**यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा**[७]'', ''**निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्**[८]'', ''**नेति नेति**[९]'' इत्यादिना। अतः श्रुतिष्वाम्नातानि सगुणब्रह्मवाक्यानि उपासन-विध्यपेक्षितगुणारोपपराणि, निषेधापेक्षितनिषेध्यसमर्पकाणि वेति स्वीकर्तव्यानि, न तु गुणानां तात्त्विकत्वपराणीति। अतः ब्रह्मणः सगुणं रूपं मिथ्यैव। अमुमर्थं निरूपयन्तो भाष्यकारा उभयलिङ्गाधिकरणे एनां स्मृतिमुदाजह्रुः —

---

१. कठ.उ. १.३.१२
२. ब्र.सू.शां.भा. १.१.११
३. तत्रैव १.२.१४
४. ब्र.सू. ३.२.११
५. ब्र.सू.शां.भा. ३.२.११
६. बृह.उ. ४.५.१५
७. छा.उ. ७.२४.१
८. श्वे.उ. ६.१९
९. बृह.उ. २.३.६



**माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।**
**सर्वभूतगुणैर्युक्तं नैव मां ज्ञातुमर्हसि॥**[१] इति।

अस्यां स्मृतौ मायापदं मिथ्यार्थबोधकम्। वस्तुतो मम निर्गुणत्वात्त्वद्दर्शन-विषयभूतं सर्वभूतगुणैर्दिव्यगन्धादिभिर्युक्तं मां मूर्तिमन्तं पश्यसीति यत् सा माया, अत एव तादृशं मम रूपं मिथ्यैव इति श्लोकार्थः। यथा रज्जौ कल्पितस्सर्पो रज्ज्वभिन्नो भवति तथैव निर्गुणे ब्रह्मणि कल्पितं सगुणत्वं निर्गुणादभिन्नमिति ज्ञेयम्। अध्यस्तं हि वस्तु स्वाधिष्ठानान्न भिद्यते। अतः अध्यस्यवस्तुनो नष्टे सति अधिष्ठानमेवावशिष्यते। तथा च सम्प्रदायविचक्षणां वचः - ''**अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः**[२]'' इति। तथा च स्वाध्यस्तनामरूपोपाधिमत्त्वमेव निर्गुणस्य सगुणत्वम्। अमुमेवार्थं प्रत्यपादयन् भाष्याकाराः ''**परमेव हि ब्रह्म विशुद्धोपाधिसम्बन्धं क्वचित् कैश्चिद्विकारधर्मैः मनोमयत्वादिभिः उपासनायाम् उपदिश्यमानमपरमिति स्थितिः**[३]'' इत्यनेन।

## ३.७ साधनचतुष्टयम् —

अथानुबन्धचतुष्टयनिरूपणावसरे प्रेक्षावत्प्रवृत्त्यङ्गभूतस्य ब्रह्मणः अज्ञातत्वेन विषयत्वम्, ज्ञातत्वेन प्रयोजनम्, प्रतिपाद्यप्रतिपादकभावसम्बन्धश्च प्रदर्श्य प्रकृतकैवल्यदीपिकाकारेण ''**तन्निवृत्तिकामोऽधिकारी**[४]'' इत्युक्तम्। तत्र अधिकारिविशेषणतया साधनचतुष्टयमित्युक्तम्। तत्र कानि साधनानि कियन्ति वेत्यपेक्षायां ग्रन्थकारोऽब्रवीत् —

**नित्यानित्यविवेचनं प्रथमतस्तत्साधनं तत्परं**
**चेहामुत्रविराग एव पठितः पश्चाच्छमाद्या अपि।**
**मोक्षश्चेति च सूरिभिर्निगदितं मिथ्येति सत्यं परं**
**ब्रह्मैवेति विनिश्चयो भवसुखास्वादे विरक्तिः पराः॥**[५] इति।

---

१. म.भा. १२.३३९.४५
२. सूत.सं. ४.२.८
३. ब्र.सू.शां.भा. ४.३.९
४. कै.दी.व्या. १.१
५. कै.दी. १.८

साधनचतुष्टये चत्वारि साधनानि भवन्ति ।[१] तद्यथा —

(१) नित्यानित्यवस्तुविवेकः ।

(२) इहामुत्रार्थफलभोगविरागः ।

(३) शमादिषट्कसम्पद् ।

(४) मुमुक्षुत्वञ्चेति ।

विवेकाद्वैराग्यसिद्धिः, वैराग्येण शमादिसम्पदो भूमिः सिद्ध्यति, शमादिसम्पत्त्या मुमुक्षुत्वसिद्धिरिति क्रमः । अतो ब्रह्मसाक्षात्काराय इमानि साधनानि सोपानरूपेण कार्यं कुर्वन्ति । एतानि साधनानि वेदान्तग्रन्थेषु बहुत्र उपन्यस्तानि तथाप्यत्र प्रकृते ग्रन्थे ग्रन्थकारस्य अभिप्रायं ज्ञातुम् उपयोगित्वात् किञ्चिद्वितन्यते ।

### ३.७.१ नित्यानित्यवस्तुविवेकः —

''**विचिर-पृथग्भावे**[२]'' इति धातोः घञ्प्रत्ययेन ''विवेकः'' इति शब्दव्युत्पत्तिः । अयं हि शब्दः ''**याथार्थ्येन वस्तुस्वरूपावधारणे**[३]'', ''**अन्योन्यधर्मव्यावर्त्तनेन वस्तुस्वरूपावधारणे**[४]'' इत्याद्यर्थेषु प्रयुज्यते । न हि विवेकमन्तरेण वैराग्यसिद्धिर्भवति । अर्थात् इदमुपादेयमिदं हेयमिति विवेचनमन्तरेण न हि हेयाद्रागान्निवृत्तिः सम्भवति । अतो नित्यानित्यवस्तुविवेक इति प्रथमं साधनं वर्तते । ''नित्यानित्यवस्तुविवेकः'' इति समस्तं पदम् । अस्य विग्रहो द्वेधा क्रियते वेदान्तविद्भिः । प्रथमं तावत् नित्यश्च अनित्यश्च इति नित्यानित्ये (इतरेतरयोगद्वन्द्वः), नित्यानित्ये च ते वस्तुनी च=नित्यानित्यवस्तुनी (कर्मधारयः), नित्यानित्यवस्तुनोर्विवेकः=नित्यानित्यवस्तुविवेकः (षष्ठी तत्पुरुषः) इति । अत्र नित्यवस्तुशब्देन प्रत्यगात्मा, अनित्यवस्तुशब्देन देहेन्द्रियादिविषया बोध्यन्ते । अनयोर्द्वयोः नित्यानित्यवस्तुनोः विवेकः अर्थात् भेदनिश्चयो नित्यानित्यवस्तुविवेकः इति शब्दार्थः ।

---

१. ''साधनान्यत्र चत्वारि कथितानि मनीषिभिः ।
येषु सत्स्वेव सन्निष्ठा यदभावे न सिध्यति ॥'' - वि.चू. १८

२. धा.पा. १४४२

३. वाच. पृ. ४९२१

४. वाच. पृ. ४९२१



ग्रन्थकारोऽयं विवरणमतानुयायी प्रतीयते । अतोऽयं विवरणप्रक्रियानुसारं नित्यानित्यवस्तुविवेकस्य विग्रहं प्रदर्शयति । प्रभाव्याख्यायामभाषत ग्रन्थकारः ''**नित्यानित्यवस्तुनोर्विवेचनं विभज्य ज्ञानम्**[१]'' इति । तर्हि किं वस्तु नित्यम्, किञ्चानित्यमिति जिज्ञासायामाह — ''**नित्यं वस्तु परं ब्रह्म, अनित्यञ्च भूतभौतिकलक्षणं जगत्**[२]'' इति ।

विग्रहोऽयं भामतीकारानभीष्टः । तेषामयमाशयः — इदं भेदज्ञानं निश्चयात्मकम्, भ्रमात्मकम् उत संशयात्मकम् ? भेदज्ञानस्य निश्चयात्मकत्वस्वीकारे तस्य फलीभूतब्रह्मावबोधस्य प्रागेव सत्त्वात् ब्रह्मजिज्ञासा न सम्भवति । अथ विवेकशब्देन ज्ञानमात्रं स्वीक्रियते चेत्तद् भ्रमात्मकं संशयात्मकं वा स्यात् । तथा च भ्रमात्मकं वा संशयात्मकज्ञानं न वैराग्यं भावयेत्, अभावयन् कथं ब्रह्मजिज्ञासाहेतुः ? तस्मात् नित्यानित्यवस्तुविवेकः इत्यस्य विग्रहो भामतीकारैः एवं प्रदर्श्यते — नित्यश्च अनित्यश्च=नित्यानित्ये (इतरेतरयोगद्वन्द्वसमासः), नित्यानित्ययोः वस्तूनि=नित्यानित्यवस्तूनि (षष्ठी तत्पुरुषः), नित्यानित्यवस्तूनां विवेकः=नित्यानित्यवस्तुविवेकः (षष्ठी तत्पुरुषः) । विग्रहेणानेन अयमर्थः सिद्ध्यति — यो धर्मो नित्यवस्तुषु अनित्यवस्तुषु च आश्रयेण तिष्ठति, तस्य भेदज्ञानं नित्यानित्यवस्तुविवेक इति । एवञ्च ''**नित्यानित्ययोर्धर्मिणोस्तद्धार्माणां च विवेको नित्यानित्यवस्तुविवेकः**[३]'' इति भामतीवचनम् । स च विवेकः आपाततोऽधिगतसकलवेदार्थस्य अनुमानकुशलस्य ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमचेतनमनित्यमिति रूपेण भवति । अत्र ''वसति यत् तद् वस्तु'' इति व्युत्पत्त्या वस्तु इति शब्दस्य धर्म इत्यर्थोऽभिप्रेतः । इदं कीदृक् साधनम् इति जिज्ञासायां ग्रन्थकारो जगाद — ''**नित्य वस्तु परं ब्रह्म, अनित्यञ्च भूतभौतिकलक्षणं जगत्**[४]'' इति । ब्रह्मणो नित्यत्वं ''**नित्यं विभुं सर्वगतं सुसूक्ष्मम्**[५]'', ''**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः**[६]'' इत्यादि

---

१. कै.दी.व्या. १.८

२. कै.दी.व्या. १.८

३. भामती, १.१.१ पृ. ८३

४. कै.दी.व्या. १.८

५. मुण्ड.उ. १.१.६

६. भ.गी. २.२४

श्रुतिस्मृतिभिः प्रतिपाद्यते। अतो ब्रह्मैव नित्यम्। ब्रह्मभिन्नवस्तूनां ''**नेह नानास्ति किञ्चन**[१]'', ''**अतोऽन्यदार्तम्**[२]'' इत्यादिश्रुतिभिः अनित्यत्वं प्रतिपाद्यते। एवञ्च नित्यत्वं नाम सत्यत्वम्। तद्यस्यास्ति तन्नित्यं सत्यम्, तथा च आस्थागोचरः उपादेयश्च। अनित्यत्वम् असत्यत्वम्, तद्यस्यास्ति तदनित्यमनृतम्। तथा च अनास्थागोचरः अनुपादेयश्च।

### ३.७.२ इहामुत्रार्थफलभोगविरागः —

''**इहामुत्रार्थफलभोगविरागः**[३]'' इति लक्षणलक्षितो विवेको वैराग्यं जनयति। अर्थ्यते प्रार्थ्यते इत्यर्थः। अत्रार्थपदं फलवाच्यम्। तस्मिन् विरागः अर्थात् अनाभोगात्मिका उपेक्षाबुद्धिः। वैराग्यस्य प्रतिपादनावसरे भगवच्छङ्कराचार्यैः गीताभाष्ये ''**वैराग्यं विरागभावो दृष्टादृष्टविषयेषु**[४]'' इति वाक्येन विषयाणां द्वैविध्यमुक्तम् — दृष्टविषयाः अदृष्टविषयाश्च। ''इहामुत्रार्थफलभोगविरागः'' इत्यत्र इहलोके भवा ऐहिकाः प्रतिपन्नशरीरसम्बन्धिनः स्रक्चन्दनवनितागृहक्षेत्र-पशुभृत्यादिविषयजन्यसुखरूपभोगा दृष्टविषयाः, आमुष्मिका अमृतादिविषया अदृष्टविषयाः।

अत्र एवं शङ्का भवितुमर्हति यदैहिकं सुखमनित्यत्वादिदोषदूषितत्वात् विरागास्पदं भवितुमर्हति तथापि यज्ञादिभिः प्राप्तात् पारलौकिकात् सुखात् कथं विरक्तिः उपपद्यते ? यतो हि श्रूयते स्वर्गादिफलस्य अमृतत्वम्। ''**अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति**[५]'', ''**अपाम सोमममृता अभूम**[६]'' इत्यादिश्रुतयः स्वर्गस्य अमृतत्वं द्योतयन्ति किल। अपि च —

**स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति।**
**उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते ॥**[७]

१. बृह.उ. ४.४.१९
२. बृह.उ. ३.४.२
३. वे.सा. पृ. ४
४. भ.गी.शां.भा. १८.५२
५. श.ब्रा. २.६.३.१
६. ऋ.सं. ८.४८.३
७. कठ.उ. १.१.१२



इत्यादिश्रुतौ स्वर्गादिफलस्य नित्यताऽवगमात्ततो विरक्तिर्नोपपद्यते तर्हि कथं स्वर्गादिफलेषु अनित्यताबुद्धिः ? इति चेदत्र समाधीयते — ''**तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते**[१]'' इति श्रुत्या कर्मजन्यस्य स्वर्गादिसुखस्यापि अनित्यत्वं द्योत्यते। अस्याम् अमृतत्वबोधिकाश्रुतौ अमृतत्वस्य आशयः चिरकालस्थायित्वं, सुदीर्घकालस्थायित्वम् इत्यस्ति।[२] असावर्थो भगवद्गीतायामपि — ''**ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति**[३]'' इतिरूपेण भगवता श्रीकृष्णेन प्रतिपादितः। विष्णुपुराणेऽपि अमृतत्वविषये एवमुच्यते —

**आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते।**
**त्रैलोक्यस्थितिकालोऽयमपुनर्मार उच्यते ॥**[४] इति।

अत्र अमृतत्वस्य अर्थः ''**त्रैलोक्यस्थितिकाल एव इहामृतापुनर्मारपर्यायः**[५]'' इति श्रीधरस्वामिना रचिते विष्णुचित्तिव्याख्याने उक्तम्। लोके यथा कृषिसेवाप्रति-ग्रहादिविषयाः कर्मजन्या अनित्या दृष्टाः तथैव आमुष्मिका अप्यमृतादिविषयाः सेवाजन्यानन्दाश्च यागादिकर्मजन्यत्वादनित्या भवितुमर्हन्तीति निश्चयो भवति। अमुमेवार्थं द्रढयन् ग्रन्थकारः श्रुतिस्मृतीः उदाजहार —

''**एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति**[६]'',
''**आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते**[७]'' इति।
''**श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः।**
**बह्वन्तरायकामत्वात् कृषिवच्चापि निष्फलम् ॥**[८]'' इति च।

१. छा.उ. ८.१.६
२. अमृता इत्यत्र हि नञोऽल्पत्वमर्थः ''अनुदरा कन्या'' इति यथा। ततश्च अल्पं=मनुष्यापेक्षया न्यूनं मृतं=मरणं येषां ते अमृताः=चिरकालस्थायिन इति।
३. भ.गी. ९.२१
४. वि.पु. २.८.९५
५. वि.पु.श्री.व्या. २.८.९५
६. मुण्ड.उ. १.२.७
७. वि.पु. २.५.९६
८. भा.पु. ११.१०.२१

अतः स्वार्गादिफलभोगेषु अनित्या बुद्धिर्जायते, तेन च वैराग्यमुपपद्यते। वैराग्यद्वारा हि शमादिषट्कसम्पत्तिश्च इति क्रमो वेदान्तशास्त्रेषु प्रसिद्धः।

## ३.७.३ शमादिषट्कसम्पत्तिः —

वैराग्येण सम्पन्नोऽयं पुरुषश्शमदमादिसाधनसम्पत्तिमान् भवति। वैराग्यचक्रे षट् अरा वर्तन्ते। एते अरा यदा परिभ्रमन्ति तदा वैराग्यचक्रम् अग्रे गच्छति। शमादिषट्के षट् सम्पत्तयो वर्तन्ते। तद्यथा — शमः, दमः, उपरतिः, तितिक्षा, समाधानं, श्रद्धा चेति। अयमर्थः श्रुतौ इत्थं प्रतिपादितः — "**शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येव आत्मानं पश्येत्**[१]" इति।

वेदान्ते शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः इत्युक्तम्। अर्थात् विषयग्रामे दोषान् दृष्ट्वा तेषु विषयेषु मनसो निग्रहं कृत्वा तस्य श्रवणादिषु विनियोगश्शम इत्युच्यते। किन्त्वत्र कैवल्यदीपिकायां शमं ग्रन्थकारो प्रकारान्तरेण लक्षयति - "**लक्ष्यैकतानत्वमुशन्ति शान्तिम्**[२]" इति। अर्थात् सगुणदेवता-साक्षात्कारपर्यन्तम् उपासकस्य अन्तःकरण्स्य दर्पकामादिदोषं शमयतीति शमः। शमस्तावत् मनसो निग्रहः इत्युक्तं[३] परं मनसो निग्रहः अत्यन्तं दुष्करो वर्तते तथापि अभ्यासवैराग्याभ्यां तस्य निग्रहः कर्तुं शक्यते।[४]

बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् अर्थात् इन्द्रियाणां विषयेभ्यः परावर्तनं कृत्वा स्वस्वगोलकेषु स्थापनं दम इत्युच्यते। उक्तञ्च भगवत्पादेन —

**विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके।**
**उभयेषामिन्द्रियाणां स दमः परिकीर्तितः॥**[५] इति।

---

१. बृह.उ. ४.४.२३

२. कै.दी. १.९

३. अत्र ब्रह्मसूत्रभामतीव्याख्यानं दर्शनीयम् "रागादिकषायमदिरामत्तं हि मनस्तेषु तेषु विषयेषूच्चावचमिन्द्रियाणि प्रवर्तयत्, विविधाश्च प्रवृत्तीः पुण्यापुण्यफला भावयत्, पुरुषमतिघोरे विविधदुःखज्वालाजटिले संसारहुतभुजि जुहोति। प्रसंख्यानाभ्यासलब्ध-वैराग्यपरिपाकभग्नरागादिकषायमदिरामदं तु मनः पुरुषेण विजीयते वशीक्रियते, सोऽयमस्य वैराग्यहेतको मनोविजयः शमः" इति। - भामती. १.१.१ पृ. ७३

४. दृ. भ.गी. ६.३४-३५

५. वि.चू. २३



बाह्येन्द्रियाणां श्रोत्रादीनां ज्ञानकरणानां, वागादीनां कर्मकरणानाञ्च स्वतस्तत्र सामर्थ्याभावात् प्रग्रहस्थानीयेन मनसा अश्वस्थानीयानां बहिरिन्द्रियाणां शब्दादिरूप-विषयमार्गेभ्यः पराङ्मुखीकृत्य स्वस्वगोलककर्णशष्कुलीवदनादिदेशेषु स्थापनं उपरतव्यापारतासम्पादनं यत् स दमः परिकीर्तितः। अर्थात् ज्ञानसाधनश्रवणादि-साधनेभ्यो विलक्षणेषु शब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्त्यन्ते स दम इत्यर्थः।

अत्र ग्रन्थकारोऽपि इदमेव दमलक्षणमवादीत् — "**बाह्यकरणनिग्रहो दमः**[१]" इति।

वेदान्तसारे उपरतेः द्वे लक्षणे उक्ते। प्रथमं तावत् "**निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः**[२]"। द्वितीयन्तु "**विहितानां कर्मणां विधिना परित्यागः**[३]" इति। श्रवणादिविषयेभ्यो मनसो बाह्येन्द्रियाणाञ्च निवर्तनं पुनर्विषयप्रवृत्त्यनुत्साहकरणेन स्थिरीकरणम् उपरतिः इत्युच्यते। अर्थात् निगृहीतानां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानीन्द्रियाणि सर्वथा न गच्छेयुस्तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिरित्यर्थः। यद्यपि उपरतेः लक्षणमदः शमदमयोर्लक्षणाभ्यां गतार्थं भवति तथापि इयमुपरतिः शमदमयोः उत्तरभूमिः वर्तते।

उपरतेः अपरं लक्षणं "विहितानां कर्मणां विधिना परित्यागः" इत्युक्तम्। अर्थात् अवश्यकर्तव्यतया चोदितानां सन्ध्यावन्दनाग्निहोत्रादीनां कर्मणां विधिपूर्वकं श्रुतिस्मृत्युक्तमार्गेण परित्यागः परिव्रजनं सन्न्यासः उपरतिरित्यर्थः। अत्र विहितकर्मणां विधिपूर्वकत्यागस्य सन्न्यास इति सञ्ज्ञा निधीयते। सन्न्यासग्रहणस्य विधिस्तु श्रुतिस्मृतौ एवं वर्णितोऽस्ति —

"**तद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति**[४]"

---

१. कै.दी.व्या. १.९

२. वेदान्तसारः, पृ. १२

३. वेदान्तसारः, पृ. १२

४. जा.उ. ४

''**प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ॥**[१]''

''**असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति ॥**[२]''

''**त्वम्पदार्थविचाराय सन्न्यासः सर्वकर्मणाम्**[३]'' इति ।

इहापि कैवल्यदीपिकाकारः उपरतेः उक्तलक्षणद्वयं तथैवानुसरति ।

''**शीतोष्णादिद्वन्द्वसहिष्णुता तितिक्षा**[४]'' इत्युक्तं तितिक्षालक्षणं वेदान्तसारे । शरीरधर्मस्य शीतोष्णादिद्वन्द्वानां शरीरेण, तज्जन्यसुखदुःखादेश्च मनसा ग्रहणं क्रियते । अतस्तेषां स्वप्रकाशचिद्रूपे स्वात्मनि अत्यन्ताभावो वर्तत इति विवेकदीपेन मिथ्याभूतस्य शीतोष्णादेर्द्वन्द्वस्य यत्सहनं क्रियते सा तितिक्षा इत्यर्थः। अर्थात् शीतोष्णमानापमानलाभालाभशोकहर्षादीनां द्वन्द्वानां तपोरूपेण सहनं तितिक्षा इति निगद्यते ।[५] कम्बलव्यजनादिभिः शैत्यौष्णादिदुःखप्रतीकारस्तु लोकप्रसिद्धः । किन्तु तादृशसामग्र्यभावेऽपि किमस्माभिर्दीनैः करणीयमिति चिन्ताविलापरहितं यत्सहनं सैव तितिक्षा भवति । तदेवोक्तं भगवद्गीतायाम् —

''**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्ताँस्तितिक्षस्व भारत !॥**[६]'' इति ।

मात्रास्पर्शाः शब्दादिभिः संयोगाः, ते शीतोष्णसुखदुःखदाः शीतमुष्णं सुखं दुःखं च प्रयच्छन्ति । शीतं कदाचित्सुखदं भवति कदाचिद् दुःखदम् । तस्मात्तान् शीतोष्णादीन् तितिक्षस्व प्रसहस्व । अर्थात् तेषु हर्षं विषादं च मा कार्षीः इति श्लोकार्थः ।

---

१. मनु.स्म. ६.३८
२. भ.गी. १८.४९
३. उ.सा. १८.२२२
४. वे.सा. पृ. १२
५. ''सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ।
चिन्ताविलापरहितं सा तितिक्षा निगद्यते ॥'' — वि.चू. २५
६. भ.गी. २.१४



अत्र ग्रन्थकारः कृष्णः शीतोष्णादिद्वन्द्वेन सह ''**आध्यात्मिकादिदुःखानां सहनम्**[१]'' इति ब्रुवन् ईषत्प्रकारान्तरेण तितिक्षालक्षणमुवाच ।

गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा इति कथ्यते । लोकेऽपि दृश्यते यत् कश्चिज्जनः आप्तवाक्ये विश्वासाभावे तदनुसारेण विचारादौ नैव प्रवर्तते, किमुतातीन्द्रिये शास्त्रार्थे । अतः आत्मसाक्षात्काराय श्रद्धा परमकारणम् । गीतं हि भगवता गीतायाम् — ''**अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ! अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि**[२]'' इति । अतो गुरूपदिष्टवेदान्तवाक्येभ्यः ''नासि त्वं संसारी किन्तु नित्यशुद्धबुद्धमुक्तस्वभावं परं ब्रह्मैव अन्यत्सर्वं मिथ्या'' इत्यादिवाक्येभ्यः सत्यबुध्यावधारणे श्रद्धा आवश्यकी वर्तत इति श्रीभगवताऽपि निगदितम् ।[३] विवेकचूडामणौ श्रद्धाया लक्षणमित्थमभाणि भगवत्पादेन —

''**शास्त्रस्य गुरुवाक्यस्य सत्यबुध्यावधारणा ।
सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ॥**[४]'' इति ।

अतः गुरुवेदान्तस्मृतीतिहासपुराणवाक्येषु विश्वास इदमित्थमेव नान्यथेति नियता या बुद्धिः सा श्रद्धा इति तात्पर्यार्थः । अत्रापि प्रकृते ग्रन्थे ग्रन्थकारेण कृष्णपण्डितेन श्रद्धालक्षणं ''**देशिकवरेण ब्रह्मविद्यासम्प्रदायप्रवर्तकाचार्येण उदित उपदिष्टे शास्त्रमार्गे तच्छ्रवणादौ चातीव विश्वास आदरः श्रद्धा**[५]'' इत्यनूद्य वेदान्तमतमनुसृतम् । अत्र ग्रन्थकारेण गुरोर्विशेषणत्वेन देशिक इति पदं प्रायुञ्जि । तस्यार्थस्तु शिष्येभ्यो ज्ञानं दिशतीति देशिक इति ।

''**निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्**[६]'' इति । समाधानस्यार्थः ऐकाग्र्यं तत्परत्वं वा भवति । उक्तञ्च विवेकचूडामणौ — ''**सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ।**

---

१. कै.दी.व्या. १.१०
२. भ.गी. ९.३
३. ''श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥'' — भ.गी. ४.३९
४. वि.चू. २६
५. कै.दी.व्या. १.९
६. वे.सा. पृ. ६०

**तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्**[१]'' इति। पूर्वोक्तस्य शम इति साधनस्य समाधानं फलं वर्तते। लोके यथा बालका विशेषतो रुदन्ति चेत्तदिष्टं दत्त्वा समादधते जनाः, तद्वत् मनसो यथेष्टं विषयमार्गसञ्चरणं यथा न भवेत्, तदर्थमनुष्ठीयमान उपायः समाधानमित्यर्थः। वस्तुतस्तु शुद्धे ब्रह्मणि सर्वथा सर्वदा च बुद्धिस्थापनमेव समाधानम्। वेदान्तसारे सुबोधिनीकारः समाधानस्य लक्षणमित्थं बभाषे - ''**शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेष्वमानित्वादिसाधनविषयेषु समाधिर्नैरन्तर्येण तच्चिन्तनं समाधानम्**[२]'' इति। अमुमेवार्थं ग्रन्थकारः ''**आत्मपरयोः प्रत्यग्ब्रह्मणोः तादात्म्य एवैकस्मिन्विषये धीस्थापनं वृत्तिसंरोधो हि समाधिः**[३]'' इत्यनेन अकथयत।

इयं षट्सम्पद् ब्रह्मविचारस्य आवश्यकपृष्ठभूमित्वेन वर्तते। अत एवोक्तं कठोपनिषदि —

''**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**
**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥**[४]'' इति।

एवं शमदमादिसाधनानि अस्य जिज्ञासोः नित्यानित्यविवेकसाधनद्वारा वैराग्यसम्पन्नस्य भवति। इन्द्रियनिग्रहादिसाधनजातं यदा उत्पन्नं भवति तदा अस्य पुरुषस्य मुमुक्षुत्वं सम्पद्यते।

### ३.७.४ मुमुक्षुत्वम् —

इदं चरमं साधनं वर्तते। एतादृशसाधनमण्डितस्यैव शमादिसम्पत्तिमत्पुरुषस्य एव मुमुक्षुत्वं सम्भवति। तत्र मोक्षो नाम विद्यानिरस्ताविद्यातत्कार्यब्रह्मात्मना अवस्थानम्। तद्विषयेच्छा मोक्षेच्छा तद्वत्त्वं मुमुक्षुत्वमित्यर्थः।[५] ईश्वरानुग्रहेणैव इदं मुमुक्षुत्वं सिद्ध्यति।[६] न केवलं विशिष्टफलकत्वादेव मोक्षस्य माहात्म्यं वर्तते,

१. वि.चू. २७
२. वे.सा.सु. पृ. ५
३. कै.दी.व्या. १.९
४. कठ.उ. १.२.२४
५. वे.सा.वि. पृ. ८१
६. ''ईश्वरानुग्रहादेव पुंसामद्वैतवासना।
महाभयपरित्राणा द्वित्राणामुपजायते॥'' — अ.गी. १.१



किन्तु तस्य दुर्लभत्वमपि वर्तते। यतो हि असङ्ख्येषु जीवसङ्घेषु मनुष्यातिरिक्तानां श्रेयसि प्रवृत्तेरभावात् प्रथमं तावत् मनुष्यत्वमेव दुर्लभम्। सत्यपि मनुष्यत्वे न सर्वोऽपि ज्ञानाय प्रवर्तते। किन्तु सहस्रेषु अनन्तेषु[१] कश्चिदेव महासुकृती। अतः तत्त्वज्ञानसाधनानुष्ठायी दुर्लभतरः। सत्यपि तत्त्वज्ञानसाधनानुष्ठातरि तत्सहस्रेषु कश्चिदेव तत्त्वतो वेत्तीति सिद्धो ज्ञानी दुर्लभतमः।[२]

तुरीयमेतत्साधनं ग्रन्थकार एवं प्रत्यपादयत् — ''**निजरूपबोधमात्रादिच्छा मोक्तुं मुमुक्षुता कथिता**[३]'' इति। अर्थात् तादात्म्याध्यासबन्धात् मोक्तुं पृथग्भवितुमिच्छा मुमुक्षा। सा च मुमुक्षुता नित्यसिद्धात्मतत्त्वयाथार्थ्यावगमादेव भवति।[४] एवमधिकारिविशेषणतया ''**साधनशालिनामेव ब्रह्मेवाहमात्मा न संसारीति ज्ञानोत्पत्तिः स्यात्।**[५]'' अथान्वयव्यतिरेकाभ्यामपि साधनचतुष्टयमेव ब्रह्मविचारस्य कारणमिति भाष्यकारस्य सम्मतिं प्रदर्शयतो ग्रन्थकारस्याशयः।

ननु क्वचिदकृतब्रह्मविचाराणामपि ''**गर्भ एवैतच्छयानो वामदेव एवमुवाच**[६]'' इत्यादिना ब्रह्मवित्त्वमवगम्यते इति चेत्। उच्यते — तेषां वामदेवादीनां जन्मस्तोमशतैः कृतेन पूर्वजन्मार्जिततपोविशेषेणैव ब्रह्मवित्त्वं सिध्यतीति सम्प्रदायविदां निश्चयः।

### ३.८ गुरूपसदनम् —

साधनचतुष्टयसम्पन्नत्वेऽपि ब्रह्मविचारफलस्य लाभो गुरुप्रसादादेव भवतीत्यर्थं प्रकटयन् ग्रन्थकारः प्रकृतग्रन्थे सविस्तरं शिष्यस्य गुरूपसदनं विवृणोति। तद्यथा ''**एवमुक्तलक्षणोऽधिकारी समिद्धारगृहीतहस्तो मुमुक्षुः सुतदारवित्तवाञ्छा इति एषणात्रयं परित्यज्य अशेषतत्त्ववेत्तारमेव, न तु**

१. ''विश्वं शतं सहस्रं च सर्वमक्षयवाचकम्'' इति महाभारतवचनात् (१.१२७.८) अत्र सहस्रपदम् आनन्त्यपरम्।
२. ''मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥'' — भ.गी. ७.३
३. कै.दी. १.११
४. कै.दी.व्या. १.११
५. कै.दी.व्या. १.११
६. ऐ.उ. २.५

**शास्त्रज्ञमात्रम्, गुरुं प्राप्नुयात्**[१]'' इति। अत्र ग्रन्थकारेण ''श्रोत्रियः, ब्रह्मनिष्ठः'' इति विशेषणद्वयेन गुरोः लक्षणमपि उक्तं भवति। ''गुरुः'' इति शब्दस्यार्थस्तु —

''**गुशब्दस्त्वन्धकारः स्याद् रुशब्दस्तन्निरोधकः।**
**अन्धकारनिरोधित्वाद्गुरुशब्दः स उच्यते**॥[२]'' इति।

''**आचार्यवान् पुरुषो वेद**[३]'', ''**आचार्याद्ध्यैव विदिता विद्या साधिष्ठं प्रापत्**[४]'' इत्यादिश्रुतिभिः ब्रह्मात्मस्वरूपपरिज्ञानाय गुरोः नितान्तम् आवश्यकता वर्तत इति प्रतिपादितम्। अयमात्मा प्रवचनेन, बहुधा श्रुतेन, स्वमेधया न लभ्यत इत्यतो मुमुक्षुः गुरुशरणमेवाभिगच्छेत्। तथा च श्रुतिः ''**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्**[५]'' इति। गुरूपसदने तदुपदेशजन्यस्वयाथात्म्यज्ञानेन बन्धनिवृत्तिरूपमोक्षः सिध्यति। अयमेवाशयो विवेकचूडामणावपि प्रदर्शितः।[६] तथा गुरूपसदनं सम्प्राप्तो नम्रकायो बद्धाञ्जलिपुटश्शिष्यो गुरुं प्रार्थयति —

''**नत्वा तिष्ठन् स गुरुसविधे मूर्ध्नि बद्धाञ्जलिस्सन्**
**प्राह स्वामिन्! विषयगरलैर्मायिकैर्दूनदूनः।**
**छित्वा कोशान् हृदयमपि मे साधु शीतं विधाय**
**श्रीमन्बोधामृतशिशिरया मां गिरा बोधयेति**॥[७]'' इति।

तथाविधाऽऽगताय शिष्याय गुरुः दीक्षां ददाति। अत्र कैवल्यदीपिकाग्रन्थे ग्रन्थकारेण ''**कमठझषवयांसीवादरात् स्मृत्युदीक्षाच्छदयुगपुटमध्यस्पर्शनैः दीक्षयित्वा**[८]'' इत्यनेन पद्येन दीक्षायाः केचन प्रकारा उक्ताः। तद्यथा —

१. कै.दी.व्या. १.१४
२. अद्व.उ. १६
३. छा.उ.६.१४.२
४. छा.उ. ४.९.३
५. मुण्ड.उ. १.२.१२
६. ''उक्तसाधनसम्पन्नः तत्त्वजिज्ञासुरात्मनः।
उपसीदेद् गुरुं प्राज्ञं यस्माद् बन्धविमोक्षणम्॥'' — वि.चू. ३३,३४
७. कै.दी. १.१५
८. कै.दी. १.१६



(१) **चिन्तनदीक्षा** - अस्या दीक्षाया अपरं नाम स्मरणदीक्षाऽपि ग्रन्थकारेण प्रोक्तम्। कच्छपः, मकरः, कुकुट्टाद्याः पक्षिणः स्वयं तीरादौ स्थिता अपि अन्यत्र कुत्रचित् निहितानि अपत्यानि संस्मरणमात्रेण वर्धयन्तीति लोकप्रसिद्धिः।

(२) **दृष्टिदीक्षा** - मत्स्यादयस्तु स्वदृष्टिसन्निधौ स्वबालमत्स्यान् स्वदृष्ट्या पुनः पुनरीक्षणेन पोषयन्ति वर्धयन्तीति दृष्टिदीक्षाया उदाहरणम्।

(३) **स्पर्शदीक्षा** - पक्षिणः छदयुगपुटमध्यस्पर्शनेन पत्रयुगलमध्यालिङ्गनेन स्वं स्वं वत्सकुलं वर्धयन्ति। इयं स्पर्शदीक्षा बहुप्रकारा शिवरहस्यादौ प्रसिद्धाऽस्ति। भगवता विष्णुना स्वभक्ताय प्रह्लादाय स्पर्शदीक्षा प्रदता इति भागवतपुराणे प्रसिद्धिः।[१]

(४) **उदीक्षा** - तिर्यङ्निपतिता दृष्टिः उदीक्षा इति ग्रन्थकारस्य मतम्। अस्या अपरं नाम शक्तिपातदीक्षा इत्यपि क्वचिच्छ्रूयते।

अथ अमुमपि शिष्यं गुरुः स्मृत्या शक्तिपाताभिधया उदीक्षया चाक्षुष्या स्पर्शदीक्षया चानुगृह्णाति। एवं शिष्यकृतसविनयप्रार्थनानन्तरं गुरुरपि ब्रह्मविद्यामृत-निक्षेपपात्रमिति मनसि निधाय शिष्यस्य अब्रह्मत्वं निवारयितुम्, न तु अपूर्वं विधातुम्, मोक्षसाधनमात्मतत्त्वज्ञानमुपदिशति।

## ३.९ अध्यारोपापवादौ —

एवं गुरूपसदनसन्दिहानमुमुक्षुशिष्यो निजस्वरूपावगमाय गुरुं पृच्छति —

**मां विज्ञाय जडं गुरो हृदि भवानेतद्वचः प्रोक्तवान्**
**सर्वे ज्ञातनिजस्वरूपगतयो लोके भवन्त्यातुराः।**
**उत्पत्तिक्षयशालिनः कथमहो निश्चित्य तत्त्वं मम**
**ब्रूहि त्वत्पदपङ्कजं गतवतां भूयो न दुःखं क्वचित्**॥[२] इति।

आत्मानात्मविवेकविलसितोऽयं भ्रम इति मनसि निधाय गुरुः ''**अयं घटादिवदुपलभ्यमानो देहः, अयञ्च देही प्रत्यक् चेतनः**[३]'' इति विविच्य

१. भा.पु. ७.९.५
२. कै.दी. १.२२
३. कै.दी.व्या. १.२२

आगताय शिष्याय बोधयामास। तदर्थमजानन् शिष्यः पुनः अस्मात्स्थूलाद्देहाद् विलक्षण आत्मा कोऽन्योस्तीति अप्राक्षीत्। तदा गुरुः तं जिज्ञासुं शिष्यमध्यारोपापवादाभ्याम् अवस्थात्रयविनिर्मुक्तमात्मानं प्रबोधयामास।[१]

सम्प्रति अध्यारोपापवादन्यायो विव्रियते। अध्यारोपापवादन्यायेन तावत् वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यं ज्ञातुं शक्यते। तत्र अध्यारोपो नाम ''**असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोपः**[२]'' इति। अपवादस्तु ''**अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्तस्य अवस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्**[३]'' इति। व्यावहारिकवस्तुत्वेन अभिमतायां रज्जौ अवस्तुभूतसर्पस्य यः आरोपो भवति तत्र रज्ज्वच्छिन्नचैतन्यनिष्ठा अविद्या सर्पज्ञानाभासाकारेण परिणमते सर्पाकारेण च विवर्तते। स च सर्पः रज्ज्वच्छिन्नचैतन्यनिष्ठाविद्योपादानकः इति ''नायं सर्पः किन्तु रज्जुरेव'' इति विशेषदर्शनोत्तरकालीनेन अधिष्ठानसाक्षात्कारभूतरज्जुसाक्षात्कारेण रज्जुगताज्ञाननिवृत्तौ सर्पभ्रान्तिः अपि निवर्तते। एवं परमार्थदृष्ट्या अज्ञानानुपहितं तुरीयचैतन्यं ब्रह्म एव वस्तु। तच्च कालत्रयानपायि अक्षरं त्रिगुणातीतं सच्चिदानन्दरूपम् अद्वयम्। अज्ञानादिसकलजडसमूहः अवस्तु। अज्ञानतज्जन्यव्योमादेः मिथ्यात्वदृश्यत्वसावयवत्वविकारित्वसापेक्षसिद्धिकत्वादिहेतुभिः अवस्तुत्वम्। अयं महाप्रपञ्चः अज्ञानजन्यत्वादवस्तुभूतः। तस्य अद्वैतचैतन्यरूपे वस्तुनि आरोपः अध्यारोपः।

अत्रेवं जिज्ञासा — कथमवस्तुनो निरात्मकस्य आरोपः भवेत्, यतः कस्यचिद् दृष्टापूर्वस्य सतः एव क्वचिदारोपो भवितुमर्हति। अत्रोच्यते — अवस्तुत्वं नात्यन्तासत्त्वम्, अपि तु अनिर्वचनीयत्वम्। संस्कारजन्यो भ्रमः तत्सिद्धये पूर्वप्रतीतिमात्रम् अपेक्षते, न पुनः पूर्वप्रतीतस्य परमार्थसत्त्वमपि। अपि च एतस्य भ्रमस्य अनादिप्रवाहत्वात् नान्योन्याश्रयदोषप्रसङ्गः।[४] एवं वस्तुनि परमार्थे सति अवस्तुनः अनिर्वचनीयस्य आरोपो भवितुमर्हति। असङ्गोदासीने परमात्मवस्तुनि

---

१. कै.दी. १.२६

२. वे.सा. पृ. ३२

३. वे.सा. पृ. १०९

४. ''नैसर्गिकोऽयं लोकव्यवहारः'' — ब्र.सू.शां.भा. अध्यासभाष्यम्।



तद्विवर्तभूताज्ञानादिमिथ्याप्रपञ्चस्य चिद्वस्तुमात्रावशेषतया अवस्थानम् एव अपवादः। तदुक्तम् ''**अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः**[१]'' इति। तस्मात् कार्यस्य कारणमात्रसत्त्वावशेषणं चिद्विवर्तस्य प्रपञ्चस्य चिन्मात्रावस्थानम् एव वा अपवादः। अत्रायं भावः — वस्तुनोऽन्यथाभावो द्विधा भवति — परिणामभावः विवर्तभावश्च। ''**वस्तुनस्तत्समसत्ताकोऽन्यथाभावः परिणामः, तदसमसत्ताको विवर्त इति**[२]''। वेदान्ते हि ब्रह्मणोऽविकारित्वाद् विवर्तभावः अङ्गीक्रियते न तु परिणामभावः।

आभ्याम् अध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति। अद्वैतब्रह्मणि अज्ञानवशात् यन्नानात्वमारोप्यते, तत्परित्यागेन जीवब्रह्मणोः ऐक्यं प्रतिपाद्यते। तथा हि समष्ट्यज्ञानम्, तदुपहितः ईश्वरः, अनुपहितं चैतन्यञ्चेति त्रितयम् अविविक्तं सत् तत्पदस्य वाच्यार्थो भवति। एवं व्यष्ट्यज्ञानम्, तदुपहितः प्राज्ञः, अनुपहितं चैतन्यञ्चेति त्रितयम् अविविक्तं सत् त्वम्पदस्य वाच्यार्थो भवति। एतयोः वाच्यार्थयोः च विरोधात् ऐक्यं न सम्भवति। तस्मात् अद्वैतब्रह्मसिद्ध्यर्थं तत्त्वम्पदयोः वाच्यार्थपरित्यागेन लक्ष्यार्थो गृह्यते। लक्ष्यार्थश्च तत्पदस्य त्वम्पदस्य च अनुपहितं चैतन्यम्, तथा च जीवब्रह्मणोः ऐक्यं सिध्यति।

अमुमेवार्थं प्रकटयन् ग्रन्थकारः ''**तत्त्वमसि**[३]'' इति महावाक्यस्थतत्त्वंपदयोः वाच्यार्थौ विलक्षणधर्मकौ जीवेश्वरौ दर्शयन् तयोरुपाधिप्रविलापनमन्तरा तादात्म्यं न कदापि सम्भवतीति दर्शयति —

''**अयं भवाँस्त्वंपदलक्ष्यमेव**
**ब्रह्माद्वयं तत्पदलक्ष्यमेव।**
**अन्तान्वितौ जीवपरौ हि वाच्यौ**
**नैक्यं तयोः भेदवतोः कदापि॥**[४]'' इति।

तदनु अनयोः विलक्षणधर्मकजीवेश्वरयोः भेदो व्यावहारिकः, अभेदस्तु

---

१. सू.सं. ४.२.८

२. सि.ले.सं. पृ. ५८

३. छा.उ. ६.८.७

४. कै.दी. १.७६

पारमार्थिकः इति निबध्नाति। अत्र ग्रन्थकारो जीवेशयोः भेदः व्यावहारिक एवेति साधनार्थं ''**जीवेशयोः कीदृशो भेदः ? स च लौकिको वा वैदिको वा ? स च स्वाभाविको वाऽऽगन्तुकः ?**[1]'' इत्यादिरूपेण नैकान् पक्षान् उद्भाव्य तान्निराकुर्वन् तत्त्वम्पदयोः वाच्यार्थं परित्यज्य लक्ष्यार्थं स्वीकुर्वन् जीवेशयोः भेदः व्यावहारिक एव, अभेदस्तु पारमार्थिक इति वर्णयन् तयोरेक्यं बोधयति।

अत्रापि ग्रन्थकारेण ''**अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते**[2]'' इति न्यायमनुसृत्य सदृष्टान्तमध्यारोपापवादौ एवमुपक्रान्तौ —

**लोके तारं प्रदर्श्य प्रकटमथ जनोऽरुन्धतीं दर्शयिष्यन्**
**शाखामुच्चैः प्रदर्श्य प्रथितमुडु ततश्चन्द्रिका वा यथेह।**
**स्थूलं सम्यक्प्रबोध्य प्रथमममतितरां सूक्ष्ममाकाशतो यत्**
**पश्चाद्ब्रह्मस्वरूपं वरगुरुरभयं बोद्धुमैच्छत्क्रमेण॥**[3] इति।

इत्थं सदृष्टान्तमपवादं निरूपयन् ग्रन्थकरो ब्रूते यत् प्रेक्षावतां सम्यग्दर्शिनाम् यथा अधिष्ठानज्ञाने सति रज्जुसर्पस्थले ''नायं सर्पः किन्तु रज्जुरेव, वृथा मया भ्रान्तम्''। शुक्तिरजतस्थले ''रूप्यं नास्ति किन्तु नीलपृष्ठत्रिकोणाकारा शुक्तिरेव'' इति ज्ञानं जायते तथैव श्रुत्युक्त्यनुभवैः गुरूपदेशेन च ''नासि त्वं संसारी किन्तु नित्यशुद्धबुद्धमुक्ताद्वितीयात्मा एव'' इति बोधो जायते तदेव अपवादः। कल्पितकार्यस्य अपवादे हि तस्याधिष्ठानमेव शिष्यते। अत उपादानकारणसत्तां विना न कोऽपि विकारः पृथगस्ति। यथोक्तं कैवल्यदीपिकाकारेण —

''**वस्त्रतन्तुकिरीटकुण्डलनिष्ककाञ्चनकुञ्चिका-**
**मृत्तिकावदुदीक्षितामिह चैकमेव हि वस्तुतः।**
**कारणाद्व्यतिरिक्तमस्ति न कार्यवस्तु कदाचने-**
**त्यात्ममात्रविलोकनं त्वपवादमाहुरमुं बुधाः॥**[4]'' इति।

१. कै.दी.व्या. १.७७
२. भ.गी.शां.भा. १३.१३
३. कै.दी. १.२६
४. कै.दी. १.४७



## ३.१० लक्षणा —

अत्र ग्रन्थे मुमुक्षवे शिष्याय जीवब्रह्मणोः ऐक्यं बोधयितुं पदार्थबोधो हि वाक्यार्थबोधहेतुरिति न्यायमनुसृत्य ''दशमस्त्वमसि'' इति अपरोक्षस्वरूप-साक्षात्काराय भागत्यागलक्षणया तत्त्वमसीति महावाक्यं बोधयति ग्रन्थकारः।[1] मुख्यार्थस्य रूढ्यर्थस्य वा यत्र विरोधः स्फुरेत्तत्र लक्षणा ग्राह्या इति दर्शयन् ग्रन्थकारो लक्षणायाः प्रकारान् इत्थं विवृणोति —

''**मुख्यार्थस्य विरोधो यत्र भवेत्तत्र लक्षणा ग्राह्या।**
**तत्रैका जहती स्यादजहत्यपरोभयात्मिका च स्यात्॥**[2]'' इति।

वस्तुतः पदसमूहो वाक्यम्, वाक्यसमूहो महावाक्यमिति उत्सर्गशास्त्रम्। जीवब्रह्मणोः ऐक्यबोधकं वाक्यं महावाक्यमिति वेदान्तसमयः। महावाक्यानां महत्त्वं न शब्दगतं किन्त्वर्थगतम्। तत्र जीवब्रह्माभेदरूपमहातात्पर्यार्थबोधकत्वात् मोक्षरूपमहापुरुषार्थसाधकत्वाच्च एतेषां महत्त्वं स्फुटमेव। तेषु महावाक्येषु चत्वारि महावाक्यानि अत्यन्तं प्रसिद्धानि सन्ति। तान्यथा — ''**तत्त्वमसि**[3]'' इति उपदेशात्मकं वाक्यम्। ''**प्रज्ञानं ब्रह्म**[4]'' इति स्वरूपबोधकं वाक्यम्। ''**अयमात्मा ब्रह्म**[5]'' इति अनुसन्धानात्मकं वाक्यम्। ''**अहं ब्रह्मास्मि**[6]'' इति अनुभवात्मकं वाक्यम्।

विवक्षितमर्थं परं प्रति बोधयितुं पदमात्रं नालं भवति। तस्मात् वाक्यानि महावाक्यानि नितरामपेक्षितानि। प्रवक्त्रा उच्चरितेन पदेन वाक्यबोधस्तु इत्थं भवति — वक्त्रा प्रयुक्तश्शब्दो वृत्त्या बोधं जनयति। वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः। पदपदार्थयोः मुख्यः सम्बन्धः शक्तिः, अमुख्यः सम्बन्धो लक्षणा इति प्रसिद्धम्। अनयोः क्रमशः अभिधा गौणी इत्यपि नामान्तरम्। तत्र प्रथमं तावत् उच्चारितः शब्द अभिधाव्यापारेण अर्थमवगमयितुं प्रवर्तते। प्रमाणान्तरेण तस्य

१. कै.दी. १.६४
२. कै.दी. १.७८
३. छा.उ. ६.८.७
४. ऐ.उ. ५.३
५. मा.उ. २
६. बृह.उ. १.४.१०

अर्थस्य बाधो भवति तर्हि लक्षणाव्यापारेणार्थान्तरमवगमयति। तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति पूर्वोत्तरमीमांसकानां राद्धान्तः। क्वचिदन्वयानुपपत्तिरपि लक्षणाकारणमिति तार्किकाः। किन्तु मुख्यार्थबाधे लक्षणा इति सर्वतन्त्रसिद्धान्तः। अयमेवाशयो वाक्यवृत्तावपि इत्थं प्रकटितः —

''**मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे।**
**मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते॥**[१]'' इति।

अथ का नाम लक्षणा ? अत्रोच्यते काव्यप्रकाशे —

''**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया॥**[२]'' इति।

आचार्यविश्वनाथप्रोक्तं लक्षणालक्षणन्त्वित्थम् —

''**मुख्यार्थबाधे तद्युक्तो ययाऽन्योर्थः प्रतीयते।**
**रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥**[३]'' इति।

सा च लक्षणा अद्वैतवेदान्तमतानुसारं त्रिविधा — (१) जहल्लक्षणा, (२) अजहल्लक्षणा, (३) जहदजहल्लक्षणा चेति। अत्र कैवल्यदीपिकाकारः कृष्णः लक्षणात्रयमित्थमुदाजहार —

''**गङ्गायामिति घोषो जहत्यजहतीह धावति हि शोणः।**
**उभयात्मिका तु सोऽयं द्विज इत्येताभिरेव न विरोधः॥**[४]'' इति।

महावाक्यार्थावगमने लक्षणात्रयस्य प्रकृतोपयोगाल्लक्षणाविमर्शः किञ्चिद्विशदीक्रियते।

### ३.१०.१ जहल्लक्षणा —

वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धिनि अर्थान्तरे वृत्तिर्जहल्लक्षणा। अस्या एव नामान्तरं जहत्स्वार्था, लक्षणलक्षणा वा। अस्या उदाहरणानि यथा —

---

१. वा.वृ. ४७
२. का.प्र. २.९
३. सा.द. २.१४
४. कै.दी. १.७९



गङ्गायां घोषः, कलिङ्गाः साहसिकाः, आयुर्वै घृतम् इत्यादीनि। अत्र गङ्गापदं स्ववाच्यार्थं जलप्रवाहमशेषतः परित्यज्य तत्सम्बन्धिनि लक्ष्यार्थे तीरे वर्तते। उक्तञ्च मधुसूदनसरस्वतीपादैः सङ्क्षेपशारीरकभाष्ये — ''**गङ्गायां घोष इत्यत्र हि वस्तुतो गङ्गासम्बन्धि यत्तीरं घोषान्वयायोग्यत्वादतो गङ्गापदे जहल्लक्षणैव**[१]'' इति।

### ३.१०.२ अजहल्लक्षणा —

वाच्यार्थमन्तर्भाव्यैव अर्थान्तरस्वीकारे अजल्लक्षणा अर्थात् वाच्यार्था-परित्यागेन तत्सम्बन्धिनी वृत्तिः अजहल्लक्षणा। यथा ''शोणो धावति''। अत्र शोणो बहिरस्तीत्यश्वगतं बहिःस्थितं शोणगुणमात्रवृत्तिमत्यक्त्वाऽवान्तरजाति-शोणपदस्य वाच्यार्थविशेषिततरङ्गविशेषे प्रवृत्तिः अजहल्लक्षणा।

### ३.१०.३ जहदजल्लक्षणा —

वाच्यार्थस्य भागशः परित्यागेन भागशः स्वीकारेण अर्थान्तरावगमे जहदजहल्लक्षणा। लक्षणेयं वेदान्ते भागत्यागलक्षणेत्यपि निगद्यते। अस्या उदाहरणानि सन्ति ''काकेभ्यो दधि रक्ष्यताम्'', ''सोऽयं देवदत्तः'' इत्यादीनि वाक्यानि। अत्र सोऽयमिति पदाभ्यां देशकालादिविशिष्टभागत्यागात् विशेष-देवदत्तांशमात्रग्रहादुभयप्रकारा जहदजहल्लक्षणा। तस्मात् जहदजहल्लक्षणया प्रत्यगात्मा बोध्यते, न गायत्रीवैश्वानरादिशब्दवत् स्वार्थापरित्यागेन अजहल्लक्षणया, नापि ''यजमानः प्रस्तरः'', ''यजमानः एककपालः'' इत्यादिवत् स्वार्थपरित्यागेन जहल्लक्षणयेति।

तत्त्वमसीति महावाक्यं जहदजहल्लक्षणाया उदाहरणम्। अत्र तत्त्वमस्यादि-वाक्यस्य सोऽयं देवदत्त इत्यादिवद् भागलक्षणा भवति। तदेव ब्रुवन् ग्रन्थकारो तत्त्वमसिमहावाक्ये भागत्यागलक्षणां दर्शयति —

''**तत्त्वं परं ब्रह्म परं च साक्षिणं नोपेक्ष्य किञ्चिद् भ्रममप्युपेक्ष्य।**
**तद्धि त्वमेवासि सदात्वमेव तत्त्वमसीतिवाक्यं परमाह पूर्णम्॥**[२]''
इति।

---

१. सं.शा. १.१२८
२. कै.दी. १.८१

तत्त्वमसीत्यत्र तदित्यस्य परोक्षत्वादिविशिष्टचैतन्यमेव वाच्यार्थः, त्वमित्यस्य चापरोक्षत्वादिविशिष्टचैतन्यमिति । ''तत्त्वमसि'' इत्यत्र सर्वज्ञत्वादिविशिष्टचैतन्यं किञ्चिज्ज्ञत्वादिविशिष्टचैतन्यम् इति पदद्वयं वर्तते । अत्र परोक्षत्वादिविशिष्टमपरोक्षत्वादिविशिष्टं चेति विरुद्धांशद्वयम् । एकांशे वाच्यार्थं परित्यज्य अपरांशे चापरित्यज्य जहदजहल्लक्षणया विरुद्धांशविशेषणद्वयं परित्यागेन विशेष्यभूतचैतन्यरूपाखण्डार्थैकत्वसिद्धिर्भवति । अतोऽत्र तत्त्वमसीति महावाक्ये परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यकत्वलक्षणमुख्यार्थप्रतिपादकत्वाभावाज्जहदजहल्लक्षणया विरुद्धपरोक्षत्वादिवैशिष्ट्यांशपरित्यागेनाविरुद्धाखण्डचैतन्यमात्रप्रतिपादकत्वं स्यात् । अतो भागत्यागलक्षणास्वीकारे तत्त्वमसीति महावाक्येन जीवब्रह्मणोरभेदः सिद्ध्यति ।

## ३.११ अध्यासः —

अध्युपसर्गाद् आस्धातोरचि प्रत्यये सति अध्यास इति पदसिद्धिः । अर्थात् अधिकृत्य आस्ते, आधारमाश्रित्य तिष्ठतीत्यर्थः । अध्यासो नाम रज्जौ सर्पः शुक्तौ रजतं चेतिवद् अयथार्थज्ञानम्, भ्रमात्मकं ज्ञानं वा । जीवस्य अनर्थहेतुभूतौ मिथ्यापदार्थप्रत्ययौ अध्यास इति संज्ञया व्यवह्रियेते वेदान्तशास्त्रे । ''**अथातो ब्रह्मजिज्ञासा**[1]'' इत्यस्मिन् सूत्रे ब्रह्मज्ञानाय वेदान्तविचारं विदधता सूत्रकारेण ज्ञानस्य अनर्थनिवर्तकत्वेन फलत्वस्य वक्तव्यत्वात्, निवर्त्यस्य अनर्थस्य अध्यासो भवतीति सूत्रितम् । तच्च भाष्यकारैः लक्षणप्रमाणसम्भावनापुरस्सरं न्यरूप्यत । अत्यन्तविविक्तयोरपि आत्मानात्मनोः इतरेतराविवेकेन परस्परम् अध्यस्य अहमिदं ममेदम् इति नैसर्गिको लोकव्यवहारो दृश्यते । तत्र पूर्वपूर्वमिथ्याज्ञानजन्यानां बुद्धीन्द्रियशरीरादीनाम् उत्तरोत्तराध्यासे उपयोग इति बीजाङ्कुरवदनादिपरम्परया आगतेन इतरेतराविवेकेन एव सत्यानृतयोः आत्मानात्मनोः परस्पराध्यासो भवतीति वेदान्तिनामाशयः ।[2] एतदेव प्रकृतेऽपि ग्रन्थकारेण अध्यारोपापवादनिरूपणासरे ''**देहेन्द्रियादिभ्यो विलक्षणा या चितिः चेतनधातुः प्रत्यगात्मा सैव सुखं परमप्रेमास्पदत्वात्**[3]'' इत्युक्तम् । तदात्मनाऽवस्थातुम् अध्यासनिषेधेन कर्तुं

१. ब्र.सू. १.१.१
२. भामती, पृ. १०
३. कै.दी.व्या. १.२७



शक्यत इति वदता ग्रन्थकर्त्रा अध्यासलक्षणम्, तत्कारणञ्च यथा प्रतिपादितं तदिह समासेन विमृश्यते ।

### ३.११.१ अध्यासलक्षणम् —

''**स्मृतिरूपः परत्र पूर्वदृष्टावभासः**[1]'' इति अध्याससामान्यलक्षणमाह भाष्यकारः । अध्यासो खलु स्मृतिस्वरूपः । स्मृतिस्तावत् संस्कारजन्या भवति तथैव अध्यासोऽपि । स्मृतौ वस्तु सम्मुखं न भवति, किन्तु भ्रमेऽथवाध्यासे विषयवस्तु सम्मुखे तिष्ठति । अतो भ्रमज्ञानं प्रत्यक्षं ज्ञानमिति उच्यते । शुक्तिरजतादिभ्रमज्ञाने निरधिष्ठानकज्ञानं न भवति, यतो हि कुत्रचिदधिष्ठान एव भ्रम उत्पद्यते । शुक्त्यधिष्ठाने सति रजतभ्रमो जायते । प्रकृतेऽपि प्रपञ्चभ्रमाधिष्ठानमस्ति ब्रह्म । अनाद्यध्यासवशादेवैकं ब्रह्म जीवरूपेण जगद्रूपेण च विवर्तते ।[2] अर्थात् अनादिशुद्धे नित्ये ब्रह्मणि अनाद्यविद्याकारणेनैव विषयिनिष्ठो विभ्रम उत्पद्यते । अध्यासलक्षणेऽस्मिन् परत्रशब्देन लक्षणेऽधिष्ठानं ब्रह्मैव गृह्यते । शुक्तिरजते पूर्वदृष्टरजतस्य भ्रमो हि शुक्तिरूपाधिष्ठाने सम्पद्यते । अयमेवाध्यासः । असावेव ''**अतस्मिंस्तद्बुद्धिः**[3]'' इत्यपि निगद्यते । यत्र यन्नास्ति, तत्र तद्बुद्धिरेव अतस्मिंस्तद्बुद्धिरिति उच्यते ।

''**इष्टं हि लोके समासव्यासधारणम्**[4]'' इति न्यायमवलम्ब्य अवभासः इति अध्यासस्य सङ्क्षिप्तं लक्षणम्, ''स्मृतिरूपः परत्र पूर्वदृष्टावभासः'' इति विस्तृतं लक्षणमिति भामतीकाराणामाशयः । ''**अवसन्नोऽवमतो वा भासोऽवभासः**[5]'' । अवभासः इति सङ्क्षिप्तलक्षणे अवभासपदस्य अवयवार्थः परिगृह्यते । तथा हि अवपूर्वस्य ''**भासृ-दीप्तौ**[6]'' धातोः घञ्प्रत्ययेन निष्पन्नोऽयमवभासशब्दः । तत्र भासधातुः प्रकाशार्थकः, अव-इत्युपसर्गश्च द्योतकः । प्रकाशो नाम ज्ञानम् । अतः भासधातोः भावे घञ्-प्रत्यये कृते ज्ञानं प्रकाशो वा भासः । कर्मणि घञ्-

१. ब्र.सू.शां.भा. पृ. १७
२. प.पा. पृ. १४, १५
३. ब्र.सू.शां.भा. पृ. ४४
४. म.भा. १.१.५१
५. भामती. पृ. १८
६. धा.पा. ६२४

प्रत्यये कृते ज्ञेयं प्रकाश्यं वा भास इत्यर्थलाभः। अवसन्नो भासः अवभासः। अवसादः उच्छेदः, अवमानो यौक्तिकतिरस्कारः। अवसादो बाधकज्ञानोदयानन्तरं भ्रमनिवृत्त्यन्तरोत्पत्तिबन्धरूपः, भ्रमज्ञानोच्छेदरूपः। अनेन सङ्क्षिप्तलक्षणेन अध्यासो मिथ्याज्ञानमिति प्रतिपादितम्। ज्ञानस्य मिथ्यात्वे तज्ज्ञानस्य ज्ञेयमपि मिथ्या इति स्वत एव सिद्ध्यति। रज्जौ सर्पज्ञानं यथा मिथ्या, तथा तज्ज्ञानस्य ज्ञेयरूपः सर्पोऽपि मिथ्या। वेदान्तशास्त्रे अन्यथाख्यातेः अनङ्गीकारात् परत्र अवभासः संस्कारवशादेव भवति इत्यध्यासस्य उपपादनाय भाष्ये स्मृतिरूपपूर्वदृष्टपदे निवेशिते। तथा च यस्मिन् काले यत्र यन्नास्ति, तस्मिन्नेव काले तत्र तदस्तीति प्रतीतिः आरोपः, तद्विषयिणी प्रतीतिरध्यासः। अयञ्चाध्यासो द्विविधः — अर्थाध्यासो ज्ञानाध्यासश्चेति। तत्र अर्थाध्यासो नाम दोषसम्प्रयोगसंस्कारवशादतस्मिन् तस्योदयः, यथा शुक्त्यादौ रजतादिः। ज्ञानाध्यासो नाम दोषादिवशादतस्मिन् उदिते तद्बुद्धिः, यथा रज्ज्वादौ उदिते सर्पादौ सर्पादिबुद्धिः। अतः पूर्वोक्तभाष्यवाक्ये अवभासशब्दः ''अवभास्यते इत्यवभासः'' इति व्युत्पत्त्या अर्थाध्यासपरः, ''अवभासनमवभासः'' इति व्युत्पत्त्या च ज्ञानाध्यासपरः।

ननु आत्मा ''अहम्'' इति ज्ञाने भासते, अनात्मा तु ''इदम्'' इति ज्ञाने भासते। अहंशब्दवाच्यः इदंशब्दवाच्यो न भवति। न हि कदाचिद् घटपटशब्दौ समानार्थकौ भवतः। अपि च शरीरादिः अनात्मा ज्ञानविषयत्वेन भासते, आत्मा तु ज्ञानरूपत्वात् विषयित्वेन भासते। तथा च तयोः भेदः स्फुटः। आत्मा चेतनः अनात्मप्रपञ्चस्तु अचेतनः। तर्हि जडचेतनयोः अध्यासः कथं सम्भवति ? न हि अन्धकारप्रकाशयोः परस्परम् अध्यासो भ्रमरूपः केनापि प्रत्यक्षीक्रियते। एवंरूपेण अध्यासे वादिविप्रतिपत्तेः कथम् अध्यासलक्षणसिद्धिः इत्याशङ्काम् उद्भाव्य ग्रन्थकारेण सदृष्टान्तमध्याससामान्यलक्षणं न्यगादि —

> ''**गतोपमाने सति निष्प्रपञ्चे**
> **संवित्स्वरूपे च सदाऽद्वितीये।**
> **यथाम्बरे नैल्यतलादिकल्पना**
> **तथा परे ब्रह्मणि विश्वकल्पना॥**[1]'' इति।

१. कै.दी. १.२९



यथा अप्रत्यक्षेऽप्याकाशे बाला अविवेकिनः ''नभ इन्द्रनीलकटाहकल्पम्'', ''पीतं नभः'' इत्यादिव्यवहरन्ति। तथैव अद्वितीये सजातीयविजातीयस्वगत-भेदशून्ये ब्रह्मणि विश्वकल्पना भवति। अत्रापि ग्रन्थकारेण ''**शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति**[1]'' भाष्यकारमतमनुसृत्य लोकानुभवरेव अध्यासविषये प्रमाणत्वेन गृहीतः।[2]

## ३.११.२ अध्यासनिमित्तम् —

अध्यासस्य किं नाम निमित्तमिति जिज्ञासायां भाष्यकाराः ''**अन्योन्यस्मिन् अन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य इतरेतराविवेकेनात्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य अहमिदम्, ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः**[3]'' इत्याहुः। इतरेतराविवेकश्च परस्परं विवेकाग्रहो भेदाग्रहो वा अध्यासनिमित्तमित्यर्थः। भ्रमस्थले प्राचीनाचार्या अधिष्ठानसामान्यज्ञानविशेषाज्ञानं कारणमिच्छन्ति। अधिष्ठानस्य विशेषज्ञानं तु अध्यासनिवर्तकं वर्तते। तथापि अधिष्ठानस्य सामान्यज्ञानमध्यासप्रयोजकमिति वेदान्तिभिः स्वीक्रियते। यथा शुक्तिरजतस्थले ''इदं रजतम्'' इत्यत्र इदमिति सामान्यज्ञानमस्ति। पुरतः विद्यमानायां शुक्तौ प्रतीयमानं रजतं न देशान्तरे विद्यमानं वर्तते नापि असत्, किन्तु शुक्तावेव प्रतीतिकाले समुत्पद्यते, अत एव तद्रजतं वेदान्तिभिः प्रातिभासिकं रजतमित्यभिधीयते। शुक्तौ प्रातिभासिकरजतोत्पत्तिस्तु इत्थम् — पुरोवर्त्तिशुक्त्या सह चक्षुस्संयोगेन काचित् अन्तःकरणवृत्तिर्जायते। सा च चक्षुर्गतकाचादिदोषेण, प्रमातृगतदोषेण, शुक्तिगतचाकचिक्यादिदोषेण च केवलम् इदमाकारा भवति, न तु शुक्त्याकारा। एवम् अन्तःकरणस्य वृत्तिद्वारा विषयदेशे समवधानेन प्रमातृप्रमाणप्रमेयचैतन्यानाम् ऐक्यप्राप्तौ इदमिति अधिष्ठानसामान्यज्ञानं भवति। तदा इदमंशगतचाकचिक्यादिरजतसादृश्यज्ञानेन पूर्वदृष्टरजतस्य संस्कार उद्बुध्यते। संस्कारोऽयं प्रमातृचैतन्याभिन्नेदमंशावच्छिन्न-चैतन्ये विद्यमानायाः शुक्तितत्त्वविषयिण्याः त्रिगुणात्मिकाया अविद्यायाः क्षोभं जनयति। तदा सा तमोगुणप्रधानाऽविद्या काचादिदोषसहकृता अभिनव-

१. ब्र.सू.शां.भा. पृ. ३३
२. कै.दी.व्या. १.२८
३. ब्र.सू.शां.भा. अध्यासभाष्यम्, पृ. १६

रजताकारेण परिणमते। तस्मिन्नेव काले इदमंशावच्छिन्नचैतन्याभिन्नसाक्षि-चैतन्यनिष्ठा सत्त्वगुणप्रधाना अविद्या रजताकारेण परिणमते। अविद्यायाः चैतन्याश्रितत्वात् अविद्यापरिणामरूपस्य रजतस्यापि चैतन्यमेव अधिष्ठानम्। तथापि इदमंशस्य अधिष्ठानतावच्छेदकत्वात्, तेन सह रजतस्य तादात्म्यम् अनुभूयते। तदा इदमंशावच्छिन्नचैतन्यस्य रजतं प्रति अधिष्ठानत्वात् ''इदं रजतम्'' इति प्रतीतिरुत्पद्यत इति।

सङ्क्षेपशारीरककारा अध्यासस्य कारणं तु मिथ्याज्ञानाद्यपर्याया अविद्येति मेनिरे। तेषां हि ''**अध्यस्ततां प्रति समर्थमबोधमात्रम्**[1]'' इति मतम्। तत्र अध्यासकारणीभूते संस्कारे प्रमाजन्यत्वं नापेक्षितम्, किन्तु प्रतीतिजन्यत्व-मात्रमपेक्षते। अर्थात् अध्यस्यमानस्य विषयस्य वस्तुतः क्वचित् सत्त्वं भवेत्, तस्य प्रमा च पूर्वं भवेदिति नियमो नास्ति। किन्तु भ्रमप्रमासाधारणी प्रतीतिः केवलं पूर्वमावश्यकम्। अत एव भाष्यकारेणोक्तम् ''**सत्यानृते मिथुनीकृत्य**[2]'' इति। सत्यं चिदात्मा, अनृतं बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी युगलीकृत्य विवेकाग्रहाद् अध्यस्य लोकव्यवहारो जायत इत्यर्थः। अत्र सत्यस्य अनृतस्य च मिथुनं यद्यप्युक्तं तथापि सत्यानृतयोः पारमार्थिकं मिथुनं न सम्भवतीति ज्ञापनार्थं भाष्यकारा अभूततद्भावार्थस्य च्वेः प्रयोगमकार्षुः। प्रकृतेऽपि प्राचीनाध्यास-जन्यसंस्कारः पाश्चात्त्याध्यासं प्रति हेतुः। भामतीकाराः ''**पूर्वपूर्वमिथ्या-ज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेः उत्तरोत्तराध्यासोपयोगः**[3]'' इत्यनेन पूर्वपूर्वाध्यासः पाश्चात्त्याध्यासस्य हेतुरिति जगदुः।

नन्वेवं सति संस्कारात् अध्यासो जायते, अध्यासाच्च संस्कार इति अन्योन्याश्रयदोषः दुर्वारमिति चेत्। उच्यते — अयमध्यासः न सादिः, किन्त्वनादिः। तदुक्तं भाष्यकारेण ''**नैसर्गिकोऽयं लोकव्यवहारः**[4]'' इति। नैसर्गिकः स्वाभाविकः अनादिरयं लोकव्यवहारः इत्यर्थः। अध्यासकार्यभूतस्य व्यवहारस्य नैसर्गिकत्वेन अनादित्वेन वा तत्कारणभूतस्य मिथ्याज्ञानभूतस्य

---

१. सं.शा. १.२७

२. ब्र.सू.शां.भा. अध्यासभाष्यम्, पृ. १६

३. भामती, पृ. १०

४. ब्र.सू.शां.भा. अध्यासभाष्यम्, पृ. १६



अध्यासस्यापि अनादित्वमभ्युपेयम्। ततश्च यथा बीजादङ्कुरो जायते, अङ्कुराच्च बीजमिति तयोः परस्परसापेक्षत्वेऽपि तत्सापेक्षत्वस्य अनादित्वाद्यथा तत्र परस्पराश्रयो दोषो न स्वीक्रियते, एवमत्रापि पूर्वमिथ्याज्ञानजन्यः पूर्वारोपजन्यो वा संस्कारः उत्तरकालीनस्य आरोप्यस्य जनकः संस्कारः, तदारोपजन्यसंस्कारश्च तदुत्तरकालीनस्य आरोपान्तरस्य जनक इति न परस्पराश्रयदोषः। तथा चानादिपरम्पराक्रमेण आगतः आत्मानात्मनोः इतरेतराविवेक एव अध्यासे निमित्तभूत इत्याशयः।

सिद्धान्तलेशसङ्ग्रहे अप्पयदीक्षितैः सकारणाध्यासनिरूपणावसरे अध्यासकारणत्वेन प्रायः षट् पक्षा व्यलेखिषत।[1] तत्र सादृश्यम् अध्यासस्य कारणमिति केषाञ्चन पक्षो वर्तते, स च स्वीकृतः प्रतिपादितश्च। किन्त्वत्र प्रकृते ग्रन्थकारः सादृश्यादिकम् अध्यासकारणं न स्वीकरोति। एतन्मते अधिष्ठान-सामान्याऽऽरोपितविशेषज्ञानमेव अध्यासस्य मुख्यं कारणमिति।[2]

अन्योन्याध्यासविषये कैवल्यदीपिकाकारेण शङ्कामुद्भाव्य तस्याः समाधानम् इत्थमवादि —

''**आश्चर्यमेतदवनौ परमं हि साम्यम्**
**अन्तर्हितं न तु कदापि विशेषयोगात्।**
**न ह्यावृणोत्यहमिति स्म परं स्वसाम्यं**
**किन्त्वावृणोति तम ईश्वरजीवबोधः॥**[3]'' इति।

अत्र पुनरपि शङ्का — शुक्तिरजतयोरिव विविक्तयोः हि वस्तुसतोर्भेदाग्रह-निबन्धनः तादात्म्यविभ्रमो युज्यते। अद्वैतवादिनां मते तु आत्मानात्मनोः भेदाग्रह इति वक्तुं न युज्यते। तेषां मते एकमेव सद्वस्तु, स चात्मा। आत्मव्यतिरिक्तम् अनात्मभूतं न किमपि सद्वस्तु अस्ति, न हि परमार्थसतः चिदात्मनः अत्यन्तभिन्नत्वेन देहादि सद्वस्तु अस्ति। तत् कथं केन वा चिदात्मनः भेदाग्रहः तादात्म्यविभ्रमो वा भवेत्, निरस्तसमस्तभेदेऽद्वितीये एकस्मिन् ब्रह्मवस्तु तदसम्भवात् इति।

---

१. सि.ले.सं. पृ. २१४

२. कै.दी.व्या. १.२९

३. कै.दी. १.५२

पूर्वोक्तमेव समाधानमत्रोच्यते — एकस्मिन् अपरस्य आरोपभूते अध्यासे आरोपाधिष्ठानम् आरोप्यश्च इत्येतद्द्वितीयस्यापि वास्तविकं सत्त्वम् आवश्यकमिति नास्ति नियमः। अध्यासे दृष्टत्वमात्रम् उपयुज्यते, न वस्तुसत्ता इति। अप्रतीतस्य आरोपायोगात् आरोपार्थम् आरोप्यस्य प्रतीतिरेव उपयुज्यते न वास्तविकसत्यत्वम्। अत एव भाष्यकारेण ''**सत्यानृते मिथुनीकृत्य**[१]'' इत्यनेन सत्यं चिदात्मा, अनृतं बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी युगलीकृत्य विवेकाग्रहादध्यस्य लोकव्यवहारो भवतीति सम्भावनाभाष्ये सूचितम्।

एवमध्याससम्भावनातत्कारणमुदित्वा अध्यासपरम्परां वक्तुं तस्य मूलभूताम् अवस्थामाह —

''**यत्राव्यक्तेऽखिलतनुभृतो वासनाभिः प्रलीनाः**
**सुप्तौ यद्वत्प्रलयपरसीम्न्यादिहीनाः तदेव।**
**ईशालोकाद्विगुणसमतां सन्त्यजद्व्यक्तसंज्ञां**
**गच्छत्सत्त्वं रज इति तमो नैकभेदश्च जातम्॥**[२]'' इति।

त्रिगुणात्मिकया मायया जगदिदं सृष्टेः पूर्वम् ''**असदेवेदमग्र आसीत्**[३]'', ''**असद्वा इदमग्र आसीत्**[४]'' इत्यादिश्रुत्युक्तदिशा अव्यक्तमासीत्। तत्राव्यक्तनामरूपे अनादिभूताः सर्वे जीवाः स्वस्वकर्मार्जितपूर्वपूर्वसंस्कारविशेषैः सह जतुपिण्डे स्वर्णरेणव इव प्रलीना एकीभूता वर्तन्ते। तदेव अव्याकृतं सर्वाधिष्ठातृपरमेशेक्षणाद् गुणसाम्यावस्थां सन्त्यजद् व्यक्तसंज्ञां च गच्छद् उत्पन्नमिति वदता ग्रन्थकारेण अभावकारणवादस्य खण्डनं कृत्वा सत्कारणवादः प्रतिष्ठापितः। अस्य जगतः कारणं सद्, उत्पत्तेः प्राक् जगदिदं सद्रूपेणासीत्। सतः कारणात्तदभिन्नत्वेन कार्यमुत्पद्यते। उत्पत्तेः प्राक् च कार्यं कारणरूपेण अवतिष्ठत इति सत्कारणवादिनो वेदान्तिनो बाभाषन्ते।

१. ब्र.सू.शां.भा. अध्यासभाष्यम् पृ. १६
२. कै.दी. १.३०
३. छा.उ. ३.१९.१
४. तै.उ. २.७.१



## ३.१२ अविद्या —

अध्यासस्य कारणं तु मिथ्याज्ञानद्यपर्याया अविद्येति प्रतिपादितम्। कैवल्यदीपिकाकारोऽपि ''**अज्ञानमनादिभावरूपं ज्ञाननिवर्त्यं माम् अहं न जानामीत्युक्तलक्षणम्**[१]'' इति प्रतिपादयन् अविद्यास्वरूपं जगाद। ब्रह्म निरवयवं निर्विकारं प्रज्ञानघनमात्रम्। अतस्तस्य परिणामित्वं न सम्भवति। अपि च ब्रह्मणः सत्तास्फुरणे यथा जगति भासेते, तथैव जगति चैतन्यविलक्षणं जडत्वमपि भासते। एवं सति केन विशेषेण युक्तं सद् ब्रह्म जगत्कारणमिति विचिन्त्य, तत्त्वज्ञानिनः सत्त्वरजस्तमोगुणात्मिका मायाशक्तिः तस्य उपाधिरिति अवजग्मुः। तथा च श्रुतिस्मृती ''**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्**[२]'', ''**दैवी ह्येषा गुणमयी मम माया दुरत्यया**[३]'' इति। सूत्रकारेण ''**तदधीनत्वाद् अर्थवत्**[४]'' इति सूत्रेण कथितमेनमर्थं भाष्यकारा एवं व्यवृण्वन् —''**अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति, शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः**[५]'' इति। इयमेवाविद्याशक्तिप्रधानशक्त्यक्षराज्ञानतमोऽग्रहणाव्याकृतमायादिशब्दैः श्रुतिस्मृतिषु बहुधा व्यवह्रियते। पञ्चपादिकायामादावेव अविद्यायाः पञ्चदशनामानि विलिखितानि। तथा हि ''**येषां श्रुतिस्मृतीहास-पुराणेषु नामरूपमव्याकृतमविद्या माया प्रकृतिः अग्रहणमव्यक्तं तमः कारणं लयः शक्तिः महासुषुप्तिः निद्रा अक्षरमाकाशम्**[६]'' इति। भाष्यकारा अविद्यायाः कृते प्रस्थानत्रयभाष्य इमान् शब्दान् उदाजह्रुः — ''**मिथ्याज्ञानं, मिथ्याप्रत्ययः, मिथ्याबुद्धिः**[७]'', ''**अव्यक्तम्**[८]'', ''**अक्षरः**[९]'',

१. कै.दी. २.७८
२. श्वे.उ. १.३
३. भ.गी. ७.१४
४. ब्र.सू. १.४.३
५. ब्र.सू.शां.भा. १.४.३
६. पं.पा. पृ. २७
७. ब्र.सू.शां.भा. १.१.१, १.१.४, १.२.८, २.१.१४, २.३.३१, ४.१.१९
७. बृ.उ.शा.भा. ३.८.११
९. ब्र.सू.शां.भा. १.४.३, मु.उ.शा.भा. २.१.२

“**महासुषुप्तिः**[१]”, “**आकाशः**[२]”, “**अध्यासः**[३]”, “**माया**[४]”, “**भ्रान्तिः**[५]”, “**बीजशक्तिः**[६]” इति ।

आब्रह्मस्तम्बपर्यन्तं सर्वमिदं जगद् अज्ञानविजृम्भितमिति अद्वैतवादिनां सिद्धान्तः । अद्वितीये ब्रह्मण्येव अज्ञानवशात् सर्वमिदमारोपितं रज्जौ यथा सर्पः । यथाऽऽहुः नैष्कर्म्यसिद्धिकाराः —

“**न पृथङ् नात्मना सिद्धिरात्मनोऽन्यस्य वस्तुनः ।**
**आत्मवत्कल्पितस्तस्मादहङ्कारादिरात्मनि ॥**[७]” इति ।

अत्रेदं विचारणीयं किमिदमज्ञानमिति । न ज्ञानम् अज्ञानम् इति तावद् अज्ञानशब्दस्य व्युत्पत्तिः। नञर्था हि षड्विधाः प्रसिद्धाः।[८] तेष्वज्ञानमित्यत्र विरोधाबोधक एव नञ् इति वेदान्तिनामाशयः। यतो हि भावपदार्थ एव भावात्मकवस्तुनः उपादानं भवति, नाभावपदार्थः। अतः एतस्य भावात्मकस्य प्रपञ्चस्य उपादानभूता अविद्या भावस्वभावा एव भवितुमर्हति नाभावरूपा । तथा च ज्ञानविरोधि अज्ञानमिति फलितम् । अज्ञानलक्षणं वेदान्तसारे सदानन्दयतिभिरेवम् उपन्यस्तम् — “**अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित्**[९]” इति । अदो लक्षणं कैवल्यदीपिकाग्रन्थकारोऽभाषत ।

नेदमज्ञानं सद्रूपम्, अज्ञानस्य सत्त्वे चिदात्मवत् बाधाभावप्रसङ्गात् । नापि असत्, असत्त्वे च कारणत्वानुपपत्तेः वन्ध्यासुतादिवत् अपरोक्षप्रतिभासानुपपत्तेश्च । एवञ्च अज्ञानं सत्त्वेन असत्त्वेन वा निरूपयितुं न शक्यते, तदर्थम् अनिर्वचनीयम्

१. ब्र.सू.शां.भा. १.४.३
२. बृ.उ.शां.भा. १.४.३, ३.८.११
३. ब्र.सू.शां.भा. अध्यासभाष्यम्
४. ब्र.सू.शां.भा. २.१.९, १.३.९
५. ब्र.सू.शां.भा. अध्यासभाष्यम्
६. ब्र.सू.शां.भा. १.४.३
७. नै.सि. २.४५
८. “तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥” — भू.सा. इत्यत्र नञर्थनिर्णये
९. वे.सा. पृ. २४



इत्युक्तम् । अज्ञानस्य अनिर्वचनीयत्वेन सर्वथा ज्ञातुमशक्यत्वात् अभावप्रसङ्ग इति चेत् — “त्रिगुणात्मकम्” इत्युक्तम् । “**अजामेकाम्**[१]”, “**देवात्मशक्तिं स्वगुणैर्निगूढाम्**[२]” इत्यादिश्रुतिभिः अज्ञानस्य सत्त्वरजस्तमोगुणात्मकत्वं प्रतिपादितम् । नन्वेवं श्रुतिप्रसिद्धस्य अजस्य अज्ञानस्य व्योमादिरूपेण विततस्य सत्यवद्भासमानत्वेन न संसारनिवृत्तिः इत्याशङ्क्याऽऽह — ज्ञानविरोधि इति । ज्ञानाभाव एव अज्ञानमिति तार्किकमतनिराकरणाय ज्ञानप्रागभावे अतिव्याप्तिवारणाय भावरूपमिति । ननु भावत्वमपि अज्ञानस्य अनुपपन्नम्, अनादेस्तस्य भावरूपत्वे चिदात्मवद् अनिवृत्तिप्रसङ्गाद् अनिर्मोक्षोपपत्तेः इत्यतः आह — यत् किञ्चिदिति । त्रिगुणात्मकभावरूपत्वे अपि इदमित्थमिति पिण्डीकृत्य प्रदर्शयितुं न शक्यते । वेदान्तिभिः अज्ञानस्य भावत्वं परमार्थसत्त्वाभिप्रायेण नोच्यते, किन्तु अभाववैलक्षण्याभिप्रायेण । इदमज्ञानलक्षणं चित्सुखाचार्या एवमाहुः —

“**अनादिभावरूपं यद्विज्ञानेन विलीयते ।**
**तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते ॥**[३]” इति ।

यदनादि भावरूपं तत्त्वज्ञानोदये च तिरोभवति तद् अज्ञानमित्यर्थः । प्रकृतग्रन्थकारः कैवल्यदीपिकाकारोऽपि अज्ञानलक्षणविषये पूर्वाचार्योक्तलक्षणमनुकरोति ।

## ३.१२.१ अविद्याविषयः —

चिन्मात्रं ब्रह्मैव अविद्याया विषय इत्यत्र भामतीपन्थिनां विवरणपन्थिनां च मतैक्यमस्ति । अज्ञानं परब्रह्मणि अज्ञानविषयतामारोप्य निर्विशेषं ब्रह्म मायामयत्वेन विश्वस्रष्टृत्वेन गुणमयेन च प्रकाशयति । परब्रह्मणः अज्ञानकल्पितत्वाभावात् तस्य अज्ञानाश्रयत्वे न अन्योन्याश्रयप्रसङ्गः । तस्य स्वप्रकाशत्वात् तस्मिन् आवरणकृत्यं न सम्भवति । सदा स्वरूपतः प्रकाशमानस्य शुद्धचैतन्यस्य परिपूर्णाद्याकारेण अप्रकाशमानत्वाच्च तत्र आवरणकल्पने न किमपि बाधकम् । न च अज्ञानावरणे सति ब्रह्मणः स्वप्रकाशत्वविरोधः इति वाच्यम् । कल्पितभेदं जीवं प्रत्येव शुद्धचैतन्यस्य आवृतत्वं विवक्षितमिति उपपत्तेः । न च ज्ञानाज्ञानयोः

१. श्वे.उ. ४.५
२. श्वे.उ., १.३
३. त.प्र. १.९

विरोधात् ज्ञानरूपं ब्रह्म कथमज्ञानस्य विषयो भवतीति वाच्यम्, वृत्त्यवच्छेदेन हि चैतन्यस्य अज्ञानविरोधित्वं न स्वरूपतः इति स्वरूपचैतन्यस्य अज्ञानविषयत्वे दोषाभावात्। अपि च ज्ञानाज्ञानयोः भिन्नविषयता न सम्भवति। ज्ञानस्य यो विषयः, अज्ञानस्यापि स एव विषयः इति हि नियमः। तथा च पूर्णब्रह्मणः ज्ञानविषयत्वात् अज्ञानविषयत्वम् अपि स्वीकरणीयम्। इदं ब्रह्मणः अज्ञानविषयत्वं न वास्तविकम् अपि तु कल्पितमेव। अन्तःकरणवृत्तेः व्याप्तिवशादेव ब्रह्मणि विषयत्वं भासते, एकस्मिन्नेव निर्विशेषे ब्रह्मणि धर्मधर्मिभावज्ञातृज्ञेयभावादि-कमारोप्यते। यद्यपि ज्ञानमेव आत्मा तथापि अज्ञानवशाज्ज्ञानम् आत्मनो धर्मः, आत्मा च धर्मी, ज्ञानं विषयः, आत्मा च विषयी इत्येवं ज्ञानरूपेण आत्मनि धर्मधर्मिभावविषयविषयीभावादि उत्पद्यते। एवञ्च अज्ञानमेव ज्ञानस्वरूपं परमात्मानं ज्ञानस्याश्रयत्वेन विषयत्वेन च प्रकाशयति।

### ३.१२.२ अविद्याऽऽश्रयः —

अविद्येतरजडस्य तज्जृम्भणतया कारणस्य कार्याश्रितत्वायोगात् अप्रतीति-प्रसङ्गाच्च तावदविद्याया जडनिष्ठत्वं न सम्भवति। अपि चाविद्या न स्वप्रकाशा, तस्या आश्रयोऽपि चेज्जडः, न हि एषा कदापि प्रकाशेत। तस्मात् तन्निष्ठत्वं वक्तव्यम्, यत्प्रकाशाद् एषापि प्रकाशते। तर्हि तस्या अविद्यायाः चैतन्यनिष्ठत्वम् आयाति।

तत्र अविद्या जीवरूपचैतन्यनिष्ठा, ब्रह्मरूपचैतन्यनिष्ठा वेति प्रश्ने अविद्या ''**परमेश्वराश्रया**[१]'' इति भाष्यकारवचनमुररीकृत्य ब्रह्म एव अविद्याया आश्रयः इति विवरणमतानुयायिनः। ब्रह्मतिरस्करण्याः ब्रह्मस्वरूपाच्छादकभूताया वा अविद्याया ब्रह्मणि सत्त्वादेव ब्रह्मणो यथार्थस्वरूपं जीवेषु न प्रकाशते। तथा च ''**विद्यते एव अत्रापि अग्रहणाविद्यात्मको दोषः प्रकाशस्य आच्छादकः**[२]'' इत्याहुः पञ्चपादिकाकाराः। सर्वज्ञात्ममुनीनां मतेऽपि ब्रह्म एव अविद्याया आश्रयो विषयश्चेति — ''**आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला**[३]''

---

१. ब्र.सू.शां.भा. १.४.३
२. पं.पा. पृ. ७३
३. सं.शा. १.३१९



इति। अविद्या हि ब्रह्म आश्रित्य ब्रह्मविषयकं विचित्रविभ्रममुत्पादयति। न ह्येतेषां मते जीवः अज्ञानाश्रयो भवितुमर्हति, अज्ञानकल्पितस्य जीवस्य अज्ञानाश्रयत्वासम्भवात्।

सुरेश्वराचार्याणां मतेऽपि अज्ञानकल्पितजीवस्य अज्ञानाश्रयत्वासम्भवात् ब्रह्म एव अज्ञानाश्रयः। तथा चोक्तं नैष्कर्म्यसिद्धौ — ''**एवं तावन्नानात्मनोऽज्ञानित्वं नापि तद्विषयमज्ञानम्। पारिशेष्यादात्मन एवास्तु अज्ञानं तस्य अज्ञोऽस्मीत्यनुभवदर्शनात्**[१]'' इति। न च अविद्याश्रयत्वे ब्रह्मणः संसारित्वप्रसङ्ग इति वक्तव्यम्। दर्पणस्य मुखमात्रसम्बन्धेऽपि प्रतिबिम्बमुखे मालिन्यवत् प्रतिबिम्बे जीवे संसारः, न बिम्बे ब्रह्मणि, उपाधेः प्रतिबिम्बपक्षपातित्वात्, प्रतिबिम्बे एव कार्यविशेषजनकत्वात्। यथा मलिनदर्पणो मालिन्यं स्वान्तर्गतं च प्रतिबिम्बे एव जनयति, न तु बिम्बे तथैव अविद्या जीवमेव आवृणोति, आवरणप्रयुक्तम् मन आदिकार्यं च जीवे एव जनयति न तु ब्रह्मणि।

भामतीकाराणां मते जीवस्य ब्रह्मविषयकम् अनादि अज्ञानं तावत् सर्वैर्ज्ञायते। तस्मात् जीव एव अज्ञानस्य आश्रयः। तथा हि — ''**अन्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणाविद्याद्वयाधारः**[२]'' इति। ''**नाविद्या ब्रह्माश्रया, किन्तु जीवे**[३]'', ''**अनाद्यविद्यावच्छेदलब्ध-जीवभावः पर एवात्मा स्वतो भेदेन अवभासते। तादृशानां च जीवानाम् अविद्या, न तु निरूपाधिनो ब्रह्मणः**[४]'' इति अविद्यावच्छिन्नचैतन्यरूप-जीवाश्रितत्वम् अविद्याया उक्तम्। न च जीवस्य जीवत्वमेव अज्ञानकल्पितम् इति अज्ञानकल्पितो जीवः कथमज्ञानस्य आश्रयो भवेत्, परस्पराश्रयदोषत्वात् इति वाच्यम्।

''**जीव ईशो विशुद्धा चिद् विभागश्च तयोर्द्वयोः।**
**अविद्या तच्चितोर्योगः षडस्माकमनादयः॥**[५]''

---

१. नै.सि. अध्यायः ३ पृ. १२७
२. भामती, अध्यासभाष्यम्, पृ. ४५
३. भामती, १.१.४
४. भामती, १.२.१
५. अ.सि. पृ. ८१ इत्यत्र उद्धृतः श्लोकः

इत्यनेन बीजाङ्कुरवत् जीवाज्ञानयोः अनादित्वात्। उक्तं हि भामत्याम् ''**न च अविद्योपाधिभेदाधीनो जीवभेदः, जीवभेदाधीनश्च अविद्योपाधिभेद इति परस्पराश्रयादुभयासिद्धिरिति साम्प्रतम्। अनादित्वाद्बीजाङ्कुरवद् उभयसिद्धेः**[1]'' इति।

नन्वेवं सति ''**अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी**[2]'' इति अज्ञानस्य परमेश्वराश्रयत्वं वदता भाष्यकारेण सह विरोधः इति चेत् — न। भाष्ये आश्रयशब्दस्य विषय इत्यर्थः। तथा च परमेश्वराश्रया इत्यस्य परमेश्वरविषया इत्यर्थः। विद्यास्वरूपस्य ब्रह्मणः अविद्याश्रयत्वम् अविद्याधिकरणत्वं वा न सम्भवति, यथा आलोकः अन्धकारस्य आश्रयो न भवति। जीवस्य तावद् ब्रह्मविषयकम् अज्ञानम् अस्तीति ब्रह्मणः विषयत्वमेव युज्यते, नाश्रयत्वम्। अतः अविद्याया जीवाश्रयत्वं निरवद्यम्।

### ३.१२.३ आवरणशक्तिः —

ब्रह्म स्वशक्तिभूतमायाप्रभावेण इदं नामरूपात्मकं जगत् प्रपञ्चयन् अधिष्ठानरूपेण वर्तते। जीवाश्च अज्ञानवशात् इदं नामरूपात्मकं जगद् एव पश्यन्ति, न तु ब्रह्मरूपाधिष्ठानम्। इदमेव अविद्यायाः अज्ञानस्य वा कार्यम्। भ्रमजननी अविद्या जीवानां बुद्धिसकाशात् ब्रह्मस्वरूपम् आवृणोतीत्यतो जीवेषु ब्रह्मस्वरूपं न भासते। एतदेव मायागतावरणशक्तेः कार्यम्। जगद्बीजरूपा नामरूपात्मक-प्रपञ्चस्य जननी अविद्या च एकस्मादेव अद्वितीयाद् ब्रह्मणः इदं नामरूपात्मकं विचित्रं जगत् प्रकाशयति। एतदेव अविद्याया विक्षेपशक्तेः कार्यम्। एवम् अज्ञानस्य आवरणविक्षेपशक्तिनामकं शक्तिद्वयं वर्तते। तदेव प्रतिपादयन् कैवल्यदीपिकाकारेणावादि —

''**पत्युः पशूनां कृपयैव सर्व-**
**भोगार्थमज्ञानमयं तमो हि।**
**विक्षेप इत्यावरणं च नाम्ना**
**द्वेधा भवत्यावृतये विसृष्टयै॥**[3]'' इति।

१. भामती. १.४.३
२. ब्र.सू.शां.भा. १.४.३
३. कै.दी. १.३५



इदं शक्तिद्वयमपि अविद्याया वृत्तिरिति कथ्यते। अविद्या आवरणशक्त्या ब्रह्मणः सच्चिदानन्दस्वरूपं आवृणोति, विक्षेपशक्त्या च ब्रह्मणि जगद्विभ्रम् उत्पादयति।

### ३.१२.४ विक्षेपशक्तिः —

विक्षेपस्तु अज्ञानकार्यम्। ब्रह्मादिस्तम्बपर्यन्तं जगज्जलबुद्बुद्वत् नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिः। तदेवोक्तं वेदान्तसारे — ''**अज्ञानपि स्वावृतात्मनि विक्षेपशक्त्याऽऽकाशादिप्रपञ्चमुद्भावयति**[1]'' इति। तस्याश्च विक्षेपशक्तेः अज्ञानं कारणम्। कारणश्च शक्तिमदिति आवश्यकी विक्षेपानुकूला अज्ञानशक्तिः। आवरणञ्च यद्यपि न अज्ञानकार्यम्, तस्य अनादित्वात्तथापि तदज्ञानप्रयोज्यं भवत्येव इति आवरणानुकूला शक्तिरपि अज्ञाने आवश्यकी। तस्माद् आवरणविक्षेपनामकम् इत्यस्य आवरणविक्षेपानुकूलम् इत्यर्थे पर्यवसानात् आवरणविक्षेपानुकूलं शक्तिद्वयमज्ञाने अस्ति।

अत्र कैवल्यदीपिकायाम् अज्ञानस्य विक्षेपशक्तेः कार्यं ग्रन्थकारेण इत्थं न्यरूपि —

''**शक्तिर्विक्षेपनाम्नी समभवदथ सा व्योम तस्मान्नभस्वान्**
**तस्मादग्निस्ततोऽम्भः समभवदवनिः पञ्चभूतानि तानि।**
**नाम्ना प्रोक्तानि धीरैरिति सकलनृणां भोगलाभाय तेभ्यो**
**जातं पुर्यष्टकं तज्जगति जनिमतां लिङ्गदेहं वदन्ति॥**[2]'' इति।

इयं विक्षेपशक्तिः ''**एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः**[3]'' इत्युक्त-लक्षणब्रह्मविद्याभ्यासपराणां मुमुक्षूणाम् अभ्यासपाटवेन निवर्तते। अपि च —

''**अपि क्षये वा जगतां सुषुप्तौ संवर्तनकालेऽपि च कस्य मोक्षः।**
**विक्षेपकार्यं किल मुक्तिबीजं दुष्टा वृत्तिः संसरणैकहेतुः॥**[4]'' इति।

१. वे.सा. पृ. १२२
२. कै.दी. १.३६
३. वे.वि. २.१०५
४. कै.दी. १.५५

### ३.१२.५ समष्ट्यज्ञानं व्यष्ट्यज्ञानञ्च —

अनादिभावरूपं ज्ञानविरोधि यदज्ञानं तत्समष्टिव्यष्ट्यभिप्रायेण एकमनेकमिति च व्यवह्रियते। यथा वृक्षाणां समुदायः एकत्वविवक्षया समष्टिः, चूतादयो बहवो हि वृक्षा अनेकत्वविवक्षया व्यष्टिः। तथैव अज्ञानपि एकमित्यभिप्रायेण समष्टिः, अनेकमित्यभिप्रायेण व्यष्टिरिति व्यपदिश्यते। तथा च श्रुतिः ''**अजामेकाम्**[१]'' इति समष्ट्यज्ञानाभिप्रायेण, ''**इन्द्रो मायाभिः पुरुरूप ईयते**[२]'' इति व्यष्ट्यज्ञानाभिप्रायेणेति। तथा च समष्टिव्यष्टीति जीवेशयोः भेदव्यवहारो लौकिकः इति दर्शयति कैवल्यदीपिकाकारः —

**''वृक्षो व्यष्टिः स्यादरण्यं समष्टिः**
**गेहो व्यष्टिः पत्तनं स्यात्समष्टिः।**
**देहो व्यष्टिः स्यात्प्रपञ्चः समष्टिः**
**शम्भोर्जीवस्यैष एव प्रभेदः॥**[३]'' इति।

### ३.१२.५.१ ईश्वरः प्राज्ञः च —

तत्र अनादिसिद्धं समष्ट्यज्ञानम् उत्कृष्टोपाधितया उपाध्यन्तराननुरक्ततया अप्रतिहतज्ञानात्मकस्य चैतन्यस्य उपाधितया वा विशुद्धं सत्त्वप्रधानं रजस्तमोभ्याम् अनभिभूतं रागद्वेषादिरहितं भवति। एतत् समष्ट्यज्ञानोपहितं समष्ट्यज्ञानोपलक्षितं वा चैतन्यम् ईश्वरः।[४] अर्थात् सुषुप्त्यभिमानी समष्टिजीवः ईश्वरः अव्याकृतश्च इत्युच्यते। स्वरूपे अवस्थानात् ईश्वरः, अनभिव्यक्तनामरूपवत्त्वाद् अव्याकृतश्च। किन्तु समष्टिव्यष्टिरूपोऽयं विभागः शरीरोपाधिमाश्रित्य कृतः। शरीरं तु न आत्मा। अतः केवलचैतन्यरूप आत्मा एक एव समष्टिव्यष्टिरूपेण अवस्थित इति ज्ञायते।

ननु ईश्वरोपाधिः अज्ञानसमष्टिः कुतः इति चेदुच्यते — जीवानां हि प्रत्येकम् अज्ञानव्यष्टयः स्फुरन्ति, न अज्ञानसमुदायः। ईश्वरस्य तु सकलानि अज्ञानानि

१. श्वे.उ. ४.५
२. ऋ.सं. ६.४७.१८
३. कै.दी. १.४४
४. भामतीकाराणां मते—''समष्ट्यज्ञानावच्छिन्नं मायावच्छिन्नं वा चैतन्यम् ईश्वरः।''
विवरणकाराणां मते—''मायोपाधिविशिष्टम् चैतन्यम् ईश्वरः।''



स्फुरन्ति, तस्य सर्वज्ञत्वात्। अतः अज्ञानसमष्टिः ईश्वरोपाधिः। एवं समष्ट्यज्ञानोपलक्षितम् ईश्वरचैतन्यं सर्वज्ञत्वसर्वनियन्तृत्वादिगुणकम्, अव्यक्तम्, अन्तर्यामि, जगत्कारणम् इति च व्यपदिश्यते। ''**यः सर्वज्ञः सर्ववित्**[१]'' इति श्रुतिः ईश्वरस्य सर्वज्ञत्वे मानम्। अस्यां श्रुतौ सर्वज्ञः इति सामान्यतः, सर्वविद् इति विशेषतः उक्तम्। इदम् ईश्वरचैतन्यं सकलाज्ञानावभासकत्वात् सर्वस्य चराचरात्मकप्रपञ्चस्य साक्षित्वाच्च सर्वज्ञ इत्युच्यते। तथा सर्वेषां जीवानाम् ईशितृत्वेन कर्मानुरूपफलदातृत्वेन चेश्वर इति। अपि च सर्वेषां जीवानाम् अन्तर्हृदये स्थित्वा बुद्धिनियामकत्वेन अन्तर्यामी इति उच्यते। सर्वस्य चराचरात्मकप्रपञ्चस्य विवर्ताधिष्ठानत्वेन जगत्कारणमिति व्यदिश्यते।

सकलप्रपञ्चकारणस्य अज्ञानस्य समष्ट्यभिप्रायेण एकत्वेऽपि अहङ्कारादिकारणीभूतानां जीवगताज्ञानानां व्यष्ट्यभिप्रायेण प्रत्येकविवक्षायाम् अनेकमिति व्यवहारः। यथा समुदायविवक्षया वापीतडागादिषु जलाशय इति व्यवहारः, एकत्वव्यवहारे प्रत्येकं वाप्यादिविवक्षया बहूनि जलानि इति व्यवहारः। अत्रायमयमभिसन्धिः — जीवभेदो बद्धमुक्तप्रतिभासाद् आवश्यकः। न हि एकस्य जीवस्य बद्धत्वं मुक्तत्वञ्च सम्भवति। जीवभेदे सत्येव हि एतत्सर्वमुपपद्यते। जीवभेदेऽज्ञानभेदोऽपि वक्तव्यः, अन्यथा कस्यचित्तत्त्वज्ञानेनाज्ञाननिवृत्ते जीवान्तरस्य बन्धानुपपत्तिस्स्यात्। तत्त्वज्ञानेनाज्ञाननिवृत्तौ तत्त्वज्ञानिनोऽपि मोक्षो न स्यात्, अज्ञानसत्त्वात्। तस्माद् अज्ञानभेदो वक्तव्यः। एवञ्च व्यष्ट्यज्ञानोपहितं चैतन्यम् अल्पत्वानीशत्वादिगुणकं प्राज्ञो जीवः इत्युच्यते अर्थात् सुषुप्त्यभिमानी व्यष्टिजीवः प्राज्ञः। सुषुप्तौ किमपि विशिष्टं ज्ञानं न भवति, तत्र कारणशरीरे अभिमानवानहं ममेत्यभिमानाविष्टो जीवो ''प्राज्ञ'' इत्युच्यते। प्रज्ञा अविनाशिस्वरूपा अनुभवरूपा अस्य अस्तीति प्रज्ञः। अथवा प्रकर्षेण अज्ञः प्रज्ञः, प्रज्ञ एव प्राज्ञ इति प्राज्ञशब्दस्य व्युत्पत्तिः। क्वचित्तु प्रायेण अज्ञ इति प्राज्ञ इत्यपि व्युत्पत्तिः श्रूयते। अस्य प्राज्ञत्वम् अस्पष्टोपाधितया अनतिप्रकाशकत्वम्। संस्काररूपास्पष्टोपाधितया तदा आवृतत्वेन, रजस्तमोभ्याम् अभिभूतसत्त्वप्रधानव्यष्ट्यज्ञानोपाधिकत्वेन हेतुना अतिप्रकाशकत्वाभावात्प्राज्ञत्वमित्यर्थः। व्यष्ट्यज्ञानस्यापि अहङ्कारादिकारणत्वात् कारणशरीरत्वम्। प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वरगतमूलप्रकृतिवत्

१. मुण्ड.उ. १.१.९

सुषुप्तिकाले अहङ्कारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वमित्यर्थः । अयं प्राज्ञः चैतन्यप्रदीप्ताभिः अतिसूक्ष्माभिः संस्कारमात्रा-वशिष्टाज्ञानवृत्तिभिः स्वानन्दबाहुल्यमनुभवति । यथा स्वच्छत्वेन अन्तःकरणस्य वृत्तिः अङ्गीक्रियते तथा चैतन्यप्रदीप्ताज्ञानस्य अपि सूक्ष्माः वृत्तयः स्वीक्रियन्ते । ''**आनन्दभुक् चेतोमुखः प्राज्ञः**[1]'' इति श्रुतेः । समष्टिव्यष्ट्यज्ञानोपहितयोः ईश्वरप्राज्ञयोः अपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयतद्गतप्रतिबिम्बाकाशयोः इव वा तत्त्वतः अभेदः । कार्योपाध्यवच्छिन्नप्राज्ञस्य कारणोपाध्यवच्छिन्नेश्वरस्य च वस्तुतः अभेदः इत्यर्थः ।

### ३.१२.५.२ हिरण्यगर्भः तैजसश्च —

समष्टिसूक्ष्मशरीरोपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भ इत्युच्यते अर्थात् स्वप्नावस्थाऽभिमानी समष्टिजीवो हिरण्यगर्भः । हिरण्यमिव उज्ज्वलो गर्भः ज्ञानेच्छाक्रियाशक्तिसारो यस्येति हिरण्यगर्भशब्दस्य व्युत्पत्तिः । विक्षेपशक्तिमद् अज्ञानोपहितचैतन्याद् आकाशः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यश्च पृथिवी उत्पद्यते । इमानि सूक्ष्मरूपाणि पञ्चभूततन्मात्राणि अपञ्चीकृतानि । एतेभ्योऽपञ्चीकृतभूतेभ्यः सूक्ष्मशरीराणि उत्पद्यन्ते । चराचरप्राणिमात्रस्य यावन्ति अनन्तानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन स्वीयैकबुद्ध्या विषयीकृतत्वात् समष्टित्वमित्यर्थः । इदं समष्टिसूक्ष्मशरीरोपहितं चैतन्यं ''**वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि भूतानि संदृब्धानि भवन्ति**[2]'' इति श्रुतिवचनात् सर्वत्र अनुस्यूतत्वात् ''सूत्रात्मा'' इति कथ्यते । अयञ्च सूत्रात्मा स्वप्नावस्थायां सूक्ष्माभिः मनोवृत्तिभिः जाग्रद्वासनामयान् शब्दादिसूक्ष्मविषयान् अनुभवति । यद्यपि स्वाप्निकपदार्थानां साक्षिणि अध्यस्तत्वेन सुखादिवत् साक्षिवेद्यत्वम्, तथापि मनसि वृत्तिः वर्तनं येषां ते निद्रादिदोषाः, तैः स्वयं विषयान् अनुभवतीति ज्ञातव्यम् ।

व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं तैजस इत्युच्यते अर्थात् स्वप्नावस्थाऽभिमानी व्यष्टिजीवो तैजस इति । स्वप्ने हि तेजोमयस्य अन्तःकरणस्य प्राधान्यात् ।

---

१. मा.उ. १.५

२. बृह.उ. ३.७.२



सूक्ष्मशरीरं लिङ्गशरीरमित्यप्युच्यते । ''**लिङ्ग्यतेऽनेन चैतन्यमिति लिङ्गं शरीरम्**[1]'' इति लिङ्गशरीरस्य व्युत्पत्तिः । एतल्लिङ्गशरीरं द्विविधं भवति — समष्टिभूतं व्यष्टिभूतञ्च । समष्टिभूतम् अपरिच्छिन्नम्, व्यष्टिभूतं परिच्छिन्नम् । तत्र अनेकेषां जीवानां प्रत्येकं स्वस्वलिङ्गशरीरस्य स्वस्वबुद्धिविषयत्वेन अनेकबुद्धि-विषयतया भिन्नभिन्नतया वा परिच्छिन्नत्वाद् व्यष्टित्वम् । एतद्व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं ''तैजस'' इत्युच्यते । एतत्कोशत्रयान्वितं व्यष्टिसूक्ष्मशरीरम् एव कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते । अत्रापि समष्टिव्यष्ट्योः तदुपहितसूत्रात्मतैजसयोः वनवृक्षवत् जलाशयजलवदभेदः ।

### ३.१२.५.३ विराट् विश्वश्च —

समष्टिस्थूलशरीरोपहितं चैतन्यं विराट् इत्युच्यते अर्थात् जाग्रदवस्थायां समष्टिजीवस्य विराडिति वैश्वानर इति सञ्ज्ञा । विविधं राजत इति विराट्पदस्य व्युत्पत्तिः । विश्वेषु नरेषु अर्थात् शरीरेषु अभिमानी वैश्वानर इति । यथोक्तं भाष्यकारेण ''**विश्वेषां नराणामनेकधा नयनाद् वैश्वानरः, यद्वा विश्वश्चासौ नरश्चेति विश्वानरः, विश्वानर एव वैश्वानरः**[2]'' इति । आकाशादिसूक्ष्मभूत-पञ्चकेभ्यः पञ्चीकरणद्वारा आकाशादिस्थूलभूतानि उत्पद्यन्ते । पञ्चीकृतभूतेभ्यो भूर्भुवादीनाम् उपर्युपर्यधोऽधोविद्यमानानां लोकानां तदन्तर्गतचतुर्विधस्थूलशरीराणां तदुचितानाम् अन्नपानादीनां च उत्पत्तिर्भवति । इदं भूरादिचतुर्दशभुवनान्तर्गत-चतुर्विधस्थूलशरीरोपहितचैतन्यं सर्वनरेषु सर्वप्राणिनिकायेषु अहमिति अभिमानवत्त्वाद् वैश्वानर इति उच्यते, नानाप्रकारेण राजमानत्वात् प्रकाशमानत्वाद्वा ''विराट्'' इति उच्यते ।


चतुर्विधशरीराणां या व्यष्टिः, तदुपहितं चैतन्यं विश्व इत्युच्यते । अर्थात् जाग्रदवस्थायां व्यष्टिजीवो विश्व इत्युच्यते, सूक्ष्मशरीराभिमानं परित्यज्य स्थूलशरीरप्रवेशात् । कारणशरीराभिमानं लिङ्गशरीराभिमानं च अपरित्यज्य स्थूलशरीरादिषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्वेषु प्रत्येकम् ''अहमहम्'' इति

---

१. सं.शा.सु.टी. ३.१८१

२. मा.उ.शां.भा. १.४.१

अभिमानवत्त्वात्, तस्य विश्वत्वमिति भावः। तत्र सुषुप्त्यादौ बुद्ध्यादिसंस्कारोपरञ्जितम् अज्ञानमात्रम् उपाधिः, स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरमुपाधिः, जाग्रदवस्थायां तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमुपाधिरिति जीवस्य त्रय उपाधयो भवन्ति। तथा च पूर्वपूर्वोपाधिविशिष्टस्यैव उत्तरोत्तरोपाधिप्रवेशात् सर्वशरीरप्रवेष्टृत्वेन स्थूलभोगायतनाभिमानिनश्चैतन्यस्य ''विश्वः'' इति संज्ञा। अत्रापि अनयोः स्थूलव्यष्टिसमष्ट्योः तदुपहितयोः विश्ववैश्वानरयोः वनवृक्षवत् तदवच्छिन्नाकाशवत् च जलाशयजलवत् तद्गतप्रतिबिम्बाकाशावच्च वा अभेदः। अज्ञानस्य समष्टिव्यष्टिभेदादिकम् अधस्ताच्चित्रेण सुगमतयाऽवगन्तुं शक्यते।




कैवल्यदीपिकायामपि उक्तरीत्यैव अज्ञानस्य शक्तिद्वयं निरूप्य ईश्वरप्राज्ञयोः, सूत्रात्मतैजसयोः, विराड्विश्वयोः उपाधिपरित्यागे अभेदः प्रतिपादितः। तद्यथा —

''**स्थूलाभिमानी खलु विश्व उच्यते**
**विराट् समष्ट्या ग्रहतः परेशः।**
**एतद्द्वयोर्जागरणश्च कोशः**
**त्वन्नाभिधस्थूलविसर्ग एषः॥**[१]'' इति।

१. कै.दी. १.४२



## ३.१३ सृष्टिक्रमः —

एवंनिरूपितायाम् अनादिप्रकृतौ मायायां जगन्निर्माणशक्तिर्विद्यते। सृष्टेः प्राक्, सा अव्याकृतनामरूपात्मिका तिष्ठति। सा विकारप्रयोजकजाड्यादिधर्मोपेता च। यथाऽऽहुः भाष्यकाराः — ''**अव्यक्तं सर्वस्य जगतो बीजभूतम् अव्याकृतनामरूपं सत्तत्त्वं सर्वकार्यकारणसमाहाररूपम् अव्याकृताकाशादिनामवाच्यं परमात्मनि ओतप्रोतभावेन समाश्रितम्, वटकणिकायाम् इव वटवृक्षशक्तिः**[१]'' इति। एतन्मायोपाधिकत्वब्रह्मणः, जगतः उपादानत्वं निमित्तत्वञ्च सम्भवति। तथा च श्रुतिः ''**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्**[२]'', ''**अस्मान्मायी सृजते विश्वमेतत्**[३]'' इति।

उपादानम् आरम्भि, परिणामि, विवर्ति चेति त्रिविधं भवति। तत्र आरम्भवादस्य वेदान्तेषु सुतरामनङ्गीकारात्, परिणामविवर्तवादौ अवशिष्येते। तदा ब्रह्मणो मायायाश्चेति उभयोरपि उपादानत्वमङ्गीक्रियते। ब्रह्मण्यध्यस्ततया विक्रियमाणा माया परिणाम्युपादानम्। कूटस्थं मायाऽधिष्ठानभूतं ब्रह्म विवर्तोपादानम्। वेदान्तेषु क्वचिद्विवर्तवादस्य भूमित्वेन परिणामवादोऽपि स्वीकृतः, किन्तु न तत्र तस्य तात्पर्यम्। यथोचिरे सङ्क्षेपशारीरकाराः ''**कृपणधीः परिणाममुदीक्षते क्षपितकल्मषधीस्तु विवर्तताम्**[४]'' इति। विवर्तवादानुसारम् अद्वितीयचैतन्यकूटस्थरूपब्रह्मणः अज्ञानाद्, द्वैतप्रपञ्चं प्रति तदुपादानत्वमिति कल्प्यते। अतो न तत्त्वतो ब्रह्म जगदुपादानत्वमापद्यते, किन्तु केवलं जगद्रूपेण प्रतीयते। यथा अज्ञातायां शुक्तौ रजताभावेऽपि रजतमस्तीति प्रतीति भवति, तद्वत्। यथा शुक्तिः तदवच्छिन्नं चैतन्यं वा रजताकारेण विवर्तते, तथैव ब्रह्म प्रपञ्चाकारेण विवर्तते।

### ३.१३.१ पञ्चीकरणम् —

मायोपहितः परमेश्वर एव जगतः स्रष्टेति निरूपितम्। सम्प्रति जगत्सृष्टिः

१. कठ.उ.शां.भा. १.३.११
२. श्वे.उ. ४.१०
३. श्वे.उ. ४.९
४. सं.शा. २.८९

कथं सम्भवतीति पञ्चीकरणदिशा आलोचयामः। मायोपहितः परमेश्वरो नामरूपात्मकनिखिलप्रपञ्चं पूर्वपूर्वसर्गानुरूपम् अर्थाद् यद्यद्वस्तु यन्नामकं यद्यदाकारञ्च आसीत् तदनुसारं बुद्धौ मायावृत्तौ वा विषयीकृत्य ''**तदैक्षत बहुस्यां प्रजायेय**[1]'', ''**सोऽकामयत बहुस्यां प्रजायेय**[2]'', ''**स ईक्षत लोकान्नु सृजा**[3]'' इत्यादिश्रुत्यनुसारमीक्षते। तादृशसङ्कल्पानन्तरं तमःप्रधानविक्षेपशक्तिमद-ज्ञानोपहितचैतन्यात् प्रथमम् आकाशः, ततो वायुः, ततस्तेजः, तत आपः, ततः पृथिवी इत्येवंरूपेण क्रमवन्ति अपञ्चीकृतानि भूतानि उत्पद्यन्ते। ''**तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः**[4]'', ''**यतो वा इमानि भूतानि जायन्ते**[5]'' इत्यादिश्रुतिरत्र मानम्।

अत्रैवमाशङ्का — त्रिगुणात्मकत्वाद् अज्ञानस्य कथं तमोगुणमात्रप्राधान्येन आकाशादि जनकत्वमुक्तम्? उच्यते — उत्पत्तिवेलायां सत्त्वादयस्त्रयोऽपि गुणाः तारतम्येन कारणगुणप्रक्रमन्यायेन तेषु आकाशादिषु पञ्चभूतेषु उत्तरोत्तराधिक्येन जायन्ते। यद्यपि अज्ञानकार्ये अज्ञानगतसत्त्वरजस्तमोव्यतिरेकेण सत्त्वरजस्तमांसि न भिन्नानि सन्ति, तथापि अज्ञानगतसत्त्वरजस्तमसः कार्यजाड्यादेः एव उत्पत्तिः उक्तेति मन्तव्यम्। एतानि एव आकाशादीनि सूक्ष्मशरीरादीनां स्थूलभूतानाञ्च कारणभूतानि सूक्ष्मभूतानि व्यवहाराक्षमाणि तन्मात्राणि परस्परम् असंसृष्टानीति स्मृत्यादिषु गीयन्ते। तत्र शब्दतन्मात्रम् आकाशस्य, स्पर्शतन्त्रमात्रं वायोः, रूपतन्मात्रं तेजसः, रसतन्मात्रम् अपाम्, गन्धतन्मात्रं पृथिव्याश्च वाचकम्। तुल्यजातीयविशेषानुपपत्तेश्च तानि तन्मात्रानामधेयानि भवन्ति। अतश्शब्दतन्मात्रे उदात्तादयः शब्दविशेषाः, स्पर्शतन्मात्रे मृदुकठिनादयः, रूपतन्मात्रे शुक्लकृष्णादयः, रसतन्मात्रे अम्लमधुरादयः, गन्धतन्मात्रे सुरभ्यादयो विशेषा न भवन्ति। एवं तस्य तस्य गुणस्य सामान्यम् एव अत्र, न विशेषः।

---

१. छा.उ. ६.२.३
२. तै.उ. २.६
३. ऐ.उ. १.१.१
४. तै.उ. २.१
५. तै.उ. ३.६



एतेभ्योऽपञ्चीकृतभूतेभ्यः सूक्ष्मशरीराणि पञ्चीकृतानि स्थूलभूतानि चोत्पद्यन्ते। तत्र सत्त्वगुणप्रधानेभ्यो रजोगुणप्रधानेभ्यश्च अपञ्चीकृतभूतेभ्यः सूक्ष्मशरीराणि, तमोगुणप्रधानेभ्यः अपञ्चीकृतभूतेभ्यश्च पञ्चीकृतानि स्थूलभूतानि जायन्ते। तथा हि सूक्ष्मशरीरस्य सप्तदश अवयवाः —

''**पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।**
**अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्॥**[1]'' इति।

ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकञ्च। चित्तम् अहङ्कारश्च बुद्धिमनसोः अन्तर्भवतः। एतच्च लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि मनोबुद्धिभ्याम् उपेतं ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रिपञ्चकं प्राणादिपञ्चकसंयुक्तम्। स्थूलशरीरस्य नाशेऽपि इदं न नश्यति, किन्तु कर्मानुसारं नवं नवं स्थूलशरीरं स्वीकरोति।[2] कारणशरीरस्य नाशे सत्येव सूक्ष्मशरीरस्य नाशः। अज्ञानमेव कारणशरीरम्। तत्र प्रत्येकं जीवानां स्वस्वशरीरेन्द्रियादिष्वेव अभिमानित्वात्ते व्यष्टिभूताः। तत्तद्व्यक्तिविशेषो व्यष्टिः, सामान्यं समष्टिः। एतत्सूक्ष्मशरीरं द्विविधम् — परमपरञ्च। परं ब्रह्माण्डव्यापि समष्टिभूतं हिरण्यगर्भलिङ्गशरीरम्। अपरं ब्रह्माण्डव्यापि व्यष्टिभूतम् अस्मदादिलिङ्गशरीरम्। तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्वम्, अस्मदादिलिङ्गशरीरञ्च अहङ्कारतत्त्वमिति उच्यते। अपञ्चीकृतभूतेभ्यः पञ्चीकृतभूतानामुत्पत्तिः पञ्चीकरणेन भवति। पञ्चीकरणं नाम आकाशादिपञ्चसु एकैकं द्विधा समं विभज्य तेषु दशशु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयभागं परित्यज्य भागान्तरेषु संयोजनम्। तदेव जगदुः पञ्चदशीकाराः —

''**द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।**
**स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते॥**[3]''इति।

एवं पञ्चीकरणेन सर्वेषां भूतानां सर्वात्मकत्वेऽपि, तत्तद्भागेषु तत्तदंशाधिक्यात् इयं पृथिवी, इमा आपः इत्यादिविशेषव्यपदेशः सम्भवति। तथा च पारमार्षसूत्रम्

---

१. आ.बो. १२
२. भ.गी. २.२२
३. पं.द. १.२७

“**वैशेष्यात्तु तद्वादस्तद्वादः**[१]” इति।

पञ्चीकरणस्य इमामेव प्रक्रियां कैवल्यदीपिकारोऽपि प्रकटयामास —

“**कृत्वा पञ्चैव भूतान्यपि च दश ततः तेषु पञ्चापि चत्वा-**
**र्येकं भागं विहाय स्वयमथ चतुर्षु प्रायशो मेलनं यत्।**
**भागानां बुद्धिमन्तो जगति परिपठन्त्येव पञ्चीकृतिं तद्**
**भूतग्रामः समस्तस्समभवदमुतो भोगजातानि लोकाः॥**[२]”इति।

एवं पञ्चीकृतभूतेभ्यः स्थूलशरीरमुत्पद्यते। सूक्ष्मशरीरं तु अपञ्चीकृतभूतेभ्यो जायते। अत एव न तत् प्रत्यक्षगोचरम्। लिङ्गशरीरमित्यपि तस्य नामान्तरम्। लिङ्ग्यन्ते ज्ञाप्यन्ते प्रत्यगात्मसद्भाव एभिरिति लिङ्गानि, लिङ्गानि च तानि शरीराणि इति लिङ्गशरीराणि।

पञ्चीकरणानन्तरम् आकाशे शब्दः, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः, पृथिव्याञ्च शब्दस्पर्शरूपरसगन्धाः अभिव्यज्यन्ते। एतेभ्यः तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यः ऊर्ध्वं लोकसप्तकस्य अधोलोकसप्तकस्य च ब्रह्माण्डस्य, जरायुजाण्डजस्वेदजोद्भिज्जाख्यानां चतुर्विधानां भूतग्रामाणाम्, स्थूलसूक्ष्मशरीराणाम्, अन्नपानादीनां भोग्यविषयाणाञ्च उत्पत्तिः भवति। “**पञ्चीकरणादेव हेतो समष्टिव्यष्टिभेदभिन्नं चतुर्दशभुवनात्मकं ब्रह्माण्डमुत्पन्नमिति**[३]” कैवल्यदीपिकाकारस्याशयः।

## ३.१४ जीवात्मनोः स्वरूपम् —

जीवब्रह्मणोः ऐक्यमिति वेदान्तां सिद्धान्तः। ब्रह्मवज्जीवात्माऽपि सच्चिदानन्दरूपः सत्स्वरूपः चित्स्वरूपः आनन्दस्वरूपश्च इत्यर्थः। स च कूटस्थः सर्वविकारवर्जित इति न तस्य उत्पत्तिः विनाशो वा वर्तते। आत्मनो ज्ञानरूपत्वात् न तस्य परमार्थतो बन्धनं सम्भवतीति स नित्यमुक्तः। बन्धनस्य पारमार्थिकत्वे तस्य निवृत्त्यभावात् मोक्षलाभो न स्यात्, न हि स्वभावस्य निराकरणं सम्भवति।

---

१. ब्र.सू. २.४.२२
२. कै.दी. १.४१
३. कै.दी.व्या. १.४१



स चात्मा विभुः भूमस्वरूपः, सर्वभूतः, देशकालादिपरिच्छेदशून्यः, आकाशवत् सर्वव्यापी। स चात्मा एकः, सर्वदेहेषु एकः एव आत्मा वर्तते। “**एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा**[१]” इति श्रुतेः। “**भेदस्तु उपाधिनिमित्तो मिथ्याज्ञानकल्पितो न पारमार्थिकः**[२]” इति आत्मनः स्वरूपतः सुखदुःखादिरहितत्वेऽपि अन्तःकरणरूपोपाधिभेदात् सुखदुःखादिमान् इव उपलभ्यते। एवञ्च आत्मनः एकत्वे एकजीवगतसुखदुःखादीनां जीवान्तरेण उपलब्धिप्रसङ्गो नास्ति, उपाधिभेदेन सुखदुःखादिभेदोपपत्तेः। ब्रह्मणो निर्धर्मकत्वेन यद्यपि जीवात्माऽपि स्वरूपतो निर्धर्मक एव, तथापि जीवोपाधीनां जीवे स्वधर्माधानात् औपाधिकधर्मवत्त्वं जीवस्य उपपद्यते। एवमात्मा यद्यपि निर्गुणो निष्क्रियश्च तथापि उपाधियोगात् सगुणः सक्रियश्च इव उपलभ्यते। न हि नित्यस्य आत्मनः क्रिया सम्भवति, सक्रियत्वे विकारस्य अवश्यम्भावित्वाद् विकारसद्भावे च अनित्यत्वप्रसङ्गात्। एवं नित्यस्यात्मनः कर्तृत्वभोक्तृत्वादिकमपि परमार्थतो न सम्भवति पूर्णस्य क्रियाभोगादौ निमित्तानुपपत्तेः, कर्तृत्वभोक्तृत्वसद्भावे विकारप्रसङ्गेन अनित्यत्वस्य अवश्यम्भावित्वात्। न हि कूटस्थस्य नित्यस्य आत्मनो विकारः सम्भवति। तथापि मनःप्रभृतीनां कर्तृत्वभोक्तृत्वादिकम् आत्मनि आरोप्य आत्मा कर्ता भोक्ता इति व्यवह्रियते। एतदेवाध्यासिकं कर्तृत्वभोक्तृत्वादिकम् अभ्युपगम्य सूत्रकारैः जीवात्मनः कर्तृत्वभोक्तृत्वादिकं “**कर्त्ता शास्त्रार्थवत्त्वात्**[३]” इति सूत्रेण व्यवस्थापितम्।

कैवल्यदीपिकाकारेण एतस्याध्यस्तजीवस्यावस्थासप्तकमुक्तं भवति। तथा हि —

“**अवस्थाः सप्तैताः प्रकृतित इतः स्युर्मलवता-**
**मबोधः पश्चादावरण इति विक्षेप इति च।**
**परोक्षप्रत्यक्षे तदनुभवितारावपगती**
**ततो दुःखध्वंसस्तदनु सुखलब्धिश्च महती॥**[४]” इति।

---

१. श्वे.उ. ६.११
२. ब्र.सू.शां.भा. १.४.१०
३. ब्र.सू. २.३.३३
४. कै.दी. १.५८

अज्ञानम्, आवरणम्, विक्षेपः, परोक्षज्ञानम्, अपरोक्षज्ञानम्, दुःखनिवृत्तिः, आनन्दावाप्तिश्चैता जीवस्य सप्त अवस्थाः सन्ति। जीवस्य एव एता अवस्था इति कथनेन नेश्वरस्यावस्थासप्तकं भवतीत्युक्तं भवति। "**तत्सृष्ट्वा तदेवानुप्राविशत्**[१]" इत्यादिश्रुतौ च अद्वयस्य ब्रह्मणः स्वरूपेण एव बुद्धौ जीवरूपेण प्रवेशश्रवणात् जीवस्य ब्रह्माभिन्नत्वात्, तत्त्वमस्यादिमहावाक्यैः जीवब्रह्मणोः त्रैकालिकैक्य-प्रतिपादनाद् ब्रह्माभिन्नस्य जीवस्य नित्यत्वमवगम्यते। ननु "**एकमेवाद्वितीयम्**[२]" इति श्रुतौ सृष्टेः प्राग् अद्वयं ब्रह्म श्रूयते। तथा च तदा जीवो नासीत्। सृष्ट्यनन्तरं च जीवः सत्तामापन्न इति जीवस्य उत्पत्तिः स्वीकरणीया। "**यथाग्नेः क्षुद्रा विस्फुलिङ्गाः व्युच्चरन्ति, एवमेतस्माद् आत्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वाणि भूतानि, सर्वे एव आत्मानो व्युच्चरन्ति**[३]" इति श्रुतिः विस्फुलिङ्गदृष्टान्तेन जीवस्य उत्पत्तिं दर्शयति। तस्माद्वियदादिवज्जीवस्य उत्पत्तिः अनित्यत्वञ्च स्वीकरणीयमिति चेत्। अत्रायं समाधिः — जीवस्य उत्पत्तिस्वीकारे कृतनाशाकृताभ्यागादिदोषप्रसङ्गः स्यात्। जीवस्य तत्त्वाभिप्रायेण नित्यत्वं बहुशः श्रुतौ दृश्यते। तद्यथा — "**नित्यो नित्यानाम्**[४]", "**स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म**[५]" इत्याद्याः श्रुतयो जीवस्य अमृतत्वं द्योतयन्ति।

## ३.१५ चिच्चातुर्विध्यम् —

एतावता प्रबन्धेन पञ्चीकरणप्रक्रियया प्रपञ्चोत्पत्तिं तद्धेतुभूतजीवेश्वरयोः स्वरूपञ्च निरूप्य तत्त्वमस्यादिमहावाक्योत्थाखण्डधीवृत्त्या ब्रह्मात्मैक्यं भवतीति सूचितम्। प्रकृते तदेव दृष्टान्तमुखेन सम्यग्बोधयितुं ग्रन्थकारोऽयं कृष्णपण्डितः परमात्मन्यवस्थाचतुष्टयमुच्यते। अद्वितीये ब्रह्मणि अवस्थाचतुष्टयं निरूपयन् कैवल्यकारोऽब्रवीत् —

१. तै.उ. २.५.१
२. बृह.उ. ४.३.१५
३. बृह.उ. २.१.२०
४. श्वे.उ. ६.१३
५. बृह.उ. ४.४.२५



**"व्योमैकमेव जलदाम्बरमित्यथान्यत्-**
**कुम्भाम्बरं घटजलस्थनभश्चतुर्धा।**
**ब्रह्मैकमेव परिपूर्णमपीश्वरश्च**
**साक्षी च जीव इति नामवशाच्चतुर्धा॥**[१]" इति।

परमात्मा स्वभावत एकः सन्नपि उपाधिवशाच्चतुर्धा व्यपदिश्यते। यथा एक एव आकाशो घटाकाशो महाकाशो जलाकाशो मेघाकाश इतिरूपेण चतुर्विधो व्यपदिश्यते तथैव एकमेव ब्रह्म चैतन्यं परिपूर्णमपि चतुर्धा भिद्यते। तद्यथा — ब्रह्म, ईश्वरः, साक्षी, जीवश्चेति। तत्र सर्वोपाधिविवर्जितत्वाद् ब्रह्म, सर्वज्ञत्वादिधर्मकं मायोपाधिवशात् जगत्कारणं चैतन्यम् ईश्वरः, दृष्टृत्वात् साक्षी, अविद्याकार्योपाध्यवच्छिन्नं चैतन्यं जीवः इति। यद्यपि एकस्यैव चैतन्यस्यायं कल्पितभेदो वर्तते तथापि अस्य कल्पितभेदस्य ब्रह्मात्मैक्यज्ञानोपायतया सर्वैराश्रितत्वाच्च उपयोगिता वर्तते। चैतन्यभेदस्य इयं कल्पना जिज्ञासूनां सुखबोधाय एव आश्रिता, अतो न काप्यत्र विप्रतिपत्तिः। एतेषां सर्वेषाम् उपाधिपरित्यागे चैतन्याभेदमभिधाय कैवल्यदीपिकार एवमभाषत —

**"वाच्यावीश्वरजीवकावभिहितौ तत्त्वं पदस्य क्रमा-**
**ल्लक्ष्यं चेन्मलवर्जितः परपुमान् ब्रह्मापि मायोज्झितम्।**
**क्षीरेष्वाज्यमुपायशालिभिरिव त्वं स्वं विजानासि चेत्**
**सङ्घातात्सुविविच्य वेदवचनैः युक्त्या विमुक्तो भवेः॥**[२]" इति।

लोके तञ्चनाद्युपायवद्भिः क्षीरेष्वभिन्नतयाऽवस्थितमाज्यं यथा पृथक्कृत्य गृह्यते तथैव श्रुतिप्रमाणैः तत्प्रदर्शितोपपत्त्या च कार्यकरणरूपाद्युक्त्या स्वात्मानं विविच्य समूलात्संसारात् विमुक्तो भवतीति श्लोकतात्पर्यार्थः।

## ३.१६ साक्षी —

अन्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्यो-पाधित्वम्। अतः आत्मनो जाग्रदाद्यवस्थासु शरीराद्यवस्थासु च सर्वविषयान् भासकत्वात् साक्षित्वम् उपपन्नम्। अत्रात्मनि सर्वसाक्षित्वनिर्णये स्वप्रकाशत्वेन

१. कै.दी. १.६५
२. कै.दी. १.६६

निरूपिता ''**अत्रायं पुरुषः स्वयंज्योतिः**[१]'' इति श्रुतिः प्रमाणम्। तदेव आत्मनः सर्वसाक्षित्वं कैवल्यदीपिकायां एवमाख्यातम् —

''**जाग्रत्स्वप्नसुषुप्तयो बहुतराः कालास्त्रयो भूयशः**
**को वा सन्ति गता भवाम्बुनिलये कल्लोलवर्गा इव।**
**सर्वान् तानपि सर्वदृक्किल भवान् द्रष्टैव नो संशयः**
**कण्ठेकालपदाम्बुजद्वयमहं स्पृष्ट्वा वदाम्युच्चकैः॥**[२]'' इति।

इत्थं साक्षिस्वरूपं वेदान्तशास्त्रे अभ्यधायि — अन्तःकरणं हि जडम्। तस्य विषयभासकत्वायोगेन स्थूलसूक्ष्मात्मकस्य जीवशरीरद्वयस्य अवभासार्थं साक्षी स्वीक्रियते। स च स्थूलसूक्ष्मभूतयोः देहयोः साक्षाद् द्रष्टा निर्विकारत्वात् साक्षीत्युच्यते। लोकेऽपि द्वयोः विवदमानयोः सतोः, ताभ्यामन्यः तयोः विवादस्य अपरोक्षतया बोद्धा तत्र उदासीनश्च यो भवति, स साक्षीत्युच्यते। अयं साक्षी नान्यतरस्मिन् पक्षे रागवान् द्वेषवान्वा भवति। रागद्वेषरहितत्वाद् उदासीनत्वं सम्भवति। अत एव उदासीनत्वे सति बोद्धृत्वमिति साक्षिणो लक्षणम्। चेतनत्वाद् बोद्धृत्वं साक्षिणो लक्षणम्। परमात्माऽपि साक्षी। यतः उदासीनः सन् द्रष्टा भवति। निर्गुण इति पदेन रागद्वेषशून्यत्वं सिद्धम्। चेता चेतनः ज्ञानस्वरूप इत्यर्थः। तस्मात्परमात्मनो बोद्धृत्वमपि सङ्गच्छते। यद्यपि ''**साक्षाद् द्रष्टरि संज्ञायाम्**[३]'' इति पाणिनीयसूत्रं साक्षिणः दृष्टिकर्तृत्वमाचष्टे। तथापि वेदान्तप्रतिपाद्यमानः साक्षी तु दृष्टिमात्रस्वरूपः। दृष्टिकर्तृत्वं तु तस्मिन्नौपचारिकम्। साक्षाद् द्रष्टा साक्षी। अत्र साक्षादिति पदं प्रमाणवृत्त्यादीनां प्रतिबोधकम्। लोके रामः चक्षुषा प्रमाणेन घटं पश्यति। आन्तरिकं सुखदुःखादिकम् अन्तःकरणवृत्त्या पश्यति। चक्षुषादर्शनेऽपि वृत्तिरावश्यकी। तथापि चक्षुषा पश्यामीत्येव सार्वजनीनोऽनुभवः। एवं मनसा इन्द्रियैर्वा सम्पन्नस्यानुभवस्य द्रष्टा यः सः साक्षी। तस्य दर्शनसाधनान्तरं नास्ति। तस्मात् सः स्वयम्प्रकाशः। यथा प्रकोष्ठान्तर्गत-पदार्थाः प्रदीपेन प्रकाशन्ते। किन्तु प्रदीपस्य दर्शने नास्ति दीपान्तरस्य आवश्यकता, प्रदीपस्य स्वप्रकाशात्मकत्त्वात्। वेदान्ते आत्मैव स्वयम्प्रकाशो नान्यत् किञ्चित्।

१. बृह.उ. ४.३.९
२. कै.दी. १.७२
३. पा.सू. ५.२.९१



स्वप्रकाशत्वं नाम ''**स्वापरोक्षे स्वातिरिक्तानपेक्षत्वम्**[१]'' इति अद्वैतसिद्धिकारा ऊचिरे। ''**अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वम्**[२]'' इति चित्सुखाचार्या बभाषिरे। ''**अत्रैवायं पुरुषः स्वयं ज्योतिः**[३]'', ''**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति**[४]'' इत्याद्याः श्रुतयः, ''**ज्योतिषामपि तज्ज्योतिः**[५]'', ''**प्रभास्मि शशिसूर्ययोः**[६]'' इत्यादीनि गीतावचनानि च श्रुत्यर्थमनुवदन्ति।

एवञ्चायं साक्षी स्वप्रकाशस्वरूपत्वात् मनसा चक्षुरादिद्वारा च प्रकाशितं ज्ञानं विना साधनान्तरं जानाति। वृत्तेः चक्षुरादेर्वा वस्तुप्रकाशेन शक्तिरपि न स्वभावसिद्धा किन्तु औपाधिकचैतन्यनिष्ठा। अन्तःकरणवृत्तौ ''**श्रोत्रस्य श्रोतं मनसो मनः**[७]'' इति श्रुतेः ज्ञानत्वमौपचारिकम्। तथा च दृष्टिर्द्विविधा — नित्या अनित्या चेति। अनित्या चक्षुरादिदृष्टिः, नित्या आत्मस्वरूपा। सैव आत्मरूपान्तरदृष्टिः साक्षीति सङ्कीर्तिता। चक्षुरादीनां दृष्टीनां द्रष्टा भवति साक्षिरूपा नित्या दृष्टिः। तस्याः पुनः द्रष्ट्रन्तरं न विद्यते। अनवस्थाप्रसङ्गात्। न चानवस्थायां किञ्चित् प्रमाणमस्ति। तथा च श्रुतिः ''**दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता**[८]'' इति। ''**न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते अविनाशित्वात्**[९]'' इति च।

अयं हि साक्षी द्विविधः — जीवसाक्षी ईश्वरसाक्षी चेति। अन्तःकरणा-वच्छिन्नं तत्प्रतिबिम्बितं वा चैतन्यं जीव इति व्यवहारः। अन्तःकरणोपहितं चैतन्यं जीवसाक्षीति। अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यां जीवतत्साक्षिणोर्भेदः

१. अ.सि. पृ. १२३
२. त.प्र. पृ. ४
३. बृह.उ. ४.३.९
४. कठ.उ. २.२.१५
५. भ.गी. १३.१७
६. भ.गी. ७.८
७. के.उ. १.२
८. बृह.उ. ३.४.२
९. बृह.उ. ३.४.३०

अन्तःकरणस्य विशेषणत्वे जीवत्वम्, उपाधित्वे साक्षित्वमिति वेदान्ते प्रसिद्धम्। एवमेव अनाद्यनिर्वचनीया चिन्मात्रसम्बन्धिनी अघटघटनापटीयसी त्रिगुणात्मिका माया। तदवच्छिन्नं तत्प्रतिबिम्बितं वा चैतन्यं सृष्टिस्थितिलयकर्ता ईश्वरः। मायोपहितं चैतन्यम् ईश्वरसाक्षी। मायाया विशेषणत्वे ईश्वरत्वम्, उपाधित्वे साक्षित्वमिति तात्पयार्थः। विशेषणोपाध्योर्भेदश्शास्त्रेषु एवं प्राप्यते। ''**कार्यान्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वं विशेषणत्वम्**[१]''। यथा नीलो घट इत्यत्र नैल्यं विशेषणम्, घटो विशेष्यम्। घटसम्बन्धिकार्येषु नैल्यमन्वेति। शुक्लादिभ्यो व्यावर्तयति, तस्मात् नैल्ये लक्षणसमन्वयः। ''**कार्यानन्वयित्वे सति व्यावर्तकत्वे सति कार्यकाले विद्यमानत्वम् उपाधित्वम्**[२]'' इति। कर्णशष्कुल्यवच्छिन्नं नभश्श्रोत्रम् इत्यत्र कर्णशष्कुली उपाधिः। कर्णशष्कुल्याः उत्पत्तौ नाशे विकारे वा नभसः कापि न क्षतिः, तस्य निरवयवत्वात्। किन्तु इतरेभ्योः व्यावृत्तिरस्ति। तथैव ''लोहितं स्फटिकमानय'' इत्यत्र जपाकुसुमम् उपाधिः। यतो हि आनीयमाने स्फटिके जपाकुसुमम् आनयनक्रियायां नान्वेति, तथापि समीपे वर्तमानसमये शुक्लादिभ्यः स्फटिकं व्यावर्तयति। अतो जपाकुसुमम् उपाधिः।

अदो जीवसाक्षि प्रत्यात्मं नाना, एकत्वे हि मैत्रावगते चैत्रस्याप्यनुसन्धान-प्रसङ्गात्। ईश्वरसाक्षि तु मायोपहितं चैतन्यम्। तच्च तदुपाधिभूतमायाया एकत्वाद् एकम्। यथा चाचकथन् सिद्धान्तबिन्दुकाराः ''**अज्ञानोपहित आत्मा अज्ञान-तादात्म्यापन्नस्वचिदाभासाविवेकादन्तर्यामी साक्षी जगत्कारणमीश्वर इति कथ्यते। बुद्ध्युपहितश्च तत्तादात्म्यापन्नस्वचिदाभासाविवेकाज्जीवः कर्ता भोक्ता प्रमातेति च कथ्यते**[३]'' इति।

ननु साक्षिणः कर्तृत्वात्, कर्तृत्वसत्त्वे च विकारसत्त्वस्य अवश्यम्भावित्वात् कथं साक्षी निर्विकार इत्युच्यते। अत्रायं समाधिः — साक्षिणि कर्तृत्वम् आरोपितं न तु वास्तवम्। प्रकाशात्मके अकर्तरि सवितरि यथा ''सविता प्रकाशते'' इति प्रकाशकर्तृत्वमारोप्यते, तथैव दृशिस्वरूपे साक्षिणि द्रष्टृत्वं दर्शनकर्तृत्वं वा

---

१. वे.प.अ.व्या., पृ. ६८

२. वे.प.अ.व्या., पृ. ६८

३. सि.बिं. १



आरोप्यते। यत्तु विकारि, तदन्तःकरणम्। तस्य च साक्षिस्वरूपे अनन्तर्भावादेव अन्तःकरणोपहितं चैतन्यं साक्षीत्युच्यते। कार्यानन्वयित्वे सति व्यावर्तकत्वम् उपाधेः लक्षणम्। प्रकृते विक्रियवदन्तःकरणम् अविक्रिये साक्षिस्वरूपे नान्तर्भवतीति स उपाधिर्जीवस्य प्रमातृत्वविवक्षायां तु अन्तःकरणं विशेषणं भवति। कार्यान्वयित्वे सति व्यावर्तकत्वं विशेषणस्य लक्षणम्। अन्तःकरणं हि प्रमातृरूपेण अन्वितम्। अन्तःकरणवैशिष्ट्ये सति जीवः कर्मणः कर्ता, फलस्य च भोक्ता। अन्तःकरणस्य उपाधित्वे तु कर्तृत्वादिविकाररहितः साक्षी। एतौ भोक्तृसाक्षिणौ विविच्य मुण्डकश्रुतिः एवं दर्शयति —

''**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥**[१]'' इति।

वस्तुतस्तु साक्षी अकर्ता, अभोक्ता, उदासीनश्च। स एव साक्षी कूटस्थ इत्युच्यते। तदुक्तम् ''**देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यते**[२]'' इति।

अतः औदासीन्यबोधाभ्यामेव साक्षित्वम्। अन्तःकरणोपाधिकं चैतन्यं हि जीवः। अन्तःकरणवृत्तीनां प्रकाशात्मकतया यद्यपि घटादिविषयाणां शरीरद्वयस्य चावभासनं सम्भवति, तथापि अन्तःकरणस्य जडत्वादन्तःकरणवृत्त्याख्यः अन्तःकरणपरिणामोऽपि जडः। जडत्वेन च अप्रकाशात्मिका अन्तःकरणवृत्तिः स्वप्रकाशार्थमेव चैतन्यम् अपेक्षते। तस्माज्जीवस्य स्थूलसूक्ष्मदेहद्वयस्य अवभासार्थं साक्षी स्वीकरणीय एव। तथैव वृत्तीनाम् उत्पत्तिविनाशशालितया, तदुत्पत्तिविनाशतद्भेदादेः अपरोक्षतया भानम्, सार्वकालिकमवभासनञ्च नित्यचैतन्यानङ्गीकारे नोपपद्यते। अतो जीवस्य सर्वविषयावभासकतया नित्यचैतन्यं साक्षिरूपं वेदान्तशास्त्रे निरूपितम्। तदेव बभाषिरे च पञ्चदशीकाराः —

''**कर्तारं च क्रियां तद्वद्व्यावृत्तविषयानपि।**
**स्फोरयेदेकयत्नेन योऽसौ साक्ष्यत्र चिद्वपुः॥**[३]'' इति।

---

१. मुण्ड.उ. ३.१

२. सि.ले.सं. पृ. १८०

३. पं.द. १०.९

अत्र कर्ता अहङ्कारः, क्रिया अन्तःकरणवृत्तयः। एतदुभयं साक्षिवेद्यम्। यद्यपि विषया अपि साक्षिवेद्याः तथापि अन्तःकरणतद्धर्माः केवलसाक्षिवेद्या इति विशेषः। अयञ्च साक्षी सर्वदा अनावृतः सन् तिष्ठति। अनावृतस्वरूपेण साक्षिणा सह सम्बन्धाद् एव विषयाणाम् अज्ञानान्तःकरणतद्धर्माणाञ्च प्रकाशो भवति। तद्यथा — जीवकोटौ ब्रह्मकोटौ वा निरूप्यमाणः साक्षी ज्ञानस्वरूपः। ज्ञानञ्च स्वप्रकाशं विषयमपि प्रकाशयति। अतः स्वतः अवभासमानेन साक्षिणा विषया अपि प्रकाश्यन्ते। तथा च श्रुतिः "**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति**[1]" इति। साक्षिणः अवभासकत्वं सदृष्टान्तमेव प्रादर्शि पञ्चदश्याम् —

"**नृत्यशालास्थितो दीपः प्रभुं सभ्याँश्च नर्तकीम्।**
**दीपयेदविशेषेण तदभावेऽपि दीपयेत्॥**[2]" इति।

"**अहङ्कारः प्रभुः सभ्या विषया नर्तकी मतिः।**
**तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः॥**[3]"

इति च। अत्र चिदाभासविशिष्टाहङ्काररूपो जीवो विषयभोगाभिमानप्रयुक्तहर्ष-विषादवत्त्वात् नृत्याभिमानिप्रभुतुल्यः, तत्परिसरवर्तित्वेऽपि हर्षाद्यभावात् विषयाः सभ्यतुल्याः, नानाविधविकारवर्तित्वात् नर्तकीतुल्या बुद्धिः, बुद्धिविकारानुकूल-व्यापारवत्त्वात् तालादिधारितुल्यानि इन्द्रियाणि इति दृष्टान्तेनोक्तोऽर्थः दार्ष्टान्तिके ज्ञेयः। अत्र दृष्टान्ते साक्षिणो नित्यनिरतिशयप्रकाशात्मत्वं स्वरूपं कण्ठत उक्तं भवति। एवञ्च स्वयञ्ज्योतिःस्वभावं निरुपाधिकं चैतन्यं साक्षीति वेदान्तदर्शने प्रथितम्।

## ३.१७ ज्ञानस्यान्तरङ्गसाधनानि —

ब्रह्मणः अपरोक्षसाक्षात्कारादेव मोक्ष इति सर्वे वेदान्ता बाभाषन्ते। बृहदारण्यकोपनिषदो मैत्रेयीब्राह्मणे "**आत्मा वा अरे द्रष्टव्यः**[4]" इत्यात्मदर्शनम्

१. कठ.उ. २.२.१५
२. पं.द. १०.११
३. पं.द. १०.१४
४. बृह.उ. २.४.५



अनूद्य, तत्साधनत्वेन "**श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**[1]" इति श्रवणादीनि व्यधायिषत। किन्तु गुरुभक्त्या श्रवणादिबलेन अपरोक्षतत्त्वं निजरूपं ब्रह्मरूपमवगतेऽपि मुमुक्षौ प्राचीनकर्मवासनावशादविद्याविलासैः प्रतिबन्धैः एषा स्थितिः निश्चलतां न प्राप्नोति। तर्हि स्वस्वरूपापरोक्षतत्त्वागमे के ते प्रतिबन्धाः ? इत्यत्र कैवल्यदीपिकाकार एवमवादीत् —

"**अज्ञानसन्देहविपर्ययास्ते**
**बन्धाश्चिराभ्यासवशात् प्रबोधम्।**
**घ्नन्त्येव नित्यं श्रुतिचिन्तनाभ्यां**
**ध्यायेन चैतान्विलयं नयस्व॥**[2]" इति।

अत्र अज्ञानम्, सन्देहः, विपर्यय इति त्रयः प्रतिबन्धा उक्ताः। तत्र अज्ञानं नाम "माम् अहं न जानामि" इति भ्रमानुभवरूपम् अनादिभावत्वे सति ज्ञाननिवृत्यम् इत्युक्तलक्षणम्। ममैव ब्रह्मत्वमस्ति वा न वा इति संशयः। विपर्ययस्तु विपरीतप्रत्ययः। पूर्वपूर्ववासनाबलाद् एभिः प्रतिबन्धैः निजरूपं ब्रह्मरूपं न अपरोक्षतयाऽवगम्यते। अतः मनोनाशसाधनयोगधारणया चिन्तनेन श्रवणाद्यावृत्त्या च प्रतिबन्धविनाशः करणीयः। अतः प्रतिबन्धनिवृत्तिः श्रवणाद्यावृत्त्यैव प्रभवति इति ग्रन्थकार एवं निदर्शयति —

"**तत्त्वानुभूतिप्रयतिः श्रुतिर्भवेद्-**
**युक्त्याऽहमानन्दपदस्य चिन्तनम्।**
**एकाग्रताया मनसो हि सन्ततं**
**ध्यानं तदेवेति वदन्ति साधवः॥**[3]" इति।

इत्थं ब्रह्मसाक्षात्कारे प्रतिबन्धविनाशाय साधनं द्विविधं प्रोक्तं वेदान्तेषु — अन्तरङ्गसाधनं बहिरङ्गसाधनञ्च। श्रवणमनननिदिध्यासनादीनि अन्तरङ्गसाधनानि, बुद्धिशुद्धिद्वारा यज्ञदानादीनि साधनानि बहिरङ्गसाधनानि प्रोच्यन्ते। तथा हि "**तस्मादेवंविच्छान्तो दान्तः**[4]" इति "**ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन**

१. बृह.उ. २.४.५
२. कै.दी. १.८९
३. कै.दी. १.९२
४. बृह.उ. ४.४.२३

**तिष्ठासेत्**[१]'' इति च श्रुतिः श्रवणादीनाम् अन्तरङ्गत्वं प्रतिपादयति। यथोक्तम् ''**ज्ञानसमकालतया तत्परिपाकहेतुत्वेन श्रुतत्वादन्तरङ्गमित्यर्थः। यज्ञादिकं बुद्धिशुद्ध्यादिफलजनकत्वेन कारकत्वाद् बहिरङ्गम्। श्रवणादिकं त्वात्मस्वरूपज्ञापकत्वेन व्यञ्जकत्वाद् अन्तरङ्गमित्यर्थः**[२]'' इति।

एवं ब्रह्मसाक्षात्कारे अन्तरङ्गसाधनत्वेन निरूपितेषु श्रवणादिषु श्रवणं नाम —

''**वेदान्तानामशेषाणामादिमध्यावसानतः।**
**ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत्॥**[३]'' इति।

सर्वेषां वेदान्तानामादिमध्यावसानत उपक्रमोपसंहारादिलिङ्गेभ्यः एकवाक्यतया पर्यालोचनया ब्रह्मात्मन्येव परात्मप्रत्यगात्मनोरभेदबोध एव तात्पर्यमिति धीः श्रवणमित्यर्थः। वेदान्तपरिभाषाकारः श्रवणलक्षणमित्थं लिलेख ''**श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया**[४]'' इति। विवरणप्रमेयसङ्ग्रहकारास्त्वाहुः —

''**तत्र तावन्मुनिश्रेष्ठाः श्रवणं नाम केवलम्।**
**उपक्रमादिभिर्लिङ्गैः शक्तितात्पर्यनिर्णयः॥**[५]'' इति।

एवं श्रवणेन अवधारितेऽप्यर्थे प्रमाणान्तरविरोध आशङ्क्येत। तामाशङ्कां मननं निवर्तयति। श्रवणेनावधारितस्य विषयस्य वेदान्तानुगुणयुक्तिभिरनुचिन्तनं मननम्। यथोक्तं ''**युक्त्या सम्भावितत्वानुसन्धानं मननं तु तत्**[६]'' इति। ''**मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूल-तर्कात्मज्ञानजनको मानसो व्यापारः**[७]'' इति च। उक्तं हि विवरणप्रमेय-सङ्ग्रहे विद्यारण्यमुनिना —

१. बृह.उ. ३.५.१
२. सं.शा.सु.टी. ३.३०-३१
३. पं.द. ७.१०
४. वे.प. पृ. २५०
५. वि.प्र.सं. १.१.२
६. पं.द, १.५३
७. वे.प., पृ. २५०



''**सर्ववेदान्तवाक्यानामाचार्यमुखतः प्रियात्।**
**वाक्यानुग्राहकन्यायशीलनं मननं भवेत्॥**[१]'' इति।

निर्विचिकित्सतां प्राप्तोऽपि विषयो मनसि स्थिरं न तिष्ठति। किन्तु अनादिवासनावासितं मनः पराग्विषयेष्वेव प्रवर्तते। तन्मनो विषयेभ्यो विनिवर्त्य अद्वितीयब्रह्मण्येव स्थापयेत्, येन निरन्तरं तद्विषय एव प्रत्ययाः प्रवहेयुः। इदमेव निदिध्यासनम्। यदगादि वेदान्तसारकारेण ''**विजातीयदेहादिप्रत्ययरहिता-द्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्**[२]'' इति। निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयक-स्थैर्यानुकूलो मानसो व्यापारः। तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणम्। ''**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्**[३]'' इत्यादिश्रुतेः। निदिध्यासने मननं हेतुः, अकृतमननस्यार्थदार्ढ्याभावेन तद्विषये निदिध्यासनायोगात्। मनने च श्रवणं हेतुः श्रवणाभावे तात्पर्यानिश्चयेन शाब्दज्ञानाभावेन श्रुतार्थविषयक-युक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति केचिदाचार्या ऊचिरे। अपरे तु श्रवणं प्रधानम्, मनननिदिध्यासनयोस्तु श्रवणात्पराचीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्तकतया आरादुपकारकाङ्गत्वम् इत्याहुः।

ज्ञानस्य अन्तरङ्गसाधनभूतानि श्रवणादीनि कियत्पर्यन्तम् अनुष्ठेयानीति विचारयन् सूत्रकारः सकृत्कृते शास्त्रार्थोऽनुष्ठितो भवतीति न्यायाद् यथा श्रुतिविहितस्य प्रयाजादियागस्य सकृदेव अनुष्ठानं तथा श्रवणादिसाधनस्य सकृदेवानुष्ठानमिति पूर्वपक्षं प्रापय्य, सिद्धान्तसूत्रमेवमसुसूत्रत् ''**आवृत्तिः असकृदुपदेशात्**[४]'' इति। विद्याया दृष्टफलकत्वाद्यथा व्रीह्यवघातः तुषविमोकरूपफलपर्यन्तम् आवर्त्यते तथा निर्विशेषात्मसाक्षात्कारपर्यन्तं श्रवणादिकमावर्तनीयमिति तात्पर्यार्थः। अयमेवाशयः कैवल्यदीपिकाकारेण एवं न्यरूपि —

१. वि.प्र.सं. १.१.३
२. वे.सा. पृ. ४४
३. श्वे.उ. १.३
४. ब्र.सू. ४.१.१

''**बद्धानलो नैव दहेत्तृणाद्यं**
**बोधस्तथाऽज्ञानमलं न हन्यात्।**
**बन्धप्रहाणाय चिरं समाश्रये-**
**च्छ्रुतिं च चिन्तामपि तं समाधिम्॥**[१]'' इति।

अत्र ग्रन्थकारेण प्रतिबन्धविनाशाय चिरं श्रवणमनननिदिध्यासनैस्साकं समाधिमाश्रयेद् इत्यनेन समाधिवर्णनपि उक्तम्। स च समाधिः सविकल्प-निर्विकल्पभेदेन द्विविधः। सविकल्पोऽपि दृश्यशब्दानुविद्धभेदेन द्विविधः। निर्विकल्पस्तु एकविध एव इति। सम्प्रति वेदान्तग्रन्थेषु समाधेः कथं वर्णनं प्राप्यते किञ्च समाधेः वेदान्तशास्त्रे कः उपयोग इति प्रकृतोपयोगात् सङ्क्षेपेण इह आलोच्यते।

अद्वितीयवस्तुनि विच्छिद्यविच्छिद्य अन्तरिन्द्रियप्रवाहः चित्तस्य एकतानता ध्यानम्। ततः परं चित्तस्य ज्ञेयात्मना निश्चलावस्थानं जायते स एव समाधिः। तथा च ब्रूते ''**चित्तस्य ज्ञेयात्मना निश्चलावस्थानं समाधिः**[२]'' इति विद्वन्मनोरञ्जनीकारः। सम्यक् आधीयते एकाग्रीक्रियते विक्षेपान् परिहृत्य मनः, यत्र स समाधिः इति व्युत्पत्तेः। पातञ्जलयोगसूत्रे तु ''**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः**[३]'' इति। ध्याननिष्पाद्यः समाधिः प्रागुक्तरीत्या सविकल्पनिर्विकल्पभेदेन द्विविधः। इमावेव सम्प्रज्ञातासम्प्रज्ञातसमाधी इत्यपि प्रोच्येते। अनयोः लक्षणमेवं निरटङ्कि वेदान्तसारे ''**सविकल्पो नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया अद्वितीयवस्तुनी तदाकाराकारितायाः चित्तवृत्तेः अवस्थानम्। तदा मन्मयगजादिभानेऽपि मृद्भानवत्, द्वैतभानेऽप्यद्वैतं वस्तु भासते**[४]'' इति। निर्विकल्पस्तु ''**ज्ञातृज्ञानादिविकल्प-लयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चितवृत्तेः अतितरामे-कीभावेन अवस्थानम्। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेन**

१. कै.दी. १.९०
२. वे.सा.वि. पृ. २४४
३. यो.सू. ३.३
४. वे.सा. पृ. २४४



**अद्वितीयवस्तुमात्रमवभासते**[१]'' इति।

भगवान् सूत्रकारः समाध्यवस्थायां जायमानं ब्रह्मदर्शनम् एवमसुसूत्रत् ''**अपि च संराधने प्रत्यक्षानुमानाभ्याम्**[२]'' इति। अत्र संराधनं चित्तस्य प्रत्यगात्मनि प्रकर्षेण निधानं, समाधिरिति यावत्। अस्यां स्थितौ योगिनः परमात्मानं पश्यन्तीत्यत्र श्रुतिस्मृती प्रमाणतया उपन्यस्येते। तथा च श्रुतिः ''**कश्चिद्धीरः प्रत्यगात्मानमैक्षद् आवृत्तचक्षुरमृतत्वमिच्छन्**[३]'' इति। स्मृतिश्च —

''**यं विनिद्रा जितश्वासाः सन्तुष्टा संयतेन्द्रियाः।**
**ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥**[४]'' इति।

''**योगश्चित्तवृत्तिनिरोधः**[५]'' इत्युक्त्वा ''**तदा द्रष्टुः स्वरूपेऽवस्थानम्**[६]'' इति कथयति योगशास्त्रेऽपि भङ्ग्यन्तरेण आत्मदर्शनमेव योगफलमित्याख्यायि इत्युक्तं जीवन्मुक्तिविवेके।[७] योगशब्दवाच्योऽयं समाधिः विषयाभिध्यान-निवृत्तिपूर्वकं चित्तं शोधयति। तेन चिरं समाधिमनुतिष्ठतो ब्रह्मात्मैक्यसाक्षात्कारः अनायासेन लभ्यते। यथा प्रत्यपादि भगवत्पादैः —

''**समाधिनानेन समस्तवासना-**
**ग्रन्थेर्विनाशेऽखिलकर्मनाशः।**
**अन्तर्बहिस्सर्वत एव सर्वदा**
**स्वरूपविस्फूर्तिरयत्नतः स्यात्॥**[८]'' इति।

''**निर्विकल्पकसमाधिना स्फुटं ब्रह्मतत्त्वमगम्यते ध्रुवम्**[९]'' इति च। ''**उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये**[१०]'', ''**युञ्जन्नेवं सदाऽऽत्मानं**

१. वे.सा. पृ. २४८
२. ब्र.सू. ३.३.२४
३. कठ.उ. २.१.१
४. म.भा. १२.४७.५४
५. यो.सू. १.२
६. यो.सू. १.३
७. जी.वि. पृ. २७५
८. वि.चू. ३६४
९. वि.चू. ३६६
१०. भ.गी. ६.१२

**योगी विगतकल्मषः**[१]'' इत्यादिगीतावाक्येऽपि योगस्य चित्तमलपहारित्वं कथितम्। एतदर्थमभिप्रेत्य वेदान्तशास्त्रे समाधिः साक्षात्कारहेतुतया निरूपितः। न चैतावता वेदान्तवाक्यवैयर्थ्यम् आशङ्कनीयम्, प्रत्यग्ब्रह्मैक्यसाक्षात्कारस्य वेदान्तैकलभ्यत्वात्। तदाहुः विद्यारण्यमुनयः ''**निरोधसमाधिना शोधिते त्वम्पदार्थे साक्षात्कृतेऽपि, तस्य ब्रह्मत्वं गोचरयितुं महावाक्येन ब्रह्मविद्या-नामकं वृत्त्यन्तरमुत्पद्यते**[२]'' इति। अयमेवार्थः पञ्चदश्यामेवं व्यलेखि —

''**अमुना वासनाजाले निःशेषं प्रविलापिते।**
**समूलोन्मूलिते पुण्यपापाख्ये कर्मसञ्चये॥**
**वाक्यमप्रतिबद्धं सत् प्राक् परोक्षावभासिते।**
**करामलकवद्बोधमपरोक्षं प्रसूयते॥**[३]'' इति।

अत्र कैवल्यदीपिकाकारोऽपि विक्षेपनिवृत्तिरेव समाधिफलम् इति जगाद —

''**नानाविधानामपि मुक्तिभाजां**
**समाधियोगस्य तु किं फलं चेत्।**
**बृहद्विदोऽस्त्येव हि दृष्टदुःखं**
**तेषां त्रयाणां न तदस्ति भेदः॥**[४]'' इति।

## ३.१८ मुक्तिः —

इदानीमवेदान्तशास्त्रे मोक्षः कथं प्रतिपादितः इत्यवलोकयामः। श्रुतयो हि ब्रह्मविदां ब्रह्मप्राप्तिं जेगीयन्ते। तथा हि ''**ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युः**[५]'', ''**ब्रह्मविदाप्नोति परम्**[६]'' इत्याद्याः। येयं ब्रह्मप्राप्तिः सङ्कीर्तिता सा न अप्राप्तस्य प्राप्तिः, तथा सति ब्रह्मप्राप्तिरूपस्य मोक्षस्य अनित्यत्वं दुर्वारं स्यात्। यथा कश्चिज्जनो गमनेन अप्राप्तं देशं प्राप्नोति, न तथा जीवः, ब्रह्मणो विभुत्वात्,

१. भ.गी. ६.२८
२. जी.वि. पृ. २७५
३. पं.द. १.६१, ६२
४. कै.दी. १.१००
५. कठ.उ. २.३.१८
६. तै.उ. २.१.१



स्वस्वरूपतया नित्यप्राप्तत्वाच्च। किन्तु सा प्राप्तस्यैव प्राप्तिः। अर्थात् जीवत इहैव ब्रह्मात्मैक्यसाक्षात्कारेण समूलाविद्यानिवृत्तिरेव नित्यशुद्धबुद्धमुक्तस्वरूपा-खण्डसच्चिदानन्दस्वरूपेणैव स्वात्मना स्थितिः मुक्तिः, सा स्थितिर्ब्रह्मात्मैक्यबुद्ध्या सम्पद्यते। सा मुक्तिः प्राप्तस्य प्राप्तिः। विषयोऽयं वेदान्तशास्त्रे कण्ठचामीकरन्यायेन स्पष्टीक्रियते। तथा हि काचित् कण्ठ एव विद्यमानतया प्राप्तमपि चामीकरं विस्मृत्य बहिरन्वेषते। यदा त्वन्येन ''तव कण्ठे चामीकरम्'' इति बोध्यते तदा सा अप्राप्तमिव प्राप्तमेव चामीकरं प्राप्नोति।

एवमेव अनाद्यविद्या अनात्मविषयानेव आत्मत्वेन मन्वानो जीवः ''**तत्त्वमसि**[१]'' इत्याचार्येण उपदिष्टः तद्वाक्यजन्यया विद्यया स्वस्वरूपं ब्रह्म अप्राप्तमिव प्राप्नोति। भगवता भाष्यकारेण विषयोऽयमेवं प्रस्तुतम् ''**प्रकृतसङ्ख्या-पूरणस्यात्मनः अव्यवहितस्यापि बाह्यसङ्ख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत् परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणया अविद्यया अन्नमयादीन्बाह्याननात्मन आत्मत्वेन प्रतिपन्नत्वात् अन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते। एवमविद्यया आत्मभूतमपि ब्रह्म अनाप्तं स्यात्। तस्यैवमविद्यया अनाप्तब्रह्मस्वरूपस्य प्रकृतसङ्ख्यापूरणस्यात्मनः अविद्ययानाप्तस्य सतः केनचित्स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव**[२]'' इति। भाष्यकारस्य भाष्यवाक्यमिदं दृष्टान्तगर्भितम्। यथा स्नानार्थं नदीं गतानां दशजनानां मध्ये, एकैकोऽपि प्रत्यागमनकाले आत्मानं विहाय अन्यानेव नवान् गणयन् ''दशमो नष्टः'' इति धिया शुशोच। यदा तु तत्रागतः कश्चिद्दयालुः तमेव गणयन् तमुद्दिश्य ''दशमस्त्वमसि'' इत्युपदिदेश, तत्र दशमः पूर्वं प्राप्त एव पुनः प्राप्यते। एवमेव प्रकृते स्वस्वरूपब्रह्मावगतिरेव प्राप्तिः। सोऽयमर्थः ''**स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति**[३]'', ''**तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्**[४]'' इत्यादिश्रुतिभिः प्रतिपादितः।

१. छा.उ. ६-८-७
२. तै.उ.शां.भा. २.१
३. मुण्ड.उ. ३.२.९
४. बृह.उ. १.४.१०

अतो जीवगता या नित्यप्राप्तब्रह्मणः अप्राप्तत्वभ्रान्तिः, तस्या निवृत्तिरेव प्राप्तिरित्युपचर्यते ।

अयं ब्रह्मप्राप्तो मुक्तो जीवो ब्रह्मस्वरूपत्वाद् ब्रह्माभिन्नः । श्रुत्युपन्यासपूर्वकं सूत्रकारेणायमर्थः अधिकरणद्वयेन सिद्धान्तितः । तथा च श्रुतिः ''**अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते**[1]'' इति । अत्र शरीरात् समुत्थानं शरीराद्यनात्मभ्य आत्मविवेकः । तद्यथा मुखं व्यादाय स्वपिति इति वाक्यं सुप्त्वा मुखं व्यादत्त इति व्याख्यायते, तथैव उपसम्पद्य अभिनिष्पद्यत इत्यत्र, अभिनिष्पद्य स्वस्वरूपं साक्षात्कृत्य, परं ज्योतिः ब्रह्म उपसम्पद्यते प्राप्नोति इति श्रुत्यर्थो ज्ञेयः । अत्र मुक्तजीवरूपस्य स्वेन इति विशेषश्रवणात् ''**सम्पद्याविर्भावः स्वेनशब्दात्**[2]'' इत्यस्मिन्नधिकरणे केवलात्मस्वरूपेण मुक्त आविर्भवतीति इति सिद्धान्तितम् । पुनः ''**अविभागेन दृष्टत्वात्**[3]'' इति सूत्रेण मुक्तस्य ब्रह्माभेदेनावस्थानं समसाधि । सूत्रे दृष्टत्वात् इत्यस्य जीवब्रह्मणोरभेददर्शनात् इत्यर्थः । तथा च भवन्ति श्रुतयः — ''**तत्त्वमसि**[4]'', ''**अहं ब्रह्मास्मि**[5]'', ''**ब्रह्मैव सन् ब्रह्माप्येति**[6]'', ''**यत्र नान्यत्पश्यति**[7]'', ''**न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्**[8]'' इत्याद्याः । कठोपनिषदि अपि अयमर्थः सदृष्टान्तं समसूचि । तथा हि —

''**यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।**
**एवं मुनेर्विजानत आत्मा भवति गौतम ।।**[9]'' इति ।

एवञ्चोक्तरीत्या मोक्षस्य केवलब्रह्मरूपेण अवस्थानान्मोक्षो ब्रह्मस्वरूपादनतिरिक्तः ।

---

१. छा.उ. ८.१२.३
२. ब्र.सू. ४.४.१
३. ब्र.सू. ४.४.४
४. छा.उ. ६.८.७
५. बृह.उ. १.४.१०
६. बृह.उ. ४.४.६
७. छा.उ. ७.२४.१
८. छा.उ. ४.३.२३
९. कठ.उ. २.१.१५



अतो ब्रह्मैव मोक्षः । अमुमर्थमालक्ष्य मोक्षस्य निरतशयपुरुषार्थत्वं साधयामास सूत्रकारः ''**एवं मुक्तिफलानियमस्तदवस्थाऽवधृतेः**[1]'' इति । भाष्यकारेण ''**मुक्त्यवस्था हि सर्ववेदान्तेषु एकरूपैव अवधार्यते । ब्रह्मैव हि मुक्त्यवस्था । न च ब्रह्मणः अनेकाकारयोगोऽस्ति**[2]'' इति सूत्रार्थेन मोक्षस्य ब्रह्मस्वरूपत्वं विवृत्य ''**न च तस्यामपि उत्कर्षनिकर्षात्मकः अतिशय उपपद्यते । निकृष्टायाः विद्यात्वाभावात्, उत्कृष्टैव विद्या भवति । तस्मात्तस्यां चिराचिरोत्पत्तिरूपः अतिशयो भवन् भवेत्, न तु मुक्तौ कश्चिदतिशय-सम्भवोऽस्ति**[3]'' इत्यनेन ब्रह्मरूपत्वाद् आनन्दात्मकमुक्त्यवस्थायां सातिशयत्वं निराकृतम् ।

ननु, आनन्दात्मकब्रह्मप्राप्तिर्न मोक्षः, तस्याः नित्यत्वेन तद्रूपस्य मोक्षस्य तत्त्वज्ञानासाध्यत्वप्रसङ्गात्, सर्वैः दार्शनिकैः मोक्षस्य तत्त्वज्ञानसाध्यत्वाभ्युपगमात्, अविद्यानिवृतेश्च मोक्षत्वाभ्युपगमात् ''**अविद्यास्तमयो मोक्षः स च बन्ध उदाहृतः**[4]'' इति वचनाद् इति चेत् । उच्यते — शोकनिवृत्तिश्च मोक्षः । अविद्याजनितशोकस्य निवृत्तिः अपि मोक्षः इत्यर्थः । मोक्षस्य आनन्दात्मक-ब्रह्मरूपत्वे च ''**ब्रह्मविद् ब्रह्मैव भवति**[5]'' इत्यादिश्रुतिर्मानम्, दुःखनिवृत्तिरूपत्वे च ''**तरति शोकमात्मवित्**[6]'', ''**तत्र को मोहः कः शोकः एकत्वम् अनुपश्यतः**[7]'' इत्यादिश्रुतिर्मानम् ।

इयं स्वस्वरूपब्रह्मप्राप्तिः अविद्यानिवृत्तावेव सम्भवति । अविद्या हि जीवस्य स्वस्वरूपतया नित्यप्राप्तमपि ब्रह्म अप्राप्तमिव दर्शयति । विद्यया अविद्यानिवृत्तौ तु अविद्याप्रभवं जैवरूपमपि निवर्तते । तदा अविद्यानिवृत्त्युपलक्षित अद्वैतात्मा मुक्तो भवति । मोक्षस्वरूपमपि स एव । तथा चोक्तं तत्त्वप्रदीपिकाकारैः

---

१. ब्र.सू. ३.४.५२
२. ब्र.सू.शा.भा. ३.४.५२
३. ब्र.सू.शा.भा. ३.४.५२
४. ब्र.सि. २.१०६
५. मुण्ड.उ. ३.२.९
६. छा.उ. ७.१.३
७. छा.उ. ७.१.३

''**निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः**[१]'' इति। अस्मिन्नर्थे भवन्ति श्रुतिस्मृतयः ''**विश्वमायानिवृत्तिः**[२]'', ''**तरति शोकमात्मवित्**[३]'', ''**तत्र को मोहः कः शोक एकत्वमनुपश्यतः**[४]'', ''**मायामेतां तरन्ति ते**[५]'' इति। अत्र तरणं सेतुतरणवन्नास्ति अपितु ''तरति ब्रह्महत्याम्'' इत्यादाविव निवृत्तिरेव, मायाया अमूर्तत्वेन अन्यादृशस्य तरणस्य असम्भवात्। इयं निवृत्तिरपि निवृत्तनिवृत्तिः। यथा रज्ज्वारोपितः सर्पः आरोपितत्वेन अतात्त्विकत्वात्, पूर्वमपि निवृत्त एव सन्, नायं सर्पः किन्तु रज्जुरेव इति रज्जुतत्त्वज्ञानेन निवर्तते, तथैव असङ्गे असंसारिणि चात्मनि आरोपिता माया तत्प्रयुक्ता अनर्थाश्च पूर्वमपि निवृत्ता आत्मतत्त्वज्ञानेन पुनर्निवर्तन्ते।

## ३.१८.१ जीवन्मुक्तिः —

अद्वैतवेदान्ते जीवन्मुक्तिविदेहमुक्तिविषये भाष्यतद्व्याख्याग्रन्थेषु विचारोऽभूत्। गीतायामपि ब्राह्मी स्थितिरित्युक्त्वा जीवन्मुक्तिराख्याता। तत्समर्थनं भाष्यकारेणापि कृतम्। विदेहमुक्तिर्ब्रह्मनिर्वाणरूपेण चर्चिता। तत्र जीवन्मुक्तिर्नाम स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्याणां सञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वात् अखिलबन्धरहितत्वे सति ब्रह्मनिष्ठत्वम्। तथा च जीवन्मुक्तलक्षणं जगदुः अद्वैतसिद्धिकाराः ''**जीवन्मुक्तश्च तत्त्वज्ञानेन निवृत्ताविद्योऽपि अनुवृत्तदेहादिप्रतिभासः**[६]'' इति। ब्रह्मात्मैक्यसाक्षात्कारे दृढीभूते अविद्यातत्कार्यात्मकसंसारनिवृत्तौ जायमानायां काकतालीयन्यायेन यदि प्रारब्धकर्मक्षयवशात् तस्मिन्नेव काले देहपातः स्यात्, तदा सद्य एव मुक्तिः स्यात्। यदा तु ज्ञानोत्पत्तिकाले प्रारब्धकर्म न क्षीयते तदा तत्कर्मक्षयपर्यन्तं शरीरावस्थानात् जीवन्नेव मुक्तसंसारः कर्तृत्वभोक्तृत्वसुखदुःखरहितो भवति। तथा च श्रुतिः ''**तस्य तावदेव चिरं**

१. त.प्र. ४.८
२. श्वे.उ. १.१०
३. छा.उ. ८.४.२
४. ई.उ. ७
५. भ.गी. ७.१४
६. अ.सि. पृ. ८९०



**यावन्न विमोक्ष्येऽथ सम्पत्स्ये**[१]'' इति। येन कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयाद् यावन्न देहपातः तावदेव आचार्यवतः विज्ञानवतः पुरुषस्य सदात्मसम्पत्तेः कालक्षेपः। यदैव च प्रारब्धकर्मणाम् उपभोगेन क्षयः तदैव सत्सम्पद्यते इति देहपातस्य सत्सम्पत्तेश्च न कालभेदः।

यदुक्तं प्रारब्धकर्मक्षयवशाद् देहपातः इति, तत्कर्म त्रिविधं भवति — प्रारब्धम्, आगामि, सञ्चितश्च। तदित्थमुक्तं कैवल्यदीपिकायाम् —

> ''**तूलं दावहविभुजीव सकलं प्राक् सञ्चितं बोधतः**
> **तज्ज्ञानाग्निशिखावलीढमखिलं स्याद्भस्मसाद् ज्ञानतः।**
> **ऊर्ध्वं कर्म यदस्ति तच्च निखिलं न श्लिष्यते ज्ञानिनः**
> **प्रारब्धं क्षयमेति भोगवशतस्त्वेवं त्रयाणां क्षतिः॥**[२]'' इति।

तत्र आगामिसञ्चितकर्मणोः ''**क्षीयन्ते चास्य कर्माणि**[३]'', ''**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते**[४]'' इत्यादि श्रुतिस्मृतिभ्यां ज्ञानाग्निना नाशो भवति। एतच्छरीराम्भकं प्रारब्धं कर्म तु ''**भोगेन त्वितरे क्षपयित्वा सम्पद्यते**[५]'' इत्यनुसारेण भोगवशादेव क्षमयति।

अत्रेयं शङ्का — प्रारब्धकर्मफलभोगार्थं ब्रह्मविदः शरीरधारणं कथं सम्पद्यते ? न हि ज्ञानकर्मणोरेकस्मिन् अवस्थितिसम्भवः तत्त्वज्ञानस्य कर्मनाशकत्वात्। ज्ञानकर्मणोर्विरोधः भाष्यकृता असकृत्सिद्धान्तितत्वात्। अपि च ''**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते**[६]'' इति स्मृतेः, ''**क्षीयन्ते चास्य कर्माणि**[७]'', ''**तद् यथेषीका तूलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वपाप्मानः प्रदूयन्ते**[८]'' इत्यादिश्रुतेः प्राप्तब्रह्मविज्ञानस्य अविशेषेण सर्वेषां

१. छा.उ. ६.१४.२
२. कै.दी. १.१०३
३. मुण्ड.उ. २.२.८
४. भ.गी. ४.३७
५. ब्र.सू. ४.१.१९
६. भ.गी. ४.३७
७. मुण्ड.उ. २.२.८
८. छा.उ. ५.२४.३

सुकृतानां दुष्कृतानां च कर्मणां क्षयश्रवणात्। ''**ब्रह्मैव सन् ब्रह्माप्येति**[१]'' इति च ब्रह्मप्राप्तेः विद्योदयसमकालत्वेन विद्योदयसमकालम् एव विदेहकैवल्यं स्यात्। विद्यया अविद्यानाशे च अविद्याकार्याणां शरीरादीनामपि नाशः स्यात्।

अत्रेवं समाधानम् — यानि प्रवृत्तफलानि कर्माणि, यैः विद्वच्छरीरमारब्धं तेषामुपभोगेनैव क्षयः, न ज्ञानेन। यद्यपि कर्माणि ज्ञाननाश्यानि, ज्ञानलाभानन्तरं कर्मणः कर्मजन्यस्य भोगायतनस्य देहस्य च नाशप्रसङ्गः ततोऽपि कर्म स्वभावेनैव प्रारब्धवेगक्षयावधिः स्थातुमर्हति। यथा लक्ष्यमुद्दिश्य मुक्तस्य आरब्धवेगस्य इषोः लक्ष्यभेदादूर्ध्वं गतिप्रयोजनं नास्ति, न वा स्थितिः अपि तु वेगक्षयं यावत्, तथैव ब्रह्मविदो विद्यालाभानन्तरं प्रयोजनं नास्तीति न कर्माणि निवर्तन्ते, किन्तु भोगानन्तरम् एव क्षीयन्ते। अन्यानि तु इह प्राग्ज्ञानोत्पत्तेः ऊर्ध्वं च कृतानि क्रियमाणानि अतीतजन्मान्तरकृतानि वा अप्रवृत्तफलानि कर्माणि ज्ञानाग्निना दह्यन्ते। अतो ब्रह्मविदो जीवनप्रयोजनाभावेऽपि प्रवृत्तफलानां कर्मणाम् स्थितिः अवश्यमेव मुक्तवत् स्यात्। तदैव ''**तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये**[२]'' इत्यादिश्रुतयः सङ्गच्छन्ते।

### ३.१८.२ जीवन्मुक्तानां लक्षणानि —

कैवल्यदीपिकाकारेण ''**निवृताऽविद्यस्य विदुषो जीवन्मुक्तिचित्त-विश्रान्तिसिद्धये अभ्यासः कर्तव्य**[३]'' इत्युक्त्वा के जीवन्मुक्ताः, के च विदेहमुक्ताः ? कीदृशं तेषां सुखमिति विषये एवमुक्त —

> ''**चत्वारो ज्ञानभाजो जगति हि गणिताः सर्वलोकैरुपास्याः**
> **तेषामेवं चतुर्णां प्रथम इह भवेद्ब्रह्मविन्नामधेयः।**
> **तत्पाश्चात्त्यो वरोऽन्यो भवति स हि वरीयान्ततोऽन्यो वरिष्ठो**
> **वक्ष्यामि ब्रह्मवेत्तुर्गतिमपि च परेषां त्रयाणाञ्च भेदम्॥**[४]'' इति।

वस्तुतः अद्वैतब्रह्मज्ञानेन अज्ञानस्य निवृत्तौ अज्ञानप्रयुक्तः द्वैतप्रपञ्चोऽपि

१. बृह.उ. ४.४.६
२. छा.उ. ६.१४.२
३. कै.दी.व्या., १.९३
४. कै.दी. १.९४



निवर्तते। तथापि विक्षेपशक्त्यंशस्य अज्ञानसंस्कारस्य वा अनिवृत्तिः ज्ञानिनः प्रारब्धकर्मोत्थशरीरस्थितिं घटयति। तदा केवलज्ञानिनः ज्ञानिनं शरीरेन्द्रियप्राणादि-मन्तमिव पश्यन्ति। ज्ञानी त्वात्मातिरिक्तं न किञ्चिद्वस्तु पश्यति। अत एव श्रुतिः ''**यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति**[१]'' इत्यादिना संसारिणः अविदुषः कर्तृकर्मप्रयुक्तं व्यवहारं दर्शयित्वा, ''**यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येत्**[२]'' इति विदुषः तादृशव्यवहाराभावमाह। अयं जीवन्मुक्तः स्मृतिषु स्थितप्रज्ञगुणातीतब्राह्मणादिशब्दैः लक्षितः।

प्राचीनकर्मणामनेकत्वात् ब्रह्मविदामाचारादिकं वृत्तयोऽपि नैकविधा दृश्यन्ते। केचिद् धर्मव्याधप्रभृतयो ब्रह्मविदो वाणिज्यं कुर्वन्ति, केचित्तपोऽनुतिष्ठन्ति। शुकादयः केचिद्भिक्षाचर्यं परित्यज्य परमहंसाः भवन्ति। केचन जनकादयो ब्रह्मविदो राज्यं कुर्वते। सोऽयं ब्रह्मविदां महिमा स्वाभाविकः। ईदृशं वर्तनं तेषाम् अलङ्कारः। एवञ्च कदाचिद् ब्रह्मविदां हृदि प्राचीनकर्मवासनावशात् कामादय रोषादयश्च भवेयुः तथापि ते ''**पुष्करपलाश आपो न श्लिष्यन्तम्**[३]'' इत्युक्तदिशा तत्र सक्ता न भवन्ति। ज्ञानी स्वज्ञानमाहात्म्यं बहिर्न प्रकाशयति इति श्रुत्यर्थोऽपि कैवल्यदीपिकारेणापि प्रादर्शि। तथा च श्रुतिः ''**तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्**[४]'' इति। अत्र बाल्यं नाम न तिष्ठन्मूत्रपुरीषत्वादि यथेष्टाचरणम्, किन्तु अप्ररूढेन्द्रियतया बालेषु विद्यमाना भावशुद्धिः। तदाह सूत्रकारः ''**अनाविष्कुर्वन्नन्वयात्**[५]'' इति। यथा बालो न परेषां पुरत आत्मानमाविष्कर्तुम् इच्छति, तथैव ज्ञानी अपि ज्ञानाध्ययनधर्माचरणादिभिः आत्मानमप्रदर्शयन् दम्भदर्पादिरहितो भवेत्, तथा सति मोक्षसाधनं निरन्तरायं स्वकार्यं साधयति इति सूत्रार्थः। श्रुत्यन्तरं च भवति ''**अव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः**[६]'' इति।

१. बृह.उ. ४.५.१५
२. बृह.उ. ४.५.१५; २.४.१४
३. छा.उ. ४.१४.३
४. बृह.उ. ३.५.१
५. ब्र.सू. ३.४.५०
६. जा.उ. ६

वासिष्ठे च जीवन्मुक्तानां वर्णनम् इत्थं प्राप्यते —

**''यथास्थितमिदं यस्य व्यवहारवतोऽपि च।**
**अस्तंगतं स्थितं व्योम स जीवन्मुक्त उच्यते ॥**

**नोदेति नास्तमायाति सुखे दुःखे मुखप्रभा।**
**यथाप्राप्ते स्थितिर्यस्य स जीवन्मुक्त उच्यते ॥**

**यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते ।**
**यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते ॥**

**रागद्वेषभयादीनामनुरूपं चरन्नपि ।**
**योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते ॥**

**यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।**
**कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते ॥**

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**
**हर्षामर्षभयान्मुक्तः स जीवन्मुक्त उच्यते ॥**

**शान्तसंसारकलनः कलावानपि निष्कलः ।**
**यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते ॥**

**यः समस्तार्थजातेषु व्यवहार्य्यपि शीतलः।**
**परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते ॥**[१]'' इति।

''**आत्मक्रीडाः आत्मरतिः क्रियावान् एष ब्रह्मविदां वरिष्ठः**[२]'' इति श्रुतौ जीवन्मुक्तानां स्थितेः वर्णनं प्राप्यते। ज्ञानभूमिकातारतम्यात् जीवन्मुक्तेष्वपि तारतम्यं दृश्यते। तत्र शुभेच्छा, विचारणा, तनुमानसा, सत्त्वापत्तिः, असंसक्तिः, पदार्थाभावनी, तुर्यगा चेति सप्तज्ञानभूमिकाः भवन्ति। आद्यत्रयं ज्ञानस्य भूमिका भवन्ति। तत्र आद्यभूत्रयस्य अभ्यासवैराग्याभ्यां ब्रह्माकारवृत्तिः उदेति तदा तत्त्वम्पदार्थयोः ऐक्यमनुभूयते। इयं ''सत्त्वापत्तिः'' इत्यभिधेया ज्ञानस्य चतुर्थी भूमिका वर्तते। तत्र स्थितः पुरुषः ''ब्रह्मविद्'' इत्यभिधीयते। पञ्चमः

१. ल.यो.वा. उत्पत्तिप्रकरणम्, १.९०-९७
२. मुण्ड.उ. ३.१.४



''असंसक्तिः'' इति भूमिकायां स्थितः पुरुषः ''ब्रह्मविद्वर्'' इत्युच्यते। पदार्थाभावनी इत्याख्यां षष्ठज्ञानभूमौ स्थितः आत्मज्ञानी ''ब्रह्मविद्वरीयान्'' इति प्रोच्यते। इयं भूमिका विदेहमुक्तेः प्रथमभूमिका वर्तते। अन्तिमा ज्ञानभूः ''तुर्यगा'' इत्यवस्थायां स्थितः ''ब्रह्मविद्वरिष्ठः'' इति संज्ञायते। इयं विदेहमुक्तेः अन्तिमा भूमिका वर्तते। एताः ज्ञानभूमिकाः अग्रिमाध्याये सविस्तरं निरूप्यन्ते।

### ३.१८.३ विदेहमुक्तिः —

ज्ञानाग्निना अविद्याख्यं कारणशरीरं विनष्टम्, स्थूलशरीरमिदं कालवशेन प्रारब्धकर्मक्षये सति वृक्ष इव पतेत्, तदा जीवन्मुक्तपुरुषो विदेहमुक्तिं लभते। तथा चोक्तम् —

**''जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात् कृते।**
**विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतमिव ॥**[१]'' इति।

एतादृशः विदेहमुक्तः आत्मा निष्कलब्रह्मरूपेण अवतिष्ठते। एतादृशः आत्मा ब्रह्मात्मतां प्राप्य ''**ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी। स्वच्छरूपो महामौनी वैदेही मुक्त एव सः**[२]'' इत्युक्तदिशा ब्रह्मानन्दरूपं नित्यं सुखमवाप्नोति। ब्रह्मविदाम् इयमेवावस्था कैवल्यदीपिकाकारः एवमाह —

**''कुम्भे नष्टे सति गगनवद्देहनाशे प्रपन्ने**
**मुक्ताः पूर्वं विगतसकलोपाधयः तुर्यभूताः।**
**नैवाद्यन्ता न तु परिमिताः कोटिमध्यादिशून्या-**
**श्वेतो दूरा गगनविमलाः शान्तदीपा इव स्युः ॥**[३]'' इति।

एवञ्च जीवन्मुक्तिं प्राप्तः तत्त्वज्ञानी भोगेन प्रारब्धकर्मावसाने वर्तमानशरीरपाते विदेहकैवल्यमाप्नोति। तदाह सूत्रकारः ''**भोगेन त्वितरे क्षपयित्वा सम्पद्यते**[४]'' इति। इतरे प्रारब्धफले पुण्यपापे इत्यर्थः। ''**विमुक्तश्च विमुच्यते**[५]'', ''**भूयश्चान्ते**

१. मुण्ड.उ. २.७६
२. तै.उ. ४.३३
३. कै.दी. १.१०६
४. ब्र.सू. ४.१.१९
५. कठ.उ. २.२.१

**विश्वमायानिवृत्तिः**[१]'' इत्यादिश्रुतयः जीवन्मुक्तस्य विदेहमुक्तिमाहुः । तस्य मुक्तस्य प्राणाः नोत्क्रामन्ति, किन्तु परमात्मन्येव प्रलीयन्ते। तथा च श्रुतिः ''**यत्रायं पुरुषो म्रियत उदस्मात् प्राणाः क्रामन्त्याहो नेति**[२]'' इति प्रश्नमुद्भाव्य ''**नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते**[३]'' इत्याह। अत्र प्राणशब्दः चक्षुरादिपरः । समवनीयन्ते प्रलीयन्त इत्यर्थः । सूत्रकारेणापि ''**तानि परे तथा ह्याह**[४]'' इति सूत्रेण श्रुतिप्रमाणपूर्वकं प्राणानां परब्रह्मणि लयः समसाधि। एवमात्मभिन्नानां सर्वेषां कल्पितपदार्थानाम् आत्मज्ञानेन बाधे सति जीवः अखण्डं ब्रह्मैव भवति । तथा च विदेहकैवल्यम् अद्वैतब्रह्मरूपेणैव अवस्थानम् ।

धर्मार्थाकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षः एव परमपुरुषार्थत्वेन उत्कृष्टपुरुषार्थत्वेन वा स्वीक्रियते वेदान्तविद्भिः। मोक्षस्य परमपुरुषार्थत्वं श्रुतिबोधितम्। ''**न स पुनरावर्त्तते**[५]'', ''**स ब्रह्मज्ञानेन मुक्तः पुनर्भूयो नाऽऽवर्तते पुनर्जन्ममरणलक्षणां संसृतिं न भजते**[६]'' इत्यादिश्रुत्या मोक्षस्य नित्यत्वमुक्तम्। इतरेषां त्रयाणां धर्मार्थकामानां प्रत्यक्षेण यत्कृतकं तदनित्यमिति इति सामान्यतो दृष्टानुमानाऽनुगृहीतश्रुत्या चावगतमनित्यत्वम् । तद्यथा इहलोके कृष्यादिकर्मणा सञ्चितः सस्यादिलोकः कृतकत्वात् क्षीयते तद्वदेव अमुत्र परलोके पुण्यादृष्टेन सञ्चितः स्वर्गादिलोकः क्षीयते इति श्रुत्यनुकूलानुमानेन तेषामनित्यत्वम् अवगम्यते। स च मोक्षः निरतिशयं सुखं दुःखाभावश्च ब्रह्मस्वरूपसंस्थितिरेव, न तु लोकान्तरप्राप्तिः, तज्जन्यवैषयिकानन्दो वा मोक्षः। लोकान्तरप्राप्तेः कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्तिप्रसङ्गात्। स च मोक्षः प्रागुक्तरीत्या ''**तमेव विदित्वातिमृत्युमेति**[७]'' इत्यादिश्रुत्या ब्रह्मात्मैक्यगोचरापरोक्षज्ञानैकसाध्यः, परोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः।

---

१. श्वे.उ. १.१०
२. बृह.उ. ३.२.११
३. तत्रैव, ३.२.११
४. ब्र.सू. ४.२.१५
५. छा.उ. ८.१५.१
६. वे.प. अर्थदीपिकायाम् उद्धृतम्
७. श्वे.उ. ३.८



एतावता प्रबन्धेन मुक्तिस्वरूपं विवर्ण्य तस्याः जीवन्मुक्तिः विदेहमुक्तिश्चेति भेदद्वयं निरूपितम्। वेदान्तेषु क्वचित् सद्यो मुक्तिरपि वर्णिता। तथा हि सम्यज्ज्ञानाग्निः समुदितः सन् परमार्थवस्तुबलात् अखण्डाकारविषयत्वमात्रेण वायुव्यापारेण संदीपितः अविद्यां तत्कार्यञ्च निरवशेषं दन्दहीति, यदा विदुषः संसारसम्बन्धि किञ्चिदपि रूपं नावशिष्यते तदा सद्यो मुक्तिः।

## चतुर्थोऽध्यायः

# संशयच्छेदप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्

अस्मिन् तुरीयाध्याये कैवल्यदीपिकायाः संशयच्छेदप्रकरणस्थानां विषयाणां समालोचनात्मकमध्ययनं प्रस्तूयते। कैवल्यदीपिकाया अस्मिन् प्रकरणे षट्सप्तत्यधिकशतं श्लोकाः सन्ति। इह अद्वितीयब्रह्मणि वेदान्तानां तात्पर्यावधारणे ये संशयाः समुत्पद्यन्ते तेषां निराकरणं ग्रन्थकारेण गुरुशिष्यप्रश्नोत्तरशैल्या कृत्वा सर्वेषां वेदान्तवाक्यानाम् अद्वितीये ब्रह्मणि समन्वयश्च प्रदर्शितः। अत्र ग्रन्थकारोक्तविषया अद्वैतसिद्धान्तदृष्ट्या समालोच्यन्ते। अपि च एतेषां विषयाणां ग्रन्थकारेण यन्निरूपणं कृतमस्ति तन्निरूपणं पूर्वग्रन्थकर्तॄन् कियदंशेन अनुकरोतीति सादृश्यं वैलक्षण्यञ्च यथाऽवकाशं समीक्ष्यते।

## ४.१ नामरूपादिविवर्जितं निर्विशेषं ब्रह्म —

मायोपाधिविवर्जितत्वाद् ब्रह्म निर्गुणं कूटस्थम् अविकारि अपरिणामि इत्युच्यते। तदेव ब्रह्म अवधारयितव्यम् इत्यभाषिषत भगवत्पादाः। तथा हि ‘‘**रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं न रूपादिमत्**[1]’’ इति। तच्च ब्रह्म वेदान्तैकवेद्यम्। ‘‘**त्वं त्वौपनिषदं पुरुषं पृच्छामि**[2]’’ इति श्रुतेः, ‘‘**शास्त्रयोनित्वात्**[3]’’ इति च सूत्रात्। मायोपाधिविवर्जितस्य ब्रह्मणोऽयमेवार्थः कैवल्यदीपिकाकृता प्रत्यपादि। यथा - ‘‘**वाचामत्यन्तदूरमिति**[4]’’, ‘‘**अगोचरं**

१. ब्र.सू.शां.भा. ३.२.१४
२. बृह.उ. ३.९.२६
३. ब्र.सू. १.१.३
४. कै.दी. २.७



**वाच इतीरितं मे वेदप्रमाणेन सुवेद्यमेव**[1]’’ इत्यादिवचनैः। अस्मिन्नेवार्थे कैवल्यदीपिकायां भवन्ति श्लोकाः —

‘‘**ईशे त्यक्तगुणे गुणस्य कथनं वन्ध्यासुतालङ्कृतिं**
**नो मन्यस्व बुधो न लक्ष्म कथनं चेद्वेत्ति कस्सद्गुणः।**
**वेदो वक्ति सदादिलक्ष्मजनतामुक्तयै प्रबोधाप्तये**
**सत्याद्या न पुनः गुणास्स त इमे किन्तु स्वरूपन्निजम्॥**[2]’’

इत्याद्याः। अस्य व्याख्यानं ग्रन्थकारेण एवं कृतं यद् ब्रह्म स्वभावत एव गुणरहितम्। तस्मिन् निर्गुणे ब्रह्मणि धर्मजातस्य कथनं वन्ध्यासुतालङ्कारप्रायम्। तथापि निर्गुणब्रह्मणः साधारणमुमुक्षिभिरविज्ञेयत्वात् स्वयं श्रुतिः परमसुहृद् भूत्वा मुमुक्षुजनमुक्त्यै तत्साधनप्रबोधाप्तये च ब्रह्मस्वरूपलक्षणं ‘‘**सत्यं ज्ञानमनन्तं ब्रह्म**[3]’’ इत्यादिना वक्ति। अतः सत्याद्याशब्दा न गुणा न वा धर्मवाचकाः किन्त्वेते प्रत्यगभिन्नब्रह्मणः स्वरूपबोधका इति। ब्रह्म ज्ञानरूपम्। न तु ज्ञानाधिकरणं ज्ञानादिगुणवद्वा। उक्तं हि ‘‘**केवलस्यासंसृष्टस्यैव कल्पितचिदा-भासाविवेकात्प्रकाशकत्वमित्यर्थः**[4]’’ इति। ‘‘**निर्गुणो ज्ञानादिगुणवान् न भवति**[5]’’ इति च। सम्प्रति विषयोऽयं अद्वैतवेदान्तशास्त्रे कथं प्रतिपाद्यत इति विचारयामः।

यद्यपि वेदान्तेषु द्विरूपं हि ब्रह्म श्रूयते तथाप्यद्वैतवेदान्ते प्राधान्येन निर्विशेषं निर्गुणं ब्रह्म प्रतिपादितं भवति। तथा हि — निर्गुणं निर्विशेषं ब्रह्म वाङ्मनसोः अगोचरम्। न हि तत् केनापि धर्मेण प्रकाशयितुं शक्यते। तथा च क्वचिच्छ्रुतिः विधिमुखेन परिच्छिन्नानृतजडदुःखरूपानात्मतद्धर्मविलक्षणं ब्रह्मेति निषेधमुखेनापि सर्वेभ्यो वस्तुभ्यो भिन्नं सकलनिषेधावधिभूतं ब्रह्मेति निरूपयति। अतः विश्वप्रपञ्चस्य सर्वेभ्यो वस्तुभ्यो भिन्नं ब्रह्मेति निषेधमुखेन नेति नेतिमुखेन वा ब्रह्मणो लक्षणमभिधीयते। अयमर्थो बह्वीभिः श्रुतिभिरपि प्रत्यपादि। तथा हि

१. कै.दी. २.८
२. कै.दी. २.१३९
३. तै.उ. २.१.१
४. सं.शा.सु.टी. ३.१८३
५. वे.क.व्या. १.१.४

''**नेति नेति**[१]'', ''**अस्थूलम्**[२]'', ''**यतो वाचो निवर्तन्ते अप्राप्य मनसा सह**[३]'', ''**अस्तीत्येवोपलब्धव्यः**[४]'', ''**नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा**[५]'' इत्यादिश्रुतिः। अपि च ''**अथात आदेशो नेति नेति**[६]'' इति श्रुतिः ब्रह्मणो निर्विशेषत्वं प्रत्याययति। भाष्यकारेण अस्याः श्रुतेरर्थो द्वेधा उक्तः। ''**नञ्द्वयेन क्रमेण पृथिव्यादिभूतरूपो वासनामयरूपश्च विशेषः प्रतिषिध्यते। अथवा नञ्द्वयं वीप्साव्याप्त्यर्थम्। तेन यद्यत्प्राप्तं यत्तन्निषिध्यते।**[७]'' यथाऽऽहुः भाष्यकाराः ''**यदा तु सर्वदिक्कालादि-विविदिषा निवर्तिता स्यात् सर्वोपाधिनिराकरणद्वारेण, तदा सैन्धवघनवद् एकरसं प्रज्ञानघनम् अनन्तरमबाह्यं सत्यस्य सत्यम् अहं ब्रह्म अस्मीति सर्वतो निवर्तते विविदिषा, आत्मन्येवावस्थिता प्रज्ञा भवति। तस्माद् वीप्सार्थं नेति नेतीति नकारद्वयम्**[८]'' इति। अस्मिन्नेवार्थे श्रुत्यन्तरं भवति ''**स एष नेति नेत्यात्मा**[९]'' इति। ''**नेह नानास्ति किञ्चन**[१०]'' इति श्रुतिः ब्रह्मणि कल्पितस्य विशेषस्य कल्पितत्वादेव परमार्थतो ब्रह्मणि कल्पितविशेषकृतो भेदः किञ्चिदपि नास्तीति दर्शयति। श्रुत्यन्तरे ब्रह्मणि नामरूपयोः अभावोऽपि प्रादर्शि ''**आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म**[११]'' इति। प्रसिद्धिद्योतनार्थमत्र श्रुतौ निपातद्वयम्। अस्यां श्रुतौ आकाशशब्दितः परमात्मा स्वात्मस्थयोः जगद्बीजभूतयोः नामरूपयोः निर्वहिता व्याकर्ता, ते च नामरूपे यस्य परामात्मनो मध्ये वर्तेते स नामरूपविलक्षणो नामरूपाभ्यामस्पृष्टः, सर्वगतः, अमरणधर्मा परमात्मा प्रत्यगभेदेनावगन्तव्य इति श्रुत्यर्थः।

---

१. बृह.उ. २.३.६
२. बृह.उ. ३.८.८
३. तै.उ. २.४, ५
४. कठ.उ. २.३.१३
५. कठ.उ. २.३.१२
६. बृह.उ. २.३.६
७. बृ.उ.शा.भा. २.३.६
८. बृ.उ.शा.भा. २.३.६
९. बृह.उ. ३.९.२६
१०. बृह.उ. ४.४.१९
११. छा.उ. ८.१४.१



यत्तु ''**हिरण्यश्मश्रुर्हिरण्यकेशः**[१]'', ''**सर्वकर्मा सर्वकामः**[२]'' इत्येवमाद्याः श्रुतयो ब्रह्मणः सविशेषत्वं नामरूपत्वञ्च प्रतिपादयन्ति, ताः श्रुतयः सगुणपरा उपासनाप्रकरणे पठिताः, तासां श्रुतीनां सगुणत्वप्रतिपादने तात्पर्याभावात् विरोधस्तावन्नास्ति। यतो हि निर्विशेषं ब्रह्मैव परमार्थः, तज्ज्ञानमेव मोक्षसाधनञ्च। श्रुतिरपि ''**स एष नेति नेत्यात्मा**[३]'' इत्युपक्रम्य ''**अभयं वै जनक प्राप्तोऽसि**[४]'' इति निर्विशेषब्रह्मज्ञानाद् अभयाख्यो मोक्षः सिद्ध्यतीति दर्शयति। तर्हि किमर्थं श्रुतिषु सगुणपराणि वाक्यानि शोश्रूयन्ते चेत्। उच्यते — निर्विशेषं तत्त्वं मन्दधियां मनुष्याणां बुद्धिपथं सहजतया नावतरति। तद्धि सूक्ष्मबुद्धिभिः उत्तमाधिकारिभिरेव गृह्यते। अमुमेवार्थं श्रुतिरित्थं निगदति — ''**दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः**[५]'' इति। लोके खलु मन्दाधिकारिणोऽधिकाः। ते हि बुद्धेः ऐकाग्र्यस्य अभावान्निर्गुणं ब्रह्म साक्षात्कर्तुमसमर्थाः। प्रथमं तैः बुद्धेः ऐकाग्र्यं सम्पादनीयम्, तच्चोपासनया सम्पाद्यते। तद्यथा निदिध्यासने अद्वितीयनिर्विशेष-चैतन्यविषयकं ज्ञानं प्रवहति, तथैव उपासनायामपि उपास्यदेवताविषयिण्यः, विषयान्तरैः अविच्छिन्नाश्चित्तवृत्तयः प्रवहन्ति। किन्तु यथा मालिन्योपेते दर्पणे स्फुटः प्रतिबिम्बो न दृश्यते, अपगते तु मालिन्ये दृश्यते, तथैव रागद्वेषदूषिते अन्तःकरणेऽपि ब्रह्मसाक्षात्कारो न सम्भवति, यदा तु अन्तःकरणं रागद्वेषविवर्जितं भवति तदा हि सम्पद्यते ब्रह्मसाक्षात्कारः। अतः श्रुतिः अन्तःकरणगतदोषाणां दूरीकरणाय उपासनानि उपदिशति।

वस्तुतः उपासनं ज्ञानाद्भिन्नं भवति। चितस्य समानप्रत्ययप्रवाहकरणमिति यावत्। यथा उपासनं नाम समानप्रत्ययप्रवाहकरणम्। उपासना हि पुरुषतन्त्रत्वात् मानसिकी क्रिया वर्तते, ज्ञानं तु वस्तुतन्त्रं भवति। उपासनानां स्वरूपं भाष्यकारा एवं प्रत्यपीपदन् ''**यथा अद्वैतज्ञानं मनोवृत्तिमात्रम्, तथा अन्यान्यपि उपासनानि मनोवृत्तिरूपाणि इत्यस्ति हि सामान्यम्। कस्तर्हि अद्वैतज्ञानस्य**

---

१. छा.उ. १.६.६
२. छा.उ. ३.१४.२
३. बृह.उ. ३.९.२६
४. बृह.उ. ४.२.४
५. कठ.उ. १.३.१२

**उपासनानाञ्च विशेषः ? उच्यते — स्वाभाविकस्य आत्मन्यक्रिये अध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्तकमद्वैतज्ञानम्, रज्जवादाविव सर्पाद्यध्यारोपलक्षणज्ञानस्य रज्वादिस्वरूपनिश्चयः प्रकाशानिमित्तः। उपासनं तु यथाशास्त्रसमर्पितं किञ्चिदालम्बनमुपादाय तस्मिन् समानचित्तवृत्तिसन्तानकरणं तद्विलक्षणप्रत्ययानन्तरितम् इति विशेषः। तान्येतान्युपासनानि सत्त्वशुद्धिकरणत्वेन वस्तुतत्त्वावभासकत्वाद् अद्वैतज्ञानोपकारकाणि, आलम्बनविषयत्वात्, सुसाध्यानि च**[१]'' इति।

उपासनानां सगुणब्रह्मविषयकत्वात्तत्र गुणा अपेक्ष्यन्ते। यद्यपि ते गुणा वस्तुतो ब्रह्मणि न भवन्ति तथापि आरोपपूर्वकं ते उपदेष्टव्या भवन्ति। अत उपासनस्य स्वरूपसिद्ध्यर्थमेव शास्त्रं गुणानुपदिशति, न तु तत्तात्पर्येण। तस्मात् ''**यत्परः शब्दः स शब्दार्थः**[२]'' इति न्यायेन तात्पर्यविषयस्यैव वाक्यार्थत्वात्, श्रुतिषूपासनाप्रकरणपठितानां सगुणवाक्यानामपि परम्परया निर्गुणब्रह्मण्येव तात्पर्यम्। कल्पतरुकारा अपि तदभाषिषत —

''**निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।**
**ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥**

**वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।**
**तदेवाऽविर्भावेत्सम्यगपेतोपाधिकल्पितम्॥**[३]'' इति।

तर्हि क्वचिच्छ्रुतिषु निर्गुणब्रह्मप्रकरणे सगुणवाक्यान्यपि दृश्यन्ते खलु। तत्र कोऽर्थो ज्ञेयः ? उच्यते — वस्तुतः श्रुतिः निर्गुणं ब्रह्म निषेधमुखेनैव प्रतिपिपादयिषति। निषेधो हि निषेध्यसापेक्षः, निषेध्यस्य प्रसक्त्यभावे निषेधस्यैव अनुपपत्तेः। अतः सगुणवाक्यैः निषेधप्रतियोगिभूता गुणाः समर्प्यन्त इति निर्गुणब्रह्मप्रकरणे पठितानां सगुणवाक्यानामपि निर्गुणब्रह्मविषय एव तात्पर्यम्। इदमपि अत्र ज्ञातव्यं यच्छास्त्रे ब्रह्मणो धर्मतया श्रूयमाणाः सर्वे विषया न परब्रह्मविषयाः। क्वचिदपरं ब्रह्म तत्र निर्दिश्यते। अत एव तदपरब्रह्मवाक्यैः सह निर्गुणब्रह्मपराणां वाक्यानां भिन्नविषयत्वाद् विरोधो नास्ति।

१. छा.उ.शां.भा. उपोद्घातः
२. भामती, १.३.३२ इत्यत्र उद्धृतम्
३. भा.क. पृ. १९२



न च निर्विशेषवाक्यस्य निषेधकत्वात् तदेव वाक्यं बाधकमिति वाच्यम्। अपच्छेदन्यायेन निर्गुणवाक्यस्य प्राबल्यात्। तद्यथा यज्ञशालातो बहिष्पवमानार्थं पङ्क्तौ निर्गच्छताम् ऋत्विजां विच्छेदे प्रायश्चित्तोऽनुष्ठेय इति श्रूयते। तत्र यदा दैवात् प्रथमम् उद्गात्रौपच्छेदः, ततः प्रतिहर्त्रपच्छेदश्च जातः, ''**तदा यद्युद्गाता-ऽपच्छिद्यते.....अदक्षिणः स यज्ञक्रतुः**[१]'', ''**यदि प्रतिहर्ताऽपच्छेद्येत सर्ववेदसं दद्यात्**[२]'' इति श्रूयते। किन्तु एककालावच्छेदेन श्रुतं विरुद्धप्रायश्चित्तद्वयं तु कर्तुं न शक्यते। अतस्तत्र पश्चाद्भाविप्रतिहर्त्रपच्छेदनिमित्तकप्रायश्चित्तबोधकेन शास्त्रेण पूर्वभाव्युद्गात्रपच्छेदनिमित्तकप्रायश्चित्तबोधकं वाक्यं बाध्यते। प्रकृते चैकस्मिन् ब्रह्मणि सगुणवाक्यानां निर्गुणवाक्यानां चेत्युभयोरपि तात्त्विकप्रामाण्या-योगात् प्रसक्तविशेषप्रतिषेधकत्वेन परैः निर्गुणवाक्यैः सगुणवाक्यानि बाध्यन्ते।

अपि च निषेधकत्वादपि निर्गुणवाक्यानि प्रबलानि। तथा हि ''**असद्वा इदमग्र आसीत्**[३]'' इति वाक्यं तु असच्छब्दस्य अनभिव्यक्तनामरूपपरत्वेन वाक्यस्य निषेधकत्वाभावात् प्रबलं नास्ति। सगुणवाक्यानां बहुत्वात्तेषामेव प्राबल्यमित्यपि न वाच्यम्। शतमप्यन्धानां न पश्यतीति न्यायेन एकेनेव सगुणवाक्येन बहुभिरपि तैः निर्गुणस्य सगुणत्वासाधनात्। एवं सूक्ष्मं निर्विशेषमेव ब्रह्मणः पारमार्थिकं स्वरूपम्, स्थूलं सगुणं रूपं तु कल्पितमिति।

अमुमेवार्थं भगवत्पादा विवेकचूडामणावपि उपदिदिशुः —

''**जातिनीतिकुलगोत्रदूरगं नामरूपगुणदोषवर्जितम्।**
**देशकालविषयातिवर्ति यद्ब्रह्म तत्त्वमसि भावयात्मनि॥**[४]'' इति।

## ४.२ वेदानामपौरुषेयत्वम् —

कैवल्यदीपिकाकारेण ''**तं त्वौपनिषदं पुरुषं पृच्छामि**[५]'' इति श्रुत्यनुगुणं ब्रह्मणो वेदैकवेद्यत्वमित्युक्तम्। चत्वारो हि वेदाः। तत्र समासेन ऋग्वेदे

१. तां.ब्रा. ६.७.१४
२. तां.ब्रा., ६.७.१५
३. तै.उ. २.७.१
४. वि.चू. २५५
५. बृह.उ. ३.९.२६

मन्त्रदेवताध्यानम्, यजुर्वेदे यज्ञोपयोगिदेवतानामाह्वानम्, सामवेदे भगवद्विभूति-भूतदेवानां भगवतश्च यशोगानम्, अथर्ववेदे रणप्रयाणं वर्णितं पर्यवसीयते। इमे वेदा एव निखिलज्ञानविज्ञानकलाकौशलसकलसृष्टिसमुद्भवस्थानानि। वेदेषु च सगुणनिर्गुणब्रह्मविषयकाणि उभयविधानि वाक्यानि श्रूयन्ते। अतः उभयमपि वेदवाक्यं सत्यमेव। न हि वेदः कदापि अनृतं वदति। ''**यतः कदापि भूमौ वेदश्रुतिः मृषामायाऽलीकवञ्चनादिदोषेण व्यभिचरितविषया न भवेत्। अपौरुषेयत्वेन वेदप्रमाणस्य पूर्वाचार्यैरभ्युपगतत्वादिति यावत्**[1]'' इतिरूपेण ग्रन्थकारेण वेदस्य अपौरुषेयत्वं प्रतिपादितम्। अतः सम्प्रति सृष्टौ निमित्तभूतस्य वेदस्य ग्रन्थकारनिर्दिष्टापौरुषेयत्वविचारो विमृश्यते।

ब्रह्मणः सर्वोपादानत्वे वेदानां पौरुषेयत्वं वेदान्तशास्त्रे उररीकृतम्। तथा हि वेदानामपौरुषेयत्वं हि तत्र पुरुषस्वातन्त्र्यप्रतिषेधार्थम् अङ्गीक्रियते। यथोक्तं भट्टपादैः ''**यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता**[2]'' इति। सर्वज्ञानशक्तिमान् वेदकारणं परमेश्वरः प्राणिनाम् अभ्युदयनिःश्रेयसप्राप्तये, पूर्वकल्पसमानार्थानुपूर्वी-विशिष्टतया वेदान् रचयति। तथा हि यागादिरेव पूर्वकल्प इवास्मिन् कल्पेऽपि धर्मः, ब्रह्महत्यादिश्चाधर्मः। एवं स्वीकृतानुपूर्वी स्वयमेव स्मृत्वा तथैव कल्पादिषु आविर्भावयति। अतो वेदान्तमते पुरुषेण उच्चार्यमाणत्वं पुरुषाधीनोत्पत्तिकत्वं वा न पौरुषेयत्वं, किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम्। तच्च पूर्वसर्ग-समानानुपूर्व्या विरच्यमाने वेदे नास्त्येव इति वेदः अपौरुषेयः।

अत्र केचिदाचिक्षिपुः — ''**अस्य महतो भूतस्य निःश्वसितमेद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः**[3]'' इति श्रुतिः निःश्वासरूपेण वेदाविर्भावं कथयति। वेदानामुत्पत्तिमत्त्वे अनित्यत्वमपरिहार्यम्। यतो हि उत्पत्तिमद्वस्तुनो नित्यत्वं नास्ति दृष्टचरं लोके। अथ च उत्पत्तिमत्त्वे पौरुषेयापत्तिः। पौरुषेयत्व-प्रादुष्यात् वेदानां स्वतःप्रामाण्यमस्तमियात्। अनृतव्याघातपुनरुक्तरागद्वेषादि-दोषदूषितस्य पौरुषेयवचसो नित्यत्वस्वतःप्रामाण्यत्वे न सम्भवतः। अपि च ''वेदः अपौरुषेयः वाक्यसमूहात्मकत्वात्, भारतादिवत्। अयञ्च वेदः

१. कै.दी.व्या. २.९

२. श्लो.वा. २२.२९०

३. बृह.उ. २.४.१०



वाक्यसमूहात्मकः, तस्माद् वेदः पौरुषेयः'' इति निगमनं सिद्ध्यति। वेदे काठकं, कौथुमं, पैप्पलादं, तैत्तिरीयकमित्याद्याः पुरुषसम्बद्धाः समाख्याः श्रूयन्ते। ''**तेन प्रोक्तम्**[1]'', ''**कृते ग्रन्थे**[2]'' इति पाणिन्यनुशासनेन कृतार्थे प्रोक्तार्थे एव तद्धितप्रत्ययो भवति, तेन वेदानामप्रोक्तत्वे अकृतत्वे च तादृशप्रयोगासम्भवः। ततश्च वेदानां कार्यत्वमेवावगम्यते। कार्यस्य कर्तृपूर्वकत्वात् कश्चन कर्ता अस्तीति पौरुषेयत्वमवशात् स्वीकर्तव्यम्।

अत्र समाधिष्महि — सर्वज्ञब्रह्मणः सकाशादृग्वेदादेः या उत्पत्तिः श्रूयते सा मुख्यैव। सर्वज्ञत्वाद् ब्रह्म गतकल्पीयं वेदं सर्गादौ स्वरवर्णपदवाक्यादीनाम् आनुपूर्वीमन्तरेण यथापूर्वमादिजीवाय हिरण्यगर्भाय उपदिशति। ''**यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै**[3]'' इति श्रुतेः। अतः ''अस्य महतो भूतस्य निःश्वसितम्...'' इत्यादिश्रुत्या वेदानामुत्पत्तिः मुख्यैव कथिता। अपि चास्त्यत्र स्मृतिः —

''**स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा।**
**शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः॥**[4]'' इति।

पुनरत्र पूर्वपक्षयाशङ्क्रिरे — आम्नायस्य जनिमत्त्वे अपौरुषेयत्वं स्वतःप्रामाण्यञ्च कथं सम्भवति ? न हि जनिमद्वस्तुनोऽपौरुषयेत्वं दृष्टं लोके।

अत्रैवं सिद्धान्तयाशङ्कमहे — तत्रादौ किमिदमपौरुषेयत्वम् इति विचारः कर्तव्यः। प्रागुक्तरीत्या वेदान्तमते पुरुषेण उच्चार्यमाणत्वं पुरुषाधीनोत्पत्तिकत्वञ्च न पौरुषेयत्वम्। किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम्। अर्थात् प्रमाणान्तरेण अर्थं बुद्ध्वा तदर्थज्ञापनाय स्वेच्छया शब्दप्रयोगः पौरुषेयः। यथा नद्यास्तीरे फलानि सन्तीत्यादि वाक्यम्। वेदानां विषये तु पूर्वतनकल्पीयो वेदः तथैव संस्मृत्य उपदिष्टः अतो नास्ति तत्र पौरुषेयापत्तिः। ''**तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत**[5]''

१. पा.सू. ४.३.१०१

२. पा.सू. ४.३.११६

३. श्वे.उ., ६.१८

४. तत्त्वचिन्तामणिस्थभागवतपुराणीयवाक्यम्।

५. ऋ.सं. १०.९०.९

इत्यादिवेदवाक्यादेव वेदानां यज्जनिमत्त्वं ज्ञायते तत्तु पूर्वोक्तरीत्या गतकल्पीयं वेदं परमेश्वरोऽस्मिन् कल्पे स्मृत्वा उपदिशति इत्यवगन्तव्यम् ।

भामतीकारा अपि शास्त्रयोनित्वाधिकरणभाष्यव्याख्याने वेदान्तानुसारं वेदौरुषेयत्वमित्थम् अचीकथन् — ''**येऽपि तावद् वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेयम् । आनुपूर्वीभेदवन्तो हि वर्णाः पदम् । पदानि चानुपूर्वीभेदवन्ति वाक्यम् । व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः, वर्णानां नित्यानां विभूनाञ्च कालतो देशतो वा पौर्वापर्यायोगात् । व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदता नित्या । पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता । तस्मान्नृत्तानुकरणवत् पदाद्यनुकरणम् । यथाहि यादृशं गात्रचलनादि नर्तकः करोति तादृशमेव शिक्ष्यमाणानुकरोति नर्तकी, न तु तदेव व्यनक्ति । एवं यादृशीमानुपूर्वी वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेव अनुकरोति माणवकः, न तु तामेवोच्चारयति, आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात् । तस्मान्नित्यानित्यवर्णवादिनां लौकिकवैदिकपदवाक्यादिपौरुषेयत्वे विवादः, केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः**[1]'' इति । तदेवोक्तं कुमारिलभट्टपादैः — ''**यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता**[2]'' इति । तत्र सृष्टिप्रलयम् अनिच्छन्तो जैमिनीयाः जगतः सृष्टिं स्रष्टारं परमेश्वरञ्चानभ्युपगम्य वेदाध्ययनं प्रति अस्मादृशगुरुशिष्याध्ययनपरम्परया वेदस्य नित्यत्वं सङ्गीरन्ते । यथोक्तं श्लोकवार्तिके —

''**अन्यथाकरणे चास्य बहुभ्यः स्यान्निवारणम् ।**
**एकस्य प्रतिभानं तु कृतकान्न विशिष्यते ।।**

**अतश्च सम्प्रदाये च नैकः पुरुषः इष्यते ।**
**बहवः परतन्त्राः स्युः सर्वे ह्यद्यत्ववन्नराः ।।**[3]'' इति ।

---

१. भामती, १.१.३ पृ. ९८-९९
२. श्लो.वा. २९०
३. श्लो.वा. १५०-१५१



वैयासिकं तु मतमनुवर्त्तमानाः श्रुतिस्मृतीतिहाससिद्धसृष्टिप्रलयौ उररीकृत्य अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न स्वातन्त्र्यं प्रतिपादयन्ति । एवञ्च कल्पे कल्पे समानां सृष्टिं निरूपयन्तो वेदान्तिनः वेदस्यापौरुषेयत्वं नित्यत्वञ्च प्रतिपादयन्ति ।[1]

अपि च न हि ''अस्य महतो भूतस्य'' इत्यस्यां श्रुतौ परमेश्वरः प्रयत्नपूर्वकं वेदं रचयतीत्यर्थो द्योत्यते । तेन पुरुषस्वातन्त्र्यरहितोत्पत्तिमान् वेदोऽपौरुषेय इत्यवगम्यते । किञ्च निःश्वासरूपोक्त्या वेदः सन्नेव अभिव्यज्यते, न तु नूतनतया उत्पद्यत इत्ययमर्थोऽपि ज्ञाप्यते । तदेवं न्यगादि भाष्यकारैः ''**नियतरचनावतो विद्यमानस्यैव वेदस्य अभिव्यक्तिः, पुरुषनिःश्वासवत्, न पुरुषबुद्धिप्रयत्नपूर्वकः । अतः प्रमाणं निरपेक्ष एव स्वार्थे । तस्माद्यत्तेनोक्तं तत्तथैव प्रतिपत्तव्यम् आत्मनः श्रेय इच्छद्भिः ज्ञानं कर्म वेति**[2]'' इति । पौरुषेयवाक्यं प्रमाणान्तरसापेक्षं भवति । अपौरुषेयस्तु वेदः प्रमाणान्तरनैरपेक्ष्येणैव अर्थं बोधयति । तदेव निरटङ्कि भाष्ये ''**वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं, रवेरिव रूपविषये**[3]'' इति । अत एव यत्र वेदस्य प्रत्यक्षादिप्रमाणान्तरस्य च विरोधः प्रतीयते, तत्र अपौरुषेयो वेद एव प्रबलः । प्रमाणान्तरस्य तु पुरुषबुद्धिसापेक्षत्वात् तद्दुर्बलत्वम् । यतो हि पुरुषबुद्धिमपेक्ष्य प्रवृत्तेषु प्रमाणेषु दोषाः सम्भवन्ति । किञ्च एकेन चतुरेण तार्किकेण उपस्थापितोऽर्थः, अन्येन ततोऽपि चतुरेण तार्किकेण निराक्रियते, तन्मतं च पुनरन्येन इत्येवं तर्कस्य प्रतिष्ठा नास्ति । यथा सूत्रकारोऽसुसूत्रत् ''**तर्काप्रतिष्ठानात्**[4]'' इति । एतदेव भर्तृहरिरपि जगाद —

---

१. अत्र भामतीव्याख्यानं दृष्टव्यम् ''तथाहि यागादिब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरे विपरीयन्ते । नहि जातु कश्चित् सर्गे ब्रह्महत्याऽर्थहेतुरनर्थहेतुश्चाश्वमेधो भवति । अग्निर्वा क्लेदयति । आपो वा दहन्ति, तद्वत् । यथात्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयानर्थहेतुः, एवं सर्गान्तरेष्वपीति तदनुरोधात् सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचियन्न स्वतन्त्रः । पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि । तच्चास्माकमपि समानम् अन्यत्राभिनिवेशात् ।'' - भामती, १.१.३ पृ. ९८-९९
२. बृ.उ.शां.भा. २.४.१०
३. ब्र.सू.शां.बा. २.१.१
४. ब्र.सू. २.१.११

''**यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।**
**अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते** ॥[१]'' इति ।

अतः तर्कस्य निश्चितप्रामाण्याभावात् परमप्रमाणभूता श्रुतिर्न बाध्यते । तथा चाभाषन्त भाष्यकाराः ''**वेदस्य च नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेः, तज्जनितस्य ज्ञानस्य सम्यक्त्वमतीतानागतवर्तमानैः सर्वैरपि तार्किकैः अपह्नोतुम् अशक्यम्**[२]'' इति । प्रथमं प्रत्यक्षादिप्रमाणानि प्रवर्तन्ते, ततस्तैरज्ञातमन्यथाज्ञातं वा विषयं याथार्थ्येन ज्ञापयितुं वेदः प्रवर्तते । अतो यथा शुक्तौ प्रथमप्रवृत्तेन प्रत्यक्षेण इदं रजतम् इत्युत्पन्नमपि ज्ञानं पाश्चात्येन नेदं रजतम्, किन्तु शुक्तिरेव इति यथार्थज्ञानेन बाध्यते, तथैव प्रथमप्रवृत्तिकानि प्रत्यक्षादिप्रमाणानि पाश्चात्येन वेदेन बाध्यन्ते । यद्यपि वेदस्य नित्यत्वं पूर्वमीमांसायामपि उक्तम्, तथापि तस्य जगद्धेतुत्वोक्त्या नित्यत्वं भाष्यकारैः देवताधिकरणे दृढीकृतम् । अत्र नित्यत्वं न उत्पत्तिविनाशराहित्यम्, वेदस्य उत्पत्तेः प्रागुपपादितत्वात्, किन्तु अवान्तरप्रलयावस्थायित्वम्, ब्रह्मैव अनादिनिधनं नित्यमित्यङ्गीकारात् । अत एव ब्रह्मभिन्नस्य इतरप्रपञ्चस्येव वेदस्यापि मिथ्यात्वमिष्यते वेदान्तिभिः । स च वेदो वर्णरूपः, अत एव नित्यः । श्रुतिरपि वेदस्य नित्यत्वं ज्ञापयति ''**नित्येभ्यः शब्देभ्यः देवादिव्यक्तिप्रभवः**[३]'' इति । अपि चागादिषुः उपवर्षवाक्यं भाष्याकाराः ''**वर्णा एव तु शब्दाः**[४]'' इति, ''**नित्येभ्यः शब्देभ्यो देवादिव्यक्तिप्रभवः**[५]'' इति च ।

यत्तु ''वेदः पौरुषेयः वाक्यसमूहात्मकत्वाद् भारतादिवाक्यवत्'' इत्यनुमानं प्रोक्तम्, तत् सोपाधिकं व्याप्यत्वासिद्धं प्रदर्श्य हेतुरस्तु साध्यं मास्तु इति अप्रयोजकशङ्काद्वारा निराकर्तुं शक्यम् । तद्यथा — ''वेदः प्रागभावप्रतियोगितावच्छेदकधर्माभाववान् अस्मर्यमाणकर्तृकत्वात् आत्मादिवत्'' इति प्रतिकूलतर्केण सत्प्रतिपक्षित्वम् । वाक्यत्वहेतुश्च जन्यज्ञानमूलकत्वेन सोपाधिक इति अप्रयोजकः ।

---

१. वा.प. १.३४
२. ब्र.सू.शां.भा. २.१.११
३. ब्र.सू.शां.भा. १.३.२८
४. ब्र.सू.शां.भा. १.३.२५
५. ब्र.सू.शां.भा. १.३.२८



अपि च पदसमूहं वाक्यं चेतनपुरुषसम्बन्धमन्तरा उत्पत्तुं न शक्यम् । एवञ्च मीमांसकानां मते वर्णाः नित्याः, अथापि वर्णसमूहः वाक्यं, चेतनापेक्षोत्पत्तिकम्, अतः वाक्यं नित्यमिति वक्तुं न शक्यते । तस्माद् वाक्यस्य वाक्यसमूहरूपवेदस्य च कश्चन कर्ता अवश्यं स्वीकर्तव्य एव । परन्तु तस्य कर्तुः उत्पादयितुर्वा तद्रचने स्वातन्त्र्यं न स्वीक्रियते । पूर्वपूर्वकल्पावस्थितं वेदं परमेश्वरो नूतनकल्पारम्भे तथैव रचयतीति स्वीक्रियते । भारतादिग्रन्थानान्तु स्वतन्त्रतया कर्तृभिः रचितत्वात् पौरुषेयत्वं दोषः । अत्र तु न तादृशो दोषः । अत एव ''**अनादिनिधना नित्या वागुत्सृष्टा स्वयंभूवा । आदौ वेदमयी विद्या यतः सर्वाः प्रवृत्तयः**[१]'' इत्यादिस्मृतिः उपपद्यते ।

### ४.२.१ श्रुतिवाक्यानां विरोधपरिहारः —

श्रुतिषूपनिषत्सु च सगुणब्रह्मपराणि निर्गुणब्रह्मपराणि श्रूयन्ते । तत्र क्वचित् ''**तं त्वौपनिषदं पुरुषं पृच्छामि**[२]'', ''**यद्वाचाऽनभ्युदितम्**[३]'' इति प्रत्यक्षादिप्रमाणैः ब्रह्म अगोचरमस्तीति प्रतिपादितम् । क्वचित्तु ''**दृश्यते त्वग्र्यया बुद्ध्या**[४]'', ''**मनसैवेदमाप्तव्यम्**[५]'' इत्यनेन ब्रह्मणः इन्द्रियवेद्यत्वमुच्यते । क्वचित् ब्रह्मणः ''**यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्**[६]'', ''**साक्षी चेता केवलो निर्गुणश्च**[७]'', ''**न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः**[८]'', ''**स एष नेति नेति**[९]'', ''**अस्थूलमनणु**[१०]'', ''**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते**[११]'',

---

१. म.भा. १२.२३२.२४-२५
२. बृह.उ. ३.९.२६
३. के.उ. १.४
४. कठ.उ. १.३.१२
५. कठ.उ. १.२.११
६. के.उ. २.३
७. श्वे.उ. ६.११
८. के.उ. १.३
९. बृह.उ. ३.९.२६
१०. बृह.उ. ३.८.८
११. के.उ. १.४

''**अशब्दमस्पर्शमरूपमव्ययम्**[१]'', ''**निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जम्**[२]'' इत्यादिश्रुतयो निर्विशेषं ब्रह्म प्रतिपादयन्ति। अपरत्र ''**सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तः**[३]'', ''**हिरण्यश्मश्रुः हिरण्यकेशः**[४]'', ''**सर्वकर्मा सर्वकामः**[५]'' इत्यादिश्रुतिभिः ब्रह्मणः सगुणो भावो दृश्यते।

अत्रैवमाशशङ्किरे — ब्रह्मस्वरूपविषये श्रुतीनां परस्परविरुद्धवाक्यत्वात् कथं तासां प्रामाण्यम्? न हि लोके कश्चित् परस्परविरुद्धवक्तुः पुरुषस्य प्रामाण्यं स्वीक्रियते?

अत्रैवं पर्यहार्ष्म - वस्तुतः कदाचिदपि भ्रमप्रमादविप्रलिप्साकरणापाटवादि-पुम्दोषा वेदं न स्पर्शन्ति। अत एव वेदाः स्वतः प्रमाणम्। एतदेव कैवल्यदीपिकायां ग्रन्थकारेण शिष्यमुखात् प्रश्नमुद्भाव्य समाधिः उक्तः। तथा हि —

> ''**अन्यैः प्रमाणैः त्रिभिरप्यवेद्यं**
> **जातिक्रियाभूतगुणाद्यभावात्।**
> **अगोचरं वाच इतीरितं मे**
> **वेदप्रमाणेन सुवेद्यमेव॥**[६]'' इति।

इमे हि ज्ञानराशिवेदाः परम्परयेतरदेवताः प्रतिपादयन्तोऽपि परमात्मानमेव प्रतिपादयन्ति। तद्यथा काचित्कुलाङ्गना परिवारजनाञ्छ्वश्रुप्रभृतीञ्छुश्रूषमाणाऽपि साक्षात्पतिमेव परिचरति तथैव वेदापरनामधेयाः श्रुतयोऽपि परिवारजनानिवेतरदेवान् गायन्त्योऽपि साक्षान्महातात्पर्यतया स्वकीयं पतिं परमेश्वरमेव प्रतिपद्यन्ते। परमेश्वरस्य द्विरूपं प्रतिपादयन्त्योऽपि तात्पर्येण निर्वेशेषं ब्रह्म एव परमार्थतो वर्तत इत्यपि सङ्कीर्तयन्ति। इयं भगवती श्रुतिरेव समेषां माता परमात्मा च परापराणां पिता। यथा च पुत्रस्य कृते पितुः सत्तायां माता प्रमाणं तथैव परमेश्वरसत्तायाम्

---

१. कठ.उ. १.३.१५
२. श्वे.उ. ६.१९
३. छा.उ. ३.१४.४
४. छा.उ. १.६.६
५. छा.उ. ३.१४.२
६. कै.दी. २.८



अस्मत्कृते श्रुतिः प्रमाणम्। तमेवार्थमभियुक्ता आमनन्ति ''**सर्वे वेदा यत्पदमामनन्ति**[१]'' इति। भगवती श्रुतिरपि श्रावयति ''**अमृतस्य पुत्राः**[२]'', ''**तमेव विजिज्ञासस्व**[३]'', ''**तमेव ब्राह्मणाः व्रतेन तपसाऽनाशकेन च विविदिषन्ति**[४]'', ''**सत्यं ज्ञानमनन्तं ब्रह्म**[५]'', ''**खं ब्रह्म**[६]'' इत्यादिमन्त्रैः। गीताऽपि परमात्मन एव वेदवेद्यत्वं तस्यैव च वेदवेत्तृत्वं गायति। तद्यथा —

> ''**सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।**
> **वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्॥**[७]'' इति।

अतः प्रागुक्त एवायं विषयः अपेक्षानुसारमत्र किञ्चिद्विव्रियते। जातिक्रिया-भूतगुणाद्यभावाद् ब्रह्म अगोचरम्, किन्तु वेदार्थतात्पर्यविचारजन्यप्रमया तु सुवेद्यमेव। अतः उभयविधवाक्यमपि प्रमाणम्। यत्तु ''**मनसैवानुद्रष्टव्यम्**[८]'' इत्युक्तम्, तत्र तत्त्वमस्यादिमहावाक्योत्थाखण्डधीगोचरं ब्रह्मेति द्रष्टव्यम्। तथा चोचिरे भाष्यकाराः ''**शास्त्राचार्योपदेशशमदमादिसंस्कृतं मनः आत्मदर्शने करणम्**[९]'' इति। सगुणनिर्गुणवाक्येषु कस्य वाक्यस्य सगुणोपासनाविधिद्वारा निर्गुणे समन्वयः, कस्य वा वाक्यस्य गुणविवक्षां विना साक्षादेव ब्रह्मणि समन्वयः इत्याकाङ्क्षायां भाष्यकाराणामयमाशयः यद्यद्यपि तत्त्वतो ब्रह्म निरस्तसमस्तो-पाधिरूपं[१०] तथापि शब्दगोचरस्य ईश्वररूपस्य सविशेषभावस्य मायाकल्पितेन मिथ्यात्वात्, सगुणरूपं निर्गुणब्रह्मणः अभिन्नम्। इदमस्ति तात्पर्यं यद्ब्रह्मणः सविशेषनिर्विशेषस्वरूपयोर्मध्ये निर्विशेषं पारमार्थिकम् अन्यच्च अपारमार्थिकं कल्पितमिति यावत्। निर्विशेषं ब्रह्म मायोपाधिवशात् सगुणं सत् सर्वज्ञः,

---

१. कठ.उ. १.२.१५
२. य.वे. ११.५, श्वे.उ. २.५
३. तै.उ. ३.१.१
४. बृ.उ. ४.४.२२
५. तै.उ. २.१.१
६. य.वे. ४०.१७, बृह.उ. ५.१.१
७. भ.गी. १५.१५
८. बृह.उ. ४.४.१९
९. भ.गी.शा.भा. २.२१
१०. ''रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं न रूपादिमत्'' - ब्र.सू.शां.भा. ३.२.१४

सर्वशक्तिमान् ईश्वरो भवति। अयञ्च सगुणभावः पूर्वोक्तरीत्या मायिकः मिथ्याभूतश्च।[१] अनेन सगुणविभावेन ईश्वरः सृष्टिस्थित्यादिलीलां करोति। न हि स्वतो निर्गुणस्य ब्रह्मणः स्रष्टृत्वं सम्भवति।[२] एतदेव ''**द्विरूपं हि ब्रह्मावगम्यते, नामरूपविकारभेदोपाधिविशिष्टम्, तद्विपरीतं च सर्वोपाधिविवर्जितम्**[३]'', ''**निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यते**[४]'' इत्यादिना भाष्यकारेणापि प्रतिपादितम्। अपि च ''**न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि**[५]'' इति सूत्रस्य व्याख्यानावसरे भाष्यकारोऽब्रवीत् — ''**न तावत् स्वत एव परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते। न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेति अवधारयितुं शक्यम्, विरोधात्**[६]''। अतः उपाधितोऽपि ब्रह्मणः उभयरूपत्वं पारमार्थिकं न सम्भवति, एकस्य विरुद्धरूपद्वयासम्भवात्। अतः ब्रह्मणो निर्विशेषत्वमेव पारमार्थिकम्, सविशेषत्वं तु उपासनाय आरोपितम्। यतो हि सर्वासूपनिषत्सु ब्रह्मप्रकरणे ''**अशब्दमस्पर्शमरूपमव्ययम्**[७]'' इत्यादिना निर्विशेषस्वरूपमेव तात्पर्येण प्रतिपाद्यते।

वस्तुतो निर्गुणब्रह्मण उत्तमाधिकारिभिः सुलभग्राह्यत्वेऽपि मन्दमध्यमाधिकारिणां तु न तत्सकृद् बुद्धिपथमारोहति। सगुणवस्तुग्रहणाभ्यासबलात् मन्दानां लौकिकानां झटिति निर्गुणं ब्रह्म अवगन्तुं बुद्धिः न प्रभवति। अतः चित्तैकाग्र्याय निर्गुणस्य ब्रह्मणः सगुणरूपे कल्पना दृश्यते।[८] तथा चोक्तम् —

१. ''तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते'' — ब्र.सू.शां.भा. २.१.१४
२. ''न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति''- ब्र.सू.शां.भा. १.४.३
३. ब्र.सू.शां.भा. १.१.११
४. ब्र.सू.शां.भा. १.२.१४
५. ब्र.सू. ३.२.११
६. ब्र.सू.शां.भा. ३.२.११
७. कठ.उ. १.३.१५
८. ''निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यते'' - ब्र.सू.शां.भा. १.२.१४



''**चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।**
**उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना॥**[१]'' इति।

निराकारे ब्रह्मणि चित्तस्य एकाग्र्यम् अत्यन्तं दुष्करम्। अत एव चित्तस्य आलम्बनाय सगुणब्रह्म कल्पितम्। एतेन सगुणब्रह्म ध्यानविषयो भूत्वा आविर्भवति। उक्तञ्च कल्पतरुकारैः —

''**वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।**
**तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम्॥**[२]'' इति।

अत एव उपनिषत्सु ब्रह्मणः सगुणं निर्गुणं च रूपे प्रतपादिते भवतः। एवञ्च लौकिकान् अनुग्रहाय श्रुतिः सविशेषं रूपं रूपयति। अत उपासनार्थमपि निर्गुणस्य ब्रह्मणः सगुणत्वं कल्पितम्। उपास्योपासकादिव्यवहारश्च भेदबुद्ध्यश्रितः अविद्याऽवस्थायामेव। सत्यां च विद्याप्राप्तौ सर्वविधक्रियाकारकनिर्मुक्तम् अद्वैतं ब्रह्मैव अवशिष्यते। अयमेवार्थः श्रुतावपि ''**यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्**[३]'', ''**यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा**[४]'', ''**निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्**[५]'', ''**नेति नेति**[६]'' इत्यादिना शोश्रूयते। अतः सगुणब्रह्मणवाक्यानि उपासनविध्यपेक्षितगुणारोपपराणि, निषेधापेक्षितनिषेध्यसमर्पकाणि वा, न तु गुणानां तात्त्विकत्वपराणि। अतः सगुणं रूपं मिथ्यैव। अमुमर्थं निरूपयन्तो भाष्यकारा उभयलिङ्गाधिकरणे एनां स्मृतिमुदाजह्रुः —

''**माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।**
**सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि॥**[७]'' इति।

श्लोकेऽस्मिन् मायापदं मिथ्यार्थकम्। वस्तुतो मम निर्गुणत्वात्त्वद्दर्शन-

१. रा.ता.उ. १.७
२. वे.क.व्या. १.१.२०
३. बृह.उ. ४.५.१५
४. छा.उ. ७.२४.१
५. श्वे.उ. ६.१९
६. बृह.उ. २.३.६
७. म.भा. १२.३३९.४५

विषयभूतं दिव्यगन्धादिभूतगुणैः युक्तं मम रूपं मिथ्यैव इति श्लोकार्थः। अतो यथा रज्जौ कल्पितः सर्पो रज्ज्वभिन्नः, तथैव निर्गुणे ब्रह्मणि कल्पितं सगुणत्वं निर्गुणादभिन्नम्। अध्यस्तं हि वस्तु अधिष्ठानान्न भिद्यते। तथा च स्वाध्यस्तनामरूपोपाधिमत्त्वमेव निर्गुणस्य सगुणत्वम्। अतो नास्ति श्रुतिवाक्येषु लेशतोऽपि परस्परविरुद्धत्वम्।

## ४.३ विधिविचारः —

विधिमन्त्रनामधेयार्थवादनिषेधात्मको वेदः। तत्र विधिर्नाम प्रवर्तनानिवर्तनान्यतरबोधकं वाक्यम् अर्थात् अज्ञातार्थज्ञापको वेदभागो विधिः। ''**तच्चोदकेषु मन्त्राख्या**[१]'' इति सूत्रवचनात् प्रयोगसमवेतार्थस्मारकानुष्ठानकारकद्रव्यदेवतादिलिङ्गस्मारको वेदभागो मन्त्र इति। विधेयार्थपरिच्छेदको वेदभागो नामधेयः। अनर्थफलकात् कर्मणः पुरुषस्य निवर्तकं वाक्यं निषेधः। विध्यर्थप्रशंसापरं वचनम् अर्थवादः।

तत्र तिस्रो खलु विधेर्विधाः — अपूर्वविधिः, नियमविधिः, परिसङ्ख्याविधिश्च। तत्र अत्यन्ताप्राप्तविषयप्रापको विधिः अपूर्वविधिः। ''**विधिरत्यन्तम् अप्राप्ते**[२]'' इति तन्त्रवार्तिकम्। अप्राप्तप्रापकत्वञ्च प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वम्, प्रमाणान्तरजन्यप्रतीत्यविषयविषयकप्रतीति जनकत्वं वा। ततश्च यस्य यदर्थत्वं लिलक्षियिषितविधिवाक्यव्यतिरिक्तेन वाक्यान्तरेण प्रत्याक्षादिप्रमाणान्तरेण च अप्राप्तं तस्य तदर्थत्वेन यो विधिः सोऽपूर्वविधिः। यथा ''**यजेत स्वर्गकामः**[३]'', ''**अग्निहोत्रं जुहुयात् स्वर्गकामः**[४]'', ''**व्रीहीन् प्रोक्षति**[५]'' इत्यादिविधिः अपूर्वविधिः।

१. जै.सू. २२.१.३२
२. तं.वा. १.२.४.३४
३. एतद्वाक्यं विद्यमानेषु संहिताब्राह्मणग्रन्थेषु न दृश्यते। ब्रह्मसूत्रशाङ्करभाष्येऽपि (२.२.१७, ४.४.२९) एतद्वाक्यं प्रयुक्तम्, किन्तु अस्य मूलं न क्वापि दृश्यते। कदाचित् ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' (आप.सौ.सू. ३.१४.८) इति स्थाने लघुभूतम् उदाहरणात्मकं वाक्यं स्यादिति मे मतिः।
४. विद्यमानवैदिकग्रन्थेषु एतद्वाक्यं न दृश्यते, परं पण्डितचिन्नस्वामिमतानुसारं तैत्तिरीयब्राह्मणम् (२.१) अस्य वाक्यस्य मूलम्।
५. तै.ब्रा. ३.२.५.४



''**नियमः पाक्षिके सति**[१]'' इति तन्त्रवार्तिवचनात् पक्षे प्राप्तस्याप्राप्तांशपूरणफलको विधिर्नियमविधिः। अर्थात् पाक्षिकाप्राप्तप्रापकत्वं नियमविधित्वम्। नियमविधिः अनेकसाधनमध्ये अप्राप्तिपक्षं नियमयति। एकैकस्य प्राप्तौ सत्यां तादृशानेकसाधनमध्ये यदेकं किञ्चिदिष्टं तस्य साधनस्य यो विधिः स नियमविधिः। तत्र च यदिष्टं तदेव यदि कदाचित् स्वभावत एव कर्ता गृह्णाति तदा नियमविधेर्न किञ्चित् कृत्यम्। किन्तु तादृशेष्टसाधनव्यतिरिक्तं किञ्चित् साधनं ग्रहीतुं प्रवर्तते तदा अयं विधिः उपस्थितो भूत्वा इष्टं साधनं तदानीमप्राप्तं ग्राहयति। तदा अनिष्टस्य साधनस्यार्थिकी निवर्त्तिर्भवति। एवञ्च अनिष्टं साधनं नियमन्नयं नियमविधिरुच्यते। यथा ''**व्रीहीन् अवहन्ति**[२]'', ''**समे यजेत**[३]'' इत्यादिवाक्यम्। तत्र व्रीहीषु नखविदलनमुसलावहननयोः प्राप्तौ मुसलावहननमेव नियम्यते। व्रीहीनवहन्तीति विध्यभावे दर्शपूर्णमासादिकेषु व्रीहीषु उत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्यनकूलवैतुष्यकार्याय अवहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति तस्मिन् पक्षे अवहननस्य प्राप्त्यभावात् कार्यान्यथोपपत्तेः अवहननस्य पाक्षिकी प्राप्तिः स्यात्। सत्यस्मिन् विधौ अवहनेनैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्तत इति नियमविधिरयम्।

द्वयोः समुच्चित्यप्राप्तौ इतरनिवृत्तिफलकः अर्थात् उभयत्र नियतप्राप्तौ एकनिवृत्तिरूपपरिसङ्ख्याफलको विधिः। एकस्मिन् अङ्गिनि उभयोरङ्गयोः, अङ्गिद्वये एकस्य वा अङ्गस्य समुच्चित्यप्राप्तौ इतरनिवर्तको विधिः ''**तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते**[४]'' इति तन्त्रवार्तिकवचनात् परिसङ्ख्याविधिः। यथा अग्निचयनप्रकरणे श्रूयते ''**इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीम् आदत्ते**[५]'' इति। अत्र अश्वरशनाग्रहणम्, गर्दभरसनाग्रहणञ्चेति द्वयमनुष्ठेयम्। एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रः रशनाऽऽदानप्रकाशानसामर्थ्यरूपात् लिङ्गात् अश्वरशनाऽऽदाने इव गर्दभरशनादानेऽपि प्राप्नुयात्। सत्यस्मिन् विधौ तु

१. तं.वा. १.२.४.३४
२. आप.श्रौ.सू. १.१९.११
३. मीमांसामञ्जर्याम् उद्धृतं वाक्यम्, पृ. ८२
४. तं.वा. १.२.४.३४
५. तै.सं. ५.१.२.१

अनेन मन्त्रेण अश्वरसनामेव आददीत न तु गर्दभरशनाम्। सा तु तूष्णीमेव ग्राह्येति गर्दभरशनायां मन्त्रनिवृत्तिर्भवतीति इतरनिवृत्तिर्भवति।

वेदे प्रवर्तनानिवर्तनान्यरबोधकवाक्येषु ''**ऋतौ भार्यामुपेयात्**[१]'', ''**ब्रह्म समाप्य गृही भवेत्**[२]'' इत्यादिषु कः विधि इति विचारः कैवल्यदीपिकायां विचारितः। तथा हि — ''**ऋतौ भार्यामुपेयात्**[३]'' इत्यादिवेदवाक्येषु वेदेन गृहस्थस्य पुत्रोत्पादनादिकम् उच्यते इति चेत्, न। तत्र संसारिणो गृहस्थस्य ऋणविमोचनार्थं नियमः क्रियते। अतो वेदः अपूर्वमर्थं विधातुं नियन्तुं वा न प्रवृत्तः अपितु तन्निषेधद्वारा परमपुरुषार्थबोधनाय प्रवृत्तः इति। अतः अपूर्वनियम-लक्षणौ विधी वेदस्य नेष्टौ। अतः पारिशेष्यात् परिसङ्ख्याविधिरेव इष्टः।

अत्रेयं शङ्का — यदि अपूर्वनियमविधी वेदस्य नेष्टौ तर्हि ''**आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्**[४]'', ''**तद्भूतानां क्रियार्थेन समाम्नाय**[५]'' इत्यादिवचनानां का गतिरिति। अत्र ग्रन्थकारेण एवं समाधानमभ्यधायि —

''**चेन्मद्यामिषपानभक्षणविधौ वाञ्छा कुरुष्वाध्वरान्**
**भोगे स्यान्मनसो रुचिर्यदि तदा दारान्निजानाहर।**
**इत्याख्यानपरश्रुतेरभिमतौ नाद्यौ विधी कावुभौ**
**किन्त्वेषा परिसङ्ख्यैव सकलं हातुं प्रवृत्ता खलु॥**[६]'' इति।

अत्र कर्मकाण्डप्रतिपादितवेदभागस्य तत्तद्वर्णाश्रमनियमविधानात् तत् कर्म सम्पाद्य ततो निवृत्तिरभीष्टा। अतः वेदस्य अपूर्वनियमविधी नेष्टौ। अयमेवार्थो मुण्डकोपनिषदि एवमुक्तम् —

''**प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरम् एषु कर्म।**
**एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति॥**[७]'' इति।

१. आ.श्रौ.सू. २.१६.२५
२. जा.बा. ४
३. आ.श्रौ.सू. २.१६.२५
४. जै.सू. १.२.१
५. जै.सू. १.१.२५
६. कै.दी. २.७६
७. मुण्ड.उ. १.२.७



अत्र ज्ञानरहितं कर्म अविद्याकार्यमतोऽसारं दुःखमूलमिति इत्युक्त्वा ये एतत्कर्म श्रेयःकरणमिति अभिनन्दन्त्यभिहृष्यन्त्यविवेकिनो मूढा, ते जरां मृत्युञ्च किञ्चित्कालं स्वर्गे स्थित्वा पुनरेवापि गच्छन्तीति भाष्यकारा व्यवृण्वन्।[१] अतः तात्पर्येण कर्मसु प्रवृत्तिं दर्शयित्वा ततो निवर्तयति श्रुतिः। तस्माद् अपूर्वनियमविधी श्रुतिषु नेष्टौ इति कैवल्यदीपिकाकारस्याशयः। तस्मात् पारिशेष्यात् अपूर्वविधिच्छायापन्नं वेदवाक्यं नियमिविधिद्वारा परिसङ्ख्या विधावेव समाप्तम्। ''**पञ्च पञ्चनखा भक्ष्याः**[२]'' एषा श्रुतिरपि परिसङ्ख्यया विषं भुङ्क्ष्वेत्यादिवाक्य-प्रवृत्तिवत् सकलं दुःखजालं संसारं कर्म च हातुम् अपवदितुं प्रवृत्ता सर्वनिवृत्तावेव परिसमाप्तेति तात्पर्यार्थः।

अयं विधिविचारः वेदान्तदर्शने कथं समीक्षितः इति प्रकृतोपयोगित्वेन अवलोकयामः। प्रागेव दर्शितरीत्या ''**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**[३]'' इति वाक्योपस्थापिते दर्शने ज्ञानरूपस्य दर्शनस्य अपुरुषतन्त्रत्वात्, विधेयत्वानुपपत्तेः विधिर्नास्ति इत्यत्र भामतीपथजुषां विवरणमार्गानुयायिनां च मतैक्यमस्ति। श्रवणादौ विधिसद्भावे तु मतभेदः अस्ति। तथाहि, श्रवणादौ न कोऽपि विधिरिति भामतीपन्थिनः। एतेषां मते श्रवणं मननं निदिध्यासनं च दर्शनवद् आत्मविषयकत्वाज्ज्ञानपदवाच्यम्। तत्र श्रवणं नाम ''**आगमाचार्योपदेशजन्यमात्मज्ञानमेव, न तु तात्पर्यविचाररूपम्**[४]''। ''आत्मा श्रोतव्यः'' इत्यत्र आत्मश्रवणयोः विषयविषयिरूपो ज्ञेयज्ञानरूपः सम्बन्धो वा प्रतीयत इति श्रवणम् आत्मानं विषयीकरोति, तस्मात्तस्य ज्ञानपदवाच्यत्वम्। श्रवणस्य विचाररूपकर्मत्वे न हि आत्मा तस्य विषयो भविष्यति, विचाररूपक्रियया सह निष्क्रियस्य आत्मनः साक्षात्सम्बन्धाभावात्। तथा च आत्मनो विचाररूप-

१. मु.उ.शा.भा. १.२.७
२. ''पञ्च पञ्च नखा भक्ष्याः'' इति श्रुतिवाक्यम्। एतदर्थकं वाक्यं मनु-याज्ञवक्य-वसिष्ठादिस्मृतिषु, व्याकरणमहाभाष्ये, श्रीमद्रामायणे एवमन्यत्रापि प्राप्यते। स्मृतिस्तु न स्वतन्त्रा, वेदमूलत्वेन एव तस्याः प्रामाण्यम्। अतः एतन्मूलं श्रुतिवाक्यं क्वचित् शाखायां नूनं स्यादिति अनुमीयते। साक्षाच्छ्रुतिवाक्यम् उपलभ्यमानासु शाखासु न क्वचिद् दृश्यत इति पूर्वम् (पृ. १८०) उक्तम्।
३. बृह.उ. २.४.५
४. सि.ले.सं. पृ. ४१

क्रियायाः कर्मत्वं न स्यात् । कर्मत्वं तु अत्र स्वीक्रियते । तच्च श्रवणस्य ज्ञानरूपत्वे स्वीकृते सम्भवतीति । ज्ञाने च विध्यभाव इति श्रवणे विधिर्न स्वीकरणीय इति भामतीपथानुसृतानामाशयः ।

श्रवणवत् मननमपि न क्रियारूपम्, अपि तु अनुमित्यात्मकं ज्ञानम् । श्रुत्यर्थं दृढीकर्तुं तर्करूपं मननम् उल्लिखितमिति वार्तिककारा वदन्ति । तथैव निदिध्यासनम् अपि ब्रह्मविषयकं विज्ञानम्, ''**आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते**[१]'' इति, ''**आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन**[२]'' इति च श्रुत्या निदिध्यासनस्य पर्यायत्वेन विज्ञातविज्ञानशब्दयोः प्रयोगात् । एवं रूपेण ''आत्मा वा अरे'' इति श्रुतौ श्रवणमनननिदिध्यासनानां ज्ञानरूपत्वात् तेषु न कश्चिद् विधिरस्ति । अत एव भाष्यकारेण समन्वयभाष्ये यदि वेदे विधेरभावान्न विधिवचनानि, किमर्थानि तर्हि एतानि वचनानि विधिच्छायानीति जिज्ञासामवतार्य ''**किमर्थानि तर्हि आत्मा वा अरे द्रष्टव्यः श्रोतव्यः इत्यादीनि विधिच्छायानि वचनानि ? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः**[३]'' इत्यभाणि ।

एतदुपर्यपि पर्यन्वयुञ्जत — सूत्रकारैः भाष्यकारैश्च ''**सहकार्यान्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्**[४]'' इति सूत्रे बाल्यपाण्डित्यमौनशब्दैः क्रमेण अभिहितेषु श्रवणमनननिदिध्यासनेषु विधिः स्वीकृतः किल ?

अत्रेत्थमौत्तरयामः — मैवम् । यतो विचारो विचार्यविषयकतात्पर्यविषये निश्चयात्मकज्ञानस्य कारणं भवतीति वस्तुसिद्धेः हेतुभूतानां युक्तीनां स्मरणरूपं मननं तु तस्यैव वस्तुज्ञानस्य पदार्थाकाराया वृत्तेश्च अभ्यासरूपं निदिध्यासनं वस्तुज्ञानप्रतिबन्धकनिरासस्य कारणं भवतीति च लौकिकप्रमाणैः सिद्धम् । तस्मात् श्रवणादौ विधित्रयस्याऽप्यवकाशो नास्ति । एवञ्च श्रवणादौ विधेरभावात् कर्मकाण्डीयविचारवद् ब्रह्मकाण्डीयविचारोऽपि ''**स्वाध्यायोऽध्येतव्यः**[५]'' इति

---

१. बृह.उ. ४.५.६
२. बृह.उ. २.४.५
३. ब्र.सू.शां.भा. १.१.४
४. ब्र.सू. ३.४.४७
५. श.ब्रा. ११.५.७.२



अध्ययनविधेरेव लभ्यते इति भामतीपन्थिनः ।

विवरणमते तु श्रवणादौ विधिः सम्भवति । उक्तश्च —

**''विचारस्य विचार्यार्थनिर्णयं प्रति हेतुता ।**
**अपरोक्षाप्रमाणस्य तत्साक्षात्कारहेतुता ॥**
**प्राप्तैव किन्त्वनियता भ्रान्तिः प्राप्ताऽन्यसाधनैः ।**
**ततो नियम इत्याहुः सर्वे विवरणानुगाः ॥**[१]'' इति ।

अत्र श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि यत्तात्पर्यमस्ति, तदवधारणानुकूला मानसी क्रिया । शब्दावधारिते अर्थे मानान्तरस्य असम्भावनाबुद्धेश्च विरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनको मानसो व्यापारो मननम् । तथैव अनादिविषयसंस्कारेण विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्य आत्मविषयकमनःस्थैर्यानुकूलो मानसो व्यापारो निदिध्यासनम् । एवञ्च श्रवणमननादीनां मानसक्रियारूपत्वेन पुरुषतन्त्रत्वात्तेषां विधेयत्वं युक्तम् । उक्तं हि विवरणे ''**आत्मा वा अरे द्रष्टव्यः इत्यात्मदर्शनमनूद्य तदुपायत्वेन श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाऽङ्गि विधीयते**[२]'' इति । अतः श्रवणादयस्तु क्रियारूपत्वात् सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेया एव । मनननिदिध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वम् अङ्गीकृत्य ब्रह्ममीमांसायां प्रथमं सूत्रं प्रवृत्तमिति विवरणकाराणामाशयः । अत एव श्रवणविधिविधायकभाष्यमपि इदं सङ्गच्छते — ''**दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति । यथावघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि**[३]'' इति । ब्रह्मसाक्षात्कारहेतोः श्रवणस्य दृष्टफलतया दर्शपूर्णमासिकावघातन्याय एव अत्र प्राप्यते । अत ''श्रोतव्यः'' इत्यत्र नियमविधिः । अत्र विचारविधायकश्रवणविधिरेव जिज्ञासासूत्रस्य मूलमिति विवरणपथानुगाः प्राहुः ।

पुनरत्र प्रत्यवतिष्ठन्ते — ''श्रोतव्यः'' इति विधिः मोक्षसाधनब्रह्मात्मज्ञानाय

---

१. वे.सू.म. १.५-६
२. विव. पृ. ३
३. ब्र.सू.शां.भा. ४.१.१

वेदान्तवाक्यविचारं साधनचतुष्टयसम्पन्नस्य विधातुं न शक्नोति। तद्यथा, किमयं विधिः ज्योतिष्टोमादेः इव अपूर्वविधिः ? उत अवघातादिवत् नियमविधः ? अथवा ''पञ्च पञ्चनखा भक्ष्याः'' इतिवत् परिसङ्ख्याविधिः। नात्र प्रथमो हि विधिः भवितुमर्हति, कुतः ? ब्रह्मज्ञानं दृष्टं फलं वर्तते तत्प्रति वेदान्तश्रवणादीनां साधनत्वस्य अन्वयव्यतिरेकाभ्यां सिद्धत्वात्। प्रसिद्धं हि लोके वैद्यशास्त्रश्रवणस्यापि वैद्यशास्त्रप्रतिपाद्यविषयावगमं प्रति साधनत्वम्। अपूर्वविधेः अत्यन्ताप्राप्त-विषयकत्वात् श्रवणादीनां तु ज्ञानसाधनत्वमन्यतः प्राप्तमिति नात्र अपूर्वविधिः। नापि द्वितीयः, नियमादृष्टस्य कल्पनायां हेत्वभावात्। अवघातादिस्थले तावद् नियमादृष्टाद् यत् परमापूर्वं जायते, तदेव नियमादृष्टस्य कल्पकं भवति। ब्रह्मज्ञानं तु अदृष्टजन्यं नास्ति, केवलव्यतिरेकाभावात्, समन्वयसूत्रभाष्ये भाष्यकारैः नियमविधेः प्रयत्नेन निराकृतत्वाच्च। अत एव नियमविध्यङ्गीकारे वेदान्तानां विधिपरत्वं ब्रह्मपरत्वं च इत्युभयकल्पपनायां वाक्यभेदप्रसङ्गात् नात्र नियमविधिः। न चात्र परिसङ्ख्याविधिः। कुतः ? पञ्चनखपञ्चनखभक्षणयोः तावद्रागतः प्राप्तिर्भवति, तत्र अपञ्चनखभक्षणस्य परिवर्जनं भवति। अत्र तु आत्मसाक्षात्कारस्य उपनिषद्व्यतिरिक्तप्रमाणान्तरात् प्राप्तिरपि नास्ति, अपञ्चनखभक्षणपरिवर्जनवद् उपायान्तरप्राप्तवस्तुनः परिहारोऽपि सम्भवति। तस्मात् श्रोतव्यः इत्यत्र न कोऽपि विधिः सम्भवति।

अत्रैवं समार्तिथामहि — यद्यपि अपूर्वपरिसङ्ख्याविधी निराकर्तुं शक्येते, तथापि नियमविधिस्तु निराकर्तुं न शक्यते। यथा हि दृष्टफलस्यापि धर्मज्ञानस्य साधने वेदाध्ययने नियमविधिरङ्गीक्रियते तथैव परमपुरुषार्थब्रह्मसाक्षात्कारसाधने श्रवणेऽपि नियमविधिः स्वीक्रियते। न च परमापूर्वमेव नियमविधिकल्पकम्, अपि तु फलमेव। न हि कस्यचित् प्रधानस्य प्रकरणे अध्ययनं विहितम्, अपि तु स्वातन्त्र्येण। अतो न परमापूर्वमध्ययनविधेः कल्पकम्, किन्तु परमापूर्वसमूहरूपं फलम्। एवमत्रापि ब्रह्मज्ञानरूपं फलमेव वेदान्तश्रवणगतनियमविधेः कल्पकम्।

अतः अपरोक्षवस्तुविषयकप्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वक्लृप्त्या वेदान्तश्रवणस्य नित्यापरोक्षब्रह्मसाक्षात्कारहेतुत्वप्राप्तेः नात्र अपूर्वविधिः। किन्तु अध्ययनगृहीतवेदान्तैः मनसाऽहमिति गृह्यमाणे जीवे उपदिष्टं निर्विशेषब्रह्मचैतन्य-रूपत्वमाकर्ण्य तत्साक्षात्कर्तुं तत्रैव कदाचित् सावधानमनःप्रणिदधानस्य पुरुषस्य



वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी स्यात्, तन्मा भूदिति। अतः श्रोतव्यः इत्यत्र वेदान्तश्रवणे नियमविधिरेव इति विवरणपथानुयायिनां मतम्।[१]

यथा औषधज्ञानाय तादर्थ्येन चरकसुश्रुतादिश्रवणे प्रवृत्तस्य मध्ये मध्ये विषयासक्त्या व्यापारान्तरेऽपि प्रवृत्तिः प्रसज्यते, तथैव आत्मसाक्षात्काराय ब्रह्मज्ञानार्थं वा वेदान्तश्रवणे प्रवृत्तस्यापि जन्मजन्मान्तरप्राचीनदुर्वासनया कदाचिद् बहिः लौकिकवैदिकव्यापारेषु प्रवृत्तिः स्यादिति तन्निषेधार्थं श्रोतव्यः इत्यत्र परिसङ्ख्याविधिरिति वार्तिकमतानुसारिणः प्राहुः। तथा चोक्तम् —

''**चिकित्साशास्त्रवत् प्राप्तव्यापारान्तरवारिणी।**
**श्रवणे परिसङ्ख्येयमिति वार्तिकवेदिनः॥**[२]'' इति।

ज्ञानान्मोक्ष इति च सर्वोपनिषदां सिद्धान्तः। अत एव ''**ब्रह्मसंस्थोऽमृतत्वमेति**[३]'' इति छान्दोग्यवाक्येऽपि ब्रह्मज्ञानातिरिक्तान्यव्यापारं प्रतिषिध्य ब्रह्मज्ञानरूपानन्यव्यापारस्यैव मुक्त्युपायरूपेण अवधारणाद् ब्रह्मसाक्षात्कारे रागतः प्राप्तस्य व्यापारान्तरस्य निवृत्तिरुक्ता। तद्यथा ''**तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ**[४]'' इति मुण्डकोपनिषदि कण्ठत एव व्यापारान्तरस्य प्रतिषेधात्। अपि च स्मृतावपि —

''**आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया।**
**दद्यान्नावसरं किञ्चित् कामादिभ्यो मनागपि॥**[५]''

इत्यनेन व्यापारान्तरस्य प्रतिषेधः उक्तः। तस्मादाम्नायः किञ्चिदपूर्वमर्थं विधातुं नियन्तुं वा न प्रवृत्तः अपितु प्रवृत्यन्तरप्रतिषेधात् परमपुरुषार्थबोधनाय प्रवृत्तः। ''श्रोतव्यः'' इत्यादिवाक्येषु परिसङ्ख्याविधिरेव सङ्गच्छत इति वार्तिकमतमनुसरतः कैवल्यदीपिकाकारस्याशयः।

---

१. शा.सि.सं. पृ. २
२. वे.सू.म. १.१२
३. छा.उ. २.२३.१
४. मुण्ड.उ. २.२.५
५. अ.म. इत्यत्र उद्धृतोऽयं श्लोकः, पृ. १८

## ४.४ मायास्वरूपवर्णनम् —

विषयोऽयमस्माभिः प्रथमाध्याये अद्वैतसिद्धान्तविकासनिरूपणावसरे (१.१.५) समासेन विचारितः, तथापि कैवल्यदीपिकाकारमतेन अपेक्षानुसारं किञ्चिदिह वितन्यते। अस्याध्यायस्यारम्भे निर्गुणसगुणब्रह्मणोः विवर्ण्य वेदान्तप्रतिपाद्यं ब्रह्म निर्विशेषसच्चिदानन्दस्वरूपमिति निरूपितम्। यत्तु क्वचिच्छ्रुतिषु ब्रह्मणो जगतकर्तृत्वादिकं श्रूयते तत्तु ब्रह्मणि अविद्याप्रकृत्यादि-शब्दव्यपदेश्यमायोपाधिप्रयुक्तत्वात्। नामरूपादिविशिष्टनिखिलं जगत् मायिकत्वात् मिथ्या इति गुरोः उक्ते सति अत्र सन्दिहानः शिष्यो मायास्वरूपं पृच्छति —

> ''**माया नाम कथंविधा परिगताः के वा तया सा कथं**
> **सम्प्राप्ता च किमर्थमागतवती भिन्ना यदि ब्रह्मणः।**
> **द्वैतं प्राप्तमभेदवत्यपि पराच्चेत्स्यान्मृषा तत्परो**
> **मायामेघविधूतिचण्डपवनश्रीदेशिक ! ब्रूहि मे ॥**[१]'' इति।

अत्र शिष्येण सा माया किम्प्रकारका ? किं स्वतन्त्रा वा अस्वतन्त्रा ? ब्रह्मणो भिन्ना तर्हि द्वैतं प्राप्तम्, ब्रह्मणोऽद्वितीयत्वं व्याहतम्। अभिन्ना तर्हि सच्चिदानन्दस्वरूपं ब्रह्मापि मिथ्याभूतं स्याद् इत्येवंरूपेण बहुविधाः प्रश्ना उद्भाविताः, तदा गुरुः शिष्यशङ्कालेशनिराकरणाय मायास्वरूपमित्थमचकथत् —

> ''**सेत्थम्भूतस्वरूपेत्यभिगदितुमशक्या कृतित्वादवाच्या**
> **तेमी मायाभिभूता जगदृतमिति ये वादिनो देहनिष्ठाः।**
> **द्रष्टारो नैव विद्युः कथमियमभवद्युक्तिशून्येति माया**
> **मिथ्या जाड्या सुखात्मा परमपदविचारोज्झितानां विभाति ॥**[२]'' इति।

सा दुर्घटघटनापटीयसी युक्तिशून्यप्रकाशात्मिका अविद्याप्रकृत्यादिशब्दवाच्या इत्थम्भूतस्वरूपेण वक्तुमशक्या माया अनिर्वचनीयेति विद्वद्भिः कथ्यते। ग्रन्थकारोऽयं माया ''**अविद्यादिशब्दवाच्या**[३]'' इत्यनेन मायाऽविद्यापदं समानार्थकमिति मनुते। निस्तत्त्वा युक्तिशून्यप्रकाशिका अपरिमिता ''**परास्य**

१. कै.दी. २.९५
२. कै.दी. २.९६
३. कै.दी.व्या. २.९६



**शक्तिर्विविधैव श्रूयते**[१]'' इति श्रुत्युक्तदिशा ब्राह्मी पारमेश्वरी सा माया भूतभौतिकलक्षणविकाराणाम् उत्पत्तिवशात् कार्यरूपलिङ्गादेव अनुमातुं शक्या। तथा च अचीकथन् कैवल्यदीपिकाकाराः —

> ''**प्राक् शैलूषस्य विद्या न विदितविहृतेर्नैव दृश्याप्यरूपा**
> **पश्चान्नानास्वरूपा प्रसरति शतशो नामरूपादिदात्री।**
> **ब्राह्मी शक्तिस्त्वनन्ता कथमपि विदिता नैव केनाप्यमेया**
> **भूतानां भौतिकानामुदयगतिवशात्सानुमातुं च शक्त्या ॥**[२]'' इति।

''**यः सर्वज्ञः सर्ववित्**[३]'' इति श्रुतेः सर्वज्ञत्वादिविशिष्टं मायाशबलम् ईश्वररूपमेव ब्रह्म जगत्कारणम्। सेयम् अव्यक्तनाम्नी ब्राह्मी शक्तिः माया परमेश्वरान्न भिन्नाऽभिन्ना वर्तते। तदुक्तम् —

> ''**भिन्ना शक्तिमतो न शक्तिरपि तच्छक्तेन मायाविना**
> **सृष्टं कार्यशतं मृषैव विदितं शक्तो न मिथ्यामयः।**
> **धीमन् ! तत्तदिहापि पूर्णमभयं ब्रह्मैव शक्तं स्वयं**
> **दृष्ट्वैतां पदवीं मयाद्य कथिता नित्यं प्रसन्नो भव ॥**[४]'' इति।

जगत्कर्ता जगदधिष्ठाता अक्षरपुरुषः परमेश्वरो महामायावी सर्वशक्तिस्स्वतन्त्रो मायोपाधिस्सन् तदीक्षणा विजृम्भितमाकाशादिकं जगत् सृजति, तच्च प्रत्यक्षीक्रियते किन्तु ब्रह्मणो मायाशक्तिः न कैश्चिदपि प्रत्यक्षीकृता, अत एव सा अव्यक्तनाम्नी भवति। अमुमेवार्थं कैवल्यदीपिकाकार इत्थं जगाद —

> ''**जगत्कर्त्ता कार्यं विदितमपि शक्तिर्न विदिता**
> **चक्रुर्विद्यात्स्रष्टा जगति किल दृश्याऽथ पुरुषः।**
> **यथा विद्या वेद्या न तु भवति केनापि सुधिया**
> **तथा सर्गब्रह्मान्तरकृदपि शक्तिर्न विदिता ॥**[५]'' इति।

१. श्वे.उ. ६.८
२. कै.दी. २.९७
३. मुण्ड.उ. १.१.९
४. कै.दी. २.९९
५. कैदी. २.९८

इदानीं मायाविषयकं मूलभूतमद्वैतसिद्धान्तमवलोकयामः। नामरूपादि-विशिष्टस्य जगतो ब्रह्म उपादानमिति वेदान्ता जोघुष्यन्ते। किन्तु निर्विशेषं ब्रह्म सच्चिदानन्दस्वरूपप्रज्ञानघनमात्रम्। अतस्तस्य परिणामित्वं न सम्भवति। किन्तु ''**यतो वा इमानि भूतानि जायन्ते**[१]'' इत्यादिश्रुतयो ब्रह्म जगत्कारणमिति समामनन्ति। अपि च जगत्यस्मिन् यथा ब्रह्मणः सत्तास्फुरणे भासेते तथैव चैतन्यविलक्षणं जडत्वमपि भासते। एवं सति केन विशेषेण युक्तं सत् ब्रह्म जगत्कारणमिति विचिन्त्य सत्त्वरजस्तमोगुणात्मिका मायाशक्तिः तस्य उपाधिरिति तत्त्वविदोऽवजग्मुः। तथा च भवतश्छ्रुतिस्मृती — ''**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्**[२]'', ''**दैवी ह्येषा गुणमयी मम माया दुरत्यया**[३]'' इति। सूत्रकृता ''**तदधीनत्वादर्थवत्**[४]'' इति सूत्रेण कथितमर्थं भाष्यकारा एवं व्यवृण्वन् — ''**अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति, शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः**[५]'' इति। परमेश्वराश्रयया अविद्ययैव कृतं जगद्बीजमित्यपि जगदुः भाष्याकाराः ''**अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः**[६]'' इति।

श्रुतिस्मृतिषु वेदान्तदर्शने च इयं माया अविद्याशक्तिप्रधानशक्त्यक्षराज्ञान-तमोऽग्रहणाव्याकृतदिशब्दैः बहुधा व्यपदिश्यते। पञ्चपादिकायां मायायाः चतुर्दशनामानि प्रोक्तानि। लोके तावद् अबाधितस्य सत्त्वम्, बाध्यमानस्य असत्यत्वं प्रसिद्धम्। यथा ऋतस्य अबाधितत्वम्, अनृतस्य बाधितत्वम्। यद्यपि इयं माया न परमार्थसती, तथापि न असती। इयं माया बाधितत्वान्न सद्रूपा। ''**भूयश्चान्ते विश्वमायानिवृत्तिः**[७]'', ''**तरत्यविद्यां विततां हृदि यस्मिन्**

१. तै.उ. ३.१.१
२. श्वे.उ. १.३
३. भ.गी. ७.१४
४. ब्र.सू. १.४.३
५. ब्र.सू.शां.भा. १.४.३
६. ब्र.सू.शां.भा. १.४.३
७. श्वे.उ. १.१०



**निवेशिते**[१]'', ''**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते**[२]'' इत्यादिश्रुति-स्मृतिभ्योऽवगम्यते यदियं माया ब्रह्मज्ञानेन निवर्तते, अतः तस्या अबाधितत्वं सत्त्वं दुर्वचम्। न हि सद्वस्तु कदाचिन्निवर्त्यते यथा ब्रह्म। प्रतीतिविषयत्वात् नेयं माया असद्रूपा, न हि असत्पदार्थः कदाचित् प्रतीतिविषयो भवति, यथा शशशृङ्गम्। ज्ञानात्प्राक् माया कार्यरूपेण प्रतीयमानत्वेन तत्परिणामित्वेन अनुमितिविषयत्वेन च नेयं माया शशविषाणवदसत्त्वम्। माया जगदाकारेण परिणता प्रतीतिविषया भवति। अतो माया असत्त्वमिति न सुवचम्। सत्त्वासत्त्वयोः व्याप्यवृत्तित्वेन कालभेदेन एकत्र स्वीकर्तुमशक्यत्वात् नापि सदसद्रूपा। दृष्टनष्टस्वरूपाणां स्वप्नेन्द्रजालिकपदार्थानामिव मायाया अपि सदसद्विलक्षणत्व-रूपम्, अनिवर्चनीयत्वमिति यावत्। लोके तावद् अबाधितस्य सत्त्वम्, बाध्यमानस्य असत्यत्वं प्रसिद्धम्। यथा ऋतस्य अबाधितत्वम्, अनृतस्य बाधितत्वम्। ''**नासदासीन्नो सदासीत्तदनीम्**[३]'' इति श्रुतिरपि अस्याः सदसत्त्वविलक्षणतां ब्रवीति। एवमेव माया ब्रह्मणो भिन्नाऽभिन्ना वा निर्वक्तुमशक्या। ब्रह्माभिन्नत्वे तस्या बाधायोगात्, ब्रह्मणः कालत्रयाबाध्यत्वात्। नापि ब्रह्मणोऽत्यन्तभिन्ना, अद्वैतबोधकश्रुतिविरोधात्। भिन्नाभिन्नत्वं त्वेकत्र विरुद्धम्, अतः उभयरूपाऽपि न भवति। एवमेव इयं माया अनादित्वात् न सावयवा, सावयत्वे जन्यत्वापत्तेः। नापि निरवयवा, परिणामासम्भवात्। सावयवत्व-निरवयत्वयोः एकत्र विरोधादेव न उभयात्मिकापि सम्भवति। अतः सत्त्वासत्त्वाभ्यां भिन्नत्वाभिन्नत्वाभ्यां साङ्गत्वानङ्गत्वाभ्यां निर्वक्तुमशक्यरूपा इयमनिर्वचनीयरूपा महाद्भुता अत्यन्ताश्चर्यरूपा च वर्तत इति। तदगादिषुः भगवत्पादाः —

> ''**सन्नाप्यसन्नाप्युभयात्मिका नो**
> **भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
> **साङ्गाप्यनङ्गाप्युभयात्मिका नो**
> **महाद्भुताऽनिर्वचनीयरूपा ॥**[४]'' इति।

१. वि.पु. ५.१७.१५
२. भ.गी. ७.१४
३. ऋ.सं. १०.१२९.१
४. वि.चू. १११

इयं माया नित्यशुद्धबुद्धमुक्तस्वभावम् आत्मानमावृत्य तद्बलेनैव तद्विपरीतभावं विक्षिपति। यथा चोक्तं सङ्क्षेपशारीरकारेण —

‘‘**आच्छाद्य विक्षिपति संस्फुरदात्मरूपं**
**जीवेश्वरत्वजगदाकृतिभिर्मृषैव।**
**अज्ञानमावरणविभ्रमशक्तियोगाद्**
**आत्मत्वमात्रविषयाश्रयताबलेन॥**[1]’’ इति।

अत एव मायोपाधिकं ब्रह्म जगज्जन्मादौ शक्तमिति सा शक्तिरित्युच्यते। तथा च श्रुतिः ‘‘**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया**[2]’’ इति। अस्याः शक्तेः परत्वं स्वकार्यापेक्षया। शक्तिरेषा विचित्रकार्यकारित्वाद्विविधा। ऐतिह्यमात्रा सा न प्रमाणसिद्धा अत एव उक्तं श्रूयत इति। ज्ञानरूपेण बलेन या सृष्टिक्रिया सा अनादिमायात्मकत्वात् स्वाभाविकीति श्रुत्यर्थः। अमुमेवर्थं वार्तिककारा अपि एवं व्यवृण्वन् — ‘‘**आत्माऽविद्यैव नः शक्तिः सर्वशक्तस्य सर्जने**[3]’’ इति। तत्त्वप्रदीपकारा अपि प्रागुक्तं श्रुतिवाक्यं प्रमाणयन्त एवमवोचन् —

‘‘**पराऽस्य शक्तिर्विविधा सर्गाद्या भावशक्तयः।**
**इति श्रुतिस्मृतिमिता शक्तिः केन निवार्यते॥**[4]’’ इति।

यद्यपि ब्रह्म निर्विशेषं तथापि निर्विशेषे ब्रह्मणि जगद्व्यापारं घटयतीति सा दुर्घटकारिणी माया। एतादृशी तस्य शक्तिः उदकादीनां द्रवत्वादिवत् स्वाभाविकी वर्तते। तथा च जगदुः विद्यारण्यमुनयः —

‘‘**द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि।**
**मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः॥**[5]’’ इति।

तथा चेयं माया जडा, अत एव अपरा प्रकृतिरिति श्रीभगवानभाषत —

---

१. सं.शा. १.२०
२. श्वे.उ. ६.८
३. बृ.उ.भा.वा. ४.३.१७८४
४. त.प्र. १.२३
५. पं.द. ६.१३५



‘‘**भूमिरापिऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्न प्रकृतिरष्टधा॥**[1]’’ इति।

अत्र जडवर्गेण स्वविकारेण सह माया प्रदर्शिता। ‘‘मे प्रकृतिः’’ इति कथनात् मायेयं ब्रह्माश्रिता ब्रह्मोपाधिभूता इत्यर्थलाभः। तेन साङ्ख्याभिमतप्रधानस्य निरासः। तेषां मते तु प्रधानपदवाच्या प्रकृतिः स्वतन्त्रा। किन्त्विह वेदान्ते तु इयं माया ब्रह्माधीनत्वादस्वतन्त्रा। तत्र मायाया जगदुपादानत्वं संसारहेतुत्वञ्चेत्थम् — प्राक् प्रथमाध्यायोक्तरीत्या (१.१.५) अनाद्यनिर्वचनीयत्रिगुणात्मिकप्रकृतिः माया अविद्या चेति द्विविधा। तत्र शुद्धसत्त्वप्रधाना, विक्षेपशक्तिप्रधाना वा माया। मलिनसत्त्वप्रधाना आवरणशक्तिप्रधाना वा अविद्या। तयोः प्रतिबिम्बितं चैतन्यं क्रमेण ईश्वरो जीवश्च इत्याख्यायेते। तथा चोक्तं श्रुतौ — ‘‘**जीवेशावाभासेन करोति माया अविद्या च स्वयमेव भवति**[2]’’ इति। वाक्येनानेन मायाऽविद्ययो अभेदोऽपि स्फुटीभवति। उभयोः लक्षणमपि अनिर्वचनीयत्वं ब्रह्मज्ञानप्रतिबन्धकत्वं भ्रमोत्पादकत्वं चेति समानमेव। अयं मायाशब्दो मणिमन्त्रादिवत् सत्यं वस्तु इति वक्तुं न शक्यते। यतो हि केवलमणिमन्त्रादिमति पुरुषे मायाशब्दो न प्रयुज्यते, किन्तु मन्त्रादिभ्यो मिथ्याकार्यं यदा जायते, तदैव मायाशब्दप्रयोगः। अतोऽयं मायाशब्दो मिथ्यावस्तुविषयकः। अत एव ‘‘**माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद**[3]’’ इत्यादौ मिथ्याकार्ये मायाशब्दस्य प्रयोगः। तथा सति ‘‘**मायां तु प्रकृतिं विद्यात्**[4]’’ इति श्रुत्या निखिलस्यापि प्रपञ्चस्य मायाकार्यत्वान्मिथ्यात्वं स्फुटं भवति। शुक्त्यादिषु रजतादीनामुपादानभूता अविद्याऽपि मायैव। ब्रह्मज्ञानेन निवर्तमानायामविद्यायां ‘‘**तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः**[5]’’ इतिरूपेण मायाशब्दं प्रयुङ्क्ते। सर्वोपनिषद्रूपा भगवद्गीताऽपि तथैव दर्शयति। तथा हि तत्र ‘‘**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः**[6]’’

---

१. भ.गी. ७.३
२. नृ.उ.ता. ९
३. म.भा. १२.३३९.४५
४. श्वे.उ. ४.१०
५. श्वे.उ. १.१०
६. भ.गी. ५.१५

इत्युपक्रम्य ''**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः**[१]'' इत्युक्तं भवति। अत्र अज्ञानम् आत्मचैतन्यमावृणोति, किन्तु ज्ञानेन निवर्त्यत इति प्रोक्तम्। भाष्यकारेण अपि बहुत्र मायाऽविद्ययोः सामानाधिकरण्यं प्रयुक्तम्।[२] विवेकचूडामणावपि निरटङ्कि —

''**अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा।**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते॥**[३]'' इति।

एतदुक्तं भवति — सेयम् अव्यक्तनाम्नी परमेश्वरस्याचिन्त्याद्भुतशक्तिः माया रूपाद्यभावेन प्रत्यक्षगोचरत्वाभावेऽपि कार्यानुमेया भवति यथा शब्दादिभिः गगनादिकमनुमीयते। एतच्छक्त्यनङ्गीकारे तु प्रागुक्तरीत्या निर्गुणस्य ब्रह्मणः स्रष्टृत्वासम्भवात्, निष्कारणं कार्योत्पत्त्ययोगात् ''**इन्द्रो मायाभिः पुरुरूप ईयते**[४]'' इत्यादिश्रुतिविरोधस्स्यात्। अतः कार्यानुमेयया अनया मायया सर्वं जगत् महत्तत्त्वादिब्रह्माण्डान्तं प्रसूयते। तथा च श्रुतिः ''**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्**[५]'' इति, ''**अस्मान्मायी सृजते विश्वमेतत्**[६]'' इति च।

एवन्निरूपितायामनादिप्रकृतौ मायायां यज्जगन्निर्माणशक्तिर्विद्यते। सृष्टेः प्राक् माया अव्याकृतनामरूपात्मिका विकारप्रयोजकजाड्यादिधर्मोपेता च तिष्ठति। यथा बभाषिरे भाष्यकाराः काठकोपनिषद्भाष्ये — ''**अव्यक्तं सर्वस्य जगतो बीजभूतमव्याकृतनामरूपं सतत्त्वं सर्वकार्यकारणशक्तिसमाहाररूपम् अव्यक्तमव्याकृताकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितम्, वटकणिकायामिव वटवृक्षशक्तिः**[७]'' इति। एतेन ब्रह्म जगतोऽभिन्ननिमित्तोपादानकारणमित्यपि उक्तं भवति। ब्रह्मणो जगदुपादानत्वे सन्ति बहूनि प्रमाणानि। प्रागुक्तरीत्या ''**यतो वा इमानि भूतानि जायन्ते**[८]'' इति श्रुतिरपि पञ्चम्या

१. भ.गी. ५.१६
२. द्रष्टव्यम् - भ.गी.शा.भा. ९.१०, ब्र.सू.शा.भा. १.४.३
३. वि.चू. ११०
४. ऋ.सं. ६.४७.१८, बृह.उ. २.५.१९
५. श्वे.उ. ४.१०
६. श्वे.उ. ४.९
७. क.उ.शा.भा. १.३.११
८. तै.उ. ३.१.१



उपादानत्वमवगमयति। अत्र हि ब्रह्मणो जायमानभूतानामुपादनत्वेन ''**जनिकर्तुः प्रकृतिः**[१]'' इत्यपादानसञ्ज्ञा ततश्च पञ्चमीति ज्ञायते। अत्रैवं शङ्का भवितुम् अर्हति — ''पुत्राज्जायते प्रमोदः'' इत्यादिवाक्ये अनुपादानेऽपि पञ्चमीदर्शनात् प्रकृतिपदं हेतुमात्रपरम्। अत एवोक्तं न्यासे ''**प्रकृतिपदमनुपादानेऽपि अपादानसञ्ज्ञाप्रसिद्ध्यर्थम्**[२]'' इति। अतः कथमत्र पञ्चम्या प्रकृतित्वं वक्तुं शक्यते ? अत्रोच्यते — ''**सन्दिग्धे तु वाक्यशेषात्**[३]'' इति न्यायानुसारम्। यथा ''**पशुना यजेत**[४]'' इत्यत्र पशुशब्दस्य पशुमात्रवाचकत्वेऽपि ''**छागस्य वपाया**[५]'' इति वाक्यशेषश्रवणात् प्रथमश्रुतः पशुशब्दः पशुविशेषच्छागपर इति यथा निर्णीतः, तथैव प्रकृतेऽपि वाक्यशेषबलात् हेतुत्वमात्रेण अवगतापि पञ्चमी उपादानपरा भवति। एवमेव ''**आत्मन आकाशः सम्भूतः**[६]'' इत्यत्रापि प्रकृतावेव पञ्चमी, ''**सच्च त्यच्चाभवत्**[७]'' इति वाक्यशेषे ''मृद्घटः'' इत्यत्रेव उपादानोपादेयभावे सामानाधिकरण्यश्रवणात्।

अत्रेयं शङ्का — जगज्जन्मस्थितिलयसाधारण्यादस्तु ब्रह्म जगदुपादानम्। किन्तु ब्रह्मणो जगदुपादानत्वं कीदृशम् ? येन जडत्वादिधर्मवतो भोक्तृभोग्यरूपेण प्रविभक्तस्य च प्रपञ्चस्य अद्वितीयं चैतन्यं कथमुपादानमित्याद्याः शङ्कापङ्काः प्रक्षालयेयुः। उपादानं च आरम्भि, परिणामि, विवर्ति चेति त्रिविधम्।[८] यथा परमाणूनामारम्भकत्वरूपम्, प्रकृतेः परिणामित्वरूपम्, अविद्याया वियदादिप्रपञ्चरूपेण विवर्तमानत्वरूपमिति।[९] तत्र अन्यस्मात् कारणात् कार्यापेक्षया भिन्नात्

१. पा.सू. १.४.३०
२. पा.सू. १.४.३० इत्यत्र न्यासटीका
३. जै.सू. १.४.१३.२४
४. अस्य वाक्यस्य मूलं न क्वापि वैदिकग्रन्थेषु दृश्यते। परं चिन्नस्वामिमतानुसारं ''यो दीक्षितो यदग्नीषोमीयं पशुमालभते (तै.सं. ६.१.११.६) एतद्वाक्यगतपशुशब्दं तृतीयान्तविभक्त्या विपरिणम्य अर्थतः ''पशुना यजेत'' इत्युदाह्रियते।
५. जै.न्या. इत्यत्र उद्धृतं वाक्यमिदम्, पृ. २८
६. तै.उ. २.१.१
७. तै.उ. २.६.१
८. पं.द. १३.६
९. सि.ले.सं. १.१६

समवायिकारणाद् अन्यस्य कारणापेक्षया भिन्नस्य कार्यस्योत्पत्तिम् आरम्भवादिन ऊचिरे। अर्थात् कारणाद्भिन्नं कार्यमारभ्यत इति नैयायिकादयो मन्यन्ते। एकस्य वस्तुनः अवस्थान्तरतापत्तिः अन्यावस्थायाः प्राप्तिः परिणामितेति साङ्ख्याः सङ्गिरन्ते। यथा क्षीररूपं विहाय दधिरूपेण परिणमते, तथा मृत् कुम्भो भवति, सुवर्णं कुण्डलं भवति। मृत्सुवर्णयोः कुम्भकुण्डलावस्थायां मृत्सुवर्णयोः प्रतीयमानत्वेऽपि मृत्सुवर्णव्यवहारपरित्यागे कुम्भकुण्डलरूपेण व्यवहारात् परिणाम इत्युक्तम्।

अत्रोच्यते — यथा परमाणूनामारम्भकत्वमस्ति तथा ब्रह्मण आरम्भकत्वं तावन्न सम्भवत्येव, अद्वितीयत्वात्। अतो वेदान्तेषु आरम्भवादस्य सुतराम् अनङ्गीकारात् परिणामविवर्तवादौ अवशिष्येते। नापि ब्रह्मणः परिणामित्वम्, तस्य कूटस्थचैतन्यरूपत्वात्। किन्तु ब्रह्मणो जगदुपादानत्वमविद्यया जगदाकारेणं विवर्तमानत्वमेव। विशेषेण वर्तनं भानं विवर्तः। अर्थात् कारणस्य स्वयं किमपि विकारमनापद्य पूर्वावस्थामपरिहाय अन्यावस्थायामवभानं प्रतीतिः विवर्तो भवति। यथा रज्जुः स्वयं विकारमनापन्ना सर्प इव विशेषाकारेणावभासते। कुत एवं स्वीकरणीयम्? समाधीयते — ''**तदैक्षत बहुस्यां प्रजायेय**[1]'', ''**यतो वा इमानि भूतानि जायन्ते**[2]'' इत्यादिश्रुत्या जगतः अभिन्ननिमित्तोपादानकारणं ब्रह्मेवेत्यवगम्यते। किन्तु ''**अस्थूलमनणु**[3]'', ''**नेति नेति**[4]'' इत्यादिश्रुतिभिः निरस्तसमस्तविशेषं ब्रह्म उच्यते किल, तर्हि कथं निर्विशेषं सविशेषस्य प्रपञ्चस्य प्रकृतिरिति प्रश्नः समुदेति। अपि चान्यत्र ''**मायां तु प्रकृतिं विद्यात्**[5]'' इत्यादिश्रुतिभिः मायाया अपि प्रकृतित्वं जेगीयते, तथा च त्रिगुणात्मिकायास्तस्याः परिणामित्वमपि सम्भवितुमर्हति। मायाया जडत्वादिधर्मा अपि जगत्यनुवर्तन्त इति। अस्याः शङ्कायाः समाधानार्थं वेदान्तिभिः ब्रह्मणो मायायाश्चेति उभयोरपि उपादानत्वं स्वीक्रियते। तथा हि ब्रह्मण्यध्यस्ता विक्रियमाणा माया जगदाकारेण

---

१. तै.उ. २.६.१

२. तै.उ. ३.१.१

३. बृह.उ. ३.८.७, ३.८.८

४. बृह.उ. २.३.६

५. श्वे.उ. ४.१०



परिणमत इति सा परिणाम्युपादानम्, मायाऽधिष्ठानभूतं कूटस्थश्च ब्रह्म जगदाकारेण विवर्तत इति विवर्तोपादानम्। तथापि तत्र परिणामवादो विवर्तवादस्य पूर्वभूमिः अतस्तस्य आश्रयः, उभयथाऽपि विवर्तकारणाज्ञानविषयत्वरूपं विवर्ताधिष्ठानत्वम् अविशिष्टमिति विवर्तवादे एव तात्पर्यम्, न तु परिणामवादे। यथोक्तं सङ्क्षेपशारीरककारैः — ''**कृपणधीः परिणाममुदीक्षते क्षपितकल्मषधीस्तु विवर्तताम्**[1]'' इति। तर्हि कः पुनर्विवर्तपरिणामयोर्भेदः? उच्यते — वस्तुनः तत्समसत्ताकः कारणसलक्षणोऽन्यथाभावः परिणामः। यथा मृत्परिणामो घटो व्यावहारिकसत्ताकतया मृत्समसत्ताको जडत्वेन मृत्सलक्षणश्च। वस्तुनः तदसमसत्ताकः कारणविलक्षणो वाऽन्यथाभावो विवर्तः। यथा शुक्तिरूप्यस्थले प्रातिभासिकस्य शुक्तिरजस्तस्य उपादानत्वेन प्रसिद्धम् अज्ञानापेक्षयान्यूनसत्ताकं रजतम्। एवं प्रपञ्चः पारमार्थिकचैतन्यस्वरूपात् स्वोपादानाद् ब्रह्मणो व्यावहारिकतया विषमसत्ताकः, जडत्वेन विलक्षणश्च। एतस्मात्कारणादेव प्रपञ्चे परिदृश्यमानाः सत्त्वजडत्वादिधर्मा अप्युपपद्यन्ते। तदेवोक्तम् —

''**अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।**
**आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥**[2]'' इति।

अतो विवर्तवादानुसारमद्वयचैतन्यकूटस्थरूपस्य ब्रह्मणः अज्ञानात्, तद्ब्रह्म द्वैतप्रपञ्चं प्रति उपादानमिति कल्प्यते। अतो न तत्त्वतो ब्रह्म जगद्रूपमापद्यते, किन्तु केवलं जगद्रूपेण भासते। यथा शुक्तिरूप्यस्थले शुक्तिविषयकाज्ञानात् शुक्तौ रजताभावेऽपि रजतमस्तीति भासते, तद्वत्। यथा शुक्तिः तदवच्छिन्नं चैतन्यं वा रजताकारेण विवर्तते, तथैव ब्रह्म जगदाकारेण विवर्तते। तदभाषिषत पञ्चदशीकाराः —

''**ततो निरंश आनन्दे विवर्तो जगदिष्यताम्।**
**मायाशक्तिः कल्पिका स्यादैन्द्रजालिकशक्तिवत्॥**[3]'' इति।

एवंरूपेण विवर्तवादे मायाया उपयोगस्तु विद्यत एव। विवर्तोपादानत्वादेव ब्रह्मणः प्रपञ्चोत्पत्त्यादिव्यापारेण नास्ति स्वरूपात् प्रच्युतिः।

---

१. सं.शा. २.८१

२. दृ.वि. २०

३. पं.द. १३.१०

असावेवार्थः सूत्रभाष्यकारिदिभिरपि स्फुटं न्यरूपि। तथा हि एकस्माद् ब्रह्मणो विचित्रसृष्टिः कथं जायते, किञ्च प्रपञ्चस्य ब्रह्मविवर्तत्वेन स्वप्नप्रपञ्चवद् मिथ्यात्वात् तदुपादानत्वेऽपि ब्रह्मणः स्वप्नसाक्षिण इव कथं कृत्स्नप्रसक्तिदोषः न सम्भवतीत्याशङ्कायां सूत्रकारः सूत्रयामास ''**आत्मनि चैवं विचित्राश्च हि**[1]'' इति। यथा लोके मायाविनि स्वरूपबाधं विनैव हस्त्यश्वादिविचित्राः सृष्टयो दृश्यन्ते एवमेकस्मिन्नपि ब्रह्मणि विविधसृष्टिः सम्भवति। सूत्रमिदं व्याख्यायन्तो बभाषिरे भाष्यकाराः ''**अपि च नैवात्र विवदितव्यं कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्देनैव अनेकाकारा सृष्टिः स्यादिति; यत आत्मन्यप्येकस्मिन् स्वप्नदृशि स्वरूपानुपमर्देनैव अनेकाकारा सृष्टिः पठ्यते 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' इत्यादिना, लोकेऽपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादि-सृष्टयो दृश्यन्ते; तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैव अनेकाकारा सृष्टिर्भविष्यति**[2]'' इति। अत्र हि विवर्तवादः संसूचितो भवति इति वदन्तो भामतीकारा अवदन् ''**अनेन हि स्फुटितो मायावादः**[3]'' इति।

एवमीश्वराश्रया जगद्विवर्तहेतुभूता विक्षेपशक्तिप्रधाना माया यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुत्पादयति तथैव स्वावृतात्मनि विक्षेपशक्त्या आकाशादिप्रपञ्चमुद्भावयति। तथा चोक्तम् — ''**विक्षेपशक्तिर्लिङ्गादि-ब्रह्माण्डान्तं जगत् सृजेत्**[4]'' इति। अविद्या तु जीवोपाधिभूता आवरण-शक्तिप्रधाना। साऽऽवरणशक्तिः भेदबुद्धिजनकतया संसारहेतुः। यथा अल्पोऽपि मेघः अनेकयोजनायतमादित्यमण्डलं नयनपथपिधायकतया आवृणोति। यथोक्तम् —

> ''**अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।**
> **आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्॥**[5]'' इति।

---

१. ब्र.सू. २.१.२८
२. ब्र.सू.शा.भा. २.१.२८
३. भामती २.१.२८
४. दृ.वि. १३
५. दृ.वि. १५



तथा आवरणशक्तिरपि सच्चिदानन्दस्वरूपमावृणोति तदा जीवः आत्मानं कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकसंसारवन्तमात्मानं मत्वा मुह्यति शोचति च। तथा चात्र भवति श्रुतिस्मृती ''**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः**[1]'', ''**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः**[2]'' इति। सेयं माया सर्वान् जीवान् मोहयति। अतो मायावशं गतत्वादेव सर्वे जीवाः संसरन्ति। मायाया असाधारणमनर्थहेतुत्वमित्थं साश्चर्यमुद्घोषितं भाष्यकारैः — ''**अहो अतिगम्भीरा दुरवगाह्या विचित्रा माया चेयं यदयं सर्वो जन्तुः परमार्थतः परमार्थसतत्त्वोऽप्येवं बोध्यमानोऽहं परमात्मेति न गृह्णाति, अनात्मानं देहेन्द्रियादिसङ्घातमात्मनो दृश्यमानमपि घटादिवदात्मत्वेनाहममुष्य पुत्र इत्यनुच्यमानोऽपि गृह्णाति। नूनं परस्यैव मायया मोमुह्यमानः सर्वो लोकोऽयं बम्भ्रमीति**[3]'' इति।

अत्रेयं शङ्का — स्फुरणरूपे स्वप्रकाश आत्मनि तदत्यन्तविलक्षणमज्ञानं भवितुं नार्हतीति। वेदान्तमते आत्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या नोपपद्यते। तमःप्रकाशवद्विरुद्धस्वभावयोः स्वप्रकाशाज्ञानयोः तयोः सम्बन्धानुपपत्तेः, अविद्याभावे च तत्कृतमावरणं दुर्निरूप्यं स्यात्, तदभावे च तन्मूलकस्य विक्षेपस्य असम्भवः, विक्षेपाभावे च ज्ञाननिवर्त्यस्याभावात् ज्ञानवैयर्थ्यम्, ततस्तत्प्रतिपादकं शास्त्रमप्रमाणं स्यादित्याशङ्कापङ्कमित्थं निवारयन्ति विद्यारण्यमुनयः —

> ''**स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः।**
> **इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ॥**[4]'' इति।

स्वप्रकाश आत्मनि अज्ञानस्य योगो नास्ति तथापि एतादृशो विपरीताभासो लोके दृश्यत एव। अध्यासभाष्ये ''**नैसर्गिकोऽयं लोकव्यवहारः**[5]'' इति कथयता भाष्यकारेणापि तदेव समर्थितम्। यथा दिवसे प्रकाशे सत्यपि उलूकानामन्धकारो भवति। मनुष्याणामपि तमोनिवर्तकतया अन्यत्र प्रसिद्धेषु सूर्यमरीचिषु मरुस्थले

---

१. मुण्ड.उ. ३.१.२
२. भ.गी. ५.१५
३. क.उ.शा.भा. १.३.१२
४. पं.द. ६.२८
५. ब्र.सू.शा.भा. अध्यासभाष्यम्, पृ. १७

तोयभ्रमो जायते। विपुलप्रकाशवतो बहिःप्रदेशाद् आगतानां जनानां गृहे सत्यपि प्रकाशे तमोबुद्धिर्जायते। तथा च अहमज्ञ इत्यनुभवस्तु सर्वेषां विद्यत एव। एवं सति ज्ञानस्वरूपेऽप्यात्मनि अज्ञानसद्भावो नापलपितव्यः। अपि च भगवता भाष्यकारेणापि ''**न हि दृष्टे अनुपपन्नं नाम**[1]'' इति न्यायेन विद्याविधानादेव आत्मनि अविद्या अस्ति, असत्यामविद्यायां विद्याविधानमनर्थकं स्यादिति बृहदारण्यभाष्ये न्यगादि।

''**माया च तमोरूपानुभूतिस्तदेतज्जडं मोहात्मकम्**[2]'' इत्यनेन श्रुतिवाक्येन जाड्यमोहादयो मायाधर्मा अपि व्याख्याताः। एषा माया जीवान् प्रति आत्मस्वरूपम् आच्छादयन्त्यपि ब्रह्म न आवृणोति, तद्दृष्ट्या मायायाः कल्पनामात्रत्वात्। तथा च ''**तस्मिंश्चान्यो मायया सन्निरुद्धः**[3]'', ''**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्योऽभिचाकशीति**[4]'' इत्याद्याः श्रुतयो जीवस्यैव मायापाशवशङ्गतत्वं ब्रुवते। परमार्थरूपेण तु अद्वयब्रह्मण एव सत्यत्वात्, माया विद्वद्दृष्ट्या तुच्छा इति सिद्धान्तः।

## ४.५ सृष्टिविचारः —

एवं विचारितायामनादिप्रकृतौ मायायां जगन्निर्माणशक्तिर्विद्यत इति प्रागुक्तमेव। सा अव्याकृतनामरूपात्मिका माया सृष्टेः प्राग् विकारप्रयोजक-जाड्यादिधर्मोपेता सती तिष्ठति। यथा अभाषिषत भाष्यकाराः —''**अव्यक्तं सर्वस्य जगतो बीजभूतम् अव्याकृतनामरूपं सतत्त्वं सर्वकार्यकारण-समाहाररूपम् अव्याकृताकाशादिनामवाच्यं परमात्मनि ओतप्रोतभावेन समश्रितम्**[5]'' इति। एतन्मायोपाधिकत्वाद् ब्रह्म, जगतः उपादानत्वं निमित्तत्वं च सम्भवति। तत्र ब्रह्मण्यध्यस्ततया विक्रियमाणा मायायाः परिणाम्युपादानम्, मायाऽधिष्ठानभूतं कूटस्थब्रह्मणो विवर्तोपादानम्। एतादृग् उपादानत्वमभिप्रेत्यैव

१. बृ.उ.शा.भा. १.४.२०
२. नृ.उ.ता. ९
३. श्वे.उ. ४.९
४. मुण्ड.उ. ३.१.१
५. कठ.उ.शां.भा. १.३.११



''**इदं सर्वं यदयमात्मा**[1]'', ''**सच्च त्यच्चाभवत्**[2]'', ''**बहु स्यां प्रजायेय**[3]'' इत्यादिश्रुतिभिः ब्रह्मप्रपञ्चयोः तादात्म्यव्यपदेशः। तद्धि तादात्म्यं ब्रह्मणः अपरिणामित्वात् न ब्रह्मोपादेयत्वप्रयुक्तम्, किन्तु कार्योपादानमायाधिष्ठानत्व-प्रयुक्तम्। अत एव घटस्सन्, घटो भाति, घट इष्ट इत्यादिलौकिकव्यपदेशेऽपि अधिष्ठानभूतं सच्चिदानन्दरूपं ब्रह्म एव आरोप्येण सह तादात्म्यापन्नं सद्भासते। जगत्यस्मिन् नामरूपांशद्वयोः व्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धाद् भवति, तस्मात् नामरूपयोः मिथ्यात्वम्। तदेव ''**अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्**[4]'' इत्यनेन उक्तम्।

अत्रेयं शङ्का स्यात् — घटपटादिभौतिकसृष्टेः जीवसाध्यत्वदर्शनात् निखिलजगत्कारणं ब्रह्मणो नोपपद्यत इति। अत्रोच्यते — घटपटादिसृष्टपदार्थेषु पञ्चतन्मात्रेन्द्रियवर्गोत्पत्तौ सप्तदशावयोपेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरभूत-त्रैलोक्योत्पतौ च अविद्यातिरिक्तद्वाराभावात् परमात्मनः साक्षात् कर्तृत्वम्। तथा च श्रुतिः ''**हन्ताहमिमास्तिस्रो देवताऽनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि**[5]'' इति। विषयोऽयमस्माभिः तृतीयाध्यायेऽपि अविद्याविषयविचारे (३.१२) विचारितस्तथापि प्रकृतोपयोगित्वेन किञ्चिदिह प्रपञ्चितः।

### ४.५.१ सृष्टिवाक्यानां तात्पर्यम् —

जगज्जन्मादिकारणं ब्रह्मणो लक्षणमिति उक्तम्। अत्र केचिदाचिक्षिपुः — एतेषां जगत्कारणत्वादीनां ब्रह्मधर्माणां वेदान्तप्रतिपाद्यत्वेन ब्रह्मणः पारमार्थिकत्वेन तेषां पारमार्थिकत्वं स्यात्। किञ्च वेदान्तेषु यद्ब्रह्मणो निर्विशेषत्वं जोघुष्यते, तद्धानप्रसङ्गस्स्यात्। यतो हि तेषां पारमार्थिकत्वे सप्रपञ्चत्वं सविशेषत्वं वा ब्रह्मणस्स्यात्, न तु निर्विशेषत्वम्। तदा तु शास्त्रस्य प्रमाणत्वात् प्रमाणगम्यस्य च अबाधितत्वेन पारमार्थिकत्वाद् ब्रह्मणः सविशेषत्वमेव पारमार्थिकत्वेन ग्रहणीयं स्यादिति। न च जगत्कारणत्वादिकस्य शास्त्रप्रतिपाद्यत्वेऽपि अविद्याकल्पितत्वेन

१. बृह.उ. २.४.६
२. तै.उ. २.६.१
३. तै.उ. २.६.१
४. दृ.वि. २०
५. छा.उ. ६.२.२

अपारमार्थिकम्, तेन च ब्रह्मणो न निर्विशेषत्वहानिरिति वाच्यम्, तथा सति "**यतो वा इमानि भूतानि जायन्ते**[१]" इत्यादिश्रुतिवाक्यानां बाधितार्थविषयकज्ञानजनकत्वेन अप्रामाण्यापत्तिः।

अत्र समाधिष्महि — "**न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यम्, किन्तु अद्वये ब्रह्मण्येव**[२]" इति वेदान्तपरिभाषाकारस्य भणितिः। न ह्येवं भवति यद्यस्माद्वाक्याद्यः प्रतीयते स एव तस्यार्थः, परन्तु यः तात्पर्यविषयीभूतोऽर्थो भवति स एव तस्यार्थः। तथा चोक्तमभियुक्ततरैः — "**यत्परः शब्दः स शब्दार्थः**[३]" इति। एवञ्च प्रकृतेऽपि सृष्टिवाक्यानां न सृष्टौ तात्पर्यम्, सप्रयोजनस्य अज्ञातस्यैव शास्त्रतात्पर्यविषयत्वात्, सृष्टेश्च लोकावगतत्वेन निष्प्रयोजनत्वात्। एवं सृष्टिवाक्यानां श्रुतार्थे प्रामाण्याभावेऽपि तात्पर्यविषयीभूतार्थेऽद्वितीये ब्रह्मणि तात्पर्यमस्ति, अतो न श्रुतिवाक्यानामप्रामाण्यापत्तिः। तर्हि अद्वितीयब्रह्मप्रतिपत्तौ सृष्टेः किमुपयोगित्वमस्ति इति चेत्। उच्यते — यदि सृष्टिम् अनुपन्यस्य "**नेह नानास्ति किञ्चन**[४]" इत्यादिश्रुत्या ब्रह्मणि प्रपञ्चस्य निषेधः प्रतिपाद्येत, तर्हि ब्रह्मणि प्रतिषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्य इव ब्रह्मणः अन्यत्रावस्थानशङ्कायामसन्दिग्धमद्वितीयं ब्रह्म न प्रतिपादितं स्यात्। तद्यथा "वायौ रूपं नास्ति" इत्युक्ते यथा वायौ रूपं नास्ति किन्त्वन्यत्र रूपं वर्तत इति प्रतीतिर्भवति, तथैव "ब्रह्मणि प्रपञ्चो नास्ति" इत्युक्ते प्रपञ्चोऽन्यत्र वर्तत इति प्रतीतिस्स्यात्। एवञ्च ब्रह्मातिरिक्तस्य प्रपञ्चस्य सत्यस्य विद्यमानत्वे ब्रह्मणोऽद्वितीयत्वमेव न सिध्येत्। अतः सृष्टिवाक्यानामुपन्यासाद् ब्रह्मैव जगदुपादानमिति ज्ञाने जाते उपादेयस्य कार्यस्योपादानं विना स्थित्यभावात्, ब्रह्मरूपमुपादानं विहायान्यत्र जगतः सद्भावशङ्का निरस्ता भवति। तदनु "**नेति नेति**[५]", "**नेह नानास्ति किञ्चन**[६]" इत्यादिश्रुत्या ब्रह्मण्यपि प्रपञ्चस्य सत्तायां

१. तै.उ. ३.१.१
२. वे.प. पृ. २५९
३. भामती, १.३.३२ इत्यत्र उद्धृतम्।
४. बृह.उ. ४.४.१९
५. बृह.उ. २.३.६
६. बृह.उ. ४.४.१९



निराकृतायां प्रपञ्चस्य मिथ्यात्वावबोधे निरस्तनिखिलद्वैतविभ्रममखण्डं सच्चिदानन्दरूपं ब्रह्म सिद्ध्यतीति परम्परया सृष्टिवाक्यानां ब्रह्मण्येव तात्पर्यम्। अत एव श्रुत्या ब्रह्मणो जगदुपादानत्वं प्रसाध्यत इति सर्वमनवद्यम्।

जगदुपादानत्वं ब्रह्मणि अस्तीति निरूपितम्। यथा मायावशगे ईश्वरे जगत्स्रष्टृत्वमस्ति तथैव जीवेऽपि स्रष्टृत्वमस्ति। तत्र पारमेश्वरी सृष्टिः भूतभौतिकविकाराणां भवति, जीवस्य तु अहङ्कृत्या भवति। अतः परमेश्वरस्य सृष्टिः उत्कृष्टा भवति, अविद्यावतो जीवस्य सृष्टिस्तु कामेन लोभेन तत्तद्विषयप्राग्भारेण च संदूषिता कलुषिता सती सदोषा भवति। अत्र आद्या पारमेश्वरी सृष्टिः ज्ञानसाधिका, चरमा जीवकृता तु मनोमयादिसृष्टिः अनर्थहेतुः ज्ञानबाधिका भवति। यथा चावादि कैवल्यदीपिकाकारेण —

"**उत्कृष्टस्य परस्य सृष्टिरनघा जीवस्य सृष्टिः परा**
**सामान्यापि यदादिसर्वजगतां विस्फूर्तिराद्या मता।**
**अन्त्याहङ्कृतिकामलोभविषयप्राग्भारसंदूषिता**
**सृष्टिर्जीवकृतैव नेश्वरकृतेत्येवं भवान्तुष्यताम्॥**[१]" इति।

पञ्चदश्यामपि अयमेवार्थो विद्यारण्यमुनयः इत्थं प्राहुः —

"**ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते।**
**विवेके सति जीवेन हेयो बन्धः स्फुटीभवेत्॥**[२]" इति।

कारणोपाधिपाकेनान्तर्यामिणा ईश्वरेण कार्योपाधिकेनाहम्प्रत्ययिना जीवेन च सृष्टमुत्पादितम्। श्लोकेऽस्मिन् यद्यपि जीवेश्वरयोरुभयोरपि जगत्स्रष्टृत्वे प्रतिपिपादयिषितेऽपिशब्दो जीवेनेत्यनन्तरं पठितुं युक्तः, यतो हि सम्मुच्चयद्योतकस्य समुच्चेयार्थबोधकपदोत्तरं पाठनियमात्, तथापि बहूनां जीवस्य जगत्स्रष्टृत्वे विप्रतिपत्त्यभावादीश्वरस्रष्टृत्वमात्रविप्रतिपत्तेः परिहारसूचनाय ईश्वरस्यापि स्रष्टृत्वं स्फोरयितुमीश्वरपदोत्तरमपिशब्दप्रयोग इति बोध्यम्।

पारमेश्वरी सृष्टिः अद्वैतज्ञानं प्रति प्रतिबन्धकं न भवति, प्रत्युत अद्वैतसाधकं भवतीति अन्वयव्यतिरेकाभ्यां साधयितुं शक्यते। तथा हि सकलतनुभृतां

१. कै.दी. २.५६
२. पं.द. ४.१

चतुर्विधभूतग्रामाणां नियन्तुरन्तर्यामिणो लीलाविनोदमात्रा ईक्षणादिप्रवेशावसानाः सृष्टयः, जीवेभ्यो मोक्षदात्र्यस्सन्ति। जीवसृष्टयस्तु जाग्रदादिविमोक्षान्ता अपि मध्ये जनिमृतिकल्पनादुःखभाजो जन्ममरणसंयोगवियोगादिक्लेशवत्यो भवन्ति। अत ईश्वरसृष्टं द्वैतमद्वैतज्ञानस्य साधकम्।[1] ईश्वरसृष्टद्वैताभावे गुरुशास्त्रादेरभावप्रसङ्गेन तदुपदेशासम्भवाद् ब्रह्मज्ञानं नोदीयादेव। अतो ब्रह्मज्ञानोपायभूतगुरुशास्त्रादि-सम्पादकत्वेन ईश्वरसृष्टं द्वैतं साधकमेव। अतस्तत्र द्वेषो न कार्यः, नापि तत्रौदासीन्यमपि। अयमेवार्थः कैवल्यदीपिकारेण एवं स्फुटीकृतः —

''**नेतुर्ब्रह्मादिमूर्तेः सकलतनुभृतां सृष्टयो मुक्तिदात्र्यो**
**जीवानां सृष्टयस्ता जनिमृतिकलना दुःखरूपा भवन्ति।**
**नष्टेऽस्मिन्स्थावरादावपि जगति न कोऽप्याप्नुयादेव मुक्तिं**
**नष्टे कामादिदोषे कृतबहुलभयं जन्मदुःखं विनश्येत्॥**[2]'' इति।

### ४.५.२ चतुर्विधः कल्पः —

ब्रह्मण उत्पन्नस्य प्रपञ्चस्य उत्पन्नादेव लयोऽपि भवति। स च कैवल्यदीपिकाकारेण कृष्णेन सङ्क्षेपेण स्फुटं प्रतिपादितः। तद्यथा —

''**कल्पान्ते परमेश्वरस्य कलने नष्टेऽपि के वा गता**
**मुक्तिं सत्यपि देशकालकलने जीवस्य मोहे गते।**
**वैराग्येण नयेऽपि सञ्चितलयात्प्राप्ता विमुक्तिं परां**
**पाशो मोहमयः पशोर्विरचितो नासौ भवेत्तत्पतेः॥**[3]'' इति।

कल्पान्तशब्दो ह्यत्र प्रलयार्थे प्रयुक्तः। ''**कल्पयति सृष्टिं विनाशं वात्र**[4]'' इति व्युत्पत्त्या कल्पशब्दः सृष्टिं विनाशञ्च द्योतयति। अतः कल्पप्रलयौ इत्यनर्थान्तरम्। स च कल्पान्तश्चतुर्विधः। तथा हि — ''**कल्पश्चतुर्विधः। नित्यः प्राकृतिको नैमित्तिकः आत्यन्तिकश्च**[5]'' इति। भागवतपुराणेऽपि उक्तम् —

१. पं.द. ४.४२
२. कै.दी. २.५७
३. कै.दी. २.५८
४. वाच. पृ. १८१५
५. कै.दी.व्या. २.५८



''**नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः।**
**आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी॥**[1]'' इति।

तत्र दैनन्दिनः प्रत्ययः सौषुप्तो नित्यप्रलयः, तस्य सकलकार्यप्रलयरूपत्वात्। कार्यब्रह्मणो दिवसावसाननिमित्तस्त्रैलोक्यप्रलयो नैमित्तिकः, मायाजन्यसर्वविकारस्य प्रकृतौ लयः प्राकृतिकप्रलयः, विदेहमुक्तिफलः आत्यन्तिकप्रलयः।

अद्वैतवेदान्तशास्त्रे एवमेव प्रलयो न्यरूपयत। प्रलयो नाम त्रैलोक्यरूपकार्य-विनाशः। तथा हि कार्यस्य स्वोपादाने सूक्ष्मरूपेण अवस्थानं प्रलय इत्युच्यते। यथा महाप्रलयाधिष्ठानत्वं ब्रह्मणः, एवं सुषुप्त्यधिष्ठानत्वमपि तस्यैव, ''**सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति**[2]'' इति श्रुतेः। तत्र आत्यन्तिको मोक्षाख्यः प्रलयः श्रुतिषु बहुधा प्रतिपाद्यते। स च प्रलयः प्रागुक्तरीत्या चतुर्विधः। तथा च उक्तम् —

**नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज!।**
**नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः॥**[3]'' इति।

वेदान्तेषु क्वचित्तु प्रलयस्य त्रैविध्यमपि श्रूयते। तद्धि — आवरणशक्तिमद् अज्ञानात्मना अवस्थानम्, शक्तिद्वयवदज्ञानात्मना अवस्थानम्, ब्रह्मभावश्चेति। अतो यत्र प्रलयस्य त्रैविध्यमुच्यते तत्तु पौराणिकीं प्रसिद्धिमाश्रित्यैव न्यरूपिषत, तदपि अङ्गीकार्यम्। क्वचिद्धि पुराणे प्रलयस्य त्रैविध्यमेवं श्रूयते —

''**सर्वेषामेव भूतानां त्रिविधः प्रतिसञ्चरः।**
**नैमित्तिकः प्राकृतिकः तथैवात्यन्तिको लयः॥**[4]'' इति।

एतस्याङ्गीकारकारणन्तु श्रुतिविरोधाभावे स्मृतिप्रामाण्यस्य अवश्यमङ्गीकार्य-त्वाद्विद्यत एव। अथवा अयमेव त्रिविधः प्रलयः एवंरूपेण चतुर्विधो विभक्तुं शक्यते। तत्राद्यो व्यष्टिजीवापेक्षया नित्यः, द्वितीयः समष्टिजीवापेक्षया नैमित्तिकः, तृतीयः प्राकृतः, चतुर्थश्च आत्यन्तिक इति साकल्येन प्रलयस्य चातुर्विध्यम्।

१. भा.पु. १२.४.३८
२. छा.उ. ६.८.१
३. वि.पु. १.७.४१
४. वि.पु. ६.३.१

**४.५.२.१ नित्यः प्रलयः —**

''**नित्यः सदैव भूतानां यो विनाशो दिवानिशम्**[१]'' इति स्मृतिवाक्येन नित्यः प्रलयः सुषुप्तिः। अपि च ''**यदा सुप्तः स्वप्नं न कश्चन पश्यति अथ अस्मिन् प्राणे एवैकधा भवति। अथैनं वाक्सर्वैर्नामभिः सहाप्येति, चक्षुः सर्वैः रूपैः सहाप्येति, श्रोतं सर्वैः शब्दैः सहाप्येति, मनः सर्वैः ज्ञानैः सहाप्येति**[२]'', ''**सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति**[३]'', ''**इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति**[४]'' इत्यादिश्रुतयः सुषुप्तिकाले सर्वेषां कार्याणां कारणात्मना अज्ञानात्मना लयं ज्ञापयन्ति। तथा च सुषुप्तिः सकलकार्यप्रलयरूपा अज्ञानकार्यलिङ्गशरीरप्रविलय-रूपा इति तस्याः प्रलयत्वम्। ''**सुषुप्तिकाले सकले विलीने**[५]'' इत्यादिश्रुतौ च सुषुप्तिकाले सकलप्रपञ्चप्रलयः श्रूयते। अयश्च लयः आवरणशक्तिमदज्ञानात्मना अवस्थानमिति बोद्धव्यम्। अत एव सुषुप्तौ ''सुखेनाहमस्वाप्सं न किञ्चिदवेदिषम्'' इत्यनुभवः, न तु ''न किञ्चिदस्ति'' इति। सुप्तोत्थितस्य सुखदुःखाद्यनुपपत्तेः सुषुप्तेरपि मूलाविद्यारूपत्वमिति न च वाच्यम्। सुषुप्तौ हि सुखदुःखस्मरणादि-कारणानां धर्माधर्मपूर्वसंस्काराणाञ्च सूक्ष्मरूपेण कारणात्मना अविद्यात्मना वा अवस्थानमिति तेषां सावशेषो लयः, न तु निरवशेषः। तेन सुप्तोत्थितस्य पुरुषस्य प्राचीनसुखदुःखादीनामनुभवः स्मरणश्चोपपद्यते।

अत्रेयं शङ्का स्यात् — सुषुप्तौ अन्तःकरणादीनां स्वरूपत एव भानं स्वीकरणीयम्, न तु अज्ञानात्मना। सुषुप्तौ अन्तःकरणस्य तथाभ्युपगमे हि अन्तःकरणाधीनश्वासादिक्रियाणामनुपपत्तिः स्यात्। अत्रोच्यते — सुप्तपुरुषस्य ''न किञ्चिदवेदिषम्'' इति अज्ञानमात्रस्यैव प्रतीतेः वस्तुतो न श्वासादेः भानमस्ति। तदुपलब्धिस्तु पुरुषान्तरविभ्रममात्रम्। न चैवं सुषुप्तस्य मृतादविशेष इति वाच्यम्। सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना इहलोके एव वर्तते, मृतस्य तु लोकान्तरे

१. वि.पु. १.७.४३
२. कौ.उ. ३.३
३. छा.उ. ६.८.१
४. छा.उ. ८.३.२
५. कै.उ. १३



इतीयान् विशेषः सुषुप्त्यवस्थाया मरणावस्थायाश्च। अथवा अन्तःकरणस्य द्वे शक्ती — ज्ञानशक्तिः क्रियाशक्तिश्चेति। तत्र ज्ञानशक्तिविशिष्टस्य अन्तःकरणस्य एव सुषुप्तौ विनाशः, न तु क्रियाशक्तिविशिष्टस्य, तेन प्राणाद्यवस्थानमविरुद्धमिति।

**४.५.२.२ नैमित्तिकः प्रलयः —**

कार्यब्रह्मणो दिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलयः। नैमित्तिकप्रलये च —

''**एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्।**
**शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चाखिलम्॥**[१]''

इति श्रुतिर्मानम्। अत्र ''**यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति**[२]'' इति स्मृतिवचनबलात् समष्टिजीवात्मकस्य हिरण्यगर्भस्य सुषुप्तिः एव नैमित्तिकः प्रलयः। अस्मिन् प्रलये आवरणशक्तिमदज्ञानात्मनैव सर्वस्य प्रपञ्चस्य अवस्थानम्। तथा चात्र त्रैलोक्यमात्रस्य इति मात्रपदं यावदर्थकम्। सर्वकार्यविनाशो नैमित्तिकप्रलय इति यावत्। एतद्व्याख्यानं न युक्तमिति केचित्। तेषां मते कार्यब्रह्मणः अर्थात् प्रजापतेः विराजः दिवसावसानाद्धेतोः भूरादिलोकत्रयस्य प्रलयः, न तु मह आदिलोकस्य। तत्र च प्रमाणमिदं स्मृतिवचनम् —

''**चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतम्।**
**ब्राह्मो नैमित्तिको नाम तस्यान्ते प्रतिसञ्चरः॥**

**तदा हि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकम्।**
**जनं प्रयान्ति तापार्ता महर्लोकनिवासिनः॥**[३]'' इति।

ब्रह्मणो दिवसः चतुर्युगसहस्रपरिमितः कालः। ''**चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते**[४]'', ''**कृतं त्रेता द्वापरश्च कलिश्चेति चतुर्युगम्। प्रोच्यते तत् सहस्रं तु ब्रह्मणो दिवसो मुने**[५]'' इत्यादिवचनात्।

१. भा.पु. १२.४.४१
२. मनु.स्मृ. १.५२
३. वि.पु. १.३.२२-२३
४. ब्र.पु. २३२.११
५. ब्रह्मा.पु. २९.२३

### ४.५.२.३ प्राकृतिकः प्रलयः —

प्रलयोऽयं प्राकृत इत्यप्युच्यते। तत्र प्राकृतप्रलयस्तु कार्यब्रह्मविनाश-निमित्तकः सकलकार्यविनाशः। आवरणविक्षेपशक्तिद्वयविशिष्टाज्ञानं प्रकृतिः माया वा इत्युच्यते। मायाख्यायां प्रकृतौ मूर्तामूर्तरूपस्य सकलकार्यरूपप्रपञ्चस्य नाशः अर्थात् तदात्मनाऽवस्थानं प्राकृतः प्रलय इति। प्रलयोऽयं कार्यब्रह्महिरण्यगर्भ-विनाशानन्तरं भवति। तथा च निर्गलितोऽयमर्थः — कार्यब्रह्मविनाशानन्तरं तदधिष्ठितब्रह्माण्डवर्तिनिखिलभूतभौतिकादीनां केवलप्रकृत्यात्मना अवस्थानं प्राकृतः प्रलयः।

अस्मिन् प्रलये ''**असदेवेदमग्र आसीत्**[१]'', ''**नासदासीन्नो सदासीत्**[२]'', ''**तद्ध्येदं तर्ह्यव्याकृतमासीत्**[३]'' इत्यादिश्रुतिर्मानम्। अपि च सूत्रकारोऽपि एवमसूत्रयत् ''**कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्**[४]'' इति। सूत्रार्थोऽयं भाष्यकारेण एवं स्फुटीकृतः ''**कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैव उत्पन्नसम्यग्दर्शनाः सन्तः, तदध्यक्षेण हिरण्यगर्भेण सह अतः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्ते इतीत्थं क्रममुक्तिः अनावृत्त्यादि-श्रुत्यभिधानेभ्योऽभ्युपगन्तव्या**[५]'' इति।

अयं हि प्राकृतप्रलयो न हिरण्यगर्भादिदृष्ट्या, किन्तु अज्ञानिदृष्ट्या। तद्यथा — यदा प्रलयात् पूर्वमेव उत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो हिरण्यगर्भस्य प्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परममुक्तिः तदा तल्लोकवासिनामपि उत्पन्नब्रह्मसाक्षात्काराणां कार्यब्रह्मणा सह विदेहकैवल्यम्। एवं तल्लोकवासिभिः सह कार्यब्रह्मणि मुच्यमाने कार्यब्रह्माधिष्ठितब्रह्माण्डान्तर्वर्तिनां चतुर्दशलोकानां तदन्तर्वर्तिनां स्थावरादीनां पृथिव्यादिभूतविकाराणां पृथिव्यादि-भूतानाञ्च प्रकृतौ मायायां परिणाम्युपादाने लयो भवति। तथा चात्र भवति स्मृतिः —

१. छा.उ. ३.१९.१
२. ऋ.सं. १०.१२९.१
३. बृह.उ. १.४.७
४. ब्र.सू. ४.३.१०
५. ब्र.सू.शां.भा. ४.३.१०



''**ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।**
**परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥**[१]'' इति।

अपि च श्रीभगवताऽपि उक्तम् ''**सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्**[२]'' इति। प्राकृतप्रलयविषये इदं पुराणवचनं मानरूपेण उदाजह्रुः धर्मराजाध्वरीन्द्रा वेदान्तपरिभाषायाम् —

''**द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः।**
**तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि॥**
**एषः प्राकृतिको राजन् प्रलयो यत्र लीयते॥**[३]'' इति।

न च ब्रह्मणो जगदुपादानत्वात् तस्मिन्नेव लयोऽस्त्विति वाच्यम्। ब्रह्मणो विवर्तोपादानत्वेन बाधरूपप्रलयस्यैव तन्निष्ठत्वात्। अर्थात् बाधरूपविनाशस्यैव ब्रह्मरूपत्वेन, प्रकृतिविनाशानन्तरकालिकत्वाद् ब्रह्मभावस्य। अतोऽत्र लयस्य प्रकृतिनिष्ठत्वाद् अयं प्राकृतप्रलय इति उच्यते। ''**अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः**[४]'' इति उक्तेश्च।

### ४.५.२.४ आत्यन्तिकः प्रलयः —

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः। तत्र परमात्मनि सर्वेषामविद्या-तत्कार्याणां लयः। आत्यन्तिकप्रलये अविद्याया अपि लयात् परमात्मन्येव सर्वेषां लयः। भवति चात्र स्मृतिः —

''**ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि।**
**प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः॥**[५]'' इति।

यद्यपि प्राकृतप्रलयेऽपि ब्रह्मदृष्ट्या आत्यन्तिकः प्रलयो वर्तते, तथापि पारिभाषिको व्यवहारः सर्वमोक्षः एव आत्यन्तिकः प्रलय इति। स चैकजीववादे युगपदेव भवति। तद्यथा — जीवो नाम अविद्याप्रतिबिम्बितं चैतन्यम्। स च

१. ब्र.सू.शा.भा. ४.३.११ इत्यत्र उद्धृतम्।
२. भ.गी. ९.७
३. भा.पु. १२.४.५,६
४. सूत.सं. ४.२.८
५. कू.पु. ४५.९

एकः, तदुपाधेः अविद्यायाः एकत्वादिति एकजीववादिनः। तेषां मते एकस्य तत्त्वज्ञानेन एकदैव अज्ञानतत्कार्याणां नाशाद्युगपदेव सर्वेषां मोक्षो भवति। अन्तःकरणावच्छिन्नचैतन्यं जीव इति अन्तःकरणानां जीवोपाधित्वमङ्गीकुर्वतां बहुजीववादिनां मते तु क्रमेण मोक्ष इति। तथा हि एकस्य तत्त्वज्ञानेन न कृत्स्नस्य अज्ञानस्य नाशः, अज्ञानस्य सांशत्वात् एकस्य ज्ञानेन एकांशस्य नाशेऽपि अंशान्तराणां वर्तमानत्वात्। एकैकक्रमेण सर्वेषां तत्त्वज्ञाने जाते क्रमेणैव अज्ञानतत्कार्याणां नाशात् क्रमेणैव जीवानां मोक्षः, न तु युगपत्। ''**सर्व एकीभवन्ति**[१]'' इत्यादिश्रुतिः आत्यन्तिकप्रलये मानम्।

एतेषु चतुर्षु प्रलयेषु आद्यास्त्रयो लयाः कर्मोपरमनिमित्ताः। तत्र स्थूलसूक्ष्मशरीराभिमानिनो व्यष्टिजीवस्य स्वप्नजाग्रद्भोगप्रदकार्योपरमो नित्यप्रलयस्य निमित्तम्। समष्टिसूक्ष्मशरीराभिमानिनो हिरण्यगर्भस्य, मतान्तरेण स्थूलशरीराभिमानिनो विराजो जाग्रद्भोगप्रदकर्मोपरमो नैमित्तिकप्रलयस्य निमित्तम्। अत्र सर्वत्रैव अज्ञानातिरिक्तकार्यस्य लयः, नाऽज्ञानस्य। तुरीयस्तु प्रलयो ज्ञानोदयनिमित्तः। ब्रह्मसाक्षात्कारादेव तुरीयः प्रलय इत्यर्थः। अत्र अज्ञानेन सह सकलकार्यस्य लय इति पूर्वेभ्यो विशेषः। विषयोऽयमस्माभिः तृतीयाध्याये मुक्तिविचारावसरे (३.१८) किञ्चित्प्रपञ्चितः तदेवात्र विशदीकृतः।

## ४.६ ज्ञानस्य द्वैविध्यम् —

सर्वव्यवहारस्य कारणं ''**सर्वव्यवहारहेतुर्बुद्धिर्गुणो ज्ञानम्**[२]'' इति तर्कसङ्ग्रहोक्तरीत्या ज्ञानं भवति। तज्ज्ञानं किं नित्यमुत अनित्यमिति विचारे ज्ञानमनित्यमित्याहुः वैशेषिकाः। तथा हि आत्ममनस्संयोगे सति आत्मविशेषगुणभूतं ज्ञानं जायते, तत्संयोगनाशे तु नश्यति, अतो ज्ञानमनित्यमिति तेषां राद्धान्तः। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतिप्रमाणमुररीकृत्य ज्ञानं नित्यम्, तच्च आत्मनः स्वरूपमेव, न गुण इति सङ्गिरन्ते। ''**सत्यं ज्ञानमनन्तं ब्रह्म**[३]'' इति श्रुतिरपि ज्ञानं ब्रह्मणः स्वरूपमिति ज्ञापयति। उक्तश्चैतदद्वैतमकरन्दे — ''**स्वरूपमेव मे ज्ञानं**

१. मुण्ड.उ. ३.२.७
२. त.सं. पृ. ७५
३. तै.उ. २.१



**न गुणः**[१]'' इति। अत्र ज्ञानशब्दो ज्ञायत इति ज्ञानमिति भावव्युत्पत्तिकः। अतः ज्ञप्तिः अवबोध इत्यनेन स्वरूपज्ञाने पर्यवस्यति। ज्ञानस्य ज्ञायते अनेनेति करणव्युत्पत्तिरपि वक्तुं शक्या, किन्तु सत्यानन्तशब्दाभ्यां सह सामानाधिकरण्यविरोधाद् वेदान्तिभिः सा व्युत्पत्तिः नाद्रियते। तथा हि त्रिकालाबाध्यत्वं सत्यत्वम्। ब्रह्मणो ज्ञानकर्तृत्वेन विक्रियमाणे सति ज्ञेयज्ञानाभ्यां प्रविभक्तस्य तस्य परिच्छेदराहित्यमपि न सम्भवति। अत एव ''**यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद् विजानाति तदल्पम्**[२]'' इति श्रुत्या भूमाख्ये ब्रह्मणि दर्शनादिक्रियाकारकाभावो दर्शितः। क्रियादिप्रविभक्तस्य तु परिच्छिन्नत्वं प्रोक्तम्। अतः ब्रह्म न वस्त्वन्तरज्ञानकर्तृ। नापि स्वात्मानमेव ब्रह्म विजानाति, एकस्मिन् कर्तृकर्मभावविरोधात्। अतः सत्यादिपदसन्निधानाज्ज्ञानशब्दोऽत्र भावव्युत्पत्त्या निर्विशेषं चिन्मात्रं ज्ञप्तिरेव। यद्यपि क्रियासामान्यमत्र भाव इत्युच्यते। ब्रह्मस्वरूपत्वात् ज्ञानं नित्यमिति सिद्ध्यति, न हि अनित्यं ज्ञानं नित्यस्य ब्रह्मणः स्वरूपं भवितुमर्हति।

अत्रेयं शङ्का — ज्ञानस्वरूपब्रह्मणो नित्यत्वात् अयं घटः अयं पटः इत्यादिज्ञानमपि नित्यं स्यात्। अपि च सुषुप्तौ न किमपि ज्ञानं भवतीति आस्माकीनोऽनुभवः। वेदान्तरीत्या ब्रह्मणि अध्यस्तत्वात् प्रपञ्चोऽपि ज्ञानमयस्स्यात्। किञ्च ज्ञानस्वरूपत्वाद् ब्रह्म ज्ञानविषयो न भवति। अतः कथं ज्ञानं नित्यम्, कथं वा तद्ब्रह्मणः स्वरूपमित्यादिशङ्कालेशं ग्रन्थकारो ज्ञानस्य द्वैविध्यकथनेन निराकरोति। तथा हि ज्ञानमात्मस्वरूपचैतन्यमेकरसमपि वृत्तितः स्वरूपादपि द्विप्रकारं भवति — स्वरूपज्ञानं वृत्तिज्ञानञ्चेति। तथाऽभाषत ग्रन्थकारः —

> ''**एकं ज्ञानं परमकथितं वृत्तितश्च स्वरूपाद्**
> **वृत्तिज्ञानस्वरूपाभिधचितिरवभात्येव वत्सास्ति नान्यत्।**
> **नाज्ञानस्यैव शत्रुर्भवति परचितिर्दृष्टमेवैति सुप्तौ**
> **वृत्तौ लग्ना स्वरूपाभिधचितिरपि सा नाशयेत् स्वीयमोहम्॥**[३]'' इति।

१. अ.म. २३
२. छा.उ. ७.२४.१
३. कै.दी. २.७९

ज्ञानस्य नित्यत्वे श्रुतिर्हि वेदान्तमते प्रमाणम् । श्रुत्यविरोधितर्केणापि ज्ञानस्य नित्यत्वं साधयितुं शक्यते । तथा हि जागरिते रूपज्ञानम्, रसज्ञानम्, गन्धज्ञानमित्येवं मिथो भेदेन विषयाणाम् अननुगमेऽपि, एकरूपं ज्ञानं तु सर्वत्रानुगतम् । अतो यथा एकोऽप्यकाशः घटाद्युपादिभेदाद् भिद्यते, तथैव एकमपि ज्ञानं विषयोपाधिकतया तु भिद्यते, परं स्वतस्तु भेदशून्यमित्यवगम्यते । एवं स्वप्नेऽपि यज्जाग्रद्वासनानिमित्तकं ज्ञानं भवति तदपि ज्ञानत्वाविशेषाज्जागरितज्ञानान्न भिद्यते । यद्यपि सुषुप्तौ अहमिदं जानामीत्याकारकं ज्ञानं नानुभूयते, तथापि एतावता सुषुप्तौ ज्ञानमेव नास्तीति वचनं साहसमात्रम् । उत्थितस्य पुरुषस्य सुखमहमस्वाप्सं न किञ्चिदवेदिषम् इति परामर्शो जायते । परामर्शोऽयमनुभवान्तरा न जायते । अतः सुषुप्तिकालेऽपि सुखस्य अज्ञानस्य चानुभव आसीदिति गम्यते । तच्च अनुभवात्मकं ज्ञानं ज्ञानत्वाविशेषाज्जागरितज्ञानान्न भिद्यते । एवमेकस्मिन् दिने यथा एकमेव ज्ञानं तथैव दिनमासादिक्रमेण सर्वस्मिन्नपि काले ज्ञानं भेदशून्यम्, अत एव नित्यमपि । किञ्च यदि ज्ञानमनित्यं स्यात्, तदा तस्य उत्पत्तिविनाशयोः ग्रहणमेव न स्यात् । असाक्षिकोत्पत्तिविनाशौ तु वक्तुमेव अशक्यौ । किञ्च स्वेनैव स्वग्रहणमपि न युज्यते । अतोऽपि ज्ञानं नित्यमेव । इदं ज्ञानं स्वप्रकाशमपि । तथा हि एकत्र कर्तृकर्मभावविरोधाज्ज्ञानं न तावत् स्वसंवेद्यम् । यदि ज्ञानान्तरेण गृह्यते तदा तस्य ग्राहकस्यापि ज्ञानस्य ग्रहणार्थं पुनर्ज्ञानान्तरमित्यनवस्थाप्रसङ्गस्स्यात् । न चानवस्थायां किञ्चित् प्रमाणमस्ति । अतः इदं ज्ञानं स्वप्रकाशमित्येव स्वीकरणीयम् । स्वप्रकाशत्वे सति स्वेतरावभासकत्वं स्वप्रकाशत्वम् । अर्थात् अपरोक्षं विषयावभासकं च सदपि ज्ञानं प्रकाशान्तरानपेक्षमित्यतः तत्स्वप्रकाशम् । एवमात्मनो नित्यत्वाज्ज्ञानस्य नित्यत्वस्वप्रकाशत्वे सिद्धे । स्वप्रकाशत्वाच्च ज्ञानमेव आत्मेति सिद्ध्यति । तदेवाचीकथन् पञ्चदशीकाराः —

> ''**मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।**
> **नोदेति नास्तमेत्येका संविदेषा स्वयम्प्रभा ।।**[१]'' इति ।

पूर्वोक्तरीत्या स्वाप्निकज्ञानं जाग्रज्ज्ञानान्न भिन्नम्, ज्ञानत्वाविशेषात् । तथैव सौषुप्तिकबोधोऽपि स्वाप्निकात् न भिन्नः । एवं स्थानत्रयेऽपि एकस्मिन्दिने जाग्रदादिषु

१. पं.द. १.७



संविदेका । एवं दिनान्तरेऽपि सा संविदभिन्ना । अतीताऽऽगामिषु मासाब्दयुगकल्पेषु सा संविन्नोदेति नाऽस्तमेति, कालत्रयाबाध्यत्वात् सत्या नित्या चेति भावः । एषा संवित् स्वयम्प्रकाशा नान्यैः प्रकाश्यते । ''**विज्ञातारमरे केन विजानीयात्**[१]'', ''**अमृतोऽदृष्टो द्रष्टाऽश्रुतश्श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता**[२]'', ''**तस्य भासा सर्वमिदं विभाति**[३]'', ''**न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्**[४]'' इत्यादिश्रुतिशतमत्र प्रमाणमिति भावः ।

यत्तु उत्पत्तिविनाशशालितया प्रतीयते, तदन्तःकरणवृत्त्यात्मकं ज्ञानम् । वृत्तिज्ञानमपि न स्वरूपज्ञानाद् भिन्नम्, आधारं विनाऽऽधेयायोगात् । अयमेवार्थो ग्रन्थकारेण सदृष्टान्तमेवं विवृतः —

> ''**स्वरूपज्ञानं यन्न दहति सुषुप्तावपि तमः**
> **कथं वृत्तौ लग्नं गुरुवर ! दहेच्चेऽदिति तमः ।**
> **रवेरुस्रा यद्वन्न दहति न जगत्सूर्यदृषदि**
> **प्रसक्तश्चेत् सर्वं दहति हि तथैतच्छृणु सखे ।।**[५]'' इति ।

ब्रह्माभिन्नत्वाज्जीवोऽपि ज्ञानस्वरूप एव । तदसुसूत्रत् सूत्रकारः ''**ज्ञोऽत एव**[६]'' इति । तदेव अविकृतस्य ब्रह्मण एव अविद्योपाधिकस्य जीवरूपेण अवस्थानाद् उत्पत्तिविनाशरहितो नित्यचैतन्यस्वरूपो जीव इति सूत्रार्थः । न च ''**नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः**[७]'' इति सूत्रेण पचादिभ्यः कर्त्रर्थे अच्प्रत्ययो विहितः । पचादेः आकृतिगणत्वात् ''जानाति इति ज्ञः'' इति कर्त्रर्थकाच्प्रत्ययान्तत्वाज्ज्ञशब्दस्य कथं चैतन्यात्मकार्थबोधकत्वमिति शङ्कनीयम् । ''**घञर्थे कविधानाम्**[८]'' इति वार्तिकेन भावार्थकप्रत्ययान्तत्वाज्ज्ञशब्दस्य

१. बृह.उ. ४.५.१५
२. बृह.उ. ३.७.२३
३. कठ.उ. २.५.१५
४. कठ.उ. १.२.१८
५. कै.दी. २.८०
६. ब्र.सू. २.३.१८
७. पा.सू. ३.१.३४
८. पा.वा. ३.३.५८

चैतन्यस्वरूपबोधकत्वमविरुद्धम्। ब्रह्माभिन्नत्वाज्जीवोऽपि ब्रह्मस्वरूप इति कथयता सूत्रकारेण ब्रह्मणो ज्ञानस्वरूपत्वमपि सूचितम्। ''**न हि विज्ञातुर्विज्ञातेः विपरिलोपो विद्यतेऽनादित्वात्**[१]'', ''**अत्रायं पुरुषः स्वयंज्योतिः**[२]'' इत्यादिश्रुतयः अमुमेवार्थं बोधयन्ति। एवं जीवो मलिनसत्त्वप्रधानाविद्योपाधिकतया न स्वरूपचैतन्येनैव सर्वावभासनक्षमः। अतो विषयावभासनार्थं तेन वृत्तिरपेक्ष्यते। तत्र वृत्तिर्नाम इन्द्रियद्वारा विषयदेशं गत्वा अन्तःकरणस्य विषयाकारः परिणामः। एतदवच्छिन्नं चैतन्यं प्रमाणचैतन्यमिति कथ्यते। अन्तःकरणावच्छिन्नं चैतन्यं तु प्रमातृचैतन्यम्। विषयावच्छिन्नं चैतन्यं प्रमेयचैतन्यम्। अर्थाद् एकमेव चैतन्यमन्तःकरणविशिष्टं सत् प्रमातृचैतन्यम्, वृत्त्युपारूढं सत् प्रमाणचैतन्यम्, विषयाधिष्ठानभूतं सत् विषयचैतन्यमिति व्यवह्रियते।

अन्तःज्ञानसाधनमन्तःकरणं अतिस्वच्छतैजसद्रव्यम्। तेजः सत्त्वगुणं प्रकाशकञ्च। तेन तैजसमन्तःकरणमपि अत्यन्तस्वच्छं विरलं तेजो द्रव्यम्। आकाशादिपञ्चतन्मात्रगतसात्त्विकांशेभ्यो हि अन्तःकरणं समुत्पन्नम्। अतः सूर्यकिरणवदन्तःकरणं नयनादिद्वारेण निर्गत्य दीर्घप्रभाकारेण परिणतं झटिति विषयदेशं प्राप्य विषयाकारं भवति। तदा वृत्तिद्वारा विषयचैतन्यस्य प्रमातृचैतन्यस्य यथा कुल्याद्वारा तडागकेदारसलिलयोः अभेदो भवति, तद्वदेकीभावः सम्पद्यते।

अत्र एवं शङ्का भवितुमर्हति यदत्र चैतन्यस्य वृत्तिविषयरूपम् उपाधिद्वयम् अस्ति, अतः कथं चैतन्याभेद इति। सा शङ्का एवं समाधेया — विशेषणयोरिव उपाध्योः न स्वरूपेण भेदकत्वम्, किन्तु भिन्नदेशस्थत्वेन। अत एव मठान्तर्वर्ति-घटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते। तद्वदत्रापि वृत्तिविषययोः बहिरेकदेशावस्थानतया भिन्नदेशस्थाभावाद् उपधेयं चैतन्यं न भिद्यते। एवम् अन्तःकरणतद्वृत्तिविषयचैतन्यानाम् अभेदाभिव्यक्त्या ''अयं घट'' इति ज्ञानं जायते। अत्र वृत्तेः जडत्वाद् वृत्तिरेवं ज्ञानमिति वक्तुं न शक्यते। इयं चैतन्याभिव्यक्तिः वृत्तिकृता इत्यत्र वृत्तौ चैतन्यमारोप्यते। तदुक्तं विवरणे ''**अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्**[३]'' इति। एवञ्च चैतन्याभेदाभिव्यक्तिः

१. बृह.उ. ४.३.३०
२. बृह.उ. ४.३.९
३. पं. वि. पृ. २०३



वृत्तेः कार्यम्। जीवचैतन्यस्य विषयचैतन्यस्य च सम्बन्धार्था वृत्तिरिति विवरणानुगामिनः, आवरणाभिभवार्था वृत्तिरिति मतान्तरम्। एतेषां मते वृत्त्या विषयदेशस्थजीवचैतन्यगतम् आवरणं यदाऽभिभूयते तदा विषयप्रकाशः।

जीवस्य स्वरूपभूतं यत्साक्षिज्ञानं भवति तत्तु अनावृतमेव। तत् सर्वत्र वृत्तिज्ञानेष्वननुगतत्वात् सर्वाणि वृत्तिज्ञानानि विषयीकरोति। तथा च श्रुतिः ''**प्रतिबोधविदितं मतममृतत्वं हि विन्दते**[१]'' इति। अस्मिन् श्रुतिवाक्ये ''**बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते**[२]'' इति भाष्यवचनाद् बोधपदं वृत्तिज्ञानपरम्। जडा अपि वृत्तयो यद्योगात् स्वयम्प्रभा इव भवन्ति, तत्स्वयम्प्रभं ब्रह्मैव अहमिति चिन्तनमपि ब्रह्मज्ञानकारणं भवति। भाष्यकारैरपि अयमेवार्थः अभ्यधायि — ''**सर्वे प्रत्ययाः विषयीभवन्ति यस्य स आत्मा सर्वबोधान् प्रतिबुध्यते। सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्ययेषु अविशिष्टतया लक्ष्यते, नान्यद्द्वारमात्मनो विज्ञानाय**[३]'' इति। अपि च —

''**नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं**
**ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते॥**[४]''

इत्यनेन सर्वेषु वृत्तिज्ञानेषु स्वरूपज्ञानस्य अनुगतत्वात् चाक्षुषादिज्ञानमपि स्वरूपज्ञानस्य अंशभूतम्। अयमेवार्थः सिद्धान्तलेशसङ्ग्रहे दीक्षितैः एवं निरूपितम् - ''**चैतन्यमात्रावरकस्याज्ञानस्य विषयावच्छिन्नप्रदेशे खद्योतादि-प्रकाशेन महान्धकारस्येव, ज्ञानेन एकदेशेन नाशः**[५]'' इति। एवञ्च अल्पांशेन नष्टेऽपि, सर्वात्मना नाशाभावात्, छिन्नेऽपि पुच्छे श्वा श्वैव नान्यत् इति न्यायेन अज्ञानस्य अनुवृत्तिर्युक्ता इति भावः। एवं ब्रह्मज्ञानरूपेण सर्वत्रानुगतम्। अतो ज्ञानमेव ब्रह्म, न तु ज्ञानस्य विषय इति। यस्तु एतद्विपरीततया अहं ब्रह्म ज्ञातवान् इति ज्ञानविषयत्वेन ब्रह्म जानाति, स अज्ञानी एव, तेन अविषयस्य ब्रह्मणो विषयत्वेन ज्ञातत्वात्। तथा च भवति श्रुतिः —

१. के.उ. २.४
२. के.उ.शां.भा. २.४
३. के.उ.शा.भा. २.४
४. द.स्तो. ४
५. सि.ले.सं. पृ. १५८

''**यस्यामतं तस्य मतं मतं यस्य न वेद सः ।**
**अविज्ञातं विजानतां विज्ञातमविजानताम् ॥**[१]'' इति ।

एवं ज्ञानाविषयस्याद्वितीयस्यापि स्वरूपज्ञानस्य अंशभूतत्वाद् अन्तःकरणवृत्तौ ज्ञानत्वोपचारस्तु विद्यते । अत एव श्रुतावपि क्वचिदात्मस्वरूपभूताज्ज्ञानाद् वृत्तिज्ञानस्य व्यावृत्तिः क्रियते । यथा ''**योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः**[२]'' इत्यत्र अन्तश्शब्दः बुद्धिवृत्तिव्यावर्तकः । वृत्तेः विषयदेशस्थतया सर्वान्तरत्वाभावात्तस्य व्यावृत्तिः । तथा चाभाणि भाष्यकारेण — ''**अन्तरिति बुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थम्**[३]'' इति ।

वस्तुतस्तु मायाविशिष्टाद् ब्रह्मणो जगति उत्पद्यमाने सति अन्तःकरणम् अपि उत्पद्यते । तत्र ''**तन्मनोऽसृजत**[४]'', ''**एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च**[५]'' इत्यादिश्रुतिर्मानम् । एवं सादिद्रव्यत्वादन्तःकरणं सावयवम् । सावयवत्वात्तस्य विषयाकारेण वृत्तिरूपः परिणामोऽपि सम्भवति । तथा च श्रुतिः ''**कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव**[६]'' । अत्र धीशब्देन वृत्तिरूपज्ञानमभिहितम् । एवं वृत्तिज्ञानमन्तःकरणस्य विकारः, सविषयकञ्च । स्वरूपज्ञानन्तु ब्रह्मस्वरूपत्वादेव न विकारभूतम्, नापि सविषयकम् । किन्तु तत्केवलं ''**प्रज्ञानघन एव**[७]'' इति श्रुत्या ज्ञानम् । ''**सत्यं ज्ञानमनन्तं ब्रह्म**[८]'' इति ब्रह्मशब्दस्य सत्यानन्दशब्दाभ्यां सामानाधिकरण्याच्च । अपि च उत्पन्नादेव अन्तःकरणमाविद्यकम् । अतः तद्धर्मभूतानि वृत्तिज्ञानान्यपि आविद्यकान्येव । यदा तु श्रुतिशिखोत्थानाखण्डधीवृत्त्या अहं नित्यशुद्धबुद्धमुक्त-स्वभावं ब्रह्मैवास्मि इत्याकारकोऽखण्डब्रह्मसाक्षात्कारः तदा ''**भिद्यते हृदयग्रन्थिः**[९]''

१. के.उ. १.११
२. बृह.उ. ४.३.७
३. बृ.उ.शा.भा. ४.३.७
४. वे.प. इत्यत्र उद्धृतं वाक्यम्, पृ. २५
५. मुण्ड.उ. २.१.३
६. बृह.उ. १.५.३
७. बृह.उ. ४.५.१३
८. तै.उ. २.१
९. मुण्ड.उ. २.२.८



इत्यादिश्रुतेः अन्तःकरणस्य नाशाद् आविद्यकानामन्तःकरणवृत्तीनामपि नाशः । एवञ्च ब्रह्मसाक्षात्कारोऽपि अखण्डाकारमनोवृत्तिरूपः । वृत्तिरियं प्रत्यगभिन्नब्रह्म-विषयिणी, तदस्माभिः अग्रे (४.८.२) उपपादिष्यते । इयं चैतन्यप्रतिबिम्ब-संवलिता चैतन्यगतमज्ञानमेव निवर्तयति । ब्रह्मणि अज्ञाननिवृत्तिरेव वृत्त्या क्रियते, न त्वत्र ब्रह्मणः स्वप्रकाशज्ञानत्वात् चिदाभासस्य आधानमिति । यथा पटोपादानतन्तुनाशे पटनाशो भवति तथैव अज्ञानस्यैव प्रपञ्चहेतुत्वाद् अज्ञाननिवृत्तौ तत्कार्यभूतः सकलोऽपि प्रपञ्चो निवर्तते । एवं सति चरमवृत्तेरपि अज्ञानकार्य-त्वान्निवृत्तिर्भवति । वृत्तौ प्रतिबिम्बितं चैतन्यमपि तदा ब्रह्माभिन्नमेव भवति । यथा सूर्यप्रभाया अवभासने दीपप्रभा असमर्था भवति, तथा स्वयंप्रकाशाखण्डा-ब्रह्मावभासने वृत्तिगतं चैतन्यमसमर्थम् । अतो दर्पणाभावे तद्गतो मुखप्रतिबिम्बो यथा मुखमात्रमेव भवति, तथैव स्वोपाधिभूतवृत्तौ बाधितायां वृत्तिगतचैतन्यमपि चैतन्यैकरसं ब्रह्मैव भवति ।

## ४.७ ज्ञानभूमिकाः —

ब्रह्मवेत्ता ब्रह्मैव इति श्रुतिसिद्धान्तः । ''**ब्रह्म वेद ब्रह्मैव भवति**[१]'', ''**ब्रह्मैव सन् ब्रह्माप्येति**[२]'' इति श्रुतेः । अतो ब्रह्मवेत्ता ब्रह्मज्ञानसमकाले एव मुक्तः । तथा च श्रुतिः — ''**आत्मक्रीडः आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः**[३]'' इति । आत्मनि क्रीडा रमणम् अपरोक्षानुभूतिः यस्य स ब्रह्मविद् इत्युच्यते । स्वस्वरूपावस्थितिः मुक्तिः, अहन्त्ववेदनात् स्वस्वरूपविस्मृतिरेव अज्ञानम् । अतः स्वस्वरूपज्ञानाय अज्ञानमपि तत्परिहारार्थं ज्ञातव्यम् । तत्र तावत् सप्त ज्ञानभूः तथैव सप्त अज्ञानभूः भवन्ति । तथा चोक्तं वासिष्ठे —

''**अज्ञानभूः सप्तपदा ज्ञभूः सप्तपदैव हि ।**
**पदान्तराण्यसङ्ख्यानि भवन्त्यन्यान्यथैतयोः ॥**[४]'' इति ।

अत्र कैवल्यदीपिकायामपि ग्रन्थकारेण विशदरूपेण अज्ञानभूसप्तकं

१. मुण्ड.उ. ३.२.९
२. बृह.उ. ४.४.६
३. मुण्ड.उ. ३.१.४
४. यो.वा. ३.११७.२

ज्ञानभूसप्तकश्च न्यरूपि। तथा हि —

**''ऊहैक्लृतप्ते विचारे परिगणितमबोधाख्यभूसप्तकं बोधाख्यं भूसप्तकं तच्छ्रुतिवचनपरैरुच्यते पूर्वमादौ। बीजाख्यं जाग्रदेकं पुनरपि तथा जाग्रदन्यन्महान्यो जाग्रत्स्वप्नश्च सन्ध्यं पुनरपि च तथा स्वप्नजाग्रत्सुषुप्तिः॥**[1]'' इति।

अत्र युक्तिविशेषैः क्लृप्ते उपनिषद्वाक्यार्थविचारे अध्यारोपापवादन्यायेन पूर्वमज्ञानभूसप्तकं विज्ञाय ज्ञानभूसप्तकं ज्ञातव्यमित्युक्तम्। यदा तत्त्वमस्यादिवाक्योत्थाखण्डाकारवृत्तिः अज्ञानं नाशयति, तदा ज्ञानेनाज्ञाननिवृत्तिः, स्वस्वरूपब्रह्मप्राप्तिश्च। एवञ्च स्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्याणां सञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वाद् अखिलबन्धरहितो ब्रह्मनिष्ठः पुरुषो जीवन्मुक्तो इत्युच्यते। यदा तु कालवशेन प्रारब्धकर्मक्षये सति यदा शरीरपातः सञ्जायते, तदा जीवन्मुक्तपुरुषो विदेहमुक्तिं लभते। अस्य जीवन्मुक्तस्य ब्रह्मविदः सप्तैव ज्ञानभूमिका भवन्ति। सम्प्रति अज्ञानभूसप्तकं यथाग्रन्थं विमृश्यते।

### ४.७.१ अज्ञानभूसप्तकम् —

तत्र सप्त अज्ञानभूमयो भवति। तथोक्तं वासिष्ठे —

**''तत्राऽऽरोपितमज्ञानं तस्य भूमीरिमाः शृणु।**
**बीजजाग्रत्तथा जाग्रन्महाजाग्रत् तथैव च॥**

**जाग्रत्स्वप्नस्तथा स्वप्नः स्वप्नजाग्रत्सुषुप्तकम्।**
**इति सप्तविधो मोहः पुनरेव परस्परम् ॥**[2]'' इति।

एवञ्च बीजजाग्रत्, जाग्रत्, महाजाग्रत्, जाग्रत्स्वप्नः, स्वप्नः, स्वप्नजाग्रत्, सुषुप्तिश्चेताः सप्तविधा अज्ञानभूमयः।

(१) बीजजाग्रात् — तत्र ''**पूर्णानन्दबोधात्परिपूर्णसच्चिदानन्दस्वभावाद् ब्रह्मात्मनः प्रथममादौ यच्चैतन्यं विज्ञानमुदयगद् उद्गतमभवत् तदेव बीजजाग्रत्**[3]'' इति प्रथमाऽवस्था। सृष्ट्यादौ जागरणादौ वा मायाशबल-

१. कै.दी. २.१४६
२. यो.वा. ३.११७.११-१२
३. कै.दी.व्या. २.१४७



चैतन्यात् प्राणधारणादिरूपोपाधिना भविष्यत्कालीनानां चित्तजीवादिनामशब्दार्थभाजानां बीजभूतं यत्प्रथमचैतन्यं भवति, तद्बीजजाग्रदिति भावः। तथा चोक्तम् -

**''प्रथमं चेतनं यत्स्यादनाख्यं निर्मलं चितः॥**

**भविष्यच्चित्तजीवादिनामशब्दार्थभाजनम्।**
**बीजरूपं स्थितं जाग्रद्बीजजाग्रतदुच्यते॥**[1]'' इति।

(२) जाग्रत् — द्वितीयाया जाग्रदवस्थायास्तु लक्षणमेवमभ्यधायि कैवल्यदीपिकाकारेण ''**समष्टिव्यष्टिप्रपञ्चबीजत्वादेव बीजाङ्कुरवत्पूर्वमविद्यमानकल्पाहङ्कृतिरुदयमाविर्भावं प्राप्नोतीति यत्तज्जाग्रत्**[2]'' इति। नवप्रसूतबीजजाग्रदनन्तरम् ''अयं स्थूलदेहोऽहम्'', ''इदं देहभोग्यजातं मम'' इत्येवं रूपेण या प्रतीतिः सा जाग्रदिति उच्यते। अवस्थेयं पूर्वानुभवाभावाद् महाजाग्रदवस्थातो भिन्ना। इयं जाग्रदवस्था वासिष्ठे विस्तरेण निरूपिता। तद्यथा —

**''एषा ज्ञप्तेर्नवावस्था त्वं जाग्रत्संसृतिं शृणु।**
**नवप्रसूतस्य परादयं चाऽहमिदं मम॥**

**इति यः प्रत्ययः स्वस्थस्तज्जाग्रत्प्रागभावनात्।**[3]'' इति।

(३) महाजाग्रत् — ''**रजस्तमोविकारत्वेन तीव्राहङ्कारममकारसञ्जातजन्मजरामरणादिसम्प्रयोगो महाजाग्रत्**[4]'' इत्यनेन तृतीया महाजाग्रद् अवस्था ग्रन्थकारेण उपन्यस्ता। अहमिदं शरीरमस्मि, इदं सर्वं भोग्यजातं मदीयमिति जाग्रत्प्रतीत्यनन्तरं जन्मान्तरोदितः सजातीयसंस्काररूपपीवरः प्रत्ययो महाजाग्रदिति भावः। उक्तश्च वासिष्ठे —

**''अयं सोऽहमिदं तन्म इति जन्मान्तरोदितः॥**

**पीवरः प्रत्ययः प्रोक्तो महाजाग्रदिति स्फुरन्।**[5]'' इति।

१. यो.वा. ३.११७.१३-१४
२. कै.दी.व्या. २.१४७
४. यो.वा. ३.११७.१५-१६
५. कै.दी.व्या. २.१४७
६. यो.वा. ३.११७.१६-१७

(४) जाग्रत्स्वप्नः — अस्या लक्षणन्तु ''**महाहङ्कृतिपरिमिलनात् नष्टाहङ्काराध्यासाद् अत्र हृदि यन्मनोराज्यक्लृप्तः मनोराज्यकारणं तज्जाग्रत्स्वप्नः**[१]'' इति। उक्तश्च वासिष्ठे —

''**अरूढमथवा रूढं सर्वथा तन्मयात्मकम्॥**
**यज्जाग्रतो मनोराज्यं जाग्रत्स्वप्नः स उच्यते।**[२]'' इति।

(५) स्वप्नः — कैवल्यदीपिकाकारेण स्वप्नस्य लक्षणन्तु एवं निगदितम् ''**भुक्त्वाऽऽशयस्थानमञ्चादिकमाश्रितस्य इन्द्रियार्थानगृह्णतः सुषुप्त्यवस्थामप्यनापन्नस्य या मनोराज्यक्लृप्तिर्जाग्रद्वासनया पूर्ववन्मानसो व्यापारः स एव हि स्वप्नः**[३]'' इति। स्वप्नश्च द्विचन्द्रशुक्तिकारूप्यमृगतृष्णादिभेदतो बहुविधो भवति।[४] उक्तं हि वासिष्ठे —

''**अभ्यासात्प्राप्य जाग्रत्त्वं स्वप्नोऽनेकविधो भवेत्।**
**अल्पकालं मया दृष्टमेवं नो सत्यमित्यपि॥**
**निद्राकालानुभूतेऽर्थे निद्रान्ते प्रत्ययो हि यः।**
**स स्वप्नः कथितस्तस्य महाजाग्रत्स्थितेर्हृदि॥**[५]'' इति।

(६) स्वप्नजाग्रत् — ''**पूर्वं जाग्रदवस्थादृष्टं श्रुतं वा वस्तु पुनस्स्मरणं स्वप्नजाग्रत्**[६]'' इति अस्या अवस्थाया लक्षणं निगदितं ग्रन्थकारेण। वासिष्ठे च —

''**चिरसंदर्शनाभावादप्रफुल्लबृहद्वपुः ।**
**स्वप्नो जाग्रत्तया रूढो महाजाग्रत्पदं गतः॥**
**अक्षते वा क्षते देहे स्वप्नजाग्रन्मतः हि तत्।**[७]'' इति।

१. कै.दी.व्या. २.१४७
२. यो.वा. ३.११७.१७-१८
३. कै.दी.व्या. २.१४८
४. द्रष्टव्यम् - यो.वा. ३.११७.१८
५. यो.वा. ३.११७.१९-२०
६. कै.दी.व्या. २.१४८
७. यो.वा. ३.११७.२१-२२



(७) सुषुप्तिः — अज्ञानस्य अन्तिमाऽवस्थाऽस्ति सुषुप्तिः। षडवस्थापरित्यागे जीवस्य जडा स्थितिः सुषुप्तिरिति उच्यते। कैवल्यदीपिकाकारेण ''**गाढान्धकारावृत्तिरेव गाढान्धकारवद्वा वृत्तिः सुषुप्तिः**[१]'' इति सुषुप्तेः लक्षणं निगदितम्। वासिष्ठे तु —

''**षडवस्थापरित्यागे जडा जीवस्य या स्थितिः॥**
**भविष्यद्दुःखबोधाढ्या सौषुप्ती सोच्यते गतिः।**
**एते तस्यामवस्थायां तृणलोष्टशिलादयः॥**[२]''

इत्यनेन बीजजाग्रदादिषडवस्थाः कर्मफलभोगभूमिरूपत्वात् कर्मजाः। परं सुषुप्तौ तु भोगवशाद् उद्भूतकर्मणां क्षयः, इतरकर्मणामनुदयाद्भोग्यजातसकलस्थूलसूक्ष्मप्रपञ्चस्य विलीनत्वादज्ञानोपहिता चैतन्यशेषरूपा जीवस्य जडावस्था सुषुप्तिरित्यर्थः।

### ४.७.२ ज्ञानभूसप्तकम् —

येनाज्ञानेन आवृता जन्तवो मुह्यन्ति, तस्याज्ञानस्य नाश आत्मविषयकविवेकज्ञानेन भवति। यथा आदित्यः समस्तं रूपजातमवभासयति तद्वज्ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति। उक्तं हि —

''**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।**
**तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥**[३]'' इति।

यद्यपि सर्वेषां ज्ञानिनां निश्चयः एक एव तथापि ज्ञानभूमिकाभेदात्तेषां स्थितौ भेदो दृश्यते। ज्ञानभूमिकाः सप्त भवन्ति। ग्रन्थकारेण ज्ञानभूसप्तकमेवं जगदे —

''**अत्राद्या हि शुभेच्छा विचारणाद्द्वितीया तृतीया च।**
**तनुमानसि चतुर्थी सत्त्वापत्तिरसंसक्तिनामा च॥**
**सा पञ्चमी तु षष्ठी पदार्थाभावना तुरीया।**
**भूसप्तमी सुधीन्द्रैरेवं कथिता निबोधैताः॥**[४]'' इति।

१. कै.दी.व्या. २.१४८
२. यो.वा. ३.११७.२२-२३
३. भ.गी. ५.१६
४. कै.दी. २.१४९-१५०

अयमेव विषयो महोपनिषदप्यपि चर्चितः। तत्रायं श्लोकः —

**''ज्ञानभूमिः शुभेच्छा स्यात् प्रथमा समुदाहृता।**
**विचारणा द्वितीया स्यात्तृतीया तनुमानसी॥**

**सत्त्वापत्तिः चतुर्थी स्यात्ततोऽसंसक्तिनामिका।**
**पदार्थभाविनी षष्ठी सप्तमी तुर्यगा स्मृता॥**[1]'' इति।

(१) शुभेच्छा — पूर्वजन्मनि इह जन्मनि वा कृतनिष्कामकर्मवशात्तथा उपासनया अन्तःकरणं शुद्धं भवति। तेन च एकाग्रचित्तस्य साधनचतुष्टयं सम्पद्यते। तत ऊर्ध्वं मोक्षस्य तीव्रेच्छा जायते। एषा एव ज्ञानस्य शुभेच्छा इति प्रथमा भूमिका। अस्या विवेकादिसाधनचतुष्टयं लक्षणम्। यथोक्तं वासिष्ठे —

**''स्थितः किं मूढ एवाऽस्मि प्रेक्ष्येऽहं शास्त्रसज्जनैः।**
**वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः॥**[2]'' इति।

(२) विचारणा — यदा त्वाभ्यासवैराग्याभ्यां मोक्षस्य तीव्रेच्छा भवति तदा ब्रह्मनिष्ठसद्गुरोः शरणं गत्वा जीवब्रह्मणोः एकत्वबोधकवेदान्तवक्यानां यथाविधि श्रवणे प्रवृत्तिर्भवति। तत ऊर्ध्वं मननं विधाय प्रत्यग्ब्रह्मैक्यसाधकतद्भेद-बाधकयुक्तिभिः सदाऽद्वितीयब्रह्मात्मैक्यानुसन्धानमेव ज्ञानस्य द्वितीया विचारणाख्या भूमिका। अस्या लक्षणं वासिष्ठे एवमभ्यधायि —

**''शास्त्रसज्जनसम्पर्कवैराग्याभ्यासपूर्वकम्।**
**सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा॥**[3]'' इति।

(३) तनुमानसी — शुभेच्छा विचारणा चेति भूमिकाद्वयस्य परिपाकवशाद् ऐन्द्रियकविषयेष्वनासक्तिर्जायते। वासनाद्युपरमात् मनश्च सूक्ष्मं भूत्वा स्वाश्रयं प्रवर्तते। तदा ब्रह्मात्मनोः एकत्वनिश्चयानन्तरं भेदप्रत्ययानन्तरितब्रह्माकार-प्रत्ययप्रवाहद्वारा क्रियमाणनिदिध्यासनमेव ज्ञानस्य तृतीया भूमिका तनुमानसी इति। तथा हि वासिष्ठे —

---

१. म.उ. ३.१-२
२. यो.वा. ३.११८.८
३. यो.वा. ३.११८.९



**''विचारणा शुभेच्छाभ्यामिन्द्रियार्थेष्वसक्तता।**
**याऽत्र सा तनुताभावात् प्रोच्यते तनुमानसा॥**[1]'' इति।

एता भूमिकास्तिस्रः श्रवणमनननिदिध्यासनात्मिका भवन्ति। ताभ्यः तत्त्वज्ञानं सिद्ध्यति। एतास्तिस्रो ब्रह्मविद्यायाः साधनान्येव, न तु विद्याकोटावन्तर्भवन्ति। भूमित्रये भेदसत्यत्वबुद्धेरनिवारितत्वात्।

(४) सत्त्वापत्तिः — इयं ज्ञानप्राप्तेर्भूमिका। श्रवणमनननिदिध्यासनादूर्ध्वं संशयविपरीतभावनारहितः स्वरूपसाक्षात्कारो भवति। तदा तत्त्वज्ञानयुक्तं मनः शुद्धतां प्राप्नोति। एषा ज्ञानस्य सत्त्वापत्तिरित्याख्या चतुर्थी भूमिका। तथा च वासिष्ठे —

**''भूमिकात्रितयाभ्यासाच्चित्तेऽर्थे विरतेर्वशात्।**
**सत्यात्मनि स्थितिः शुद्धे सत्त्वापत्तिरुदाहृता॥**[2]'' इति।

एतासां चतसृणां भूमीनां तात्पर्यार्थं ग्रन्थकारेण एवमुक्तम् —

**''दुष्टं सङ्गमुपेक्ष्य या परशिवज्ञाने शुभेच्छारति-**
**र्ब्रह्मज्ञैस्सह बोध्यशास्त्रसतताभ्यासो विचाराभिधा।**
**सम्प्रोक्ता तनुमानसीति मुनिभिस्सर्वेषणावर्जनं**
**सत्त्वापत्तिरियश्च भूत्त्रितयकाऽभ्यासेन तत्त्वोदयः॥**[3]'' इति।

(५) असंसक्तिः — पूर्वोक्तभूचतुष्टयस्य निर्विकल्पसमाधेश्च अभ्यासवशात् सर्वथा देहादिषु अहंत्वममत्वभावौ निर्गच्छतः। तदा देहादिषु प्रीतिरपि न भवति। एषा एव ज्ञानस्य पञ्चमी भूमिका असंसक्तिरिति। इयं जीवन्मुक्तेरवस्था। जीवन्मुक्तब्रह्मवेत्त्रे अस्यामवस्थायां समग्रमदो जगत् स्वप्नवद्भासते। उक्तञ्च —

**''दशाचतुष्टयाभ्यासादसंसङ्गफलेन च।**
**रूढसत्त्वचमत्कारात् प्रोक्ताऽसंसक्तिनामिका॥**[4]'' इति।

(६) पदार्थाभावना — यदा तु निर्विकल्पसमाधेः अधिकोऽभ्यासो भवति

---

१. यो.वा. ३.११८.१०
२. यो.वा. ३.११८.११
३. कै.दी. २.१५१
४. यो.वा. ३.११८.१२

तदा सर्वपदार्थाधिष्ठानभूते ब्रह्मणि प्रीतिर्भवति, अन्यपदार्थेषु प्रीतेरभावश्च। पूर्वभूमिकापञ्चानामभ्यासवशात् स्वस्वरूपसत्यत्वदृढज्ञानाच्च अस्यामवस्थायाम् अन्तःकरणे पदार्थभानं प्रायो न स्फुरति। कदाचित् पदार्थबुद्धिः जागर्ति कदाचिच्च स्वपिति। अत एव अस्यां भूमौ स्थितस्य पुरुषस्य व्यवहारोऽन्यैः परिचालितो भवति। एषा एव ज्ञानस्य षष्ठभूमिका पदार्थाभावनेति। इयं विदेहमुक्तेः प्रथमाऽवस्था अस्ति। लक्षणन्तु अस्या वासिष्ठे एवमुक्तम् —

**''भूमिकापञ्चकाभ्यासात् स्वात्मारामतया दृढम्।**
**आभ्यन्तराणां बाह्यानां पदार्थानामभावनात्॥**
**परप्रयुक्तेन चिरं प्रयत्नेनार्थभावनात्।**
**पदार्थाभावनाम्नी षष्ठी सञ्जायते गतिः॥**[१]'' इति।

(७) तुर्यगा — यदा ज्ञातृज्ञेयज्ञानादीनां त्रिपुटीनां लयो भवति तदा न क्वापि प्रीतिर्न क्वापि द्वेषो भवति, सर्वदा तुरीयपदे एव स्थितिः भवति। अस्यामवस्थायां ज्ञानिनो पदार्थदेहबुद्धी सुतरां नष्टे भवतः। तस्य मनः स्वेन वा इतरेण देहपदार्थभानस्य स्थितौ नायाति। अत एव अस्या अवस्थाया व्युत्थानं न भवति। प्रारब्धनष्टे सति भूमिकेयमुदेति। एषैव ज्ञानस्य सप्तमभूमिका तुर्यगेति। इयं विदेहमुक्तेः अन्तिमाऽवस्था अस्ति। उक्तश्च वासिष्ठे —

**''भूमिषट्कचिराभ्यासाद् भेदस्याऽनुपलम्भतः।**
**यत् स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः॥**[२]'' इति।

असंसक्तिपदार्थाभावनातुर्यगा इति भूमिकात्रयं कैवल्यदीपिकामित्थं विवृतम् —

**''तत्त्वासक्तहृदोऽप्यभानमसतां प्रोक्ता त्वसंसक्तिका**
**स्वानन्दस्फुरणा त्रिपुट्यनुदये भावः पदार्थस्य हि।**
**ब्राह्मैकस्थितिरेव मौनरसिकैस्तुर्येति सा गीयते**
**तुर्यातीतपदेति पूर्वमुदितामेतां शृणुष्वाधुना॥**[३]'' इति।

१. यो.वा. ३.११८.१३-१४
२. यो.वा. ३.११८.१५
३. कै.दी. २.१५२



चतुर्थभूमिकायां वेदान्तवाक्यान्निर्विकल्पो ब्रह्मात्मैक्यसाक्षात्कारोदयः। अत एव चतुर्थभूमिकानिष्ठो ब्रह्मविद् इत्युच्यते। अस्यां भूमौ सर्वजगदुपादानस्य ब्रह्मणो वास्तवमद्वितीयसत्तास्वभावं निश्चित्य ब्रह्मण्यारोपितयोर्जगच्छब्दाभिधेययोः नामरूपयोः मिथ्यात्वमनुभूयते ब्रह्मविदा। तदाह —

**''अद्वैते स्थैर्यमायाते द्वैते चोपरतिं गते।**
**पश्यन्ति स्वप्नवल्लोकं चतुर्थीं भूमिकां गताः॥**[१]'' इति।

पञ्चम्यादिभूमित्रयनिष्ठानां विश्रान्तितारतम्येन दृष्टसुखतारतम्याद्वरवरीयान्वरिष्ठा इत्युच्यन्ते। एते त्रयोऽपि जीवन्मुक्ता एव। ते च निर्विकल्पसमाध्यभ्यासबलेन विश्रान्तितारतम्येन सम्पद्यन्ते। तत्र पञ्चमभूमौ निर्विकल्पकात्तदा स्वयमेव व्युत्तिष्ठति। सोऽयं योगी ''ब्रह्मविद्वरः'' इत्युच्यते। षष्ठभूमौ पार्श्वस्थैर्बोधितो व्युत्तिष्ठति। सोऽयं ''ब्रह्मविद्वरीयान्'' इत्याख्यायते। सप्तमभूमौ स्थितो योगी ''ब्रह्मविद्वरिष्ठः'' इत्युच्यते। एतद्विषये योगवासिष्ठादौ सम्यक् निरूपितम्। तथा चान्यत्रापि श्रूयते —

**''पञ्चमीं भूमिकामेत्य सुषुप्तिमनादिकाम्।**
**शान्ताशेषविशेषांशस्तिष्ठत्यद्वैतमात्रकः ॥**
**गलितद्वैतनिर्भासो मुदितोऽतः प्रबोधवान्।**
**सुषुप्तमन एवास्ते पञ्चमीं भूमिकां गतः॥**
**अन्तर्मुखतया तिष्ठन् बहिर्वृत्तिपरोऽपि सन्।**
**परिश्रान्ततया नित्यं निद्रालुरिव लक्ष्यते॥**
**कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः।**
**षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमिकाम्॥**
**यत्र नासन्न सद्रूपो नाहं नाप्यनहङ्कृतिः।**
**केवलं क्षीणमननमास्तेऽद्वैतेऽतिनिर्भयः॥**[२]'' इति।

अवधूतगीतायामपि —

१. अक्ष.उ. ३१
२. अक्ष.उ. ३४-३८

"**अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे।**
**समं ब्रह्म न जानन्ति द्वैताद्वैतविवर्जितम्॥**[१]" इति।

"**अन्तः शून्यो बहिः शून्यः शून्यः कुम्भ इवाम्बरे।**
**अन्तः पूर्णो बहिः पूर्णः पूर्णकुम्भ इवार्णवे॥**[२]" इति च।

गाढं निर्विकल्पसमाधिं प्राप्तस्य संस्कारमात्रशेषस्य चित्तस्य मनोराज्यं कर्तुं बाह्यपदार्थान्ग्रहीतुं वा सामर्थ्याभावादाकाशावस्थितकुम्भवत् अन्तर्बहिः शून्यत्वम्। स्वयम्प्रकाशसच्चिदानन्दैकरसे ब्रह्मणि निमग्नत्वेन बहिश्च सर्वत्र ब्रह्मदृष्ट्या समुद्रमध्यस्थापितजलपूर्णकुम्भवदन्तर्बहिःपूर्णत्वम्। तुरीयाभिधां सप्तमीं भूमिं प्राप्तस्य योगिनः स्वतः परतो वा व्युत्थानमेव नास्ति। ईदृशमेवोद्दिश्य "**देहं विनश्वरमवस्थितमुत्थितञ्च**[३]" इत्यादिभगवद्वाक्यं प्रवृत्तम्।

## ४.८ अन्तःकरणवृत्तिविचारः —

ज्ञाननिरूपणावसरे ज्ञानं ब्रह्मणः स्वरूपम् अत एव नित्यमित्युक्तम्। यत्तु ज्ञानमुत्पत्तिविनाशशालितया प्रतीयते, तदन्तःकरणवृत्त्यात्मकं ज्ञानमित्यपि पूर्वस्मिन्ग्रन्थे (४.६) विचारितम्। वृत्तिज्ञानं स्वरूपज्ञानान्न भिन्नम्, आधारं विनाऽऽधेयायोगात्। तर्हि किमिदं वृत्तिज्ञानम्? कथञ्चोत्पद्यते इति विषयं कैवल्यदीपिकाकारा एवं विजुगुफुः —

"**आदर्शान्तरिव त्वदीयवचनं च्छायैव बुद्धौ चिते-**
**श्चिशद्दधाति तदध्वनैव विषयान् गृह्णात्यशेषात्मनः।**
**चैतन्यं न हि केवलं च हृदयं जानाति किञ्चिद्यतो**
**वृत्तिज्ञानमिदं वदन्ति कवयश्चैतन्ययुक्तं मनः॥**[४]" इति।

श्रीमधुसूदनसरस्वतीपादास्तु सिद्धान्तबिन्दौ इत्थमन्तःकरणमवर्णयन् — "**तत्र देहेऽन्तःकरणभागोऽहङ्काराख्यः कर्तेत्युच्यते। देहविषयमध्यवर्ती दण्डायमानस्तद्भागः वृत्तिज्ञानाख्यः क्रियेत्युच्यते। विषयव्यापकस्तद्भागो**

१. अ.गी. ३६
२. दृ.वि. २६
३. भा.पु. ११.१३.३६
४. कै.दी. २.१२



**विषयस्य ज्ञानकर्मत्वसम्पादकमभिव्यक्तियोगत्वम् इत्युच्यते। तस्य च त्रिभागस्यान्तःकरणस्यातिस्वच्छत्वाच्चैतन्यं तत्राभिव्यज्यते। तस्य चाभिव्यक्तस्य चैतन्यस्यैकत्वेऽपि अभिव्यञ्जकान्तःकरणभेदात् त्रिधा व्यपदेशो भवति। कर्तृभागावच्छिन्नश्चिदंशः प्रमाता। क्रियाभागावच्छिन्नः चिदंशः प्रमाणम्। विषयगतोऽभिव्यक्तियोग्यत्वभागावच्छिन्नश्चिदंशः प्रमितिः**[१]" इति। सर्वेन्द्रियाणां श्रोत्रादीनां प्रधानमन्तःकरणं हि सत्त्वांशाधिका-पञ्चीकृतभूतपरिणामत्वेन तैजसत्वात् झटित्येव तद्विषयेण सन्निकृष्टं सद् अहमिदमात्मकवृत्तिभेदेन विषयाकारेण परिणमते। अन्तःकरणस्य वृत्तिरूपेण परिणामस्य प्रक्रिया परिभाषाकारेण इत्थमवादि — "**यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते स एव परिणामो वृत्तिरित्युच्यते**[२]" इति। एतदुक्तं भवति — विषयप्रत्यक्षकाले अन्तःकरणस्य विषयाकारसदृशाकारः स परिणाम एव वृत्तिरित्युच्यते। तथा च वृत्त्या विषयगताज्ञाननाशे सति विषयगत-चैतन्यम् अनावृत्तं भवति तदा विषयः प्रत्यक्षज्ञाने भासते। उक्तञ्च ग्रन्थकारेण —

"**तप्तस्ताम्ररसोऽग्निना परिणमत्यश्नादिरूपं यथा**
**चेतोवृत्तिरियं तथा घटपटाद्याकारिणी जायते।**
**आभासोऽपि चितः प्रकाशयति तान्सर्वान्पटादीन्वपु-**
**र्द्रष्टुं वस्तु तमोगतं च नयनं दीपं जनो वाञ्छति॥**[३]" इति।

एवं स्पर्शनादिप्रत्यक्षेऽपि सर्वत्र त्वगादीन्द्रियाधिष्ठानरूपद्वारमवलम्ब्य अन्तःकरणस्य बहिर्निर्गमनं विषयाकारेण परिणमनञ्च बोध्यम्। सर्वत्र च अन्तःकरणसंयुक्तेन्द्रिय-विषयसन्निकर्षस्य अन्तःकरणपरिणामहेतुमत्त्वं बोद्धव्यम्, न केवलमन्तःकरणेन्द्रिय-सन्निकर्षस्य विषयेन्द्रियसन्निकर्षस्य वा।

अत्रेयं शङ्का स्यात् — केषाञ्चिद् द्रव्याणाम् आकारवत्त्वात् तत्सम्बद्धस्य अन्तःकरणस्य तदाकारसदृशकारता युक्ता, गुणादीनां पदार्थानान्तु आकाराभावात्

१. सि.बिं. १, पृ. १०४
२. वे.प. पृ. ५१
३. कै.दी. २.१३

कथमन्तःकरणस्य तत्तदाकारसदृशतेति। अत्रोच्यते — गुणादीनां द्रव्याभेदाद् द्रव्याकारस्यैव गुणाद्याकारत्वात् न काचन अनुपपत्तिः। अतो वृत्तिसम्बधात् प्राक् घटादेः अज्ञातत्वाद् घटादिः अज्ञानावृत्त इत्युच्यते। अयं घट इति घटाकाराकारिताऽन्तःकरणवृत्तिस्तु घटादिविषयकमज्ञानावरणं निवर्तयति। तदनु स्वच्छायां वृत्तौ घटावच्छिन्नस्य चैतन्यस्य प्रतिबिम्बनं सङ्घटते। एतस्यैव प्रतिबिम्बस्य चित्प्रतिबिम्बः, चिदाभासः, आभासचैतन्यमिति नामभिः व्यपदेशः। तेन चित्प्रतिबिम्बेन घटादिजडविषयस्य स्फुरणं भवति। न हि कस्मिँश्चिद् अन्धकारमये गेहे कस्यचिदावृत्तस्य वस्तुनः केवलमावरणापसारेणैव प्रत्यक्षं भवति, किन्तु आलोकेन अवभासोऽपि सम्पाद्यो भवति। एवमेव न हि केवलया वृत्त्या आवरणभङ्ग एव घटादिप्रत्यक्षे अपेक्षितः, किन्तु चिदाभासेन प्रकाशनमपि आवश्यकम्। अमुमर्थं पञ्चदशीकारा एवं प्रकटीचक्रुः —

> ''**बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्।**
> **तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥**[1]'' इति।

बुद्धिः तत्र प्रतिबिम्बितश्चिदाभासश्च, एतौ द्वावपि घटं व्याप्नुतः। तयोर्बुद्धिचिदाभासयोर्मध्ये धिया बुद्धिवृत्त्या प्रमाणभूतया अज्ञानं नश्यति ज्ञानाज्ञानविरोधात्। स्फुरणविरोध्यज्ञाननाशे सति चिदाभासेन कम्बुग्रीवादिमान् घटः स्फुरेत्, जडत्वेन तस्य स्वतः स्फुरणायोगादिति भावः। यथा अन्धकारावृत्तघटादिदर्शने चक्षुर्दीपौ उभावपि अपेक्ष्येते तथा घटादिविषयप्रत्यक्षे वृत्तिश्च चिदाभासश्च इति उभयमपि अपेक्ष्यते। यथोक्तं विद्यारण्यमुनिना ''**चक्षुदीपावपेक्ष्येते घटादेर्दर्शने यथा**[2]'' इति। एतदेव प्रकृतग्रन्थकारेणापि व्याख्यायां विगुम्फितम् ''**तमसाऽऽवेष्टितम् अपवरकादिस्थितं वस्तु द्रष्टुमुपलब्धुं चक्षुरिन्द्रियं दीपं च वाञ्छति काङ्क्षति**[3]'' इति।

## ४.८.१ अन्तःकरणवृत्तेः प्रयोजनम् —

प्रत्यक्षे अन्तःकरणवृत्तिः इन्द्रियद्वारा बहिर्निर्गत्य विषयदेशं गत्वा विषयाकारं

---

१. पं.द. ७.९१

२. पं.द. ७.९३

३. कै.दी.व्या. २.९३



च विपरिणम्य विषयमवभासयति इति वेदान्तसिद्धान्तः। तत्रैवं शङ्का — यथा ईश्वरो वृत्तिमनपेक्ष्य स्वरूपचैतन्येनैव विषयान् अवभासयति तद्वज्जीवोऽपि स्वरूपचैतन्येन विषयान् प्रकाशयति इत्यभ्युपगन्तव्यम्। तत्र इन्द्रियद्वारेण एव जीवस्य विषयावभाससम्भवाद् अन्तःकरणवृत्तिः किमर्थं स्वीकरणीया इति।

श्रीमदप्पयदीक्षितैः सिद्धान्तलेशसङ्ग्रहे अस्या: समाधानार्थं कानिचन मतानि सङ्गृहीतानि तान्यत्रोच्यन्ते — आवरणाभिभवार्थं वृत्तिः स्वीकरणीया इति प्रथमं मतम्। तथा हि घटावच्छिन्नचैतन्यस्य आवरकं किञ्चिदज्ञानम् अभ्युपगन्तव्यम्। तथा ह्यविद्योपहितस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवाभिन्नतया, तदुपाध्योः घटाविद्ययोश्च एकदेशस्थत्वाद् विषयेन्द्रियसन्निकर्षाभावदशायामपि भासकस्य अनावृत्तचैतन्यस्य घटादिना स्पर्शात् सम्बन्धसद्भावाद् जीवसाक्षिणः सर्वदा घटादिभानप्रसङ्गः स्यात्। आवरकाज्ञाने स्वीकृते तु न सर्वदा घटादेर्भानप्रसङ्गः, अनावृत्तचैतन्यस्यैव भानप्रयोजकत्वात्। न च तद्घटाद्यावरकम् अज्ञानं मूलाज्ञानमिति वाच्यम्। तथा सति मूलाज्ञानस्य ब्रह्मज्ञानमात्रबाध्यत्वात् संसारदशायां च तदज्ञानानाशाद्घटादिज्ञानमेव न स्यात्। तस्माद् घटाद्यावरकमज्ञानं मूलाविद्यातादात्म्योपपन्नम् परतन्त्रमवस्थापदवाच्यमिति अङ्गीकरणीयम्। तस्य च आवरणस्य प्रकाशप्रतिबाधकस्य सनातनत्वे घटेन्द्रियसन्निकर्षदशायामपि घटादिज्ञानं न स्यात्। भवति हि घटादिभानम्, अतस्तस्य आवरणस्य भङ्गः स्वीकरणीयः। अत्र पुनः प्रश्नः। स आवरणभङ्गः केन क्रियते ? साक्षिचैतन्यमात्रं तदावरणभङ्गजनकमिति न च वाच्यम्। साक्षिचैतन्यस्य आवरणभासकत्वान्न आवरणेन सह विरोधः। यः यत्साधकः स तन्निवर्तको भवितुं नार्हति। न च वृत्त्युपहितं चैतन्यं तन्नाशकं स्यात्, वृत्त्युपहितचैतन्यस्य परोक्षापरोक्ष्यसाधारणत्वात्। तथा च परोक्षस्थले अपि अविद्यावृत्त्युपहितचैतन्यस्य अन्तःकरणवृत्त्युपहितचैतन्यस्य वा सत्त्वाद् आवरणनिवृत्त्यापत्तेः जीवस्य सर्वदा विषयभानप्रसङ्गात्। तस्मात् परोक्षव्यावृत्तस्य अपरोक्षवृत्तिविशेषस्य आवरणभङ्गजनकत्वं स्वीकरणीयम्। यद्यत्र एवमुच्यते यद् वृत्तिविशेषस्य अज्ञाननाशकत्वं न युक्तम्, तस्य जडत्वात्, ज्ञानस्यैव अज्ञाननाशकत्वात् इति चेत्, तर्ह्युच्यते — अपरोक्षवृत्त्युपहितचैतन्यस्य आवरणभङ्गजनकत्वमिति वाच्यम्। यथा स्वतः तृणतूलादिभासकस्य सौरालोकस्य तृणतूलाद्यदाहकत्वेऽपि सूर्यकान्तावच्छेदेन स्वभास्यतृणतूलादिदाहकत्वं सम्पद्यते,

तद्वत् स्वतः अविद्यातत्कार्यतद्भासकस्य चैतन्यस्य अविद्याद्यदाहकत्वेऽपि वृत्त्यवच्छेदेन तद्दाहकत्वं युक्तमित्याशयः। एवञ्च वृत्त्युपहितचैतन्यस्य आवरणाभिभवार्थत्वे वृत्तेरपि अवच्छेदकतया आवरणाभिभवार्था वृत्तिः स्वीक्रियते।[१]

अविद्योपाधिकस्य अपरिच्छिन्नजीवस्य अन्तःकरणोपाधिकस्य परिच्छन्नजीवस्य च विषयेण सह सम्बन्धार्थं वृत्तिः स्वीकार्या इति द्वितीयं मतम्। यद्यपि अविद्याप्रतिबिम्बितजीवस्य व्यापकत्वात् स्वतः सर्वगतत्वं विद्यते तथापि घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकम् अवभासयति, घटादिना तस्य सम्बन्धाभावात्। घटाद्याकारवृत्तिदशायान्तु घटादिकमभासयति, तदा सम्बन्धसत्त्वात्। एवं जीवस्य सर्वगतत्वनिबन्धनो विषयेण सह जीवस्य यः सम्बन्धः स न घटादिविषयभानप्रयोजकः, अपि तु अपरोक्षवृत्त्यधीनः सम्बन्धः एव तत्र प्रयोजकः, तस्मात् सम्बन्धार्थं वृत्तिः स्वीकरणीया।

अत्रैवं प्रश्नः — अविद्योपाधिकस्य अपरिच्छिन्नजीवस्य स्वत एव समस्तवस्तुसम्बन्धस्य वृत्तिविरहदशायामपि विषयसम्बन्धाभावाभिधानं न युक्तम्। न हि तत्र विद्यमानस्य तत्र तत्सम्बन्धाभावः कस्यचिद् दृष्टचरः। यदि तु ''**असङ्गो हि न सज्जते**[२]'' इत्यादिश्रुत्या चैतन्यस्य प्रपञ्चसम्बन्धनिषेधावगमात् तत्सम्बन्धाभावः कल्प्यते, तर्हि वृत्त्यनन्तरमपि तत्सम्बन्धः अङ्गत्वविरोधान्न घटते, इति चेत्। अत्र समाधीयते — न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषिध्यते। तर्हि कोऽसौ सम्बन्धविशेषः ? उच्यते — स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकभावलक्षणो ज्ञातृज्ञेयत्वलक्षणः कादाचित्को विषयाकारवृत्तिनिबन्धनः कर्तुर्जीवस्य ज्ञातृत्वविषयस्य घटादेः ज्ञेयत्वे तदाकारवृत्तिविषयत्वमपेक्षितमिति वृत्तेः तथाविधसम्बन्धप्रयोजकत्वमिति भावः। तथा हि घटादिकं न जीवचैतन्याभिव्यञ्जनसमर्थम् अस्वच्छस्वभावद्रव्यत्वात्, घटाद्याकारवृत्तेः सम्बन्धदशायां तु घटादेः अप्रकाशरूपो जाड्यधर्मो वृत्त्या अभिभूतो भवति। तेन च वृत्तेः विषयस्य च व्याप्तिदशायाम् अन्तःकरणावच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोः अभेदाद्

१. द्रष्टव्यम् - सि.ले.सं. पृ. १४५

२. बृह.उ. ३.९.२६



विषयस्य अप्रकाशस्वभावत्वापगमेन प्रकाशो भवति। अत एव वृत्त्या विषयेषु प्रकाशस्वभावत्वाधानाज्जडस्यापि विषयस्य चिद्व्यञ्जकत्वयोगत्वमायाति इति वृत्तेः विषयव्याप्त्यनन्तरं घटादिकं विषयचैतन्यमभिव्यनक्ति अर्थात् अनावरणं करोति। घटादेः चैतन्याभिव्यञ्जकत्वञ्च चैतन्यप्रतिबिम्बग्राहित्वम्। तच्च घटादेः स्वच्छान्तःकरणसंसर्गाद् भवति। एवञ्च चित्प्रतिबिम्बग्राहित्वरूपाभिव्यञ्जकत्वसिद्ध्यर्थमेव वृत्तेः अपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः।

जीवस्य अन्तःकरणोपहितचैतन्यत्वपक्षेऽपि वृत्तिः अभेदलक्षणसम्बन्धार्था। तद्यथा अन्तःकरणोपहितचैतन्यस्य जीवत्वे अन्तःकरणस्य परिच्छिन्नत्वात् जीवस्यापि परिच्छिन्नत्वं सिद्धम्। तस्य च जीवचैतन्यस्य परिच्छिन्नत्वान्न घटादिविषयेण सह संसर्गः। जीवचैतन्यस्य स्वरूपतः घटाद्यधिष्ठानब्रह्मचैतन्याभेदेऽपि उपाध्यवच्छेदेन भेदादन्तःकरणावच्छिन्नस्य तस्य अन्तःकरणदेशस्थत्वेन घटादिस्थत्वाभावान्न घटाद्युपादानत्वम्, घटाद्युपादानं तु ब्रह्म एव, तस्य मायोपहितचैतन्यस्य सकलघटाद्यन्वयित्वात्। एतद्घटाद्यधिष्ठानं ब्रह्मचैतन्यमेव घटाद्यवभासकम्, तेन तस्य सम्बन्धात्। जीवचैतन्यस्य तु न घटाद्यवभासकत्वम्, तस्य तत्र सम्बन्धाभावात्, प्रकाशकेन विषयाधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारा वृत्तिः इष्यते। यद्यपि जीवचैतन्यविषयाधिष्ठानब्रह्मचैतन्ययोः उपाधिकृतो भेदः, तथापि वृत्तिकृतः तयोः अभेद इति भावः। एवञ्च प्रकाशकेन विषयाधिष्ठानब्रह्मचैतन्येन जीवचैतन्यस्य एकीभावाज्जीवस्य प्रकाशकत्वम्। स च एकीभावो वृत्त्यधीनः, अतो जीवचैतन्यविषयाधिष्ठानचैतन्ययोः ऐक्यसिद्ध्यर्थं वृत्तिरभ्युपगन्तव्येति।

अद्वैतवेदान्ते प्रत्यक्षप्रक्रियायां वृत्तिव्याप्यत्वं फलव्याप्यत्वं चाङ्गीक्रियेते। तत्र वृत्तिव्याप्यत्वं नाम अन्तःकरणवृत्तौ घटादेर्विषयस्य व्याप्तिः। तथा हि अद्वैतवेदान्ते ज्ञानगतं विषयगतश्चेति द्विविधं प्रत्यक्षम्। तत्र प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चाभेदो ज्ञानगतप्रत्यक्षत्वस्य प्रयोजकम्। विषयावच्छिन्नचैतन्यस्य तथा प्रमातृचैतन्यस्याभेदो विषयगतप्रत्यक्षत्वस्य प्रयोजकमिति मन्यते। पूर्वोक्तरीत्या (४.६) त्रिविधं हि चैतन्यम्। तत्र तैजसमन्तःकरणस्य परिणामो वृत्तिरित्युच्यते। अस्यां वृत्तौ घटादेर्विषयस्य व्याप्तिर्भवति। तदेव वृत्तिव्याप्यत्वम् उच्यते। एवञ्च घटादिप्रत्यक्षे घटाकाराकारितान्तःकरणवृत्तौ घटस्य वृत्तिव्याप्यत्वम्।

अत्रैव घटादिविषयावच्छिन्नचैतन्येन सह प्रमातृचैतन्यस्य अपृथग्भावे= विषयाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे घटप्रत्यक्षता भवति तेन उपाधिसहितयोर्द्वयोश्चैतन्ययोरपृथग्भावे घटप्रत्यक्षता फलव्याप्यत्वम् उच्यते। एतदुक्तं भवति — वृत्तिप्रतिबिम्बितचिज्जन्यातिशययोगित्वं वृत्त्या तत्प्रतिफलित-चिता वा अभिव्यक्ताधिष्ठानचिद्विषयत्वं वा फलव्याप्यत्वम्। चिज्जन्यातिशयश्च नावरणभङ्गः, किन्तु भग्नावरणचित्सम्बन्धः। स च घटादौ अस्ति, नात्मनि। इदं च फलव्याप्यत्वं घटादिजडविषयसाक्षात्कारे भवति ब्रह्मसाक्षात्कारे तु न भवतीति उपरिष्टादुपपादिष्यते।

## ४.८.२ ब्रह्मविषयिणी वृत्तिः —

अध्यारोपापवादपुरःसरं तत्त्वं पदार्थौ शोधयित्वा ''**तत्त्वमसि**[१]'' इति महावाक्येन अखण्डार्थे अवबोधिते सति साधनचतुष्टयसम्पन्नाधिकारिणो नित्यशुद्धबुद्धमुक्तसत्यस्वभावं परमानन्दानन्ताद्वयं ब्रह्मास्मीति अखण्डाकाराकारिता साक्षात्कारस्वरूपा अन्तःकरणवृत्तिरुदेति। ननु जडा चित्तवृत्तिः कथं नित्यशुद्धस्वप्रकाशकमात्मानं विषयीकरोति, कथं वा अज्ञानं निवर्तयतीति चेत्। उच्यते — सा वृत्तिः चित्प्रतिबिम्बिता प्रत्यक्चिति व्याप्ता वा सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकरोति। इयं चित्तवृत्तिः न शुद्धब्रह्मविषयिणी, किन्तु अज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणी इत्यर्थः। चैतन्यावरकस्य अज्ञानस्य निवृत्तिः एव वृत्तेः प्रयोजनम्। एवमखिलकार्यकारणे अज्ञाने बाधिते सति पटकारणतन्तुदाहे पटदाहवत् तत्कार्यस्य अखिलस्य चराचरप्रपञ्चस्यापि बाधो भवति। न च अज्ञाननिवर्तकवृत्तिनिवृत्त्यर्थं वृत्त्यन्तरमपेक्षणीयमिति वाच्यम्। कतकरजोन्यायेन अज्ञाननिवर्तिका वृत्तिः स्वस्या अपि निवर्तिका भवति। ननु तथापि अखण्डाकारवृत्तिप्रतिबिम्बितचैतन्याभाससत्त्वात्कथमद्वैतसिद्धिरिति चेत्। उच्यते — तत्र प्रतिबिम्बितं चैतन्यमपि अखण्डचित्तवृत्तेः बाधितत्वात् स्वोपाधिविलये उपहितस्य स्वरूपमात्रावस्थानात् प्रत्यगभिन्नपरमात्ममात्रं भवति। तथा च यथा प्रदीपप्रभा सूर्यमवभासयितुमसमर्था सती सूर्यप्रकाशेनैवाभिभूता भवति, तथैव वृत्तिनिवृत्तौ सत्यां चित्प्रतिबिम्बितचैतन्यं बिम्बं स्वयं प्रकाशमानं

१. छा.उ. ६.८.७



प्रत्यगभिन्नं परं ब्रह्म अवभासयितुमसमर्थं सत् तेन अभिभूतं भवति, यथा दर्पणरूपोपाधिविगमे तत्प्रतिबिम्बितमुखाभासस्य बिम्बभूतमुखमात्रता। तथा च ''**अहं ब्रह्मास्मि**[१]'' इति महावाक्यप्रतिपाद्यस्य प्रत्यग्ब्रह्मणोः ऐक्यस्य अपरोक्षतया अनुभवकाले ब्रह्मविषकस्य अज्ञानस्य नाशे नियमोऽयं घटादिज्ञानकाले घटादिविषयो धीवृत्त्या व्याप्यते, तदनन्तरं चिदाभासेन प्रकाशते। ब्रह्मणः अज्ञाननाशकाले तु यद्यपि स्वप्रकाशोऽपि साक्षी धीवृत्त्या व्याप्यते एव प्रत्यग्ब्रह्मणोः एकत्वस्यापि अज्ञानेन आवृतत्वात् तस्य अज्ञानस्य निवृत्तये वाक्यजन्यया ''**अहं ब्रह्मास्मि**[२]'' इत्याकारया धीवृत्त्या व्याप्तिः अपेक्ष्यते, स्वस्येव स्फुरणरूपत्वात् तत्स्फुरणाय तु चिदाभासो नापेक्षते। फलं वृत्तिप्रतिबिम्बितचिदाभासः, तद्व्याप्यत्वमेवास्य प्रत्यगात्मनो निराकृतं स्वस्यैव स्फुरणरूपत्वात्। तदभाषिषत पञ्चदशीकाराः —

''**स्वप्रकाशोऽपि साक्ष्येष धीवृत्त्या व्याप्यतेऽन्यवत्।**
**फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्॥**[३]'' इति।

''**ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।**
**स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते॥**[४]'' इति च।

बुद्धिवृत्तिप्रतिबिम्बितचिदाभासेन सर्ववस्तुप्रकाशो भवति। स्वयंप्रकाशमाने साक्षिणि विषये तु स्वस्यैव प्रकाशरूपत्वात् तत्त्वमस्यादिवाक्यजन्यवृत्त्यात्मकज्ञानेन ब्रह्मावरकस्य अज्ञानस्य निवर्हणमात्रमपेक्षितम्, किन्तु ब्रह्मणः स्वप्रकाशत्वात् तदवभासनार्थं चिदाभासो नापेक्ष्यत इति चिदाभासव्याप्यत्वं निराकृतम्। बुद्धिवृत्तिव्याप्यत्वं त्वावरणनिवर्तकतयोपयोगान्न निवार्यत इति भावः।

यद्यपि घटाद्याकारवृत्तिवद् ब्रह्मगोचरवृत्तावपि चिदाभासोऽस्ति, तथापि नासौ ब्रह्मणो भेदेन भासते, किन्तु प्रचण्डातपमध्यवर्तिप्रदीपप्रभावद् एकीभूत एव भवति। अतः चिदाभासो न ब्रह्मणि स्फुरणलक्षणातिशयजनकः। यथोक्तं विद्यारण्यमुनिभिः —

१. बृह.उ. १.४.१०
२. बृह.उ. १.४.१०
३. पं.द. ७.९०
४. पं.द. ७.९२

''**स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परम्।**
**न तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत् ॥**[१]'' इति।

असौ चिदाभासो बुद्धिव्याप्तौ बुद्धिविशेषणतया स्थितोऽपि ब्रह्मणि परमत्यन्तम् एकीभवेत्। यथा ''**नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय**[२]'' इति श्रुत्यनुसारं यथा सुविशाले सागरे पतितो वृष्टिबिन्दुर्न समुद्रजलमार्द्रं करोति किन्तु तेन सह एकीभवति, तद्वदत्रापि बोध्यम्। अत एव अज्ञातचैतन्यस्य वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वे प्रतिषिद्धे सति ''**मनसैवानुद्रष्टव्यम्**[३]'', ''**यन्मनसा न मनुते**[४]'' इत्यनयोः श्रुत्योः विरोधाभावः।

अमुमेवार्थं कैवल्यदीपिकाकारा एवं विशदीचक्रुः —

''**वृत्तेः फलस्य विकृतिं हृदयं वदन्ति**
**ब्रह्मातिथिर्हि मनसः फलवर्जितस्य।**
**युक्तं फलेन न हि पश्यति वस्तु चित्तं**
**ज्ञात्वार्थ ईदृश इति प्रतियाहि शान्तिम् ॥**[५]'' इति।

## ४.९ ज्ञानकर्मसमुच्चयनिराकरणम् —

परमपुरुषार्थस्य मोक्षस्य साक्षात् साधनं केवलं ज्ञानमथवा कर्मसमुच्चितं ज्ञानमित्यत्र शास्त्रकाराणां मतभेदः। अद्वैतिनो मोक्षसाधनं केवलं ज्ञानमिति मन्यते। कर्मणा चान्तःकरणं शुद्धं सज्ज्ञानोपयोगि जायते तथा ब्रह्मजिज्ञासोत्पद्यते। ब्रह्मसाक्षात्कारे जाते सर्वं मिथ्येति विवेके उदिते कर्मणि न प्रवृत्तिरिति तेषां मतम्। अतः कर्मण आचरणं चित्तशुद्ध्यर्थमिति जगाद कैवल्यदीपिकाकारः। तथा हि —

''**नित्यं मृद्धक्षणेच्छोर्जगति निजशिशोर्ल्लड्डुकादीन् प्रदर्श्य**
**व्याधिघ्नं काटवाढ्यं वितरति जननी भैषजं तद्यथैव।**

१. पं.द. ७.९४
२. मुण्ड.उ. ३.२.८
३. बृह.उ. ४.४.१९
४. के.उ. १.६
५. कै.दी. २.१५



**धर्मानातिष्ठ यज्ज्ञानपि कुरु भविता भूरिसौख्यं तवेति**
**ब्रूते तद्वच्छ्रुतिस्सा तदभिमतमिमे कामिनो नैव विद्युः ॥**[१]'' इति।

मोक्षाख्यं फलं साधयितुं ज्ञानं स्वातिरिक्तं न किमपि अपेक्षते। ''**तमेव विदित्वातिमृत्येमेति नान्यः पन्था विद्यतेऽयनाय**[२]'' इति श्रुतेः। मोक्षप्राप्तये ज्ञानव्यतिरेकेण अन्यो मार्गो नास्तीत्यर्थः। अज्ञाननिवृत्तेः ज्ञानेनैकेन अधिष्ठानतत्त्व-साक्षात्कारमात्रेण वा साध्यत्वमिति नियमादपि मोक्षस्य ज्ञानैकसाध्यत्वम्। अज्ञानस्य ज्ञानेनैव विरोधात् कर्मणा विरोधाभावात्। रज्जुसर्पादिस्थले अधिष्ठानतत्त्वसाक्षात्कारमात्रादेव रज्जुसर्पोपादानाज्ञानस्य तत्कार्यस्य रज्जुसर्पादिभ्रमस्य तत्प्रयुक्तस्य भयकम्पनादेश्च निवृत्तिदर्शनात्। न च ज्ञानकर्मणोः समुच्चयः स्वीकरणीयः, तयोः तमप्रकाशवद्विरोधात्। मोक्षस्य अव्यवहितकारणं तु ज्ञानमेव। ''**तरति शोकमात्मवित्**[३]'', ''**ब्रह्मविदाप्नोति परम्**[४]'', ''**आत्मा वा अरे द्रष्टव्यः**[५]'', ''**एतावदरे खल्वमृतत्वम्**[६]'' इत्येवं जातीयका श्रुतिः केवलाया विद्यायाः परमपुरुषार्थहेतुत्वं श्रावयति। कर्मणस्तु मोक्षकारणं श्रुत्यैव निराकृतम्। तथा हि ''**न कर्मणा न प्रजया धनेन**[७]'', ''**नास्त्यकृतः कृतेन**[८]'' इत्यादिश्रुतिः, ''**कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते**[९]'' इत्यादिस्मृतिरपि कर्मणो मोक्षकारणतां निराकरोति। अपि च मोक्षस्य कर्मसाध्यत्वे यत् कृतकं तदनित्यमिति न्यायानुगृहीतया श्रुत्या तस्य अनित्यत्वापातेन मुक्तानां पुनरावृत्तौ अपुनरावृत्तिः व्याहता स्यादिति नानयोः समुच्चयः।

अपि च अभ्युदयार्थिभिः कर्म अनुष्ठीयते, मोक्षार्थिभिश्च ज्ञानमिति भिन्नपुरुषानुष्ठेयत्वेन च ज्ञानकर्मणो समुच्चयानुपपत्तिः। भाष्यकारमते ज्ञानिनः

१. कै.दी. २.७४
२. श्वे.उ. ६.१५
३. छा.उ. ७.१.३
४. तै.उ. २.१
५. बृह.उ. २.४.५
६. बृह.उ. ४.५.१५
७. महा.उ. १०.५
८. मुण्ड.उ. १.२.१२
९. म.भा. १२.२४१.६

कर्मानुष्ठाने न किमपि प्रयोजनमस्ति। कर्मप्रवृत्तिः हि भेदज्ञानपूर्विका भवति, न सा अभेदज्ञानोदये स्थातुमर्हति। सर्वं हि कर्म भेदबुद्धिपुरस्सरं भवति। ज्ञानेन तु भेदबुद्धिनाशे न कर्म सम्भवति। अपि च कर्मफलानां तारतम्यमस्ति, ब्रह्मणि तु तन्नास्ति। तस्मान्मोक्षः अनुष्ठेयविलक्षणो नित्यश्च। ब्रह्मज्ञानं न पुरुषव्यापारतन्त्रम्, किन्तु प्रत्यक्षादिप्रमाणविषयकवस्तुज्ञानवद् वस्तुतन्त्रमिति न तत्र क्रियाणामनुप्रवेशः सम्भवति। अपि च विलक्षणफलत्वाच्च न कर्मज्ञानयोः समुच्चयः। तथा हि उत्पत्त्याप्तिविकृतिसंस्कृतयः कर्मणां फलभूताः। मोक्षस्तु न उत्पाद्यः, कर्मफलस्य जन्यत्वेन मोक्षस्य उत्पाद्यत्वे अनित्यत्वप्रसङ्गात्। विकार्य्यत्वेऽपि तथैव अनित्यत्वप्रसङ्गोऽपरिहार्यः। नापि आप्यः, ब्रह्मणः स्वात्मस्वरूपत्वेन सर्वगतत्वेन च नित्यमेव आप्तत्वात्। नापि संस्कार्यः, नित्यशुद्धस्य ब्रह्मणो दोषापनयने प्रयोजनाभावात्। अतः कर्मज्ञानयोः न समुच्चयः।

यत्तु श्रुतिस्मृतिवचनानि समुच्चितयोः ज्ञानकर्मणोः मोक्षसाधनत्वं प्रदर्शयन्ति, तथा हि —

''**अन्धं तमः प्रविशन्ति तेऽविद्यामुपासते।**
**ततो भूय इव ते तमो ये उ विद्यायां रताः॥**[१]'' इति श्रुतिः,

''**तपो विद्या च विप्रस्य निःश्रेयस्करं परम्।**
**तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते।**
**तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने!॥**[२]'' इति स्मृतिः

तत्तु न्यायानुगृहीतबहुश्रुतिविरोधात् तद्वचनानामारादुपकारकत्वप्रतिपादनपरत्वम् अभ्युपगन्तव्यम्। अभ्युपगम्यते हि व्यवधानेन परम्पराक्रमेण वा कर्मणां मोक्षसाधनत्वम्। यतो हि ज्ञानं स्वोत्पत्तौ कर्म अपेक्षते। कर्मणः संसारहेतुत्वेऽपि कर्मयोगः संसारनिवर्तकः। तथा हि अनाद्यविद्योपहितो जीवः स्वभावत एव सुखप्राप्तिं दुःखनिवृत्तिं च कामयते। किन्तु स अद्वैतप्रत्यगात्मज्ञानाभावात्, सुखदुःखप्राप्तिपरिहारसाधनत्वबुद्ध्या पराग्विषयेष्वेव प्रवर्तते। अतः शास्त्रं तत्र स्वाभाविकीम् अशास्त्रीयप्रवृत्तिं निरुद्ध्य, पुरुषे यागाद्यलौकिकफलहेतुप्रवृत्तिं

---

१. ई.उ. ९
२. मनु.स्मृ. १२.१०४



सम्पिपादयिषति। तदर्थमेव कर्मविधयः प्रवृत्ताः। अत्र कर्मसु पुरुषाणां प्रवृत्तिः अहङ्कारपूर्विका फलाभिसन्धिपूर्विका च भवति। यथा ''**ज्योतिष्टोमेन स्वर्गकामो जयेत**[१]'' इति वाक्यं श्रुत्वा पुरुषः, अस्मिन् ज्योतिष्टोमे कर्मणि अहमधिकृतः, अतः एतत्कर्म कृत्वा अस्य स्वर्गाख्यं फलमहं प्राप्स्यामि इत्यभिमन्यते। तथैव सः ज्योतिष्टोमादिकर्मसु प्रवर्तते। यथा ईशावास्योपनिषदः उपोद्घातभाष्ये भगवत्पादा आहुः — ''**यो हि कर्मफलेनार्थी, दृष्टेन ब्रह्मवर्चसादिना, अदृष्टेन स्वर्गादिना च, द्विजातिरहं न काणत्वकुब्जत्वाद्यनधिकारप्रयोजक-धर्मवान् इत्यात्मानं मन्यते, सोऽधिक्रियते कर्मसु**[२]'' इति। एवमहङ्कार-फलाभिसन्धिपूर्वकत्वात्, सकामेन क्रियमाणानि कर्माणि संसारकारणानि भवन्ति। येन तु अहङ्कारफलाभिसन्धिराहित्येन ईश्वरार्पणबुद्ध्या कर्माणि अनुष्ठीयन्ते, तस्य कर्माणि चित्तशुद्धद्वारा ज्ञानहेतवो भवति। तथा चोक्तं गीतायाम् —

''**यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।**
**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥**[३]'' इति।

''**कायेन मनसा वाचा केवलैरिन्द्रियैरपि।**
**योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥**[४]'' इति च।

यत्तु क्वचित् श्रुतौ कर्म अनुष्ठेयमिति व्यपदिश्यते, न तत्र श्रुतेः तात्पर्यम्। श्रुतिः हि मातेव पालयति। यथा स्वरुग्णशिशोः उपचाराय माता तमौषधं दित्सति, किन्तु औषधस्य कटुत्वाद् बालो न गृह्णाति। तदा माता तं लड्डुकादीन् अपूपशष्कुलादीन् च प्रदर्श्य, न तु दत्त्वा अथवा विश्वासार्थं किञ्चिद्दत्त्वा अनन्तरं ''**शिखा ते वर्धते वत्स गुडूचीं पिब सादरम्**[५]'' इति न्यायेन बहुविधव्याधि-निवारकम् औषधं ददातीति लोकप्रसिद्धिः। तद्वदेव श्रुतिरपि चित्तशुद्ध्यर्थं कर्मानुष्ठानं ब्रूते। अमुमेवार्थं भाष्यकारा अपि लौकिकोक्त्या जगदुः ''**न हि वरघाताय कन्यामुद्वाहयन्ति**[६]'' इति।

---

१. आप.श्रौ.सू. १०.२.१
२. ई.उ.शां.भा. उपोद्घातः
३. भ.गी. १८.५
४. भ.गी. ५.११
५. ऋ.भा.भू. पृ. ४३
६. ब्र.सू.शा.भा. ४.१.२

चित्तशुद्धेः ज्ञानकारणत्वं तु एवं भवति — ''**मनसैवानुद्रष्टव्यम्**[1]'', ''**दृश्यते त्वग्र्यया बुद्ध्या**[2]'' इत्यादिश्रुतिभिः आत्मदर्शने मनसः करणत्वं बोद्ध्यते। तथैव ''**यो वेद निहितं गुहायां परमे व्योमन्**[3]'' इत्यादिश्रुतिभिः बुद्धिगुहायां ब्रह्म दृश्यत इत्यवगम्यते। अतो न केवलं ब्रह्म मनसा दृश्यते, किन्तु मनसि च दृश्यते। किन्तु यथा मलिनदर्पणं प्रतिबिम्बं न गृह्णाति तथैव रागद्वेषादिकलुषितं प्राकृतं मनः आत्मदर्शने अयोग्यमिति कृत्वा श्रुतिः ''**अप्राप्य मनसा सह**[4]'' इति वदति। यतो हि अशुद्धमनसो भोगेषु वैराग्यस्य अनुदयाद् ब्रह्मजिज्ञासाऽपि न जायते। यदा तु यज्ञदानादिकर्मभिः अनेकजन्मसञ्चितदुरित-निवृत्त्या वैषयिकभोगे वैराग्यमुत्पन्नं तदा पुरुषो ब्रह्म जिज्ञासते। विगतकल्मषं दर्पणं यथा प्रतिबिम्बं गृह्णाति, तथैव विशुद्धमन्तःकरणम् आत्मदर्शनयोग्यं सम्पद्यते। तथा हि श्रुतिः ''**तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन**[5]'' इति। भवति चात्र स्मृतिः —

''**ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः।**
**यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि॥**[6]'' इति।

सूत्रकारोऽपि ''**सर्वापेक्षया च यज्ञादिश्रुतेरश्ववत्**[7]'' इति सूत्रेण कर्मणां ज्ञानहेतुत्वं सूत्रयामास। अत्र अयं विचारः प्रवृत्तः यत् किं विद्यायाः स्वोत्पत्तौ आश्रमकर्मणाम् अपेक्षा अस्ति उत न इति। तत्र विद्याया उत्पत्तौ न कर्मापेक्षा, यतः कर्माणि कामनारूपं स्वर्गादिफलं साधयन्ति, तस्मात् कर्मणां विद्या न फलमिति पूर्वपक्षं निराकृत्य विद्या स्वोत्पत्तौ कर्माणि अपेक्षन्ते इति सिद्धान्तपक्षः। तद्यथा स्वर्गादिकामनया अनुष्ठितानां कर्मणां स्वर्गादिफलहेतुत्वेऽपि प्रागुक्तस्मृति-वचनानुसरेण ईश्वरार्पणबुद्ध्या अनुष्ठितानि कर्माणि चित्तशुद्धिद्वारा ज्ञानोत्पत्तौ

१. कठ.उ. २.१.११
२. कठ.उ. १.३.१२
३. तै.उ. २.१
४. तै.उ. २.९
५. बृह.उ. ४.४.२२
६. म.भा. १२.२०४.८
७. ब्र.सू. ३.४.२६



साधनानि भवन्ति। अत्र सौत्रं दृष्टान्तं विवृण्वाना भाष्यकारा अमुमेवार्थं जग्रन्थुः ''**यथा च योग्यतावशेन अश्वो न लाङ्गलाकर्षणे युज्यते, रथचर्यायां तु युज्यते, एवमाश्रमकर्माणि विद्यया फलसिद्धौ नापेक्षन्ते, उत्पत्तौ चापेक्षन्ते**[1]'' इति।

अत्रैवं शङ्का स्यात् — पापानां यत्कर्मनाश्यत्वमुक्तम्, तन्न युज्यते। तेषां फलभोगेनैव विनाश्यत्वात्। ''**नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि**[2]'' इति पुराणवचनमपि अत्र प्रमाणम्। अत्रैवं समाधीयते — कर्मणां पापनाशकत्वस्य शास्त्रसिद्धत्वात्, ''तरति सर्वं पापम्, तरति ब्रह्महत्याम्'' इत्यादिवचनविरोधात्। ''नाभुक्तम्'' इत्यादिवचनानाञ्च प्रारब्धकर्ममात्रविषयत्वात्। तथा च कर्मानुष्ठानात् पापनिवृत्तिरूपा चित्तशुद्धिः, ततो विषयदोषदर्शनम्, ततो वैराग्यम्, ततः श्रवणादिकम् इत्येवं परम्परया कर्मणां मोक्षे उपयोगः। एवं कर्मणां परम्परया मोक्षोपयोगित्वात् ''**तमेतं वेदानुवचनेन**[3]'' इत्यादिश्रुतिः सङ्गच्छते। अत्र यज्ञादिकर्मणां ज्ञानसाधनत्वं दर्शितम्, शब्दतः उपसर्जनस्यापि वेदनस्य स्वर्गादिवत् साध्यतया पुरुषार्थतया च यज्ञादिफलत्वेन साधनेन यज्ञादिना अन्वयोपपत्तेः। तत्र यज्ञादिकर्मणां ज्ञानसाधनत्वं नैव साक्षात्, किन्तु मलापकर्षणादिपरम्परया। यदि कर्मणां परम्परयाऽपि ज्ञानसाधनत्वं न स्यात्, तदा श्रुत्यभिहितां तेषां ज्ञानसाधनत्वम् असङ्गतं स्यात्। तस्मात् परम्परया कर्मणां ज्ञानसाधनत्वम् अभ्युपगन्तव्यम्। अत एव कर्माणि ज्ञानस्य बहिरङ्गसाधनानि। कर्मणां ज्ञानसाधनत्वे स्मृतिरपि प्रमाणम् — ''**कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते**[4]'' इति। तस्मात् कर्मज्ञानयोः क्रम एव स्वीकरणीयः, न तु समुच्चयः सहानुष्ठानं वा।

वस्तुतः काम्यकर्मनिष्कामकर्मभेदेन कर्मणो द्वैविध्यम्। तत्र काम्यकर्मणा ऐहलौकिकः पारलौकिकश्च अभ्युदयो भवति। किन्त्वेतत् काम्यकर्म न ज्ञानस्य सहायकम्, अपि तु विरोधि एव। निष्कामकर्म तु न ज्ञानविरोधि, परं फलाभिसन्धिवर्जितत्वेन चित्तनैर्मल्यसम्पादकत्वाज्ज्ञानस्य सहायकमेव। तथा च

१. ब्र.सू.शां.भा. ३.४.२६
२. ब्र.वै.पु. १.४४.७४, ना.पु. २९.१८
३. बृह.उ. ४.४.२२
४. ब्र.सू.शां.भा. ३.४.२६ इत्यत्र उद्धृतम्।

निष्कामकर्मणः चित्तशुद्धिः, चित्तशुद्धेः ज्ञाननिष्ठा, ज्ञाननिष्ठायाः ज्ञानप्राप्तिः, ज्ञानाच्च मोक्ष इति ज्ञानस्य मुक्तौ अव्यवहितकारणत्वम्, कर्म तु ज्ञानस्य गौणं कारणमिति मुक्तौ निष्कामकर्मणः परम्पराकारणत्वमिति भगवता भाष्यकारणे गीताभाष्ये प्रतिपादितम्।[1] फलमनभिसन्धाय अनुष्ठितानि यज्ञादीनि मुमुक्षोः ज्ञानसाधनानि भवन्ति। यज्ञादिकर्मणां निष्कामत्वे एव विद्यासाधनत्वम्, सकामत्वे तु स्वर्गादिसाधनत्वमित्यर्थः। अत एव ''**योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये**[2]'' इत्यादीनि गीतावचनानि सङ्गच्छन्ते।

### ४.९.१ यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः —

एतेषां कर्मणां मोक्षसाधने क उपयोग इत्यत्र अद्वैतवेदान्ते मतभेदो दृश्यते। तथा हि कर्मणां विविदिषार्थत्वमिति भामतीकाराः। तथा हि — ''**तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणा विविदिषन्ति वेदितुमिच्छन्ति, न तु विदन्ति। वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वात्, इच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधानेन च कार्यसम्प्रत्ययात्**[3]'' इति। यद्यपि वस्तुतः अत्र ज्ञानं प्रधानम्, तथापि प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यात् सन्प्रत्ययार्थस्य इच्छारूपस्य प्राधान्यम्, विदर्थस्य ज्ञानरूपस्य अप्राधान्यम्। प्रधानेन च सह वाक्यान्तर्गतानां पदान्तराणां सम्बन्धो भवतीति इच्छया सह एव यज्ञेन इत्यस्य सम्बन्धः, न तु विद्यया सह। भाष्यकारा अपि अमुमर्थमेवमूचुः — ''**विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यम्**[4]'' इति। एवं ज्ञानस्य उत्पत्तौ कर्मापेक्षा विद्यते विविदिषोत्पादद्वारा, ''**विविदिषन्ति यज्ञेन**[5]'' इति श्रुतेश्च। ''**यज्ञादीनि विविदिषायां विनियुञ्जानो न जुह्वतीत्यादिवद् अपूर्वमेषां रूपमुत्पादयितुम् अर्हति। न च तत्रापि नैयमिकाग्निहोत्रे मासविधिर्नापूर्वाग्निहोत्रोत्पत्तिरिति साम्प्रतम्, होम एव साक्षाद्विधिश्रुतेः,**

१. भ.गी.शां.भा. उपक्रमे
२. भ.गी. ५.११
३. भामती, १.१.१ पृ. ६१
४. ब्र.सू.शा.भा. ३.४.२७
५. बृह.उ. ४.४.२२



**कालस्य चानुपादेयस्याविधेयत्वात्। काले हि कर्म विधीयते न कर्मणि काल इत्युत्सर्गः, इह तु विविदिषायां विधिश्रुतिः न यज्ञादौ**[1]'' इत्यादिभ्यो यज्ञादीनां विविदिषार्थत्वपक्षो भामतीकारसम्मत इति ज्ञायते। एवञ्च भामतीमते कर्मणो विविदिषा, विविदिषाया विद्या, विद्याया ब्रह्मप्राप्तिरिति क्रमः। विविदिषा यद्यपि ब्रह्मप्राप्तेः साक्षात्कारणं न भवतीति न तस्याः साक्षात् पुरुषार्थत्वम्, तथापि विद्याप्राप्तिं द्वारीकृत्य सा ब्रह्मप्राप्तेः कारणं भवतीति तस्य गौणत्वेन पुरुषार्थत्वं स्वीक्रियते। अस्मिन् मते यावद्विद्या नोदेति तावच्छमदमादिकमनुष्ठेयम्, कर्म तु विविदिषोदयपर्यन्तमनुष्ठेयमिति विवेकः। अत्रेदं ज्ञातव्यम् — विविदिषा तावद् द्विविधा भवति — विद्यां प्रति उन्मुखतारूपा, विद्यायां रूचिरूपा च। तत्र विद्यायां रुचिरूपा विविदिषा एव यज्ञादिफलम्। विद्यां प्रति उन्मुखतारूपा विविदिषा तु यज्ञाद्यनुष्ठानात् प्रागपि स्थातुं शक्नोति। तस्माद्यज्ञाद्यनुष्ठानात् प्राग् विद्यां प्रति उन्मुखतारूपायां विविदिषायां सत्यामपि विद्यायां रुचिरूपविविदिषार्थं यज्ञाद्यनुष्ठानं न निष्फलमिति दिक्।

विवरणमते तु कर्मणां विद्यार्थत्वम्। तथा ह्युक्तम् — ''**सर्वाण्येव कर्माणि उत्पत्तिविधिविहितानि...ब्रह्मानुभवकामो यज्ञादीन्यनुतिष्ठेत् इत्यधिकारान्तरविधिविधेयानि भविष्यन्तीत्याह — विविदिषन्ति यज्ञेन दानेन इत्यादिना। कथम्? आत्मतत्त्वापरोक्षानुभवस्तावत् इष्यमाणतया स्वर्गादिवत् भावनासाध्योऽवगम्यते पुरुषार्थत्वात्।...तत्र यज्ञादीनामिच्छोपसर्जनतया आख्याताभिहितभावनाकरणतया अवगतानां साध्येनैव अन्वयाद्यज्ञादीनि ब्रह्मानुभावसाधनानि अवगतानि। ततश्च आत्मानुभवकामो यज्ञादीन्यनुतिष्ठेदिति विधिः परिणम्यते**[2]'' इति। विवरणमते लिङ्तव्यादिभिः विधिप्रत्ययैः इष्टसाधन्ताबोधो जायते। तद्यथा ''यजेत'' इत्यस्य यागद्वारा इष्टसाधनं कुर्यादित्यर्थो लभ्यते। इष्टञ्च ''स्वर्गकामः'' इत्यनेन ज्ञाप्यते। तत्र यद्यपि स्वर्गशब्दस्य अर्थतः प्राधान्यं न तु शब्दतः, तथापि स्वर्ग एव फलत्वेन कल्प्यते, इष्टसाधनतया च सह सम्बध्यते। एवञ्च इच्छेष्यमाणयोः इष्यमाणं प्रधानम्, न इच्छा। इच्छेष्यमाणसमभिव्याहारे इष्यमाणस्यैव प्राधान्यम्,

१. भामती. ३.४.३४ पृ. ९०६
२. पं.वि. पृ. ३४

न तु इच्छाया इति विशेषन्यायेन सामान्यन्यायस्य बाधात् । तस्माद्विविदिषास्थले अपि विद्याया एव प्राधान्यमिति कर्मणा सह विद्याया अन्वयो युक्तः, न तु विविदिषया सहेति फलितार्थः ।

अत्रैवं शङ्का — नन्वेवं सति विद्योदयपर्यन्तं कर्मानुष्ठानप्रसङ्गः, तेन ''**त्यजतैव हि तज्ज्ञेयम्**[1]'' अर्थात् यः सर्वाणि कर्माणि त्यजति तेन ब्रह्म ज्ञेयमित्यादिश्रुतौ उक्तस्य कर्मत्यागरूपसंन्यासस्य विद्यासाधनत्वं पीड्येत । अत्रोच्यते — मैवम् ।

> ''**आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते ।**
> **योगारूढस्य तस्यैव शमः कारणमुच्यते ॥**[2]''

इत्यादिभगवद्वचनात् यावद्विविदिषारूपा प्राक् प्रवणता ध्याननिष्ठा वा नोदेति, तावदेव चित्तशुद्ध्यर्थं कर्म अनुष्ठेयम् । तदनन्तरं संन्यासोऽवलम्बनीय इति गम्यते । अयमेवार्थो नैष्कर्म्यसिद्धावपि प्रकटितः —

> ''**प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।**
> **कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥**[3]'' इति ।

कर्मणः कार्यं चित्तशुद्धिवैराग्यप्रत्यक्प्रवणताजननपर्यन्तमेव । यदा तु प्रत्यक्प्रवणता जाता तदा कर्मसंन्यास एव कर्तव्यः । एवं कर्माणि वैराग्यं विविदिषादिकां प्रत्यक्प्रवणताञ्चोत्पाद्य निवर्तन्त इत्यर्थः । अत एव ''**यथा यागादिकर्मणां स्वर्गादिकर्मणां स्वर्गाद्युपदेशेन विहितानां तदुपपत्तये विधिसामर्थ्यादेव मध्यवर्त्यपूर्वाणि कल्प्यन्ते, एवमिहापि अन्तःकरणशुद्धिचितैकाग्र्यादिद्वारं कल्प्यताम्**[4]'' इति विवरणवचनमपि सङ्गच्छते ।

अत्र पुनः शङ्का — ननु विद्यार्थं कर्म अनुष्ठेयमिति पक्षेऽपि विविदिषापर्यन्तं कर्मणः अनुष्ठेयत्वे विविदिषार्थं कर्म अनुष्ठेयमिति मतात् किमस्य मतस्य पार्थक्यमिति । समाधीयते — यद्यपि उभयमतेऽपि विविदिषापर्यन्तं कर्मणः

---

१. के.उ.शां.भा. ४.७ इत्यत्र उद्धृतम्।
२. भ.गी. ६.३
३. नै.सि. १.४९
४. पं.वि. पृ. ५४६



अनुष्ठेयत्वमिति अनुष्ठानदृष्ट्या न भेदोऽस्ति, तथापि फलदृष्ट्या तु भेदः अस्त्येव । तद्यथा — विद्यार्थं कर्म अनुष्ठेयमिति मते विद्याया या द्वारभूता विविदिषा तदुत्पत्त्यनन्तरं यद्यपि कर्मत्यागो भवति, तथापि यानि श्रवणमनननिदिध्यासनरूपाणि साधनानि मुक्तिरूपफलोत्पादने पर्यवस्यन्ति, तेषां साधनानामुपकारकत्वेन कर्म विद्याया उत्पादकं भवति । विविदिषार्थं कर्म इति मते तु श्रवणादिप्रवृत्तिजनन-समर्थमिच्छामात्रं सम्पाद्य कर्म निवर्तते । तथा च विविदिषायामपि श्रवणलाभस्य अवश्यम्भावित्वाभावात् कर्मणो नावश्यं विद्योत्पादकत्वनियमः । अयं कैवल्य-दीपिकारोऽपि यज्ञादिकर्मणां ब्रह्मविचारे विनियोगसमये विवरणमतम् अनुसरति । तद्यथा —

> ''**इतीवैतद् ब्रह्म प्रकटनपरैर्वेदवचनै-**
> **र्यदुक्तन्तज्ज्ञानं प्रभवति विचारेण न विना ।**
> **तपोदानाद्यं वा त्रिषवणजलस्नामथवा**
> **ह्यधीतो वा वेदो न दिशति परं ज्ञानमतुलम् ॥**[1]'' इति ।

### ४.९.२ त्रिविधं कर्म —

क्रियते यत् तत् कर्म । एतच्च क्वचिद् द्विविधम्, क्वचिच्च त्रिविधम् इत्यभिधीयते । द्विविधं हि तद्यथा सुकृतं दुष्कृतञ्च । तत्र ''**विसर्गो विसर्जनं देवतोद्देशेन चरुपुरोडासादिद्रव्यस्य परित्यागः स एव विसर्गलक्षणो यज्ञः कर्मसंज्ञितः**[2]'' इति भगवद्वचनानुसारं श्रुतिस्मृतिपुराणाद्यनुमोदितं कर्म सुकृतम् । श्रुतिस्मृतिपुराणाद्यननुमोदितं कर्म दुष्कृतम् । अन्यत्र तु कर्मणः त्रैविध्यमपि श्रूयते, तथा हि प्रारब्धं क्रियमाणं सञ्चितञ्च । तत्र यत्कर्मवशादिह जन्मनि अस्मिन् शरीरे सुखदुःखाद्यनुभूयते तत्प्रारब्धं कर्म । अहर्निशं वर्तमानजन्मनि सुकृतदुष्कृतरूपं यत्कर्म कृतं क्रियते च तदनारब्धफलं क्रियमाणम् । प्रारब्धक्रियमाणाभ्यामन्यद् अनारब्धफलं यदेकत्रितं कर्म तिष्ठति तत् सञ्चितमिति विवेकः ।

प्रकृते कैवल्यदीपिकाकारेण पुण्यापुण्यमिश्रभेदात् कर्म त्रिविधमिति आख्यातम् । तथा हि —

---

१. कै.दी. २.६८
२. भ.गी. शां.भा., ८.३

''**आचार्यश्रेष्ठ ! या त्रय्यभिवदति सुखं बोधमात्रादितीयं**
**सा पुण्यापुण्यमिश्रैस्सुरनरकुरुहां प्राप्नुयुर्देहयोगम् ।**
**वर्णाचारक्रमार्थं सुखमपि विपुलं प्राप्नुवन्तीति तेऽमी**
**ब्रूते किं कर्मकाण्ड्या प्रकथयतु भवान् केवलं मे कृपालो !॥**[१]'' इति ।

पुण्यं शुभमिष्टफलम्, अपुण्यं पापमनिष्टफलम्, तदुभयं मिश्रम् । एतैरेव त्रिविधैः कर्मभिः ''**पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्य-लोकम्**[२]'' इति श्रुत्या सुरनरकुरुहां देहयोगो भवति । अपि च ''**तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्**[३]'' इति । कर्मिणां तु धूमादिमार्गेण पितृलोकं गतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरान्तेषु पुनरुत्पत्तिर्भवति । तथा च श्रुतिः ''**तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिम् आपद्येरञ्श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा**[४]'' इति । अत्र रमणीयचरणाः प्रशस्तकर्माणः, रमणीयां योनिम्=शुभयोनिम्, कपूयचरणा निन्दितकर्माणः कपूयां योनिम्=श्वशूकरादियोनिम् प्राप्नुवन्ति इत्यर्थः । अपि च स्मृतिरपि अत्र भवति —

''**शुभैर्लभति देवत्वं व्यामिश्रैर्जन्ममानुषम् ।**
**अशुभैश्चाप्यधोजन्म कर्मभिर्लभतेऽवशः ।।**[५]'' इति ।

सुकृतकर्मणा ब्रह्मादिलोकप्राप्तिः, दुष्कृतकर्मणा नरकादिलोकप्राप्तिश्च, सर्वविधकर्मणां क्षये मोक्षावाप्तिरिति वेदान्तसमयः ।

### ४.९.३ विद्वदविद्वत्कर्मफलवैषम्यम् —

पुण्यापुण्यमिश्रभेदेन कर्म त्रिविधमिति उक्तम् । तत्र कर्मणां फलविषयेऽपि भेदो दृश्यते । तत्र फलविषये भेदस्य कारणन्तु विद्वदविद्वद्दृष्टिर्वर्तते । तत्र प्राकृतं

१. कै.दी. २.७३
२. प्रश्न.उ. ३.७
३. ब्र.सू.शा.भा. ३.३.१६ इत्यत्र उद्धृतम् ।
४. छा.उ. ५.१०.७
५. म.भा. १२.३२९.२५



कर्म कुर्वन् तस्य बहुरूपं फलञ्च भुञ्जानो देहवान् तदभिमानवाँश्च कर्मकर्ता भवति, किन्तु लोकसङ्ग्रहार्थं कर्माणि कुर्वन्नपि विवेकी न कर्मकर्ता भवति इति । अत्र कर्मणः साधनफलव्यवहारसाम्येऽपि फलविषये किमर्थं भेदः इति सन्दिहानः शिष्यः विषयेऽस्मिन् गुरुं पृच्छति । गुरुश्च विद्वदविद्वद्दृष्ट्या कर्मफले भेदोऽस्तीति बोधयति —

''**एवं शिष्येण पृष्टे गुरुरपि कथयामास भूयो मनुष्याः**
**त्रेधा कर्माऽऽचरन्ति प्रकृतिपरिगतास्त्वेषणाद्यैरुपेताः ।**
**तीव्राहन्ताममत्वे भुवि विदधति ये त्वैहिकाऽऽमुष्मिकार्था**
**मुक्त्यै विद्यां भजन्ते परमपदजुषां कर्मभिः किं फलं स्यात् ॥**[१]'' इति ।

यो हि अहमत्राधिकृतः, मयैतत्कर्तव्यमिति अहङ्कारममकारदृष्ट्या कर्म कुरुते, सः प्राकृतो जनः । स हि यथानुष्ठितिं कर्मफलं प्राप्नोति । येऽत्र मुक्तिसाधनब्रह्म-विज्ञानाय विद्यासाधनश्रवणादिकमाचरन्ति, ते हि मुमुक्षुवः । तेषां कर्मफलस्य ''**तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्**[२]'' इति पूर्वोक्तरीत्या गतिर्भवति । ये केचन निवृत्ताविद्या ब्रह्मविदस्तेषां परमात्मस्वरूपा-वस्थानमाप्तानां ''**यज्ञायाचरतः कर्म समग्रं प्रविलीयते**[३]'' इति भगवद्गीतोक्त-रीत्या न किमपि कर्मफलमाप्तव्यं भवति । एते हि मुक्ताः । अत्रायमाशयः — अधिकारिणो हि द्विविधाः — कृतोपास्तिकाः अकृतोपास्तिकाश्चेति । उपास्य-देवतासाक्षात्कारपर्यन्तमुपासनं कृत्वा तत्प्रसादात् वैराग्यादिपूर्वं गुरुमुखाच्छ्रवणादिकं कुर्वन्ति, त एव ब्रह्मज्ञानेन जीवन्मुक्ता भवन्ति, उत्तमाधिकारिणश्चापि । तेषां कृते ''**त्वम्पदार्थविचाराय संन्यासः सर्वकर्मणाम्**[४]'' इत्युक्तरीत्या कर्मसु अहङ्कारस्य अभावात् न किमपि फलं प्राप्यते । तदितरे तु तात्कालिकवैराग्यादिसाधनवन्तोऽपि पूर्ववासनाबलाद्विदुषोऽपि सन्तः सदा कर्मानुष्ठानं कुर्वन्ति, तत्फलञ्च नानाविधकर्मभोगार्थं शरीरधारणमावाप्नुवन्ति ।

१. कै.दी. २.२८
२. ब्र.सू.शा.भा. ३.३.१६ इत्यत्र उद्धृतम्
३. भ.गी. ४.२३
४. उ.सा. २२२

## ४.१० वैराग्यम् —

शारीरकमीमांसाशास्त्रे प्रथमं सूत्रम् ''**अथातो ब्रह्मजिज्ञासा**[१]'' इति सूत्रितम्। सूत्रेऽस्मिन् अथशब्देन आनन्तर्यमुच्यते। अस्य आनन्तर्यस्य अवधिः क इत्याकाङ्क्षायाम्, कर्मावबोधाद्यानन्तर्यं न सम्भवतीति प्रतिपाद्य, साधनचतुष्टय-सम्पत्त्यनन्तरं ब्रह्मजिज्ञासा भवतीति सिद्धान्तयामासुः भाष्यकाराः। नित्यानित्य-वस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कम्, मुमुक्षुत्वञ्चेति साधनचतुष्टयम्। तत्र ब्रह्मैव नित्यं वस्तु, तदन्यत्सर्वमनित्यमिति विवेचनं नित्यानित्यवस्तुविवेक इति। अयं विवेकः वैराग्यं जनयतीति पूर्वमस्माभिः (३.७.२) प्रतिपादितम्। इहामुत्रार्थफलभोगवैराग्यमिति व्यवह्रियते। ऐहिकेभ्यः स्रक्चन्दनादिविषयभोगेभ्यः, आमुष्मिकेभ्यः अमृताविषयभोगेभ्यश्चेति अनित्येभ्यो वैषयिकेभ्यः सुखेभ्यो नितरां विरतिः इहामुत्रार्थफलभोगविरागः। सत्येव चैतस्मिन् ब्रह्मजिज्ञासा जायते। अत एतद्विशेषणोपेतं पुरुषमुद्दिश्य वेदान्ताः प्रवर्तन्ते। यथाऽऽहुः भाष्यकाराः केनोपनिषद्भाष्यारम्भे ''**दृष्टादृष्टेभ्यो बाह्यसाधन-साध्येभ्यो विरक्तस्य प्रत्यगात्मविषया ब्रह्मजिज्ञासेयं केनेषितम् इत्यादिश्रुत्या प्रदर्श्यते**[२]'' इति।

एवं वैराग्यस्य अधिकारविशेषणत्वाद् एतदभावे ब्रह्मजिज्ञासा नोदेति। उदिताऽपि सा जिज्ञासाफलभूतं ब्रह्मज्ञानं तु न जनयति। अतः आचार्यः उपदेशात् प्राग् उपागतं शिष्यं परीक्षेत किमयं शुश्रूषुः दृढवैराग्यसम्पन्नः सन् ब्रह्म बुभुत्सते अथवा औत्सुक्यमात्रेण पृच्छतीति। उपनिषदादिग्रन्थेषु पूर्वाचार्यैरयमेव क्रमोऽनुसृत इति दृश्यते। तथा हि मृत्युना लब्धवरो नचिकेताः तृतीयवरेण आत्मज्ञानं प्रार्थयामास। तदा सहसा उपदेशमकृत्वा मृत्युः पुत्रपौत्रस्त्रीभूमिधनादिभिः नचिकेतसं प्रलोभयामास। यदा तु नचिकेता न केनापि प्रलोभनेन चचाल, तदा तस्य आत्मतत्त्वोपदेशप्राप्तौ योग्यतां निश्चित्य मृत्युरुपदेशे प्रववृते। मद्भगवद्गीतायामपि भगवदुपदेशात् प्राक् —

१. ब्र.सू. १.१.१
२. के.उ.शां.भा. उपोद्घातः



**''न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम्।**
**अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्॥**[१]''

इत्यादिषु अर्जुनवचनेषु विरागभावो समवलोक्यते। विवेकचूडामणावप्युक्तम् —

**''तथावदन्तं शरणागतं स्वं संसारदावानलतापतप्तम्।**
**निरीक्ष्य कारुण्यरसार्द्रदृष्ट्या दद्यादभीतिं सहसा महात्मा॥**[२]''

इति श्लोकस्य व्याख्याने उक्तं यत् ''**तथावदन्तमित्युक्त्या वाग्व्यापारेण तदीयाधिकारस्य आन्तरस्य सम्यज्ज्ञातुं शक्यत्वात् अधिकारिणं ज्ञात्वैव अभयदानोपदेशादिकं गुरुभिः कर्तव्यमिति द्योतितम्**[३]'' इति।

संसारस्य दुःखमयत्वादयं विरागभावो जायत इति शास्त्रे प्रतिपादितम्। तथा हि सर्वो हि जनो लोके सुखप्राप्तिं दुःखनिवृत्तिं च कामयते। तदर्थं स नैकानि साधनानि अनुतिष्ठति। किन्तु तैः साधनैः आत्यन्तिकसुखप्राप्तिः दुःखनिवृत्तिर्वा न भवति। प्रत्युत दुःखसन्ततिः वर्धते। अपि च वैषयिकसुखस्य जनिमत्त्वेन जायमानमपि तत्सुखं सुखाभास एव। स च नश्यत्येव। तदगादि भवगता —

**''ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।**
**आद्यन्तवन्तः कौन्तेय! न तेषु रमते बुधः॥**[४]'' इति।

आत्मज्ञानं विना शोकस्योच्छेदो न भवति। आत्मज्ञानी तु ''**तरति शोकम् आत्मवित्**[५]'' इति श्रुत्यनुसारेण शोकात् तरति। यस्तु अविद्यावान् भवति स अविद्यावत्त्वादेव वैषयिकं सुखमिच्छन् शोचति। यथाऽऽह श्रुतिः —

**''अविद्यायामन्तरे वर्तमानाः**
**स्वयं धीराः पण्डितम्मन्यमानाः।**
**दन्द्रम्यमाणाः परियन्ति मूढा**
**अन्धेनैव नीयमाना यथाऽन्धाः॥**[६]'' इति।

१. भ.गी. २.८
२. वि.चू. ४३
३. वि.चू.चं.व्या. ४३
४. भ.गी. ५.२२
५. छा.उ. ७.१.३
६. कठ.उ. १.२.५

समन्वयाधिकरणभाष्ये भाष्यकारैरुदाहृते "**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायादपवर्गः**[१]" इति न्यायसूत्रेऽपि मिथ्याज्ञानापरपर्यायाया अविद्याया निवृत्तौ दुःखनिवृत्तिः भवतीति सूत्रितम्। अनेन अविद्यैव रागद्वेषकर्मशरीरग्रहणाय दुःखहेतुरिति ज्ञायते। यावद् अविद्या भवति तावद् वैषयिकसुखस्य अनित्यत्वागमेऽपि वैषयिकभोगसाधने प्रवृत्तौ विषयासक्तिरेव कारणम्। तत्र सक्तिर्नाम विषयेषु प्रीतिमात्रम्, पुत्रादेः दुःखित्वे अहमेव दुःखीत्येषा भावना अभिष्वङ्गः इति। एवञ्च विषयासक्तेः अनर्थमूलत्वात्, तद्विपरीता अनासक्तिः मुमुक्षोः साधनतया उपदिश्यते। तदेव जगाद श्रीभगवान् — "**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु**[२]" इति।

अपि च ऐहिकसुखवत् श्रुत्युक्तकर्मानुष्ठानजन्यं स्वर्गसुखमपि अनित्यमेव। न च "**अपाम सोमममृता अभूम**[३]", "**अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति**[४]" इति श्रुत्या स्वर्गसुखस्य नित्यत्वं श्रुत्यैव उच्यत इति वाच्यम्। "**तद्येथ कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते**[५]" इति श्रुतेः। यथा कृष्यादिकर्मणा जायमानः सस्यादिः कालान्तरे नश्यतीति लोके दृष्टम्। तथैव कृतकत्वसामान्यात् कर्मजन्यः स्वर्गलोकोऽपि नश्यतीति श्रुतेः तात्पर्यार्थः। इयं श्रुतिः स्वदर्शितानुमानेन उपोद्बलिता। अत एव स्वर्गसुखस्य अमृतत्वं वदन्त्याः श्रुतेरपेक्षया प्रबला। किञ्च स्वर्गसुखमनित्यं जन्यत्वात्, सस्यादिवत् इति अनुमानेनापि स्वर्गसुखमनित्यमिति अनुमीयते। अस्याम् अमृतत्वबोधिकायां श्रुतौ अमृतत्वं न आत्यन्तिकम्, किन्तु आपेक्षिकम्। अर्थात् त्रैलोक्यप्रलयपर्यन्तावस्थानमेव अमृतत्वमिति उपचर्यते। भाष्यभामतीकृद्भिरपि अयमेवार्थः "**आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते**[६]" इति श्लोकमुद्धृत्य कर्मफलस्य आपेक्षिकममृतत्वमुदीरितम्।

---

१. न्या.सू. १.१.२
२. भ.गी. १३.९
३. ऋ.सं. ८.४८.३
४. श.ब्रा. २.६.३.१
५. छा.उ. ८.१.६
६. वि.पु. २.८.१०



एवमनित्यत्वेन दुःखानुबन्धित्वात् स्वर्गसुखेऽपि मुमुक्षोः वैराग्यं जायते। तच्च वैराग्यं श्रुतिः "**परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन**[१]" एवमुपदिशति। सर्वस्यापि कर्मफलस्य अनित्यत्वात्, नित्यं मोक्षाख्यं फलमनित्येन कर्मणा न लभ्यत इति विचार्य तत्र विरज्येत इति श्रुत्यर्थः। अमुमेवार्थं भाष्यकारा एवं वर्णयामासुः "**लोकान् संसारगतिभूतान् व्यक्तादिस्थावरान्तान्, व्याकृताव्याकृतादिलक्षणान्, बीजाङ्कुरवद् इतरेतरोत्पत्तिनिमित्तान्, अनेकार्थशतसङ्कुलान्, कदलीगर्भवदसारान्, मायामरीच्युदकगन्धर्वनगरस्वप्नजलबुद्बुद्फेनसमान्, प्रतिक्षणप्रध्वंसान्**[२]" इति। इत्येवं रूपेण शास्त्रमिदं संसारस्य दुःखात्मकत्वं बोधयित्वा, सांसारिकभोगेषु वैराग्यं जनयति। तत उत्पन्नवैराग्यः पुरुषधौरेयः संसारात् मोक्षमाकाङ्क्षते।

इदं वैराग्यं त्रिविधमिति अनूद्य तेषां लक्षणानि कैवल्यदीपिकृता एवम् अभ्यधायि। तथा हि —

"**तिस्रस्ता हि विरक्तयः श्रुतिमता मन्दा च तीव्रातमा**
**तीव्रा शुक्समये विरक्तिरधमा यावच्छरीरं मम।**
**स्त्रीपुत्रद्रविणादि नेति विदिता तीव्रातितीव्रा पुनः**
**सर्वं कर्मफलं मृषेति नितरां त्यागो निबोधादरात्॥**[३]" इति।

वैराग्यं मन्दतीव्रतीव्रतमभेदात् त्रिविधम्। तीव्रतमवैराग्यमेव संन्यासस्य पुष्कलं कारणम्। वस्तुतो वैराग्यस्य एभिः भेदैः प्राग् वैराग्यं द्विविधम्। तद्धि अपरम्परश्चेति। तत्रापरं यतमानव्यतिरेकैकेन्द्रियवशीकारभेदाच्चतुर्विधम्। अस्मिन् संसारे इदं सारमिदमसारमिति सारासारविवेको यतमानसञ्ज्ञकवैराग्यम्। चित्तगतदोषाणां मध्ये एतावन्तो निवृत्ताः एतावन्तोऽनिवृत्ता इति विविच्यानिवृत्तदोषनिरोधे यत्नो व्यतिरेकसञ्ज्ञकवैराग्यम्। यदा तु विषयेष्विच्छासत्त्वेऽपि मनसीन्द्रियनिरोधावस्थानं भवति, तदेकेन्द्रियसञ्ज्ञकवैराग्यम्। ऐहिकस्रक्चन्दनवनितादयो दृष्टविषयाः, आमुष्मिका आनुश्रविकाः तेषु विषयेषु जिहासा वशीकारसञ्ज्ञकवैराग्यम्। तत्र भवति पातञ्जलसूत्रम् "**दृष्टानुश्रविकविषय-**

---

१. मुण्ड.उ. १.२.१२
२. मु.उ.शां.भा. १.२.१२
३. कै.दी. २.१६०

**वितृष्णस्य वशीकारसञ्ज्ञावैराग्यम्**[1]'' इति। वशीकारसञ्ज्ञकवैराग्यं पुनस्त्रिविधम् — मन्दतीव्रतीव्रतरभेदात्। पुत्रदारादिविषयवियोगे धिक् संसारमिति बुद्ध्या विषयजिहासा मन्दवैराग्यम्। अस्मिन् जन्मनि पुत्रदारादि मास्त्विति स्थिरबुद्ध्या यदा विषयजिहासा जायते तन्मध्यवैराग्यम्। यत्तु पुनरावृत्तिसहित-ब्रह्मलोकादिपर्यन्तं मास्त्विति स्थिरबुद्ध्या विषयजिहासा उदेति तत्तीव्रतरं वैराग्यमिति विवेकः। तत्र —

''**यदा मनसि वैराग्यं जायते सर्ववस्तुषु।**
**तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत्॥**[2]''

इति स्मरणात् तीव्रवैराग्ये सत्येव संन्यासाधिकार इति। यथोचुः विद्यारण्यमुनयः ''**यथा तीव्रायां बुभुक्षायामुत्पन्नायां भोजनादन्यो न रोचते व्यवहारः, भोजने च विलम्बोऽपि सोढुं न शक्यते, तथा जन्महेतुषु कर्मसु अत्यन्तमरुचिः वेदनसाधनेषु च श्रवणादिषु त्वरा महती सम्पद्यते, तादृशी विविदिषा संन्यासहेतुः**[3]'' इति। यदा तु पूर्वोक्तवैराग्यप्रकारेषु यदुत्कृष्टतमं वैराग्यं तत् परवैराग्यमिति निगद्यते। परवैराग्यप्राप्तानां संन्यासे अधिकारः।

## ४.११ संन्यासः —

अनित्येषु संसारान्तर्गतविषयफलेषु उत्पन्नतीव्रवैराग्यः पुरुषधौरेयः संन्यासेऽधिक्रियते। संन्यासश्च ब्रह्मविद्याप्राप्त्युपायत्वेन वेदान्तेषु शोश्रूयते। भाष्यकारा अपि ''**ज्ञानमात्रे यद्यपि सर्वाश्रमाणामधिकारः तथापि संन्यास-निष्ठैव ब्रह्मविद्या मोक्षसाधनम्**[4]'' इति निरूपयन्तः तस्य प्राधान्यं प्राचीकटन्।

वस्तुतो ज्ञानस्य अन्तरङ्गसाधनानि श्रवणादीनि कियत्पर्यन्तमनुष्ठेयानीति विचारयन् सूत्रकारः ''**आवृत्तिरसकृदुपदेशात्**[5]'' इत्यनेन श्रवणादिसाधनस्य यावत्फलमावृत्तिः कर्तव्या इति सिद्धान्तसूत्रमसुसूत्रत्। ''**श्रोतव्यो मन्तव्यो**

१. यो.सू. १.१५
२. मै.उ. २.१९
३. जी.वि. पृ. १५
४. मु.उ.शा.भा. उपोद्घातः
५. ब्र.सू. ४.१.१



**निदिध्यासितव्यः**[1]'' इत्यत्र असकृदुपदेशश्रवणात्, विद्याया दृष्टफलकत्वाद्यथा व्रीह्यवघातः तुषविमोकरूपफलपर्यन्तमावर्त्यते तथैव निर्विशेषात्मसाक्षात्कारपर्यन्तं श्रवणादिकमावर्तनीयमिति सूत्रार्थः। ''**ब्रह्मसंस्थोऽमृतत्वमेति**[2]'' इत्यादिश्रुतिः एवंविधसाधनानुष्ठानार्थमेव संन्यासाश्रमं विधत्ते। एतस्याः श्रुतेरर्थं विवृण्वाना भाष्यकाराः संन्यासिनामेव मुख्यो ब्रह्मविचारः सम्भवतीति प्रत्यपीपदन्। तथा हि ''**ब्रह्मसंस्थ इति हि ब्रह्मणि परिसमाप्तिः अनन्यव्यापारतारूपं तन्निष्ठत्वम् अभिधीयते; तच्च त्रयाणामाश्रमाणां न सम्भवति, स्वाश्रमविहित-कर्माननुष्ठाने प्रत्यवायश्रवणात्; परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न सम्भवति अननुष्ठाननिमित्तः; शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थाया उपोद्बलकः, न विरोधी**[3]'' इति। ''**त्यक्तसर्वबाह्यैषणैः अनन्यशरणैः परमहंसपरिव्राजकैः अत्याश्रमिभिः वेदान्तविज्ञानपरैरेव वेदनीयम्**[4]'' इति च। अमुमेवार्थमालक्ष्यीकृत्य वार्तिककारा अपि शमादिमतो मुमुक्षोर्मोक्षोपायमपेक्षमाणस्याऽऽत्मरूपमेकरसं ज्ञातुमिच्छतः संन्यासिन एव वेदान्तेष्वधिकार इति बभाषिरे —

''**त्यक्ताशेषक्रियस्यैव संसारं प्रजिहासतः।**
**जिज्ञासोरेव चैकात्म्यं त्रय्यन्तेष्वधिकारिता॥**[5]'' इति।

एतस्य संन्यासस्य धर्मा आरुणिकाद्युपनिषत्सु अन्यत्र च प्रपञ्चिताः। यथा ''**पुत्रान् भ्रातॄन् बन्ध्वादीञ्छिखां यज्ञोपवीतं यागं स्वाध्यायं ब्रह्माण्डं च विसृजेत्। दण्डमाच्छादनं चैव कौपीनं च परिग्रहेत्। शेषं विसृजेत्। त्रिसन्ध्यादौ स्नानमाचरेत्। सन्धिं समाधावात्मन्याचरेत्। सर्वेषु वेदेष्वारण्यकमावर्तयेदुपनिषदमावर्तयेत्। कामक्रोधहर्षरोषलोभमोहदम्भ-दर्पेच्छाऽसूयाममत्वाहङ्कारादीनपि परित्यजेत्**[6]'' इति। यद्यपि ब्रह्मचर्य-

१. बृह.उ. २.४.५
२. छा.उ. २.२३.१
३. ब्र.सू.शां.भा. ३.४.२०
४. छा.उ.शां.भा. ८.१२.१
५. बृ.उ.भा.वा. १.१.१२
६. आ.उ. १

गार्हस्थ्यवानप्रस्थानाश्रमानन्तरं संन्यासः स्वीकार्य इति स्मृतिप्रसिद्धिः, तथापि उत्पन्नवैराग्यो विविदिषुः पुरुषधौरेयः पूर्वमेव संन्यासं ग्रहीतुं शक्नोति। अत एव च श्रुतिः ''**ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत्**[१]'' इत्युक्त्वा यदि वैराग्यं सम्पन्नं तर्हि ''**यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा**[३]'' इत्युक्तम्।

प्रागुक्तश्रुतिभाष्यवाक्येभ्यः प्राप्ताधिकारेण पुरुषेण विधिना क्रियमाणः वाङ्मनःकायप्रवृत्तीनां त्यागः संन्यासः इत्युच्यते। अस्य लक्षणं भाष्यकारा एवमभाषिषत ''**सम्पूर्वस्तु न्यासशब्दः त्यागार्थो न निक्षेपार्थः**[३]'' इति। अयञ्च संन्यासः कुटीचकबहूदकहंसपरमहंसभेदेन चतुर्विधः। तत्र ''**मन्दे न्यासो न कोऽपि हि**[४]'' इत्युक्तरीत्या मन्दवैराग्यवतः संन्यासेऽनधिकारः। ''**तीव्रे न्यासद्वयं भवेत्**[५]'' इति वचनात् तीव्रवैराग्ये सति यात्राद्यशक्तानां निश्शक्तीनां कुटीचकसंन्यासे अधिकारः। तच्छक्तिमतां तु बहूदकसंन्यासाधिकारः। यथोक्तं कैवल्यदीपिकायाम् —

''**मन्दे न्यासः कोऽपि पापेन तीव्रे**
**न्यासस्स्यादाद्यः कुटीचो बहूदः।**
**निश्शक्तीनां पूर्व एव प्रक्लृप्त-**
**श्शक्त्याढ्यानामन्तिमो वेदविद्भिः॥**[६]'' इति।

अतितीव्रतरवैराग्ये सति हंससंन्यासाधिकारः। तत्रापि पूर्वोक्तवैरागेषु यदुत्कृष्टं परवैराग्यं प्राप्ते सति मुमुक्षोः परमहंससंन्यासाधिकारः। अतः अतितीव्रे वैराग्ये विहितसंन्यासो द्विविधः। यथा चाचीकथन् कैवल्यदीपिकाराः —

''**द्वेधा न्यासो वर्णितश्चातितीव्रे**
**हंसो हंसस्स्यात्परो हंसयोगी।**

१. जा.उ. ४
२. जा.उ. ४
३. भ.गी.शां.भा. २.२
४. जी.वि. ४.८
५. जी.वि. ४.९
६. कै.दी. २.१६१



**मुक्तिं सत्ये लोक एव प्रयाया-**
**दन्यो ज्ञानादत्र मुक्तिं लभेत॥**[१]'' इति।

एतेषु चतुर्विधसंन्यासेषु परमहंससंन्यासस्यैव प्राधान्यात् तत्स्वरूपमिह कैवल्यदीपिकोक्तरीत्या प्रपञ्च्यते। अयं हि संन्यासो विविदिषासंन्यासो विद्वत्संन्यासभेदाद् द्विविधः इति कैवल्यदीपिकाकारेण ''**द्वैविध्यं परहंसकेति विदितम्**[२]'' इति श्लोकेन स्पष्टीकृतम्। तत्र वेदान्तप्रतिपाद्यब्रह्मात्मैक्यतत्त्वं परोक्षतो ज्ञात्वा ऐहिकामुष्मिकभोगेषु नितरां विरक्तेन आत्मैक्यसाक्षात्कारमुद्दिश्य तत्साधनानां स्वानुष्ठानार्थं क्रियमाणः कर्मत्यागः विविदिषासंन्यासः। अर्थात् इह जन्मनि जन्मान्तरे वा फलेच्छाऽहंभावरहितकर्मानुष्ठानेन उत्पन्ना या विविदिषा, तया प्राप्यत्वादयं विविदिषासंन्यास इत्युच्यते। ''**एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति**[३]'' इत्यादिश्रुतिरत्र मानम्। श्रुतौ एतच्छब्देन ''**स वा एष महानज आत्मा**[४]'' इति प्रकृत आत्मा परामृश्यते। स एव लोक्यत अनुभूयत इति लोकः। ''**अविदुषाऽपि मुमुक्षुणा पारिव्राज्यं कर्तव्यमेव**[५]'' इति संन्यासममुं भाष्यकारा उपदिदिशुः। गृहस्थाश्रमादौ कृतश्रवणादिभिः उत्पन्नसाक्षात्कारेण गृहस्थादिना चित्तविश्रान्तिलक्षणां जीवन्मुक्तिमुद्दिश्य क्रियमाणः संन्यासो विद्वत्संन्यास इत्युच्यते। तत्र ''**एतमेव विदित्वा मुनिर्भवति**[६]'', ''**अथ योगिनां परमहंसानाम्**[७]'' इत्यादिश्रुतिर्मानम्। ''**यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम्। तदैव दण्डं सङ्गृह्य सोपवीतां शिखां त्यजेद्**[८]'' इति च।

अत्रैवं शङ्का स्यात् — ''**कुर्वन्नेवेह कर्माणि**[९]'' इत्यादिश्रुत्या यावज्जीवं कर्मणामनुष्ठानं करणीयमिति श्रूयते, तस्मात् कर्मत्यागः अशास्त्रीयः। अन्यथा

१. कै.दी. २.१६२
२. कै.दी. २.१६३
३. बृह.उ. ४.४.२२
४. बृह.उ. ४.४.२२
५. ऐ.उ.शां.भा. उपोद्घातः
६. ब्र.सू.शां.भा. २.३.४३
७. प.उ. १
८. ना.प.उ. ३.१७
९. ई.उ. २

बहूणां कर्मविधीनामप्रामाण्यप्रसङ्गः इति। अत्रोच्यते – संन्यासाश्रमो ज्ञानप्रधानः। ज्ञानकर्मणोः पूर्वोक्तरीत्या (४.९) अत्यन्तविरोधात्, ज्ञानसाधनैः सह कर्मणामपि अनुष्ठानं न सम्भवति। ज्ञानं हि अकर्त्रभोक्त्रात्मतत्त्वं विषयीकरोति। कर्म तु आत्मनः कर्तृत्वभोक्तृत्वादिधर्मानाश्रित्य प्रवर्तते। ज्ञानकर्मणोः विरोधममुं भाष्यकारा एवं प्रकटीचक्रुः ''**न हि पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक्समुद्रजिगमिषुणा समानमार्गत्वं सम्भवति। प्रत्यगात्मविषयप्रत्यय-सन्तानकरणाभिनिवेशश्च ज्ञाननिष्ठा; सा च प्रत्यक्समुद्रगमनवत् कर्मणा सहभावित्वेन विरुध्यते। पर्वतसर्षपयोरिव अन्तरवान् विरोधः प्रमाणविदां निश्चितः**[१]'' इति। कर्मफलाभिलाषिणा हि कर्म कर्तव्यम्। न हि ऐहिकामुष्मिक-भोगेषु विरक्तस्य कर्महेतुकामना उदेति। तस्य हि कर्म सिषाधयिषितमोक्षस्य नैव साधकम्, किन्तु बाधकमेव। तथा च श्रूयते ''**न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः**[२]'' इति। स्मृतिश्चापि अत्र भवति —

''**कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते।**
**तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः॥**[३]'' इति।
''**त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम्।**
**त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्॥**[४]''

इति च वार्तिककारा प्राहुः। अत्र मोक्षशब्देन तद्धेतुर्ज्ञानं लक्ष्यते। तस्माद्युक्त एव कर्मत्यागः।

''**त्रयो धर्मस्कन्धाः**[५]'' इति श्रुतिमादाय संन्यासः किमनुष्ठेय उत नेति मीमांसायां ''**परामर्शं जैमिनिरचोदना चापवदति हि**[६]'' इति पूर्वपक्षसूत्रेण धर्मस्कन्धान् त्रीन् पुण्यलोकप्राप्तिमात्रफलकत्वेन निन्दित्वा ब्रह्मसंस्था मोक्षफलतया स्तूयते। अत्र वाक्ये विध्यश्रवणाद्यत्याश्रमस्य अनुष्ठेयत्व न सिध्यति। न च ब्रह्मसंस्थाश्रुत्या विधिकल्पनं युज्यते। ''**वीरहा वा एष देवानां योऽग्निम्**

१. भ.गी.शां.भा. १८.५५
२. महा.उ. १०.५
३. म.भा. १२.२४१.६
४. बृ.उ.भा.वा. १.१.२१५
५. छा.उ. २.२३.१
६. ब्र.सू. ३.४.१८



**उद्वासयते**[१]'' इत्यादिना कर्मत्यागनिन्दादर्शनात् न संन्यासविधिः कल्पयितुं शक्यते। तस्माद्यत्याश्रमो न शास्त्रविहितः इति पूर्वपक्षमुद्भाव्य ''**अनुष्ठेयं बादरायणः साम्यश्रुतेः**[२]'' इति सिद्धान्तसूत्रं सिद्धान्तितम्। स्कन्धश्रुतौ श्रुत्यन्तरविहितस्यैव आश्रमत्रयस्य अनुवादः ''**ब्रह्मसंस्थः...**[३]'' इति श्रुतस्य संन्यासस्यापि समान इत्यत आश्रमान्तरमिव संन्यासोऽपि अनुष्ठेय इति सूत्रार्थः। ''**त्रयो धर्मस्कन्धाः**[४]'' इत्यादिवाक्ये विधिरश्रवणेऽपि अप्राप्तत्वादपूर्वार्थप्रतीतेश्च विधिः कल्प्यत इति पक्षान्तरमपि सूत्रयामास ''**विधिर्वा धारणवत्**[५]'' इति। यथा ''**अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति**[६]'' इत्यत्र अधोधारणविध्येकवाक्यताप्रतीतौ अपि, तां परित्यज्य, उपरिधारणस्य अप्राप्तत्वाद्, दैवे होमे स्रुग्दण्डोपरि समिद्धारणे वाक्यभेदेन विधिः अङ्गीक्रियते तद्वदिहापि आश्रमान्तरानुवादकवाक्येन प्रतीतामेकवाक्यतां परित्यज्य लाघवात् परामर्शश्रुतिरेव संन्यासविधित्वेन स्वीक्रियत इति सूत्रार्थः। एवं संन्यासस्य अनुष्ठेयत्वं प्रसाध्य ''**तद्भूतस्य नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः**[७]'' इति सूत्रेण संन्यासात् प्रत्यवरोहणं=गार्हस्थ्यस्वीकारः ''**अरण्यमियादिति पदं ततो न पुनरेयादित्युपनिषत्**[८]'' इति नियमात् कथमपि न सम्भवतीति सूत्रकारः सिद्धान्तयामास। तथा च स्मृतिः —

''**आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम्।**
**आविमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि॥**[९]'' इति।

ततः ''**बहिस्तूभयथापि स्मृतेराचाराच्च**[१०]'' इति सूत्रेण संन्यासात् प्रच्युतानां शुद्ध्यभावः सूत्रितः।

१. तै.सं. १.५.२
२. ब्र.सू. ३.४.१९
३. छा.उ. २.२३.१
४. छा.उ. २.२३.१
५. ब्र.सू. ३.४.२०
६. आप.श्रौ.सू. ९.३.११.४१
७. ब्र.सू. ३.४.४०
८. ब्र.सू.शां.भा. ३.४.४० इत्यत्र उद्धृतम्।
९. म.भा. १२.२३४.२
१०. ब्र.सू. ३.४.४३

एवं संन्यासस्य शास्त्रविहितत्वं सिद्धम् । न च तथा सति कर्मश्रुतीनामप्रामाण्यं शङ्कनीयम् । अधिकारभेदेन कर्मसंन्यासविधायकश्रुत्योः उभयोरपि प्रामाण्यापत्तेः । संन्यासश्रुतिः विरक्तविषयिणी । कर्मविधयस्तु अविरक्तविषयाः । अविरक्तस्य न हि कर्मत्यागो श्रूयते, न च सम्भवति । तस्य च सत्त्वशुद्ध्यर्थं कर्मणि प्रवृत्तस्य कर्मारम्भ एव नैष्कर्म्यं सम्पादयति । यथोक्तं नैष्कर्म्यसिद्धौ —

''**प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।**
**कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥**[1]'' इति ।

यथा बीजावापात् प्राक्कर्षणं पश्चात्तु अकर्षणमिति उभाभ्यामपि ताभ्यां व्रीहिः निष्पाद्यते, तथैव प्रत्यक्प्रवणतापर्यन्तं कर्मानुष्ठानम्, ततः कर्मत्याग इति कर्मसंन्यासाभ्यां विद्या निष्पद्यत इति । जिज्ञासुम् अर्जुनं प्रति बोधमान् जगद्गुरुः श्रीकृष्णोऽपि गीतायामपि अमुमेवार्थं ''**आरुरुक्षोर्मुनेर्योगं...**[2]'' इत्यादिना प्रबोधयामास । सोऽयं विविदिषासंयासः ।

यत्तु पूवोक्तरीत्या श्रवणाद्यनुष्ठानेन ब्रह्मसाक्षात्कारं प्राप्तः, तेन सम्पाद्यमानः विद्वत्संन्यासः । संन्यासोऽयं ज्ञानान्तरकालीन इत्युपपादितं विद्यारण्यमुनिभिः जीवन्मुक्तिविवेकस्य विद्वत्संन्यासप्रकरणे ।[3] विद्वत्संन्यासप्राप्तोऽयमपि संन्यासी न कथञ्चित् क्वचित् कर्मणि अधिक्रियते । तस्य अप्राप्तं प्राप्तव्यमहीनं वा हातव्यं न किञ्चिदस्ति, यदर्थं स कर्माण्यनुतिष्ठेत् । यथोक्तं गीतायाम् —

''**यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।**
**आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥**[4]'' इति ।

अनेन विदुषा कर्मभिः यत्प्राप्तव्यं फलं भवति तत् नित्यसुखात्मकपरमपुरुषार्थस्य प्राप्तत्वात् प्राप्तमेव भवति । अमुमेवार्थं गीतावचनमपि स्मरति—

''**यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।**
**तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥**[5]'' इति ।

१. नै.सि. १.४९
२. भ.गी. ५.३
३. जी.वि. पृ. १४९
४. भ.गी. ३.१७
५. भ.गी. २.४६



न च सर्वकर्मत्यागे सति भिक्षाटनादिविधिः बाध्येत इति वाच्यम् । सर्वस्वत्यागे सति प्रारब्धकर्मोत्थितशरीरस्थितिमात्रमालक्ष्य भिक्षाचर्यादिविधिम् उपदिशति श्रुतिः । न चैतावता कर्मविधयोऽपि आक्षिप्यन्ते । यथा हुतावशिष्ट-भक्षणविधिः अवशिष्टद्रव्योपादानमात्रेण चरितार्थः, न तु द्रव्यान्तराक्षेपकः, तथैव भिक्षाचरणविधिः न कर्मान्तरमाक्षिपति ।

''**निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।**
**शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥**[1]''

इति गीतावचनप्रामाण्यात् । अपि च शास्त्रीयसाधनोपेतत्वेन प्राप्तज्ञानस्य संन्यासिनो मोक्षावाप्तिमपि दर्शयति श्रुतिः —

''**वेदान्तविज्ञानसुनिश्चितार्थाः**
**संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।**
**ते ब्रह्मलोकेषु परान्तकाले**
**परामृतात्परिमुच्यन्ति सर्वे ॥**[2]'' इति ।

## ४.१२ अद्वैतसिद्धान्ते आत्मस्वरूपम् —

आत्मस्वरूपविषये दार्शनिकानां मतभेदोऽस्ति । तथा हि स्थूलशरीरमेव आत्मा इति चार्वाकाः । क्षणिकं विज्ञानमिति सुगताः । बुद्धिरात्मा इति योगाचारबौद्धाः । शून्यमिति माध्यमिकबौद्धाः । देहेन्द्रियातिरिक्तो देहपरिमाण इति दिगम्बराः । तार्किका हि द्रव्यमात्मा, सुखदुःखधर्माधर्मादयो गुणाः समवायसम्बन्धेन आत्मनि समुत्पद्यन्त इति कथयन्ति । प्राभाकरा हि अज्ञानोपहितत्वमज्ञानसंवलितत्वं ज्ञानाज्ञानरूपत्वं द्रव्यत्वमात्मा इति आमनन्ति । परिणामवादिनः कापिलाः पातञ्जलाश्च कूटस्थासङ्गचिद्रूपत्वमिति आत्मनः तात्त्विकं स्वरूपमुररीकुर्वन्ति, तथापि भोक्तृत्वं नानात्वं चापि यथार्थतया अभ्युपगच्छन्ति । एतेषु मतेषु न किमपि मतं श्रद्धेयमिति वेदान्तिनः । यतः उत्तरोत्तरा स्मृतिः पूर्वां पूर्वां श्रुतिमाभासीकरोति । एवमेव पूर्वाः पूर्वा युक्तयः, पूर्वे पूर्वे अनुभवाश्च उत्तरोत्तरयुक्तिभिः उत्तरोत्तरानुभवैः च आभास्यन्ते । वेदान्तमते

१. भ.गी. ४.२१
२. मुण्ड.उ. ३.२.६

आत्मा अविद्यया कर्तृत्वादिभाक् परमार्थतो निर्धर्मकः परमानन्दस्वरूपो विज्ञानघनः स्वयंप्रकाशरूपश्च। एतद्धि श्रुत्येकसमधिगम्यम्।

''**एकमेवाद्वितीयम्**[1]'' इत्यादिश्रुतिबलेन एकमेव ब्रह्म परमार्थतः सर्वस्वम्। अविद्याद्वारा तदेकं ब्रह्म जीवजगदादिरूपेण प्रतीयते इति अस्माभिः गताध्याते जीवात्मनोः स्वरूपविचारे (३.१४) साधितम्। सर्वदेहेषु एक एव देवो वर्तते। यथा हि श्रूयते श्रुतौ —

''**एको देवः सर्वभूतेषु गूढः**
**सर्वव्यापी सर्वभूतान्तरात्मा।**
**कर्माध्यक्षः सर्वभूताधिवासः**
**साक्षी चेता केवलो निर्गुणश्च॥**[2]'' इति।

यत्तु आत्मनो बहुत्वं दृश्यते तदौपाधिकम्। अर्थात् जीवेश्वरयोः भेदः औपाधिकः, न पारमार्थिकः। अपि च अद्वैतमते केचन एकजीववादम् अभ्युपगच्छन्ति, केचन तु बहुजीववादम्। तत्र ''**सत्यस्य विदुषो मोक्षे मुक्तौ सर्वेऽपि जीवाः मुक्तिं कथं वा न लभन्ते। अत एकजीववादो न सङ्गच्छते। सर्वे च भिन्ना विलक्षणाः**[3]'' इति वदता कैवल्यदीपिकाकारेणापि बहुजीववाद आश्रितः। तथापि ''**एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्**[4]'' इति श्रुत्युक्तदिशा तत्र जीवानां यद्बहुत्वमस्ति तत् प्रतिबिम्बन्यायेन उपाधिजन्यमेव, न तु वास्तविकमित्यपि तत्रैव निगदितम् —

''**अहन्तासाक्ष्येको विभुरपि परात्मा बहुविधा-**
**स्तथा जीवा अन्तःकरणबहुताया अहमिति।**
**जगत्येकश्चन्द्रः सलिलशशिनोऽमी बहुविधा**
**उपाधीनां भेदाद् घटकलशकूपादिपयसाम्॥**[5]'' इति।

---

१. छा.उ. ६.२.१
२. श्वे.उ. ६.११
३. कै.दी.व्या. २.३८
४. ब्र.बिं.उ. १२
५. कै.दी. २.३९



## ४.१२.१ प्रतिबिम्बवादः —

वस्तुत एकमेव ब्रह्म अविद्याद्वारा जीवजगदादिरूपेण प्रतीयते, तत्सिद्ध्यर्थमद्वैतवेदान्ते त्रयो वादा अवलम्बिताः - प्रतिबिम्बवादः, आभासवादः, अवच्छेदवादश्च। तत्र प्रतिबिम्बवादः पद्मपादाचार्यप्रकाशात्ममुनिसर्वज्ञात्ममुनि-प्रभृतीनाम्, आभासवादः सुरेश्वराचार्यप्रभृतीनाम्, अवच्छेदवासश्च वाचस्पतिमिश्र-प्रभृतीनाम्। एतद्विषये वेदान्तशास्त्रे प्रसिद्धः एष श्लोकः —

''**वाचस्पतेरवच्छेद आभासो वार्तिकस्य च।**
**सङ्क्षेपशारीरकृतां प्रतिबिम्बमिहेष्यते॥**[1]'' इति।

प्रतिबिम्बवादे बिम्बस्थानीयं ब्रह्म तथा प्रतिबिम्बस्थानीयं जीवादि। अत्रोपनिषद्ब्रह्मसूत्रादिषु सूर्यप्रतिबिम्बो दृष्टान्तेनोपन्यस्तः। तद्यथा तदुच्यते ''**वृद्धिह्रासभाक्त्वमिति। जलगतं हि सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते, जलह्रासे ह्रसति, जलचलने चलति, जलभेदे भिद्यते, इत्येवं जलधर्मानुविधायि भवति, न तु परमार्थतः सूर्यस्य तथात्वमस्ति**[2]'', ''**यथा च उदकशरावादिकम्पनात्तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान्सूर्यः कम्पते**[3]'', ''**यथा च बुद्ध्युपाधिस्वभावानुविधायी हि स चन्द्रादिप्रतिबिम्ब इव**[4]'' इति। एवञ्चायं प्रतिबिम्बवादः भाष्यकृता प्रश्न[5]-कठ[6]-मुण्डक[7]-ऐतरेयादि[8] उपनिषत्सु समर्थितः। पञ्चपादिकायाम्, पञ्चपादिकाविवरणे, सङ्क्षेपशारीरके च प्रतिबिम्बवादः स्वीकृतः। अवच्छेदवादे आभासवादे च काले काले ये भिद्यमानेनोपाधिना विभिद्यमानस्य जीवकर्मफलानुभवे कृतहानाकृताभ्युपगमादयो दोषाः प्रसज्येरन्। इमे दोषाः

---

१. सि.बिं. भूमिकाभागे पृ. ८
२. ब्र.सू.शां.भा. ३.२.२०
३. ब्र.सू.शां.भा. ३.३.४६
४. बृ.उ.शा.भा. २.१.९
५. प्र.उ.शां.भा. ४९
६. कठ.उ.शां.भा. २.३.२
७. मु.उ.शां.भा. ३.९
८. ऐ.उ.शां.भा. ३.१

प्रतिबिम्बवादे न सम्भवन्ति। अत एव बहवो हि अद्वैतवेदान्तेऽवच्छेदाभास-वादापेक्षया प्रतिबिम्बवादमेव समर्थयन्ति। प्रकृते कैवल्यदीपिकारः कृष्णोऽपि सोदाहरणं प्रतिबिम्बवादं समर्थयति। तथा हि —

''**उपाधावेकस्मिन्नपि घटशरावादिषु पुन-**
**र्विनष्टे तच्चन्द्रः प्रकृतिमयते नापरशशी।**
**गते जीवोपाधौ परमशिवभावं स लभते**
**परे नोपाध्याढ्या कथमपि लभन्ते निजपदम्॥**[1]'' इति।

प्रतिबिम्बवादमते न हि अन्तःकरणावच्छिन्नो जीवः, अपि तु अन्तःकरण-प्रतिबिम्बित इति। अतः अन्तःकरणभेदाज्जीवानामपि भेदः प्रतिपद्यते। अन्तःकरणोपाधिभिः परिच्छिन्नानामिव अन्तःकरणोपाधौ प्रतिबिम्बितानामपि अन्तःकरणभेदेन भेदाभ्युपगमात्। एवं जीवानाम् अंशत्वञ्चापि प्रतिबिम्बवादे सङ्गच्छते। अन्तःकरणावच्छिन्नचैतन्यं यथा महाचैतन्यस्य अंशत्वेन परिगण्यते, तथा अन्तःकरणप्रतिबिम्बितस्यापि महाचैतन्यस्य अंशत्वं कथं न स्यात्। वस्तुतः चैतन्यस्य निरवयवत्वात् निरंशत्वात्, तस्मिन् अंशत्ववचनं कल्पनामात्रम्, न तु वास्तविकम्। एवञ्च ''**अंशो नानाव्यपदेशात्**[2]'' इति सूत्रं विवृण्वाना भाष्याकारा अपि ''**अंश इवांशः, न हि निरवयवस्य मुख्योंऽशः सम्भवति**[3]'' इत्याहुः। प्रतिबिम्बवादिनां मते '**आभास एव च**[4]' इति सूत्रे एवशब्दप्रयोगात् प्रतिबिम्बवाद एव सूत्रकारैः अभिप्रेत इत्यवगम्यते। तथा चोक्तं भाष्यरत्नप्रभायाम् '**अंशेत्यादिसूत्रे जीवस्य अंशत्वं घटाकाशास्येव उपाध्यवच्छेदबुद्ध्या उक्तम्, सम्प्रति एवकारेण अवच्छेदपक्षारुचिं सूचयन् ''रूपं रूपं प्रतिरूपो बभूव**[5]'' **इत्यादि श्रुतिप्रसिद्धं प्रतिबिम्बपक्षम् उपन्यस्यति भगवान् सूत्रकारः ''आभास एव चेति**[6]'' इति। अपि च पञ्चपादिकायामपि

१. कै.दी. २.४०
२. ब्र.सू. २.३.४३
३. ब्र.सू.शां.भा. २.३.४३
४. ब्र.सू. २.३.५०
५. ऋ.वे. ६.४७.१८; बृह.उ. २.५.१९
६. भा.र.प्र. २.३.५०



''**तत्त्वमिति बिम्बस्थानीयब्रह्मस्वरूपता प्रतिबिम्बस्थानीयस्य जीवस्य उपदिश्यते इति शास्त्रीयोऽपि व्यवहारः प्रतिबिम्बस्य पारमार्थिकमेव बिम्बैकरूपत्वं दर्शयति**[1]'' इत्युपक्रम्य ''**जीवः पुनः प्रतिबिम्बकल्पः सर्वेषां नः प्रत्यक्षश्चिद्रूपः नान्तःकरणजाड्येनास्कन्दितः**[2]'' इत्यनेन प्रतिबिम्बवादः समर्थितः। विवरणकारास्तु ''**ननु कोऽयं जीवो नाम यस्य स्वरूपं त्वम्पदेन लक्ष्यमाणं ब्रह्मैव वाक्यार्थः सम्पद्यत। ब्रह्मैव अविद्याप्रतिबिम्बितमिति वदामः**[3]'' इत्येवं प्रतिबिम्बवादमुदाजह्रुः।

अत्रायं प्रश्नः — ननु रूपवत एव पदार्थस्य प्रतिबिम्बः सम्भवति, न हि नीरूपस्य। तर्हि कथं नीरूपस्य ब्रह्मणः प्रतिबिम्बः सम्भवति ? इति चेत् — उच्यते। रूपस्य गुणपदार्थत्वात्, गुणे च गुणाभावाद् रूपे रूपं नास्ति। तस्य तु नीरूपस्य रूपस्य दर्पणादौ प्रतिबिम्बदर्शनात्। ननु, नीरूपस्य द्रव्यस्य प्रतिबिम्ब एव न सम्भवति, रूपस्य तु द्रव्यत्वाभावात् रूपाभावत्वे अपि न हानिरिति चेत् — उच्यते। रूपवतः द्रव्यस्य दृश्यत्वात् प्रतिबिम्बस्यापि दृश्यत्वम्। नीरूपस्य तु अप्रत्यक्षत्वात् प्रतिबिम्बस्यापि अदृश्यत्वमिति तावत् वक्तुं शक्यते। नीरूपस्य द्रव्यस्य प्रतिबिम्बो नास्तीति नैव वक्तुं शक्यम्, यतो नीरूपस्य द्रव्यस्य अप्रत्यक्षत्वेऽपि प्रमाणान्तरसिद्धत्वेन तस्य अस्तित्वं यथा स्वीक्रियते तथा नीरूपद्रव्यस्य प्रतिबिम्बोऽपि श्रुतिरूपप्रमाणान्तरसिद्धत्वेन स्वीकरणीयः। अपि च शब्दो द्रव्यपदार्थः, तस्य तु नीरूपत्वेऽपि प्रतिध्वनिरूपः प्रतिबिम्बः अनुभूयते। नक्षत्रमण्डितस्याकाशस्यापि नीरूपद्रव्यस्य जले प्रतिबिम्बो दृश्यते। न चायं प्रतिबिम्बः सूर्यकिरणस्य आकाशस्य वेति वाच्यम्, प्रतिबिम्बस्य कटाहस्य दृश्यमानत्वेन आकाशप्रतिबिम्बित्वोपपत्तेः। एवं नीरूपस्य आत्मनोऽपि प्रतिबिम्बः उपपद्यत एव। अत एव ''**रूपं रूपं प्रतिरूपो बभूव**[4]'' इत्यादिश्रुतिभिः, ''**एकधा बहुधा चैव दृश्यते जलचन्द्रवत्**[5]'' इत्यादिस्मृतिभिः, ''**अत एव**

१. पं.पा. पृ. १०८
२. पं.पा. पृ. १११
३. पं. वि. पृ. ७६०
४. बृह.उ. २.५.१९
५. ब्र.बिं.उ.

**चोपमा सूर्यकादिवत्**[१]'' इत्यादिसूत्रैश्च जीवस्य प्रतिबिम्बभावः उपदर्शितः ।

**(क) अविद्याप्रतिबिम्बितचैतन्यम् ईश्वरः, अन्तःकरणप्रतिबिम्बितं चैतन्यं जीवः —**

सङ्क्षेपशारीरककाराणां मते ईश्वरस्य उपाधिः माया । मायाप्रतिबिम्बितचैतन्यम् ईश्वरः । अन्तःकरणे प्रतिबिम्बितं चैतन्यं जीवः । जीवपरमेश्वरसाधारणं बिम्बत्वादिभिः अविशिष्टं निरुपाधिकं चैतन्यमात्रमेव बिम्बम् । तस्य निरुपाधिकचैतन्यस्य बिम्बस्य अविद्यात्मिकायां मायायां प्रतिबिम्बम् ईश्वरचैतन्यम् । तस्यैव निरुपाधिकचैतन्यस्य अन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यम् । तथा च अन्तःकरणस्य जीवोपाधेः प्रतिशरीरं भेदाज्जीवभेदः इत्यत्र ''**कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः**[२]'' इति श्रुतिर्मानम् । कार्यमन्तःकरणम् उपाधिः यस्य स जीवः, कारणमज्ञानम् उपाधिः यस्य स ईश्वरः इत्यर्थः । एतन्मते जलाशयस्थजलगतशरावस्थजलगतयोः सूर्यप्रतिबिम्बयोः इव जीवेश्वरयोः भेदः । सूर्यस्य स्वरूपतो भेदाभावेऽपि उपाध्योः भेदाद्यथा कल्पितभेदः, तथैव निरुपाधिकचैतन्यस्य स्वरूपतो भेदाभावेऽपि जीवेश्वरयोः प्रतिबिम्बित्वेन अविशेषेऽपि प्रतिबिम्बोपाध्योः अज्ञानान्तःकरणयोः भेदात् कल्पितभेदः ।

**(ख) मायाप्रतिबिम्बितम् ईश्वरः, अविद्याप्रतिबिम्बितं जीवः —**

(१) तत्त्वविवेककारा हि ''**जीवेशावाभासेन करोति माया चाविद्या च**[३]'' इति श्रुतिमवलम्ब्य मायाऽविद्ययोः रूपभेदमभ्युपगच्छन्ति । तत्र रजस्तमोऽनभिभूतशुद्धसत्त्वप्रधाना माया, तदभिभूतमलिनसत्त्वप्रधाना च अविद्या इति उभयोर्भेदः । यद्वा विक्षेपशक्त्या माया, आवरणशक्त्या च अविद्या इति उभयोर्भेदः । तत्र मायाप्रतिबिम्बितं चैतन्यम् ईश्वरः, अविद्याप्रतिबिम्बितं चैतन्यं जीवः ।[४]

(२) प्रकटार्थविवरणकारा अपि मायाऽविद्ययोः भेदं स्वीकुर्वन्ति । चैतन्याश्रिता

---

१. ब्र.सू. ३.२.१८
२. शु.उ. १२
३. कै.उ. २.९
४. सि.ले.सं. पृ. ८३



जगज्जननी प्रकृतिः माया, तत्र प्रतिबिम्बितं चैतन्यम् ईश्वरः । तदुक्तम् ''**अनादिरनिर्वाच्या भूतप्रकृतिः चिन्मात्रसम्बन्धिनी माया, तस्यां चित्प्रतिबिम्बितः ईश्वरः, तस्या एव परिच्छिन्नानन्तप्रदेशेष्वावरण-विक्षेपशक्तिमत्सु अविद्याभिधानेषु चित्प्रतिबिम्बो जीवः**[१]'' इति ।

**(ग) बिम्बचैतन्यम् ईश्वरः, प्रतिबिम्बितचैतन्यं जीवः —**

तत्र प्रकाशात्मयतयस्तु मायाऽविद्ययोः भेदं नाङ्गीकुर्वन्ति । ते हि —

**''विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।**
**आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥**[२]''

इति स्मृत्या एकस्यैवाऽज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनाद् बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभागः, नोभयोरपि प्रतिबिम्बभावेन इति कथयन्ति । तत्र बिम्बस्थानीय ईश्वरः, जीवस्तु प्रतिबिम्बः । तथा सत्येव लौकिकबिम्बप्रतिबिम्बदृष्टान्तेन स्वातन्त्र्यमीश्वरस्य, तत्पारतन्त्र्यं जीवस्य च युज्यते । एवञ्च बिम्बप्रतिबिम्बयोश्च अभेद इति जीवब्रह्मणोः ऐक्यम् । अत एव —

**''प्रतिबिम्बगताः पश्यन्नृजुवक्रादिविक्रियाः ।**
**पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्थविक्रियाः ॥**[३]''

इति कल्पतरूक्तरीत्या ''**लोकवत्तु लीलाकैवल्यम्**[४]'' इति सूत्रमपि सङ्गच्छते । एतेषामाचार्याणां मते जीवेश्वरयोर्मध्ये केवलमज्ञानमेव भेदकोपाधिः । अनाद्यज्ञानाद् अन्यो जीवेश्वरयोः भेदको न कश्चन उपाधिः वर्तते । अत एव अज्ञाने विनष्टे जीवो ब्रह्मस्वारूप्यं लभते । अज्ञानमेव ब्रह्मणः प्रतिबिम्बग्रहणे समर्थः उपाधिः । एकस्मिन् उपाधौ च तुल्य एव प्रतिबिम्बो भवेत्, न तु भिन्नः । ईश्वरो जीवश्च इति द्विविधे प्रतिबिम्बे स्वीकृते सति द्विविधप्रतिबिम्बस्य द्विविधः उपाधिः स्वीकरणीयो भवेत्, न चैतत्सम्भवति, अज्ञानाद्बहिरुपाध्यन्तरस्याभावात् । तस्मात् जीवेश्वरयोः उभयोः न प्रतिबिम्बत्वम् । ईश्वरो बिम्बः, जीवस्तु प्रतिबिम्ब इति स्वीकार एव

---

१. सि.ले.सं. पृ. ८२
२. वि.पु. ६.७.८४
३. सि.ले.सं. इत्यत्र उद्धृतः श्लोकः पृ. १०४
४. ब्र.सू. २.१.३३

युक्तियुक्तः। प्रतिबिम्बः बिम्बस्य औपाधिकी अभिव्यक्तिः इति प्रतिबिम्बस्य बिम्बवत् सत्यत्वं स्वीकरणीयम्, तयोर्भेदस्तु न वास्तविकः। जीवोऽपि ब्रह्मणः औपाधिकी अभिव्यक्तिः इति कृत्वा जीवो वस्तुतो ब्रह्मस्वरूप एव।

बिम्बप्रतिबिम्बकल्पनोपाधिश्च एकजीववादे अवस्तुभूता अनादिः अविद्या। प्रतिबिम्बोपाधेः अविद्यायाः एकत्वाद् जीवोऽपि एकः। नानाजीववादे तु अन्तःकरणानि एव उपाधिः। यद्यपि नानाजीववादे अन्तःकरणतत्संस्काराव-च्छिन्नाज्ञानस्यैव उपाधित्वं विवरणकृतामभिमतम्, नान्तःकरणमात्रस्य। तथापि अन्तःकरणावच्छिन्नस्यैव संसारित्वदर्शनादन्तःकरणस्यापि उपाधित्वावश्यकत्वादत्र अन्तःकरणस्य उपाधित्वमुक्तम्। तस्माद् अन्तःकरणतत्संस्कारावच्छिन्ना-ज्ञानप्रतिबिम्बितचैतन्यस्य जीवत्वम्, बिम्बस्य च ईश्वरत्वम्। एवञ्च प्रतिबिम्बेश्वरवादोक्ता अविद्योपाधिप्रयुक्ता दोषाः, अन्तःकरणोपाधिप्रयुक्ता दोषाश्च प्रतिबिम्बे जीवे एव वर्तन्ते, न तु बिम्बे ईश्वरे, उपाधेः प्रतिबिम्बपक्षपातित्वात्। अस्मिन् मते सूर्यस्य जलादौ भासमानप्रतिबिम्बसूर्यस्य इव जीवपरयोः भेदः। यथा गगनसूर्यप्रतिबिम्बिसूर्ययोः पारमार्थिकभेदाभावेऽपि औपाधिकः कल्पितो भेदः, तथा जीवेशयोरपीति भावः।

## ४.१३ आत्मनः अखण्डार्थत्वम् —

अतीतेऽध्याये (३.५) ''**सत्यं ज्ञानमनन्तं ब्रह्म**[1]'' इति ब्रह्मणः स्वरूपलक्षणं समासेन प्रादर्शि। तमाधारीकृत्य आत्मनोऽखण्डार्थत्वमिह वितन्यते। उक्तस्वरूपलक्षणे त्रीण्यपि पदानि ब्रह्माभिधायकानि सन्ति, तस्माद् घटः कलश इतिवन्नास्ति पर्यायतापत्तिः। अतः सच्चिदानन्दपदानामखण्डार्थत्वमस्ति। तद्धि ग्रन्थकारेण शिष्यमुखाद् एवं प्रश्नमुद्भाव्य समाधानं प्रादर्शि —

> ''**स्वज्ञानानतिरिक्तपूर्णवपुषः सच्चित्सुखाख्या गुणाः**
> **तुल्यास्सर्वशरीरिणामिति वचः सम्यग् न भातीव मे।**
> **सर्वेषां चितिरेकिका यदहमित्येकानुभूतेर्गुरो!**
> **नानन्दस्य तदैक्यमस्ति यदिदं सर्वैर्न विज्ञायते॥**[2]''

१. तै.उ. २.१.१
२. कै.दी. २.१०८



> ''**इत्थं शिष्ये ब्रुवाणे पुनरपि कथयामास चैकप्रसूने**
> **रूपं स्पर्शस्सुगन्धो यदि कुसुमगुणोऽप्येक एकैककेन।**
> **वेद्योऽक्षेणैव यद्वत्परमचितिगुणास्सच्चिदानन्दसंज्ञा**
> **नानावृत्तिस्थभेदैस्स्वयमपि गमिता लौकिकैर्भेदभावम्॥**[1]'' इति।

तत्र तावत् सर्वेषामुपनिषन्महावाक्यानां तात्पर्यमखण्डार्थे ब्रह्मणीति वेदान्तानामाशयः। अतः तत्त्वमसि इत्यादिवाक्योत्थो बोधोऽखण्डार्थः। सम्प्रति अखण्डार्थस्य स्वरूपं विचार्य ब्रह्मलक्षणे तस्य समन्वयं प्रदर्श्यते। ''**खडि भेदने**[2]'' इति धातोः खण्ड इति शब्दो निष्पन्नः। खण्डो नाम भेदः, विशेषः, गुण इत्यनर्थान्तरम्। न विद्यते खण्डो अस्मिन् तद् अखण्डम्। अभिन्नं निर्विशेषं निर्गुणम् अद्वैतमिति पर्यायपदानि भवन्ति। ईदृशानि पदानि ब्रह्मणो विशेषणानि श्रुतिमस्तकवाक्येषु वारं वारं समाम्नातानि। तस्माद् ब्रह्मैव अखण्डमनन्तम् अपरिच्छिन्नमिति व्यवह्रियते। खण्डस्तु भेदः परिच्छेद इति यावत्। स च देशकालवस्तुभेदेन त्रिविधः। वस्तुतः परिच्छेदः सजातीयविजातीयस्वगतभेदरूपेण त्रिविधः। ब्रह्म त्रिविधपरिच्छेदशून्यत्वादखण्डमनन्तमिति।

### ४.१३.१ अखण्डार्थलक्षणम् —

तत्र अद्वैतवेदान्तिभिः द्वेधा अखण्डार्थलक्षणमुच्यते। तद्धि —


(१) अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वम्।

(२) अपर्यायशब्दानाम् एकप्रातिपदिकार्थमात्रप्रमापकत्वं वा अखण्डार्थत्वम्।

पञ्चपादिकाकृद्भिरपि ''**पदानां परस्परानवच्छिन्नार्थानामनन्याकाङ्क्षाणाम् अव्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वयः**[3]'' इति अखण्डार्थलक्षणं प्रतिपादितम्। वाच्यतासम्बन्धेन परस्पराविशेषार्थानाम् अन्योन्यवाच्यवाचकानाम् अपर्यायानां वा अव्यतिरिक्तत्वाद् विशेषणीभूतेन पदार्थान्तरेण अविशेषितत्वाद्वा एकरसं पदार्थान्तरसंसर्गनैरपेक्ष्येण भासमानं यत्तस्य प्रातिपदिकार्थमात्रस्य च अन्वयोऽखण्डार्थत्वमिति तात्पर्यः। अस्याखण्डार्थस्य पदार्थवाक्यार्थभेदेन

१. कै.दी. २.१०९
२. धा.पा. १५८१
३. पं.पा. पृ. ३२३

द्वैविध्यम्। अनन्यशेषाखण्डवाक्यार्थबोधजनकं वाक्यार्थनिष्ठम्, महावाक्यार्थबोधोपयोग्यखण्डवाक्यार्थबोधजनकपदार्थनिष्ठञ्च। एकैकमपि इदं पुनः लौकिकवैदिकभेदेन द्विविधम्। तत्र ''प्रकृष्टप्रकाशः चन्द्रः'' इति लौकिकपदार्थनिष्ठम्। अनेन हि वाक्येन चन्द्रस्वरूपमात्रं बोध्यते। पदार्थनिष्ठं वैदिकमपि द्विधम् — तत्पदार्थनिष्ठं त्वम्पदार्थनिष्ठञ्च। तत्र ब्रह्मस्वरूपमात्रबोधकं ''**सत्यं ज्ञानमनन्तं ब्रह्म**[1]'' इति वैदिकतत्पदार्थनिष्ठाखण्डार्थस्य उदाहरणम्। ''**योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः**[2]'' इति त्वम्पदार्थनिष्ठस्योदाहरणम्। एवं ''सोऽयं देवदत्तः'' इति लौकिकवाक्यार्थनिष्ठम्, ''**तत्त्वमसि**[3]'' इति वैदिकवाक्यार्थनिष्ठम्। एतद्रेखाचित्रेण अधस्तात् प्रस्तूयते -




अखण्डार्थस्य प्रथमलक्षणे संसर्गपदेन पदवृत्तिस्मारितातिरिक्तं विवक्षितम्। तथा च अपर्यायशब्दानां पदवृत्तिस्मारितातिरिक्तागोचरप्रमाजनकत्वम् आद्यलक्षणं पर्यवसितम्। न च ''अप्राप्तयोः प्राप्तिः संयोगः'' इति संयोगलक्षणे अतिव्याप्तिः, तस्य पदवृत्तिस्मारितत्वात्। नापि ''द्विषदन्नं न भोक्तव्यम्'' इत्येतत्परे ''विषं भुङ्क्ष्व'' इति वाक्ये अतिव्याप्तिः। तत्र अनिष्टसाधनत्वसंसर्गस्य पदवृत्त्यस्मारितस्य प्रतिपाद्यत्वात्। द्वितीये लक्षणे एकत्वं प्रातिपदिकार्थस्य एकधर्मावच्छेदेन

१. तै.उ. २.१.१

२. बृह.उ. ४.३.७

३. छा.उ. ६.८.७



वृत्तिविषयत्वम्, न तु एकमात्रव्यक्तित्वम्। तदुक्तं कल्पतरावपि —

''**अविशिष्टामपर्यायानेकशब्दप्रकाशितम्।**
**एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे॥**[1]'' इति।

''**अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वम्**[2]'' इत्यवोचन् चित्सुखाचार्याः। संसर्गपदेनात्र स्वघटकपदवृत्तिस्मारितातिरिक्तं सम्भूयैकार्थप्रतिपादकत्वे सति अपर्यायानेकनामघटितत्वं च विवक्षितम्। तथा च सम्भूय एकार्थप्रतिपादकत्वे सति अपर्यायानेकनामघटितत्वे सति स्वघटकपदवृत्तिस्मारितान्याविषयकप्रमाजनकत्वं वा अखण्डार्थत्वमिति लक्षणं पर्यवसितम्। यथोक्तं तत्त्वप्रदीपिकायां चित्सुखाचार्यैः —

''**संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।**
**उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥**[3]'' इति।

गिराम् अपर्यायशब्दानां या संसर्गानवगाहिनी संसर्गाविषयिणी वा सम्यग्धीः यथार्थज्ञानं तद्धेतुता तज्जनकता प्राचीनैः अखण्डार्थता उक्ता। अखण्डार्थस्य लघुभूतं लक्षणं तावद् गिराम् अपर्यायशब्दानां या तत्प्रातिपदिकार्थता, इयमखण्डार्थता इति। गिरां यः प्रातिपदिकार्थो नामार्थः तत्प्रातिपदिकार्थत्वं तस्य अखण्डार्थत्वम् इत्यर्थः। न च ''गामानय'' इत्यादिवाक्ये तत्प्रादिपदिकार्थत्वस्य सत्त्वात् अतिव्याप्तिरिति वाच्यम्। प्रातिपदिकार्थमात्रपरत्वम् अखण्डार्थत्वम्। प्रातिपदिकार्थो नाम शक्तिलक्षणान्यतराधीनज्ञानविषयः। तन्मात्रविषयत्वं च यद्यपि तदितराविषयज्ञानाजनकत्वे सति तद्विषयकज्ञानजनकत्वं तथापि तद्विषयकत्वांशविवक्षावैफल्याच्छक्तिलक्षणान्यतरज्ञानविषयातिरिक्ताविषयकत्वमखण्डार्थत्वमिति फलति। तथा च यस्माद्वाक्यात् प्रातिपदिकार्थ एव प्रतीयते, न तदन्यार्थः, तद्वाक्यं प्रातिपदिकार्थमात्रपरम्। ''गामानय'' इत्यादिवाक्यं न तथा। ''**तत्त्वमसि**[4]'' इति वाक्ये तु वाक्यघटकतत्त्वप्रातिपदवृत्त्या स्मारितस्य स्वरूपचैतन्यमात्रस्य एव प्रमाजननात् पदवृत्तिस्मारितान्यस्य प्रमानुत्पादाल्लक्षणसमन्वयः।

१. वे.क.व्या. १.१.२

२. त.प्र. पृ. १९२

३. त.प्र. पृ. १९२

४. छा.उ. ६.८.७

एवञ्च तत्त्वमस्यादिवाक्यम् अखण्डार्थनिष्ठम् आत्मस्वरूपमात्रनिष्ठं वा, अकार्यकारणद्रव्यमात्रनिष्ठत्वे सति समानाधिकरणत्वात् तन्मात्रप्रश्नोत्तरत्वात्, सोऽयं देवदत्तः इति वाक्यवद् इत्याद्यनुमानं च तत्त्वमस्यादिवाक्यानाम् अखण्डार्थत्वे प्रमाणम्। उक्तञ्च कल्पतरुकारैः —

''**उपाधिभेदभिन्नार्थो येनैकः प्रतिपाद्यते।**
**तदपि स्यादखण्डार्थं महत्कुम्भं यथा॥**[1]'' इति।

तथैव ''**सत्यं ज्ञानमनन्तं ब्रह्म**[2]'' इत्यादिवाक्यानाम् अखण्डार्थत्वे सत्यादि-वाक्यम्, अखण्डार्थनिष्ठं लक्षणवाक्यत्वात् तन्मात्रप्रश्नोत्तरत्वात्, प्रकृष्टप्रकाशश्चन्द्रः इति वाक्यवद् इत्यनुमानम् प्रमाणम्। ''**ब्रह्मविदाप्नोति परम्**[3]'' इति ज्ञेयतया ब्रह्मण एव निर्दिष्टत्वेन तन्मात्रस्यैव बुभुत्सितत्वान्न तन्मात्रप्रश्नोत्तरत्वम् असिद्धम्। सत्यत्वादिविशिष्टं वाच्यं यद्यपि सखण्डम्, तथापि लक्ष्यम् अखण्डमेव, असत्यत्वादिशङ्कानिवर्त्तनेन पदत्रयस्य सार्थक्यात्। लक्षणं हि क्वचिद्धर्मः, क्वचित्स्वरूपम्। यत्र धर्मः तत्र सखण्डार्थत्वेऽपि, यत्र स्वरूपं तत्र अखण्डार्थत्वे अपि न विरोधः।

वस्तुतः सर्वासु उपनिषत्सु अद्वितीयं ब्रह्मैव प्रतिपाद्यं तत्त्वम्। तत्र विधिरूपाणि प्रतिषेधरूपाणि च वाक्यानि श्रूयन्ते। उभयविधानामपि वाक्यानाम एकवाक्यता विवक्षिताऽस्ति। तत्र ''**आनन्दादयः प्रधानस्य**[4]'' इत्यनेन विधिरूपाणाम्, ''**अक्षरधियां त्ववरोधः...**[5]'' इत्यनेन प्रतिषेधरूपाणाञ्च एकवाक्यता विहिता। ''**तत्तु समन्वयात्**[6]'' इत्यनेन उभयविधानामपि वाक्यानाम् एकवाक्यता सूत्रकृता सूचिता। प्रकृते ''**सत्यं ज्ञानमनन्तं ब्रह्म**[7]'' इति वाक्ये सत्यादीनि पदानि विशेषणानि। ब्रह्मपदं विशेष्यम्। तथा च सत्यं ब्रह्म, ज्ञानं

१. वे.क.व्या. पृ. १२३
२. तै.उ. २.१.१
३. तै.उ. २.१
४. ब्र.सू. ३.३.११
५. ब्र.सू. ३.३.३३
६. ब्र.सू. १.१.४
७. तै.उ. २.१.१



ब्रह्म, अनन्तं ब्रह्मेति चान्वयः। विशेषणानां भेदेऽपि विशेष्ये अखण्डे ब्रह्मणि अभेदः सिध्यति। यतः श्रुतिः अनेकाकारं ब्रह्म न प्रतिपिपादयिषति। ''**एकमेवा-द्वितीयं ब्रह्म**[1]'', ''**एकधैवानुद्रष्टव्यम्**[2]'' इत्यादिवचननिचयप्रामाण्यात्। सति चैवं भिन्नप्रवृत्तिनिमित्तकानाम् एतेषां पदानाम् एकब्रह्मप्रातिपदिकस्वरूपे पर्यवसानादखण्डार्थलक्षणमत्र समन्वेति। तथा हि —

सत्यं ब्रह्म — सत्यमिति विशेषणं असत्याद् ब्रह्म व्यावर्तयति। यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्। त्रिकालाबाध्यत्वं सत्यत्वम्। ब्रह्ममात्रं त्रिकालाबाध्यं सत्यम्। सत्यत्वधर्मविशिष्टं ब्रह्मेति कल्पने अनन्तपदेन विरोधो धर्मधर्मिभावाद्वस्तुतो भेदप्रसक्तिः। अतः ब्रह्मव्यतिरिक्तं सर्वम् असत्यमनृतं मिथ्येति यावत्। तस्माद् असत्यं न ब्रह्म इति पर्यवसितार्थमादाय सत्यं ब्रह्म इत्युक्तम्।

ज्ञानं ब्रह्म — ज्ञानं नाम ज्ञप्तिः, भावसाधनो हि ज्ञानशब्दः। कर्तृकरणादि-व्युत्पत्तिपक्षे अनन्तपदेन सह विरोधः। अतोऽज्ञानादचेतनाद्व्यावृतये ज्ञप्तिवाची ज्ञानशब्द आदर्तव्यः। अज्ञानं न ब्रह्म इति पर्यवसितार्थमादाय ज्ञानं ब्रह्म इत्युक्तम्। ज्ञानपदं चेतनपरं तस्माच्चेतनं ब्रह्म इति फलितार्थः।

अनन्तं ब्रह्म — अनन्तपदं प्रतिषेधरूपम्। देशकालवस्तुरूपं त्रिविधमपि अन्तवत्त्वं वारयति। तस्मात् साक्षाद् ब्रह्मस्वरूपपरम्। न तु तात्पर्यतः। अनन्तं नाम निरतिशयव्यापकं ब्रह्म इत्यर्थः।

एते सत्यत्वादयो धर्मा ब्रह्मस्वरूपा एव, न ब्रह्मणो भिन्नाः। नापि परस्परं परमार्थरूपेण भिन्नाश्च। केवलं कल्पितबौद्धिकवृत्तिभेदेन भिना इव प्रतिभासन्ते। तदुक्तं पञ्चपादिकायाम् —

''**आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः।**
**अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते॥**[3]'' इति।

अपि च सङ्क्षेपशारीरकेऽपि —

१. छा.उ. ६.२.१
२. बृह.उ. ४.४.२०
३. पं.पा. २३

**''सत्येप्यस्ति ज्ञानता ज्ञानतायाम् । सत्यत्वं च स्पष्टमस्त्येव तद्वत् ॥**
**आनन्दत्वे ज्ञानता ज्ञानतायाम्, आनन्दत्वं विद्यते निर्विशङ्कम् ॥**
**आनन्दत्वे सत्यता सत्यतायाम् आनन्दत्वं निर्विवादं प्रसिद्धम् ॥**
**सत्यप्येवं नातिरेवावकाशः पूर्ण तत्वे सत्यसौख्योपपत्तेः ॥**[1]''

इत्यादिपद्यैः सत्यत्वादीनाम् अपृथक्त्वं प्रावाचि। तथा च मायाप्रयुक्तनाना-कारनिवृत्तिद्वारा अखण्डब्रह्मस्वरूपमात्रप्रतिपादने तात्पर्यवन्ति सत्यादीनि पदानि। अतः वृत्तिकाले अनेकाकारं ज्ञानं समुत्पाद्य तात्पर्यतः अखण्डं ब्रह्मस्वरूपं प्रत्यगभिन्नम् अनुभावयन्ति। यथा लोके ''प्रकृष्टप्रकाशश्चन्द्रः'' इत्यत्र प्रकृष्टपदेन अप्रकृष्टानां खद्योतादीनां, प्रकाशपदेन अप्रकाशात्मकान्धकारस्य च व्यावृत्तिः क्रियते, तथैव ''**सत्यं ज्ञानमनन्तं ब्रह्म**[2]'' इति वाक्यम् अनृतजडदुःखभ्रान्ति-निवृत्तिद्वारा लक्ष्ये ब्रह्मणि पर्यवस्यति। यदाहुः तैत्तिरीयभाष्यवार्तिके वार्तिककाराः —

**''प्रतिपद्यपदार्थं हि विरोधात्तद्विरोधिनः ।**
**पश्चादभावं जानाति वध्यघातकवत्पदात् ॥**
**शब्दात्प्रतीयते तावत्सङ्गतिर्धर्मधर्मिणोः ।**
**मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः ॥**
**तत्रानन्तोऽन्तवद्वस्तु व्यावृत्यैव विशेषणम् ।**
**तद्विरोध्यर्थसन्त्यागः सामर्थ्यात् स्यान्न शब्दतः ॥**[3]'' इति।

यथा मूषकविभूषितां भूमिं दृष्ट्वा मार्जाराभावो निश्चीयते एवं सत्यादि-पदश्रवणात् अनन्तपदसान्निध्यात् असत्यादिस्वरूपं न ब्रह्मेति अर्थाद् इतरव्यावृत्तिः सम्पद्यते। तस्मात् ''**सत्यं ज्ञानमनन्तं ब्रह्म**[4]'' इति लक्षणवाक्यम् अखण्डार्थपरम्, संसर्गागोचरं प्रमाजनकमिति सिद्धम्।

एतावता पदनिष्ठाखण्डार्थस्वरूपं विवेचितम्। इदानीं वाक्यनिष्ठाखण्डार्थं

१. सं.शा. १.१८६-१८८
२. तै.उ. २.१.१
३. तै.वा. २.१.६६-६८
४. तै.उ. २.१.१



तत्स्वरूपं च समासेन विव्रियते। तत्र लौकिकं वाक्यं सोऽयं देवदत्तः इति। वैदिकं वाक्यं तत्त्वमसि इत्यादिकम्। उभयोरपि अखण्डार्थरूपः शाब्दबोधः समान एव। लौकिकवाक्ये अखण्डं देवदत्तस्वरूपं विवक्षितम्। वैदिके अखण्डं चैतन्यस्वरूपं विवक्षितम्। तस्माद्वेदान्तग्रन्थेषु सर्वत्र तत्त्वमसिवाक्यनिरूपणावसरे सोऽयं देवदत्त, सोऽयं पुमान् इत्यादिवाक्यमेव वेदान्ताचार्या दृष्टान्तीचक्रुः। अत्र वाक्यद्वयेऽपि सम्बन्धत्रयेण अखण्डार्थबोधो भवतीति प्राचाम् अभिप्रायः। तत्र सम्बन्धत्रयं नाम —

(१) पदयोः सामानाधिकरण्यम्।

(२) पदार्थयोः विशेष्यविशेषणभावः।

(३) स्वरूपयोः लक्ष्यलक्षणभावश्चेति।

तथा चोक्तं नैष्कर्म्यसिद्धौ —

**''सामानाधिकरण्यञ्च विशेषणविशेष्यता ।**
**लक्ष्यलक्षणसम्बन्धः पदार्थः प्रत्यगात्मनाम् ॥**[1]'' इति।

### ४.१३.२ सामानाधिकरण्यम् —

तत्र भिन्नप्रवृत्तिनिमित्तकयोः पदयोः एकस्मिन्नर्थे प्रवृत्तिः सामानाधिकरण्यम्। तच्चतुर्विधम् —

(१) **अभेदे सामानाधिकरण्यम् —** ''सोऽयं देवदत्तः'', ''तत्त्वमसि'' इत्युदाहरणम्।

(२) **अध्यासे सामानाधिकरण्यम् —** ''अयं सर्पः'', ''इदं रजतम्'' इत्युदाहरणम्।

(३) **बाधायां सामानाधिकरण्यम् —** ''यश्चौरः स स्थाणुः'', ''अहं ब्रह्मास्मि'' इत्युदाहरणम्।

(४) **विशेषणविशेष्यभावे सामानाधिकरण्यम् —** ''नीलमुत्पलम्'', ''सत्यकाम'' इत्युदाहरणम्।

१. नै.सि. ३.३

प्रकृते ''सोऽयं देवदत्तः'', ''तत्त्वमसि'' इति वाक्ये च अभेदेन सामानाधिकरण्यं विवक्षितम्। तथा च ''सोऽयं देवदत्तः'' इति वाक्ये ''सः'' इति तत्पदस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तम्, एतत्कालैतद्देशवैशिष्ट्यम् ''अयम्'' इति पदस्य प्रवृत्तिनिमित्तम्, तयोः भिन्नप्रवृत्तिनिमित्तयोः सोऽयं शब्दयोः एकस्मिन् देवदत्तपिण्डे तात्पर्यसम्बन्धः सामानाधिकरण्यमित्यर्थः। तथैव ''तत्त्वमसीति'' वाक्येऽपि परोक्षत्वसर्वज्ञत्वादिवैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तम्, अपरोक्षत्वकिञ्चिज्ज्ञत्वादिवैशिष्ट्यं त्वम्पदप्रवृत्तिनिमित्तम्। तथा च भिन्नप्रवृत्ति-निमित्तयोः तत्त्वम्पदयोः असीति पदेन एकस्मिन् शुद्धे चैतन्ये तात्पर्यबोधनात् सामानाधिकरण्येन दृष्टान्तदार्ष्टान्तिकयोः अखण्डार्थपरत्वं समानम्।

### ४.१३.३ विशेषणविशेष्यभावसम्बन्धः —

पदार्थयोः विशेषणविशेष्यभावसम्बन्धेन अखण्डार्थस्तु एवम्भवति — व्यावर्तकं विशेषणम्, व्यावर्त्यं विशेष्यम्। ''सोऽयं देवदत्त'' इति वाक्ये अयमेव सः नान्यः, स एवायं नान्यः इत्येवं प्रतीतिर्भवति। अर्थाद् एतद्देशकाल-सम्बन्धविशिष्टो देवदत्तपिण्डः, तद्देशकालविशिष्टाद् देवदत्तपिण्डाद्भिन्नो न इति यदा प्रतीयते, तदा तच्छब्दार्थस्य अयंशब्दवाच्यार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वम्, अयंशब्दार्थस्य व्यावर्त्यत्वाद् विशेष्यत्वम्। यदा च स इति तच्छब्दवाच्याद् एतत्कालैतद्देशसम्बन्धविशिष्टाद् अस्मात् देवदत्तपिण्डात् न भिद्यत इति यदा प्रतीयते, तदा अयंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वम्, तच्छब्दार्थस्य व्यावर्त्यत्वाद् विशेष्यत्वम्। तथा च ''अयमेव सः'', ''स एवायम्'' इत्यन्योन्यभेदव्यावर्तकतया सोऽयं शब्दार्थयोः परस्परं विशेषणविशेष्यभावः इत्यर्थः।

एवं तत्त्वमसीति वाक्येऽपि व्यवच्छेद्यव्यवच्छेदकभावसम्बन्धेन अखण्डार्थ-बोधो भविष्यति। तथा हि त्वम्पदवाच्यं यदपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टचैतन्यं तत्पदवाच्यात् सर्वज्ञत्वादिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा तच्छब्दार्थस्य त्वम्पदार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वम्, त्वम्पदार्थस्य व्यावर्त्यत्वाद् विशेष्यत्वम्। तथा च तत्पदवाच्यं यत्सर्वज्ञत्वादिविशिष्टचैतन्यं तत् त्वम्पदवाच्यात् किञ्चिज्ज्ञत्वादिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा त्वम्पदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन विशेषणत्वं तत्पदार्थस्य व्यावर्त्यत्वेन



विशेष्यत्वम्। तथा च ''त्वं तदसि'', ''तत्त्वमसि'' इति तत्त्वम्पदार्थयोः परस्परव्यावर्तकत्वेन परस्परविशेषणविशेष्यभावेन तत्त्वम्पदयोरभेदो बुध्यते। अयमभेदोऽखण्डार्थस्वरूपो मुख्याभेदत्वात्।

### ४.१३.४ लक्ष्यलक्षणभावसम्बन्धः —

असाधारणधर्मप्रतिपादकं वाक्यं लक्षणम्, तत्प्रतिपाद्यम् अविशिष्टं वस्तु लक्ष्यम्। मुख्यार्थबाधे लक्षणा प्रवर्तते। सा च जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा इति भेदेन त्रिधा प्रपञ्चिता वेदान्तशास्त्रे। प्रकृते जहदजहल्लक्षणा दृष्टान्तदार्ष्टान्तिकयोः सम्मता। तथा च ''सोऽयं देवदत्तः'' इत्यस्मिन् वाक्ये ''सोऽयं देवदत्त'' इत्यत्र परस्परविरुद्धदेशकालवैशिष्ट्यबोधकयोः सोऽयं पदयोः अभेदः प्रत्यक्षप्रमाणबाधितः। तत्रापि न सर्वात्मना विरोधः, देवदत्तस्वरूपस्य उभयत्र समानत्वात्। भागशः विरोधे सर्वात्मना परित्यागो न युज्यते। तस्मादभेदानुभवविरोधात् स इति तत्पदेन परोक्षदेशकालवैशिष्ट्यं परित्यज्य देवदत्तस्वरूपमात्रं परिगृह्यते। एवम् ''अयम्'' इति एतत्पदेन अपरोक्षदेशकाल-वैशिष्ट्यं विहाय देवदत्तस्वरूपमात्रं स्वीक्रियते। तथा च सोऽयं पदयोः अविरुद्धदेवदत्तस्वरूपमात्रेण अभेदो अभ्युपगम्यते। अत्र देवदत्तपिण्डतद्वाचक-पदयोः लक्ष्यलक्षणभावसम्बन्धः। अखण्डं देवदत्तस्वरूपमात्रम् अनेन सम्बन्धेन अवगम्यते तस्मादिदं वाक्यमखण्डार्थपरम्।

दार्ष्टान्तिके लक्षणसमन्वयं पश्यामः — ''तत्त्वमसि'' वाक्येऽपि सर्वज्ञा-सर्वज्ञत्वपरोक्षत्वापरोक्षत्वसंसारित्वासंसारित्वरूपादिपरस्परविरुद्धधर्मविशिष्टयोः जीवेश्वरयोरभेदाभ्युपगमे प्रत्यक्षादिप्रमाणबाधः। षड्विधतात्पर्यलिङ्गोपेता अद्वैतश्रुतिरपि अन्यथा नेतुं न शक्या। तस्मात् सर्वात्मना परित्यागो वा स्वीकारो वा कर्तुमशक्यः। तथा च जहदजहल्लक्षणैव शरणीकरणीया। प्रमाणान्तर-विरोधपरिजिहीर्षया तत्पदेन सर्वज्ञत्वादिवैशिष्ट्यं विहाय चैतन्यस्वरूपमात्रं स्वीक्रियते। एवमेव त्वम्पदेनापि किञ्चिज्ज्ञत्वादिकं विहाय चैतन्यमत्र गृह्यते। सति चैवं चैतन्यस्वरूपमात्रलक्ष्ययोः अभेदः सुलभः। औपनिषत्तत्त्वविद्भिः सत्तायास्त्रैविध्यमभ्युपगम्य ब्रह्मात्मैक्यस्य पारमार्थिकत्वं व्यवस्थापितमस्ति। प्रमाणप्रमेयव्यवहारस्य व्यावहारिकसत्यत्वं ब्रह्मज्ञानबाध्यत्वं कल्प्यते। शुक्ति-रजतादीनां प्रातिभासिकत्वं सत्त्वमिति न केनापि प्रमाणेन विरुध्यते। श्रुतिराशयोऽपि

सामञ्जस्यमुपैति। एवम्प्रकारेण तत्त्वमस्यादिवाक्येषु भागशः परित्यागेन अविरुद्धांशास्य स्वीकारेण अखण्डार्थपरत्वनिरूपणं भागत्यागलक्षणा इति प्राज्ञाः प्राहुः। तदुक्तम् —

> ''**तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।**
> **सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा॥**[१]'' इति।

एवं प्रदर्शितरीत्या अन्येषां महावाक्यानां लौकिकवाक्यानाञ्च संसर्गागोचर-प्रमितिजनकत्वरूपम् अखण्डार्थत्वलक्षणं योजनीयम्।

एतच्च सम्बन्धत्रयं न परस्परस्वातन्त्र्येण, अपि तु मिलित्वा अखण्डार्थं बोधयति। तत्र प्रथमतः सामानाधिकरण्यज्ञानम्, तदनु विशेषणविशेष्यज्ञानम्, ततो लक्षणया विरोधनाशे सति अखण्डार्थो भासते इति क्रमः। तथा चोक्तं सङ्क्षेपशारीरके —

> ''**सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः**
> **पश्चादेव विशेषणेतरतया पश्चाद्विरोधोद्भवः।**
> **उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मके**
> **सर्वैरेव ततः पदैरयमिह ज्ञेयः क्रमः सूरिभिः॥**[२]'' इति।

प्रथमं पदयोः समानविभक्तिकत्वनिश्चयः। अयमेव तात्पर्यविषयशाब्दबोधं प्रति प्रयोजकः। ततः भिन्नधर्मविशिष्टयोः अभेदज्ञानम्। ततः तादृशाभेदज्ञानस्य अप्रमात्वनिश्चयेन तात्पर्याविषयत्वज्ञानम्। ततः निर्विशेषचैतन्याखण्डार्थबोधः।

## ४.१४ आनन्दमीमांसा —

''**ब्रह्मविदाप्नोति परम्**[३]'' इति श्रुत्या सर्वमुमुक्षुजनप्रवृत्तिनिमित्तात्यन्त-निश्श्रेयसावाप्तिः सर्वोपनिषत्तात्पर्यत्वेन प्रतिपाद्यते। तत्र ''**अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते बृहतेर्धातोरर्थानुगमात्**[४]''

१. पं.द. ७.७४
२. सं.शा. १.१८९१
३. तै.उ. २.१
४. ब्र.सू.शां.भा. १.१.१



इति भगवत्पादवचनानुसारेण ब्रह्मशब्देन नित्यशुद्धबुद्धमुक्तस्वभावमेकमेवाद्वितीयं परं ब्रह्माभिधीयते। ब्रह्म वेत्ति मनसा साक्षात्करोतीति ब्रह्मवित्। न च ''**यतो वाचो निवर्तन्ते अप्राप्य मनसा सह**[१]'' इति श्रुत्या परं ब्रह्म मनसोऽगोचरमेव इति वाच्यम्। तत्र ब्रह्मणो घटादिवत्तदाकाराकारितबुद्धिवृत्तिजन्यफलव्याप्यत्वमेव अनया श्रुत्या निवार्यते। ''**मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन**[२]'' इति ह्यन्यत्र समाम्नायते। अस्यां श्रुतौ मनसैवेत्यवधारणया चक्षुरादिबाह्यदृष्टिर्व्यावर्त्यते। अनुशब्दबलेन यच्छास्त्रप्रतिपादितं ब्रह्म तदेवानुसृत्यान्तर्दृष्ट्या वेदनीयमिति अवबुध्यते। स्वयम्प्रकाशमपरोक्षं ब्रह्म। तथापि तस्मिन् परोक्षभ्रमोऽस्तीति तन्निवृत्त्यर्थं प्रत्यगात्मनस्तस्य तादात्म्यं बोध्यते। ''**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः**[३]'', ''**य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वमभवत्**[४]'', ''**यो वेद निहितं गुहायाम्**[५]'' इत्यादिभिः श्रुतिभिः। प्रत्यगात्मनस्त्वपरोक्षत्वम् अपण्डितानामप्यहमिति मानसप्रत्यक्षेण स्पष्टमेव। देहादिपञ्चकोशेभ्यो विविक्तं प्रत्यगात्मतादात्म्येन गम्यमानं ब्रह्मापरोक्षं मनसाऽवगम्यते।

ननु ''**यन्मनसा मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते**[६]'' इति श्रुतेर्ब्रह्मणो मनसाऽवगतत्वमेव निषिध्यते इति चेन्न। नास्यां श्रुतौ ब्रह्मणो मनोविषयत्वं निषिध्यते। ''**ब्रह्म त्वं विद्धि**[७]'' इति ब्रह्मणो विदिक्रियायाः कर्मत्वोक्तेः इति मन्त्रस्यास्याभिप्रायः। स्वप्रकाशमपरोक्षं साक्षिचैतन्यं देहादिपञ्चकोशेभ्यो विविच्य साक्षात्कर्तुं न हि विचारचतुरेतरः प्रभवति। किं तु तेन मनः प्रकाशितं भवतीति स मन्यते। तदेवान्तःकरणावभासकं साक्षिचैतन्यं ब्रह्म इत्यवगन्तव्यम्। तत्साक्षात्कारासमर्था मन्दधियः स्वातिरिक्ततया प्रतीयमानं शास्त्रप्रसिद्धं ब्रह्मोपासते। नैतदुपास्यमुपाधिविशिष्टं मुख्यं ब्रह्म भवति। तथा च श्रुतिः ''**यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा।**

१. तै.उ. २.४
२. कठ.उ. २.१.११
३. तै.उ. २.१
४. बृह.उ. १.४.१०
५. तै.उ. २.१
६. के.उ. १.५
७. के.उ. १.५

**यत्रान्यत्पश्यत्यन्यच्छ्रुणोत्यन्यद्विजानाति तदल्पम्, यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यं स भगवस्तस्मिन् प्रतिष्ठित इति स्वे महिम्ना**[१]'' इति। तथापि साक्षिचैतन्यं ब्रह्मेत्युपासनायां साक्षिचैतन्ये व्याप्यमाना चित्तवृत्तिपरम्परा-ऽऽत्मब्रह्मणोर्भेदकारणीभूतामविद्यामपाकरोति। तथा सति आत्मब्रह्मैक्यरूपा धीवृत्तिर्महावाक्यविषयसम्बन्धादेव जायत इति वाक्यजन्यं ज्ञानमप्यपरोक्षमेव। यथा बहिर्मुखः पुरुषोऽनवच्छिन्नध्यानप्रवणेन चित्तैकाग्र्येण बहिर्वस्तुनिरूपणे समर्थो भवति तथा प्रत्यगात्माकाराकारिका बुद्धिवृत्तिरपास्तसर्वभेदभ्रमा ब्रह्मसाक्षात्कृतवती भवति। एकमेव वस्तु ब्रह्मेति शास्त्रेण प्रतिपाद्यते। आत्मेति मानसप्रत्यक्षत्वमेति। एवञ्च पदद्वयोपपादिताखण्डैकरसे परब्रह्मण्यपरोक्षज्ञानसिद्धस्तथाविधज्ञानोपेतो ब्रह्मविदत्युच्यते। सः परं निरतिशयं तदेव ब्रह्म ज्ञात्वा ब्रह्मैव भवतीत्यर्थः। अयञ्च ब्रह्मविद् ब्रह्मानन्दस्वरूपो भवति।

एवञ्च आनन्दोऽपि ब्रह्मणः स्वरूपभूतं लक्षणान्तरम्। अतः ब्रह्म आनन्दस्वरूपमिति वेदान्ता आमनन्ति। शास्त्रेषु सुखशब्देनाप्ययं व्यवह्रियते। किन्तु लोके तत्तदिन्द्रियसम्बन्धिनाम् अपेक्षितविषयाणां प्राप्तौ आनन्दो भवतीति प्रसिद्धम्। एवं सति आनन्दः कथमात्मनः स्वरूपं भवितुमर्हतीति जिज्ञासा भवति। तदर्थं पञ्चदश्यामात्मानन्दप्रकरणं विलोकनीयम्। तथा हि बृहदारण्यकोपनिषदि मैत्रेयीं प्रति अमृतत्वसाधनमुपदिदिक्षुः याज्ञवल्क्यः ''**न वा अरे ! पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति**[२]'' इत्युपक्रम्य जायापुत्रादीनां सर्वाषामपि व्यक्तीनामात्मार्थतयैव प्रियत्वमुपदिदेश। तत्रोक्तानाम् उपलक्षणतया सर्ववस्तुपरत्वात् सर्वमपि आत्मार्थमेव प्रियमिति तत्र बोधयामास। अपि च श्रुतिरपि भवत्यस्मिन्नर्थे — ''**न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति**[३]'' इति। तथा हि लोके पतिजायापुत्रादय आत्मनः प्रिया इति प्रसिद्धम्। पत्यादयः पत्न्यादीनाम् आत्मार्थमेव प्रिया भवन्ति। स्वोपकारकत्वादेव आत्मा तेषु प्रीतिं दर्शयति। यदा पत्न्याः पत्यौ इच्छा भवति, तदा सा भर्तारं प्रीणयति। तदा पतिः क्षुदनुष्ठानरोगादिभिः

१. छा.उ. ७.२४.१
२. बृह.उ. ४.५.६
३. बृह.उ. ४.५.६



युक्तश्चेत् तां न कामयत इति हि लोकप्रसिद्धिः। तेन पत्यौ पत्न्या दर्शिता प्रीतिः न पत्युः स्वार्थाय, किन्तु पत्न्या एवेति ज्ञायते। एवमेव दृष्टान्ततया उपात्तेषु सर्वेषु, अन्येषु च प्रियत्वेन प्रतीतेषु क्रियमाणा प्रीतिरात्मार्था एव।

जायापतिवित्तपश्वादिषु यत्प्रेम प्रदर्श्यते तत्प्रेम आत्मनः प्रयोजनायैव। एवम्प्रकारेण आत्मनि यत्प्रेम दृश्यते तदन्यप्रयोजनाय न। एवं जायापतिवित्त-पश्वादीनां प्रियत्वेऽपि यदर्था सा प्रीतिः स आत्मा अतिप्रियः। वैषयिके सुखे जायमाना प्रीतिः सातिशया सोपाधिकी च। आत्मनि तु निरतिशया निरुपाधिकी च प्रीतिर्भवति। न हि सा पत्यादाविव अन्यप्रयुक्ता भवति। ''**आत्मनस्तु कामाय सर्वं प्रियं भवति**[१]'' इति श्रुतेः। लोके सर्वोऽपि जनः ''अहं सर्वदा भूयासम्, कदापि मम असत्त्वं न भूत्'' इति प्रार्थयते। स चात्मा अव्यभिचरित-प्रीतिविषयः। वैषयिके सुखे जायमाना प्रीतिः व्यभिचरति। तस्मान्निरुपाधिक-निरतिशयप्रीतिविषयः आत्मा प्रियतमः, पुत्रादयस्तु तस्यैव शेषभूताः। तथा च श्रुत्यन्तरं ''**तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा**[२]'' इति।

अतः आत्मनि दृश्यमानं यत्प्रेम तत्परमं निरतिशयं भवति। निरतिशयत्वं च प्रेमान्तरा प्रयोज्यत्वम्। आत्मनि प्रेम प्रेमाऽन्तराप्रयोज्यम्। दारादिषु प्रेम तु आत्मप्रेमप्रयोज्यम्। तेनाऽऽत्मनः परमानन्दता। आत्मन्यनुभूयमानं प्रेम प्रयोजनान्तरानपेक्षि, अन्यत्र तु आत्मप्रेमापेक्षि। अतः परमप्रेमास्पदत्वेन आत्मन एव निरतिशयसुखानन्दत्वमिति भावः। यो हि विषयो निरतिशयप्रेमविषयः, स परमानन्दरूप इत्यन्वयदृष्टान्तो नास्ति। किन्तु, यः परमानन्दरूपो न भवति स न निरतिशयप्रेमविषयः, यथा घटादिः इति व्यतिरेकिदृष्टान्तो ज्ञातव्यः। तदुक्तं पञ्चदश्याम् —

> ''**इयमात्मा परानन्दः परप्रेमास्पदं यतः।**
> **मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते॥**[३]'' इति।

१. बृह.उ. ४.५.६
२. बृह.उ. १.४.८
३. पं.द. १.८

कैवल्यदीपिकाकारेणापि विषयोऽयम् एवमकथ्यत —

''**स्यात्प्रीतिर्विषये परन्निजसुखे स्यात्प्रेम भूयस्तरां**
**व्यत्यस्तं विषये सुखन्निजसुखं व्यत्येति न क्वापि च ।**
**मोक्तुं भोक्तुमपि क्षमो हि विषयो नात्मा तथा शक्यते**
**त्यक्ता यो विषयान्स केन हि परित्यक्तुं पुनश्शक्यते ॥**[1]'' इति ।

एवं युक्तिभिरपि आत्मनः परमानन्दरूपत्वं ज्ञातुं शक्यते । श्रुतिषु विषयोऽयं शोश्रूयते । तथा च श्रुतयः ''**को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्**[2]'', ''**विज्ञानमानन्दं ब्रह्म**[3]'', ''**आनन्दो ब्रह्मेति व्यजानात्**[4]'', ''**रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति**[5]'' इत्यादयः । न च श्रुतिषु आनन्दशब्दो दुःखाभावरूप इति वाच्यम् । भावरूपब्रह्मशब्दसामानाधिकरण्यात् । अपि च आत्मनः आनन्दरूपत्वं सुषुप्त्यवस्थापरिशीलनेनापि ज्ञातुं शक्यते । तथा हि जाग्रदवस्थायाम् इन्द्रियजन्यं ज्ञानं प्राप्य तदनुरूपाणि कर्माणि जीवः अनुतिष्ठति । यद्यपि तत्र सुखमपि प्राप्नोति, तथापि तद्वैषयिकं सुखं दुःखानुविद्धमनित्यश्च भवति । एवं स्वप्नावस्थायामपि जाग्रद्वासनाजन्या विषयानुभूतिः जायते । तत्समये इन्द्रियाणाम् उपरतावपि मनस्तदानीं कार्यं करोति । एवमवस्थाद्वये अन्तःकरणोपाधिकतया श्रान्तो जीवो विश्रान्तये सुषुप्तिं गच्छति । तत्र उपाधिम् औपाधिकमभिमानं च त्यक्त्वा, स्वाभाविकं स्वस्वरूपं ब्रह्म प्राप्य सुखी भवति । यद्यपि तदानीमेव अहं सुखी इति विशिष्टानुभवो न जायते, तथापि एतावन्तं कालं सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति उत्थितस्य परामर्शो भवति । स च परामर्शः सुषुप्तिकाले सुखानुभवं गमयति, अनुभवं विना तत्स्मरणासम्भवात् ।

सुषुप्त्यवस्थायां सुखसद्भावः सदृष्टान्तं श्रुतिषु प्रतिपादितम् । तथा हि छान्दोग्योपनिषदि विषयोऽयं शकुनिदृष्टान्तेन वर्णितः । तत्र ''**स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयत**

१. कै.दी. २.११७
२. तै.उ. २.७
३. बृह.उ. ३.९.२८
४. तै.उ. ३.६
५. तै.उ. २.७



**एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते प्राणबन्धनं हि सोम्य मनः**[1]'' इति । अस्मिन् श्रुतिवाक्ये मनःप्राणशब्दौ क्रमशो जीवब्रह्मपरौ । यथा आदर्शे प्रतिबिम्बितः पुरुष आदर्शापनये सति बिम्बभूतः पुरुष एव भवति, एवमन्तःकरणे प्रतिबिम्बितो जीवः अन्तःकरणोपाधौ उपरतायां सत्यां स्वस्वरूपं ब्रह्मैव भवति । यथा सूत्रबद्धस्य पक्षिणः हस्तरूपं बन्धनस्थानमेव आश्रयः, तथा जीवस्य ब्रह्मैवाश्रयः, अस्य स्वरूपत्वात् ।

पञ्चदश्यां ब्रह्मानन्दविद्यानन्दविषयानन्दभेदेन त्रिविधः आनन्दः उक्तः । तदनु ब्रह्मानन्द पुनः योगानन्दऽऽत्मानन्दाऽद्वैतानन्दभेदेन त्रिधा विभक्तः । वृत्तिरहितावस्थायामनुभूतः आनन्दो ब्रह्मानन्दः । वृत्तिप्रवाहेऽपि सुखमनुभूयते । तत्र ब्रह्मज्ञानेन प्राप्तं सुखं विद्यानन्दः । भौतिकविषयसंस्पर्शेन विषयाकारवृत्त्याऽनुभूतं सुखं विषयानन्द इति । कैवल्यदीपिकाग्रन्थकारेणापि ब्रह्मानन्दः, वासनानन्दः, विषयानन्दश्चेति त्रिविधः आनन्दः इत्यनूद्य प्रकारान्तरेण अष्टधा आनन्दः इति प्रकीर्तितः । तथा हि —

''**मान्यानां मान्यपादाम्बुजगुरुचरणानन्दाः कतीत्युच्यते**
**ब्रह्मानन्दस्तथैकः परमचितिमयो वासनानन्द एकः ।**
**अन्यश्शब्दादिकोत्थं कतिचन कथयन्त्यष्टधैतेषु पश्चा-**
**प्यन्ये लीना इतीत्थं पुनरिह कथयाम्यष्टधाऽऽनन्दभेदान् ॥**[2]''

इत्यत्र इन्द्रियैरर्थावगतिसमये विषयानुभवाज्जातः सुखादिसाक्षात्कारो भोगो विषयानन्दः । स च विषयानन्दः कैवल्यदीपिकायां ग्रन्थकारेण एवमलिख्यत —

''**जाग्रत्कालशुचोपनोदविधये सम्यक् शयित्वैकदा**
**शय्यायां पुरुषस्य सुप्तिसमये ह्यन्तर्मुखे चेतसि ।**
**छायायां प्रतिबिम्बिता निजचितेरानन्दरूपात्र तां**
**वत्सेमां सुखकोविदास्तु विषयानन्दं समाचक्षते ॥**[3]'' इति ।

सुषुप्त्यवस्थायां यदा बाह्यमान्तरं वा विषयं नावगच्छति तदा यत्सुखं ''सुखमहम्

१. छा.उ. ६.८.२
२. कै.दी. २.१२२
३. कै.दी. २.१२४

अस्वाप्सम्'' इति स्मरणादवगम्यते स ब्रह्मानन्दः। तत्समये ''**सोम्य तदा सम्पन्नो भवति**[१]'' इत्यादिश्रुतिप्रदर्शितब्रह्मतादात्म्यसम्भूतः आनन्दो ब्रह्मानन्दः।[२] स एकोऽपि ब्रह्मानन्दो मनुष्यादारभ्य हिरण्यगर्भपर्यन्तेषु भेदेन अभिव्यज्यते। आनन्दस्य ब्रह्मस्वरूपतया स्वाभाविकत्वप्रदर्शनार्थम् ''**सैषाऽऽनन्दस्य मीमांसा भवति**[३]'' इत्यनया श्रुत्या तैत्तिरीयश्रुतिः आनन्दमीमांसामवतारयामास। तद्यथा सर्वबाह्याध्यात्मिकसाधनसम्पन्नस्य सार्वभौमस्य य आनन्दः, स एकः प्रकृष्टो मानुषानन्दः। स एव शतगुणितो मनुष्यगन्धर्वाणामानन्दः। एवमेव पित्रानन्दादिषु उत्तरोत्तरं शतगुणोत्कर्षं वर्णयित्वा श्रुत्या ''**स एको ब्रह्मण आनन्दः**[४]'' इति हिरण्यगर्भानन्दस्य परमोत्कर्षो वर्णितः। एवं सातिशयमानन्दं निरूप्य ''**स यश्चायं पुरुषे, यश्चासावादित्ये स एकः**[५]'' इति देवमनुष्यादिषु सर्वत्र विद्यमानो ब्रह्मानन्दः एक एकरूपश्चेति निर्णीतः।

अत्रायं प्रश्नः — सम्प्रसादे ''**यत्र नान्यत् पश्यति**[६]'' इत्युक्तलक्षणः परमात्मनेनैकतां लब्ध्वापि कर्मपाशपरिवेष्टितोऽवस्थान्तारगामी जीवः किमर्थं संसारितां प्राप्नोति इति चेत्। उच्यते — सम्प्रसादावस्थायाः तस्य पुनरागमनस्य हेतुः पूर्वजन्मकृतं कर्मैव अविद्यासचिवं ब्रह्मतां वियोजयति, परमानन्दभावं श्लथयति। एवञ्च सम्प्रसादावस्थाया उत्थेन निजसुखलहरीमपरित्यजता बाह्यदृष्टौ आसक्तेन यत्सुखं प्राप्यते तत्सुखं वासनानन्दः इति कथ्यते। आनन्दोऽयं कैवल्यदीपिकायामेवम् अलिख्यत ग्रन्थकारेण —

> ''**ऐक्यं लब्ध्वापि भूम्ना सह पशुरयते किं पुनर्जीवतां चेत्**
> **व्याख्यास्ये पूर्वकर्म श्लथयति परमानन्दभावं हि जन्तोः।**
> **पश्चादुत्थेन सुप्तेर्निजसुखलहरी नोज्झिता बाह्यदृष्टौ**
> **नासक्तेनाप्य ते यत्सुखमिदमुदितं वासनानन्दसंज्ञम्॥**[७]'' इति।

---

१. छा.उ. ६.८.१
२. द्रष्टव्यम् - कै.दी. २.१२५-१२६
३. तै.उ. २.८.१
४. तै.उ. २.८.४
५. तै.उ. २.८.५
६. छा.उ. ७.२४.१
७. कै.दी. २.१२९



यत्तु सर्वानुस्यूतं सनातनं सुखं तद् आत्मानन्द इत्यभिधीयते। यतो हि सर्वोऽप्यानन्दः ''**एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति**[१]'' इति श्रुत्युक्तदिशा ब्रह्मानन्दस्य मात्रैवेति। कैवल्यदीपिकाकृता मुख्यानन्दस्य लक्षणद्वयम् उक्तम्। तद्धि ''**योगोत्थं निर्विकल्पसमाध्याविर्भूतं मुख्यानन्दः, यद्वा सम्प्रज्ञातासम्प्रज्ञातादियोगोत्थं सौख्यं वा मुख्यानन्दः**[२]'' इति। यदा श्रवणाद्यभ्यासेन निर्गताऽहम्भावदोषस्य निरस्तसमस्तवासनस्य त्यक्तनिद्राव्यामोहस्य आन्तर्बाह्यविषयदर्शनहीनस्य यत् सुखमन्तर्भाति तत्सुखं मुख्यानन्द इति विद्वांसः सङ्गीरन्ते। ''**उदासीनावस्थासम्भूतं यत् सुखन्निजानन्दः**[३]'' इति निजानन्दस्य लक्षणं कैवल्यदीपिकायाम्। जाड्यनिद्रामुक्तस्य विगताशेषचिन्तस्य अहङ्कारममकारवासनारहितस्य यस्य कस्यापि पुरुषस्य यदौदासीन्यं ताटस्थ्यं सुखं तदेव निजानन्द इति नामाऽभिहितम्। यथाऽभाणि कैवल्यदीपिकाकारेण —

> ''**देहाहन्ता हि जन्तोर्जनयति सुदृढं क्लेपशमात्मीयसौख्यं**
> **दूरापास्तं करोति प्रदिशति विमला मध्यमास्था हि मौनम्।**
> **निर्निद्रस्यापि कस्य प्रभवति विगताशेषचिन्तस्य पुंसः**
> **त्वौदासीन्यं सुखं यन्मुनिभिरभिहितं तन्निजानन्दनाम॥**[४]'' इति।

परिपूर्णब्रह्मावगत्या सम्भूतोऽद्वैतानन्दः। यदा उपनिषद्वाक्यार्थपरिशीलनजातं सुखं विद्यानन्द इति अष्टविध आनन्दः प्रोक्तः।

अत्रेयं जिज्ञासा समुदेति — लोके रूपादिविषयसंयोगजन्येषु आनन्देषु यः आनन्दः प्राप्यते, स आनन्दो दृष्टत्वाद् अनित्यः, तर्हि स कथं नित्यस्य ब्रह्माभिन्नस्य आत्मनः स्वरूपं भवितुमर्हति ? अस्याः समाधानं तैत्तिरीयबृहदारण्यकादिश्रुतिषु तद्भाष्यादिषु च सविस्तरं विवृतम्। तद्यथा ''**विज्ञानमानन्दं ब्रह्म**[५]'' इति बृहदारण्यकोपनिषच्छ्रुत्या ब्रह्मानन्दशब्दयोः सामानाधिकरण्याद् ब्रह्मैव आनन्द इत्युभयोः ऐक्यं गम्यते। किमयमानन्दो वैषयिकानन्दवत् संवेद्य उतासंवेद्य

---

१. बृह.उ. ४.३.३२
२. कै.दी.व्या. २.१२३
३. कै.दी.व्या. २.१२३
४. कै.दी. २.१३०
५. बृह.उ. ३.९.२८

इति विचारणं चक्रुरत्र भाष्यकाराः। तत्र लोके अहं सुखी इति सुखस्य संवेद्यत्वदर्शनात्, ''**जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा**[१]'', ''**स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति**[२]'' इत्यादिश्रुतिषु मोक्षकाले आनन्दानुभवश्रवणात्, आनन्दोऽयं ब्रह्मस्वरूपभूतोऽपि संवेद्य इति पूर्वपक्षः। स आनन्दोऽसंवेद्य इति सिद्धान्तपक्षः। मोक्षो हि ब्रह्मस्वरूपभूतः अशरीरभावः। अतो मोक्षकाले अद्वैतं ब्रह्म विहाय नान्यत्किञ्चिद्विद्यते। सुखस्यायतनं शरीरम्, साधनानीन्द्रियादीनि च तत्र न विद्यन्ते। अतो ब्रह्मस्वरूपभूतं सुखं न संवेद्यम्। तत्र आनन्दानुभवः, अनुभवविषय आनन्दः, अनुभविता चेति त्रिपुटी नास्ति। अत एव दुःखस्य लेशमात्रस्यापि तत्रासम्भवः। तस्मात् सुखस्वरूपं ब्रह्म प्राप्तो मुक्तः स्वयमेव आनन्दात्मकः प्रकाशत इति वेदान्तसिद्धान्तः।

छान्दोग्योपनिषद्यपि अमुमर्थं सनत्कुमारः ''**सुखं भगवो विजिज्ञासे**[३]'' इति पृष्टवन्तं नारदं ''**यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखम्**[४]'' इतिरूपेण विबोध्य ''**यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा**[५]'' इति भूम्नो लक्षणमपि बोधयामास। यद्यप्ययं भूमशब्दो भावार्थकः तथापि श्रुतौ भावभवित्रोः तादात्म्यविवक्षया भूमशब्देन अखण्डं ब्रह्म निर्दिष्टम्। तथा हि ''**स य एषोऽणिमा**[६]'' इत्यत्र अणिमशब्दस्य भाववाचकस्य आत्मरूप-धर्मिपरत्वं यथा तथा ''**यो वै भूमा तत्सुखम्**[७]'', ''**यो वै भूमा तदमृतम्**[८]'' इत्यादिधर्मिसामानाधिकरण्याद् धर्मवाचकस्य भूमशब्दस्य धर्मिपरता सिद्धा। प्रकृते बहुत्वं न सङ्ख्यारूपम्, अपि तु ''बह्वन्नं पच्यते'' इतिवद् आधिक्यरूपम्। ''**अथ यदल्पं तन्मर्त्यम्**[९]'' इति अल्पस्य भूमप्रतिद्वन्द्विताबोधनात्। अयमर्थः

१. छा.उ. ८.१२.३
२. छा.उ. ८.२.१
३. छा.उ. ७.२२.१
४. छा.उ. ७.२३.१
५. छा.उ. ७.२४.१
६. छा.उ. ६.८.७
७. छा.उ. ७.२३.१
८. छा.उ. ७.२४.१
९. छा.उ. ७.२४.१



''**भूमा सम्प्रसादादध्युपदेशात्**[१]'' इति सूत्रेण सूत्रकारोऽसूत्रयत्। अत्र सम्यक् प्रसीदत्यस्मिन्निति निर्वचनात् सम्प्रसादशब्दः सुषुप्तिवाची। तथा च प्राणादधि भूम्न उपदिश्यमानत्वात् परमात्मा एव भूमा, न तु प्राण इति सूत्रार्थः। श्रुतौ ''**यत्र नान्यत् पश्यति**[२]'' इत्यादिना अविद्यावस्थायां प्राप्तं दर्शनादिक्रियाभेदमनूद्य, ब्रह्मणि तदभावो बोध्यते। अतः अखण्डब्रह्मणि सर्वव्यवहाराभावादिरूपाणां धर्माणामुपपत्तेः, क्रियाकारकफलभेदः अनुपपन्न इति। तस्मादखण्डं ब्रह्मैव सुखम्।

भगवता सूत्रकारेणापि ब्रह्मणः सुखस्वरूपत्वमवादि। तथा हि ''**य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति**[३]'' इत्यस्यां श्रुतौ प्रोक्तः अक्ष्यधिकरणः पुरुषः क इति विचार्य ''**अन्तर उपपत्तेः**[४]'' इति सूत्रेण आत्मत्व-अमृतत्व-अभयत्व-वामनीत्व-भामनीत्वादीनां गुणानां ब्रह्मण्येव सम्भवादक्ष्यधिकरणत्वेन निर्दिश्यमानः पुरुषः परमेश्वरः एवेति निरणायि। इतश्च प्रकरणादपि अक्षिस्थानः पुरुषः परमात्मा एव इति ''**सुखविशिष्टाभि-धानादेव च**[५]'' इति सूत्रेणावगम्यते। तथा हि वाक्योपक्रमे ''**प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म**[६]'' इति श्रूयते। तस्य विवरणं ''**यद्वाव कं तदेव खं यदेव खं तदेव कम्**[७]'' इति कृतमस्ति। अत्र कं खमिति शब्दद्वयं ब्रह्मणो विशेषणार्थम्। खशब्दः भूताकाशे प्रसिद्धः। अतः कमिति शब्दाभावे भूताकाशः ब्रह्मबुद्ध्या उपास्यतया निर्दिष्ट इति भ्रमः स्यात्। स चानिष्टः ''**आत्मविद्या**[८]'' इति श्रवणात्। अतः सुखवाचिनः कशब्दस्य ग्रहणम्। गृहीतेऽपि तस्मिन्, कशब्दस्य वैषयिकसुखे प्रसिद्धत्वाल्लौकिकसुखमात्रे ब्रह्मबुद्धिः स्यात्। अतः खंपदमुपात्तम्। तथा चैतत् पदद्वयं मिलित्वा सुखात्मकं ब्रह्म गमयति। एतस्य चोपक्रान्तत्वादपि पूर्वोक्तविषयवाक्ये निर्दिष्टं ब्रह्मैवेति निर्णीयते। सुखस्वरूपत्वेऽपि ब्रह्मणः

१. ब्र.सू. १.३.८
२. छा.उ. ७.२४.१
३. छा.उ. ४.१५.१
४. ब्र.सू. १.२.१३
५. ब्र.सू. १.२.१५
६. छा.उ. ४.१०.५
७. छा.उ. ४.१०.५
८. छा.उ. ४.१४.१

उपासनविषये तस्मिन् सुखं गुणोऽपि भवतीति अभिप्रेत्य ब्रह्मणि सुखवैशिष्ट्यमपि अकथ्यत। तस्मान्नित्यो निरतिशयो निरुपाधिकश्च आनन्दो ब्रह्मणः स्वरूपमिति वेदान्तसिद्धान्तः।

अपि च "**एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति**[१]" इति श्रुत्या वैषयिकसुखमपि ब्रह्मानन्दस्यैव अंशभूतमिति प्रतिपादितम्। तस्मादेव वैषयिकसुखेषु प्रसिद्धं सुखत्वमपि उपपद्यते। तथा हि पूर्वजन्मोपात्तपुण्यकर्मपरिपाकवशाद् अन्तःकरणस्य स्रक्चन्दनादिविषयविशेषैः सह तद्गोचरवृत्तिद्वारा सम्बन्धो जायते। तत्र उत्कृष्टविषयसम्बन्धाद् अन्तःकरणगत-सत्त्वगुणस्योत्कर्षः, निकृष्टविषयसम्बन्धात् अपकर्षश्च भवतः। एवमुत्कर्षापकर्षो-पेततया जायमानासु वृत्तिषु स्वरूपानन्दः प्रतिबिम्बते। स एव विषयानन्द इत्यभिधीयते। अतः सर्वेष्वपि वैषयिकानन्देषु ब्रह्मानन्दोऽनुस्यूततया विद्यते। अमुं विषयं भाष्यकारा एवमचकथन् "**आनन्द इति परं ब्रह्म, तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधौ अन्तःकरणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने प्रसन्ने अभिव्यज्यते। तद्विषयसुखमिति प्रसिद्धं लोके। तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात् सुखस्य क्षणिकत्वम्। तद्यदन्तःकरणं तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वमापद्यते यावत्, तावत् विविक्ते प्रसन्ने अन्तःकरणे आनन्दविशेष उत्कृष्यते विपुलीभवति**[२]" इति। एवं सर्वेषु आनन्देषु अनुस्यूतो निर्विशेष आनन्दः आनन्दपदलक्ष्यः। स एव ब्रह्मणः स्वरूपम्। अत एव ब्रह्मस्वरूपाद् अनतिरिक्ते मोक्षे कदाचिद् आनन्दवियोगो न भवति। यद्यपि तस्मिन् काले क्रियाकारकादिभेदाभावात् आनन्द इच्छा न सम्भवति, तथापि इष्टत्वोपलक्षितस्वरूपं तदानीमपि वर्तत एव। यथा "काकोपलक्षितं देवदत्तगृहम्" इत्यत्र काकस्य निर्गतेऽपि देवदत्तस्वरूपे न कश्चिदपायः, तथैव इच्छाया अभावेऽपि आनन्दस्वरूपं नापैति। एवं वैषयिकानन्दोऽपि ब्रह्मानन्द एव। इत्थमानन्दमीमांसा ग्रन्थकारेण निरटङ्कि।

---

१. बृह.उ. ४.३.३२
२. तै.उ.शां.भा. २.५



## ४.१५ ग्रन्थस्यास्य फलश्रुतिः —

प्रेक्षावतां प्रयोजनमन्तरा क्वाऽपि कर्मणि प्रवृत्तिर्न दृश्यते।[१] अत एव ग्रन्थकारेण ग्रन्थादौ ग्रन्थरचनाप्रयोजनप्रतिपादनमवश्यं विधेयं भवति। ग्रन्थान्ते च ग्रन्थकारेण फलकथनपुरःसरं प्रकरणमुपसंह्रियते। समग्रसंस्कृतवाङ्मयानु-शीलनेनेदं ज्ञायते यदस्मत्सम्प्रदायविदामाचार्याणां ग्रन्थकर्तॄणाञ्च तत्तद्ग्रन्थप्रणयने आसीत् कश्चिद्धेतुः। बालानां सुखबोधः, यशःप्राप्तिः, राजाज्ञापालनम्, सुहृत्शिष्योपकृतिः, गुरोराज्ञापालनम्, स्वानुभवकथनम्, पुण्यसम्पादनम् इत्येवं विविधा हेतवो ग्रन्थप्रणयने व्याख्यानिर्माणे च दरीदृश्यन्ते। कृतार्थेन स्वान्तस्तृप्तेन प्रकृतग्रन्थकारेण च कृष्णेन मुमुक्षूणां स्वशिष्याणाञ्च बोधसिद्धये अद्वैततत्त्वानुभूत्यै ग्रन्थोऽयं व्यरचीति ज्ञायते। यथा ग्रन्थान्ते स्वयं ग्रन्थकारोऽब्रवीद्यदेतत् साम्प्रदायिकं शास्त्रं गुरुप्रसादकृतं न तु पाण्डित्यादिना इति।

अत्र सरलभाषायां सुबोध्यशब्द-प्रयोगेण सरलश्लोकैश्च विभिन्नवृत्तेषु प्रत्येकं विषयस्य सरलं वर्णनं कृतमस्ति। वेदार्थवागिव तर्कवितर्काढ्यैर्विद्वद्भिर्वेद्या नैका ग्रन्थास्सन्ति परन्त्वेषः कैवल्यदीपिकाग्रन्थः शब्दशास्त्रमधीत्य अद्वैतवेदान्त-वर्त्मनि श्रमोत्सुकानां कृते वर्तते। अतोऽस्मिन् प्रकरणग्रन्थे मननादिमात्रोपयोगितया अद्वैतविषयाः सङ्गृह्य एकत्र प्रदर्श्यन्ते तेन मुमुक्षूणां ग्रन्थेनानेन सरलतया वेदान्तशास्त्रे प्रवेशः सम्पद्यते। यथा लोके कश्चिन्नवनीतार्थी कुम्भादिस्थितं पयः क्वथनाऽऽतञ्चनादियोगेन नवनीतमादत्ते तथैव पूर्वाचार्यप्रणीतप्रकरणग्रन्थेषु उपनिषदर्थपयो ब्रह्मविचारसंशोधनयुक्त्या सङ्गृह्य अल्पश्रमेणैव जिज्ञासुभिरादातुं शक्यत इति ग्रन्थकारप्रदर्शितग्रन्थरचनाप्रयोजनम्। ग्रन्थान्ते ग्रन्थकारेण मुमुक्षूणामनुजिघृक्षया प्रारीप्सितस्यास्य ग्रन्थस्य फलं जीवन्मुक्तिरित्यपि न्यगादि। यथा —

> "**इत्थं विद्यासुखमिति मया वर्णितं भक्तियोगात्**
> **एतच्छास्त्रं यदि परिचिनोत्यत्र यः कोऽपि मर्त्यः।**
> **नित्यानन्दे प्रविततपदे प्राप्य निष्ठामयत्नाज्-**
> **जीवन्मुक्तो भवति यतिराट् सत्यमेवं मयोक्तम्॥**[२]" इति।

---

१. "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" — प्रसिद्धं संस्कृतसुभाषितम्।
२. कै.दी. २.१७४

ग्रन्थकारो वदति यदेतत् साम्प्रदायिकं शास्त्रं मया गुरुप्रसादकृतम्, न तु स्वपाण्डित्यप्रदर्शनार्थम्। पदवाक्यप्रमाणमाहात्म्यकलितानि शारीरभाष्यादिकानि यद्यपि सन्ति तथापि पूर्वाचार्यैर्विद्यारण्यादिभिराचार्यैः प्रणीतानां तेषामेव शास्त्राणां सारः अत्र ग्रन्थे ग्रन्थकर्त्रा सङ्गृहीतः। यथा लोके नवनीताथ कुम्भादिस्थितं पयः क्वथनातश्चनादियोगेनाविर्भूतं नवनीतमादत्ते तद्वत्पूर्वाचार्यप्रणीतप्रकरण-कुम्भस्थितोपनिषदर्थपया विचाराग्निसंशोधनयुक्त्याऽऽतश्चनध्याननिर्मथनादिना आविर्भूय कैवल्यदीपिकाख्यः ग्रन्थो विरच्यते ग्रन्थकारेण —

''**श्रीमच्छारीरभाष्यादिकसकलमहाशास्त्रदुग्धाब्धिमध्या-**
**दादायात्यन्तसारं पय इव सुवचः कुम्भलक्षैर्भृतं यत्।**
**पूर्वाचार्यैस्तदद्य प्रकरणविधया वच्मि कैवल्यसर्पिः**
**प्राज्ञानामश्नतां यद्भवविषयरसो न स्वदेन्मानसाय ॥**[१]'' इति।

अतः यः कोऽपि जिज्ञासुः अमुं ग्रन्थं परिशीलयति स नित्यानन्दे परिपूर्णे ब्रह्मणि यत्नान्तरं विना प्रतिष्ठां प्राप्य जीवन्मुक्तो भवति, यतिराट् सम्प्रदायप्रवर्त्तकश्च गुरुर्भवति। अपि च एतत्प्रकरणज्ञानात् सर्वज्ञः पूज्यश्चेति भवतीत्यपि ग्रन्थकारः उपान्तिमेन श्लोकेन दर्शयति —

''**वाक्ये छान्दोग्यगामिन्यपि किल सदसीत्येव यद्घुष्यते तत्**
**त्वच्चैतन्यं तुरीयं त्वनुभवति जनश्शास्त्रतो यो विदित्वा।**
**मुक्त्वा सन्देहजातन्निरतिशयसुखं निर्विकल्पन्निरीहं**
**ब्रह्म प्राप्यानुभूतिं स तु भजतितरां पूज्यते सर्वदैकः ॥**[२]'' इति।

जीवन्मुक्तौ अशुभवासनानां निवर्तितत्वाच्छुभवासनानामेवानुवृत्तिर्भवति। तदनु जीवन्मुक्तस्य प्रारब्धफलभोगावसाने जाते आश्रयाभावात् तस्य प्राणे ब्रह्मणि लीने सति पूर्वसिद्धज्ञानेनैव प्रारब्धकर्माक्षिप्ताज्ञानतत्कार्यतत्संस्काराणामपि विनाशात्सञ्चितकर्मणां ज्ञानेन दाहात्क्रियमाणैश्च असंश्लेषात्पुनर्देहान्तरहेत्वभावात् स विद्वान् ब्रह्मस्वरूप एवावतिष्ठते। एतत्सर्वं मनसि निधाय अन्तिमेन श्लोकेन ग्रन्थकारः प्रकृतशास्त्राभ्यासस्य फलं जीवन्मुक्तिरिति दर्शयन् इत्थं प्रकरणम्

१. कै.दी. १.६
२. कै.दी. २.१७५



उपसंहरति —

''**शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नानिशं बिभ्रतां**
**यद्वद्भूगतसर्वतीर्थपयसा मामज्जनोत्थं फलम्।**
**ये कैवल्याख्यमिदं पठन्ति सुधियश्शास्त्रं प्रबोधप्रदं**
**ते नित्यं परिपूर्णसौख्यभरिता नन्दन्ति मुक्तास्स्वयम् ॥**[१]'' इति।

एवं पूर्वोक्तरीत्या श्रवणाद्यभ्यासेन तत्त्वमस्यादिवाक्यैः निवृत्तनिखिलप्रतिबन्धो जिज्ञासुः निरस्तसमस्तसंसारोपप्लवं सदानन्दचिन्मात्रं प्रत्यगात्मानं परिशोध्य सत्यज्ञानानन्दानन्ताद्वयब्रह्मानन्दतां समनुभूयान्तेऽत्यन्तनिवृत्ताविद्यातत्कार्यः परमां निर्वृत्तिं प्राप्य कृतकृत्यो भवतीति शम्।

१. कै.दी. २.१७६

# उपसंहृतिः

## अथ निष्कर्षनिष्यन्दाः —

इदमत्रोपसंह्रियते यत् ''**कृष्णविरचितकैवल्यदीपिका (स्वोपज्ञप्रभा-व्याख्यासहिता)**'' इति शीर्षकोपेतो ग्रन्थोऽयं सपरिशिष्टं चतुर्षु अध्यायेषु विभक्तोऽस्ति। पूर्वत्राध्यायेषु तत्र तत्र गवेषितानाम् अद्वैतविषयाणां विचारः संसाधिताः। तत्र हि केवलमध्यायसमाप्तिः कृता, न तु चर्चितानां विषयाणां साररूपो निष्कर्षः स्पष्टीकृतः। अतः अत्रोपसंहृतौ सामष्ट्येन प्रत्यध्यायं निस्सरन्निष्यन्दरूपस्सारः सन्निधार्योल्लिख्यते, येन एतेष्वध्यायेषु समीक्षितानां विषयाणां स्पष्टतया सरलतया च बोधसङ्ग्रहो भवेत्।

तत्रादौ ग्रन्थेऽस्मिन् उपोद्धातभागे सम्पाद्यमानस्य ग्रन्थस्य भूमिकारूपेण विषयस्य इतिहासादयः केचनांशाः चर्चिताः। यत्र अद्वैतवेदान्तस्य सामान्यांशान् विवर्ण्य तदनु काचिदनुसन्धानभूमिका उपस्थापिता। यत्र अद्वैतसिद्धान्तविकासस्य समासेन परम्परां प्रदर्श्य प्रकृतप्रबन्धस्य सम्पादनाय किं बीजमिति स्पष्टीकृतः। इयं कैवल्यदीपिका न केवलम् अद्वैतवेदान्तसाहित्यवाङ्मयस्य अभिवृद्धिं करोति परम् अद्वैततत्त्वप्राप्त्यर्थं वेदान्तसिद्धान्तार्थजिज्ञासून् नितरामुपकरोति। अत्र प्रबन्धे अनेन ग्रन्थकारेण इतरेऽपि ग्रन्था विरचितास्सन्ति, परं सति प्रयत्नेऽपि तेषां प्राप्तिः न जाता, येन ग्रन्थकारस्य जन्मकालविषये नाधिकः परिचयो जातः। तथापि केषुचित् हस्तप्रतिविवरणपुस्तकेषु ग्रन्थकारविषये ये निजपरिचयानुकूलाः निर्देशाः दृष्टिपथे आगताः, तदाधारेण ग्रन्थकारोऽयं तमिलदेशीयो विद्यते इति ईषन्निर्देशः प्राप्तः। उपोद्धाते अमून् विषयान् विचार्य तदनु मातृकापाठसम्पादनस्य केचन सिद्धान्ताः विमृष्टाः। यतो हि महनीयकीर्तयो विद्वांसो जानन्त्येव यत्



अप्रकाशितमातृकाग्रन्थानां पाठसम्पादने समीक्षात्मकाध्ययने च कियत्काठिन्यं विद्यते। अत्र एतदपि निष्कर्षनिष्यन्दरूपेण उपस्थाप्यते यत् पाठसम्पादनाय पाश्चात्यविद्वद्भिः प्रवर्तिताः सर्वेऽपि सिद्धान्ताः यथायथमस्माभिः अभ्युपगन्तुं न शक्यन्ते। अस्माकं पाठाः लेखनसामग्र्यः पाठलेखनस्योद्देश्यानि य तैः भिद्यन्ते। अतः भारतीयपरिप्रेक्ष्ये पाठसम्पादनाय अस्माकं पूर्वाचार्यैः प्रणीताः पाठसम्पादन-सिद्धान्ताः अवश्यं पाठसमालोचनावसरे आलोचनीयाः। इत्थमत्र उपोद्धातभागे अमी विषयाः सविस्तरं चर्चिताः यैरत्र प्रबन्धे पाठकानां सहजप्रवेशस्स्यात्।

अस्मिन् प्रबन्धे सपरिशिष्टं चत्वारोऽध्यायाः सन्ति। तत्रादौ ''कृष्णः — तद्देशकालकृतिवैदुष्यादीनां विचारः'' इत्याख्ये प्रथमेऽध्याये प्रास्ताविकम्, अद्वैतसिद्धान्तविकासः, कैवल्यदीपिकाकारस्य देशकालादिपरिचितिः, ग्रन्थाभिधानम्, ग्रन्थविषयः, प्राप्तमातृकयोर्विवरणं गुणदोषविचारश्च, भाषाच्छन्दोव्यवस्था, ग्रन्थकर्तुः वैशिष्ट्यम्, शैली, मातृकायाः सम्पादनपद्धतिः, पाठसम्पादनविधिश्चेति विषयानधिकृत्य विवेचनं व्यधायि। कैवल्यदीपिका इति ग्रन्थोऽयं प्रकरणविभागद्वारा विभक्तो वर्तते। अत्र तत्त्वप्रदीपप्रकरणं संशयच्छेदप्रदीपप्रकरणञ्चेति प्रकरणद्वये अद्वैतवेदान्तसम्बन्धिनो विविधा विषया निरूपिताः। एवमसौ ग्रन्थो गुरुशिष्यप्रणाल्यां प्रश्नोत्तरशैल्या अद्वैततत्त्वानि प्रतिपादयन् उपनिषत्प्रमाणपूर्वकमद्वैतसिद्धान्तसम्बन्धिसंशयान् छिनत्ति। अस्मिन्नध्याये उपलब्धमातृकयोः विवरणं गुणदोषविचारश्च परिलिखितः। मूलमातृकायाः प्राप्त्यभावात् प्रतिलिपिमातृकाम् आधारीकृत्य पाठसम्पादनं विहितम्। अत्र मातृकायां प्रतिलिपिकरणकालीनाः केचन दोषाः दृश्यन्ते। ग्रन्थेऽस्मिन् बहूनाम् आर्षपदानां प्रयोगोऽपि विहितो ग्रन्थकारेण। ग्रन्थकारस्य इयमपि विशिष्टा शैली अत्र दृश्यते यदनेन बहुत्र एकस्मिन्नेव पद्ये छन्दद्वयस्य प्रयोगः विहितः। प्रायः एतादृशः प्रयोगः संस्कृतवाङ्मये क्वचिदेव दृश्यते। विद्वांसो जानन्त्येव यत् अद्वैतवेदान्तेऽपि प्रक्रियावर्णने विवरणप्रस्थानं भामतीप्रस्थानं चेति प्रस्थानद्वयमतिप्रसिद्धं वर्तते। ग्रन्थकारोऽयम् अद्वैतसिद्धान्तवर्णने यत्र साम्प्रदायिको प्रक्रियाभेदो वा वर्तते तत्र विवरणपन्थानम् अनुसरति।

''स्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसमीक्षात्मकं सम्पादनम्'' इत्याख्ये द्वितीयेऽध्याये आधारमातृकाया वैशिष्ट्यं विवर्ण्य

पाठसम्पादनविधिवर्णनपुरःसरं सम्पादितः स्वोपज्ञव्याख्यासहितकैवल्यदीपिका-ग्रन्थभागो निबद्धः । अत्र ग्रन्थकारेणैव प्रकरणविभागं कृत्वा स्वोपज्ञप्रभाख्यासहितो ग्रन्थो लिखितः ।

New Catalogus Catalogorum मध्ये अस्या मातृकायाः द्वे प्रतिलिपी स्तः इति लिखितमस्ति, तत्र एका ग्रन्थलिपिः मातृका अपूर्णा अपरा च देवनागरीलिपौ प्रतिलिपिमातृका पूर्णा विद्यते। अतः ग्रन्थलिपिमातृकाया अपूर्णत्वात् अन्यया सह तुलनायां कः पाठः साधीयान् शुद्धः पाठो वा इति निर्धारणस्य कश्चिदेव अवकाशः भवति । कस्यापि ग्रन्थस्य एकमातृकत्वात् तस्य सम्पादनम् अत्यन्तं कष्टप्रदं भवतीति विद्वदपश्चिमाः जानन्त्येव। अतः एतादृशे सन्दर्भे व्याकरणदृष्ट्या, कोषदृष्ट्या, ग्रन्थस्य पूर्वापरसन्दर्भदृष्ट्या इत्यादिभिः निमित्तैः पाठसम्पादनमत्र कृतमस्ति। ग्रन्थकारोऽयं कृष्णपण्डितः ग्रन्थेऽस्मिन् बहूनाम् आर्षोक्तीनां पूर्वाचार्याणां वचनानाञ्च प्रयोगं कृतवान्। अतः तेषां यथायथं मूलमस्माभिः अन्विष्य सङ्केताक्षरैः तेषामुल्लेखः कृतो वर्तते। यदि क्वचित् ग्रन्थकारेण उद्धृते वाक्ये पाठभेदो वर्तते तर्हि सः पाठभेदः आकरग्रन्थेन सह तुलनां विधाय अस्माभिः पादटिप्पण्यां दर्शितः। परमेवमपि दृश्यते यद् अस्मिन् ग्रन्थे आदर्शरूपेण अङ्गीकृतासु ग्रन्थोक्तिसु कासाञ्चन ग्रन्थोक्तीनाम् अप्राप्तित्वात् तत्रोक्तकारिकोदाहरणादिभिः तुलनया पाठसम्पादनस्यावकाशो न वर्तते। अतो मया व्याकरणवेदान्तादिदृष्ट्यैवास्य सम्पादनार्थं प्रयतितम् ।

यदि कस्या अपि मातृकाया एकैव प्रतिलिपिः सम्प्राप्यते तर्हि तस्या मातृकायाः पाठसम्पादनं कथङ्कारं करणीयमिति विषये पाठसम्पादनविद्भिः केचन सिद्धान्ताः प्रतिपादिता वर्तन्ते । तदनुसारमेकमात्रमातृकाग्रन्थपाठसम्पादकेन सर्वतः प्राक् भाषादृष्ट्या अदुर्बोधोऽर्थात् व्याकरणदोषवर्जितः पाठः प्रस्तोतव्यः । नाधिकं कष्टं विना बहुपरिवर्तनं विना दूषितः पाठोऽनुमातुं शक्यते तर्हि तस्य पाठस्य संस्थापनं करणीयम्। मातृकाग्रन्थे प्राप्यमाणो दूषितः पाठ्यांशः पादटिप्पणे उद्धरणीय इति । अयं मातृकाग्रन्थः एकस्यामेव पाण्डुलिपौ निहित इत्यतः अस्य सम्पादनमपि व्याकरणदृष्ट्या सुबोधपाठसम्पादनपद्धत्याऽत्र विहितम्। ग्रन्थे कुत्रचित् प्रतिलिपिकरणकालीनाः दोषाः समवलोक्यन्ते। अतः तेषामपि यथामातृकं यथापाठसम्पादनशास्त्रञ्च समीक्षितं पाठसम्पादनं विहितमस्ति।



अस्मिन् मातृकाग्रन्थे द्वे प्रकरणे स्तः। तत्र ग्रन्थस्य प्रथमे प्रकरणे अतीव सरलरीत्या अद्वैतसिद्धान्तान् प्रत्यपादयत् ग्रन्थकारः । ये च विषयाः कठिनाः सन्ति तत्र पौनःपुन्येन शिष्यमुखेन प्रश्नान् उद्भाव्य विभिन्नोदाहरणपूर्वकं दुरवगाहविषयमपि सरलतया समाधत्तेऽयं ग्रन्थकारः । तावदिह प्रथमप्रकरणे विषयोपक्रमो दृश्यते। तत्रादौ ग्रन्थकारः स्वयं कृतार्थोऽपि स्वानुभवं वदन् अन्येषामपि मुमुक्षूणां मोक्षसाधनात्मतत्त्वावगमाय वेदान्तसारस्पष्टकथनरूपं प्रयोजनं दर्शयित्वा वेदान्तैकवेद्यम् अवाङ्मनसगोचरं सच्चिदानन्दस्वरूपं परमात्मानं नमस्कुर्वन् मङ्गलमाचरति। तदनु ब्रह्मणः स्वरूपतटस्थलक्षणं निरूपयति। अथ व्यासभगवत्पादप्रभृतिभिः पूर्वाचार्यैः प्रणीतेषु न्यायोपेतेषु बहुप्रबन्धेषु सत्स्वपि अस्य प्रकरणग्रन्थस्य मननादिमात्रोपयोगितया अद्वैतविषयाः सङ्गृह्य एकत्र प्रदर्श्यन्ते तेन मुमुक्षूणां ग्रन्थेनानेन सरलतया वेदान्तशास्त्रे प्रवेशः स्यादिति दर्शयति ग्रन्थकारः। अथ प्रेक्षावत्प्रवृत्त्यङ्गभूतविषयादिकथनेन ग्रन्थस्य विषयप्रयोजनप्रतिपाद्यप्रति-पादकभावसम्बन्धं प्रदर्श्य परिशिष्टाधिकारिनिरूपणपुरःसरं साधनचतुष्टयं विवृणोति। कैवल्यदीपिकायां प्रथमप्रकरणे अद्वैतविषया निरूपिताः। अत्रायं क्रमो दृश्यते यत् सकृदवगतोऽपि शिष्यः स्वज्ञानदार्ढ्याय पुनः पुनः गुरुं प्रश्नं पाप्रच्छति, गुरुश्च सोदाहरणं विविधरीत्या समाधत्ते। अस्मिन् क्रमे वेदान्तैकवेद्यं ब्रह्म, सगुणनिर्गुणब्रह्मणोरभेदः, साधनचतुष्टयम्, गुरूपसदनम्, अध्याससामान्यलक्षणम्, अन्योन्याध्यासः, अध्यारोपापवादौ, आवरणविक्षेपशक्तिविवेचनपुरस्सरम् अविद्यावर्णनम्, पञ्चीकरणप्रक्रिया, चिच्चातुर्विध्यम्, जीवात्मनोः स्वरूपम्, अन्तःकरणम्, चिदाभासः, अन्तःकरणवृत्तेः उपयोगिता प्रयोजनञ्च, साक्षिविचारः, तत्त्वमसिमहावाक्यविचारः, तत्त्वमस्यादिमहावाक्यैः परब्रह्मैक्यबोधः, पञ्चकोशविवेकः, जहदादित्रिविधलक्षणानिरूपणम्, जीवन्मुक्तिः, विदेहमुक्तिः इत्यादिविषयाः प्रथमे प्रकरणे अष्टोत्तरशतेन पद्यैः विवेचिताः।

द्वितीये संशयच्छेदप्रदीपाख्ये प्रकरणे षट्सकप्तत्यधिकशतेन पद्यैः वेदान्तवाक्यानामद्वितीये ब्रह्मणि प्रवृत्तिं दर्शयित्वा तेषामद्वितीये ब्रह्मणि समन्वयश्च विशदीकृतः। अद्वितीयब्रह्मणि वेदान्तानां तात्पर्यावधारणे ये संशयाः समुत्पद्यन्ते तेषामत्र समाधानं कृतं वर्तते। नैके अद्वैतवेदान्तविषयाः प्रतिपादितास्सन्ति। ग्रन्थान्ते अस्य शास्त्रस्य पठनश्रवणाभ्यासस्य फलं जीवन्मुक्तिरिति सङ्कीर्त्य

गुरुवन्दनापूर्वकं प्रकरणम् उपसंहृतम् । एवमयं कैवल्यदीपिकाग्रन्थः चतुरशीत्युत्तर-द्विशतश्लोककलितः सारल्येन अद्वैतवेदान्ते प्रविविक्षूणामुपकारकान्विषयान् क्रोडीकृत्य विराजते ।

''तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्'' इत्याख्ये तृतीयेऽध्याये तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनं कृतम् । यत्र मङ्गलाचरणम्, ग्रन्थस्यास्यानुबन्धचतुष्टयम्, ब्रह्मणः स्वरूपतटस्थलक्षणे, साधनचतुष्टयाद्यद्वैतसिद्धान्तानां भामतीविवरणप्रस्थानेन सह समीक्षितमध्ययनं विहितम् । अमीषु विषयेषु यत्र यत्र ग्रन्थकारः समासेन कञ्चिदद्वैतसिद्धान्तं प्रतिपादयति, तस्य विषयस्य अद्वैतवेदान्तदृष्ट्या समीक्षणं विधाय ग्रन्थकारनिर्दिष्टं वैशिष्ट्यं प्रदर्शितम् । सिद्धान्तलेशसङ्ग्रहे अप्पयदीक्षितैः सकारणाध्यास-निरूपणावसरे अध्यासकारणत्वेन प्रायः षट् पक्षा व्यलेखिषत । तत्र सादृश्यम् अध्यासस्य कारणमिति केषाञ्चन पक्षो वर्तते, स च स्वीकृतः प्रतिपादितश्च । किन्त्वत्र प्रकृते ग्रन्थे अध्यासलक्षणप्रतिपादनावसरे ग्रन्थकारः सादृश्यादिकम् अध्यासकारणं न स्वीकरोति । एतन्मते अधिष्ठानसामान्याऽऽरोपितविशेषज्ञानमेव अध्यासस्य मुख्यं कारणमिति । अविद्यायाः विषयविषये चिन्मात्रं ब्रह्मैव अविद्याया विषय इत्यत्र भामतीपन्थिनां विवरणपन्थिनां च मतैक्यमस्ति । अयं ग्रन्थकारोऽपि अविद्याविषयवर्णने अमुमेव पक्षं पक्षीकरोति । अविद्यायाः आश्रयविषये अविद्या जीवरूपचैतन्यनिष्ठा, ब्रह्मरूपचैतन्यनिष्ठा वेति प्रश्ने अविद्या ''परमेश्वराश्रया'' इति भाष्यकारवचनमुररीकृत्य ब्रह्म एव अविद्याया आश्रयः इति विवरणमता-नुयायिनः । भामतीकाराणां मते तु जीवस्य ब्रह्मविषयकम् अनादि अज्ञानं तावत् सर्वैर्ज्ञायते । तस्मात् जीव एव अज्ञानस्य आश्रयः । अत्र प्रकृते प्रबन्धे ग्रन्थकरः अविद्यायाः आश्रयविषये न किमपि स्वकीयमतं विशेषरूपेण स्पष्टीकरोति। पञ्चीकरणप्रक्रियां ग्रन्थकारोऽयम् अत्यन्तं सरलया रीत्या प्रत्यपादयत्। ग्रन्थकारः असौ चिच्चातुर्विध्यनिरूपणे पञ्चदशीकारमतमनुसरति। ज्ञानस्यान्तरङ्गसाधनानि वेदान्तेषु प्रथितानि सन्ति। अत्रापि तद्वर्णने ग्रन्थकारेण प्रतिबन्धविनाशाय चिरं श्रवणमनननिदिध्यासनैस्साकं समाधिमाश्रयेद् इत्यनेन समाधिवर्णनपि उक्तम् । अपि चासौ विक्षेपनिवृत्तिरेव समाधिफलम् इति ''नानाविधानामपि मुक्तिभाजां समाधियोगस्य तु किं फलं चेत्...'' अनेन पद्येन न्यरूपयत्।



जीवन्मुक्तिनिरूपणावसरे ग्रन्थकारेण योगवासिष्ठादिग्रन्थानाम् बहूनि उदाहरणानि दत्त्वा स्वकीयः पक्षः सम्यक् उपस्थापितो वर्तते।

''संशयच्छेदप्रदीपप्रकरणस्थानां विषयाणाम् समीक्षितमध्ययनम्'' इत्याख्ये तुरीयाध्याये संशयच्छेदप्रदीपकरणस्थविषयाणां तत्सम्बन्धिविषयाणाञ्च समीक्षा अक्रियत। अपि च एतेषां विषयाणां प्रकृतग्रन्थकारेण यन्निरूपणं कृतमस्ति तन्निरूपणं पूर्वग्रन्थकर्तॄन् कियदंशेन अनुकरोतीत्यपि तत्सादृश्यं वैलक्षण्यञ्च यथाऽवकाशं समीक्षितम्। ग्रन्थकारेण अद्वैतसिद्धान्तानां विषये यत्र संशया वर्तन्ते, तेषां विषयाणामत्र प्रश्नोत्तरशैल्या समाधानं वर्तते । तद्यथा नामरूपादिविवर्जितं निर्विशेषं ब्रह्म, वेदानाम् अपौरुषेयत्वम्, श्रुतिवाक्यानां विरोधपरिहारः, विधिविचारः, मायास्वरूपवर्णनम्, चतुर्विधकल्पपूर्वकं सृष्टिविचारः, ज्ञानाज्ञानभूसप्तकम्, ज्ञानकर्मसमुच्चयनिराकरणम्, त्रिविधं कर्म, यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः, विद्वदविद्वत्कर्मफलवैषम्यम्, वैराग्यम्, चतुर्विधः संन्यासः, अन्तःकरणस्य वृत्तिविचारः, प्रतिबिम्बसत्यताविचारः, मायास्वरूपवर्णनम्, अद्वैतवादे आत्मस्वरूपम्, आत्मनः अखण्डार्थत्वम्, आनन्दमीमांसा इत्याद्या विषया अत्र अद्वैतवेदान्तसिद्धान्तदृष्ट्या सप्रमाणं विवेचिताः । श्रुतिषूपनिषत्सु च सगुणब्रह्मपराणि निर्गुणब्रह्मपराणि श्रूयन्ते । अतः वेदान्तवाक्यानां कुत्र तात्पर्यमिति निश्चेतुं किञ्च तेषां विरोधपरिहारं कर्तुं ग्रन्थकारस्य महान् प्रयत्न दृश्यते। तथा हि निर्गुणे ब्रह्मणि कल्पितं ब्रह्मणः सगुणत्वं निर्गुणादभिन्नम्। अध्यस्तं हि वस्तु अधिष्ठानान्न भिद्यते इति हि न्यायः। तथा च स्वाध्यस्तनामरूपोपाधिमत्त्वमेव निर्गुणस्य सगुणत्वम्। अतो नास्ति श्रुतिवाक्येषु लेशतोऽपि परस्परविरुद्धत्वम्। मायास्वरूपं विवर्ण्य ग्रन्थकारेण सृष्टिवर्णनमकारि। तत्र चतुर्विधः प्रलयोऽपि निरूपितः। प्रलयनिरूपणावसरे ग्रन्थकारः प्रायः वेदान्तपरिभाषाकारमतम् अनुकरोति। वेदान्तदर्शनस्य मुख्यप्रबन्धेषु ज्ञानाज्ञानभूमिकाविषये ईषद्विवरणं प्राप्यते परमत्र ग्रन्थकारेण योगवासिष्ठादिग्रन्थान् आधृत्य सविशदं तद्वर्णनमकारि यद्धि वेदान्तजिज्ञासून् महदुपकरोति।

परमपुरुषार्थस्य मोक्षस्य साक्षात्साधनं केवलं ज्ञानमथवा कर्मसमुच्चितं ज्ञानमित्यत्र शास्त्रकाराणां मतभेदो दृश्यते। अद्वैतवेदान्तिनो ''नान्यः पन्था विद्यतेऽयनाय'' इति श्रुत्यनुरोधेन मोक्षसाधनं केवलं ज्ञानमिति मन्यते। मोक्षाख्यं

फलं साधयितुं ज्ञानं स्वातिरिक्तं न किमपि अपेक्षते। कर्मणा चान्तःकरणं शुद्धं सज्ज्ञानोपयोगि जायते तथा ब्रह्मजिज्ञासोत्पद्यते। ब्रह्मसाक्षात्कारे जाते सर्वं मिथ्येति विवेके उदिते कर्मणि न प्रवृत्तिरिति। वेदान्तमते कर्मणाम् उपयोग: चित्तशुद्ध्यर्थम् एवेति तेषां मतम्। अयं कैवल्यदीपिकाकारोऽपि कर्मण आचरणं चित्तशुद्ध्यर्थमिति जगाद। न च ज्ञानकर्मसमुच्चयेन मोक्षावाप्तिरिति वेदान्तसिद्धान्त:। यतो हि अभ्युदयार्थिभिः कर्म अनुष्ठीयते, मोक्षार्थिभिश्च ज्ञानमिति भिन्नपुरुषानुष्ठेयत्वेन च ज्ञानकर्मणो समुच्चयानुपपत्तिरित्यपि प्रत्यपादि ग्रन्थकारेण।

यथा श्रीमदप्पयदीक्षिताभि: आचार्यै: पूर्वाचार्याणां मतानि सङ्कलय्य सिद्धान्तलेशसङ्ग्रहादिषु विचारितानि तथैव क्वचिद् अयमपि ग्रन्थकार: प्रतिबिम्बवादादिविषये विभिन्नाचार्याणां मतानि सम्यक् विचार्य तेषां यथायथं विमर्शं प्रतिपादयति। तादृनां विषयाणां निरूपणे पूर्वाचार्याणां ग्रन्थकारस्य साम्यं सुस्पष्टं पश्याम। अनेन ग्रन्थकारेण आत्मन: अखण्डार्थत्वमनेन सविस्तरं न्यरूपि। वेदान्तेषु यत्र यत्र आत्मन: अखण्डार्थनिरूपणं दृश्यते तत्सर्वमपि अनेन क्रोडीकृत्य अत्यन्तसरलया रीत्या अखण्डार्थनिरूपणं कृतम्। अन्ते च यथा ब्रह्मसूत्रेषु अन्तिमोऽध्याय: फलाध्यायत्वेन सङ्कीर्तित: तथैव अत्रापि अनेन ग्रन्थकारेण कृष्णपण्डितेन कैवल्यदीपिकाया फलश्रुति: वर्णिता। यद्धि अनुबन्धचतुष्टये वेदान्तां प्रयोजनं तदेव वेदान्तदर्शनस्य प्रकरणग्रन्थत्वात् अस्यापि ग्रन्थस्य प्रयोजनमिति ग्रन्थकारस्य आशय:।

कैवल्यदीपिकायाः तट्टीकायाः प्रभायाश्च मूलमातृका नोपलभ्यते इत्यतः उपलभ्यमानयोः मातृकयोः सम्पूर्णां प्राचीनां च देवनागरीलिपिलिखितां प्रतिलिपिमातृकामाधृत्य ग्रन्थकृत्सम्मतः पाठः अस्माभिरभ्युपगतो वर्तते। प्राचीनायां सम्पूर्णायां चापि मातृकायां लेखकप्रमादादिभिः सम्भाव्यमानान् दोषान् निरसितुं यथायोगं व्याकरणभाषावेदान्तसिद्धान्तदृष्ट्या समुचिताः पाठाः समादृतास्सन्ति। अपि चास्माभिरनङ्गीकृताः सर्वे पाठभेदाः सम्पादनक्रमे पृथक् पृथक् पादटिप्पण्यां समावेशितास्सन्ति। मातृकासम्पादनावसरे अनुचितत्वेन भासमानानां पाठानां समुचितं संशोधनं प्रकोष्ठान्तरितं क्वचित्प्रश्नचिह्नोपेतं (?) च सत् यथायोग्यमस्माभिः संयोजितं वर्तते। क्वचिल्लुप्ताः ग्रन्थभागाः टीकाभागाश्च टीकामाधृत्य, वेदान्तविषयं समादृत्य औचित्यमनुलक्ष्य च अस्माभिः



चतुष्ककोष्टान्तरितं सत् संयोजिता वर्तन्ते। अपेक्षितेषु स्थलेषु सूचितानां संशोधनानां संयोजनानां च निर्देशनं पादटिप्पण्याः अधस्तात् उपकल्पितं वर्तते।

इत्थं नूतनां विमर्शपद्धतिमनुसृत्य ग्रन्थकृत्सम्मतान् पाठान् युक्तिभिर्निर्णीय कृष्णविरचितस्य स्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः नवीनं पाठसम्पादनं समीक्षात्मकमध्ययनञ्चेतत् अपेक्षिताभिः विविधाभिरनुक्रमणिकाभिः सह विदुषां समक्षमुपस्थापितमास्ते।

# परिशिष्टम्-१

## कैवल्यदीपिकायाः पद्यानाम् अकारादिक्रमेणानुक्रमणिका


| पद्यम् | प्रकरणसङ्ख्या | पद्यसङ्ख्या |
|---|---|---|
| अकाम्यं काम्यं च द्वयमिति | २ | ४६ |
| अक्षय्यं तत्पदं ये नियमितमनसस्ते | २ | ५४ |
| अज्ञानं कारणाख्यं कथमिव भविता | २ | १७० |
| अज्ञानसन्देहविपर्ययास्ते | १ | ८९ |
| अज्ञानस्य न कर्मणाऽस्ति | २ | ७८ |
| अज्ञानाकारसुप्तौ निशि मिहिरमुखज्योति... | २ | ११५ |
| अण्डाम्भः शुक्लौमेकं भवति बहुविधाः | २ | १०१ |
| अतन्निरासवाचकैस्स्वरूपवाचकैर्मिथः | २ | १३८ |
| अत्यन्तं परिशुद्धशीतहृदयो बोधे | २ | ३ |
| अत्र हि दृष्टान्तोऽयं तीर्त्वा सरितश्च | १ | ६१ |
| अत्राद्या हि शुभेच्छा विचारणात् | २ | १४९ |
| अदृश्याऽवाच्याख्या कृतिकलमयाना | २ | १०२ |
| अध्यारोपः कश्चेदन्यस्मिन् | १ | २८ |
| अध्यारोपान्मृषोत्थाद्भवति | १ | २७ |
| अनवरतमुदग्रावासनाभिः प्रवृत्ताः | २ | १६८ |
| अनुभवसुखतोये भासमग्नस्सुपूर्णः | १ | ८४ |
| अन्धं पानादिसर्वं यदिह सुखततेः | २ | ११६ |
| अन्यैः प्रमाणैः त्रिभिरप्यवेद्यम् | २ | ८ |
| अपि क्षये वा जगतां सुषुप्तौ | १ | ५५ |
| अमत्वैतज्जीवप्रकलितमिदम् | २ | ६० |





| | | |
|---|---|---|
| अयं देहो देह्यप्ययमिति | १ | २३ |
| अयं भवांस्त्वम्पदलक्ष्यमेव | १ | ७६ |
| अय इव भुवने यो मार्गणं मार्गणो वा | १ | ५७ |
| अयमिह मार्गश्चैकः स्वपरोऽव्यक्ताद् | १ | ३२ |
| अवस्थाः सप्तैताः प्रकृतित इतः | १ | ५८ |
| अविद्यायाः सक्ताः सकलपशवः | १ | ३४ |
| अव्यक्तं व्यक्तभावं व्यवहरणकृते | २ | १०४ |
| अश्वत्थे कृतनीडकौ च विहगौ | २ | ५९ |
| अस्यां ये भुवि योगभूमिषु नराः | २ | १५७ |
| अहन्तासाक्ष्येको विभुरपि परात्मा | २ | ३९ |
| अहमिति वपुरेतन्मन्यमानस्त्वनेका... | २ | १७१ |
| अहमोऽज्ञानसमुत्थादात्मार्क... | १ | ११ |
| आघ्राणभक्षं पिशितासवानाम् | २ | ७७ |
| आचार्यश्रेष्ठ ! या त्रय्यभिवदति सुखम् | २ | ७३ |
| आदर्शान्तरिव त्वदीयवचनं च्छायैव | २ | १२ |
| आदर्शे निष्कलङ्के भवति यदि | २ | १९ |
| आद्यन्तहीनाम्बरवत्सुपूर्ण... | १ | ५ |
| आधारश्चेन्निगूढो भवति वरगुरो ! | १ | ५१ |
| आरब्धानां कर्मणां नैकभावात् | १ | ९७ |
| आरूढाश्च महागुरो ! भुवि परे | २ | ३५ |
| आवृत्य ब्रह्मभावं प्रभवति | १ | ९१ |
| आश्चर्यमेतदवनौ परमं हि साम्यम् | १ | ५२ |
| आसार्वभौमसुखमा च हिरण्यगर्भ... | २ | १३२ |
| इतीवैतद् ब्रह्म प्रकटनपरैर्वेदवचनैः | २ | ६८ |
| इत्थं पृष्टवते जगाद स पुनर्द्वेधा | २ | २१ |
| इत्थं वाचं दधाने पुनरपि स | २ | १६ |
| इत्थं विद्यासुखमिति मया वर्णितम् | २ | १७४ |
| इत्थं विहाय प्रथमं च संशयम् | २ | ११ |

| | | |
|---|---|---|
| इत्थं शिष्ये ब्रुवाणे पुनरपि कथयामास | २ | १०९ |
| इत्थं शिष्ये वदति स गुरुः | १ | ८७ |
| इत्येवं भाषमाणं निजगुरुमथ तम् | २ | ५ |
| ईशज्ञानगुरुस्वरूपभगवन्नीशेन | २ | ३७ |
| ईशे त्यक्तगुणे गुणस्य कथनम् | २ | १३९ |
| उक्तं श्रीगुरुनाथ ! सम्यगधुना | २ | २९ |
| उक्तानि पञ्च हि सुखान्यपि | २ | १३४ |
| उत्कृष्टस्य परस्य सृष्टिरनघा जीवस्य | २ | ५६ |
| उत्पत्तिर्मम चेन्मृतिश्च भविता | २ | १६५ |
| उपाधावेकस्मिन्नपि घटशरावादिषु | २ | ४० |
| उपाधिमेकं वदसीशजीवयोः | १ | ४३ |
| ऊहैक्लृप्ते विचारे परिगणितमबोधाख्यभूसप्तकम् | २ | १४६ |
| एकं ज्ञानं परमकथितं वृत्तितश्च | २ | ७९ |
| एका मुक्तिः शृणु त्वं प्रथममिह | २ | ६३ |
| एतत्सूक्ष्मशरीरजातमुदितम् | १ | ४० |
| एते जीवा असङ्ख्या अपि चरितम् | २ | ५१ |
| एवं चेच्छृणु वत्स ! वच्म्यविदितस्वात्मस्वरूपाः | २ | ३० |
| एवं शिष्येण पृष्टे गुरुरपि कथयामास | २ | २८ |
| एवन्निश्चयशालिनां सुमनसाम् | २ | ८९ |
| एष स्वप्नो हि भुक्त्वा स्वप्नपदञ्जुषः | २ | १४८ |
| एषोऽधिकारी सुतदारवित्तवाञ्छा | १ | १४ |
| ऐक्यं लब्ध्वापि भूम्ना सह पशुरयते | २ | १२९ |
| ऐश्वर्यं पद्मजाताम्बुजनयनललाटेक्षणानाम् | २ | ४१ |
| कमठझषवयांसीवादरात्स्मृत्युदीक्षा... | १ | १६ |
| कर्मारब्धं कथमनुभवन्देहवान् सन्विमुक्तः | २ | २७ |
| कल्पनागमविभ्रमस्तव दर्शितः | १ | ४५ |
| कल्पान्ते परमेश्वरस्य कलने | २ | ५८ |
| कश्चित्कोटिशतेषु देहिषु नरः | १ | १३ |





| | | |
|---|---|---|
| कस्याप्युक्तिवशान्न वापि पुरुषान् | १ | ६३ |
| कामादयो हृदि यदि क्षणतो व्रजेयुः | १ | ९६ |
| किं कार्यं किमु कारणं जगदिदम् | २ | १०६ |
| किं वा भाग्यन्न जाने किमु सुकृतमहन्नैव | २ | १७२ |
| किं वा शास्त्रं वदति कुहनाम् | २ | ५० |
| कीदृग्भूता भिदेति प्रवदसि | १ | ७७ |
| कुड्यादौ जडरूपके प्रविलसत् सन्मात्रमेव | २ | १११ |
| कुम्भे नष्टे सति गगनवद्देहनाशे | १ | १०६ |
| कृत्यं साधु तथेतरच्च पशवः | २ | ५५ |
| कृत्वा पञ्चैव भूतान्यपि च | १ | ४१ |
| कैवल्यं ज्ञानयोगाद्यदि भवति गुरो ! | २ | ४८ |
| कैवल्यपूर्वनवनीतसमाह्वयं तत् | १ | ७ |
| कोशाः पञ्च हि केवलं परमकम् | १ | ५३ |
| कोशेषु पञ्चसु युतेष्वहमद्य पश्चात् | १ | ७० |
| गङ्गायामिति घोषो | १ | ७९ |
| गतोपमाने सति निष्प्रपञ्चे | १ | २९ |
| गर्भागारगतन्न वस्तु विषयीकुर्याद् | २ | ७२ |
| गुणाद्धि रजसोऽनिलाः खलु भवन्ति | १ | ३८ |
| गृहाधारस्तम्भेऽप्यवटनिहिते | २ | २ |
| ग्रामायान्धूदकमलमलं चन्द्रिका | २ | ४२ |
| घटाम्भसि घनाम्भसि स्फुरति | १ | ८२ |
| चत्वारो ज्ञानभाजो जगति हि | १ | ९४ |
| चित्तं सत्त्वस्वरूपं किल यदि | २ | २२ |
| चेन्मद्यामिषपानभक्षणविधौ वाञ्छा | २ | ७६ |
| चैतन्यं पूर्णबोधात्प्रथममुदयवद्यच्च | २ | १४७ |
| च्छायावदेनं तमनुव्रजन्तम् | २ | ४ |
| छायैका परसंविदो व्यवहृतौ | २ | १२८ |
| जगत्कर्त्ता कार्यं विदितमपि शक्तिर्न | २ | ९८ |

| | | |
|---|---|---|
| जडाकारध्यानं कथमिति | २ | ८६ |
| जाग्रत्कालशुचोपनोदविधये | २ | १२४ |
| जाग्रत्काले सकलविषया... | १ | २५ |
| जाग्रत्स्वप्नसुषुप्तयो बहुतराः | १ | ७२ |
| जातं भोगात् सुखं यद्विषयसुखमिदम् | २ | १२३ |
| जानीहि व्यवहार एष सुधियामारम्भमात्रक्षयी | २ | ३४ |
| ज्ञानं केवलमेव मोक्षविधये | २ | ४७ |
| ज्ञानं दृष्ट्वाऽनुभूतं श्रुतिविषयता... | २ | ८४ |
| ज्ञानस्यापि ज्ञापकं ज्ञानमस्ति | १ | ७४ |
| तत्त्वं परं ब्रह्म परं च | १ | ८१ |
| तत्त्वानुभूतिप्रयतिः श्रुतिर्भवेद् | १ | ९२ |
| तत्त्वार्थस्य विचारणाज्जगदिदं | १ | ६० |
| तत्त्वासक्तहृदोऽप्यभानमसतां प्रोक्ता | २ | १५२ |
| तप्तस्ताम्ररसोऽग्निना परिणमत्यश्वादिरूपम् | २ | १३ |
| तप्यत्कोपवशादहं हि मरणम् | २ | ११८ |
| तमो रजस्सत्त्वगुणैर्विभिन्ना | २ | ११० |
| तर्ह्याचार्येन्द्रदृश्यं सकलमपि मृषेत्येव | २ | ३३ |
| तिस्रस्ता हि विरक्तयः श्रुतिमता मन्दा | २ | १६० |
| तुर्यस्थानस्य तुर्योत्तरपदकथने | २ | १५४ |
| तुर्यातीते वसेद्यो यदि परमपदे | २ | १३३ |
| तूलं दावहविर्भुजीव सकलं | १ | १०३ |
| त्यक्त्वा साधनसञ्चयं न हि | १ | १२ |
| त्रयाणामाद्यौ द्वावथ दृढसमाधिं | १ | ९९ |
| त्वद्वाक्यश्रवणाक्षमोऽपि भगवन् ! | १ | १८ |
| त्वमहमिति विहीनं व्योमवत्सर्वपूर्णम् | १ | ८८ |
| ददर्श दशमो यथा निजतनुं पुराप्तोरक्तितः | १ | ६४ |
| दीपश्चक्षुरिति द्वयं च तिमिरे | २ | १४ |
| दुष्टं सङ्गमुपेक्ष्य यापरशिवज्ञाने | २ | १५१ |





| | | |
|---|---|---|
| देहादन्यो नास्ति देहीति चेत्त्वं | १ | २४ |
| देहाहन्ता हि जन्तोर्जनयति सुदृढम् | २ | १३० |
| देहाहन्तोज्झितस्य व्यपगतमलवत् | २ | २४ |
| द्वेधा न्यासो वर्णितश्चामतितीव्रे | २ | १६२ |
| द्वैविध्यं परहंसकेति विदितं वत्स ! | २ | १६३ |
| धीरा ब्रह्मविदः प्रशान्तमनसः | १ | ९५ |
| ध्यानं सायुज्यमुक्तिप्रदमपि च मृषा | २ | ८५ |
| नत्वा तिष्ठन्स गुरुसविधे मूर्ध्नि | १ | १५ |
| नश्यद्देहगतं शरीरिणमिमम् | २ | ११३ |
| नानाविधानामपि मुक्तिभाजाम् | १ | १०० |
| नानाशास्त्रविदो गुरोस्तु वचनम् | २ | १४४ |
| नित्यं मृद्भक्षणेच्छोर्जगति निजशिशोः | २ | ७४ |
| नित्यानित्यविवेचनं प्रथमतः | १ | ८ |
| नेतुर्ब्रह्मादिमूर्तेः सकलतनुभृताम् | २ | ५७ |
| नो कालत्रितये स्थितं जगदिदम् | २ | १०५ |
| नोऽकर्तुं कर्तुमन्यत् विरचयितुमिदम् | २ | ८३ |
| न्यासं वदन्त्युपरतिं सहनं शुचां यत् | १ | १० |
| पत्युः पशूनां कृपयैव सर्वभोगार्थम् | १ | ३५ |
| पश्यन्तन्निखिलं पदार्थनिचयम् | १ | ७३ |
| पापिष्ठानामवश्यं यदि नरकगतिर्भाविनी | २ | ५२ |
| पिष्टस्येव कृतस्य शर्करिकया | १ | ७५ |
| पूर्णस्य ब्रह्मणो वा बहिरपि | १ | ५० |
| पूर्वासां त्रितये भुवाञ्जगदुदेत्येतद्धि | २ | १५३ |
| पृष्टाऽऽलीभिर्दयितमबला नेति | २ | १० |
| प्रत्याहृताक्षनिचयं परमप्रशान्तम् | १ | १९ |
| प्रयातभवसञ्चितैरपि च | २ | ६५ |
| प्राक् शैलूषस्य विद्या न विदितविहतेर्नैव | २ | ९७ |
| बद्धानलो नैव दहेत्तृणाद्यम् | १ | ९० |

| | | |
|---|---|---|
| बन्धायायकगेहसक्तिरहिताः केचिच्च | २ | १६४ |
| बन्धोत्तीर्णमहामते ! सुरतरुर्वह्निश्च | २ | ६२ |
| बुद्धब्रह्मस्वरूपा अपि जडमतिवत्कर्मभिः | १ | १०१ |
| ब्रह्मच्छाया भवति हि गुणेष्वेषु | १ | ३३ |
| ब्रह्मध्यानेन मुक्तिर्यदि भवति गुरो ! | २ | ८७ |
| ब्रह्मश्रीपतिशङ्कराः प्रतिदिनं सम्पूजिताः | १ | १०२ |
| ब्रह्मस्वरूपास्मरणं त्वबोधः | १ | ५९ |
| ब्रह्मात्मज्ञानहेतौ जगति भवता | २ | १२७ |
| ब्रह्मात्मैक्योहत्थितं यन्निरतिशयसुखम् | २ | १७३ |
| ब्रह्माद्यास्सर्वदेवा जगति च | २ | ९२ |
| ब्रह्मानन्दो यमेव श्रुतिवचनविचारोत्थिता | २ | १२६ |
| ब्रह्मैकत्वं गतानामिह जगति सतामावपुः | २ | २० |
| ब्राह्मं विज्ञानमेतत्कथमिह भविता | २ | ६४ |
| भवति मुकुरबिम्बे वास्तवं यन्मलन्तत् | २ | ७० |
| भस्त्रीवद्यमनोद्यते मरुति हृत्पद्मे | २ | १६९ |
| भिन्ना शक्तिमतो न शक्तिरपि तच्छक्तेन | २ | ९९ |
| भूतेषु पञ्चसु गुणत्रयमस्ति नित्यम् | १ | ३७ |
| भ्रमिरज्ञात्वा बोधो नास्ति न | १ | ६२ |
| मच्चेतस्स्थितसद्गुरो ! परमतः | २ | १४५ |
| मत्स्वान्तैकमहालयस्थितगुरो ! | २ | ५३ |
| मदीयं शरीरेन्द्रियाद्यं समस्तम् | १ | ४ |
| मनस्सङ्कल्पोत्थं जगदिदमशेषन्निवसति | २ | १६६ |
| मनोऽपि नात्मा करणत्वतो धीः | १ | ६८ |
| मन्त्रज्ञेन युते पिशाचनिवहे | २ | ६ |
| मन्दे न्यासः कोऽपि पापेन तीव्रे | २ | १६१ |
| मर्त्येष्वेतेषु योगी नृप इव च सुरेष्वेव | २ | ४३ |
| मां विज्ञाय जडं गुरो हृदि | १ | २२ |
| मान्यानां मान्यपादाम्बुजगुरुचरणानन्दाः | २ | १२२ |





| | | |
|---|---|---|
| माया नाम कथंविधा परिगताः | २ | ९५ |
| माया मिथ्या तत्प्रसूतानि मिथ्या | २ | ९१ |
| मिथ्या सत्यमिति प्रमूढमनसः पुण्याः | २ | ९४ |
| मिथ्याकारैव शक्तिः कथमियमुदयम् | २ | १०० |
| मुक्तानां भोगकाले प्रविहितमपि | १ | १०४ |
| मुक्तिप्रदानमुनिनायकमानवेषु | २ | ४४ |
| मुख्यार्थस्य विरोधो यत्र | १ | ७८ |
| मोक्षागारे सुपर्णे परनभसि शिवे | २ | ८८ |
| म्लेच्छानामपि योगभूमिरुदिता मुक्तिप्रदेति | २ | १५८ |
| यत्पादपद्मविगलन्मकरन्दसारः | २ | १ |
| यत्राव्यक्तेऽखिलतनुभृतो वासनाभिः | १ | ३० |
| यथा पूर्णो भूत्वा कथमनुभवेयम् | २ | १६७ |
| यद्ध्यानन्नित्यमेतत्सत इह निजतः | २ | १४२ |
| यद्वच्चुम्बकभूधरस्य पुरतः | २ | २५ |
| यस्य प्रसादान्मयि भातमेतन्मिथ्येति | १ | ३ |
| यातः स्वप्नकथां वदन्ति हि यथा | २ | ३२ |
| यावद् ज्ञात्रादिभेदः त्वयि भवति | १ | ९३ |
| ये पूर्वत्र गताविरूढिमथिते भूमित्रये | २ | १५५ |
| रज्जौ सर्पवदर्करश्मिजलवत्स्थाणौ | १ | १०८ |
| लोके तारं प्रदर्श्य प्रकटमथ | १ | २६ |
| वत्सायाह्ययि मामक श्रृणु | १ | २० |
| वन्ध्याजस्थाणुमर्त्यौगगनतरुसुम... | २ | ९० |
| वल्लीशस्य ममापि तात ! जगतः | २ | १३५ |
| वस्तुस्वप्नगतं समस्तमपि तन्मिथ्येति | २ | ९३ |
| वस्त्रतन्तुकिरीटकुण्डलनिष्क... | १ | ४७ |
| वह्नौ वायौ कृपीडे जगति च | २ | १०३ |
| वाक्ये छान्दोग्यगामिन्यपि किल | २ | १७५ |
| वाचां सुदूरमिति या परतत्त्वमाह | २ | ९ |

| | | |
|---|---|---|
| वाच्यावीश्वरजीवकावभिहितौ तत्त्वम् | १ | ६६ |
| विक्षेपशक्तिपरिकल्पितमेव सर्वम् | १ | ५६ |
| विक्षेपावृत्तिसंज्ञयोरतिजडात् | १ | ४८ |
| वित्तेभ्यो दयितस्सुतस्तनुरतः | २ | ११९ |
| विध्यागमेन परतत्त्वमिति स्मवाचाम् | २ | ७ |
| विवेचनं वच्मि शवोपमानम् | १ | ६७ |
| वृक्षो व्यष्टिः स्यादरण्यं समष्टिः | १ | ४४ |
| वृत्तिज्ञानमिदं च वृत्तिजनितम् | २ | ८२ |
| वृत्तेः फलस्य विकृतिं हृदयम् | २ | १५ |
| वृद्धत्वे द्रव्यहेतोस्स भवति दयितः | २ | १२० |
| वेषप्रच्छन्नगात्रा जगति कतिपये | २ | ६७ |
| वैराग्यं भक्तिपूर्वं त्रिदशपुरगतिम् | २ | ६६ |
| व्यष्टिष्वेतासु जीवो यदि परिगतः | १ | ३९ |
| व्यापारे सत्समाधिर्यदि भवति तदा | २ | २३ |
| व्यामोहाख्यमहान्धकारपटली | २ | १४० |
| व्योमैकमेव जलदाम्बरमित्यथान्यत् | १ | ६५ |
| शक्तिर्विक्षेपनाम्नी समभवदथ सा | १ | ३६ |
| शमो दमश्चोपरतिस्तितिक्षा... | १ | ९ |
| शान्ताहन्तामलस्य व्यपगतकलनस्य | २ | १३१ |
| शार्दूलोऽप्यनुकूल एव भविता | २ | १२१ |
| शिवाकार स्वामिन् ! प्रथिततपसः | २ | ४५ |
| शीतं श्रीगुरुपादपद्मसलिलम् | २ | १७६ |
| शीतस्वच्छद्रवास्ते पयसि विदधते | २ | १३६ |
| श्रीमच्छारीरभाष्यादिकसकलमहाशास्त्र... | १ | ६ |
| श्रीमद्देशिकवर्य ! यत्त्रिकरणैः क्लृप्तम् | २ | ८१ |
| श्रुतिं युक्तिं युक्तामिव तव | २ | १४३ |
| श्रुत्वेत्थं पुनराह शिष्यवचनम् | २ | १७ |
| षण्णां न्यूनाधिकसमतया संस्थितानाम् | २ | २६ |





| | | |
|---|---|---|
| संलग्नघोरभवरोगनिवृत्त्युपायं | १ | १७ |
| संवित्पावकदग्धमेव हि पुरा | १ | १०५ |
| संसारे यावदाशा भवति जडधियः | २ | १०७ |
| संस्मृत्यातीतजन्मव्रजकृतसुकृता... | २ | ११४ |
| सङ्ख्याय मोहेन नवैव पूर्वं | १ | ७१ |
| सङ्गोत्पन्नसुखत्रिपुट्यपि शुगित्यज्ञाय | २ | १२५ |
| सच्चित्सुखं सकलमद्वयमेकमाद्यम् | १ | ६९ |
| सत्त्वं भवति विशुद्धं रजस्तु रक्तम् | १ | ३१ |
| सत्त्वापत्तिपुरातनेषु च पदेष्वभ्यासिनः | २ | १५६ |
| सत्यं ज्योतिर्महत्तत्परमपदमजन्नित्यमेकम् | २ | १३७ |
| सत्यानन्दचिताञ्च लक्ष्म भगवन् ! | २ | ११२ |
| सत्यानन्दचिदम्बुधावपि तथा | २ | ७१ |
| सत्स्यादेव चितिर्न चेदपि मृषा तत्साक्षिकम् | २ | १४१ |
| सर्प एष न रज्जुरेव न रूप्यमेव | १ | ४६ |
| सर्वत्र वत्स गगने सति कूपखातात् | १ | १०७ |
| सर्वे जीवास्त्वयमिति गुरो ! | २ | ३८ |
| सहस्रश्रुत्युक्त्या विमलतरयुक्त्या | २ | ४९ |
| सा पञ्चमी तु षष्ठी पदार्थाभावना | २ | १५० |
| साधो ! त्वं शृणु तत्त्वविद्व्यवहृतिः | २ | ३६ |
| साधो श्रीगुरुनाथ ! सर्वतनुभृत्सामान्यः | २ | ६१ |
| सृष्टिस्थित्यन्तहेतूनपि कमलभवा... | १ | २ |
| सेत्थम्भूतस्वरूपेत्यभिगदितुमशक्या | २ | ९६ |
| सेयं विक्षेपशक्तिर्बहुविधजगतः | १ | ५४ |
| सोऽयं द्विज इति वाक्ये | १ | ८० |
| स्थाने ते विशयः शृणुष्व कथये | २ | १५९ |
| स्थित्वा चिराय परमाम्बररूपमात्रः | १ | ८५ |
| स्थूलाभिमानी खलु विश्व उच्यते | १ | ४२ |
| स्मरन्ति न गतं तथा मनसि | १ | ९८ |

| | | |
|---|---|---|
| स्यात्प्रीतिर्विषये परन्निजसुखे | २ | ११७ |
| स्वच्छादर्शगतम्मलङ्करतलीघर्षादृते | २ | ६९ |
| स्वज्ञानानतिरिक्तपूर्णवपुषः | २ | १०८ |
| स्वश्च स्वाधारमीशं भुवि | १ | २१ |
| स्वरूपं सत्त्वाख्यो गुण इह हृदः | २ | १८ |
| स्वरूपज्ञानं यन्न दहति सुषुप्तावपि | २ | ८० |
| स्वर्णक्षेत्रवधूस्पृहासहितहृत्तन्मुक्त... | १ | १ |
| स्वाचार्योक्तस्वतत्त्वप्रवणतरमनाः | १ | ८३ |
| स्वामिन् ! सत्यपरायणा अपि बुधाः | २ | ३१ |
| स्वामिन् ! ममान्तःस्थितघोरवासना... | १ | ८६ |
| स्वेष्टाहारे वधूनामभिमतगमने सर्वजन्तोः | २ | ७५ |
| स्वोपमानपरमेश्वरं विना ज्ञानिनं | १ | ४९ |


# परिशिष्टम्-२

## कैवल्यदीपिकायां प्रयुक्तानां छन्दसां सूची

| *छन्दसां नामानि* | *पद्यक्रमाङ्काः* |
|---|---|
| अनुष्टुप् (१) | द्वितीयप्रकरणे - १५० |
| आर्या (१०) | प्रथमप्रकरणे - ११, २८, ३१, ३२, ६१, ६२, ७८, ७९, ८०, |
| | द्वितीयप्रकरणे - १४९ |
| इन्द्रवंशा (१) | प्रथमप्रकरणे - ९२ |
| इन्द्रवज्रा (८) | प्रथमप्रकरणे - ३, १४, ३५, ७१, ८९ |
| | द्वितीयप्रकरणे - ४, ११, ७७ |
| उपजातिः (१५) | प्रथमप्रकरणे - ५, ९, २९, ४२, ५५, ५९, ७६, ८१, ८६, ९०, १०० |
| | द्वितीयप्रकरणे - ८, ४८, ५०, ७९ |
| उपेन्द्रवज्रा (२) | प्रथमप्रकरणे - ६७, ६८ |
| पञ्चचामरः (१) | द्वितीयप्रकरणे - १३८ |
| पृथिवी (५) | प्रथमप्रकरणे - ३८, ६४, ८२, ९८ |
| | द्वितीयप्रकरणे - ६५ |
| मत्तकोकिलम् (३) | प्रथमप्रकरणे - ४५, ४६, ४७ |
| मन्दाक्रान्ता (१२) | प्रथमप्रकरणे - १५, २५, ३०, ३३, ८७, १०६ |
| | द्वितीयप्रकरणे - १०, २६, २७, ३८, ४२, १७४ |

| | |
|---|---|
| मालिनी (७) | प्रथमप्रकरणे - १६, ५७, ८४, ८८ |
| | द्वितीयप्रकरणे - ७०, १६८, १७१ |
| भुजङ्गप्रयातम् (१) | प्रथमप्रकरणे - ४ |
| रथोद्धता (१) | प्रथमप्रकरणे - ४९ |
| वंशस्थः (२) | प्रथमप्रकरणे - ४३ |
| | द्वितीयप्रकरणे - ११० |
| वसन्ततिलका (२०) | प्रथमप्रकरणे - ७, १०, १७, १९, ३७, ५२, ५६, ६५, ६९, ७०, ८५, ९६, १०७ |
| | द्वितीयप्रकरणे - १, ७, ९, १५, ४४, १३२, १३४ |
| शार्दूलविक्रिडितम् (९१) | प्रथमप्रकरणे - १, ८, १२, १३, १८, २०, २२, ४०, ४८, ५३, ६०, ६३, ६६, ७२, ७३, ७५, ९५, १०२, १०३, १०५, १०८ |
| | द्वितीयप्रकरणे - ३, ६, १२, १३, १४ ,१७, २१, २५, २९, ३०, ३१, ३२, ३४, ३५, ३६, ३७, ४७, ५३, ५५, ५६, ५८, ५९, ६१, ६२, ६९, ७१, ७२, ७६, ७८, ८१, ८२, ८९, ९३, ९४, ९५, ९९, १०५, १०६, १०८, १११, ११२, ११३, ११७, ११८, ११९, १२१, १२४, १२५, १२८, १३५, १३९, १४०, १४१, १४४, १४५, १५१, १५२, १५३, १५५, १५६, १५७, १५८, १५९ ,१६०, १६३, १६४, १६५, १६९, १७६ |
| शालिनिः (७) | प्रथमप्रकरणे - २४, ४४, ७४, ९७ |
| | द्वितीयप्रकरणे - ९१, १६१, १६२ |



| | |
|---|---|
| शिखरिणी (१९) | प्रथमप्रकरणे - २३, ३४, ५८, ९९, |
| | द्वितीयप्रकरणे - २, १८, ३९, ४०, ४५, ४६, ४९, ६०, ६८, ८०, ८६, १०२, १४३, १६६, १६७ |
| स्रग्धरा (७८) | प्रथमप्रकरणे - २, ६, २१, २६, २७, ३६, ३९, ४१, ५०, ५१, ५४, ७७, ८३, ९१, ९३, ९४, १०१, १०४ |
| | द्वितीयप्रकरणे -५, १६, १९, २०, २२, २३, २४, २८, ३३, ४१, ४३, ५१, ५२, ५४, ५७, ६३, ६४, ६६, ६७, ७३, ७४, ७५, ८३, ८४, ८५, ८७, ८८, ९०, ९२, ९६, ९७, १००, १०१, १०३, १०४, १०७, १०९, ११४, ११५, ११६, १२०, १२२, १२३, १२६, १२७, १२९, १३०, १३१, १३३, १३६, १३७, १४२, १४६, १४७, १४८, १५४, १७०, १७२, १७३, १७५ |

# परिशिष्टम्-३

## कैवल्यदीपिकायाम् उदाहृतानां ग्रन्थानां सूची

| *ग्रन्थनाम* | *सन्दर्भपद्यसङ्ख्या* |
|---|---|
| उपनिषद्भाष्यम् | १.६ |
| उपनिषद्भाष्यवार्तिकम् | १.६ |
| छान्दोग्योपनिषद् | २.१७५ |
| जीवन्मुक्तिविवेकः | १.६ |
| पञ्चदशी | १.६ |
| पञ्चपादिका | १.६ |
| पराशरस्मृतिः | २.६१ |
| पातञ्जलयोगशास्त्रम् | १.१ |
| भारतम् (महाभारतम्) | २.१६४ |
| रामगीता | १.२८ |
| वाचपत्यम् | १.६ |
| वेदपादस्तुतिः | २.२३ |
| शारीरभाष्यम् | १.१ |
| शिवरहस्यः | १.१६ |
| शिवानन्दलहरी | १.१६ |
| सङ्क्षेपशारीरकम् | १.६ |

# परिशिष्टम्-४

## कैवल्यदीपिकाम् उद्धातानां ग्रन्थकर्तॄणां नामानि सञ्ज्ञापदानि च

| *ग्रन्थकर्तृनाम सञ्ज्ञापदञ्च* | *सन्दर्भपद्यसङ्ख्या* |
|---|---|
| कृष्णः | प्र.व्या. १.२, १.४ |
| कृष्णयोगीन्द्रः | १.५ |
| गार्गी | २.४५ |
| जनकः | २.४५, २.४७, २.१६४ |
| तुलाधरः | २.१६४ |
| धर्मव्याधः | १.९७, २.१६४ |
| नारदः | २.१३३ |
| पाराशरः | २.१६१ |
| भगवत्पादः (शङ्कराचार्यः) | १.१ |
| भरतः | १.१०१ |
| भाष्यकारः (शङ्कराचार्यः) | १.१ |
| भृगुः | २.११८ |
| मृगीध | २.१३३ |
| याज्ञवल्क्यः | २.४५, २.१३२ |
| रुद्रः | २.१३३ |
| वसिष्ठः | २.१४६ |
| वासुदेवः | २.१३३ |

| | |
|---|---|
| विदुरः | २.१६४ |
| विद्यारण्यः | २.४५, २.४७, २.१३० |
| विरिश्चिः | २.१३३ |
| विश्वामित्रः | २.४५, २.४७ |
| व्यासः | १.१ |
| शङ्करपूज्यः | प्र.व्या. ३ |
| शाकल्यः | २.४५ |
| शुकः | १.९७ |
| शुकः | २.१३३ |
| सनकादिः | २.१३३ |
| हरिः | २.१३३, २.१६४ |


# परिशिष्टम्-५

## कैवल्यदीपिकाम् उद्धृतानां श्रुतिस्मृत्यादिवाक्यानां सूची


| *वाक्यम्* | *आकरग्रन्थः* | *पद्यक्रमाङ्कः* |
|---|---|---|
| अक्षय्यं ह वै चातुर्मास्ययाजिनः | आप.श्रौ.सू. १-२८-१ | २.९४ |
| अक्षरात्परतः परः | मुण्ड.उ. २-१-२ | १.१०५ |
| अज्ञानकलुषं जीवं ज्ञानाभ्यासात् | आ.बो. ५ | २.८८ |
| अत्रायं पुरुषः स्वयंज्योतिः | बृह.उ. ४-३-९ | १.७२ |
| अथात आदेशो नेति नेति | बृह.उ. २-३-६ | २.१० |
| अथातो ब्रह्मजिज्ञासा | ब्र.सू. १.१.१ | १.१ |
| अध्यारोपापवादाभ्यां ज्ञातव्यः... | भ.गी.शां.भा.१३.१३ | १.२६ |
| अध्यासो नाम अतस्मिन्तद्बुद्धिः | ब्र.सू.शा.भा. अध्यासभाष्यम् | १.२८ |
| अनात्मज्ञस्य विषय आत्मज्ञः | अ.उ. ४-३ | २.४७ |
| अनात्मविदमुक्तोऽपि नभो विहरणाा... | अ.उ. ४-२ | २.४७ |
| अनेकजन्मसंसिद्धः | भ.गी. ६-४५ | १.१२ |
| अन्धं तमः प्रविशन्ति | ईश.उ. ९ | २.४८, २.५३ |
| अन्यदेव तद्विदिताद् | के.उ. १-३ | १.७४ |
| अपाणिपादो जवनो गृहीता | श्वे.उ. ३-१९ | २.५८ |
| अपि शीतरुचावर्के सुतीक्ष्णे | अ.उ. ४-९ | २.८९ |
| अभयं सत्त्वसंशुद्धिः | भ.गी. १६-१ | २.१७ |
| अभावना वा विपरीतभावना... | वि.चू. ११७ | १.५४ |
| अयमहमस्मि | बृह.उ. ४-२-४ | १.८६ |
| अयमात्मा ब्रह्मैव | बृह.उ. २.५.१९, १.५.१९ | १.१९, १.४७ |
| अयमानन्दमयः प्रियाद्यवयवः | ? | १.६८ |

| | | |
|---|---|---|
| अविनाशी वा अरेऽयमात्मा | बृह.उ. ४-५-१४ | २.९४ |
| अशरीरं वाव सन्तं न प्रियाप्रिये | छा.उ. ८-१२-१ | १.१०३ |
| असङ्गो ह्ययं पुरुषः | बृह.उ. ४-३-१५ | २.३६, २.५५ |
| असाध्यः कस्यचिद्योगः कस्यचित् | ल.यो.वा. २९.६० | २.१६९ |
| असीत्यर्थे चतुर्थी स्याद् | राम.उ. ४-१४ | १.१ |
| अहङ्कारग्रहान्मुक्तः स्वरूपमुपपद्यते | वि.चू. ३०१ | १.११ |
| अहङ्कारादिदेहान्तान्बन्धानज्ञान... | वि.चू. २८ | १.११ |
| अहमन्नं सदान्नाद इति ब्रह्मवेदनम् | पा.उ. ३८ | २.२६ |
| अहमेव परं ब्रह्म | तै.उ. ६-४४ | १.६० |
| आघ्राणभक्षो विहितः सुरायास्तथा | भा.पु. ११-५-१३ | २.७७ |
| आचार्यवान्पुरुषो वेद | छा.उ. ६-१४-२ | १.३ |
| आचार्याद्ध्येव विद्या विदिता | छा.उ. ४-९-३ | १.७ |
| आचित्तशुद्धि कर्मानुष्ठेयम् | ? | २.५१ |
| आचिनोति हि शास्त्राणि | ब्रह्माण्ड.पु. ३२-३२ | २.३३ |
| आत्मन आकाशः | तै.उ. २-१-१ | १.६९ |
| आत्मनस्तु कामाय सर्वं प्रियं... | बृह.उ. २.४.५ | २.११५, २.११६. २.१२१ |
| आत्मनि चैवं विचित्राश्च हि | ब्र.सू. २-१-२८ | २.४२ |
| आत्मा वा अरे द्रष्टव्यः | बृह.उ. २-५-४ | १.३, २.८७ |
| आत्मानं चेद्विजानीयादयमस्मीति | बृह.उ. ४-४-१२ | १.६, २.२४ |
| आत्मैव स्वयं ज्योतिर्भवति | बृह.उ. ४-३-९ | २.११५ |
| आत्मैवेदं सर्वम् | छा.उ. ७-२५-२ | १.७५ |
| आनन्दो विषयानुभवो नित्यत्वम्... | पं.पा., पृ. ४ | २.१३९ |
| आभूतसंप्लवं स्थानममृतत्वम्... | वि.पु. २-५-९६ | १.८ |
| आम्नायस्य क्रियार्थत्वाद् | जै.सू. १-२-१ | २.७६ |
| आरब्धस्य फले ह्येते भोगो ज्ञानं | उ.सा. ४-४ | २.३५ |
| आवृत्तिरसकृदुपदेशात् | ब्र.सू. ४-१-१ | १.९०, २.६४ |
| इन्द्रियस्येन्द्रियार्थे रागद्वेषौ | भ.गी. ३-३४ | २.५५ |
| इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते | भ.गी. २-६७ | २.२३ |



| | | |
|---|---|---|
| इन्द्रियैरर्थोपलब्धिर्जागरणम् | पं.क. १ | १.२४ |
| इन्द्रो मायाभिः पुरुरूप ईयते | बृह.उ. २-५-१९ | २.३८ |
| इषे त्वा | य.वे. १-१ | २.९२ |
| इष्टं हि विदुषां लोके | का.सू. १.१ | २.१३५ |
| ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन | भ.गी. १८-६१ | २.५५ |
| ईश्वरानुग्रहादेव पुंसामद्वैतवासना | अ.गी. १-१ | २.१५६ |
| ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभासिने | ल.सु. १ | १.४ |
| उतेव स्त्रीभिः सह मोदमानो... | बृह.उ. ४-३-१३ | १.२४ |
| उद्बोधितोऽपि कबले | अ.र.म. ३० | २.८९ |
| उमासहायं त्रिलोचनं नीलकण्ठम् | कै.उ. १-७ | १.७७ |
| ऊर्ध्वमूलमवाक्छाखः | कठ.उ. २-३-१ | २.५८ |
| ऋतौ भार्यामुपेयात् | आ.श्रौ.सू. २-१६-२५ | २.७५ |
| एकं रूपं बहुधा यः करोति | कठ.उ. २-२-१२ | २.३८ |
| एक एव हि भूतात्मा भूते भूते | ब्र.बिं.उ. १२, त्रि.ता.उ. ५.१२ | २.३८, २.३९, २.११६ |
| एकमेवाद्वयं ब्रह्म नेह नाना | अ.उप. ६३ | १.४७ |
| एकमेवाद्वितीयं ब्रह्म | छा.उ. ६-२-१ | १.६९ |
| एतच्छ्रेयो येऽभिनन्दन्ति | मुण्ड.उ. १-२-७ | १.८, २.५३ |
| एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः | वे.वि. २-१०५ | १.५४ |
| एतस्यैवानन्दस्यान्यानि भूतानि | बृह.उ. ४-३-३२ | २.१३२ |
| एष सर्वेश्वर एष सर्वज्ञः | माण्डू.उ. १-६ | २.४२ |
| एष ह्येव साधुकर्म कारयति | कौ.ब्रा. ३-८ | २.५५ |
| एष ह्येवानन्दयाति | तै.उ. २-७ | २.५८ |
| ऐतदात्म्यमिदं सर्वं तत् सर्वं | छा.उ. ६.८.७ | २.१७५ |
| ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् | ब्र.सू. ३.४.५१ | १.९१ |
| ओं तद्ब्रह्म | महा.उ. १५-४ | १.१ |
| कर्तृत्वकरणत्वाभ्यां विक्रियेत | प.द. ३-८ | २.११ |
| कर्मजालं कर्त्रधीनत्वात् | ? | २.८२ |

| | | |
|---|---|---|
| कर्माध्यक्षः सर्वभूताधिवासः साक्षी | श्वे.उ. ६-११ | २.३६ |
| काम एष क्रोध एष रजोगुणसमुद्भवः | भ.गी. ३-३७ | २.५५ |
| कामः सङ्कल्पो विचिकित्सा | बृह.उ. १-५-३ | २.११ |
| कार्योपाधिरयं जीवः | शु.उ. ३.१२, त्रि.महा.उ. ४.८ | १.७६ |
| कार्योपाधिरयं जीवः कारणोपाधि... | शु.उ. १२ | १.४४ |
| कालत्रितयेषु अबाध्यं तत्सत्यम् | भामती (?) | २.११२ |
| कीटको भ्रमरं ध्यायन् भ्रमरत्वाय | वि.चू. ३५९ | २.८६ |
| कूटस्थनित्यसुखबोधतनोः प्रातीचो... | अ.र.म. ५ | २.८९ |
| क्षणमात्रं न तिष्ठन्ति वृत्तिम् | अप. १३४ | १.९६ |
| क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तद् ज्ञानं मतं मम | भ.गी. १३-२ | १.२३ |
| गर्भ एवैतच्छयानो वामदेव एवमुवाच | ऐ.उ. २-५ | १.१२ |
| गहना कर्मणो गतिः | भ.गी. ४-१७ | २.५१, २.६६ |
| गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् | ब्र.सू.शां.भा. १.४.४ | २.११९ |
| घटात्पटमुपायाति पटाच्छकटमुत्कटम् | अ.उ. ३-६ | २.१६ |
| घटे नष्टे यथा व्योम व्योमैव भवति | वि.चू. ५६६ | १.१०६ |
| चतुर्णां वर्णानां ब्राह्मणो वरीयान् | ब्रह्म.पु. ८५-२३(?) | १.१ |
| चित्तं ब्रह्मरसं स्पृष्ट्वा नैवोत्तिष्ठेत | ? | २.१९ |
| चिदाभासान्तधीवृत्तिज्ञानबोधे | ? | २.१२ |
| चैतन्यस्यैकरूपत्वाद् भेदो युक्तः | अप.अनु. ४३ | २.१२८ |
| छायाहङ्कारयोरैक्यं तप्तायःपिण्डवत् | दृ.वि. ७-८ | २.२४ |
| जगज्जीवेश्वरत्वादिविचित्रविभवम् | ? | २.९० |
| जन्मकर्म च मे दिव्यम् | भ.गी. ४-९ | १.७७ |
| जाग्रत्संस्कारजनितः प्रत्ययः | पं.क. २ | १.२४ |
| जीवः शिवः शिवो जीवः | स्क.उ. ६ | २.३७ |
| जीवन्मुक्तपदं त्यक्त्वा विदेहे | मु.उ. २-७६ | १.१०५ |
| ज्ञाता ज्ञातं च...दन्यमि | ? | १.७४ |
| ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः | श्वेत.उ. १-११ | १.२१ |
| ज्ञानसमकालमुक्तः | प.सा. ८३ | १.१०० |





| | | |
|---|---|---|
| ज्ञानाग्निः सर्वकर्माणि | भ.गी. ४-३७ | २.५० |
| ज्ञानादेव तु कैवल्यम् | स.वे.सा. १७० | १.१००, २.४७ |
| ज्ञानेन्द्रियाणि खलु पञ्च | ? | १.३६ |
| तं तं लोकं जयते ताँश्च कामान् | मुण्ड.उ. ३-१-१० | १.१०२ |
| तं त्वौपनिषदं पुरुषं पृच्छामि | बृह.उ. ३-९-२६ | २.७ |
| ततस्तु तं पश्यते निष्कलं ध्यायमानः | मुण्ड.उ. ३-१-८ | १.८३, २.८७ |
| तत्त्वमसि | छा.उ. ६.८.७ | १.४, १.१९, २.५९ |
| तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः | भ.गी. ३-२८ | १.१०१ |
| तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् | यो.सू. १-१६ | २.१६० |
| तत्र निरतिशयं सर्वज्ञबीजम् | यो.सू. १-२५ | १.७७ |
| तत्र प्रत्ययैकतानता ध्यानम् | यो.सू. ३-२ | १.९२, २.३० |
| तत्सृष्ट्वा तदेवानुप्राविशत् | तै.उ. २-६ | २.३७ |
| तथा च लोकेऽनुभवः | ब्र.सू.शा.भा. अध्यासभाष्यम् | १.२८ |
| तदधिगमे उत्तरपूर्वाघयोः | ब्र.सू. ४-१-१३ | १.१०३ |
| तदात्मानात्मनोस्सम्यग्विचारेणैव | वि.चू. २०५ | २.६८ |
| तदेवास्वादयत्यन्तः बहिर्व्यवहरन्नपीति | ? | २.२३ |
| तदैक्षत | छा.उ. ६-२-१ | १.२ |
| तद् ब्रह्म | तै.उ. १-५-१ | १.२ |
| तद्भूतानां क्रियार्थेन समाम्नाय | जै.सू. १-१-२५ | २.७६ |
| तद्यथेह कर्मचितो लोकः क्षीयते | छा.उ. ८-१-६ | १.८ |
| तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् | मुण्ड.उ.१-२-१२ | १.१४ |
| तद्वैचित्र्यादनेकधा | पं.द. १-१७ | १.३४ |
| तन्मूर्ध्न्युदयात्कराम्बुजं कालाहि... | भा.पु. ७-९-५ | १.१६ |
| तमात्मस्थं येऽनुपश्यन्ति धीराः | कठ.उ. २-२-१२ | २.७३ |
| तमेतं वेदानुवचनेन ब्राह्मणा | बृह.उ. ४-४-२२ | २.६८, २.१५८ |
| तमेव विदित्वा | श्वे.उ. ६-१५, ३-८ | १.१३ |
| तरति शोकमात्मवित् | छा.उ. ७-१-३ | १.२०, २.१७० |
| तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः | मुण्ड.उ. ३-१-१० | १.९४, २.१३३ |

| | | |
|---|---|---|
| तस्य तावदेव चिरम् | छा.उ. ६-१४-२ | २.३२ |
| तस्याभिध्यानाद्योजनात् तत्त्वभावात् | श्वे.उ.१.१०; ना.प.उ.९.९ | १.८८ |
| तीव्रे न्यासद्वयं भवेत् | जी.वि. ४-९ | २.१६१ |
| ते ध्यानयोगानुगता अपश्यन् | श्वे.उ. १-३ | २.९८ |
| ते ये शतम् | तै.उ. ३-८ | २.१३२ |
| तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया | ब्र.सू.शा.भा. १.१.१ | १.१२ |
| तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः | भा.पु. ६-२-१७ | २.५२ |
| त्वं वा अहमस्मि भगवो देवते | व.उ.२.३४; ब्र.सू.शां.भा. ३.३.३७ | १.८१ |
| त्वम्पदार्थविचाराय संन्यासः | उ.सा. २१९ | २.२९, २.१५८ |
| दीक्षयाचार्यमूर्तिस्थ | ? | १.१६ |
| दीक्षां मे दिश चाक्षुषीम् | शि.ल. २९ (?) | १.१६ |
| दृश्यते त्वग्र्यया बुद्ध्या | कठ.उ. १-३-१२ | १.७१, २.७ |
| दृष्टानुश्रविकविषयवितृष्णस्य | यो.सू. १-१५ | १.८ |
| देवो भूत्वा देवानप्येति | बृह.उ. ४-१-२ | २.८६ |
| दोषबुद्ध्योभयातीतो निषेधान्न | भा.पु. ११-७-११ | २.८९ |
| द्रव्यमन्त्रक्रियाकालयुक्तयः | अ.उ. ४-६ | २.४७ |
| द्रव्यमन्त्रक्रियायोगशक्त्याप्नोत्येव | अ.उ. ४-२ | २.४७ |
| द्वा सुपर्णा सयुजा सखाया | मुण्ड.उ. ३-१-१ | २.५८ |
| द्वाविमावथ पन्थानौ यत्र | ब्र.पु. २३७-६ | २.५१ |
| द्वितीयाद्वै भयम् | बृह.उ. १-४-२ | १.२ |
| द्वौ क्रमौ चित्तनाशस्य योगः | ल.यो.वा. २७.७२ | २.१६९ |
| ध्येयैकगोचरं चित्तं समाधिः | पैङ्गल.उ. ३-२ | १.१०, २.१६ |
| न कर्तृत्वं न कर्माणि लोकस्य | भ.गी. ५-१४ | २.३६, २.५५ |
| न चेदिहैमापचितिं यथाहंसः | भा.पु. ६-१-७ | २.५२ |
| न तस्य कार्यं करणं च विद्यते | श्वे.उ. ६-८ | २.५८ |
| न तु तद्द्वितीयमस्ति | बृह.उ. ४-३-३० | १.७३ |
| न मन्त्राणां विदुषां जामितास्ति | ई.उ.शां.भा. ४ | २.२८ |
| न योगेन न साङ्ख्येन कर्मणा | वि.चू. ५८ | २.४० |





| | | |
|---|---|---|
| न विज्ञातेर्विज्ञातारं विजानीया | बृह.उ. ३-४-२ | १.७३ |
| न हि कल्याणकृतकश्चित् | भ.गी. ६-४० | २.१५६ |
| न हि दृष्टे अनुपपन्नं नाम | ब्र.सू.शां.भा. ४-१-२ | |
| | बृ.उ.शां.भा. ४-३-६ | २.६९ |
| न हि द्रष्टुर्दृष्टेः | बृह.उ. ४-३-२३ | १.७१ |
| न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते | बृह.उ. ४-३-३० | १.७१, १.७३ |
| न हि वेदविहितं किञ्चिदकर्तव्यता... | ब्र.सू.शां.भा. २-१-२२? | २.९, २.१५७ |
| न हीन्द्रियाण्यनुपादाय प्रत्यक्षादि... | ब्र.सू.शां.भा. अध्यासभाष्यम् | २.२३ |
| नादत्ते कस्यचित्पापं न चैव | भ.गी. ५-१५ | २.३६ |
| नान्यः पन्था अयनाय विद्यते | महावा. ३; ल.उ. ७ | २.५८ |
| नाभुक्तं क्षीयते कर्म | ब्र.वै.पु. १.४४.७४; | १.१०४, |
| | ना.पु. २९.१८ | २.५० |
| नावगतब्रह्मात्मभावस्य यथापूर्वम् | ब्र.सू.शां.भा. १-१-४ | २.३२ |
| नावेदविन्मनुते तं बृहन्तम् | तै.ब्रा.३.१२.९.७; इति.उ.२; | २.८ |
| | शाट्या.उ.४; | |
| निगमाचार्यवाक्येषु भक्तिः | अप.अनु. ८ | १.१० |
| नित्यानित्यवस्तुविवेकः | ब्र.सू.शा.भा. १-१-१ | १.८ |
| नित्यान्यभिहितानि कर्माणि | तै.उ.शां.भा. १-१-१ | २.५१ |
| निद्रया दर्शितानर्थान् न पश्यति | द.स्तो.वा. १-१२ | १.९३ |
| निरपेक्षं मुनिवरं तं निर्वैरं समदर्शिनम् | भा.पु. ११-१४-१६ | २.१३३ |
| निरीहम् | रुद्राष्टकम् (?) | १.२ |
| निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः | वे.क.व्या. १.१.२० | १.१ |
| निवृत्ता सा कथं भूयः प्रसूयेत... | उ.सा. १-१८ | २.८३ |
| निवृत्ता सा कथं भूयः प्रस्तूयेत... | उ.सा. १८ | २.३१ |
| निष्ठापरस्समाधिपरस्स्यात् | ? | २.७७ |
| नैवास्ति किञ्चित्कर्तव्यमस्ति चेन्न | जा.द.उ. १-२३ | २.३० |
| नोत्पद्यते विना ज्ञानं विचारेणा... | अप.अनु. ११ | २.६५ |
| पञ्च पञ्चनखा भक्ष्याः | ? | २.७६ |

| | | |
|---|---|---|
| पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् | आ.बो. १३ | १.३८ |
| परव्यसनिनी नारी व्यग्रापि गृहकर्मणि | यो.वा. ५-७४-८३ | २.२३ |
| परा यया तदक्षरमधिगम्यते | मुण्ड.उ. १-१-५ | २.९ |
| पराञ्चि खानि व्यतृणत् | कठ.उ. २-१-१ | २.२३ |
| परास्य शक्तिर्विविधैव श्रूयते | श्वे.उ. ६-८, भव.उ. २-४४ | १.७७, २.९७ |
| परिच्छेदरहितं ब्रह्म | त्रि.महा.उ. १-१ | १.२ |
| परित्राणाय साधूनां विनाशाय... | भ.गी. ४-१८ | २.६१ |
| परोक्षवादो वेदोऽयं बालानामनुशासनम् | भा.पु. ११-३-४४ | २.७४ |
| पापे गुरूणि गुरुणि कुर्वाणाः | वि.पु. २-६-३८ | २.५२ |
| पिशाचस्वेच्छितमरूपम् | ? | २.४७ |
| पुण्येन पुण्यं लोकं नयति | प्रश्न.उ. ३-७ | २.७३ |
| पुण्यैर्देवत्वमाप्नोति निषिद्धैर्नारकीम् | म.भा. १२-३२९-२५ | २.७३ |
| पुरत्रये क्रीडति यश्च जीवस्ततस्तु | कै.उ. १४ | २.३७ |
| पुष्करपलाश आपो न श्लिष्यन्ते | छा.उ. ४-१४-३ | १.९६ |
| प्रकृतिं पुरुषञ्चैव विद्ध्यनादी | भ.गी. १३-१९ | १.३२ |
| प्रत्यग् बोधो य आभाति | पं.द. ७-७६ | १.१ |
| प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन... | मी.श्लो. ५-४ | १.७ |
| प्रसन्नं तमनुप्राप्य पृच्छेद् | वि.चू. ३६ | १.१७ |
| प्राप्य पुण्यकृतां लोकानुषित्वा | भ.गी. ६-४१ | २.१५६ |
| प्लवा ह्येते अदृढा | मुण्ड.उ. १-२-७ | २.७६ |
| फलव्याप्यत्वमेवास्य शास्त्रकृद्भिः | पं.द. ७-९० | २.१४ |
| बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते | भ.गी. ७-१९ | १.१२ |
| बुद्धेः कारणात्मनाऽवस्थानम् | पं.क. ५ | १.२४ |
| ब्रह्म वेद ब्रह्मैव भवति | मुण्ड.उ. २-२-९ | १.८३, २.१७२ |
| ब्रह्मचर्यं समाप्य गृही भवेत् | जा.बा. ४ | २.७५ |
| ब्रह्मणा सह ते सर्व | ब्र.सू.शां.भा. ४-३-११ | २.१६२ |
| ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिः | पं.द. ७-७२ | २.१४ |





| | | |
|---|---|---|
| ब्रह्मविद् ग्रसति ज्ञानात्सर्वम् | पा.उ. ३९ | १.९६, २.२६ |
| ब्रह्मात्मैकत्वविज्ञानं सम्यग्ज्ञानम् | वि.चू. २०४ | २.६८ |
| ब्रह्मानन्दरसानुभूतिकलितैः | वि.चू. ४१ | १.१७ |
| ब्रह्मैव सन् ब्रह्माप्येति | बृह.उ. ४-४-७, बृह.उ. ४-४-६ | १.१९, १.९३ |
| ब्रह्मैवेदं सर्वम् | मुण्ड.उ. २-२-११ | १.७५ |
| भक्ते भक्तसमाचार | अ.उ. २-३० | २.२६ |
| भविष्यति मायोपाधिर्जगद्योनिः | ? | १.३३ |
| भिद्यते हृदयग्रन्थिः | मुण्ड.उ. २-२-८ | १.५२ |
| भृगुर्वै वारुणिः वरुणं पितरम् | तै.उ. ३-१ | १.९५ |
| भोगेन त्वितरे क्षपयित्वा सम्पद्यते | ब्र.सू. ४-१-१९ | १.१०३ |
| मद्धारणां धारयतः कानुसिद्धिः... | उ.गी. ५-३२ | २.४४ |
| मनसैवेदमाप्तव्यम् | कठ.उ. १-२-११ | २.७, २.१५ |
| मनसो मनो यत् | के.उ. १-२ | १.६८ |
| मन्दे न्यासो न कोऽपि हि | जी.वि. ४-८ | २.१६१ |
| मन्यन्तां संशयापन्ना | अव.उ. १६ | २.३० |
| महाकर्ता महाभोक्ता महात्यागी | अ.उ. १-१८ | २.२४ |
| महाशाला महाश्रोत्रिया उद्दालको... | छा.उ. ६.८.१ | १.९५ |
| मानान्तरोपरोधे तु मुख्यार्थस्य परिग्रहे | वा.वृ. ४७ | १.७८ |
| मायां तु प्रकृतिं विद्यान्मायिनं तु | श्वे.उ. ४-१० | १.३२ |
| मायामात्रमिदं द्वैतम् | माण्डू.उ. १-१७ | १.६० |
| मायामेघो जगन्नीरं वर्षत्येव | पं.द. ८-७५ | २.८९ |
| मिथ्यात्वादि यदध्यस्तं ब्रह्मण्येतस्य | वार्तिकम् ? | १.६९, २.१३६ |
| मुक्तिदा गुरुवागेका | ? | १.१६ |
| मूलप्रकृतिरविकृतिर्महदाद्याः | सां.का. ३ | १.३२ |
| मृत्तिकेत्येव सत्यम् | छा.उ. ६-१-४ | २.१०४ |
| मौनेन च | बृह.उ.(?) ३-५-१ | २.१५३ |
| यं विदित्वा मुनिर्भवति | बृह.उ. ४-४-२२ | २.१५६ |

| | | |
|---|---|---|
| यच्छेद्वाङ्मनसी प्राज्ञः | कठ.उ. १-३-१३ | २.२३ |
| यज्ञायाचरतः कर्म समग्रं प्रविलीयते | भ.गी. ४-२३ | २.२८ |
| यतः प्रवृत्तिर्भूतानां येन सर्वमिदम् | भ.गी. १८-४६ | २.३६ |
| यतो यतो निवर्त्यते ततस्ततोऽपि | वि.नी. ३६-१४ | १.९२ |
| यतो वाचो निवर्तन्ते | तै.उ. २-४-१ | १.१, २.७ |
| यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन | बृह.उ. ४-५-१५ | १.५७, २.२४ |
| यत्र नान्यत् पश्यति | छा.उ. ७-२४-१ | २.१२९ |
| यत्साक्षादपरोक्षाद् ब्रह्म | बृह.उ. ३-४-१ | २.८७ |
| यथा रविः सर्वरसान्प्रभुङ्क्ते... | अव.उ. ६ | २.२६ |
| यथा विपणगा लोका विहरन्तः | अ.उ. १-३३ | १.९५, २.२२ |
| यदन्यदन्यत्र विभाव्यते भ्रमादध्यासः | रा.गी. ३७ | १.२८ |
| यदहरेव विरजेत्तदहरेव प्रव्रजेत् | जा.उ. ४-१ | २.१५९ |
| यद्वाऽचानभ्युदितम् | के.उ. १-४ | २.७ |
| यन्मनसा न मनुते | के.उ. १-६ | १.१, १.६८ |
| यमेवैष वृणुते तेन लभ्यः | कठ.उ. १-२-२३, | |
| | मुण्ड.उ. ३-२-३ | १.७४ |
| यस्तु मूढोऽल्पबुद्धिर्वा सिद्धिजालानि | अ.उ. ४-६ | २.४७ |
| यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च | भ.गी. ३-१७ | २.३० |
| यस्त्वेवं ब्राह्मणो विद्यात्तस्य देवाः | तै.आ. ३-१३ | २.४५ |
| यस्य चावधानानवधानाभ्याम् | ब्र.सू.शां.भा. २.३.३२ | १.६८ |
| यस्य तु यथापूर्वं नासावधिगत... | ब्र.सू.शां.भा. १-१-४ | २.३२ |
| यस्य देवे परा भक्तिः | श्वे. उ. ६-२३ | १.३ |
| यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ | भा.पु. ७-१५-२६ | १.१८ |
| यावद्यावन्मुनिश्रेष्ठ ! स्वयं सन्त्यज्यते | अ.उ. १-४४ | १.९२ |
| येषामस्ति परिज्ञानं विनेह ज्ञानसाधनम् | ? | १.१२ |
| येषामस्ति परिज्ञानम् | ? | २.४५ |
| योगश्चित्तवृत्तिनिरोधः | यो.सू. १.२ | २.१६९ |
| योगी चरति लोकानामुपकाराय... | सू.गी. ५-६४ | २.३६ |





| | | |
|---|---|---|
| रक्षको विष्णुरित्यादि सर्वम् | तै.उ. ५-११ | २.९३ |
| रजस्तमश्चाभिभूय सत्त्वं भवति भारत | भ.गी. १४-१० | १.३१, २.१८ |
| रागादयः सन्तु कामं न... | बृ.उ.भा.वा. १-४-१५३९ | १.१०१ |
| रागी कश्चित् | ? | १.९६ |
| रसाः स्वाद्वाम्ललवणतिक्तोष्ण... | अ.हृ. १२६.१४ | २.२६ |
| लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य | वि.चू. ३७९ | २.२३ |
| लोकवल्लीलाकैवल्यम् | ब्र.सू. २-१-३३ | २.३६ |
| लोके व्यवायामिषमद्यसेवा | भा.पु. ११-५-११ | २.७५ |
| लोकेऽस्मिन्द्विधा निष्ठा | भ.गी. ३-३ | २.५१ |
| वर्णाश्रमाचारवता पुरुषेण | वि.पु. ३-८-९ | २.१५८ |
| वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा | भ.गी. २.५८ | २.१६८ |
| वाचारम्भणं विकारो नामधेयं | छा.उ. ६.१.४ | १.४७, २.३३, २.१०४ |
| विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तम् | स.उ. १८,१९ | १.३५ |
| विचारयन्नामरणाद् ब्रह्मज्ञानम् | पं.द. ९-३३ | २.६४ |
| विचार्याप्यापरोक्ष्येण ब्रह्मात्मानम | पं.द. ९-३२ | २.६४ |
| विज्ञानमानन्दम् | बृह.उ. ३-९-२८ | २.१३६ |
| विदेहमुक्त एवासौ विद्यते | अ.उ. ४-१९ | २.२१ |
| विदेहमुक्तिविषये पदे परमपावने | अ.उ. ४-१९ | २.२१ |
| विपर्यस्तो निदिध्यासेत्किं ध्यानम् | प.द. ७-२६१ | २.३० |
| विप्राश्च विप्रभृत्याश्च यत्र चैव | वि.पु. श्रीधरीयव्याख्यानम् | २.४२ |
| विमुक्तश्च विमुच्यते | कठ.उ. २-२-१ | १.१०३ |
| वेदान्तविज्ञानसुनिश्चितार्थाः | मुण्ड.उ. ३-२-६; | |
| | कैव.उ. ३ | २.७, २.१५८ |
| वेदाहमेतं पुरुषं महान्तम् | श्वे.उ. ३-८ | २.८ |
| वैषम्यनैर्घण्येन सापेक्षत्वात्तथा | ब्र.सू. २-१-३४ | २.३६ |
| शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः | यो.सू. १-९ | २.१७ |
| शब्दोऽपि बोधनिषेधतयाऽऽत्ममूलम् | भा.पु. ११-३-३६ | २.१० |
| शरीरिणश्च सचक्षुरचक्षुरिव | ब्र.सू.शां.भा. १-१-४ | २.१५५ |

| | | |
|---|---|---|
| शान्तो दान्त उपरतः | बृह.उ. ४-४२३ | १.८, २.७७ |
| शास्त्रयोनित्वात् | ब्र.सू. १-१-३ | २.७ |
| शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्या... | वि.चू. २६ | १.१० |
| शिखा ते वर्धते वत्स | तै.वा. २.१.२३ | २.७४ |
| शृण्वन्त्वज्ञाततत्त्वास्ते जानन् | अव.उ. १६ | २.३० |
| शौचसन्तोषतपः स्वाध्यायः | यो.सू. २-३२ | २.५२ |
| श्येनो वा सुपर्णो वा | बृह.उ. ४-३-१९ | २.१२५ |
| श्रुतश्च दृष्टवद्दुःखं स्पर्धासूयात्ययादिभिः | भा.पु. ११-१०-२१ | १.८ |
| श्रुतिप्रमाणैकमतेः स्वधर्मनिष्ठा | वि.चू. १५० | २.६३ |
| श्रुतिस्तत्त्वमसीत्याह श्रोतुमोहापनुत्तये | नै.सि. ४-२४ | २.८३ |
| श्रोतुर्मोहापनुत्तय | ? | १.६४ |
| संसिद्धा सविलासमोहविषये | सं.शा. ३-२३९ | १.५१ |
| स आत्मा तत्त्वमसि | छा.उ. ६-१०-३ | २.११३ |
| स आत्मा सर्वानुभूतिः | ? | २.८७ |
| स कारणं स करणाधिपाधिपः | श्वे.उ. ६-९ | १.२ |
| स तत्करस्पर्शयुताखिलाशुभः | भा.पु. ७-९-६ | १.१६ |
| स परमहंसो विज्ञेयः लोकेऽस्मिन् | जी.वि. १-१० | २.१६२ |
| स विद्वानुपसन्नाय सम्य | मुण्ड.उ. १-२-१३ | १.१६ |
| स हंसो नाम तल्लोके | जी.वि. (?) | २.१६२ |
| सगुणेषूपासनेषूपयोक्ष्यते | ब्र.सू.शां.भा. ३.३.३० | १.१ |
| सङ्कल्पो निश्चयो गर्वः स्मरणम् | मा.ला. २-३६ | २.१७ |
| सचक्षुरचक्षुरिव | ब्र.सू.शां.भा. १-१-४ | २.८९ |
| सत्यं ज्ञानमनन्तं ब्रह्म | तै.उ. २-१-१ | १.६९, २.१० २.१३६ |
| सत्यम् | तै.उ. २.१.१; छा.उ.७.१६; बृह.उ. ५.५.१ | २.१३९ |
| सत्यानृते मिथुनीकृत्याहमिदम् | ब्र.सू.शा.भा. अध्यासभाष्यम् | १.५१ |
| सदेव सोम्येदमग्र आसीत् | छा.उ. ६-२-१ | १.१ |





| | | |
|---|---|---|
| समाधिमथ कर्माणि मा | पं.द. ९-१०२ | १.९६ |
| समाधिसिद्धिरीश्वरप्रणिधानात् | यो.सू. २-४५ | १.९ |
| सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य | अ.उ. ४-१८ | २.२१ |
| सर्वं कर्माखिलं पार्थ | भ.गी. ४-३३ | २.५० |
| सर्वं खल्विदं ब्रह्म | छा.उ. ३-१४-१ | १.७५ |
| सर्वं मौन एव | बृह.उ. १-५-३ | २.११ |
| सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि | वि.चू. २७ | १.१० |
| सर्वधर्मोपपत्तेः | ब्र.सू. २-३-३७ | २.३६ |
| सर्वशक्तिपरं ब्रह्म नित्यमापूर्णमद्वयम् | म.र. १७-४७ | २.९९ |
| सर्वस्य वशी सर्वस्येशानः | बृह.उ. ४-४-२२ | १.४९ |
| सर्वस्य साक्षी तमसः साक्षी | नृ.उ. पृ. २२८ | १.७१ |
| सवितर्कविचारानन्दास्मितारूपानुगमात् | यो.सू. १-१७ | १.९ |
| सवितर्यपि शीतरुचौ | आ.वि. १८ | १.९८ |
| सहनं सर्वदुःखानामप्रतीकारपूर्वकम् | वि.चू. २५ | १.१० |
| सा काष्ठा सा परा गतिः | कठ.उ. १-३-११ | १.१ |
| सा हि वाचामगम्यत्वादसत्तामिव | सं.उ. १-२८ | २.१५३ |
| सारांशस्पष्टकथनं यत्तत्प्रकरणं विदुः | ? | १.६ |
| सुरतसुखं तत्सङ्गसौख्यं मनसा | ? | २.२३ |
| सुहृदः साधुकृत्यान्द्विषन्तः पापकृत्याम् | ब्र.सू.शां.भा. ३-३-२६ | १.१०४ |
| सोम्य तदा सम्पन्नो भवति | छा.उ. ६-८-१ | २.१२६ |
| स्वर्गे लोके न भयं किञ्चनास्ति | कठ.उ. १-१-१२ | १.८ |
| हृद्यन्तर्ज्योतिः | बृह.उ. ४-३-७ | १.१ |

# परिशिष्टम्-६

## कैवल्यदीपिकाम् उल्लिखितानां न्यायानां सूची

| *न्यायाः* | *सन्दर्भसङ्केतः* |
| --- | --- |
| .....कथान्यायः | १.८८ |
| अध्यारोपापवादन्यायः | १.१०८ |
| अरुन्धतीदर्शनन्यायः | १.२६ |
| उत्सर्गापवादन्यायः | २.५१ |
| कतकरजोन्यायः | १.८३ |
| काकतालीयन्यायः | १.६२ |
| कीशन्यायः | २.३ |
| निरूपकन्यायः | २.५ |
| प्रतिबिम्बन्यायः | २.३९ |
| बालकाऽऽख्यायिकान्यायः | २.९० |
| भ्रमरकीटन्यायः | १.१९ |
| मर्कटन्यायः | २.३ |
| शाखाचन्द्रन्यायः | १.२६ |
| संवादिभ्रमन्यायः | २.८६, २.१७० |
| सुवर्णरूपकन्यायः | २.५९ |
| स्थूणानिखननन्यायः | २.२ |

# परिशिष्टम्-७

## परिशीलितग्रन्थसूची

**संस्कृतग्रन्थाः —**


१. **अद्वैततत्त्वमीमांसा**, अभेदानन्द भट्टाचार्यः,
परिमल पब्लिकेशन्स्, नवदेहली, २००५

२. **अद्वैतमकरन्दः**, लक्ष्मीधरकविः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९२

३. **अद्वैतसिद्धान्तसारसङ्ग्रहः**, नारायणाश्रमः,
निर्णयसागरमुद्रणालयः, मुम्बई, १९३५

४. **अद्वैतसिद्धिः**, मधुसूदनसरस्वती,
परिमल पब्लिकेशन्स्, दिल्ली, १९८८

५. **अनुसन्धानस्य प्रविधि-प्रक्रिया**, सं- डॉ. नगेन्द्रः,
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१०

६. **अपरोक्षानुभूतिः**, शङ्कराचार्यः,
गीताप्रेस, गोरखपुर, १९८५

७. **अप्रकाशिता उपनिषदः**, चि.कुञ्जनूराजः,
अड्यारग्रन्थालयः, मद्रास, १९३३

८. **अवधूतगीता**, दत्तात्रेयः,
किशनलाल द्वारकाप्रसाद, मथुरा, १९३४

९. **अष्टाध्यायी**, महर्षिः पाणिनिः,
चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३

१०. **अष्टोत्तरशतोपनिषदः**, सं- वासुदेवशर्मा,
चौखम्बा विद्याभवन, वाराणसी, १९९५

११. **आत्मबोधः**, शङ्कराचार्यः,
श्यामकाशी-प्रेस्, मथुरा, १८५६

१२. **आत्मविद्याविलासः**, सदाशिवब्रह्मेन्द्र-सरस्वती,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००६
१३. **आपस्तम्बीयं श्रौतसूत्रम्**, सं- पं.ए.चिन्नस्वामी शास्त्री,
ओरिएण्टल् इन्स्टीट्यूट, बरोडा, १९५५
१४. **आश्वलायनश्रौतसूत्रम्**, सं- रामनारायण विद्यारत्न,
दी एशियाटिक् सोसायटी, कलकत्ता, १९८९
१५. **ईशावास्योपनिषच्छाङ्करभाष्यम्**, शङ्कराचार्यः,
आनन्दाश्रममुद्रणालयः, पूना, १९०५
१६. **उत्तरगीता**, गौडपादाचार्यः,
श्रीवाणीविलासमुद्रायन्त्रालयः श्रीरङ्गम्, १९२६
१७. **उपदेशसाहस्री**, सं- पं. गजाननशास्त्री मुसलगाँवकर,
दक्षिणामूर्तिमठप्रकाशनम्, वाराणसी, २०१०
१८. **उपनिषत्सङ्ग्रहः**, सं- जगदीशशास्त्री,
मोतीलाल बनारसीदास, वाराणसी, २०११
१९. **उपनिषद्भाष्यम् - भागः १,२, ३**, सं- एस्. सुब्रह्मण्यशास्त्री,
दक्षिणामूर्तिमठप्रकाशनम्, वाराणसी, २००४
२०. **ऋग्वेदभाष्यभूमिका**, डॉ. राम-अवध पाण्डेयः,
मोतीलाल बनारसीदास, वाराणसी, १९८३
२१. **ऋग्वेदसंहिता**, सं- रामगोविन्द शास्त्री,
चौखम्बा विद्याभवन, वाराणसी, १९९७
२२. **ऐतरेयोपनिषत्-शाङ्करभाष्योपेता**, शङ्कराचार्यः,
आनन्दाश्रममुद्रणालयः, पूना, १९३१
२३. **कामसूत्रम्**, वात्स्यायनमुनिः,
निर्णयसागरमुद्रणालयः, मुंबई, १९००
२४. **कैवल्यनवनीतम्**, ताण्डवरायस्वामी,
श्रीरमणाश्रमः, तिरुवन्नमलाई, १९६५
२५. **कैवल्योपनिषत्**, सं-जगदीशशास्त्री,
मोतीलालबनारसीदास, वाराणसी, १९९०
२६. **कौशीतकीब्राह्मणोपनिषत्**, सं-कोवेल् ई.बी.,
सी.बी. लेविस् बैपिस्ट् मिशन् प्रेस, कलकत्ता, १८६१



२७. **छान्दोग्योपनिषत्**, सं- काशीनाथशास्त्री,
आनन्दाश्रममुद्राणालयः, पूणे, १९३४
२८. **जीवन्मुक्तिविवेकः**, विद्यारण्यमुनिः,
अड्यार्लाइब्रेरी एण्ड रीसर्च सेण्टर्, मद्रास, १९७८
२९. **जैमिनिसूत्रम्**, महर्षिजैमिनिः,
मोतीलाल बनारसीदास, वाराणसी, १९८४
३०. **तत्त्वप्रदीपिका**, चित्सुखाचार्यः,
चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी, १९८६
३१. **तत्त्वानुसन्धानम्**, महादेवसरस्वती,
दक्षिणामूर्तिमठप्रकाशनम्, वाराणसी, १९९४
३२. **तैत्तिरीयब्राह्मणम्**, सं- नारायणशास्त्री गोडबोले,
आनन्दाश्रम-मुद्राणालयः, पूणे, १९९८
३३. **तैत्तिरीयारण्यकम्**, बाबाशास्त्री फडके,
आनन्दाश्रम-मुद्राणालयः, पूणे, १८९८
३४. **तैत्तिरीयोपनिषच्छाङ्करभाष्यम्**, सं- दिनकर विष्णु गोखले,
गुजराती प्रिंटिंग् प्रेस, मुंबई, १९१४
३५. **तैत्तिरीयोपनिषद्भाष्यवार्तिकम्**, सुरेश्वराचार्यः,
आनन्दाश्रम-मुद्राणालयः, पूणे, १९११
३६. **दक्षिणामूर्तिस्तोत्रम्**, सं- महादेवशास्त्री,
गवर्नमेण्ट ब्रांच प्रेस्, मैसूर, १८९८
३७. **दक्षिणामूर्तिस्तोत्रवार्तिकम्**, सुरेश्वराचार्यः,
गवर्नमेण्ट ब्रांच प्रेस्, मैसूर, १८९५
३८. **दश-उपनिषदः (प्रथमो भागः)**, चि.कुञ्जनूराजः,
अड्यारग्रन्थालयः, मद्रास, १९३५
३९. **धातुरूपनन्दिनी**, जनार्दनहेगडे,
संस्कृतभारती, नवदेहली, २०११
४०. **नारदपुराणम्**, सं- गणेश वासुदेव टैगोर,
मोतीलाल बनारसीदास, वाराणसी, १९८२
४१. **नैष्कर्म्यसिद्धिः**, सुरेश्वराचार्यः,
अच्युतग्रन्थमाला-कार्यालयः, काशी, १९५०

४२. **न्यायचन्द्रिका**, सं. टि.चन्द्रशेखरः,
राजकीयप्राच्यविद्याग्रन्थालयः, मद्रास्, १९६१
४३. **न्यायदर्शनम्**, महर्षिगौतमः,
चौखम्बा-संस्कृत-संस्थान, वाराणसी, १९८३
४४. **पञ्चदशी**, विद्यारण्यमुनिः,
उत्तरप्रदेश संस्कृत संस्थान, लखनऊ, १९९७
४५. **पञ्चपादिका**, पद्मपादाचार्यः,
ओरिएण्टल इन्स्टीट्यूट्, बरोडा, १९४८
४६. **पञ्चीकरणम्**, शङ्कराचार्यः,
अद्वैत-आश्रमः, हिमालचप्रदेशः, १९७९
४७. **परमार्थसारः**, अभिनवगुप्तः,
द रीसर्च डिपार्टमेंट ऑफ द काश्मीर स्टेट, श्रीनगर, १९१६
४८. **पाणिनीयव्याकरणमहाभाष्यम्**, महर्षिः पतञ्जलिः,
चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९८७
४९. **पातञ्जलयोगदर्शनम्**, पतञ्जलिः,
चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२
५०. **पातञ्जलयोगसूत्रम्**, सं- काशीनाथ शास्त्री,
आनन्दाश्रममुद्राणालयः, पूणे, १९०४
५१. **बृहदारण्यकोपनिषत् - शाङ्करभाष्योपेता**, सं- काशीनाथ शास्त्री,
आनन्दाश्रममुद्राणालयः, पूणे, १८९१
५२. **बृहदारण्यकोपनिषद्भाष्यवार्तिकम्**, सुरेश्वराचार्यः,
महेश-अनुसन्धान-संस्थानम्, वाराणसी, १९८२
५३. **बृहदारण्यकोपनिषद्भाष्यवार्तिकसारः**, विद्यारण्यमुनिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८८
५४. **बृहद्धातुकुसुमाकरः**, पं. हरेकान्तमिश्रः,
चौखम्बा संस्कृत प्रतिष्ठान्, दिल्ली, २०१४
५५. **ब्रह्मपुराणम्**,
आनन्दाश्रममुद्राणालयः, पूणे, १८९५
५६. **ब्रह्मसिद्धिः**, मण्डनमिश्रः,
एल्.बी.एस्. राष्ट्रियसंस्कृतविद्यापीठम्, नवदेलही, १९९९



५७. **ब्रह्मसूत्रशाङ्करभाष्यम्-रत्नप्रभाभामतीन्यायनिर्णयोपेतम्**, सं-आचार्य
जगदीशशास्त्री, मोतीलाल बनारसीदास, वाराणसी, २०००
५८. **ब्रह्मसूत्रशाङ्करभाष्यम्-भामतीकल्पतरुपरिमलोपेतम्**, सं-अनन्तकृष्णशास्त्री,
राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली, २०१२
५९. **ब्रह्माण्डपुराणम्**, सं- जगदीशलालशास्त्री,
मोतीलाल बनारसीदास, वाराणसी, १९७३
६०. **भगवद्गीता - शाङ्करभाष्याद्येकादशटीकोपेता**, सं-गजाननशर्मा साधले,
गुजराती प्रिंटिंग् प्रेस, मुंबई, १९३५
६१. **भागवतपुराणम्**,
गीताप्रेस गोरखपुर, १९९७
६२. **महाभारतम्**,
गीताप्रेस गोरखपुर, १९९८
६३. **महावाक्यरत्नावली**, रामचन्द्रसरस्वती,
श्री त्रिलोकनाथमिश्रः, काशी, १९१०
६४. **माण्डूक्योपनिषत् - गौडपादकारिकासहिता**, सं- विनायक गणेश आपटे,
आनन्दाश्रममुद्राणालयः, पूणे, १९३५
६५. **माधवीयधातुवृत्तिः**, सायणाचार्यः,
चौखम्बा संस्कृत सीरीज् ऑफिस, वाराणसी, १९३४
६६. **मीमांसामञ्जरी**, र. तङ्गस्वामिशर्मा,
भारतीयदार्शनिकानुसन्धानपरिषत्, नवदेहली, १९९६
६७. **मीमांसाश्लोकवार्तिकम्**, कुमारिलभट्टः,
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, १९८७
६८. **मुण्डकोपनिषत् -शाङ्करभाष्योपेता**,
आनन्दाश्रममुद्राणालयः, पूणे, १८८२
६९. **योगवासिष्ठः - भागः १,२**, सं- वासुदेव शर्मा पणशीकर्,
निर्णयसागरप्रेस्, मुंबई, १९३७
७०. **रामगीता**,
कर्णाटकप्रिंटिंग प्रेस, मुंबई, १९२८
७१. **वाक्यवृत्तिः**, शङ्कराचार्यः,
आनन्दाश्रममुद्राणालयः, पूणे, १९१५

७२. **विदुरनीतिः**,
गीताप्रेस गोरखपुर, १९९८
७३. **विवरणप्रमेयसङ्ग्रहः**, विद्यारण्यमुनिः,
अमर पब्लिकेशन्स् वाराणसी, १९९९
७४. **विवेकचूडामणिः**, शङ्कराचार्यः,
खेमराज श्रीकृष्णदास, मुंबई, १९०५
७५. **विवेकचूडामणिः**, सं- चन्द्रशेखरभारती
श्रीशारदापीठम्, शृङ्गेरी, १९८५
७६. **विष्णुपुराणम् - श्रीधरीयव्याख्योपेतम्**,
सं-थानेशचन्द्र त्रिपाठी, परिमल पब्लिकेशन्स् दिल्ली, १९८६
७७. **वृत्तरत्नाकरः**, केदारभट्टः,
चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९५
७८. **वेदान्तदर्शन का इतिहास**, आचार्य उदयवीर शास्त्री
विरजानन्द वैदिक संस्थान, देहली, १९७०
७९. **वेदान्तपरिभाषा - अर्थदीपिकायुता**, धर्मराजाध्वरीन्द्रः,
श्री कैलास आश्रम, ऋषिकेश, १९८३
८०. **वेदान्तपरिभाषा - शिखामणिमणिप्रभासंवलिता**, धर्मराजाध्वरीन्द्रः,
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०११
८१. **वेदान्तबोधः**, स्वामी अखण्डानन्द सरस्वती,
सत्साहित्य प्रकाशन ट्रस्ट, मुम्बई, १९८४
८२. **वेदान्तविमर्शः**, डॉ. अभिमन्युः,
परिमल पब्लिकेशन्स, दिल्ली, १९९१
८३. **वेदान्तसङ्ग्रहः**, रामरायकविः,
चिन्मय इंटरनेशनल फाउंडेशन शोध-संस्थान, केरलम्, २०१२
८४. **वेदान्तसारः - विद्वन्मनोरञ्जनीटीका**, सदानन्दयतिः,
मोतीलाल बनारसीदास, वाराणसी, १९७९
८५. **वेदान्तसारः - सुबोधिनीटीका**, सं- कर्नल जी. ए. जैकब,
निर्णयसागरमुद्रणालयः, मुंबई, १९३४
८६. **शाङ्करग्रन्थावली**,
शृङ्गेरी शारदापीठम्, शृङ्गेरी, २००२



८७. **शाङ्करदर्शनमर्मप्रकाशः**, पं. के.कृष्णजोइस्,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, १९९६
८८. **शाङ्करवेदान्ते ज्ञानमीमांसा**, डॉ. कालीप्रसाद-सिंहः,
वाराणसेय-संस्कृत-संस्थान, वाराणसी, १९८३
८९. **शाङ्करवेदान्ते तत्त्वमीमांसा**, डॉ. कालीप्रसाद सिंहः,
विश्वविद्यालय प्रकाशन, वाराणसी, १९८२
९०. **शास्त्रार्थसुममञ्जरी**, सं- आर्. कृष्णमूर्तिशास्त्री,
आर्. कृष्णमूर्तिशास्त्री, चैन्नै, २०१२
९१. **शिवानन्दलहरी**, सं- स्वामी स्वयम्प्रकाशगिरिः,
श्रीदक्षिणामूर्ति मठ प्रकाशन, वाराणसी, १९९९
९२. **शोधप्रविधिः**, डॉ. गणेश-अरुणपाण्डेयौ,
राधा पब्लिकेशन, दिल्ली, २००९
९३. **श्रीमद्भगवद्गीताशाङ्करभाष्यम् - अष्टटीकोपेतम्**, सं- वासुदेव शर्मा,
चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी, १९९२
९४. **श्रीमद्भागवतपुराणम्**, सं- जगदीशलाल शास्त्री,
मोतीलाल बनारसीदास, वाराणसी, १९९९
९५. **श्वेताश्वतरोपनिषत् - शाङ्करभाष्योपेता**, शङ्कराचार्यः,
आनन्दाश्रममुद्राणालयः, पूणे, १९२७
९६. **श्लोकवार्तिकम्**, सं. गङ्गासागररायः,
रत्ना पब्लिकेशन, वाराणसी, १९९३
९७. **सङ्क्षेपशारीरकम्**, सर्वज्ञात्ममुनिः,
चौखम्बा संस्कृत संस्थानम्, वाराणसी, १९९२
९८. **सर्वदर्शनसङ्ग्रहः**, माधवाचार्यः,
चौखम्बा विद्याभवन, वाराणसी, २००६
९९. **सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः**, शङ्कराचार्यः,
श्रीवाणीविलासप्रेस्, श्रीरङ्गम्, १९१२
१००. **साङ्ख्यकारिका**, ईश्वरकृष्णः,
चौखम्बाविद्याभवनम्, वाराणसी, २००१
१०१. **साङ्ख्यतत्त्वकौमुदी**, वाचस्पतिमिश्रः,
चौखम्बा संस्कृत संस्थान, वाराणसी, २००९

१०२. **साङ्ख्यदर्शनम्**, सं- जनार्दनशास्त्री,
भारतमनीषा, वाराणसी, १९७२
१०३. **साहित्यरत्नाकरः**, प्रो. वेम्पटि कुटुम्बशास्त्री,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २०१०
१०४. **सिद्धान्तकौमुदी**, भट्टोजी दीक्षितः,
मोतीलाल बनारसीदास, वाराणसी, १९९७
१०५. **सिद्धान्तबिन्दुः**, मधुसूदनसरस्वती,
महेश-अनुसन्धान-संस्थानम्, वाराणसी, १९९७
१०६. **सिद्धान्तलेशसङ्ग्रहः**, अप्पयदीक्षितः,
भारतीय बुक कार्पोरेशन्, दिल्ली, २००५

## आङ्ग्लग्रन्थाः —

1. **A History of Indian Philosophy**, Surendranath Dasgupta
Cambridge University Press, London, 1922
2. **Introduction to Indian Textual Criticism**, Dr. S.M. Katre,
Deccan College, Pune, 1954
3. **History of Classical Sanskrit Literature**, M. Krishnamachariar,
TTD Press, Madras, 1937
4. **Kaivalya Navaneeta**, Tandavaraya Swaami,
Sri Ramanasramam, Trivannamalai, 1965
5. **Kinds of Texts : Introduction to Indian Textual Criticism**, S.M. Katre
Deccan College, Pune, 1954
6. **Manuscript and Manuscriptology in India**, Subodh Gopan Nandi
Projit Kumar Patil,
Vedic Books, New Delhi, 2010
7. **Manuscriptology Text Criticism**, Dr. Jayant P. Thaker,
Oriental Institute, Vadodara, 2002
8. **Problems of Editing Science Texts**, Ed. V.N. Jha,
Chaukhamba Sanskrit Pratishthan, Varanasi, 1993

## कोशग्रन्थाः -

१. **शब्दकल्पद्रुमः**, राजा राधाकान्तदेवः,
चौखम्बा संस्कृत सीरीज् ऑफिस्, वाराणसी, १९६७
२. **अमरकोशः - रामाश्रमीसहितः**, अमरसिंहः,
चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०११



३. **अद्वैतवेदान्तसाहित्येतिहासकोशः**, र. तङ्गस्वामिशर्मा,
मद्रासविश्वविद्यालयः, मद्रास्, १९८०
४. **उपनिषद्वाक्यमहाकोशः**, गजानन शम्भु साधले,
के. सी. पब्लिशर्स्, नवदेहली, १९९०
५. **वाचस्पत्यम्**, तारानाथ तर्कवाचस्पतिः भट्टाचार्यः,
चौखम्बा संस्कृत सिरीज् ऑफिस् वाराणसी, १९९०
६. **शाङ्करवेदान्तकोषः**, डॉ. मुरलीधरपाण्डेयः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९८
७. **संस्कृत-इंग्लिश्-कोशः**, मोनियर्-विलियम्स्,
ऑक्सफोर्ड-प्रेस्, लण्डन, १८७२
८. **संस्कृत-हिन्दी-कोशः**, वामन शिवराम आप्टे,
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०११
९. **हलायुधकोशः (अभिधानरत्नमाला)**, हलायुधभट्टः,
हिन्दी समिति, उत्तरप्रदेश, १९५७

## हस्तलिपिसूचिग्रन्थाः -

1. **A Catalogue of Sanskrit Prakrit Manuscripts in the Central Provinces and Berar,** Rai Bahadur Hiralal,
Government of the Central Provinces and Berar, Nagpur, 1926
2. **A Catalogue of The Samskrit Manuscripts in the Adyar Library (Part II)**,
The Adyar Library, Madras, 1928
3. **A Descriptive Catalogue of Sanskrit Manuscripts, Vol. IX,**
The Adyar Library and Research Centre, Madras, 1972
4. **A Descriptive Catalogue of the Sanskrit Manuscripts in the Sarasvati Mahal Library, Tanjore**, Ed. P.S. Sastri,
Sri Vani Vilas Press, Sriramgam, 1930
5. **New Catalogus Catalogorum**, **Vol. IV**, Dr. V.Raghavan,
University of Madras, Madras, 1968
6. **New Catalogus Catalogorum, Vol.V**, Dr. V.Raghavan,
University of Madras, Madras, 1968
7. **An Alphabetical List of Manuscritps in the Oriental Institute, Baroda. Vol.1**, Raghavan Nambiyar Siromani,
Oriental Institute, Baroda, 1972

## शोधनिबन्धग्रन्थाः -


१. **शङ्करशर्मकृतस्य अलङ्कारशङ्करस्य समीक्षितपाठसम्पादनं विवेचनात्मकम् अध्ययनञ्च,** डॉ. नरेन्द्रकुमार लालजीभाई पण्ड्या, गुजरातविश्वविद्यालयः, अहमदाबाद, २००५

२. **श्रीधरीयव्याख्यानमवलब्य विष्णुपुराणे अद्वैततत्त्वसमीक्षा,** डॉ. गणेश ईश्वर भट्टः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००७

३. **श्रीमद्भगवद्गीतायां महावाक्यार्थसमन्वयः,** डॉ. महाबलेश्वर भट्टः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, १९९६


## शोधपत्रिकाः -


१. **वाक्यार्थभारती (अङ्कः १),** सं- वेम्पटी कुटुम्बशास्त्री, राजीवगान्धीपरिसरः, शृङ्गेरी, २०११

२. **वाक्यार्थभारती (अङ्कः २),** राजीवगान्धीपरिसरः, शृङ्गेरी, २०१२

३. **संस्कृतविमर्शः (विश्वसंस्कृत-सम्मेलन- विशेषाङ्कः),** सं- कमलाकान्त मिश्रः, राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली, १९९७

४. **सरस्वती सुषमा,** सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, १९६५

५. **बुधरञ्जनी (अङ्कः ७),** राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २०१०

६. **ब्रह्मविद्या,** अड्यार - शोधकेन्द्रम्, अड्यारग्रन्थालयः, मद्रास्, १९९७


## अप्रकाशितग्रन्थाः -


१. **अद्वैतरसमञ्जरी,** सदाशिवब्रह्मेन्द्रः, Adyar Library and Research Centre, Channai, D.IX, P. 591-595

२. **अद्वैतसुधाबिन्दुः,** श्रीकृष्णशर्मा, Gaekwad Oriental Research Institute, Baroda, Mss. No. 7999

३. **कैवल्यदीपिका - सव्याख्या,** श्रीबोधानन्दः, Government Oriental Manuscript Library, Madras, MT.2934



ग्रन्थकर्तृपरिचयः

इमे डॉ. जानकीशरण-आचार्यमहोदयाः राजस्थान-राज्यस्थ-जोधपुरमण्डले 1985 तमे वर्षे लब्धजन्मानः जोधपुरस्थ-जयनारायणव्यास-विश्वविद्यालयात् संस्कृत-विषये बी.ए. (ओनर्स) इत्युपाधिं सम्पाद्य तिरुपतिस्थ-राष्ट्रियसंस्कृत-विद्यापीठात् वेदान्ते "शास्त्री" इत्युपाधिम् अलभन्त। एभिः विद्वद्भिः राष्ट्रियसंस्कृतसंस्थानस्य (मानित-विश्वविद्यालयस्य) शृङ्गेरीस्थ-राजीवगान्धीपरिसरात् अद्वैतवेदान्ते सस्वर्णपदकम् "आचार्यः" इत्युपाधिः प्राप्तः। आचार्यकक्षायां सर्वाधिकान् अङ्कान् सम्प्राप्य इमे राष्ट्रियसंस्कृतसंस्थानेन (मानितविश्वविद्यालयेन) शृङ्गेरीस्थ-श्रीशारदामठेन च स्वर्णपदकेन सभाजिताः। एभिः विश्वविद्यालय-अनुदान-आयोगस्य (UGC) राष्ट्रियपात्रता-परीक्षा (NET) कनिष्ठशोधाध्येतृवृत्त्या (JRF) सह सम्पादिता। एतैः सम्पादिते द्वे पुस्तके प्रकाशिते वर्तते। राष्ट्रिय-अन्ताराष्ट्रियपत्रिकासु पञ्चविंशत्यधिकाः शोधलेखाः प्रकाशिताः सन्ति।

सम्प्रति एते वेरावलस्थ-श्रीसोमनाथसंस्कृत-विश्वविद्यालये दर्शनविषये व्याख्यातृपदमलङ्कुर्वन्ति।

ISBN : 978-93-83097-25-8

Price : ₹ 425.00